अथ शाकलसंहिता सपरिशिष्टा प्रारभ्यते ॥

॥ श्रीः ॥

अथ ऋग्वेदाम्नाये शाकलके सूक्तमतीकऋक्संख्याऋषिदैवतच्छंदांस्यनुक्रमिष्यामो यथोपदेशं नह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्यां श्रेयोधिगच्छतीत्येताभ्यामेवानेवंविदोयातयामानि छन्दांसि भवन्ति स्थाणुं वर्च्छति गर्तं वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते ॥ १ ॥ अथ ऋषयः शतर्चिनआद्ये मण्डलेन्त्येक्षुद्रसूक्तामहासूक्तामध्यमेषु माध्यमाः क्वचित्कथंचिदविशेषितं ब्रह्मऋषिमन्त्रियमनुक्तगोत्रमाङ्गिरसं विद्याद्यस्य वाक्यं सऋषिर्यातेनोच्यते सा देवतार्थेप्सवऋषयोदेवताश्छन्दोभिरभ्यधावंस्तिस्रएव देवताः क्षित्यन्तरिक्षद्युस्थानाअग्निर्वायुः सूर्यइत्येवं व्याहृतयः प्रोक्ताव्यस्ताः समस्तानां प्रजापतिरोंकारः सर्वदेवत्यः पारमेष्ठ्यो वा ब्रह्मोदैवआध्यात्मिकस्तत्तत्स्थानाअन्यास्तद्विभूतयःकर्मपृथक्त्वाद्विपृथगभिधानस्तुतयोभवन्त्येकैव वा महानात्मा देवता सत्सूर्यइत्याचक्षते । सहि सर्वभूतात्मा । तदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेति । तद्विभूतयोन्यादेवतास्तदप्येतदृचोक्तमिन्द्रंमित्रंवरुणमग्निमाहुरित्यथाभिधानं त्वनुक्रमिष्यामः प्रायेणैन्द्रे मरुतोराज्ञां च दानस्तुतयः ॥ २ ॥ अथ च्छन्दांसि गायत्र्यु-

ष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्टयत्यष्टीधृत्यतिधृतयश्चतुर्विंशत्यक्षरादीनि च-
तुरुत्तराणि न्यूनाधिकैनैकेन निचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्ष-
रीभावान् व्यूहेदाद्ये तु सप्तवर्गेपादविशेषात्संज्ञाविशेषास्तानुक्रामन्तएवोदाहरिष्यामोविराड्पा-
विराट्स्थानाश्चवहूनाअपि त्रिष्टुभएवेत्युद्देशस्तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागताइति
संज्ञाअनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ ३ ॥ प्रथमं छन्दस्त्रिपदागायत्री पंचकाश्चत्वारःषट्-
कश्चैकश्चतुर्थश्चतुष्कोवा पदपंक्तिः षट्सप्तैकादशा उष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः षट्
कश्चेदतिनिचृदशकश्चेद्यवमध्या यस्यास्तु षट्कसप्तकाष्टकाः सा वर्धमाना विपरीतामतिष्टाद्वौषट्कौ
सप्तकश्च ह्रसीयसी ॥ ४ ॥ द्वितीयमुष्णिक्त्रिपदान्योद्वादशकआद्यश्चेत्पुरउष्णिग्मध्यमश्चेत्ककुप्त्रै-
ष्टुभजागतचतुष्काककुब्न्यंकुशिरैकादशिनोः परः षट्कस्तनुशिरामध्ये चेत्पिपीलिकमध्या आद्यः
पंचकस्त्रयोष्टकानुष्टुब्गर्भा चतुःसप्तकोष्णिगेव ॥ ५ ॥ तृतीयमनुष्टुप् पंचपंचकाः षट्कश्चैकोमहा-
पदपंक्तिर्जागतावष्टकश्चकृतिर्मध्ये चेदष्टकः पिपीलिकमध्या नवकयोर्मध्ये जागतः काविराण्नवकैरा-
जत्रयोदशैर्नष्टरूपा दशकास्त्रयोविराळेकादशका वा ॥६॥ चतुर्थं बृहती तृतीयोद्वादशकआद्य(शाद्य)-

श्चेत्पुरस्ताद्बृहती द्वितीयश्चेन्यंकुसारिण्युरोबृहती स्कंधोग्रीवी वान्सश्चेदुपरिष्टाद्बृहत्यष्टिनोर्मध्ये दशकौ विष्टारबृहती त्रिजागतोर्ध्वबृहती त्रयोदशिनोर्मध्येष्टकः पिपीलिकमध्या नवकाष्ट्येकादश्यष्टिनोविषमपदा चतुर्नवका बृहत्येव ॥ ७ ॥ पंचमं पंक्तिःपंचपदाथ चतुष्पदाविराड्दशकैरयुजौ जागतौ सतोबृहती युजौ चेद्विपरीताऽऽद्यौ चेत्पस्तारपंक्तिरन्त्यौ चेदास्तारपंक्तिराद्यान्त्यौ चेत्संस्तारपंक्तिर्मध्यमौ चेद्विष्टारपंक्तिः ॥ ८ ॥ षष्ठं त्रिष्टुप् त्रैष्टुभपदा द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुप् वैराजौ जागतौ चाभिसारिणी नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानैकादशिनस्त्रयोष्टकश्च विराड्रूपा द्वादशिनस्त्रयोष्टकश्च ज्योतिष्मती यतोष्टकस्ततोज्योतिश्चत्वारोष्टकाजागतश्च महाबृहती मध्ये चेद्यवमध्याऽऽद्यौदशकावष्टकास्त्रयः पंक्त्युत्तराविराड्रूपूर्वा वा ॥ ९ ॥ सप्तमं जगती जागतपदाष्टिनस्त्रयः स्यौ चद्वौमहासतोबृहत्यष्टकौ सप्तकः पट्कोदशकोनवकश्चपळष्टका वा महापंक्तिः ॥ १० ॥ अथ प्रगाथाबृहतीसतोबृहत्यौ वार्हतः ककुप्चेत्पूर्वाकाकुभो महाबृहतीमहासतोबृहत्यौमहावार्हतोबृहतीविपरीते विपरीतोत्तरोनुष्टुब्गायत्र्यौ चानुष्टुभावनुष्टुम्मुखास्तृचाइत्युक्तेः ॥ ११ ॥ सूक्तसंख्यानुवर्ततअन्यस्याः सूक्तसंख्यायाऋषिश्चान्य-

स्माद्येत्वाविशिष्टस्तु हि ह वै तच्छन्दोविशिष्टान्यृषिदैवतच्छंदांसि द्वि त्रि चतुः पंच षट् सूक्तभां-
सि यथासंख्यमनिरुक्ता संख्याविंशतिरनादेशे त्विन्द्रोदेवता त्रिष्टुप्छन्दः प्रगाथावार्हताविंशिका-
द्विपदाविराजस्तदर्धमेकपदाद्विर्द्विपदास्त्वृचः समामनन्त्ययुक्ष्वन्त्या द्विपदैव मण्डलादिष्वाग्नेयमैन्द्रा-
ग्निष्टुवन्तस्य सूक्तस्य शिष्टाजगत्यआदौ गायत्रं माग्घिरण्यस्तूपात् ॥ १२ ॥ गोधायोपाविश्ववारा-
पालोपनिषन्निषत् ॥ ब्रह्मजायाजुहूर्नामागस्त्यस्यस्वसादितिः ॥ इन्द्राणीचेन्द्रमातावसरमारोमशो-
र्वशी ॥ लोपामुद्राचनद्यश्चयमीनारीचशश्वती ॥ श्रीर्लाक्षासार्पराज्ञीवाक्श्रद्धामेधाचदक्षिणा ॥ रा-
त्रीसूर्याचसावित्रीब्रह्मवादिन्यईरिताः ॥ १३ ॥ पादाअतिजगत्यांतुत्रयोद्वादशकाः परौ ॥ अष्टकौ
शक्करीपादाःसप्तैवाष्टाक्षराः स्मृताः (क्षरइत्यपि) ॥ अतिशाक्करपादौद्वावादितःषोळशाक्षरौ ॥ जाग-
तश्चाष्टकावष्टि पादाःषोळशकास्त्रयः ॥ अष्टकौचात्यष्टिपादौजागतौचाष्टक(का)स्त्रयः ॥ जागतश्चाष्ट-
कश्चाथधृतिपादौतुजागतौ ॥ पादास्त्रयोष्टकाश्चाथषोळशाक्षरएवच ॥ अष्टकश्चाथातिधृतौद्वौपादौ-
जागतौततः (जागतप्योळशास्त्रयः) ॥ त्रयोष्टकाजागतश्चतथाष्टाक्षरकावपि(रइत्यपि) ॥ परः-
सप्तकपादास्तुप्रसंगात्स्वयमीरिताः ॥ १४ ॥ इतिपरिभाषा ॥

S. N.....

ॐ

अग्निनवमधुच्छन्दावैश्वामित्रोवायोवायव्यैन्द्रवायवमैत्रावरुणास्तृचाअश्विनाद्वादशाश्विनैन्द्रवैश्व-
देवसारस्वतास्तृचाः सप्तैताः मउगदेवताः सुरूपकृत्नुंदशैन्द्रमातुयुञ्जन्त्सादहेसेताःपण्मारुतोवीकुर्वि-
दिन्द्रेणेत्यैन्द्रयौचेन्द्रमिदेन्द्रसानसिमिन्द्रेहिगायन्तिद्वादशानुष्टुभं त्विन्द्रमष्टौजेतामाधुच्छन्दसोग्निद्वा-
दशमेधातिथिः काण्वआग्नेयमग्निनेतिपादोह्यग्निदैवतोनिर्मथ्याहवनीयाभ्यांसुसमिद्धइतीध्मः सामि-
द्धोवाग्निस्तनूनपान्नराशं सइळोवर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौमचेतसौतिस्रोदेव्यः सरस्वती
ळाभारत्यस्त्वष्टावनस्पतिः स्वाहाकृतयइतिप्रत्यृचंदेवताएतदाप्रीसूक्तमेतेनान्यान्युक्तदेवतान्येकादश-
कानित्वनाराशंसान्याप्रशब्दोक्तान्य (क्तानित्व) तनूनपान्त्यैभिर्वैश्वदेवमिन्द्रसोममृतव्यंतत्रैन्द्रीमारु-
तीत्वाष्ट्याग्नेय्यैन्द्रीमैत्रावरुणीचतस्रोद्रविणोदसआश्विन्याग्नेयीत्यृतुदेवताः सर्वत्रात्मानवैन्द्रावरुण-

योऽग्नीन्द्रावरुणंयुवाकुपादनिचृन्नौसोमानामितिपभ्रात्राह्मणस्पत्याश्चतुर्थ्यामिन्द्रश्चसोमश्चपञ्चम्यांदाक्षिणा-
चान्याःसादसस्पत्यानाराशंसीवान्त्यामतित्यमाग्निमारुतम् ॥ १ ॥

॥ ३ ॥

आग्निं नव वैश्वामित्रोमधुच्छन्दाअग्निर्गायत्री ।

१ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् । होतारंरत्नधातमम् १ अग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनैरुत । सदेवाँएहवक्षति २ अग्निनारयिमश्नवत्पोषमेवदिवेदिवे । यशसंवीरवत्तमम् ३ अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि । सइद्देवेषुगच्छति ४ अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः । देवोदेवेभिरा-
गमत् ५ ॥ १ ॥ यदङ्गदाशुषेत्वमग्नेभद्रंकरिष्यसि । तवेत्तत्सत्यमङ्गिरः ६ उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयम् । नमोभरन्तएमसि ७ राजन्तमध्वरा-
णांगोपामृतस्यदीदिविम् । वर्धमानंस्वेदमे ८ सनःपितेवसूनवेग्नेसूपायनोभव ।
सचस्वानःस्वस्तये ९ ॥ २ ॥

॥ ३ ॥

वायोनव मधुच्छन्दाः त्रयाणांतृचां वायुरिन्द्रवायूमित्रावरुणौ गायत्री ।

२ वायवायाहिदर्शतेमेसोमाअरंकृताः । तेषांपाहिश्रुधीहवम् १ दाय-
उक्थेभिर्जरन्तेत्वामच्छाजरितारः । सुतसोमाअहर्विदः २ वायोतवप्रपृञ्चती-
धेनाजिगातिदाशुषे । उरूचीसोमपीतये ३ इन्द्रवायूइमेसुताउपप्रयोभिरागत-
म् । इन्दवोवामुशन्तिहि ४ वायविन्द्रश्चचेतथःसुतानांवाजिनीवसू । ता-
वायातमुपद्रवत् ५ ॥ ३ ॥ वायविन्द्रश्चसुन्वतआयातमुपनिष्कृतम् । माक्षिव १-
त्याधियानरा ६ मित्रंहुवेपूतदक्षंवरुणंचरिशादसम् । धियंघृताचींसाधन्ता ७
ऋतेनमित्रावरुणावृतावृधावृतस्पृशा । ऋतुंबृहन्तमाशाथे ८ क्रवीनोमित्राव-
रुणातुविजाताउरुक्षया । दक्षंदधातेअपसम् १ ॥ ४ ॥

अश्विना द्वादश मधुच्छन्दाश्चतुर्णांत्रिचां अश्विनौइन्द्रःविश्वेदेवाःसरस्वती गायत्री ।

३ अश्विनायज्वरीरिषोद्रवत्पाणीशुभस्पती । पुरुभुजाचनस्यतम् १ अश्विनापुरुदंससानराशवीरयाधिया । विष्ण्यावनंतंगिरः २ दस्रायुवाकवःसुतानासंत्यावृक्तबर्हिषः । आयातंरुद्रवर्तनी ३ इन्द्रायाहिचित्रभानोसुताइमेत्वायवः । अण्वीभिस्तनापूतासः ४ इन्द्रायाहिधियेषितोविप्रजूतःसुतावतः । उपब्रह्माणिवाघतः ५ इन्द्रायाहितूतुजानउपब्रह्माणिहरिवः । सुतेदधिष्वनश्चनः ६ ॥ ५ ॥ ओमासश्चर्षणीधृतोविश्वेदेवासआगत । दाश्वांसोदाशुषःसुतम् ७ विश्वेदेवासोअस्रिधएहिमायासोअद्रुहः । मेधंजुषन्तवह्नयः ९ पावकानःसरस्वतीवाजेभिर्वाजिनीवती । यज्ञंवष्टुधियावसुः १० चोदयित्रीसूनृतानांचेतन्तीसुमतीनाम् । यज्ञंदधेसरस्व- ॥ ४ ॥

ती ११ महोअर्णःसरस्वतीप्रचेतयतिकेतुना । धियोविश्वाविराजति १२ ॥ ६ ॥
॥ इति शाकलऋक्संहितायां प्रथमेमण्डले प्रथमोनुवाकः ॥ १ ॥

सुरूपकृत्नु दश मधुच्छन्दाः इन्द्रोगायत्री ।

४ सुरूपकृत्नुमूतयेसुदुघामिवगोदुहे । जुहूमसिद्यविद्यवि १ उप्नःसवनागहिसोमस्यसोमपाःपिव । गोदाइद्रेवतोमदः २ अथातेअन्तमानांविद्यामसुमतीनाम् । मानोअतिख्यआगहि ३ परेहिविग्रमस्तृतमिन्द्रंपृच्छाविपश्चितम् । यस्तेसखिभ्यआवरम् ४ उतब्रुवन्तुनोनिदोनिरन्यतश्चिदारत । दधानाइन्द्रइदुवः ५ ॥ ७ ॥ उतनःसुभगाँअरिर्वोचेयुर्दस्मकृष्टयः । स्यामेदिन्द्रस्यशर्मणि ६ एमाशुमाशवेभरयज्ञश्रियंनृमादनम् । पतयन्मन्दयत्सखम् ७ अस्यपीत्वाशतक्रतोघनोवृत्राणामभवः । प्रावोवाजेषुवाजिनम् ८ तंत्वावाजेषुवाजिनंवा-

जयामःशतक्रतो । धनानामिन्द्रसातये १ योरायोऽवनिर्महान्त्सुपारःसुन्वतः सखा । तस्माइन्द्रायगायत १० ॥ ८ ॥

आतु दश मधुच्छन्दाइन्द्रोगायत्री ।

५ आत्वेतानिषीदतेन्द्रमभिप्रगायत । सखायःस्तोमंवाहसः १ पुरूतमंपुरूणामीशानंवार्याणाम् । इन्द्रंसोमेसचासुते २ सघानोयोगआभुवत्सरायेसपुरंन्ध्याम् । गमद्राजेभिरासनः ३ यस्यसंस्थेनवृण्वतेहरीसमत्सुशत्रवः । तस्माइन्द्रायगायत ४ सुतपावेसुताइमेशुचयोयन्तिवीतये । सोमासोदध्याशिरः ५ ॥ १ ॥ त्वंसुतस्यपीतयेसद्योवृद्धोअजायथाः । इन्द्रज्यैष्ठ्यायसुक्रतो ६ आत्वाविशन्त्वाशवःसोमासइन्द्रगिर्वणः । शंतेसन्तुप्रचेतसे ७ त्वांस्तोमाअवीवृधन्त्वामुक्थाशंतक्रतो । त्वांवर्धन्तुनोगिरः ८ अक्षितोतिःसनेदिमंवाजमिन्द्रः

सहस्रिणम् । यस्मिन्विश्वानिपौंस्या १ मानोमर्ताअभिद्रुहन्तनूनामिन्द्रगिर्वणः । ईशानोयवयावुधम् १० ॥ १० ॥

युञ्जन्ति दश मधुच्छन्दाःआद्यानांतिसृणामिन्द्रःततःपण्णांमरुतःवीळुचिदिन्द्रेणेतिद्वयोरिन्द्रश्च दशम्याइद्रः गायत्री ।

६ युञ्जन्तिब्रध्नमरुषंचरन्तंपरितस्थुषः । रोचन्तेरोचनादिवि १ युञ्जन्त्यस्यकाम्याहरीविपक्षसारथे । शोणाधृष्णूनृवाहसा २ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे । समुषद्भिरजायथाः ३ आदह्स्वधामनुपुनर्गर्भत्वमेरिरे । दधानानामंयज्ञियम् ४ वीळुचिदारुजत्नुभिर्गुहाचिदिन्द्रवह्निभिः । अविन्ददुस्रियाअनुं ५ ॥ ११ ॥ देवयन्तोयथामतिमच्छाविदद्गिरः । महामनूषतश्रुतम् ६ इन्द्रेणसंहिदृक्षसेसंजग्मानोअबिभ्युषा । मन्दूसमानवर्चसा ७ अनवद्यैरभिद्युभि-

मंखःसहस्वदर्चति । गणैरिन्द्रस्यकाम्यैः ८ अतःपरिज्मन्नागंहिदिवोवारोचनादधि । समस्मिन्नृजतेगिरः ९ इतोवासातिमीमहेदिवोवापार्थिवादधि । इन्द्रंमहोवारजसः १० ॥ १२ ॥

इन्द्रमिदश मधुच्छन्दा इन्द्रोगायत्री ।

७ इन्द्रमिद्वाथिनोवृहद्विन्द्रमर्कोभिरर्किणः । इन्द्रंवाणीरनूषत १ इन्द्रइद्धर्योःसचासंमिश्लआवचोयुजा । इन्द्रोवज्रीहिरण्ययः २ इन्द्रोदीर्घायचक्षसआसूर्यंरोहयद्दिवि । विगोभिरद्रिमैरयत् ३ इन्द्रवाजेषुनोवसहस्त्रप्रधनेषुच । उग्रउग्राभिरूतिभिः ४ इन्द्रंवयंमहाधनइन्द्रमर्भेहवामहे । युजंवृत्रेषुवज्रिणम् ५ ॥ १३ ॥ सनोवपन्नमुचरुसत्रादावन्नपावृधि । अस्मभ्यमप्रतिष्कुतः ६ तुञ्जेतुन्नयउत्तरेस्तोमाइन्द्रस्यवज्रिणः । नविन्धेअस्यसुष्टुतिम् ७ वृषायूथेववंसगःकृष्टीरियत्यो

जेसा। ईशानोअप्रतिष्कुतः ८ यएकश्चर्षणीनांवसूनामिरज्यति। इन्द्रःपञ्चक्षितीनाम् १ इन्द्रंवोविश्वतस्परिहवामहेजनेभ्यः। अस्माकमस्तुकेवलः १० ॥ १४ ॥ इति प्रथमे द्वितीयोनुवाकः ॥ २ ॥

एन्द्र दश मधुच्छन्दाइन्द्रोगायत्री।

८ एन्द्रसानसिंरयिंसजित्वानंसदासहंम्। वर्पिष्ठमूतयेभर १ नियेनंमुष्टिहत्ययानिवृत्रारुणधांमहै। त्वोतासोन्यवंता २ इन्द्रत्वोतासआवयंवज्रंघनादंदीमहि। जयेमसंयुधिस्पृधः ३ वयंशूरेभिरस्तृभिरिन्द्रत्वर्यायुजावयम्। सास्ह्यामपृतन्यतः ४ महाँइन्द्रःपरश्चनुमंहित्वमस्तुवज्रिणे। द्यौर्नप्रथिनाशवः ५ ॥ १५ ॥ समोहेवायआशतनरंस्तोकस्यसनितौ। विप्रासोवाधियायवः ६ यः कुक्षिःसोमपातमःसमुद्रइवपिन्वते। उर्वीरापोनकाकुदः ७ एवाह्यस्यसूनृता-

विरुप्शीगोमतीमही । पुकाशाखानदाशुषे ८ एवाहितेविभूतयऊतयइन्द्रमावते । सुयश्चित्सन्तिदाशुषे ९ एवाह्यस्यकाम्यास्तोमउक्थंचशंस्या । इन्द्रायसोमपीतये १० ॥ १६ ॥

इन्द्रेहि दश मधुच्छन्दाइन्द्रोगायत्री ।

१ इन्द्रेहिमत्स्यन्धसोविश्वेभिःसोमपर्वभिः । महाँअभिष्टिरोजसा १ एमेनंसृजतासुतेमन्दिमिन्द्रायमन्दिनें । चक्रिविश्वानिचक्रये २ मत्स्वासुशिप्रमन्धिभिःस्तोमेभिर्विश्वचर्षणे । सचैषुसवनेष्वा ३ असृग्रमिन्द्रतेगिरःप्रतित्वामुदहासत । अजोषावृषभंपतिम् ४ संचोदयचित्रमर्वाग्राधइन्द्रवरेण्यम् । असदित्तेविभुप्रभु ५ ॥ १७ ॥ अस्मान्त्सुतत्रंचोदयेन्द्रराधसेमहतः । तुविद्युम्नयशस्वतः ६ संगोमदिन्द्रवाजवदस्मेपृथुश्रवोबृहत् । विश्वायुर्धेह्यक्षितम् ७ अ-

स्मेधेहिश्रवोबृहद्युम्नंसहस्रसातमम् । इन्द्रतारथिनीरिपः ८ वसोरिन्द्रंवसुपतिं-
गीभिर्गृणन्तंऋग्मियम् । होमगन्तारमूतयें ९ सुतेसुतेन्योकसेबृहद्बृहतएदरिः ।
इन्द्रायशूषमर्चति १० ॥ १८ ॥

गायन्ति द्वादश मधुच्छन्दाइन्द्रोनुष्टुप् ।

१० गायन्तित्वागायत्रिणोर्चन्त्यर्कमर्किणः । ब्रह्माणंस्त्वाशतक्रतउद्वंश-
मिवयेमिरे १ यत्सानोःसानुमारुहद्भूर्यस्पष्टकर्त्वम् । तदिन्द्रोअर्थंचेततियूथेनवृ-
ष्णिरेजति २ युक्ष्वाहिकेशिनाहरीवृषणाकक्ष्यप्रा । अथानइन्द्रसोमपागिरा-
मुपश्रुतिंचर ३ एहिस्तोमाँअभिस्वराभिगृणीह्यारुव । ब्रह्मंचनोवसोसचेन्द्र-
यज्ञंचवर्धय ४ उक्थमिन्द्रायशंस्यंवर्धनंपुरुनिष्षिधे । शक्रोयथासुतेषुणोरार-
णत्सख्येषुच ५ तमित्सखित्वईमहेतंरायेतंसुवीर्ये । सगक्रउतनःशकदिन्द्रोवसु-

दयमानः ६ ॥ ११ ॥ सुविवृतंसुनिरजमिन्द्रत्वादातभिष्यशः । गवामपव्रजं-
वृधिकृणुष्वराधोअद्रिवः ७ नाहित्वारोदसीउभेऋघायमाणमिन्वतः । जपःस्व-
र्वतीरपःसंगाअस्मभ्यंधूनुहि ८ आश्रुत्कर्णश्रुधीहवंनूचिद्दधिष्वमेगिरः । इन्द्र-
स्तोमंमिमंममकृष्वायुजाश्चिदन्तरम् ९ विद्माहित्वावृषन्तमंवाजेषुहवनश्रुतम् ।
वृषन्तमस्यहूमहऊतिंसहस्रसातमाम् १० आतूनइन्द्रकौशिकमन्दसानःसुतं-
पिब । नव्यमायुःप्रसूतिरकृधीसहस्रसामृषिम् ११ परित्वागिर्वणोगिरइमाभ-
वन्तुविश्वतः । वृद्धायुमनुवृद्धयोजुष्टाभवन्तुजुष्टयः १२ ॥ २० ॥

इन्द्रंविश्वाष्टौ मधुच्छन्दसोजेता इन्द्रोनुष्टुप् ।

११ इन्द्रंविश्वाअवीवृधन्त्समुद्रव्यचसंगिरः । रथीतमंरथीनांवाजानांसत्पतिं
पतिम् १ सख्येतइन्द्रवाजिनोमाभेमशवस्पते । त्वामभिप्रणोनुमोजेतारंम- ॥ ८ ॥

पराजितम् २ पूर्वीरिन्द्रस्यरातयोनविदस्यन्त्युतयः । यदीवाजस्यगोमतःस्तोतृभ्योमंहतेमघम् ३ पुरांभिन्दुर्युवाकविरमितौजाअजायत । इन्द्रोविश्वस्यकर्मणोधर्तावज्रीपुरुष्टुतः ४ त्वंबलस्यगोमतोपावरद्रिवोविलम् । त्वांदेवाअबिभ्युषस्तुज्यमानासआविषुः ५ तवाहंशूररातिभिःप्रत्यायंसिन्धुमावदन् । उपातिष्ठन्तगिर्वणोविदुष्टेतस्यकारवः ६ मायाभिरिन्द्रमायिनंत्वंशुष्णमवातिरः । विदुष्टेतस्यमेधिरास्तेपांश्रवांस्युत्तिर ७ इन्द्रमीशानमोजसाभिस्तोमाअनूषत । सहस्रंयस्यरातयउतवासन्तिभूयसीः ८ ॥ २१ ॥ इति प्रथमे तृतीयोनुवाकः ॥ ३ ॥

अग्निं द्वादश मेधातिथिः काण्वोग्निः अग्निनेतिपादोनिर्मथ्याहवनीयरूपश्चाग्निर्देवतः गायत्री ।

१२ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसम् । अस्ययज्ञस्यसुक्रतुम् १ अग्नि-

मंग्निंहवींमभिःसदाहवन्तविश्पतिम्। हव्यवाहंपुरुप्रियम् २ अग्नेंदेवाँइहावहजज्ञानोवृक्तबर्हिषे। असिहोतांनईड्यः ३ ताँउशतोविबोधययदग्नेयासिदूत्यम्। देवैरासत्सिबर्हिषि ४ घृताहवनदीदिवःप्रतिष्मरिषतोदह। अग्नेत्वंरक्षस्विनः ५ अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा। हव्यवाड्जुह्वास्यः ६ ॥ २२ ॥ कविमग्निमुपस्तुहिसत्यधर्माणमध्वरे। देवममीवचातनम् ७ यस्त्वामग्नेहविष्पतिर्दूतंदेवसपर्यति। तस्यस्मप्राविताभव ८ योअग्निंदेववीतयेहविष्मांआविवासति। तस्मैपावकमृळय ९ सनःपावकदीदिवोग्नेदेवाँइहावह। उपयज्ञंहविश्चनः १० सनस्तवानआभरगायत्रेणनवीयसा। रयिंवीरवतीमिषम् ११ अग्नेशुक्रेणशोचिषाविश्वाभिर्देवहूतिभिः। इमंस्तोमंजुषस्वनः १२ ॥ २३ ॥

सुसमिद्धोद्वादश मेधातिथिः इध्मःसमिद्धोवाग्निस्तनूनपात्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौहोतारौमचेतसौ तिस्रोदेव्यःसरस्वतीळाभारत्यस्त्वष्टा वनस्पतिःस्वाहाकृतय इतिमत्यृचंदैवतमाप्रगायत्रम् ।

१३ सुसंमिद्धोन आवहदेवाँअग्नेहविष्मते । होतःपावकयक्षिच १ मधुमंतंतनूनपाद्यज्ञंदेवेषुनःकवे । अद्याकृणुहिवीतये २ नराशंसमिहप्रियमस्मिन्यज्ञउपह्वये । मधुजिह्वंहविष्कृतम् ३ अग्नेसुखतमेरथेदेवाँईळितआवह । असिहोतामनुर्हितः ४ स्तृणीतबर्हिरानुषग्घृतपृष्ठंमनीषिणः । यत्रामृतस्यचक्षणम् ५ विश्रयन्तामृतावृधोद्वारोदेवीरसश्चतः । अद्यानूनंचयष्टवे ६ ॥ २४ ॥ नक्तोषासासुपेशसास्मिन्यज्ञउपह्वये । इदंनोबर्हिरासदे ७ तासुजिह्वाउपह्वयेहोतारादैव्याकवी । यज्ञंनोयक्षतामिमम् ८ इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः ।

बर्हिःसीदन्त्वास्रिधः १ इहत्वष्टारमग्रियंविश्वरूपमुपह्वये । अस्माकमस्तुकेवलः १० अवसृजावनस्पतेदेवदेवेभ्योहविः । प्रदातुरस्तुचेतनम् ११ स्वाहायज्ञंकृणोतनेन्द्राययज्वनोगृहे । तत्रदेवाँउपह्वये १२ ॥ २५ ॥

ऐभिर्द्वादश मेधातिथिर्विश्वेदेवागायत्री ।

१४ ऐभिरग्नेदुवोगिराविश्वेभिःसोमपीतये । देवेभिर्याहियक्षिच १ आत्वाकण्वाअहूषतगृणन्तिविप्रतेधियः । देवेभिरग्नआगहि २ इन्द्रवायूबृहस्पतिंमित्राग्निंपूषणंभगम् । आदित्यान्मारुतंगणम् ३ प्रवोभ्रियन्तइन्दवोमत्सरासोदयिष्णवः । द्रप्सामध्वंश्वमूपदः ४ ईळतेत्वामवस्यवःकण्वासोवृक्तबर्हिषः । हविष्मन्तोअरङ्कृतः ५ घृतपृष्ठामनोयुजोयेत्वावहन्तिवह्नयः । आदेवान्त्सोमपीतये ६ ॥ २६ ॥ तान्यजत्राँऋतावृधोग्नेपत्नीवतस्कृधि । मध्वःसुजिह्व-

पायय ७ येयजंत्रायईड्यास्तेतेपिवन्तुजिह्वया । मधोरग्नेवषट्कृति ८ आकीसूर्यस्यरोचनाद्विश्वान्देवाँउपर्वुधः । विप्रोहोतेहवक्षति ९ विश्वेभिःसोम्यंमध्वग्नइन्द्रेणवायुना । पिबामित्रस्यधामभिः १० त्वंहोतामनुहितोग्नेयज्ञेषुसीदसि । सेमंनोअध्वरंयज ११ युक्ष्वाह्यरुषीरथेहरितोदेवरोहितः । ताभिर्देवाँइहावह १२ ॥ २७ ॥

इन्द्रसोमंद्वादश मेधातिथिःआद्यानांपण्णामिन्द्रोमरुतस्त्वष्टाग्निरिन्द्रोमित्रावरुणौदेवता तत्रशतुर्णांद्रविणोदाःएकादश्याअश्विनौद्वादश्याअग्निः गायत्री (ऋतव्यंसूक्तम्) ।

१५ इंद्रसोमंपिवंऋतुनात्वाविशन्त्विन्दवः । मत्सरासस्तदोकसः १ मरुतः पिबंतऋतुनापोत्राद्यज्ञंपुनीतन । यूयंहिष्ठासुदानवः २ अभियज्ञंगृणीहिनोग्नावोनेष्टःपिबंऋतुना । त्वंहिरत्नधाअसि ३ अग्नेदेवाँइहावहसादयायोनिंपुत्रियु ।

परिभूपिवक्रतुना ४ ब्राह्मणादिन्द्रराधसः पिबासोमंमरुतूरनु । तवेद्धिसख्यमस्तृतम् ५ युवंदक्षंधृतव्रतुमित्रांवरुणदूळभम् । ऋतुनायज्ञमाशाथे ६ ॥२८॥द्रविणोदातम् ५ युवंदक्षंधृतव्रतुमित्रांवरुणदूळभम् । ऋतुनायज्ञमाशाथे ६ ॥२८॥द्रविणोदा-द्रविणसाग्रावहस्तासोअध्वरे । यज्ञेषुदेवमीळते ७ द्रविणोदाददातुनोवसूनियाद्रविणसाग्रावहस्तासोअध्वरे । यज्ञेषुदेवमीळते ७ द्रविणोदाददातुनोवसूनिया-निशृण्विरे । देवेषुतावनामहे ८ द्रविणोदाःपिपीषतिजुहोतुप्रचेतिष्ठत । नेष्टाहुतुनिशृण्विरे । देवेषुतावनामहे ८ द्रविणोदाःपिपीषतिजुहोतुप्रचेतिष्ठत । नेष्टाहुतुभिरिष्यत ९ यत्त्वातुरीयमृतुभिर्द्रविणोदोयजामहे । अधस्मानोददिर्भव १० भिरिष्यत ९ यत्त्वातुरीयमृतुभिर्द्रविणोदोयजामहे । अधस्मानोददिर्भव १० अश्विनापिवतंमधुदीद्यग्नीशुचिव्रता । ऋतुनायज्ञवाहसा ११ गार्हपत्येनसन्त्यअश्विनापिवतंमधुदीद्यग्नीशुचिव्रता । ऋतुनायज्ञवाहसा ११ गार्हपत्येनसन्त्य-ऋतुनायज्ञनीरसि । देवान्दैवयतेयज १२ ॥ २९ ॥

आत्वा नव मेधातिथिरिन्द्रोगायत्री ।

१६ आत्वांवहन्तुहरयोवृषणंसोमपीतये । इन्द्रत्वासूरचक्षसः १ इमाधानाघृतस्नुवोहरीइहोपवक्षतः । इन्द्रंसुखतमेरथे २ इन्द्रंप्रातर्हवामहइन्द्रंप्रयत्यध्वरे ॥ ११ ॥

इन्द्रंसोमंस्यपीतयें३उपंनःसुतमागंहिहरिभिरिन्द्रकेशिभिः । सुतेहित्वाहवामहे ४ सेमंनःस्तोममागह्युपेदंसवंनंसुतम् । गौरोनतृषितःपिंव ५ ॥ ३० ॥ इमेसोमांसइन्दवःसुतासोअधिबर्हिषि । ताँइन्द्रसहसेपिव ६ अयंतेस्तोमोंअग्रियोहृदिस्पृगस्तुशंतमः । अथासोमंसुतंपिंव ७ विश्वमित्सवंनंसुतमिन्द्रोमदायगच्छति । वृत्रहासोमंपीतये ८ सेमंनःकाममापृणगोभिरश्वैःशतक्रतो । स्तवामत्वास्वाध्यः ९ ॥ ३१ ॥

इन्द्रावरुणयोर्नव मेधातिथिरिन्द्रावरुणौ गायत्री युवाकुरितिद्वेपादनिचृतौ ।

१७ इन्द्रावरुणयोरहंसम्राजोरवआवृणे । तानोमृळातईदृशे १ गन्तारावृहिस्थोवसेहवंविप्रस्यमावतः । धर्तारांचर्षणीनाम् २ अनुकामंतर्पयेथामिन्द्रावरुणरायआ।तावांनेदिष्ठमीमहे३युवाकुहिशचींनांयुवाकुसुमतीनाम्।भूयामंवा-

जदात्रांम् ४ इन्द्रःसहस्रदात्रांवरुणःशंस्यांनाम्।क्रतुर्भवत्युक्थ्यः ५ ॥ ३२ ॥ तयोरि-
दवसावृयंसनेमनिचंधीमहिस्यादुतप्ररेचनम् ६ इन्द्रांवरुणवामहंहुवेचित्रायुरा-
धंसे । अस्मान्सुजिग्युपंस्कृतम् ७ इन्द्रांवरुणनूनुवांसिपांसन्तीपुधीष्वा । अ-
स्मभ्यंशर्मयच्छतम् ८ प्रवांमश्नोतुसुष्टुतिरिन्द्रांवरुणयांहुवे । यामृधाथेसुधस्तु-
तिम् १ ॥ ३३ ॥ इति चतुर्थोऽनुवाकः ॥ ४ ॥

सोमानं नव मेधातिथिःआद्यानांतिसृणांब्रह्मणस्पतिश्चतुर्थ्याब्रह्मणस्पतिरिन्द्रःसोमश्च पंचम्याब्रह्मण-
स्पत्यादितिस्तोदक्षिणाच ततस्तिसृणांसदसस्पतिरन्त्यायाःसदसस्पतिर्नराशंसोवा गायत्री ।

१८ सोमानंस्वरणंकृणुहिब्रह्मणस्पते । कक्षीवंन्तंयऔशिजः १ योरेवान्यो-
अंमीवहावसुवित्पुष्टिवर्धनः । सनःसिषक्तुययस्तुरः २ मानःशंसोअरुरुषोधूर्तिः
प्रणङ्मर्त्यस्य । रक्षाणोब्रह्मणस्पते ३ सदांवीरोनरिष्यतियमिन्द्रोब्रह्मणस्पतिः ।

सोमोंहिनोतिमर्त्यम् ४ त्वंतंब्रह्मणस्पतेसोमइन्द्रश्चमर्त्यम् । दक्षिणापात्वंहंसः ५ ॥ ३४ ॥ सदंसस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यम् । सनिंमेधामयासिषम् ६ यस्माद्रृतेनसिध्यतियज्ञोविपश्चितश्चन । सधीनांयोगमिन्वति ७ आदंध्नोतिहविष्कृतिंप्राञ्चंकृणोत्यध्वरम् । होत्रांदेवेषुगच्छति ८ नराशंसंसुधृष्टममपश्यंसप्रथस्तमम् । दिवोनसद्मखसम् ९ ॥ ३५ ॥

प्रतित्यं नव मेधातिथिराग्निमारुतं गायत्रम् ।

१ प्रतित्यंचारुमध्वरंगोपीथायप्रहूयसे । मरुद्भिरग्नआगहि १ नहिदेवोनमर्त्योमहस्तवक्रतुंपरः । मरुद्भिरग्नआगहि २ येमहोरजसोविदुर्विश्वेदेवासोअद्रुहः । मरुद्भिरग्नआगहि ३ यउग्राअर्कमानृचुरनाधृष्टासओजसा । मरुद्भिरग्नआगहि ४ येशुभ्राघोरवर्पसःसुक्षत्रासोरिशादसः । मरुद्भिरग्नआगहि ५

॥ ३६ ॥ येनाकस्याधिरोचनेदिविदेवासआसते । मरुद्भिरग्रआगहि ६ यईङ्खय-न्तिपर्वतान्तिरःसमुद्रमर्णवम् । मरुद्भिरग्रआगहि ७ आयेतन्वन्तिरश्मिभि-स्तिरःसमुद्रमोजसा । मरुद्भिरग्रआगहि ८ अभित्वापूर्वपीतयेसृजामिसोम्यंमधु । मरुद्भिरग्रआगहि ९ ॥ ३७ ॥ इति शाकलसं० प्रथमाष्टके प्रथमोध्यायः ॥ १ ॥

अयमष्टावार्भवमिहपञ्चैन्द्राग्नंभातर्युजासैकाचतस्रआश्विन्यस्तथासावित्र्यआग्नेय्यौद्वेदेवीनामेकैकेन्द्राणीवरुणान्यग्नायीनांद्यावापृथिव्येपार्थिवीपञ्चैष्णव्योतोदेवादैवीवातीव्राश्चतुर्विंशतिर्वायव्यैकैन्द्रवायव्योमैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाःशेषाआप्योन्त्याध्यर्धाग्नेय्यप्स्वन्तःपुरउष्णिक्परानुष्टुप्तिस्रश्चान्त्याएकविंशीप्रतिष्ठा कस्यपंचोनाजीगर्तिःशुनःशेपःसक्रुत्रिमोवैश्वामित्रोदेवरातोवारुणंतुत्रैष्टुभमादौकाय्याग्नेय्यौसावित्रस्तृचोगायत्रोस्यान्त्याभागीवा यच्चित्सैकावसिष्वदशाग्नेयंत्वश्वंसतोनागायत्रेन्त्यादैवीत्रिष्टुप्यत्रग्रावानवपञ्चनुष्टुवादि यच्चिद्धयौलूखल्यौपरमौसल्यौचप्रजापतेर्हरिश्चन्द्रस्यान्त्याचर्मप्रशंसावा यच्चित्सप्तपांक्तमावोद्वयधिकास्माकंपादनिचृच्छश्चत्रिष्टुप्परौतृचावाश्विनोपस्यौत्वमग्नेत्र्यूनाहिरण्यस्तूपआग्नेयांत्रिष्टुवन्त्याष्टमीपोळश्यौचेन्द्रस्यपञ्चोना ॥ २ ॥

अयमष्टौ मेधातिथिर्ऋभवोगायत्री ।

२० ॐ अयंदेवायजन्मनेस्तोमोविप्रेभिरास्या । अकारिरत्नधातमः १ यइन्द्रायवचोयुजातक्षुर्मनसाहरी । शमीभिर्यज्ञमाशत २ तक्षन्नासत्याभ्यांपरिज्मानंसुखंरथम् । तक्षन्धेनुंसंवर्दुघाम् ३ युवानापितरापुनःसत्यमन्त्राऋजूयवः । ऋभवोविष्ट्यक्रत ४ संवोमदासोअग्मतेन्द्रेणचमरुत्वता । आदित्येभिश्चराजभिः ५ ॥ १ ॥ उतत्यंचमसंनवंत्वष्टुर्देवस्यनिष्कृतम् । अकर्तचतुरःपुनः ६ तेनो रत्नानिधत्तनत्रिरासाप्तानिसुन्वते । एकमेकंसुशस्तिभिः ७ अधारयन्तवह्नयोभंजन्तसुकृत्यया । भागंदेवेषुयज्ञियम् ८ ॥ २ ॥

इहपण्मेधातिथिरिन्द्राग्नी गायत्री ।

२१ इहेन्द्राग्नीउपह्वयेतयोरित्स्तोममुश्मसि । तासोमंसोमपातमा १ ताय-

ज्ञेषुप्रशंसतेन्द्राग्नीशुंभतानरः। तागांयत्रेषुंगायत २ तामित्रस्यप्रशंस्तयइन्द्राग्नी
ताहंवामहे। सोमपासोमंपीतये ३ उग्रासन्ताहवामहउपेदंसवनंसुतम्। इन्द्राग्नी-
॥ १४ ॥ एहगंच्छताम् ४ तामहान्तासदस्पतीइन्द्राग्नीरक्षंउज्जतम्। अप्रजाःसन्त्वत्रिणः
५ तेनंसत्येनंजागृतमधिंप्रचेतुनैंपदे। इन्द्राग्नीशर्मंयच्छतम् ६ ॥ ३ ॥

प्रातर्युजाएकविंशतिर्मेधातिथिराद्यानांचतसृणामश्विनौ ततश्चतसृणांसविता ततोद्वयोरग्निः एका
दश्यादेव्यःद्वादश्याइन्द्राणीवरुणान्यग्राय्यस्तस्तोद्वयोर्द्यावापृथिव्यौपञ्चदश्यापृथिवी
ततःपण्णांविष्णुरतोदेवाइत्यस्यादेवावा गायत्री।

२२ प्रातर्युजाविबोधयाश्विनावेहगंच्छताम्। अस्यसोमंस्यपीतयें १ यासु-
रथांरथीतंमोभादेवादिविस्पृशां। अश्विनाताहंवामहे २ यावांकशामधुंम-
त्यश्विनासूनृतावती। तयायज्ञंमिमिक्षतम् ३ नहिवामस्तिदूरकेयत्रारथेनगच्छं- ॥ १४ ॥

थः । अश्विनासोमिनोगृहम् ४ हिरण्यपाणिमूतयेसवितारमुपह्वये । सचेत्तादेवतापदम् ५ ॥ ४ ॥ अपांनपातमवसेसवितारमुपस्तुहि । तस्यव्रतान्युश्मसि ६ विभक्तारंहवामहेवसोश्चित्रस्यराधसः । सवितारंनृचक्षसम् ७ सखायआनिषीदतसवितास्तोम्योनुनः । दाताराधांसिशुम्भति ८ अग्नेपत्नीरिहावहदेवानामुशतीरुप । त्वष्टारंसोमपीतये ९ आग्नाअग्नइहावसेहोत्रांयविष्टभारतीम् । वरूत्रींविषणावह १० ॥ ५ ॥ अभिनोदेवीरवसामहःशर्मणानृपत्नीः । अच्छिन्नपत्राःसचन्ताम् ११ इहेन्द्राणीमुपह्वयेवरुणानींस्वस्तये । अग्नायीसोमपीतये १२ महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षताम् । पिपृतांनोभरीमाभिः १३ तयोरिद्घृतवत्पयोविप्रारिहन्तिधीतिभिः । गन्धर्वस्यध्रुवेपदे १४ स्योनापृथिविभवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथः १५ ॥ ६ ॥ अतोदेवाअवन्तु-

नोयतोविष्णुर्विचक्रमे । पृथिव्याःसप्तधामभिः १६ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपांसुरे १७ त्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः । अतोधर्माणिधारयन् १८ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे । इन्द्रस्ययुज्यःसखा १९ तद्विष्णोःपरमंपदंसदापश्यन्तिसूरयः । दिवीवचक्षुरातंतम् २० तद्विप्रासोविपन्यवोजागृवांसःसमिन्धते । विष्णोर्यत्परमंपदम् २१ ॥ ७ ॥

तीव्राश्चत्वारिंशातिर्मेधातिथिःमथमायावायुस्ततोद्वयोरिन्द्रवायू ततश्चतसृणांतृचांमित्रावरुणोइन्द्रो मरुत्वान्विश्वेदेवाःपूषाशिष्टानामापःअन्त्याध्यर्धाआग्नेयी गायत्री । एकोनविंशी पुरउष्णिक् ततोनुष्टुभः एकविंशी प्रतिष्ठा ।

२३ तीव्राःसोमासआगह्याशीर्वन्तःसुताइमे । वायोतान्प्रस्थितान्पिव १ उभादेवादिविस्पृशेन्द्रवायूहवामहे । अस्यसोमस्यपीतये २ इन्द्रवायूमनोजुवा ॥ १५ ॥

वाविप्राहवन्तऊतये । सहस्राक्षाधियस्पतीं ३ मित्रंवयंहवामहेवरुणंसोमंपीतये । जज्ञानापूतदक्षसा ४ ऋतेनयावृतावृधावृतस्यज्योतिषस्पती । तामित्रावरुणाहुवे ५ ॥ ८ ॥ वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः । करंतांनःसुराधसः ६ मरुत्वन्तंहवामहइन्द्रमासोमंपीतये । सजूर्गणेनंतृम्पतु ७ इन्द्रज्येष्ठामरुद्गणादेवासःपूषरातयः । विश्वेममंश्रुताहवम् ८ हतवृत्रंसुदानवइन्द्रेणसहसायुजा । मानोदुःशंसईशत ९ विश्वान्देवान्हवामहेमरुतःसोमंपीतये । उग्राहिपृश्निमातरः १० ॥ ९ ॥ जयतामिवतन्यतुर्मरुतामेतिधृष्णुया । यच्छुभंयाथनानरः ११ हस्काराद्विद्युतस्पर्यतोजाताअवन्तुनः । मरुतोमृळयन्तुनः १२ आपूषञ्चित्रवर्हिषमाघृणेधरुणंदिवः । आजानुट्टंयथापशुम् १३ पूषाराजानमाघृणिरपगूळ्हंगुहाहितम् । अविन्दच्चित्रवर्हिषम् १४ उतोसमद्यामिन्दुभिःप-

डयुक्ताँअनुसेविधत् । गोभिर्यवंनचर्कृषत् १५ ॥ १० ॥ अम्बयोयन्त्यध्वे-
भिर्जामयोअध्वरीयताम् । पृञ्चतीर्मधुनापयः १६ अमूर्याउपसूर्ययाभिर्वासू-
र्यैःसह । तानोहिन्वन्त्वध्वरम् १७ अपोदेवीरुपह्वयेयत्रगावःपिबन्तिनः । सि-
न्धुभ्यःकर्त्वंहविः १८ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तये । देवाभवं-
तवाजिनः १९ अप्सुमेसोमोअब्रवीदन्तर्विश्वानिभेषजा । अग्निंचविश्वशम्भुवमा-
पंश्चविश्वभेषजीः २० ॥ ११ ॥ आपःपृणीतभेषजंवरूथंतन्वे३मम । ज्योक्-
चसूर्यंदृशे २१ इदमापःप्रवहतयत्किञ्चदुरितंमयि । यद्वाहमभिदुद्रोहयद्वाशेपउ-
तानृतम् २२ आपोअद्यान्वचारिषंरसेनसमगस्महि । पयस्वानग्नआगहितंमासं-
सृजवर्चसा २३ संमाग्नेवर्चसासृजसंप्रजयासमायुषा । विद्युमैंअस्यदेवाइन्द्रो
विद्यात्सहऋषिभिः २४ ॥ १२ ॥ इति शाकलस० प्रथमेपञ्चमोनुवाकः ॥ ५ ॥

कस्यपश्चोनाआजीगर्तिःशुनःशेपःसक्त्रिमोवैश्वामित्रोदेवरातः वरुणः प्रथमायाःप्रजाप-
तिर्द्वितीयायाअग्निःअभित्वेतितृचःसावित्रःगायत्रः शिष्टास्त्रिष्टुभः ।

२४ कस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनामं । कोनोमह्याअ-
दितयेपुनर्दात्पितरंचदृशेयंमातरंच १ अग्नेर्वयंप्रथमस्यामृतानांमनामहेचारु-
देवस्यनामं । सनोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच २ अभित्वादे-
वसवितरीशानंवार्याणाम् । सदावन्भागमीमहे ३ यश्चिद्धितंइत्थाभगंःशशमा
नःपुरानिदः । अद्वेषोहस्तयोर्दधे ४ भगंभक्तस्यतेवयमुदशेमतावावंसा । मूर्धानं-
रायआरभे ५ ॥ १३ ॥ नहितेक्षत्रंनसहोनमन्युंवयश्चनामीपतयंन्तआपुः । नेमा-
आपोअनिमिषंचरन्तीर्नयेवातस्यप्रमिनन्त्यभ्वम् ६ अवुध्नेराजावरुणोवनस्यो
ध्वंस्तूपंददतेपूतदक्षः । नीचीनाःस्युरुपरिबुध्नएषामस्मेअन्तर्निहिताःकेतवःस्युः

७ उरुंहिराजावरुणश्चकारसूर्यायपन्थामन्वेतवाउ । अपदेपादाप्रतिधातवेक-
रुतापवक्ताहृदयाविधश्चित् ८ शतंतेराजन्भिषजःसहस्रंमुर्वीगंभीरासुमतिष्टेअ-
स्तु । बाधस्वदूरेनिर्ऋतिंपराचैःकृतंचिदेनःप्रमुमुग्ध्यस्मत् ९ अमीयऋक्षानि-
र्हितासउच्चानक्तंदृश्रेकुहचिद्दिवेयुः । अदब्धानिवरुणस्यव्रतानिविचाकशच्च-
न्द्रमानक्तमेति १० ॥ १४ ॥ तत्त्वायामित्रह्मणावन्दमानस्तदाशास्तेयजमानो-
हविर्भिः । अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ११ तदिन्नक्तंत-
द्दिवामह्यमाहुस्तदयंकेतोहृदआविचष्टे । शुनःशेपोयमह्वद्गृभीतःसोअस्मान्रा-
जावरुणोमुमोक्तु १२ शुनःशेपोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः । अवैनं-
राजावरुणःससृज्याद्विद्वाँअदब्धोविमुमोक्तुपाशान् १३ अवतेहेळोवरुणनमो-
भिरवयज्ञेभिरीमहेहविर्भिः । क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथः ॥ १७ ॥

॥ १७ ॥

कृतानि १४ उदुत्तमंवरुणपाशंमस्मदवाधमंविमध्यमंश्रथाय । अथावयमादित्यव्रतेतवानागसोअदितयेस्याम १५ ॥ १५ ॥

यञ्चिदेकविंशतिःशुनःशेपोवरुणोगायत्री ।

२५ यञ्चिद्धितेविशोयथाप्रदेववरुणव्रतम् । मिनीमसिद्यविद्यविद्यवि १ मानोवधायहत्नवेजिहीळानस्यरीरधः।माहृणानस्यमन्यवे २ विमृळीकायतेमनोरथीरश्वंनसन्दितम् । गीर्भिर्वरुणसीमहि ३ पराहिमेविमन्यवःपतन्तिवस्यइष्टये । वयोनवसतीरुप ४ कदाक्षंत्रश्रियंनरमावरुणंकरामहे । मृळीकायोरुचक्षसम् ५ ॥ १६ ॥ तदित्समानमाशातेवेनन्तानप्रयुच्छतः । धृतव्रतायदाशुषे ६ वेदायोवीनांपदमन्तरिक्षेणपतताम् । वेदनावःसमुद्रियः ७ वेदमासोधृतव्रतोद्वादशप्रजावतः । वेदायउपजायते ८ वेदवातस्यवर्तनिमुरोरृष्वस्यबृहतः ।

वेदायेअध्यासते १ निषसादधृतव्रतोवरुणःपस्त्या ३ स्वा । साम्राज्यायसुक्रतुः
१० ॥ १७ ॥ अतोविश्वान्यद्भुताचिकित्वाँअभिपश्यति । कृतानियाचकृत्वा
॥ १८ ॥ ११ सनोविश्वाहासुक्रतुरादित्यःसुपथाकरत् । प्रणआयूंषितारिषत् १२ विभ्र-
द्राषिंहिरण्ययंवरुणोवस्तनिर्णिजम् । परिस्पशोनिषेदिरे १३ नयंदिप्संन्ति-
दिप्सवोनदुह्राणोजनानाम् । नदेवमभिमातयः १४ उनयोमानुषेष्वायशश्च-
क्रेअसाम्या । अस्माकमुदरेष्वा १५ ॥ १८ ॥ परामेयन्तिधीतयोगावोनगव्यू-
तीरनु । इच्छन्तीरुरुचक्षसम् १६ संनुवोचावहैपुनर्यतोमेमध्वाभृतम् । होतेव-
क्षदंसेप्रियम् १७ दगंनुविश्वदर्शतंदर्शंरथमधिक्षमि । एताजुषतमेगिरः १८
इमंमेवरुणश्रुधीहवंमद्याचमृळय । त्वामवस्युराचके १९ त्वंविश्वस्यमेधि-
रदिवश्चग्मश्चराजसि । सयामनिप्रतिश्रुधि २० उदुत्तमंमुमुग्धिनोविपाशं-

मध्यमंचृत । अवाधमानिंजीवसें २१ ॥ १९ ॥

वसिष्व दश शुनःशेपोग्निर्गायत्री ।

२६ वसिंष्वाहिमियेध्यवस्त्राण्यूर्जापते । सेमंनोअध्वरंयज १ निनोहोता-
वरेण्यःसदांयविष्ठमन्मभिः । अग्नेदिवित्मंतावचः २ आहिष्मासूनवेंपितापि-
र्यजंत्याप्यें । सखासख्येवरेण्यः ३ आनोवर्हीरिशादंसोवरुणोमित्रोअर्यमा ।
सीदंन्तुमनुषोयथा ४ पूर्व्यंहोतरस्यनोमन्दस्वसख्यस्यंच । इमाउपुश्रुधीगि-
रः ५ ॥ २० ॥ यज्ञिंहिशश्वंतातनादेवंदेवंयजामहे । त्वेइळूंयतेहविः ६ प्रियो-
नोंअस्तुविश्पतिर्होतामन्द्रोवरेण्यः । प्रियाःस्वग्नयोवयम् ७ स्वग्नयोहिवार्यं-
देवासोदधिरेचनः । स्वग्नयोमनामहे ८ अथानउभयेषाममृतमर्त्यानाम् ।
मिथःसन्तुप्रशस्तयः ९ विश्वेभिरग्नेअग्निभिरिमंयज्ञमिदंवचः । चनोधाः

सहसोयहो १० ॥ २१ ॥

अश्वं त्रयोदश शुनःशेपोग्निरन्त्यायाविश्वेदेवागायत्री अन्त्यात्रिष्टुप् ।

॥ १९ ॥ २७ अश्वंनत्वावारवन्तंवन्दध्यांअग्निंनमोभिः । सम्राजन्तमध्वराणाम् १ सयानःसूनुःशवसापृथुप्रगामासुशेवः । मीढ्वाँअस्माकंबभूयात् २ सनोदूरा-च्चासाच्चनिमर्त्यादघायोः । पाहिसदमिद्विश्वायुः ३ इममूषुत्वमस्माकंसनिंगा-यत्रंनव्यांसम् । अग्नेदेवेषुप्रवोचः ४ आनोभजपरमेष्वावाजेषुमध्यमेषु । शिक्षावस्वोअन्तमस्य ५ ॥ २२ ॥ विभक्तासिचित्रभानोसिन्धोरूर्माउपाक-आ । सद्योदाशुषेक्षरसि ६ यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः । सयन्ताश्वंतो-रिषः ७ नकिरस्यसहन्त्यपर्येताकयस्यचित् । वाजोअस्तिश्रवाय्यः ८ सवाजं-विश्वचर्षणिरर्वद्भिरस्तुतरुता । विप्रेभिरस्तुसनिता ९ जरावोधतद्विविड्ढिविशेवि ॥ १९ ॥

शेयज्ञियाय । स्तोमंरुद्रायदृशीकम् १० ॥ २३ ॥ सनोंमहाँअनिमानोधूमकेंतुःपुरुश्चन्द्रः । धियेवाजायहिन्वतु ११ सरेवाँइंवविश्पतिर्दैव्यःकेतुःशृंणोतुनः । उक्थैरग्निर्बृहद्भानुः १२ नमोंमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमंआशिनेभ्यः । यजांमदेवान्यदिशक्रवांममाज्यायंसःशंसमावृक्षिदेवाः १३ ॥ २४ ॥

यत्रग्रावा नव शुनःशेपः चतुर्णांइन्द्रस्ततोद्वयोरुलूखलं ततोद्वयोरुलूखलमुसलेअन्त्यायाःमजापतिर्हरिश्चन्द्रोधिषवणचर्म वाआद्याः षळनुष्टुभः ततस्तिस्रोगायत्र्यः ।

२८ यत्रग्रावापृथुबुध्नऊर्ध्वोभवतिसोतवे । उलूखलसुतानामवेद्विंन्द्रजल्गुलः १ यत्रद्वाविंवजघनाधिषवण्याकृता । उलूखलसुतानामवेद्विंन्द्रजल्गुलः २ यत्रनार्यपच्यवमुंपच्यवंचशिक्षंते । उलूखलसुतानामवेद्विंन्द्रजल्गुलः ३ यत्र मन्थांविबध्नतेरश्मीन्यमितवाइंव । उलूखलसुतानामवेद्विंन्द्रजल्गुलः ४ य

च्छिद्धित्वंगृहेगृहउलूखलकयुज्यसे । इहद्युमत्तमंवदजयतामिवदुन्दुभिः ५ ॥ २५ ॥ उतस्मतेवनस्पतेवातोविवात्यग्रमित् । अथोइन्द्रायपातवेसुनुसोममु-लूखल ६ आयजीवाजसातमाताद्युक्षाविंजभृतः । हरीइवान्धांसिवप्सता ७ तानोअद्यवनस्पतीरुप्वावृष्वेभिःसोतृभिः । इन्द्रायमधुमत्सुतम् ८ उच्छिष्टं चम्वोर्भरसोमंपवित्रआसृज । निधेहिगोरधित्वचि ९ ॥ २६ ॥

यच्चित्सत्त शुनःशेपइन्द्रःपङ्क्तिः ।

२१ यच्छिद्धिसत्यसोमपाअनाशस्ताईवस्मसि । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ १ शिप्रिन्वाजानांपतेशचीवस्तवदंसनाः । आतूनइन्द्र-शंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ २ निष्वापयामिमिथूदृशांसस्तामबुध्य-माने । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ ३ ससन्तुत्याअरात-

योवोर्धन्तुशूररातयः । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ २
समिन्द्रगर्दभंमृणनुवन्तंपापयामुया । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रे-
षुतुवीमघ ५ पतांतिकुण्डृणाच्यादूरंवातोवनादधि । आतूनइन्द्रशंसयगोष्वश्वे-
षुशुभ्रिषुसहस्रेषुतुवीमघ ६ सर्वंपरिक्रोशंजहिजंभयाकृकदाश्वम् । आतूनइन्द्र-
शंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ ७ ॥ २७ ॥

आवोद्वाविंशतिः शुनःशेप इन्द्रः अन्त्यतृचस्योरश्विनावुपाश्च गायत्री
एकादशीपादनिचृत् षोळशीत्रिष्टुप् ।

३० आवइन्द्रंक्रिविंयथावाजयन्तःशतक्रतुम् । मंहिष्ठंसिञ्चइन्दुभिः १
शतंवायःशुचीनांसहस्रंवासमाशिराम् । एदुनिम्नंनरीयते २ संयन्मदायशुष्मि
णंएनाह्यंस्योदरे । समुद्रोनव्यचोदधे ३ अयमुतेसमतसिकपोतइवगर्भधिम् ।

वचस्तच्चिन्नओहसे ४ स्तोत्रंराधानांपतेगिर्वाहोवीर्यस्यते । विभूतिरस्तुसूनृता ५ ॥ २८ ॥ ऊर्ध्वस्तिष्ठानऊतयेस्मिन्वाजेशतक्रतो । समन्येषुब्रवावहै ६ योगेयोगेतवस्तरंवाजेवाजेहवामहे । सखायइन्द्रभूतये ७ आघोगमद्यदिश्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुपनोहवम् ८ अनुप्रुतस्यौकसोहुवेतुविप्रतिंनरम् । यंतेपूर्वंपिताहुवे ९ तंत्वावयंविश्ववाराशास्महेपुरुहूत । सखेवसोजरितृभ्यः १० ॥ २९ ॥ अस्माकंशिप्रिणीनांसोमपाःसोमपाव्नाम् । सखेवज्रिन्त्सखीनाम् ११ तथातदस्तुसोमपाःसखेवज्रिन्तथाकृणु । यथांतउश्मसीष्टये १२ रेवतींनःसधमादइन्द्रेसन्तुतुविवाजाः । क्षुमन्तोयाभिर्मदेम १३ आघृत्वावान्तमनाप्तःस्तोतृभ्योधृष्णवियानः । ऋणोरक्षंन्नचक्र्योः १४ आयहुवंःशतक्रतवा कामंजरितॄणाम् । ऋणोरक्षंनशचीभिः १५ ॥ ३० ॥ शश्वदिन्द्रःपोप्रुथद्भिर्जि

गायनानंदद्रिःशाश्वंसद्रिर्धनानि । सनोहिरण्यरथंदंसनावान्त्सनंःसनितासनये-
सनोदात् १६ आश्विनावश्वावत्येपायातंशवीरया । गोमद्दस्राहिरण्यवत् १७
समानयोजनोहिवांरथोदस्रावमर्त्यः । समुद्रेअश्विनेयते १८ न्यु१ह्यस्यमूर्धनि-
चक्रंरथस्ययेमथुः । परिद्यामन्यदीयते १९ कस्तंउपःकधप्रियेभुजेमतोंअमर्त्ये ।
कंनक्षसेविभावरि २० वयंहितेअमंन्मह्यान्तादापराकात् । अश्वेनाचित्रेअरुषि
२१ त्वन्त्येभिरागहिवाजेभिर्दुहितर्दिवः । अस्मेरयिंनिधारय २२ ॥ ३१ ॥
इति शाकलर्क्संहितायां प्रथमे मण्डले षष्ठोनुवाकः ॥ ६ ॥

त्वमग्नेष्टादशाङ्गिरसोहिरण्यस्तूपोग्निर्जगतीअष्टमीपोळश्यष्टादशीचत्रिष्टुभः ।

३१ त्वमंग्नेप्रथमोअङ्गिराऋषिर्देवोदेवानामभवःशिवःसखा । तवव्रतेकवयो-
विद्मनापसोजायन्तमरुतोभ्राजदृष्टयः १ त्वमंग्नेप्रथमोअङ्गिरस्तमःकविर्देवा-

नांपरिभूषसिव्रतम् । विभुर्विश्वस्मैभुवनायमेधिरोदिमाताशयुःकतिधाचिदायवे २ त्वमग्नेप्रथमोमातरिश्वनआविर्भवसुक्रतूयाविवस्वते । अरेजेतांरोदसीहोतृवूर्ये सग्नोभारमयंजोमहोवसो ३ त्वमग्नेमनवेद्यामवाशयःपुरूरवसेसुकृतेसुकृत्तरः । श्वात्रेणयत्पित्रोर्मुच्यसेपर्यात्वापूर्वमनयन्नापरंपुनः ४ त्वमग्नेवृषभःपुष्टिवर्धनउर्वंतसुचेभवसिश्रवाय्यः । यआहुतिंपरिवेदावषट्कृतिमेकायुरग्रेविशआविवाससि ५ ॥ ३२ ॥ त्वमग्नेवृजिनवर्तनिंनरंसक्मन्पिपर्षिविदथेविचर्षणे । यःशूरसातापरितक्म्येधनेदभ्रेभिश्चित्समृताहंसिभूयसः ६ त्वंतमग्नेअमृतत्वउत्तमेमर्तंदधासिश्रवसेदिवेदिवे । यस्तातृषाणउभयायजन्मनेमर्यःकृणोषिप्रयआचसूरये ७ त्वंनोअग्नेसनयेधनानांयशसंकारुंकृणुहिस्तवानः । ऋध्यामकर्मापसावदेमाधाविवाप्रावतंनः ८ त्वंनोअग्नेपित्रोरुपस्थआदेवोदेवेष्वनवद्यजागृ-

विः । तनूकृद्बोधिप्रमतिश्चकारवेत्वंकल्याणवसुविश्वमोपिये १ त्वमग्नेप्रमतिस्त्वंपितासिनस्त्वंवयस्कृत्तवंजामयोवयम् । सन्त्वारायःशतिनःसंसहस्रिणः सुवीरंयन्तिव्रतपामदाभ्य १० ॥ ३३ ॥ त्वामग्नेप्रथममायुमायवेदेवाअकृण्वन्नहुषस्यविश्पतिम् । इळांमकृण्वन्मनुषस्यशासनींपितुर्यत्पुत्रोममकस्यजायते ११ त्वंनोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवन्द्य । त्रातातोकस्यतनयेगवामस्यनिमेपंरक्षमाणस्तवव्रते १२ त्वमग्नेयज्यवेपायुरन्तरोनिपङ्गायचतुरक्षइध्यसे । योरातहव्योवुकायघायसेकीरेश्चिन्मन्त्रंमनसावनोषितम् १३ त्वमग्नउरुशंसायवाघतेस्पार्हंयद्रेक्णःपरमंवनोषितत्।आध्रस्यचित्प्रमतिरुच्यसेपिताप्रपाकंशास्तिप्रदिशोविदुष्टरः १४ त्वमग्नेप्रयतदक्षिणंनरंवर्मेवस्यूतंपरिपासिविश्वतः । स्वादुक्षय्मायोवसतौस्योनकृज्जीवयाजंयजतेसोपमादिवः १५ ॥ ३४ ॥ इमा-

मंग्नेशरणींमीमृषोनइममध्वांनंयमगांमदूरात् । आपिःपिताप्रमतिःसोम्या-
नांभूमिरस्यृषिकृन्मर्त्यानाम् १६ मनुष्वदंग्नेअङ्गिरस्वदंङ्गिरोययातिवत्सदंनेपू-
र्वेवच्छुचे । अच्छंयाह्यावहादैव्यजनमासादयबर्हिषियक्षिचप्रियम् १७ एतेना-
ग्नेब्रह्मणावावृधस्वशक्तीवायत्तेचकृमाविदावा । उतप्रणेष्यभिवस्योअस्मान्त्सं-
नःसृजसुमत्यावाजवत्या १८ ॥ ३५ ॥

इन्द्रस्य पञ्चदश हिरण्यस्तूपऽइन्द्रस्त्रिष्टुप् ।

३२ इन्द्रंस्यनुवीर्याणिप्रवोचंयानिंचकारंप्रथमानिवज्री । अहन्नहिमन्वप-
स्ततर्दप्रवक्षणाअभिनत्पर्वतानाम् १ अहन्नहिंपर्वतेशिश्रियाणन्त्वष्टास्मैवज्रंस्व-
र्यन्ततक्ष । वाश्राइवधेनवःस्यन्दमानाअज्ञःसमुद्रमवजग्मुरापः २ वृषायमाणोवृ
णीतसोमंत्रिकद्रुकेष्वपिबत्सुतस्य । आसायंकंमघवादत्तवज्रमहन्नेनम्प्रथमजाम

हीनाम् ३ यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाःप्रोतमायाः । आत्सूर्यं जनयन्द्यामुषासंतादीत्नाशत्रुंनाकिलाविवित्से ४ अहन्वृत्रंवृत्रतरंव्यंसमिन्द्रो वज्रेणमहतावधेन । स्कन्धांसीवकुलिशेनाविवृक्णाहिःशयतउपपृक्पृथिव्याः ५ ॥ ३६ ॥ अयोद्धेवदुर्मदआहिजुह्वेमहावीरंतुविबाधमृजीषम् । नातारीदस्यु-समृतिंवधानांसंरुजानाःपिपिष्इन्द्रंशत्रुः ६ अपादहस्तोअपृतन्यदिन्द्रमास्य-वज्रमधिसानौजघान । वृष्णोवध्रिःप्रतिमानंबुभूषन्पुरुत्रावृत्रोअशयद्व्यस्तः ७ नदन्नभित्रमंमुयाशयानम्मनोरुहाणाअतियन्त्यापः । याश्चिद्वृत्रोमहिनापर्यतिष्ठ-त्तासामहिःपत्सुतःशीर्बभूव ८ नीचावयाअभवद्वृत्रपुत्रेन्द्रोअस्याअववर्धजभार । उत्तरासूरधरःपुत्रआसीदानुःशयेसहवत्सानधेनुः ९ अतिष्ठन्तीनामनिवेशना-

नांकाष्ठानांमध्येनिहितंशरीरम् । वृत्रस्यनिण्यंविचरन्त्यापोदीर्घंतमआशयुदि-
न्द्रशत्रुः १० ॥ ३७ ॥ दासपत्नीरहिगोपाअतिष्ठन्निरुद्धाआपःपणिनेवगावः ।
अपांबिलमपिहितंयदासीद्वृत्रंजघन्वाँअपतद्वारा ११ अश्व्योवारोंअभवस्त-
दिन्द्रसृकेयत्त्वाप्रत्यहन्देवएकः । अजंयोगाअजयःशूरसोममवासृजःसर्तवेसप्त-
सिन्धून् १२ नास्मैविद्युन्नतन्यतुःसिषेधनयांमिहमकिरद्धादुनिंच । इन्द्रश्चयद्यु-
युधातेअहिश्चोतापरीभ्योमघवाविजिग्ये १३ अहेर्यातारंकमपश्यइन्द्रहृदियत्तेज-
घ्नुषोभीरगच्छत् । नवंचयन्नवतिंचस्रवन्तीःश्येनोनभीतोअतरोरजांसि १४
इन्द्रोयातोवसितस्यराजाशमस्यचशृङ्गिणोवज्रबाहुः । सेदुराजाक्षयतिचर्षणी-
नामरान्नेमिःपरिताबभूव १५ ॥३८॥ इति शा०कौ० प्रथमाष्टके द्वितीयोध्यायः ॥२॥

एतत्त्रिष्टुब्द्वादशाश्विनंनवम्यन्त्येत्रिष्टुभौद्वयाम्येकादशसावित्रंनवमीजगत्याद्याचसालिङ्गोक्तदै-
वतपादाम्बोविंशतिः कण्वोघौरआग्नेयंप्रागायमूर्ध्वऊषुणौष्यौक्रीळंपञ्चोनामारुतंहिगायत्रंतुकद्भमयद्-
शमागायंतूत्तिष्ठाष्टौ ब्राह्मणस्पत्यंयंरक्षन्तिनववरुणमित्रार्यम्णांमध्येतृचआदित्येभ्योगायत्रंहिसंपूप-
न्दशपौष्णंकद्रुद्रायनवरौद्रंतृतीयामैत्रावरुणीचान्त्यस्तृचः सौम्योन्त्यानुष्टुबग्नेपळूनामस्कण्वः काण्वआ-
ग्नेयंतुमागायमाद्योष्टृचोश्व्युपसांचत्वमग्नेदशानुष्टुभमर्धर्चोन्त्योदैवएषोपञ्चोनाश्विनंतुगायत्रम् ॥ ३ ॥

एतायामेति पञ्चदश हिरण्यस्तूपइन्द्रस्त्रिष्टुप् ।

३३ एतायामोपंगव्यन्तइन्द्रंमस्माकंसुप्रमंतिंवावृधाति । अनामृणःकुविदादस्यरायोगवांकेतंपरमावर्जतेनः १ उपेदुहंधनदामप्रतीतंजुष्टांनश्येनोवसतिंपतामि । इन्द्रंनमस्यन्नुपमेभिरर्कैर्यःस्तोतृभ्योहव्योअस्तियामन् २ निसवँसेनइषुधीरसक्तसमर्योगाअंजतियस्यवाष्टिं । चोष्कूयमाणइन्द्रभूरिवामंमाप-

णिभूरस्मदधिप्रवृद्ध ३ वधीहिदस्युंधनिनंघनेनँएकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधिविषुणक्तेव्यायन्नयंज्वानःसनकाःप्रेतिमीयुः ४ परांचिच्छीर्षाववृजुस्त-
इन्द्रायंज्वानोयज्वभिःस्पर्धमानाः । प्रयद्दिवोहरिवःस्थातरुग्रनिरव्रताँअधमोरो-
दस्योः ५॥ १ ॥ अयुयुत्सन्ननवद्यस्यसेनामयांतयन्तक्षितयोनवग्वाः । वृषायुधो-
नवधयोनिरष्टाःप्रवद्भिरिन्द्राञ्चितयन्तआयन् ६ त्वमेतान्रुदतोजक्षतश्चायोधयो-
रजंसइन्द्रपारे । अवादहोदिवआदस्युमुच्चाप्रसुन्वतःस्तुवतःशंसमावः ७ चक्रा-
णासःपरीणहंपृथिव्याहिरण्येनमणिनाशुम्भमानाः । नहिन्वानासस्तितिरुस्त-
इन्द्रंपरिस्पशोअदधात्सूर्येण ८ परियदिन्द्ररोदसीउभेअबुभोजीर्महिनाविश्वतः
सीम् । अमन्यमानाँअभिमन्यमानैर्निर्ब्रह्मभिरधमोदस्युमिन्द्र ९ नयेदिवःपृथि-
व्याअन्तमापुर्नमायाभिर्धनदांपर्यभूवन् । युजंवज्रंवृषभश्चक्रइन्द्रोनिर्ज्योतिं-

पातमंसोगाअंदुक्षत् १० ॥ २ ॥ अनुंस्वधामक्षरन्नापोंअस्यार्वधंतुमध्युआनाव्यांनाम् । सध्रीचीनेंनमनंसातामिन्द्रओर्जिष्टेनहन्मंनाहन्नभिष्यून् ११ न्यांविध्यदिलीविशंस्यद्वल्हाविशुङ्क्रिण्णंमभिनच्छुष्णमिन्द्रः । यावत्तरोंमघवन्यावदोजोवज्रेंणशत्रुंमवधीःपृतन्युम् १२ अभिसिध्मोअंजिगादस्यशत्रन्वित्रिंमेनवृक्षेणापुरोंमित् । संवज्रेंणासृजद्वृत्रमिन्द्रःप्रस्वांमतिमंतिरच्छाशंदानः १३ आवःकुत्संमिन्द्रयस्मिंश्चाकन्प्राचोयुध्यंन्तंवृषभंदशद्युम् । शफच्युतोरेणुर्नक्षत्द्यामुच्छैत्रेयोनृषाह्यायतस्थौ १४ आवःशमंवृषभंतुग्र्यासुक्षेत्रजेषेमघवञ्छ्वित्र्यंगाम् । ज्योक्चिदत्रंतस्थिवांसोअक्रञ्छत्रूयतामधरावेदनाकः १५ ॥ ३ ॥

त्रिंशिद्वादश हिरण्यस्तूपोश्विनौजगती नवमीद्वादश्यौत्रिष्टुभौ ।

३४ त्रिंशिन्नोअद्याभवतंनवेदसाविभुर्वांयामंउतरातिरश्विना । युवोर्हियन्त्रं-

हिम्येवुवासंसोभ्यायंसेन्यांभवतंमनीषिभिः १ त्रयंःपवयोमधुवाहनेरथेसोमं-
स्यवेनामनुविश्वइद्दिदुः । त्रयंःस्कंभासंःस्कभितासंआरभेत्रिर्नक्तंयाथस्त्रिर्वाश्वि-
नादिवा २ समानेअहन्त्रिरवद्यगोहनात्रिरद्ययज्ञंमधुनामिमिक्षतम् । त्रिर्वा-
जवतीरिषोअश्विनायुवंदोषाअस्मभ्यमुषसश्चपिन्वतम् ३ त्रिर्वर्तियातंत्रिरनुव्र-
तेजनेत्रिःसुप्राव्येत्रेधेवंशिक्षतम् । त्रिर्नान्द्यंवहतमश्विनायुवंत्रिःपृक्षोअस्मेअक्ष-
रेवपिन्वतम् ४ त्रिर्नोरयिंवहतमश्विनायुवंत्रिर्देवतातात्रिरुतावतंधियः । त्रिस्सौ-
भगत्वंत्रिरुतश्रवांसित्रिष्ठंवांसूरेदुहितारुहद्रथम् ५ त्रिर्नोअश्विनादिव्यानि-
भेषजात्रिःपार्थिवानित्रिरुदत्तमद्भ्यः । ओमानंशंयोर्ममकायसूनवेत्रिधातुशर्म-
वहतंशुभस्पती ६ ॥ ४ ॥ त्रिर्नोअश्विनायजतादिवेदिवेपरित्रिधातुपृथिवीम-
शायतम् । तिस्रोनासत्यारथ्यापरावतआत्मेवातःस्वसराणिगच्छतम् ७ त्रि-

राश्वनासेन्धुभिःसप्तमातृभिस्त्रयंआहावास्त्रेधाहविष्कृतम् । तिस्रःपृथिवीरुप-
रिप्रवादिवोनाकंरक्षेथेद्युभिरक्तुभिर्हितम् ८ क १ त्रीचक्रात्रिवृतोरथस्यक १ त्रयो-
वन्धुरोयेसनीळाः । कदायोगोवाजिनोरासंभस्युयेनयज्ञंनासत्योपयाथः ९ आना
सत्यागच्छतंहूयतेहविर्मध्वःपिबतंमधुपेभिरासभिः । युवोर्हिपूर्वंसवितोषसोर-
थंमृतायचित्रंघृतवन्तमिष्यति १० आनासत्यात्रिभिरेकादशैरिहदेवेभिर्यातंमधु-
पेयमश्विना । प्रायुस्तारिष्टंनीरपांसिमृक्षतंसेधतंद्वेषोभवतंसचाभुवा ११ आ-
नोअश्विनात्रिवृतारथेनार्वाञ्चंरयिंवहतंसुवीरम् । शृण्वन्तावामवसेजोहवीमि-
वृधेचनोभवतंवाजसातौ १२ ॥ ५ ॥

ह्रयाम्येकादश हिरण्यस्तूपःसविता आद्यालिङ्गोक्तदैवतपादा आ-
द्यानवमीचजगत्यौ शिष्टास्त्रिष्टुभः ।

३५ ह्रयाम्यग्निम्प्रथमंस्वस्तयेह्रयामिमित्रावरुणाविहावसे । ह्रयामिरात्रीं-

जगंतोनिवेशंनींह्यामिदेवंसवितारंमूतये १ आकृष्णेनरजंसावर्तमानोनिवे-
शयंन्नमृतंमर्त्यंच । हिरण्ययेनसवितारथेनादेवोयांतिभुवनानिपश्यन् २ या-
तिदेवःप्रवतायात्युद्वतायातिशुभ्राभ्यांयजतोहरिभ्याम् । आदेवोयांतिसवितापं-
रावतोपविश्वादुरितावाधमानः ३ अभिवृंतंकृशनैर्विश्वरूपंहिरण्यशम्यंयज-
तोवृहन्तम् । आस्थाद्रथंसविताचित्रभानुःकृष्णारजांसितविंपींदधानः ४ वि-
जनाञ्छयावाःशितिपादोअख्यन्रथंहिरण्यप्रउगंवहन्तः । शश्वद्विशःसवितुर्दैव्य-
स्योपस्थेविश्वाभुवनानितस्थुः ५ तिस्रोद्यावःसवितुर्द्वाउपस्थाँएकायमस्यभुव-
नेविराषाट् । आणिंनरथ्यंममृताधिंस्तथुरिहब्रवीतुयउताञ्चिकेतत् ६ ॥ ६ ॥ विसु-
पर्णोअन्तरिक्षाण्यख्यद्गभीरवेपाअसुरःसुनीथः । क इदानींसूर्यःकश्चिकेतकतमां-
द्यांरश्मिरस्यातंतान ७ अष्टौव्यख्यत्ककुभःपृथिव्यास्त्रीधन्वयोजनासप्तसिन्धू-

न्। हिरण्याक्षःसविताऽदेवआगाद्दधद्रत्नाऽदाशुषेवार्याणि ८ हिरण्यपाणिःसविता-
विचर्षणिरुभेद्यावापृथिवीअन्तरीयते । अपामीवांबाधतेवेतिसूर्यमभिकृष्णेनर-
जसाद्यामृणोति ९ हिरण्यहस्तोअसुरःसुनीथःसुमृळीकःस्ववाँयात्वर्वाङ् । अप-
सेधन्रक्षसोयातुधानानस्थाद्देवःप्रतिदोषंगृणानः १० येतेपन्थाःसवितःपूर्या-
सोरिणवःसुकृताअन्तरिक्षे । तेभिर्नोअद्यपथिभिःसुगेभी रक्षाचनोअधिचब्रूहिदेव
११ ॥ ७ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले सप्तमोनुवाकः ॥ ७ ॥

प्रवोविशतिर्धौरः कण्वोग्निःऊर्ध्वऊष्वितिद्वेयूपदेवताके
प्रागाथम् (अयुजोबृहतःयुजःसतोबृहत्यः) ।

३६ प्रवोयह्वंपुरूणांविशांदेवयतीनाम् । अग्निंसूक्तेभिर्वचोभिरीमहेयंसीमि-
दन्यईळते १ जनासोअग्निंदधिरेसहोवृधंहविष्मन्तोविधेमते । सत्वंनोअद्यसु-

मनाऽइहावितामवावाजेषुसन्त्य २ प्रत्वादूतंवृणीमहेहोतारंविश्ववेदसम् । महस्तेसतोविचरन्त्यर्चयोदिविस्पृशान्तिभानवः ३ देवासस्त्वावरुणोमित्रोअर्यमासंदूतंप्रत्नमिन्धते । विश्वंसोअग्नेजयतित्वयाधनंयस्तेददाशमर्त्यः ४ मन्द्रोहोतागृहपतिरग्नेदूतोविशामसि । त्वेविश्वासङ्गतानिव्रताध्रुवायानिदेवाअकृण्वत ५ ॥ ८ ॥ त्वेइदग्नेसुभगेयविष्ठ्यविश्वमाहूयतेहविः । सत्वंनोअद्यसुमनाउतापरंयक्षिदेवान्त्सुवीर्या ६ तंघेमित्थानमस्विनउपस्वराजमासते । होत्राभिरग्निमनुषःसमिन्धतेतितिर्वांसोअतिस्त्रिधः ७ घ्नन्तोवृत्रमतरन्रोदसीअपउरुक्षयायचक्रिरे । भुवत्कण्वेवृषाद्युम्न्याहुतःक्रन्ददश्वोगविष्टिषु ८ संसीदस्वमहाँअसिशोचस्वदेववीतमः । विधूममग्नेअरुषंमियेध्यसृजप्रशस्तदर्शतम् १ यन्त्वादेवासोमनवेदधुरिहयजिष्ठंहव्यवाहन । यंकण्वोमेध्यातिथिर्धनस्पृतंयंवृषायमुपस्तुतः

१० ॥ १ ॥ यमग्निमेध्यातिथिः कण्व ईधक्रुतादधे । तस्य प्रेषो दीदियुस्तमिमाक्रुचस्तमग्निं वर्धयामसि ११ रायस्पूर्धिस्वधावोस्तिहितग्नेदेवेष्वाप्यम् । त्वं वाजस्य श्रुत्यस्यराजसि सनोमृळमहाँअसि १२ ऊर्ध्वऊषुणऊतयेतिष्ठादेवोनसविता । ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे १३ ऊर्ध्वोनःपाह्यंहसोनिकेतुनाविश्वंसमत्रिणंदह । कृधीनऊर्ध्वाञ्चरथायजीवसेविदादेवेषुनोदुवः १४ पाहिनोअग्नेरक्षसःपाहिधूर्तेरराव्णः । पाहिरीषतउतवाजिघांसतोबृहद्भानोयविष्ठ्य १५ ॥ १० ॥ घनेवविष्वग्विजह्यराव्णस्तपुर्जभयोअस्मध्रुक् । योमर्त्यःशिशीतेअत्यक्तुभिर्मानःसरिपुरीशत १६ अग्निर्वन्नेसुवीर्यमग्निःकण्वायसौभगम् । अग्निःप्रावन्मित्रोतमेध्यातिथिमग्निःसाताउपस्तुतम् १७ अग्निर्नातुर्वशंयदुंपरावतउग्रादेवंहवामहे । अग्निर्नयन्नववास्त्वंबृहद्रथंतुर्वीतिंदस्यवेसन-

हः १८ नित्वामग्नेमनुर्दधुज्योतिर्जनायशश्वते । दीदेथकण्वऋतजातउ-
क्षितोयंनमस्यन्तिकृष्टयः १९ त्वेषासोअग्नेरमवन्तोअर्चयोभीमासोनप्रतीतये ।
॥ २९ ॥ रक्षस्विनःसदमिद्धातुमावतोविश्वंसमत्रिणंदह २० ॥ ११ ॥

क्रीळं पञ्चोना कण्वोपरुतोगायत्री ।

३७ क्रीळंवःशर्धोमारुतमनर्वाणंरथेशुभम् । कण्वाअभिप्रगायत १ येपृष-
तीभिर्ऋष्टिभिःसाकंवाशीभिरञ्जिभिः । अजायन्तस्वभानवः २ इहेवशृण्वएषां-
कशाहस्तेषुयद्वदान् । नियामंञ्चित्रमृञ्जते ३ प्रवःशर्धायघृष्वयेत्वेषद्युम्नायशुष्मि-
णे । देवत्तंब्रह्मगायत ४ प्रशंसागोष्वघ्र्यंक्रीळंयच्छर्धोमारुतम् । जम्भेरसंस्यवा-
वृधे ५ ॥ १२ ॥ कोवोवर्षिष्ठआनरोदिवश्चग्मश्वधूतयः । यत्सीमन्तंनधूनुथ ६
निवोयामायमानुपोद्रघुत्र्यायमन्यवे । जिहीतेपर्वतोगिरिः ७ येषामज्मेषुपृथि- ॥ २९ ॥

वीर्जुजुवाँइवविश्पतिः । भियायामेपुरेजते ८ स्थिरंहिजानमेषांवयोमातुर्निरे-
तवे । यत्सीमनुद्विताशवः ९ उदुत्येसूनवोगिरःकाष्ठाअज्मेष्वत्नत । वाश्राअ-
भिज्ञुयातवे १० ॥१३॥ त्यंचिद्घादीर्घंपृथुंमिहोनपातममृध्रम् । प्रक्षंवयन्तियाम-
भिः ११ मरुतोयद्ध्वोवलंजनाँअच्युत्यवीतन । गिरींरंचुच्यवीतन १२ यद्ध
यान्तिमरुतःसंहब्रुवतेध्वन्ना । शृणोतिकश्चिदेषाम् १३ प्रयातशीभंमाशुभिः
सन्तिकण्वेषुवोदुवः । तत्रोषुमादयाध्वै १४ अस्तिहिष्मामदायवःस्मसिष्माव-
यमेषाम् । विश्वंचिदायुर्जीवसे १५ ॥ १४ ॥

कद्ध पञ्चदश कण्वोमरुतोगायत्री ।

३८ कद्धनूनंकधप्रियःपितापुत्रंनहस्तयोः । दधिध्वेवृक्तबर्हिषः १ कंनूनंक-
द्धोअर्थंगन्तादिवोनपृथिव्याः। कंवोगावोनरण्यन्ति २ कंवःसुम्नान्यांसिमरुतःक-

सुविता। को ३ विश्वानिसौभगा ३ यद्युयंपृश्निमातरोमर्तासःस्यातन । स्तो-
तावोअमृतःस्यात् ४ मावोमृगोनयवसेजरितभूदजोऽप्यः । पथायमस्यंगादुप-
५ ॥ १५ ॥ मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत् । पदीष्टतृष्णयासह ६ सत्यं-
त्वेषाअमवन्तोधन्वञ्चिदारुद्रियासः । मिहंकृण्वन्त्यवाताम् ७ वाश्रेवविद्युन्मि-
मातिवत्संनमातासिषक्ति । यदेषांवृष्टिरसर्जि ८ दिवाचित्तमःकृण्वन्तिपर्जन्ये-
नोदवाहेन । यत्पृथिवींव्युन्दन्ति १ अधस्वनान्मरुतांविश्वमासद्मपार्थिवम् । अ
रेजन्तप्रमानुषाः १० ॥ १६ ॥ मरुतोवीळुपाणिभिश्चित्रारोधस्वतीरनु । याते
मखिद्रयामभिः ११ स्थिरावःसन्तुनेमयोरथाअश्वासएषाम् । सुसंस्कृताअभी-
शवः १२ अच्छावदातनागिराजरायैब्रह्मणस्पतिम् । अग्निंमित्रंनदर्शतम् १३
मिमीहिश्लोकंमास्येपर्जन्यइवततनः । गायगायत्रमुक्थ्यम् १४ वन्दस्वमारु-

तंगृणंत्वेषंपनस्युमर्किणम् । अस्मेवृद्धाअंसन्निह १५ ॥ १७ ॥

मयदश कण्वोमरुतःमागाथम् ।

३१ प्रयदित्थापरावतःशोचिर्नमानमस्यथ । कस्यक्रत्वामरुतःकस्यवर्पसा-
कंयाथकंहधूतयः१स्थिरावःसन्त्वायुधापराणुदेवीळूउतप्रतिष्कभेयुष्माकंमस्तुत
विंपीपनीयसीमामर्त्यस्यमायिनः २ पराह्यत्स्थिरंहथनरोवर्तयथागुरु । विया-
थनवनिनःपृथिव्याव्याशाःपर्वतानाम् ३ नाहिवःशत्रुर्विविदेअधिद्यविनभूम्यो-
रिशादसः । युष्माकंमस्तुतविंपीतनायुजारुद्रासोनूचिदाधृषे ४ प्रवेपयन्तिपर्व-
तान्विविञ्चन्तिवनस्पतीन् । प्रोआरतमरुतोदुर्मदाइवदेवासःसर्वयाविशा ५
॥ १८ ॥ उपोरथेषुपृषतीरयुग्ध्वंप्रष्टिर्वहतिरोहितः । आवोयामायपृथिवीचिद-
श्रोदवीभयन्तमानुषाः६आवोमक्षूतनायकंरुद्राअवोवृणीमहे । गन्तानूनंनोवसा-

यथापुरेत्थाकण्वायविभ्युषे ७ युष्मेषितोमरुतोमर्त्येषितआयोनोअभ्वदीषते ।
षितंयुयोतशर्वसाव्योजसाविषुष्माकाभिरूतिभिः ८ असामिहिप्रयज्यवःकण्वं
दुवस्यचेतसः । असामिभिर्मरुतआनऊतिभिर्गन्तावृष्टिंनविद्युतः ९ असाम्योजो
बिभृथासुदानवोतामिषूतयःशर्वः । ऋषिद्विषेमरुतःपरिमन्यवइषुंनसृजतद्वि-
यम् १० ॥ ११ ॥

उत्तिष्ठाष्टौ कण्वोब्रह्मणस्पतिः प्रागाथम् ।

१० उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे । उपप्रयन्तुमरुतःसुदानवइन्द्रप्राशू-
र्भवासचा १ त्वामिद्धिसहसस्पुत्रमर्त्यउपब्रूतेधनेहिते । सुवीर्यंमरुतआस्वश्व्यं-
दधीतयोवआचके २ प्रैतुब्रह्मणस्पतिःप्रदेव्यैतुसूनृता । अच्छावीरंनर्यंपङ्क्तिरा-
धसंदेवायज्ञंनयन्तुनः ३ योवाघतेददातिसूनरंवसुसधत्तेआक्षितिश्रवः । तस्माइ-

ळांसुवीरामार्यजामहेसुप्रतूर्तिमनेहसम् ४ प्रनूनंब्रह्मणस्पतिर्मन्त्रैवदत्युक्थ्यम् । यस्मिन्निन्द्रोवरुणोमित्रोअर्यमादेवाओकांसिचक्रिरे ५ ॥ २० ॥ तमिद्वोचेमा विदथेपुशंभुवंमन्त्रैदेवाअनेहसम् । इमांचवाचंप्रतिहर्यथानरोविश्वेद्वामावोंअभवत् ६ कोदेवयन्तमभवज्जनंकोवृक्तबर्हिषम् । प्रप्रदाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयंदधे ७ उपक्षत्रंपृञ्चीतहन्तिराजभिर्भयेचित्सुक्षितिंदधे । नास्यवर्ता नतरुतामहाधनेनार्भेअस्तिवज्रिणः ८ ॥ २१ ॥

यंरक्षन्तिनव कण्वोवरुणमित्रार्यमणःसुगःपन्थेतितृचस्यादित्यागायत्री ।

४१ यंरक्षन्तिप्रचेतसोवरुणोमित्रोअर्यमा । नूचित्सदभ्यतेजनः १ यंबाहुतेवपिप्रतिपान्तिमर्त्यंरिषः । अरिष्टःसर्वैएधते २ विदुर्गाविद्विषःपुरोघ्नन्तिराजानएषाम् । नयन्तिदुरितातिरः ३ सुगःपन्थांअनृक्षरआदित्यासऋतंयते । ना-

त्रावस्रादोअस्तिवः ४ यंयज्ञंनयथानरआदित्याऋजुनापथा । प्रवःसवीतयेनशत् ५ ॥ २२ ॥ सरद्वमत्योंवसुविश्वंतोकमुतत्मना । अच्छागच्छत्यस्तृतः ६ कथारांयामसखायःस्तोमंमित्रस्यार्यम्णः । महिप्सरोवरुणस्य ७ मावोघ्नन्तंमाशपन्तंप्रतिवोचेदेवयन्तम् । सुम्नैरिद्वआविवासे ८ चतुरश्चिद्ददमानाद्बिभीयादा निधातोः । नदुरुक्षायस्पृहयेत् ९ ॥ २३ ॥

संपूषन् दश काण्वः पूषा गायत्री ।

४२ संपूषन्नध्वनस्तिरव्यंहोविमुचोनपात् । सक्ष्वादेवप्रणस्पुरः १ योनःपूपन्नघोवृकोदुःशेवआदिदेशति । अपस्मतंपथोजहि २ अपत्यंपरिपन्थिनंमुषीवाणंहुरश्चितम् । दूरमधिस्रुतेरज ३ त्वंतस्यद्वयाविनोघशंसस्यकस्यचित् । पदाभितिष्ठतपुषिम् ४ आतत्तेदस्रमन्तुमःपूपन्नवोवृणीमहे । येनपितृनचोदयः

५ ॥ २४ ॥ अर्वाङोविश्वसौभगहिरण्यवाशीमत्तम । घनाँनिसुवणाकृधि ६ अतिंनःस्पृश्वतोनयसुगानःसुपथाकृणु । पूर्पन्निहक्रतुंविदः ७ अभिसूयवंसंनय ननवज्वारोअध्वने । पूर्पन्निहक्रतुंविदः ८ ग्राग्धिपूर्धिप्रयांसिचशिशीहिप्रास्युदरम् । पूर्पन्निहक्रतुंविदः १ नपूपणंमेथामसिसूक्तैरभिगृणीमसि । वसूनिदस्ममीमहे १० ॥ २५ ॥

कद्रुद्राय नव कण्वोरुद्रः तृतीयायामित्रावरुणौ अन्यतृचस्य सोमोगायत्री अन्यानुष्टुप् ।

४३ कद्रुद्रायप्रचेतसेमीळ्हुष्टमायतव्यसे । वोचेमशन्तमंहृदे १ यथानोअदितिःकरत्पश्वेनृभ्योयथागवे । यथातोकायरुद्रियम् २ यथानोमित्रोवरुणोयथारुद्रश्चिकेतति । यथाविश्वेसजोषसः ३ गाथपतिंमेधपतिरुद्रंजलाषभेषजम् । तच्छंयोःसुम्नमीमहे ४ यःशुक्रइवसूर्योहिरण्यमिवरोचते । श्रेष्ठोदेवानावसुः ५

॥ २६ ॥ शंनःकरत्यर्वतेसुगंमेपार्यमेभ्यै । नृभ्योनारिभ्योगवे ६ अस्मेसोम श्रियमधिनिधेहिशतस्यंनृणाम् । महिश्रवस्तुविनृम्णम् ७ मानःसोमपरिवाधोमारातयोजुहुरन्त । आनइन्दोवाजेभज ८ यास्तेप्रजाअमृतस्यपरस्मिन्धामन्नृतस्य । मूर्धानाभासोमवेनआभूषन्तीःसोमवेदः १ ॥ २७ ॥ इति शाकलर्क् शाखासंहितायां प्रथमे मण्डलेऽष्टमोनुवाकः ॥ ८ ॥

अग्ने चतुर्दश काण्वः प्रस्कण्वोग्निराद्ययोरश्विनावुपाश्च प्रागाथम् ।

४४ अग्नेविवस्वदुषसश्चित्रंराधोअमर्त्य । आदाशुपेजातवेदोवहात्वमद्यादेवाँउषर्बुधः १ जुष्टोहिदूतोअसिहव्यवाहनोग्नेरथीरध्वराणाम् । सजूरश्विभ्यामुषसासुवीर्यमस्मेधेहिश्रवोबृहत् २ अद्यादूतंवृणीमहेवसुमग्निंपुरुप्रियम् । धूमकेतुंभाऋजीकंन्युष्टिषुयज्ञानामध्वरश्रियम् ३ श्रेष्ठंयविष्ठमतिथिंस्वाहुतंजुष्टं

जनायवाशुषे । देवाँअच्छायातवेजातवेदसमग्निमीळेव्युष्टिषु ४ स्तविष्यामि त्वामहंविश्वस्यामृतभोजन । अग्नेत्रातारममृतंमियेध्ययजिष्ठंहव्यवाहन ५ ॥ २८ ॥ सुशंसोवोधिगृणतेयविष्ठ्यमधुजिह्वःस्वाहुतः । प्रस्कण्वस्यप्रातिरन्नायुर्जीवसेनमस्यादैव्यंजनम् ६ होतारंविश्ववेदसंसंहित्वाविशांइन्यतें । सआवह पुरुहूतप्रचेतसोग्नेदेवाँइहद्रवत् ७ सवितारमुषसमश्विनाभगमग्निंव्युष्टिषुक्षपः । कण्वासस्त्वासुतसोमासइन्धतेहव्यवाहंस्वध्वर ८ पतिर्ह्यध्वराणामग्नेदूतोविशामसि । उषर्बुधआवहसोमपीतयेदेवाँअद्यस्वर्दृशः ९ अग्नेपूर्वाअनूषसोविभावसोदीदेथविश्वदर्शतः । असिग्रामेष्ववितापुरोहितोसियज्ञेषुमानुषः ॥ १० ॥ २१ ॥ नित्वायज्ञस्यसाधनमग्नेहोतारमृत्विजम् । मनुष्वद्देवधीमहिप्रचेतसंजीरंदूतममर्त्यम् ११ यद्देवानांमित्रमहःपुरोहितोन्तरोयासिदूत्यम् । सिन्धोरिव

प्रस्वनितासऊर्मयोग्नेभ्राजन्तेअर्चयः १२ शुचिश्शुक्रऽर्णवाहिभिर्दुवैरग्नेसयावभिः । आसीदन्तुबर्हिषिमित्रोअर्यमाप्रातर्यावाणोअध्वरम् १३ शृण्वन्तुस्तोममरुतःसुदानवोग्निजिह्वाऋतावृधः । पिबंतुसोमंवरुणोधृतव्रतोश्विभ्यामुषसासजूः १४ ॥ ३० ॥

त्वमग्ने दश प्रस्कण्वोग्निः अन्त्योर्धर्चोदैवः अनुष्टुप् ।

४५ त्वमग्नेवसूँरिहरुद्राँआदित्याँउत । यजास्वध्वरंजनंमनुजातंधृतप्रुषम् १ श्रुष्टीवानोहिदाशुषेदेवाअग्नेविचेतसः । तान्नोहिदक्षगिर्वणस्त्रयस्त्रिंशतमावह २ प्रियमेधवदत्रिवज्जातवेदोविरूपवत् । अङ्गिरस्वन्महिव्रतप्रस्कण्वस्यश्रुधीहवम् ३ महिकेरवऊतयेप्रियमेधाअहूषत । राजन्तमध्वराणांअग्निंशुक्रेणशोचिषा ४ घृताहवनसन्त्येमाउषुश्रुधीगिरः । याभिःकण्वस्यसूनवोहवं- ॥ ३४ ॥ अ.१अ.३

न्तेवसेत्वा ५ ॥ ३१ ॥ त्वांचित्रश्रवस्तमहवन्तेविक्षुजन्तवः । शोचिष्केशंपुरुप्रियाग्नेहव्यायवोह्वे ६ नित्वाहोतारमृत्विजंदधिरेवसुवित्तमम् । श्रुत्कर्णंसप्रथस्तमंविप्राअग्नेदिविष्टिषु ७ आत्वाविप्राअचुच्यवुःसुतसोमाअभिप्रयः । बृहद्भाविभ्रतोहविरग्नेमर्तायदाशुषे ८ मातुर्याऊर्णःसहस्कृतसोमपेयायसन्त्य । इहाद्यदैव्यंजनंबर्हिरासादयावसो ९ अर्वाञ्चंदैव्यंजनमग्नेयक्ष्वसहूतिभिः । अयंसोमःसुदानवस्तंपातातिरो अंक्षयम् १० ॥ ३२ ॥

एषोषभदशमस्कण्वोश्विनौ गायत्री ।

३३ एषोउषाअपूर्व्यव्युच्छतिप्रियादिवः । स्तुषेवामश्विनाबृहत् १ यादृघासिन्धुमातरामनोतरारयीणाम् । धियादेवावसुविदा २ वृष्यन्तेवांककुहा-

सोजूर्णाया मधिविष्टपि । यद्वारथोविभिष्पतात् ३ हविर्वाजारोअपांपिपर्तिपपु-
रिर्नरा । पितेकुटंस्यचर्षणिः ४ आदारोवांमतीनांनासत्यामतवचसा । पातं
सोमंस्यधृष्णुया ५ ॥ ३३ ॥ यानुःपीपरदश्विनाज्योतिष्मतीतमंस्तिरः । ता-
मस्मेरासाथामिषम् ६ आनोनावामतीनांयातंपारायुगन्तवे । युञ्जाथांमश्विना-
रथम् ७ अरित्रंवांदिवस्पृथुतीर्थेसिन्धूनांरथः । धियायुयुज्रइन्दवः ८ दिवस्कं-
ण्वासइन्दवोवसुसिन्धूनांपदे । स्वंव्रिंकुर्हधित्सथः ९ अभूदुभाउंशवेहिरण्यं
प्रतिसूर्यः । व्यख्यज्जिह्वयासितः १० ॥ ३४ ॥ अभूदुपारमेतवेपन्थाऋतस्य
साधुया । अदर्शिविस्रुतिर्दिवः ११ तत्तदिदश्विनोरवोजरितारप्रतिभूषति । म-
देसोमंस्यपिप्रतोः १२ वावसानाविवस्वतिसोमंस्यपीत्यागिरा । मनुष्वच्छंभु
आगतम् १३ युवोरुषाअनुश्रियंपरिज्मनोरुषाचरत् । ऋतावंनथोअक्तुभिः १४

उभापिंबतमश्विनोभानुःशमँयच्छतम् । अविद्रियाभिंरूतिभिः १५ ॥ ३५ ॥
इति शाकलर्क्संहितायां प्रथमाष्टके तृतीयोध्यायः ॥ ३ ॥

अयंदशमागाथंतुसहपोळशोपस्यंतूपश्चतुष्कमानुष्टुभंतूदुत्यंसप्तोनासौर्यनवाद्यागायत्र्योन्त्यस्तृचोरोगन्नऽपानिपदन्त्योर्धर्चोद्विपद्मोभित्यंपञ्चोनासव्योद्वित्रिष्टुवन्तमङ्गिराइन्द्रतुल्यंपुत्रमिच्छन्नभ्यध्यायत्सव्यइतीन्द्रपत्नास्यपुत्रोजायतत्यंसुत्रयोदश्यन्त्येत्रिष्टुभौन्यूष्वेकादशान्त्येत्रिष्टुभौ मानोन्त्यात्रिष्टुप्पष्ठ्यष्टमीनवमीचदिवथिदष्टौजागतंत्रेपमपदमयंहिष्ठायनूचिन्नननोधागौतमआग्नेयंहिचतुस्त्रिष्टुवन्तंबयाइत्सप्तवैश्वानरीयंबर्हिपश्चाद्दुपोळश ॥ ४ ॥

अयं दश मस्कण्वोश्विनौ मागाथम् ।

४७ अयंवांमधुमत्तमःसुतःसोमऋतावृधा । तमंश्विनापिवतंतिरोअह्न्यंघु-

---

१ अन्त्योर्धर्चोद्विपद्मइत्यधिकमेकस्मिन्पुस्तके ।

चंरत्नानिदाशुषे १ त्रियन्धुरेणत्रिवृतासुपेशसारथेनायातमश्विना । कण्वासो-
वांव्रह्मकृण्वन्त्यध्वरेतेषांसुशृणुतंहवम् २ अश्विनामधुमत्तमंपातंसोममृतावृधा।
अथाद्यदंस्रावसुविभ्रतारथेदाश्वांसमुपगच्छतम् ३ त्रिपधस्थेवर्हिषिविश्ववेदसा
मध्वायज्ञंमिमिक्षतम् । कण्वासोवांसुतसोमाअभिद्यवोयुवांहवन्तेअश्विना ४
याभिःकण्वमभिष्टिभिःप्रावंतंयुवमश्विना । ताभिःष्वस्माँअवतंशुभस्पतीपा-
तंसोममृतावृधा ॥ ५ ॥ १ ॥ सुदासेदंस्रावसुभिर्भ्रतारथेपृक्षोवहतमश्विना ।
रयिंसमुद्रादुतवादिवस्पर्यस्मेधत्तंपुरुस्पृहम् ६ यन्नासत्यापरावतियद्वास्थोअधि
तुर्वशे । अतोरथेनसुवृतानआगतंसाकंसूर्यस्यरश्मिभिः ७ अर्वाञ्चावांसप्तयोध्व-
रश्रियोवहन्तुसवनेदुपं । इषंपृञ्चन्तासुकृतेसुदानवआवहिःसीदतंनरा ८ तेन-
नासत्यागतंरथेनसूर्यत्वचा । येनशश्वदूहथुर्दाशुषेवसुमध्वःसोमस्यपीतये १

उक्थेभिरुर्वागर्वसेपुरूवसूअर्कैश्चनिह्वयामहे । शश्वत्कण्वानांसदसिप्रियेहिकं सोमंपपथुरश्विना १० ॥ २ ॥

सहवामेन षोडश प्रस्कण्वः उषाः भागाथम् ।

४८ सहवामेननउषोव्युच्छादुहितर्दिवः । सहद्युम्नेनबृहताविभावरिरायादेविदास्वती १ अश्वावतीर्गोमतीर्विश्वसुविदोभूरिंन्यवन्तवस्तवे । उदीरयप्रतिमासूनृताउषश्चोदराधोमघोनाम् २ उवासोषाउच्छाचनुदेवीजीरारथानाम् । येअस्याआचरणेषुदध्रिरेसमुद्रेनश्रवस्यवः ३ उषोयेतेप्रयामेषुयुञ्जतेमनोदानायसूरयः । अत्राहतत्कण्वएषांकण्वतमोनामगृणातिनृणाम् ४ आघायोषेवसून्यूषायातिप्रभुञ्जती । जरयन्तीवृजनंपद्वदीयतउत्पातयतिपक्षिणः ५ ॥ ३ ॥ वियासृजतिसमनंव्यर्थिनःपदंनवेत्योदती । वयोनकिष्टेपप्तिवांसआसतेव्युष्टौ

वाजिनीवति ६ एषायुक्तपरावतःसूर्यस्योदयनादधि । शतंरथेभिःसुभगोषाइयं वियात्यभिमानुषान् ७ विश्वमस्यानानामचक्षसेजगज्ज्योतिष्कृणोतिसूनरी । अपद्वेषोमघोनीदुहितादिवउषाउच्छदसस्रिधः ८ उषआभाहिभानुनाचन्द्रेणदुहितर्दिवः । आवहन्तीभूर्यस्मभ्यंसौभगंव्युच्छन्तीदिविष्टिषु ९ विश्वस्याहिप्राणनंजीवनत्वेवियदुच्छसिसूनरि । सानोरथेनबृहताविभावरिश्रुधिचित्रामघेहवम् १० ॥ ४ ॥ उषोवाजंहिवंस्वयश्चित्रोमानुषेजने । तेनावहसुकृतोअध्वराँउपयेत्वागृणन्तिवह्नयः ११ विश्वान्देवाँआवहसोमपीतयेन्तरिक्षादुषस्त्वम् । सास्मासुधागोमदश्वावदुक्थ्यं१मुषोवाजंसुवीर्यम् १२ यस्यारुशन्तोअर्चयःप्रतिभद्राअदृक्षत । सानोरयिंविश्ववारंसुपेशसमुषादंदातुसुग्म्यम् १३ येचिद्धित्वामृषयःपूर्वऊतयेजुहूरेवंसेमहि । सानःस्तोमाँअभिगृणीहिराधसोषःशुक्रेणशोचिषा ॥ ३७ ॥

चिषा १४ उपोयदद्यभानुनाविहारावृणवोदिवः । प्रनोयच्छतादवृकंपृथुच्छर्दिः प्रदेविगोमतीरिषः १५ संनोरायावृहताविश्वपेशसामिमिक्ष्वासमिळाभिरा । संद्युम्नेनविश्वतुरोपोमहिसंवाजैर्वाजिनीवति १६ ॥ ५ ॥

उषश्चतुः मस्कण्वउषाअनुष्टुप्।

४१ उषोभद्रेभिरागहिदिवाश्चिद्रोचनादधि । वहन्त्वरुणप्सवउपत्वासोमिनोगृहम् १ सुपेशसंसुखंरथंयमध्यस्थाउपस्त्वम् । तेनासुश्रवसंजनंप्रावाद्य दुहितर्दिवः २ वर्यश्चित्तेपतत्रिणोद्विपच्चतुष्पदर्जुनि । उषःप्रारन्नृतूँरनुदिवोअन्तेभ्यस्परि ३ व्युच्छन्तीहिरश्मिभिर्विश्वंमाभासिरोचनम् । तांत्वामुषर्वसूयवोगीर्भिःकण्वाअहूषत ४ ॥ ६ ॥

५० उदुत्यंजातवेदसंदेवंवहन्तिकेतवः। दृशेविश्वायसूर्यम् १ अपत्येतायवोयथानक्षत्रायन्त्यक्तुभिः। सूरायविश्वचक्षसे २ अदृश्रमस्यकेतवोविरश्मयोजनाँअनु। भ्राजन्तोअग्नयोयथा ३ तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य। विश्वमाभासिरोचनम् ४ प्रत्यङ्देवानांविशःप्रत्यङ्ङेषिमानुषान्। प्रत्यङ्विश्वं स्वर्दृशे ५ ॥ ७ ॥ येनापावकचक्षसाभुरण्यन्तंजनाँअनु। त्वंवरुणपश्यसि ६ वियामेषिरजस्पृथ्वहामिमानोअक्तुभिः। पश्यञ्जन्मानिसूर्य ७ सप्तत्वाहरितोरथेवहन्तिदेवसूर्य। शोचिष्केशंविचक्षण ८ अयुक्तसप्तशुन्ध्युवःसूरोरथस्यनप्त्यः। ताभिर्यातिस्वयुक्तिभिः ९ उद्वयंतमसस्परिज्योतिष्पश्यन्तउत्तरम्। देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम् १० उद्यन्त्रयमित्रमहआरोहन्नुत्तरांदिवम्। ॥ ३८ ॥

हृद्रोगंममसूर्यहरिमाणंचनाशय ११ शुकेषुमेहरिमाणंरोपणाकांसुदध्मसि । अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि १२ उदगादयमादित्योविश्वेनसहसासह । द्विषन्तंमह्यरन्धयन्मोअहंद्विषतेरधम् १३ ॥ ८ ॥ इति शाकलकसंहितायां प्रथमे मण्डले नवमोनुवाकः ॥ ९ ॥

अभिषं पञ्चदश आङ्गिरसःसव्यइन्द्रोजगती अन्त्येद्वेत्रिष्टुभौ।

५१ अभित्यंमेषंपुरुहूतमृग्मियमिन्द्रंगोभिर्मदतावस्वोअर्णवम् । यस्यद्यावोन विचरन्तिमानुषाभुजेमंहिष्ठमभिविप्रमर्चत १ अभीमवन्वन्स्वभिष्टिमूतयोन्त रिक्षप्रांतविषीभिरावृतम् । इन्द्रंदक्षासक्रुभवोमदच्युतंशतक्रतुंजवनीसूनृतारुहत् २ त्वंगोत्रमङ्गिरोभ्योवृणोरपोतार्त्नयेशतदुरेषुगातुवित् । सुसेनंचिद्विमदायावहोवस्वाजावद्रिंवावसानस्यनर्तयन् ३ त्वमपामपिधानावृणोरपाधारयः-

पर्वतेदानुमह्सु । वृत्रंयदिन्द्रशवसावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे ४ त्वं मायाभिरपमायिनंधमःस्वधाभिर्येअधिशुत्रावजुह्वत । त्वंपिप्रोर्नृमणःप्रारुजःपुरःप्रक्रुजिश्वानंदस्युहत्येष्वाविथ ५॥ १ ॥ त्वंकुत्सेशुष्णहत्येष्वाविथारन्धयोतिथिग्वायशम्बरम् । महान्तंचिदर्बुदंनिक्रमीःपदासनादेवदस्युहत्यायजाज्ञिपे ६ त्वेविश्वातविंपीसद्र्यंग्घितातवरार्धःसोमपीथायहर्षते । तवव्रजंश्चिकितेवाह्वोहितोवृश्चाशत्रोरविश्वानिवृष्ण्या ७ विजानीह्यार्यान्येचदस्यवोवृहिंष्मंतेरन्धयाशासंदव्रतान् । शाकीभवयजमानस्यचोदितौविश्वेत्तातेसधमादेषुचाकन ८ अनुव्रतायरन्धयन्नपव्रतानाभूभिरिन्द्रःश्रथयन्ननाभुवः । वृषस्यांचिद्वर्धतोद्यामिनंक्षतःस्तवानोवज्रोविजंघानसन्दिहः ९ तक्षद्यत्तउशनासहंसासहोविरोदसी मज्मनावाधतेशवः । आत्वावातस्यनृमणोमनोयुजआपूर्यमाणमवहन्नभि

श्रवः १० ॥ १० ॥ मन्दिष्टयदुशनेकाव्येसचाँइन्द्रोवङ्कूवङ्कुतराधितिष्ठति । उग्रो
यर्यिनिरपःस्रोतसासृजद्विशुष्णस्यदंहितारैरयत्पुरः ११ आस्मारथंवृषपाणेषु
तिष्ठसिशार्यातस्यप्रभृतायेषुमन्दसे । इन्द्रयथासुतसोमेषुचाकनोनुर्वाणंश्लो-
कमारोहसेदिवि १२ अदंदाअभीमहतेवचस्यवेकक्षीवंतेवृचयामिंद्रसुन्वते ।
मेनाभवोवृषणश्वस्यसुक्रतोविश्वेत्तातेसवनेषुप्रवाच्या १३ इन्द्रोअश्रायिसुध्यो-
निरेकेपज्रेषुस्तोमोदुर्योनयूपः । अश्वयुर्गव्यूरथयुर्वसूयुरिन्द्रइद्रायःक्षयतिप्रयन्ता
१४ इदंनमोवृषभायस्वराजेसत्यशुष्मायतवसेवाचि । अस्मिन्निन्द्रवृजनेस-
र्ववीराःस्मत्सूरिभिस्तवशर्मन्त्स्याम १५ ॥ ११ ॥

तंसु पञ्चदश सव्यइन्द्रो जगती त्रयोदश्यन्त्येत्रिष्टुभौ ।

५२ त्यंसुमेषंमहयास्वर्विदंशतंयस्यसुभ्वःसाकमीरते । अत्यंनवाजंहवन-

स्यदंरथमेन्द्रंववृत्यामवंसेसुवृक्तिभिः १ सपर्वंतोनधरुणेष्वच्युतःसहस्रंमूति-
स्तविंषीयुवावृधे । इन्द्रोयद्वृत्रमवंधीन्नदीवृतंमुञ्जन्नर्णांसिजहँषाणोअन्धंसा २
सहिद्वरोद्वरियुंवज्रऊर्वनिचन्द्रवुंभ्रोमदंवृद्धोमनीषिभिः । इन्द्रंतमंह्वेस्वपस्ययाधि-
यामंहिष्ठरातिंसहिपाम्रिरन्धंसः ३ आयंपृणन्तिंदिविसद्मंबर्हिषःसमुद्रंनसुभ्वंः
स्वाअभिष्टंयः । तंवृत्रहत्येअनुतस्थुरूतयःशुष्माइन्द्रंमवाताअनुतप्सवः ४ आभि
स्ववृष्टिंमदेअस्ययुध्यंतोरघ्वीरिंवप्रवणेसंस्रुतयंः।इन्द्रोयद्वज्रीधृषमांणोअन्धंसा
भिनद्बलस्यंपरिधींरिंवत्रितः ५ ॥ १२ ॥ परींघृणाचंरातितित्विषेशवोपोवृ-
त्वीरजंसोवुभ्रमाशयत् । वृत्रस्ययत्प्रवणेदुर्गृभिश्वनोनिजघन्थहन्वोरिन्द्रतन्यु-
तुम् ६ ह्रदंनहित्वान्यपन्त्यूर्मयोब्रह्माणींद्रतवयानिवर्धना । त्वष्टांचित्तेयुज्यैवा-
वृधेशवस्ततक्षवज्रंमभिभूत्योजसम् ७ जघन्वाँउहरिभिःसंभृतक्रतविन्द्रंवृत्रं

मनुषेगातुयन्नपः । अर्यच्छथावाह्नोर्वज्रमायुसमधारयोदिव्यासूर्यंदृशे ८ बृहत्स्व
श्चन्द्रमर्वयदुक्थ्यं१मकृण्वतभियसारोहणंदिवः । यन्मानुषप्रधनाइन्द्रमूतयः
स्वर्नृषाचोमरुतोमदन्ननु ९ द्यौश्चित्वस्यामवाँअहेःस्वनादयोयवीद्भियसाव-
ज्रइन्द्रते । वृत्रस्ययद्बह्वधानस्यरोदसीमदेसुतस्यशवसाभिनच्छिरः १० ॥ १३ ॥
यदिन्द्विन्द्रपृथिवीदशभुजिरहानिविश्वातुतर्न्तकृत्यः । अत्राहतेमघवन्विश्रु-
तंसहोद्यामनुशवसावर्हणाभुवत् ११ त्वमस्यपारेरजसोव्योमनःस्वभूत्योजा
अवसेधृषन्मनः । चकृषेभूमिंप्रतिमानमोजसोपःस्वःपरिभूरेष्यादिवम् १२
त्वंभुवःप्रतिमानंपृथिव्याऋष्ववीरस्यबृहतःपतिर्भूः । विश्वमाप्राअन्तरिक्षंमहि-
त्वासत्यमद्धानकिरन्यस्त्वावान् १३ नयस्यद्यावापृथिवीअनुव्यचोनासिन्धवो
रजसोअन्तमानशुः । नोतस्ववृष्टिंमदेअस्ययुध्यतएकोअन्यच्चकृषेविश्वमानुष-

क् १४ आत्तन्नत्रमरुतःसस्मिन्नाजौविश्वेदेवासोअमदन्ननुत्वा । वृत्रस्ययद्भृष्टि-
मतोवधेननित्वमिन्द्रप्रत्यानंजघन्थ १५ ॥ १४ ॥

॥ ४१ ॥

न्यूप्वेकादश सव्यइन्द्रोजगती अन्त्येत्रिष्टुभौ ।

५३ न्यू३पुवाचंप्रमहेभंरामहेगिरइन्द्रायसदनेविवस्वतः । नूचिद्धिरण्मंसत-
तामिवाविदन्नद्गुंष्टुतिर्द्वविणोदेवुशस्यते १ दुरोअश्वस्यदुरइन्द्रगोरसिदुरोयवस्यव-
सुंनइनस्पतिः । शिक्षानरःप्रदिवोअकांमकर्शनःसखासखिंभ्यस्तामिदंगृणीम-
सि २ शचींवइन्द्रपुरुकृद्युमत्तमतवेदिदमभितश्चेकितेवसु । अतःसंगृभ्याभि-
भूतआभंरमात्वायतोजरितुःकामंमूनयीः ३ एभिर्द्युभिःसुमनाएभिरिन्दुभिर्नि-
रुन्धानोअमतिंगोभिरश्विना । इन्द्रेणदस्युंदरयन्तइन्दुभिर्युतद्वेषसःसमिषारभे
महि ४ समिन्द्रायासमिषारभेमहितंवाजेभिःपुरुश्चन्द्रैरभिर्द्युभिः । संदेव्याम-

॥ ४१ ॥

मंत्यावीरशुंष्मयागोअंग्रयाश्वावत्यारभेमहि ५ ॥ १५ ॥ तेत्वामदाअमदन्ता-
निवृष्ण्यातेसोमासोवृत्रहत्यैंपुसत्पते । यत्कारवेदशांवृत्राण्यंप्रतिवर्हिष्मंतेनिसह
स्राणिवर्हयः ६ युधायुधमुपधेदैंपिधृष्णुयापुरापुरंसमिदंहंस्योजसा । नम्याय-
दिंन्द्रसख्यांपरावतिंनिवर्हयोनमुंचिंनामंमायिनम् ७ त्वंकरंञ्जमुतपर्णयैंवधीस्ते-
जिंष्ठयातिथिग्वस्यवर्तनी । त्वंशतावंगृदस्याभिनत्पुरोंनानुदःपरिंपूताक्रुजि
श्वंना ८ त्वमेताञ्जनराज्ञोद्विर्दशांबन्धुनासुश्रवंसोपजग्मुषः । षष्टिंसहस्रांनव-
तिंनवश्रुतोनिचक्रेणरथ्यांदुष्पदांवृणक् ९ त्वमांविथसुश्रवंसंतवोतिभिस्तवत्रा
मंभिरिन्द्रतूर्वंयाणम् । त्वमंस्मैकुत्समतिथिग्वमायुंमहेराज्ञेयूनेंअरन्धनायः १०
यउद्दचींन्द्रदेवगोपाःसखायस्तेशिवतंमाअसाम । त्वांस्तोषामत्वयासुवीराद्रा-
घीयआयुःप्रतरंदधानाः ११ ॥ १६ ॥

॥ ४२ ॥

५४ मानोअस्मिन्मघवन्पृत्स्वंहसिनहितेअन्तःशवसःपरीणशे । अक्रन्दयो
नद्योरोरुवद्वनाक्रथानक्षोणीभियसासमारत १ अर्चाशक्रायशाकिनेशचीव·
तेशुष्वन्तामिन्द्रंमहयन्नभिष्टुहि । योधृष्णुनाशवसारोदसीउभेवृषावृषत्वावृषभो
न्यृञ्जते २ अर्चादिवेबृहतेशूष्यंवचःस्वक्षत्रंयस्यधृषतोधृषन्मनः । बृहच्छवा
असुरोबर्हणाकृतःपुरोहरिभ्यांवृषभोरथोहिषः ३ त्वंदिवोबृहतःसानुकोपयोव
त्मनाधृषताशवसाभिनत् । यन्मायिनोव्रन्दिनोमन्दिनाधृषच्छितांगभस्तिमशा-
निंपृतन्यसिं ४ नियद्वणक्षिश्वसनस्यमूर्धनिशुष्णस्याचिद्व्रन्दिनोरोरुवद्वना । प्रा-
चीनेनमनसावर्हणावतायदद्याचित्कृणवःकस्त्वापरि ५ ॥ १७ ॥ त्वमाविथ-
नयंतुर्वशंयदुंत्वंतुर्वीतिंवय्यंशतक्रतो । त्वंरथमेतशंकृत्व्येधनेत्वंपुरोनवतिंदम्भ-

॥ ४२ ॥

योनवं ६ सघाराजासत्पतिःशूशुवज्जनोरातहव्यःप्रतियःशासमिन्वति । उ-
क्थाचायोअभिगृणातिराधसादानुरस्माउपरापिन्वतेदिवः ७ असंमक्षत्रमसमा
मनीषाप्रसोमपाअपसासन्तुनेमे । येतइन्द्रददुषोवर्धयन्तिमहिक्षत्रंस्थविरंवृ-
ष्ण्यंच ८ तुभ्येदेतेबहुलाअद्रिदुग्धाश्चमूषदश्वसाइन्द्रपानाः । व्यश्नुहितर्पया
कामंमेगामथामनोवसुदेयायकृष्व ९ अपामतिष्ठद्रुरुणद्धरंतमोन्तर्वृत्रस्यजठरे-
ष्वुपवंतः । अभीमिन्द्रोनद्योवव्रिणाहिताविश्वाअनुष्ठाःप्रवणेषुजिघ्नते १० सशे-
वृधमधिधायुम्नमस्मेमहिक्षत्रंजनायाविन्द्रतव्यम् । रक्षाचनोमघोनःपाहिसरी-
रायेचनःस्वपत्याइषेधाः ११ ॥ १८ ॥

दिवश्चिदष्टौ सव्यइन्द्रोजगती ।

५५ दिवश्चिदस्यवरिमाविपप्रथइन्द्रंनमह्नापृथिवीचनप्रति । भीमस्तुविष्मा-

श्वर्यणिभ्यंआतपःशिशीतेवज्रंतेजसेनवंसगः१सोअर्णवोननद्यःसमुद्रियःप्रतिगृ-
भ्णातिविश्रितावरीमभिः । इन्द्रःसोमंस्यपीतयेवृषायतेसनात्सयुध्मओजसा
पनस्यते २ त्वंतमिन्द्रपर्वतंनभोजसेमहोनृम्णस्यधर्मणामिरज्यसि । प्रवीर्ये
णदेवतातिंचेकितेविश्वस्माउग्रःकर्मणेपुरोहितः ३ सइद्वनेनमस्युभिर्वचस्यते
चारुजनेषुप्रब्रुवाणइन्द्रियम् । वृषाछन्दुर्भवतिहर्यतोवृषाक्षेमेणधेनांमघवायादि-
न्वति ४ सइन्महानिसामिथानिमज्मनाकृणोतियुध्मओजसाजनेभ्यः । अधा
चनश्रद्दधतित्विषीमतइन्द्रायवज्रंनिघनिघ्नतेवधम् ५ ॥ ११ ॥ सहिश्रवस्युः
सदनानिकृत्रिमाक्षमयावृधानओजसाविनाशयन् । ज्योतींषिकृण्वन्नवृकाणि
यज्युवेवंसुक्रतुःसर्तवाअपःसृजत् ६ दानायमनःसोमपावन्नस्तुतेवाश्राहरी
वन्दनश्रुदाकंधि । यमिष्टासःसारथयोयइन्द्रतेनत्वाकेताआदाप्नुवन्तिभूर्णयः ७

अप्रक्षितंवसुविभर्पिहस्तयोरपाङ्क्तंसहस्तान्विंश्रुतोदधे । आवृतासोवृतासोनकृ-
र्त्तृभिस्तनूपुतेक्रतवइन्द्रभूरयः ८ ॥ २० ॥

एषप्रपद् सव्यइन्द्रोजगती ।

५६ एषप्रपूर्वीरवतस्यचम्रिपोत्योनयोपामुदयंस्तभुर्वणिः । दक्षंमहेपाययते-
हिरण्ययंरथंमावृत्याहरियोगमभ्वंसम् १ तंगूर्तयोनेमन्निपःपरीणसःसमुद्रंनसंचर-
णेसनिष्यवः । पतिंदक्षस्यविदथस्यनूसहोगिरिंनवेनाअधिरोहतेजसा २ सतुर्वणि-
र्महाँअरेणुपाँस्येगिरेर्भृष्टिर्नभ्राजतेतुजाशवः । येनशुष्णंमायिनंमाय-
सोमदेदुध्रआभूपुरामयन्निदार्मनि ३ देवीयदितविपीत्वावृधोतयइन्द्रंसिषक्त्युप-
सेनसूर्यः । योधृष्णुनाशवसावाधतेतमइर्यतिरेणुंबृहदर्हरिष्वणिः ४ वियत्तिरो
धुरुणमच्युतंरजोतिष्ठिपोदिवआतासुबर्हणा । स्वर्मीळ्हेयन्मदइन्द्रहर्ष्याहन्वृत्रं

निरपामौब्जोअर्णवम् ५ त्वंदिवोधरुणंधिपृओजसापृथिव्याइन्द्रसदंनेपुमाहिं-
नः । त्वंसुतस्यमदेंअरिणाअपोविवृत्रस्यंसमयांपाप्यांरुजः ॥ ६ ॥ २३ ॥

प्रमंहिष्ठाय षट् सप्तदशस्यइन्द्रोजगती ।

५७ प्रमंहिंष्ठायवृहतेवृहद्रयेसत्यशुंष्मायतवसेंमतिंभरे । अपामिंवप्रवणेय-
स्यंदुर्धरंराधोंविश्वायुशवंसेअपांवृतम् १ अधंतेविश्वमनुंहासदिष्टयुआपोंनिम्ने-
वसवंनाहविष्मंतः । यत्पर्वतेनसमशीतहर्यतइन्द्रस्यवज्रःश्रथिंताहिरण्ययः २
अस्मैभीमायनमसासमध्वरउषोनशुभ्रआभरापनीयसे । यस्यधामश्रवसेना-
मेन्द्रियंज्योतिरकारिहरितोनायसे ३ इमेतइन्द्रतेवयंपुरुष्टुतयेत्वारभ्यचरामासि
प्रभूवसो । नहित्वदन्योगिर्वणोगिरःसघत्क्षोणीरिवप्रतिनोहर्यतद्रुचः ४ भूरित
इन्द्रवीर्यंंतवस्मस्यस्यस्तोतुर्मघवन्कामंमापृण । अनुतेद्यौर्बृहतीवीर्यंंममइयंच

तेपृथिवीनेमओजसेऽत्वंतमिन्द्रपर्वतंमहामुरुंवज्रेणवाज्रिन्पर्वशश्चकर्तिथ।अवा-
सृजोनिवृताःसर्तवाअपःसत्राविश्वेदधिषेकेवलंसहः ६ ॥ २२ ॥ इति शाक-
लर्क्संहितायां प्रथमे मण्डले दशमोनुवाकः ॥ १० ॥

नूचिन्नव गौतमोनोधा अग्निर्जगती अन्त्याश्चतस्रस्त्रिष्टुभः ।

५८ नूचित्सहोजाअमृतोनितुन्दतेहोतायदूतोअभवद्विवस्वतः । विसाधिष्ठे-
भिःपथिभीरजोममआदेवतातादविषाविवासति १ आस्वमद्यायुवमानोअजरं-
स्तृष्वविष्यन्नतसेषुतिष्ठति । अत्योनपृष्ठंप्रुषितस्यरोचतेदिवोनसानुंस्तनयन्नचि-
क्रदत् २ क्राणारुद्रेभिर्वसुभिःपुरोहितोहोतानिषत्तोरयिपाळमर्त्यः । रथोनवि-
क्ष्वंजसानआयुषुव्यानुपग्वायादेवक्रंप्वति ३ विवातंजूतोअतसेषुतिष्ठतेवृथाजु-
हूभिःसृण्यातुविष्वणिः । तृषुयदग्नेवनिनोवृषायसेकृष्णंतएमरुशदूर्मेअजर ४

तपुंजंभोवनुआवातंचोदितोयूथेनसाह्वाँअवंवातिवंसंगः । अभिव्रजन्नक्षितंपाज-
सारजंःस्थातुश्चरथंभयतेपत्त्रिणंः ५ ॥ २३ ॥ दधुष्टाभृगवोमानुषेष्वारयिंन
चारुंसुहवंजनेभ्यः । होतारमग्नेअतिथिंवरेण्यंमित्रंनशेवंदिव्यायजन्मने ६ हो-
तारंसप्तजुह्वो३यजिष्ठंयंवाघतोवृणतेअध्वरेषु । अग्निंविश्वेषामरतिंवसूनांसपर्या-
मिप्रयंसायामिरत्नम् ७ अच्छिद्रासूनोसहसोनोअद्यस्तोतृभ्योमित्रमहःशर्मय-
च्छ । अग्नेगृणन्तमंहसउरुष्योजोनपात्पूभिरायसीभिः ८ भवावरूथंगृणतेवि-
भावोभवामघवन्मघवद्भ्यःशर्म । उरुष्याग्नेअंहसोगृणन्तंप्रातर्मक्षूधियावसुर्जग-
म्यात् ९ ॥ २४ ॥

वयाइत्सप्त नोधावैश्वानरस्त्रिष्टुप् ।

५१ वयाइदग्नेअग्नयस्तेअन्येत्वेविश्वेअमृतासादयन्ते । वैश्वानरनाभिरसि

क्षितीनांस्थूणेवजनाँउपमिद्ययन्थ १ मूर्धादिवोनाभिरग्निःपृथिव्याअथाभवद-
रतीरोदस्योः । तंत्वादेवासोजनयन्तदेवंवैश्वानरज्योतिरिदार्याय २ आसूर्ये
नरश्मयोधुवासोवैश्वानरेदधिरेग्नावसूनि । यापर्वतेष्वोषधीष्वप्सुयामानुपेष्व-
सितस्यराजा ३ बृहतीइवसूनवेरोदसीगिरोहोतामनुष्योऽनदक्षः । स्वर्वतेसत्य-
शुष्मायपूर्वीर्वैश्वानरायनृतमाययह्वीः ४ दिवश्चित्तेबृहतोजातवेदोवैश्वानरप्ररि-
रिचेमहित्वम् । राजाकृष्टीनामसिमानुषीणांयुधादेवेभ्योवरिवश्चकर्थ ५ प्रनू-
मंहित्वंवृषभस्यवोचंयंपूरवोवृत्रहणंसचन्ते । वैश्वानरोदस्युमग्निजंघन्वाँअ-
धूनोत्काष्ठाअवशंवरंभेत् ६ वैश्वानरोमंहिम्नाविश्वकृष्टिर्भरद्वाजेषुयजतोविभा
वा । शातवनेयेशतिनीभिरग्निःपुरुणीथेजरतेसूनृतावान् ७ ॥ २५ ॥

६० बर्हिर्यशसंविदथस्यकेतुंसुप्राव्यंदूतंसद्योअर्थम् । द्विजन्मानंरयिमिंवप्रशस्तंरातिंभरद्भृगवेमातरिश्वा १ अस्यशासुरुभयासःसचन्तेहविष्मन्तउशिजोयेचमर्ताः । दिवश्चित्पूर्वोन्यसादिहोतापृच्छयोविशपतिंविक्षुवेधाः २ तंनव्यसीहृदआजायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः । यमृत्विजोवृजनेमानुपासःप्रयस्वन्तआयवोजीजनन्त ३ उशिक्पावकोवसुर्मानुषेषुवरेण्योहोतादाविविक्षु । दमूनागृहपतिर्दमआँअग्निर्भुवद्रयिपतीरयीणाम् ४ तंत्वावयंपतिमग्नेरयीणांप्रशंसामोमतिभिर्गोतमासः । आशुंनवाजंभरंमर्जयन्तःप्रातर्मक्षूधियावसूर्जगम्यात् ५ ॥ २६ ॥

अस्माइदुषोऽश नोधाइन्द्रस्त्रिष्टुप् ।

६१ अस्माइदुप्रतवसेतुरायप्रयोनहर्म्यस्तोमंमाहिनाय । ऋचीषमायाध्रिग-
वओहमिन्द्रायब्रह्माणिरातंमा १ अस्माइदुप्रयइवप्रयांसिभरांम्यांगूषंवार्धेसुवृ
क्ति । इन्द्रायेत्हदामनंसामनीषाप्रत्नायपत्येधियोमर्जयन्त २ अस्माइदुत्यमुपमं
स्वर्षांभरांम्यांगूषमास्येन । मंहिष्ठमच्छोक्तिभिर्मतीनांसुवृक्तिभिःसूरिंवावृधध्यै
३ अस्माइदुस्तोमंसंहिनोमिरथंनतष्टेवतत्सिनाय । गिरश्चगिर्वाहसेसुवृक्तीन्द्रा-
यविश्वमिन्वंमेधिराय ४ अस्माइदुसाप्तिमिवश्रवस्येन्द्रायार्कंजुह्वा३समञ्जे ।
वीरंदानौकंसंवन्दध्यैपुरांगूर्तिश्रवसंदर्माणम् ५ ॥ २७ ॥ अस्माइदुत्वष्टातक्षद्व-
ज्रंस्वपस्तमंस्वर्यं१रणाय । वृत्रस्यचिद्विदद्येनममंतुजन्नीशानस्तुजताकियेधाः
६ अस्येदुमातुःसवनेषुसद्योमहःपितुंपपिवाञ्चार्वन्ना । मुषायद्विष्णुःपचतंसहीं-

यान्विध्यद्वराहंतिरोअद्रिमस्तां ७ अस्माइदुग्राश्चिंद्देवपत्नीरिन्द्रायार्कमहिहत्य-
ऊचुः । परिद्यावापृथिवीजभ्रउर्वीनास्यतेमहिमानंपरिष्टः ८ अस्येदेवप्ररिरिचे
महित्वंदिवस्पृथिव्याःपर्यन्तरिक्षात् । स्वराळिन्द्रोदमआविश्वगूर्तःस्वरिरमंत्रोव-
वक्षेरणाय १ अस्येदेवशवसाशुषन्तंविवृश्चद्वज्रेणवृत्रमिन्द्रः । गानन्नाणाअव-
नीरमुञ्चदभिश्रवोदावनेसचेताः १० ॥ २८ ॥ अस्येदुत्वेषसारन्तसिन्धवःप-
रियद्वज्रेणसीमयच्छत् । ईशानकृद्दाशुषेदशस्यन्तुर्वीतयेगाधंतुर्वणिःकः ११ अ-
स्माइदुप्रंसहतुंजानोवृत्रायवज्रमीशानःकियेधाः । गोर्नपर्वविरदातिरश्वेष्य-
न्नर्णांस्यपांचरध्यै १२ अस्येदुप्रब्रूहिपूर्व्याणिंतुरस्यकर्माणिनव्यउक्थैः । युधेय-
द्विष्णानआयुधान्यघायमानोनिरिणातिशत्रून् १३ अस्येदुभियागिरयश्चद्दृळ्हा
द्यावाचभूमाजनुपस्तुजेते । उपोवेनस्यजोगुवानओणिंसद्योभुवद्वीर्यायनोधाः

॥ ४५

१४ अस्माइदुत्यदनुदाय्येषामेकोयहुन्नेभूरेरीशानः । प्रैतंशंसूर्येपस्पृधानंसौव-श्व्येसुष्विंमावदिन्द्रः १५ एवातेहारियोजनासुवृक्तीन्द्रब्रह्माणिगोतमासोअक्रन् । ऐषुंविश्वपेशसंधियंधाःप्रातर्मक्षूधियावंसुर्जगम्यात् १६ ॥ २९ ॥ ॐ ॥ इति शाकलर्क्संहितायां प्रथमाष्टके चतुर्थोध्यायः ॥ ४ ॥

प्रसप्तोनात्वंनवयुप्णेपञ्चोनामारुतंत्रिष्टुवन्तंपरमाग्नेयमैन्द्रात्पश्चादशपराशरःशाक्त्योद्वैपदंतद्रयिर्व-नेपुश्रीणञ्छुक्रोवनेमैकादशोपमदशानिकाव्यारयिर्नोपमयन्तोनवगोतमोराहूगणोगायत्रंतुजुपस्वपञ्च-कातेकथाभित्वागायत्रंतुहिरण्यकेशोद्वादशाद्यौतृचौत्रैष्टुभौप्णहौपूर्वोग्नेयेत्रामध्यमायेत्थापोळशैन्द्रंपा-क्तंहि ॥ (यामिन्नस्यांनिपातिनोदध्यङ्मनुरथर्वाचेति) ॥ ५ ॥

प्रमन्महे त्रयोदश नोधाइन्द्रस्त्रिष्टुप् ।

६२ ॐ॥ प्रमंन्महेशवसानायंशूषमांगूषंगिर्वणेअङ्गिरस्वत्।सुवृक्तिभिःस्तुवतऋं

ग्मि॒ यायाचा॑मा॒कैन॑रे॒विश्रु॑ताय१ प्रवो॑म॒हेम॑हि॒नमो॑भरध्वमांगू॒ष्यं॑शवसा॒नायु॒सा-
मे। येनां॒नः॒पूर्वे॑पि॒तरः॑पद॒ज्ञाअर्च॑न्तो॒अङ्गि॑रसो॒गाअवि॑न्दन् २ इन्द्र॒स्याङ्गि॑रसांचे॒ष्टौ
वि॒दत्स॒रमा॒तन॑यायधा॒सिम्। बृ॒ह॒स्पति॑भि॒र्नद॑मिंद्रि॒वि॒द्वा॒नसृ॒ज्रिया॑भि॒र्वावशं॑त॒नरः॑
३ सस्तु॒भा॒सस्तु॒भा॒स॒त्तवि॒प्रैः॒स्व॒रेणाद्रिं॒स्व॒र्यो॑३॒नव॑ग्वैः। स॒र॒ण्यु॒भिः॑फ॒लि॒गमिं॑न्द्र
शक्र॒वलं॑र॒वेण॒दर॑यो॒दश॑ग्वैः ४ गृ॒णा॒नो॒अङ्गि॑रोभि॒र्दस्म॒चि॒र्व॒रू॒पस्या॒सू॒र्येण॒गोभि॑र-
न्वः। विभ॒र्म्याअ॑प्रथय॒इन्द्र॒सानु॑दि॒वो॒र॒जउ॒परम॑स्तभायः ५ ॥ १ ॥ तदु॒प्रयं॑क्ष-
तम॒मस्य॒कर्म॑दस्मस्य॒चारु॑तम॒मस्ति॒दंसः। उ॒प॒ह्व॒रेय॒दुप॑राअ॒पिं॑न्व॒न्मध्व॑र्णसो॒न॒य॑१॑
श्चत॑स्रः ६ हि॒ताविं॑व॒त्रेस॒नजा॒सनी॑ळेअ॒यास्यः॑स्तव॒मा॒नेभि॒रर्कैः। भगो॒नमे
नेप॒रमे॒व्यो॒म॒न्धा॒र॒य॒द्रोद॑सीसु॒दंसाः ७ स॒नाद्दि॒वं॒परि॒भू॒माविं॑रू॒पेपु॒नर्भु॑वा॒युवती
स्वे॒भि॒रेवैः। कृ॒ष्णेभि॑र॒क्तोपा॒रु॒शं॑द्रि॒वं॒पु॒भि॒राच॑रतो॒अन्या॒न्या ८ सने॑मि॒सख्यं

॥ ४८ ॥

स्वपुष्यमानःसूनुर्दाधारशवसासुदंसाः। आमासुचिद्दधिषेपक्वमन्तःपयःकृष्णा-
सुरुग्रोहिणीषु १ सनात्सनीळाअवनीरवाताव्रतारक्षन्तेअमृताःसहोभिः। पुरूस-
हस्राजनयोनपत्नीर्दुवस्यन्तिस्वसारोअह्रयाणम् १० ॥ २ ॥ सनायुवोनमसा
नव्योअर्कैर्वसूयवोमतयोदस्मदद्रुः। पतिंनपत्नीरुशतीरुशन्तंस्पृशन्तित्वाशव-
सावान्मनीषाः ११ सनादेवतवरायोगभस्तौनक्षीयन्तेनोपदस्यन्तिदस्म। द्यु-
मॉंअसिक्रतुमॉंइन्द्रधीरःशिक्षाशचीवस्तवनःशचीभिः १२ सनायतेगोतमइन्द्र
मॉंअसिक्रतुमॉंइन्द्रधीरःशिक्षाशचीवस्तवनःशचीभिः १२ सनायतेगोतमइन्द्र
नव्यमतक्षद्ब्रह्महरियोजनाय। सुनीथायनःशवसाननोधाःप्रातर्मक्षूधियावसु-
र्जगम्यात् १३ ॥ ३ ॥

त्वं महान्नोधा इन्द्रस्त्रिष्टुप्।

६३ त्वंमहाँइन्द्रयोहशुष्मैर्द्यावाजज्ञानःपृथिवीअमेधाः। यद्धतेविश्वागिरय

श्विदभ्वाभियाद्दृह्लासःकिरणानेजन् १ आयद्गरीइन्द्रविव्रतावेरातेवज्रंजरिता वाह्वोर्धात् । येनाविहर्यतक्रतोअमित्रान्पुरंदृष्णासिपुरुहूतपूर्वीः २ त्वंसत्यइन्द्र धृष्णुरेतान्त्वमृभुक्षानर्यस्त्वंपाट् । त्वंशुष्णंवृजनेपृक्षआणौयूनेकुत्सायद्युमतेसचांहन् ३ त्वंहत्यादिन्द्रचोदीःसखावृत्रंयद्वज्रिन्वृषकर्मन्बुभ्राः । यद्वंशूरवृषमणःपराचैर्विदस्यूँर्योनावकृतोवृथापाट् ४ त्वंहत्यादिन्द्रारिषण्यन्दृह्लस्यचिन्मतीनामजुष्टौ । व्य१ स्मदाकाष्ठाअर्वतेवर्घनेवंवज्रिञ्छथिह्यमित्रान् ५ ॥ ४ ॥ त्वांहत्यादिन्द्राणंसातौस्वर्मीळ्हेनरआजाहवन्ते । तवंस्वधावइयमासंमर्यऊतिर्वाजेष्वतुसाय्याभूत् ६ त्वंहत्यादिन्द्रसमयुध्यन्पुरोवज्रिन्पुरुकुत्सायदर्दः । बर्हिर्नयत्सुदासेवृथावर्गंहोरांजन्यरिवःपूरवेकः ७ त्वंत्यांनइन्द्रदेवचित्रामिषमापोनपीपयः परिज्मन् । यथांशूरप्रत्यस्मभ्यंयंसित्मनमूर्जनविश्वधक्षरध्यै ८ अकारितइन्द्र

गोतमेभिर्वक्षाण्योक्तानमंसाहरिभ्याम् । सुपेशंसंवाजंमाभरानःप्रातर्मक्षूधि-
यावंमुजगन्यात् १ ॥ ५ ॥

वृष्णे पञ्चदश नोधा मरुतो जगती अन्त्या त्रिष्टुप् ।

६४ वृष्णेशर्धायसुमखायवेधसेनोधःसुवृक्तिंप्रभरामरुद्भ्यः । अपोनधीरोम-
नंसासुहस्त्योगिरःसमंञ्जेविदथेष्वाभुवः १ तेजंञ्जिरेदिवरुष्वासउक्षणोरुद्रस्यम-
र्याअसुराअरेपसः । पावकासःशुचयःसूर्याइवसत्वानोनद्रप्सिनोघोरवर्पसः २ यु-
वानोरुद्राअजरांअभोग्घनोववक्षुरध्रिगावःपर्वताइव । दृळ्हाचिद्विश्वाभुवनानि
पार्थिवाप्रच्यावयन्तिदिव्यानिमज्मना ३ चित्रैरञ्जिभिर्वपुषेव्यञ्जतेवक्षःसुरु-
क्मांअधियेतिरेशुभे । अंसेष्वेषांनिमिमृक्षुरुष्टयःसाकंजञ्जिरेस्वधयादिवोनरः
४ ईशानकृतोधुनयोरिशादसोवातान्विद्युतस्तविषीभिरक्त । दुहन्त्यूधर्दिव्या-

निधूतयोभूमिंपिन्वन्तिपयसापरिज्रयः ५ ॥ ६ ॥ पिन्वन्त्यपोमरुतःसुदानवः पयोघृतवद्दुदथेष्वाभुवः । अत्यंनमिहेविनयन्तिवाजिनमुत्संदुहन्तिस्तनयंन्तमक्षितम् ६ महिपासोमायिनश्चित्रभानवोगिरयोनस्वतवसोरगुष्यदः । मृगाइववहस्तिनःखादथावनायदारुणीयुतविपीरयुग्ध्वम् ७ सिंहाइवनानदतिप्रचेतसःपिशाइवसुपिशोविश्ववेदसः । क्षपोजिन्वन्तःपृषतीभिर्ऋष्टिभिःसमित्सबाधः शवसाहिमन्यवः ८ रोदसीआवदतागणश्रियोनृषाचःशूराःशवसाहिमन्यवः । आवन्धुरेष्वमतिर्नदर्शतावियुन्नतंस्थौमरुतोरथेयुवः ९ विश्ववेदसोरयिभिःसमोकसःसंमिश्लासस्तविषीभिर्विरप्शिनः । अस्तारइवदधिरेगभस्त्योरनन्तशुष्मावृषखादयोनरः १० ॥ ७ ॥ हिरण्ययेभिःपविभिःपयोवृधउज्जिघ्रन्तआपथ्योऽनपवँताम् । मखाअयासःस्वसृतोध्रुवच्युतोदुधुक्षतोमरुतोभ्राजदृष्टयः ११ घृ-

पुंपावकंवनिनंविचर्षणिंरुद्रस्यसूनुंहवसागृणीमसि । रजस्तुरंतवसंमारुतंगण-
मृंजीषिणंवृषणंसश्चतश्रिये १२ प्रनूसमर्तःशवसाजनाँअतितस्थौवंऊतीमरुतो-
यमावत । अवंद्रिर्वाजंभरतेधनानृभिरापृच्छ्यंक्रतुमाक्षैतिपुष्यति १३ चर्कृत्यं
मरुतःपृत्सुदुष्टरंद्युमन्तंशुष्मंमघवत्सुधत्तन । धनस्पृतंमुक्थ्यंविश्वचर्षणिंतोकंपु-
ष्येमतनयंशतंहिमाः १४ नूष्टिरंमरुतोवीरवन्तमृतीषाहंरयिमस्मासुधत्त ।
सहस्त्रिणंशतिनंशूशुवांसंप्रातर्मक्षूधियावसुर्जगम्यात् १५ ॥ ८ ॥ इति शाकल-
र्कसंहितायां प्रथमे मण्डल एकादशोऽनुवाकः ॥ ११ ॥

पञ्चा दश शाक्त्यः पराशरोऽग्निर्द्विदपा विराट् ।

६५ पश्वानतायुंगुहाचतन्तंनमोयुजानंनमोवहन्तम् । सजोषाधीराःपदैरनु
ग्मन्नुपत्वासीदन्विश्वेयजत्राः १ ऋतस्यदेवाअनुव्रतागुर्भुवत्परिष्टिर्द्यौर्नभूम ।

वर्धन्तीमापःपन्वासुशिश्विमृतस्ययोनागर्भेसुजातम् २ पुष्टिर्नरण्वाक्षितिर्नपृथ्वी गिरिर्नभुज्मक्षोदोनशंभु । अत्योनाज्मन्त्सर्गप्रतक्तःसिन्धुर्नक्षोदःकर्ईवरातै ३ जामिः सिन्धूनांभ्रातेवस्वस्रामिभ्यान्नराजावनांन्यक्ति । यद्वातंजूतोवनाव्यस्थादग्निर्हदातिरोमांपार्थिव्याः ४ श्वसित्यप्सुहंसोनसीदन्क्रत्वाचेतिष्ठोविशामुषर्भुत् । सोमोनवेधाऋतप्रजातःपशुर्नशिश्वांविभुर्दूरेभाः ५ ॥ १ ॥

रयिर्दश पराशरोऽग्निर्द्विपदा विराट् ।

६६ रयिर्नचित्रासूरोनसंदृगायुर्नप्राणोनित्योतसूनुः । तक्वानभूर्णिर्वनांसिपक्तिपयोनधेनुःशुचिर्विभावा १ दाधारक्षेममोकोनरण्वोयवोनपक्वोजेताजनानाम् । ऋषिर्नस्तुभ्वांविक्षुप्रशस्तोवाजीनप्रीतोवयोदधाति २ दुरोकशोचिःक्रतुर्ननित्योजायेवयोनावरंविश्वस्मै । चित्रोयदभ्राट्श्वेतोनविक्षुरथोनरुक्मीत्वेषः

समत्सु ३ सेनेवसृष्टामंदधात्यस्तुर्नदिद्युत्वेषंप्रतीका । युमोहजातोयमोजनित्वं जारःकनीनांपतिर्जनीनाम् ४ तंवश्वराथांवयंवसत्यास्तंनगावोनक्षन्तइद्धम् । सिन्धुर्नक्षोदःप्रनीचीरैनोन्नवंतगावःस्व१र्दृशीके ५ ॥ १० ॥

वनेषु दश पराशरोऽग्निर्द्विपदा विराट् ।

६७ वनेंयुजायुर्मतँपुमित्रोवृणीतेश्रुष्टिंराजेवाजुर्यम् । क्षेमोनसाधुःक्रतुर्नभद्रोभुवत्स्वाधीर्होताहव्यवाट् १ हस्तेदधानोनृम्णाविश्वान्यमेदेवान्धाद्रुहांनियीदंन् । विदन्तीमत्रनरोधियंधात्तृदायत्तृष्टान्मन्त्राँअशंसन् २ अजोनक्षांदाधारंपृथिवींतस्तंभयांमन्त्रेभिःसत्यैः । प्रियापदानिपश्वोनिपाहिविश्वायुरग्रेगुहागुहंगाः ३ यईंचिकेतगुहाभवन्तमायःससादधारांमृतस्य । वियेचृतन्त्यृतासपन्तआदिद्घृतेनिम्रदंवाचास्मै ४ वियोवीरुत्सुरोर्धन्महित्वोतम्रजाउतम्रसूष्वन्तः । चित्तिंर-

पांदमेविश्वायुःसद्मेवधीरासंमायंचकुः ५ ॥ ११ ॥

श्रीणन्दश पराशरोऽग्निर्द्विपदा विराट् ।

६८ श्रीणन्नुपस्थादिवंभुरण्युःस्थातुश्चरथंमक्तून्व्यूर्णोत् । परियदेषामेकोविश्वेषांभुवद्देवोदेवानांमहित्वा १ आदित्तेविश्वेक्रतुंजुषन्तशुष्काद्यदेवजीवोजनिष्ठाः । भजन्तविश्वेदेवत्वंनामंऋतंसपन्तोअमृतमेवैः २ ऋतस्यप्रेषाऋतस्यधीतिर्विश्वायुर्विश्वेअपांसिचक्रुः । यस्तुभ्यंदाशाद्योवातेशिक्षात्तस्मैचिकित्वान्त्रयिंदेयस्व ३ होतानिषत्तोमनोरपत्येसचिन्वांसांपतीरयीणाम् । इच्छन्तरेतोमिथस्तनूषुसंजानतस्वैर्दक्षैरमूराः ४ पितुर्नपुत्राःक्रतुंजुषन्तश्रोपन्येअस्यशासंतुरासंः । विरायंऔर्णोर्दुरःपुरुक्षुःपिपेशनाकंस्तृभिर्दमूनाः ५ ॥ १२ ॥

शुक्रो दश पराशरोऽग्निर्द्विपदा विराट् ।

६९ शुक्रःशुशुक्वाँउषोनजारःपप्रासमोचीदिवोनज्योतिः । परिप्रजातःक्रत्वावभूथभुवोदिवानोपितापुत्रःसन् १ वेधाअदृप्तोअग्निर्विजानन्नूधर्नगोनांस्वाहापितृनाम् । जनेनशेवंआह्वर्यःसन्मध्येनिषत्तोरण्वोदुरोणे २ पुत्रोनजातोरण्वोदुरोणेवाजीनप्रीतोविशोवितारीत् । विशोयदह्वेनृभिःसनीळाअग्निर्देवत्वाविश्वान्यश्याः ३ नकिष्टएतावतामिनन्तिनृभ्योयदेभ्यःश्रुष्टिंचकर्थ । तत्तुतेदंसोयदहन्तसमानैर्नृभिर्यद्युक्तोविवेरपांसि ४ उषोनजारोविभावोस्त्रःसंज्ञातरूपश्चिकेतदस्मै । त्मनावहन्तोदुरोण्यृण्वन्नवन्तविश्वेस्व १ दृशीके ५ ॥ १३ ॥

वनेमैकादश पराशरोऽग्निर्द्विपदा विराट् ।

७० वनेमपूर्वीरर्योमनीषाअग्निःसुशोकोविश्वान्यश्याः । आदेव्यानिव्रता

चिकित्वानामानुषस्यजनंस्यजन्म १ गर्भोयोअपांगर्भोवनांनांगर्भश्चस्थातांग-
र्भश्चरथांम् । अद्रौचिदस्माअन्तर्दुरोणेविशांनविश्वोअमृतःस्वाधीः २ सहिक्ष-
पावाँअग्नीरयीणांदाशद्योअस्माअरंसुक्तैः । एताचिकित्वोभूमानिपाहिदेवानां
जन्ममर्तांश्चविद्वान् ३ वर्धान्यंपूर्वीःक्षपोविरूपाःस्थातुश्चरथंमृतप्रवीतम् । अ-
रांधिहोतास्त्र ईनिर्पत्तःकृण्वन्विश्वान्यपांसिसत्या ४ गोपुप्रशास्तिंवनेषुधिषेभर-
न्तविश्वेवालिंस्वर्णः । वित्वानरंःपुरुत्रासपर्यन्पितुर्नजिग्रेर्विवेदोभरन्त ५ साधु-
र्नगृध्रस्तेवशूरेयातेवभीमस्त्वेषःसमत्सु ६ ॥ १४ ॥

उप म दश्र पराशरोऽग्निस्त्रिष्टुप् ।

७१ उपप्रजिन्वन्नुशतीरुशन्तंपतिंनानित्यंजनयःसनीळाः । स्वसारःश्यावी-
मरुषीमजुष्रञ्चित्रमुञ्छन्तीमुपसंनगावः १ वीळुचिद्दृळ्हापितरोनउक्थैरद्रिंरुज-

न्नङ्गिरसोरवेण । चक्रुर्दिवोबृहतोगातुमस्मेअहः स्वर्विदुःकेतुमुषाः २ दधन्नृतं धनयन्नस्यधीतिमादिद्योदिधिष्वो३विभृत्राः । अतृष्यन्तीरपसोयन्त्यच्छादेवा-ञ्जन्मप्रयसावर्धयन्तीः ३ मथीद्यदीविभृतोमातरिश्वागृहेगृहेश्येतोजेन्योभूत् । आदीराज्ञेनसहीयसेसचासन्नादूत्यं३भृगवाणोविवाय ४ महेयत्पित्रईरसदिवे करवत्सरत्पृशन्यश्चिकित्वान् । सृजदस्ताधृषतादिद्युमस्मैस्वायादेवोदुहितरित्विषिंधात् ५॥१५॥स्वआयस्तुभ्यंदमआविभातिनमोवादाशादुशतोअनुष्यून् । वधैरग्नेवयोअस्यहिबर्हायासद्रायासरथंयंजुनासि ६ अग्निंविश्वाअभिपृक्षःसचन्तेसमुद्रंनस्रवतःसप्तयह्वीः । नजामिभिर्विचिकितेवयोनोविदादेवेषुप्रमतिंचिकित्वान् ७ आयदिषेनृपतितेजआनट्शुचिरेतोनिषिक्तंद्यौरभीके । अग्निःशर्धमनव्यंयुवानंस्वाध्यंजनयत्सूदयच्च ८ मनोनयोऽध्वनःसद्यएत्येकःसत्रा

सूरोवस्वईशे । राजानामित्रावरुणासुपाणीगोषुप्रियममृतंरक्षमाणा १ मानो अग्नेसख्यापित्र्याणिप्रमर्षिष्ठाअभिविदुष्कविःसन् । नभोनरूपंजरिमामिंनातिपुरातस्यांअभिशस्तेरधीहि १० ॥ १६ ॥

निकाव्या दश पराशरोऽग्निस्त्रिष्टुप् ।

७२ निकाव्यावेधसःशश्वतस्कर्हस्तेदधानोनर्यापुरूणि । अग्निर्भुवद्रयिपतीरयीणांसत्राचक्राणोअमृतानिविश्वा १ अस्मेवत्संपरिपन्तंनविन्दन्निच्छन्तो विश्वेअमृताअमूराः । श्रमयुवःपदव्योधियंधास्तस्थुःपदेपरमेचार्वग्नेः २ तिस्रो यदग्नेशरदस्त्वामिच्छुचिंघृतेनशुचयःसपर्यान् । नामानिचिद्दधिरेयज्ञियान्यसूदयन्ततन्वःसुजाताः ३ आरोदसीबृहतीवेविदानाःप्ररुद्रियाजभ्रिरेयज्ञियासः। विदन्मर्तोनेमधितायचिकित्वानग्निंपदेपरमेतस्थिवांसम् ४ संजानानाउपसीद- ॥ ५४ ॥

नभिजुपर्वावन्तोनमस्यँनमस्यन् । रिरिक्वांसस्तन्वः कृण्वतस्वाः सखासख्युर्निमिषिरक्षमाणाः ५ ॥ १७ ॥ त्रिः सप्तयद्युह्वानित्वेइत्पदाविदन्निहितायज्ञियासः । तेभीरक्षन्तेअमृतँसजोषाःपशूश्चस्थातृश्चरथँचपाहि ६ विद्वाँअग्नेवयुनानिक्षितीनांव्यानुषक्शुरुधोजीवसेधाः । अन्तर्विद्वाँअध्वनोदेवयानानतन्द्रोदूतोअभवो हविर्वाट् ७ स्वाध्योदिवआसप्तयह्वीरायोदुरोव्यृतज्ञाअजानन् । विदद्गव्यँसरमाद्रुह्मूर्वयेनानुकँमानुपीभोजतेविट् ८ आयेविश्वास्वपत्यानितस्थुःकृण्वानासोअमृतत्वायगातुम् । महामहद्भिःपृथिवीवितस्थेमातापुत्रैरदितिर्धायसेवेः ९ अविश्रियंनिदधुश्चारुमस्मिन्दिवोयदक्षीअमृताअकृण्वन् । अधक्षरन्तिसिन्धवोनसृष्टाःप्रनीचीरग्नेअरुषीरजानन् १० ॥ १८ ॥

७३ रयिर्नयःपितृवित्तोर्वयोधाःसुप्रणीतिश्चिकितुषोनशासुः । स्योनशीरतिथिर्नप्रीणानोहोतेवसन्मविधतोवितारीत् १ देवोनयःसवितासत्यमन्मा क्रत्वानिपातिवृजनानिविश्वा । पुरुप्रशस्तोअमतिर्नसत्यआत्मेवशेवोदिधिषाय्योभूत् २ देवोनयःपृथिवीविश्वधायाउपक्षेतिहितमित्रोनराजा । पुरःसदःशर्मसदोनवीरा अनवद्यापतिंजुष्टेवनारी ३ तंत्वानरोदमआनित्यमिद्धमग्नेसचन्तक्षितिषुध्रुवासु । अविंद्युम्नंनिदंयुर्भर्यंस्मिन्नभवाविश्वायुर्धरुणोरयीणाम् ४ विपृक्षोअग्नेमघवानोअश्युर्विसूरयोदर्दतोविश्वमायुः । सनेमवाजंसमिथेष्वर्योभागंदेवेषुश्रवसेदधानाः ५ ॥ ११ ॥ ऋतस्याहिधेनवोवावशानाःसमदूध्नीःपीपयन्तद्युभक्ताः । परावतःसुमतिंभिक्षमाणाविसिन्धवःसमयासस्रुरद्रिम् ६ त्वेअग्नेसुमतिंभिक्षमाणादि-

॥ ९९ ॥ ॥ ९९ ॥

विश्ववोदधिरेयज्ञियासः । नक्तांचचक्रुरुषसाविरूपेकृष्णंचवर्णमरुणंचसंधुः ७ याचायेमर्तान्त्सुषूदोअग्नेतेस्यामममघवानोवयंच । छायेवविश्वंभुवनंसिसक्ष्यापप्रिवान्रोदसीअन्तरिक्षम् ८ अवँद्भिरग्नेअवँतोनृभिर्नृन्वीरैर्वीरान्वनुयामात्वोताः । ईशानासःपितृवित्तस्यरायोविसूर्यःशतहिमानोअश्युः ९ एतातेअग्नउचथानिवेधोजुष्टानिसन्तुमनसेहृदेच । शकेमरायःसुधुरोयमन्तेऽधिश्रवोदेवभक्तंदधानाः १० ॥ २० ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले द्वादशोऽनुवाकः ॥ १२ ॥

उप प्र यन्तो नव राहुगणो गोतमोऽग्निर्गायत्री ।

७४ उपप्रयन्तोअध्वरंमन्त्रंवोचेमाग्नये । आरेअस्मेचंशृण्वते १ यःस्नीहितीषुपूर्व्यःसंजग्मानासुकृष्टिषु । अरंक्षद्दाशुषेगयम् २ उतब्रुवन्तुजन्तवउदग्निर्वृत्रहाजनि । धनंजयोरणेरणे ३ यस्यदूतोअसिक्षयेवेषिहव्यानिवीतये । दस्म-

त्कृणोप्यंध्वरम् ४ तमित्सुहव्यमङ्गिरःसुदेवंसहसोयहो । जनांआहुःसुवर्हिषम् ५ ॥ २१ ॥ आचवर्हासिताँइहदेवाँउपप्रशस्तये । हव्यासुश्चन्द्रवीतये ६ नयो-रुपब्दिरश्व्यःशृण्वेरथस्यकच्चन । यदग्नेयासिदूत्यम् ७ त्वोतोवाज्यह्नयोभिपूर्वँ-स्मादपरः । प्रदाश्वाँअग्नेअस्थात् ८ उतद्युमत्सुवीर्यंवृहदग्नेविवासासि । देवेभ्यो देवदाशुषे १ ॥ २२ ॥

जुषस्व पञ्च गोतमोऽग्निर्गायत्री ।

७५ जुषस्वसप्रथस्तमंवचोदेवप्सरस्तमम् । हव्याजुह्वानआसानि १ अथातेअङ्गिरस्तमाग्नेवेधस्तमप्रियम् । वोचेमब्रह्मसानसि २ कस्तेजामिर्जनानामग्ने कोदाश्वध्वरः । कोहकस्मिन्नसिश्रितः ३ त्वंजामिर्जनानामग्नेमित्रोअसिप्रियः ॥ ५६ ॥

। सखासखिभ्यईड्यः ४ यजानोमित्रावरुणायजादेवाँऋतंबृहत् । अग्नेयक्षिस्वं दमम् ५ ॥ २३ ॥

का ते पश्च गोतमोऽग्निस्त्रिष्टुप् ।

७६ कातउपेतिर्मनसोवरायभुवदग्नेशन्तमाकामनीपा । कोवायज्ञैःपरिदक्षं तआपुकेनवातेमनसादाशेम १ एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः । अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् २ प्रसुविश्वान्नक्षसोधक्ष्यग्नेभवायज्ञानामभिशस्तिपावा । अथावहसोमपातिंहरिभ्यामातिथ्यमस्मैचकृमासुदाने ३ प्रजावतावचसावक्षिरासाचहुवेनिचंसत्सीहदेवैः । वेषिहोत्रमुतपोत्रंयजत्रबोधिप्रयन्तर्जनितर्वसूनाम् ४ यथाविप्रस्यमनुषोहविर्भिर्देवाँअयजःकविभिःकविःसन् । एवाहोतःसत्यतरत्वमद्याग्नेमन्द्रयाजुह्वायजस्व ५ ॥ २४ ॥

त्कृणोप्यंध्वरम् ४ तमित्सुहव्यमङ्गिरःसुदेवंसहसोयहो । जनांआहुःसुबर्हिषम् ५ ॥ २१ ॥ आचवहांसिताँइहदेवाँउपप्रशस्तये । हव्यासुश्चन्द्रवीतये ६ नयो-रुपब्दिरश्व्यःशृण्वेरथस्यकश्चन । यदग्नेयासिदूत्यम् ७ त्वोतोवाज्यह्योभिपूर्व-स्मादपरः । प्रदाश्वाँअग्नेअस्थात् ८ उतद्युमत्सुवीर्यंबृहदग्नेविवाससि । देवेभ्यो देवदाशुषे १ ॥ २२ ॥

जुषस्व पञ्च गोतमोऽग्निर्गायत्री ।

७५ जुषस्वसप्रथस्तमंवचोदेवप्सरस्तमम् । हव्याजुह्वानआसानि १ अथातेअङ्गिरस्तमाग्नेवेधस्तमप्रियम् । वोचेमब्रह्मसानसि २ कस्तेजामिर्जनानामग्ने कोदाश्वध्वरः । कोहकस्मिन्नसिश्रितः ३ त्वंजामिर्जनानामग्नेमित्रोअसिप्रियः ॥ ५६ ॥

। सखासख्यिभ्यईड्यः ४ यजानोमित्रावरुणायजादेवाँऋतंबृहत् । अग्नेयक्षिस्वं दमम् ५ ॥ २३ ॥

का ते पश्च गोतमोऽग्निस्त्रिष्टुप् ।

७६ कातउपेतिर्मनसोवरायभुवदग्नेशन्तमाकामनीपा । कोवायज्ञैःपरिदक्षं तआपकेनवातेमनसादाशेम १ एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः । अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् २ प्रसुविश्वान्त्रक्षसोधक्ष्य-ग्नेभवायज्ञानामभिशस्तिपावा । अथार्वहसोमपतिंहरिभ्यामातिथ्यमस्मैचकृ-मासुदान्ने ३ प्रजावतावचसाबर्हिरासाचहुवेनिचसत्सीहदेवैः । वेषिहोत्रमुतपो-त्रंयजत्रवोधिप्रयन्तर्जनितर्वसूनाम् ४ यथाविप्रस्यमनुषोहविर्भिर्देवाँअयजः कविभिःकविःसन् । एवाहोतःसत्यतरत्वमद्याग्नेमन्द्रयाजुह्वायजस्व ५ ॥ २४ ॥

कथा पञ्च गोतमोऽग्निस्त्रिष्टुप् ।

७७ कथादाशेमाग्नयेकास्मैदेवजुष्टोच्यतेभामिनेगीः । योमर्त्येष्वमृतऋतावाहोतायजिष्ठइत्कृणोतिदेवान् १ योअध्वरेषुशन्तमऋतावाहोतातमूनमोभिराकृणुध्वम् । अग्निर्यद्वेर्मर्ताायदेवान्त्सचाबोधातिमनंसायजाति २ सहिक्रतुःसमर्यःससाधुर्मित्रोनभूदद्भुतस्यरथीः । तंमेधेपुप्रथमंदेवयन्तीर्विशउपब्रुवतेदस्ममारीः ३ सनोनृणांनृतमोरिशादाअग्निर्गिरोवंसावेतुधीतिम् ।तनाचयेमघवानःशविष्ठावाजप्रसूताइषयन्तमन्म ४ एवाग्निर्गोतमेभिर्ऋतावाविप्रेभिरस्तोष्टजातवेदाः । सएषुद्युम्नंपीपयत्सवाजंसपुष्टिंयातिजोषमाचिकित्वान् ५ ॥ २५ ॥

अभि त्वा पञ्च गोतमोऽग्निर्गायत्री ।

७८ अभित्वागोतमागिराजातवेदोविचर्षणे । द्युम्नैरभिप्रणोनुमः १ तमु

त्वागोतमोगिरारायस्कामोदुवस्यति । द्युम्नैरभिप्रणोनुमः २ तमुत्वावाजसा-
तममङ्गिरस्वद्धवामहे । द्युम्नैरभिप्रणोनुमः ३ तमुत्वावृत्रहन्तमंयोदस्यूरवधून-
दे । द्युम्नैरभिप्रणोनुमः ४ अवोचामरहूगणाअग्नयेमधुमद्वचः । द्युम्नैरभिप्रणो-
नुमः ५ ॥ २६ ॥

हिरण्यकेशो द्वादश गोतमोऽग्निः प्रथमतृचस्य मध्यमोऽग्निर्वा आद्यास्तिस्रस्त्रिष्टुभः ।
ततस्तिस्र उष्णिहस्ततो गायत्र्यः ।

७१ हिरण्यकेशोरजसोविसारेऽहिर्धुनिर्वातइवध्रजीमान् । शुचिंभ्राजाउष-
सोनवेदायशंस्वतीरपस्युवोनसत्याः १ आतेसुपर्णाअमिनन्तँएवैःकृष्णोनोनाव
वृषभोयदीदम् । शिवाभिर्नस्मयमानाभिरागात्पतन्तिमिहःस्तनयन्त्यभ्रा २

यदीमृतस्यपर्यसापियानोनयन्नृतस्यपथिभीरजिष्ठैः । अर्यमामित्रोवरुणःपरिज्मात्वचैपृञ्चन्त्युपरस्ययोनौ ३ अग्नेवाजस्यगोमतईशानःसहसोयहो । अस्मेधेहिजातवेदोमहिश्रवः ४ सईवानोवसुष्कविरग्निरिळेन्योगिरा । रेवदस्मभ्यंपुर्वणीकदीदिहि ५ क्षपोराजन्नुतत्मनाग्नेवस्तोरुतोपसः । सतिग्मजम्भरक्षसोदहप्रतिं ६ ॥ २७ ॥ अवानोअग्नऊतिभिर्गायत्रस्यप्रभर्मणि । विश्वासुधीषुवन्त्य ७ आनोअग्नेरयिंभरसत्रासाहंवरेण्यम् । विश्वासुपृत्सुदुष्टरम् ८ आनोअग्नेसुचेतुनारयिंविश्वायुपोषसम् । मार्डीकंधेहिजीवसे ९ प्रपूतास्तिग्मशोचिषेवाचोगोतमाग्नये । भरस्वसुम्नयुर्गिरः १० योनोअग्नेऽभिदासत्यन्तिदूरेपदीष्टसः । अस्माकमिद्बुधेभव ११ सहस्राक्षोविचर्षणिरग्नीरक्षांसिसेधति । होतागृणीत उक्थ्यः १२ ॥ २८ ॥

८० इत्याहिसोमइन्मदेब्रह्माचकारवर्धनम् । शविष्ठवज्रिन्नोजसापृथिव्यानिः शंगाअहिमर्चन्ननुस्वराज्यम् १ सत्वामदहूषामदःसोमःश्येनाभृतःसुतः । येनावृत्रंनिरद्योजघन्थवज्रिन्नोजसार्चन्ननुस्वराज्यम् २ प्रेह्यभीहिधृष्णुहिनतेवज्रोनियंसते । इन्द्रनृम्णंहितेशवोहनोवृत्रंजयाअपोऽर्चन्ननुस्वराज्यम् ३ निरिन्द्रभूम्याअधिवृत्रंजघन्थनिर्दिवः । सृजामरुत्वतीरवंजीवधन्याइमाअपोऽर्चन्ननुस्वराज्यम् ४ इन्द्रोवृत्रस्यदोधतःसानुंवज्रेणहीळितः । अभिक्रम्यावजिघ्नतेऽपःसर्माय चोदयन्नर्चन्ननुस्वराज्यम् ५ ॥ २१ ॥ अधिसानौनिजिघ्नतेवज्रेणशतपर्वणा । मन्दानइन्द्रोअन्धसःसखिभ्योगातुमिच्छत्यर्चन्ननुस्वराज्यम् ६ इन्द्रतुभ्यमिदद्रिवोऽनुत्तंवज्रिन्वीर्यम् । यद्धत्यंमायिनंमृगंतमुत्वंमाययावधीरर्चन्ननुस्वरा-

ज्यम् ७ वितेवज्रांसोअस्थिरन्नवतिंनाव्या३ अनु । महत्तइन्द्रवीर्यंबाह्वोस्तेबलं
हितमर्चन्ननुस्वराज्यम् ८ सहस्रंसाकमर्चतपरिष्टोभतविंशतिः । शतैनुमन्व-
नोनवुरिन्द्रायब्रह्मोद्यतमर्चन्ननुस्वराज्यम् ९ इन्द्रोवृत्रस्यतविषींनिरहन्त्सहसा-
सहः । महत्तदस्यपौंस्यंवृत्रंजघन्वाँअसृजदर्चन्ननुस्वराज्यम् १० ॥ ३० ॥
उमेचित्तवमन्यवेयेतेभियसांमही । यदिन्द्रवज्रिन्नोजसावृत्रंमरुत्वाँअवधीरर्च-
न्ननुस्वराज्यम् ११ नवेपसानतन्यतेन्द्रंवृत्रोविबीभयत् । अभ्येनंवज्रंआयसः
सहस्रंभृष्टिरायतार्चन्ननुस्वराज्यम् १२ यद्वृत्रंतवचाशनिंवज्रेणसमयोधयः ।
अहिमिन्द्रजिघांसतोदिवितेबद्बधेशवोऽर्चन्ननुस्वराज्यम् १३ अभिष्टनेतैअद्रि-
वोयत्स्थाजगच्चरेजते । त्वष्टाचित्तवमन्यवइन्द्रवेविज्यतेभियार्चन्ननुस्वराज्यम्
१४ नहिनुयादधीमसीन्द्रंकोवीर्यापरः । तस्मिन्नृम्णमुतक्रतुंदेवाओजांसिसंदधुर-

॥ ५९ ॥

र्चन्ननुस्वराज्यम् १५ यामर्थर्वामनुष्टुप्तादध्यङ्धियमत्नत । तस्मिन्ब्रह्माणि र्चन्ननुस्वराज्यम् १६ ॥ ३१ ॥ इति शाकलर्क्संहिताया प्रथमाष्टके पञ्चमोऽध्यायः ॥ ५ ॥

इन्द्रोनवोपोपुपड्जगत्यन्तमश्वावतिजागतमसावावैंशतिःपळनुष्टुभऔष्णिहपाङ्क्तगायत्रत्रैष्टुभास्तृचः प्रगाथःप्रयेद्वादशमारुतंहपंचम्यन्त्येत्रिष्टुभौमरुतोदशगायत्रंप्रत्वक्षसःपड्जागतमाविद्युन्माद्विराद्यान्त्ये प्रस्तारपङ्क्तीपञ्चमीविराड्रूपाऽऽनोदशवैश्वदेवंतुपञ्चाद्याःसप्तमीजगत्यःषष्ठीविराट्स्थानाऋजुनीतीनव गायत्रमन्त्यानुष्टुपूत्वंसोमव्यधिकासौम्यंपञ्चम्यादिगायत्र्योद्वादशोष्णिक्चैताउत्याद्यूनोपस्यंचतुर्जग-त्यादिपळुष्णिगन्तंतृचोन्त्यआश्विनोग्नीषोमौद्वादशाग्नीषोमीयमाद्यास्तिस्रोनुष्टुभउपान्त्यास्तिस्रोगाय-त्र्योष्टमीजगतीवेमंपोळशकुत्सआग्नेयंतद्द्वित्रिष्टुवन्तंपूर्वोदेवास्त्रयःपादादैवास्तन्नोमित्रोर्धर्चोलिङ्गोक्तदै वतोषद्दैवत्संवासूक्तम् ॥ ६ ॥

इन्द्रो नव गोतम इन्द्रः पङ्क्तिः ।

८१ इन्द्रोमदायवावृधेशवंसेवृत्रहानृभिः । तमिन्महत्स्वाजिषूतेमर्भेहवाम-

हेसवाजेषुप्रनोऽवियत् १ असिहिर्वीरसेन्योऽसिभूरिंपरादादिः । असिदभ्रस्य चिद्बुधोयजमानायशिक्षसिसुन्वतेभूरिंतेवसु २ यदुदीरंतआजयोधृष्णवेधीयते धना । युक्ष्वामदच्युताहरीकंहनःकंवसौदधोऽस्माँइन्द्रवसौदधः ३ कृत्वांमहाँ अनुष्वधंभीमआवावृधेशवः । श्रियऋष्वउपाकयोर्निशिप्रीहरिंवान्दधेहस्तयो-र्वज्रंमायसम् ४ आपप्रौपार्थिवंरजोवद्धेरोचनादिवि । नत्वावाँइन्द्रकश्चनजातो नजनिष्यतेऽतिविश्ववक्षिथ ५ ॥ १ ॥ योअर्योमर्तभोजनंपराददातिदाशुषे । इन्द्रोअस्मभ्यंशिक्षतुविभजाभूरिंतेवसुभक्षीयतवराधसः ६ मदेमदेहिनोददिर्यू-थागवांमृजुक्रतुः । संगृभायपुरूशतोभयाहस्त्यावसुंशिशीहिरायआभर ७ मा-दयस्वसुतेसचाशवंसेशूरराधसे । विद्माहित्वांपुरूवसुमुपकामान्त्ससृज्महेऽथा

नोऽवितोभव ८ एतेतइन्द्रजन्तवोविश्वंपुष्यन्तिवार्यम् । अन्तर्हिख्योजनानाम्-
र्योवेदोअदाशुषांतेषांनोवेदआभर १ ॥ २ ॥

उपोपु षड्जोतम इन्द्रः पङ्क्तिः । अन्त्या जगती ।

८२ उपोपुशृणुहीगिरोमघवन्मातथाइव । यदानःसूनृतावतःकरआदर्थया-
सइद्योजान्विन्द्रतेहरी १ अक्षन्नमीमदन्तह्यवप्रियाअधूषत । अस्तोषतस्वभानवो
विप्रानविष्ठयामतीयोजान्विन्द्रतेहरी २ सुसंदृशंत्वावयंमघवन्वन्दिषीमहि । प्र
नूनंपूर्णवन्धुरःस्तुतोयाहिवशाँअनुयोजान्विन्द्रतेहरी ३ सघातंवृषणंरथमधितिष्ठा-
तिगोविदम् । यःपात्रंहारियोजनंपूर्णमिन्द्रचिकेततियोजान्विन्द्रतेहरी ४ युक्तस्ते
अस्तुदक्षिणउतसव्यःशतक्रतो । तेनजायामुपप्रियांमन्दानोयाह्यन्धसोयोजान्वि-

न्द्रतेहरी ५ युनज्मिंतेब्रह्मणाकेशिनाहरीउपप्रयाहिदधिषेगभस्त्योः । उत्त्वासु- अ.१अ.
तासोरभसाअमन्दिपुःपूषण्वान्वज्रिन्त्समुपत्न्यामदः ६ ॥ ३ ॥

अश्वावति पङ्क्तिरुत्तम इन्द्रो जगती ।

८३ अश्वांवतिप्रथमोगोषुगच्छतिसुप्रावीरिन्द्रमर्त्यस्तवोतिभिः । तमित्पृण-
क्षिरसुनाभवीयसासिन्धुमापोयथाभितोविचेतसः १ आपोनदेवीरुपयन्तिहोत्रिय-
मवःपश्यन्तिवितंतंयथारजः।प्राचैर्देवासःप्रणयन्तिदेवयुंब्रह्मप्रियंजोपयन्तेवराइ-
व २ अधिद्वयोरदधाउक्थ्यं१वचोयतस्रुचामिथुनायासपर्यतः । असंयत्तोव्रतेतेक्षे-
तिपुष्यतिभद्राशक्तिर्यजमानायसुन्वते ३ आदङ्गिराःप्रथमंदधिरेवयंछन्दाग्नयःश-
म्यायेसुकृत्यया । सर्वंपणेःसमविन्दन्तभोजनमश्वावन्तंगोमन्तमापशुंनरः४ यज्ञै-
रथर्वाप्रथमःपथस्ततेततःसूर्योव्रतपावेनआजनि । आगाआजदुशनाकाव्यःस- ॥ ६१ ॥

चायमस्यजातममृतंयजामहे ५ बर्हिर्वायत्स्वपत्यायवृज्यतेऽकोंवाश्लोकमाघोषतेदिवि । ग्रावायत्रवदतिकारुरुक्थ्य १स्तस्येदिन्द्रोअभिपित्वेषुरण्यति ६ ॥ ४ ॥

असावि विंशतिर्गौतम इन्द्रः । आद्याः पञ्चानुष्टुभः । ततश्चतुर्णां तृचां उष्णिक्ककुबङ्गायत्रीत्रिष्टुभः । अन्त्यः प्रगाथः ।

८४ असाविसोमइन्द्रतेशविष्ठधृष्णवागहि । आत्वापृणक्त्विन्द्रियंरजःसूर्योन रश्मिभिः १ इन्द्रमिद्धरीवहतोऽप्रतिधृष्टशवसम् । ऋषीणांचस्तुतीरुपयज्ञंचमानुषाणाम् २ आतिष्ठवृत्रहन्रथंयुक्तातेब्रह्मणाहरी । अर्वाचीनंसुतेमनोग्रावाकृणोतुवग्नुना ३ इमामिन्द्रसुतंपिबज्येष्ठममर्त्यंमदम् । शुक्रस्यत्वाभ्यक्षरन्धारावृतस्यसादने ४ इन्द्रायनूनमर्चतोक्थानिचब्रवीतन । सुताअमत्सुरिन्दवोज्येष्ठंनमस्यतासहः ५ ॥ ५ नकिष्ट्वद्रथीतरोहरीयदिन्द्रयच्छसे । नकिष्ट्वानुमज्मनानकिःस्वश्वआ-

नशे ६ यएकइद्विदयंतेवसुमतींयदाशुषे । ईशानोअप्रतिष्कुतइन्द्रोअङ्ग ७ कदा मर्तंमराधसंपदाक्षुंपमिवस्फुरत् । कदानःशुश्रवद्गिरइन्द्रोअङ्ग ८ यश्चिद्धित्वाबहुभ्युआसुतावाँआविवासति । उग्रंतत्पत्यतेशवइन्द्रोअङ्ग ९ स्वादोरित्थाविषूवतोमध्वःपिबन्तिगौर्यः। याइन्द्रेणसयावरीर्वृष्णामदन्तिशोभसेवस्वीरनुस्वराज्यम् १० ॥६॥ ताअस्यपृशनायुवःसोमंश्रीणन्तिपृश्नयः। प्रियाइन्द्रस्यधेनवोवज्रंहिन्वन्तिसायकंवस्वीरनुस्वराज्यम् ११ ताअस्यनमसासहःसपर्यन्तिप्रचेतसः।व्रतान्यस्यसश्चिरेपुरूणिपूर्वचित्तयेवस्वीरनुस्वराज्यम् १२ इन्द्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः।जघाननवतीर्नव १३ इच्छन्नश्वस्ययच्छिरःपर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति १४ अत्राहगोरमन्वतनामत्वष्टुरपीच्यम् । इत्थाचन्द्रमसोगृहे १५ ॥ ७ ॥ कोअद्ययुङ्क्तेधुरिगाऋतस्यशिमीवतोभामिनोदुर्हणायून् । आसन्निषून्हृ-

त्स्वसोमयोभून्यएषांभृत्यामृणधत्सजीवात् १६ कईंयतेतुज्यतेकोबिभायकोमंसते सन्तमिन्द्रंकोअन्ति। कस्तोकायकइभायोतरायेऽधिब्रवत्तन्वे३ कोजनाय १७ को अग्निमीट्टेहविषाघृतेनस्रुचायंजाताऋतुभिर्ध्रुवेभिः। कस्मैदेवाआवहानाशुहोम कोमंसतेवीतिहोत्रःसुदेवः १८ त्वमङ्गप्रशंसिषोदेवःशविष्ठमर्त्यम्। नत्वदन्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः १९ मातेराधांसिमातऊतयोवसोऽस्मान्कदाचनादभन्। विश्वाचनउपमिमीहिमानुपवसूनिचर्षणिभ्युआ २० ॥ ८ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले त्रयोदशोऽनुवाकः ॥ १३ ॥

मये द्वादश गोतमो मरुतो जगती। पञ्चम्यन्त्ये त्रिष्टुभौ।

८५ प्रयेशुम्भन्तेजनयोनसप्तयोयामन्रुद्रस्यसूनवःसुदंससः।रोदसीहिमरुतश्चक्रिरेवृधेमदन्तिवीराविदथेषुघृष्वयः १ तऊक्षितासोमहिमानमाशतदिविरुद्रासो

अधिंचक्रिरेसदः। अचैन्तोअर्कंजनयन्तइन्द्रियमधिाश्रयोदधिरेपृश्निमातरः२गो-
मातरोयच्छुभयन्तेअञ्जिभिस्तनूपुंशुभ्रादधिरेविरुक्मतः।वाधन्तेविश्वमभिमाति-
नमपवत्मान्येषामनुरीयतेघृतम् ३ वियेभ्राजन्तेसुभखासऋष्टिभिःप्रक्ष्यावयन्तो
अक्ष्युतांचिदोजसा।मनोजुवोयन्मरुतोरथेष्वावृषत्वातासुःपृषतीरयुग्ध्वम् ४प्रयद्र-
थेषुपृषतीरयुग्ध्वंवाजेअद्रिंमरुतोरंहयन्तः।उतारुषस्यविष्यन्तिधाराश्चमँवोदभि-
र्व्युन्दन्तिभूम ५आवोवहन्तुसप्तयोरघुष्यदोरघुपत्वानःप्रजिगातबाहुभिः। सीदता
बर्हिरुरवःसदस्कृतंमादयध्वंमरुतोमध्वोअन्धसः६ ॥१॥तेऽवर्धन्तस्वतवसोमहि-
त्वनानाकंतस्थुरुरुचाक्रिरेसदः । विष्णुर्यद्धावृषणंमदच्युतंवयोनसीदन्नधिबर्हि-
षिप्रिये ७ शूराइवेद्युयुधयोनजग्मयःश्रवस्यवोनपृतनासुयेतिरे । भयन्तेविश्वा
भुवनामरुज्योराजानइवत्वेषसंदृशोनरः ८ त्वष्टायद्वज्रंसुकृतंहिरण्ययंसहस्रभृ-

ष्टिंस्वपाअवर्तयत्।धत्तइन्द्रोनर्यपांसिकर्तवेऽहन्वृत्रंनिरपामौब्जदर्णवम् १ऊर्ध्वंनुंनुद्रेऽवतंतओजसादाद्दाणंचिद्विभिदुर्विपर्वतम् । घर्मन्तोवाणंमरुतःसुदानवोमदे सोमस्यरण्यानिवक्रिरे १० जिह्मंनुंनुद्रेवतंतयादिशासिंश्चत्सुंगोतंमायतृष्णजे । आगच्छन्तीमवसाचित्रभानवःकामंविप्रस्यतर्पयन्तधामभिः ११ यावःशर्मशशमानायसन्तित्रिधातूनिदाशुषेयच्छताधि । अस्मभ्यंतानिमरुतोविय॑न्तरायिंनोधत्तवृषणःसुवीर्यम् १२ ॥ १० ॥

मरुतो दश गोतमो मरुतो गायत्री ।

८६ मरुतोयस्यहिक्षयेपाथादिवोविमहसः । ससुगोपातमोजनः १ यज्ञैर्वायज्ञवाहसोविप्रस्यवामतीनाम् । मरुतःशृणुताहवम् २ उतवायस्यवाजिनोऽनुविप्रमतक्षत । सगन्तागोमतिव्रजे ३ अस्यवीरस्यबर्हिषिसुतःसोमोदिविष्टिषु ।

उक्थंमदंश्चशस्यते ४ अस्याश्वींवत्वाभुवोविश्वायश्चर्षणीराभि । सूरींचित्सप्तुरी-रिषः ५ ॥ ११ ॥ पूर्वीभिर्हिदेदाशिमशरद्भिर्मरुतोवयम् । अवोभिश्चर्षणीनाम् ६ सुभगःसप्रयज्यवोमरुतोअस्तुमर्त्यः । यस्यप्रयांसिपपथ ७ शश्वमानस्यवान-रःस्वेदस्यसत्यशवसः । विदाकामस्यवेनतः ८ यूयंतत्सत्यशवसआविष्कर्त महित्वना । विध्यंताविद्युतारक्षः ९ गूहंतागुह्यंतमोवियांताविश्वंमाश्विणम् । ज्यो-तिष्कर्तायदुश्मसि १० ॥ १२ ॥

मत्वक्षसः पङ्क्तिरुतमो मरुतो जगती ।

८७ प्रत्वक्षसःप्रतवसोविरप्शिनोऽनानताअविंथुराऋजीषिणः । जुष्टतमासो नृतमासोअञ्जिभिर्व्यानज्रेकंचिदृस्राइवस्तृभिः १ उपह्वरेषुयदचिध्वंयायेवयंइव मरुतःकेनचित्पथा । श्रोतंन्तिकोशाउपवोरथेष्वाघृतमुक्षतामधुवर्णमर्चते २

प्रैषामज्मेषुविथुरेवरेजतेभूमिर्यामेषुयह्वयुज्जतेशुभे । तेक्रीळयोधुनयोभ्राजदृष्ट-
यःस्वयंमहित्वंपनयन्तधूतयः ३ साहिस्वसृत्पृषदश्वोयुवागणो ३ याईशानस्तवि-
षीभिरावृतः । असिसत्यऋणयावाऽनेद्योस्याधियःप्रावितारावृधागणः ४ पितुः
प्रत्तस्यजन्मनावदामसिसोमस्यजिह्वाप्रजिगातिचक्षसा । यदीमिन्द्रंशम्यृक्वाण-
आशतादित्नामानियज्ञियानिदधिरे ५ श्रियसेकंभानुभिःसंमिमिक्षिरेतेरश्मिभि
स्तऋक्वभिःसुखादयः।तेवाशीमन्तइष्मिणोअभीरवोविद्रेप्रियस्यमारुतस्यधाम्नः
६ ॥ १३ ॥

आविद्युत्पन्नोतमो मरुतः । आद्यान्त्ये प्रस्तारपङ्क्ती । पञ्चमी विराड्रूपा । शिष्टास्त्रिष्टुभः ।

८८ आविद्युन्मद्भिर्मरुतःस्वर्कैरर्थैभिर्यातऋष्टिमद्भिरश्वपर्णैः । आवर्षिष्ठया
नइषावयोनपत्तासुमायाः१ तेऽरुणेभिर्वरमापिशङ्गैःशुभेकंयान्तिरथतूर्भिरश्वैः।

रुक्मोनचित्रःस्वर्धतीवान्प्व्यारथंस्यजङ्घनन्तभूमं २ श्रियेकंवोअधितनूषुवाशींमेधावनानकृणवन्तऊर्ध्वा । युष्मभ्यंकंमरुतःसुजातास्तुविद्युम्नासोधनयन्तेअद्रिम् ३ अहानिगृध्राःपर्यावआगुरिमांधियंवार्कार्यांचदेवीम् । ब्रह्मकृण्वन्तोगोतमासोअर्कैरूर्ध्वंनुनुद्रउत्सधिंपिबध्यै ४ एतत्त्यन्नयोजनमचेतिसस्वर्ह्ययन्मरुतोगोतमोवः । पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतोवराहून् ५ एषास्यायोमरुतोऽनुभर्त्रीप्रतिष्टोभतिवाघतोनवार्णी । अस्तोभयद्वृथासामनुस्वधांगभस्त्योः ६ ॥ १४ ॥

आनो दश गोतमो विश्वेदेवाः । आद्याः पञ्च सप्तमी च जगत्यः । षष्ठी विराट्स्थाना । शिष्टास्त्रिष्टुभः ।

८१ आनोभद्राःक्रतवोयन्तुविश्वतोऽदब्धासोअपरीतासउद्भिदः । देवानो

यथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवेदिवे १ देवानांभद्रासुमतिर्ऋजूयतां देवानांरातिरभिनोनिवर्तताम् । देवानांसख्यमुपसेदिमावयंदेवान्नआयुःप्रतिरन्तु जीवसे २ तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्रिधम् । अर्यमणंवरुणंसोममश्विनासरस्वतीनःसुभगामयस्करत् ३ तन्नोवातोमयोभुवातुभेषुजंतन्मातापृथिवीतत्पिताद्यौः।तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्या युवम् ४ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम् । पूषानोयथा वेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ५॥१५॥ स्वस्तिन इन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ६ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः । अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाअवसागमन्निह ७ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्ष-

भिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ८ शतमिन्नुशरदोअन्तिदेवायत्रानश्चक्राजरसंतनूनाम्। पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ९ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः । विश्वेदेवाअदितिःपञ्चजनाअदितिर्जातमदितिर्जनित्वम् १० ॥ १६ ॥

ऋजुनीती नव गोतमो विश्वे देवा गायत्री । अन्त्याऽनुष्टुप् ।

१० ऋजुनीतीनोवरुणोमित्रोनयतुविद्वान् । अर्यमादेवैःसजोषाः १ तेहिवस्वोवसवानास्तेअप्रमूरामहोभिः। व्रतारक्षन्तेविश्वाहा २ तेअस्मभ्यंशर्मयंसन्नमृतामर्त्येभ्यः । वावर्मानाअपहिषःशिवंनःपथःसुवितायचियन्त्विन्द्रोमरुतः । पूषाभगोवन्द्यासः ४ उतनोधियोगोअग्राःपूषन्विष्णवेवयावः । कतॉनःस्वस्तिमतः ५ ॥ १७ ॥ मधुवाताऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्नःसन्त्वोषधीः ६

मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः । मधुद्यौरस्तुनःपिता ७ मधुमान्नोवनस्पतिर्मधुमाँअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ८ शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा । शंनइन्द्रोबृहस्पतिःशंनोविष्णुरुरुक्रमः ९ ॥ १८ ॥

त्वं सोम त्रयोविंशतिर्गोतमः सोमः । पञ्चम्याद्या द्वादश गायत्र्यः । सप्तदश्युष्णिक् । शिष्टास्त्रिष्टुभः ।

११ त्वंसोमप्रचिकितोमनीषात्वंरजिष्ठमनुनेषिपन्थाम् । तवप्रणीतीपितरोनइन्दोदेवेषुरत्नमभजन्तधीराः १ त्वंसोमक्रतुभिःसुक्रतुर्भूस्त्वंदक्षैःसुदक्षोविश्ववेदाः । त्वंवृषावृषत्वेभिर्महित्वाद्युम्न्यभवोनृचक्षाः २ राजानुतेवरुणस्यव्रतानिबृहद्भीरंतवसोमधामं । शुचिष्ट्वमसिप्रियोनमित्रोदक्षाय्योअर्यमेवासिसोम ३ यातेधामानिदिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु । तेभिर्नो

विश्वैःसुमनाअहेळन्राजन्त्सोमप्रतिहव्यागृभाय ४ त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा । त्वंभद्रोअसिक्रतुः ५ ॥ १९ ॥ त्वंचसोमनोवशोजीवातुंनमरामहे । प्रियस्तोत्रोवनस्पतिः ६ त्वंसोममहेभगंत्वंयूनंऋतायते । दक्षंदधासिजीवसे ७ त्वंनःसोमविश्वतोरक्षाराजन्नघायतः । नरिष्येत्त्वावंतःसखा ८ सोमयास्तेमयोभुवऊतयःसन्तिदाशुषे । ताभिर्नोऽविताभव ९ इमंयज्ञमिदंवचोजुजुषाणउपागहि । सोमत्वंनोवृधेभव १० ॥ २० ॥ सोमंगीर्भिष्ट्वावयंवर्धयामोवचोविदः । सुमृळीकोनआविश ११ गयस्फानोअमीवहावसुविस्पुष्टिवर्धनः । सुमित्रःसोमनोभव १२ सोमंराधिनोहृदिगावोनयवसेष्वा । मर्यइवस्वओक्ये १३ यःसोमसख्येतवरारणद्देवमर्त्यः । तंदक्षःसचतेकविः १४ उरुष्याणोअभिशस्तेःसोमनिपाह्यंहसः । सखासुशेवएधिनः १५ ॥ २१ ॥

आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् । भवावाजस्यसंगथे १६ आप्यायस्वमदिन्तमसोमविश्वेभिरंशुभिः । भवानःसुश्रवस्तमःसखावृधे १७ संतेपयांसिसमुयन्तुवाजाःसंवृष्ण्यान्यभिमातिषाहः । आप्यायमानोअमृतायसोमदिविश्रवांस्युत्तमानिधिष्व १८ यातेधामानिहविषायजन्तितातेविश्वापरिभूरस्तुयज्ञम् । गयस्फानःप्रतरणःसुवीरोऽवीरहाप्रचरासोमदुर्यान् १९ सोमोधेनुंसोमोअर्वन्तमाशुंसोमोवीरंकर्मण्यंददाति । सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशदस्मै २० ॥ २२ ॥ अपाङ्प्राङेतिस्वधयापृथिंस्वर्यमप्सांवृजनंस्वर्गोपाम् । भरेकृतांसुक्षितिंसुश्रवसंजयन्तंत्वामनुमदेमसोम २१ त्वमिमाओषधीःसोमविश्वास्त्वमपोअजनयस्त्वंगाः । त्वमाततन्थोर्वन्तरिक्षंत्वंज्योतिषापितमोववर्थ २२ देवनंनोमनसादेवसोमरायोभागंसहसावन्नभियुध्य । मात्वातनदीशिषेवीर्यस्यो-

विश्वैः सुमना अहेळन्राजन्त्सोम प्रतिहव्या गृभाय ४ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ५ ॥ १९ ॥ त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ६ त्वं सोम महे भगं त्वं यून ऋताय ते । दक्षं दधासि जीवसे ७ त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत्त्वावतः सखा ८ सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नो ऽविता भव ९ इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव १० ॥ २० ॥ सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृळीको न आ विश ११ यस्ते सोम नो हृदि गावो न यवसेष्वा । मर्य इव स्व ओक्ये १२ यः सोम सख्ये तव रारणद्देव मर्त्यः । तं दक्षः सचते कविः १३ उरुष्याणो अभिशस्तेः सोम नि पाह्यंहसः । सखा सुशेव एधि नः १५ ॥ २१ ॥

आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् । भवावाजस्यसंगथे १६ आप्याय-
स्वमदिन्तमसोमविश्वेभिरंशुभिः । भवानःसुश्रवस्तमःसखावृधे १७ संतेपयांसि
समुयन्तुवाजाःसंवृष्ण्यान्यभिमातिषाहः । आप्यायमानोअमृतायसोमदिविश्र-
वांस्युत्तमानिधिष्व १८ यातेधामानिहविषायजन्तितातेविश्वापरिभूरस्तुयज्ञम् ।
गयस्फानःप्रतरणःसुवीरोऽवीरहाप्रचरासोमदुर्यान् १९ सोमोधेनुंसोमोअर्वन्त-
माशुंसोमोवीरंकर्मण्यंददाति । सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशदस्मै
२० ॥ २२ ॥ अषाळ्हंयुत्सुपृतनासुपप्रिंस्वर्षामप्सांवृजनस्यगोपाम् । भरेषुजां
सुक्षितिंसुश्रवसंजयन्तंत्वामनुमदेमसोम २१ त्वमिमाओषधीःसोमविश्वा-
स्त्वमपोअजनयस्त्वंगाः । त्वमाततन्थोर्वन्तरिक्षंत्वंज्योतिषावितमोववर्थ २२
देवेननोमनसादेवसोमरायोभागंसहसावन्नभियुध्य । मात्वातनदीशिषेवीर्यस्यो-

भयेभ्यःप्रचिकित्सागविष्टौ २३ ॥ २३ ॥

एता अष्टादश गोतमः । आदितः पञ्चदशानामुपास्ततास्तिसृणामश्विनौ
चतस्रो जगत्यस्ततोऽष्टौ त्रिष्टुभस्तत उष्णिहः ।

१२ एताउत्याउषसःकेतुमक्रतपूर्वेअर्धरजसोभानुमञ्जते । निष्कृण्वानाआयुधानिवधृष्णवःप्रतिगावोऽरुषीर्यन्तिमातरः १ उदपप्तन्नरुणाभानवोवृथास्वायुजोअरुषीर्गाअयुक्षत । अक्रन्नुषासोव्युनानिपूर्वथारुशन्तंभानुमरुषीरशिश्रयुः २ अचैन्तिनारीरपसोनाविष्टिभिःसमानेनयोजनेनापरावतः । इषंवहन्तीःसुकृतेसुदानवेविश्वेदहयजमानायसुन्वते ३ अधिपेशांसिवपतेनृतूरिवापोर्णुतेवक्षउस्रेवबर्जहम् । ज्योतिर्विश्वस्मैभुवनायकृण्वतीगावोनव्रजंव्युषाआवर्तमः ४ मत्यूर्चीरुशदस्याअदर्शिवितिष्ठतेवार्धतेकृष्णमभ्वम् । स्वरुनपेशोविदथेष्वञ्ज-

श्चित्रंदिवोदुहिताभानुमश्रेत् ५ ॥ २४ ॥ अतारिष्मतमसस्पारमस्योषाउच्छ-
न्तीवयुनाकृणोति । श्रियेछन्दोनसमयतेविभातीसुप्रतीकासौमनसायाजीगः ६
भास्वतीनेत्रीसूनृतानांदिवःस्तवेदुहितागोतमेभिः । प्रजावतोनृवतोअश्वबुध्या
नुषोगोअग्राँउपमासिवाजान् ७ उपस्तमश्यांयशसंसुवीरंदासप्रवर्गंरयिमश्वबु-
ध्यम् । सुदंससाश्रवसायाविभासिवाजप्रसूतासुभगेबृहन्तम् ८ विश्वानिदेवीभुव-
नाभिचक्ष्याप्रतीचीचक्षुरुर्वियाविभाति । विश्वंजीवंचरसेबोधयन्तीविश्वस्यवा-
चंमविदन्मनायोः ९ पुनः पुनर्जायमानापुराणीसमानंवर्णमभिशुम्भमाना ।
श्वघ्नीवकृत्नुर्विजआमिनानामर्तस्यदेवीजरयन्त्यायुः १० ॥ २५ ॥ व्यूर्ण्वतीदि-
वोअन्ताँअबोध्यप्स्वसारंसनुतर्युयोति । प्रमिनतीमनुष्यायुगानियोषाजारस्य
चक्षसाविभाति ११ पशून्नचित्रासुभगाप्रथानासिन्धुर्नक्षोदउर्वियाव्यश्वैत् ।

अमिंनतीदैव्यानिव्रतानिसूर्यस्यचेतिरश्मिभिर्दृशाना १२ उषस्तच्चित्रमाभरा-
स्मभ्यंवाजिनीवति । येनंतोकंचुतनंयंचवामंहे १३ उषोअयेहगोमत्यश्वावति
विभावरि । रेवदस्मेव्युच्छसूनृतावति १४ युक्ष्वाहिवांजिनीवत्यश्वाँअद्यारुणाँ
उषः । अथानोविश्वासौभगान्यावह १५ ॥ २६ ॥ अश्विनावर्तिरस्मदागोमद-
स्राहिरण्यवत् । अर्वाग्रथंसमनसानियच्छतम् १६ यावित्थाश्लोकमादिवो
ज्योतिर्जनायचक्रथुः । आनऊर्जंवहतमश्विनायुवम् १७ एहदेवांमयोभुवा
दस्राहिरण्यवर्तनी । उषर्बुधोवहन्तुसोमपीतये १८ ॥ २७ ॥

अग्नीषोमौ द्वादश गोतमोऽग्नीषोमौ । तिस्रोऽनुष्टुभः । नवम्याद्यास्तिस्रो
गायत्र्यः । शिष्टास्त्रिष्टुभः । अष्टमी जगती वा ।

१३ अग्नीषोमाविमंसुमेशृणुतंवृषणाहवंम् । प्रतिसूक्तानिहर्यतंभवतंदाशुषे

मयेः १ अग्नीषोमाभ्यांमिदंवचःसपर्यति । तस्मैधत्तंसुवीर्यंगवांपोषंस्वश्व्यं-
म् २ अग्नीषोमाभ्यआहुतिंयोवांदाशाद्धविष्कृतिम् । सप्रजयासुवीर्यंविश्वमायुर्व्यं-
श्नवत् ३ अग्नीषोमाचेतितद्वीर्यंवांयदमुष्णीतमवसंपणिंगाः । अवातिरतंबृस-
यस्यशेषोऽविन्दतंज्योतिरेकंबहुभ्यः ४ युवमेतानिंदिविरोचनान्यग्निश्चसोम
सक्रतूअवत्तम् । युवंसिन्धूरभिशस्तेरवद्यादग्नीषोमावमुञ्चतंगृभीतान् ५ आन्यं
दिवोमातरिश्वाजभारामंथादन्यंपरिश्येनोअद्रेः । अग्नीषोमाब्रह्मणावावृधानो-
रुंयज्ञायचक्रथुरुलोकम् ६ ॥ २८ ॥ अग्नीषोमाहविषःप्रस्थितस्यवीतंहर्यतं
वृषणाजुषेथाम् । सुशर्माणास्ववसाहिभूतमथावत्तंयजमानायशंयोः ७ यो
अग्नीषोमाहविषासपर्याद्देवद्रीचामनसायोघृतेन । तस्यव्रतंरक्षतंपातमंहसोवि-
शेजनायमहिशर्मयच्छतम् ८ अग्नीषोमासवेदसासहूतीवनतंगिरः । संदेवत्रा

वभूवथुः १ अग्नीषोमावनेनवांयोवांघृतेनदाशति । तस्मैदीदयतंबृहत् १० अग्नीषोमाविमानिनोयुवंहव्याजुजोषतम् । आयातमुपनःसचा ११ अग्नीषोमापिपृतमर्वतोनआप्यायन्तामुस्रियाहव्यसूदः । अस्मेबलानिमघवत्सुधत्तंकृणुतंनोअध्वरंश्रुष्टिमन्तम् १२ ॥ २१ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले चतुर्दशोऽनुवाकः ॥ १४ ॥

इमं षोडश आङ्गिरसः कुत्सोऽग्निः पूर्वो देवा इति त्रयः पादा देवदेवताः ।
तन्नो मित्र इत्यर्धर्चो लिङ्गोक्तषड्दैवत्यो वा जगती । अन्त्ये त्रिष्टुभौ ।

१४ इमंस्तोममर्हतेजातवेदसेरथमिवसंमहेमामनीषया । भद्राहिनःप्रमतिरस्यसंसद्यग्नेसख्येमारिषामावयंतव १ यस्मैत्वमायजसेससाधत्यनर्वाक्षेतिदधतेसुवीर्यम् । सतूतावनैनंमथ्नोत्यंहतिरग्नेसख्येमारिषामावयंतव २ शकेम

त्वासमिधंसाधयाधियस्त्वेदेवाहविरदन्त्याहुतम् । त्वमादित्याँआवहतान्ह्युश्मस्यग्नेसख्येमारिषामावयंतवं ३ भरामेध्वंकृणवामाहवींषितेचितयन्तःपवींणापर्वणावयम् । जीवातवेप्रतरंसाधयाधियोऽग्नेसख्येमारिषामावयंतवं ४ विशांगोपाअस्यचरन्तिजन्तवोद्विपच्चयदुतचतुष्पदक्तुभिः । चित्रःप्रकेतउषसोमहाँअस्यग्नेसख्येमारिषामावयंतवं ५ ॥ ३० ॥ त्वमध्वर्युरुतहोतासिपूर्व्यःप्रशास्तापोताजनुषापुरोहितः । विश्वाविद्वाँआर्त्विज्याधीरपुष्यस्यग्नेसख्येमारिषामावयंतवं ६ योविश्वतःसुप्रतीकःसदृङ्ङसिदूरेचित्सन्तळिदिवातिरोचसे । रात्र्याश्चिदन्धोअतिदेवपश्यस्यग्नेसख्येमारिषामावयंतवं ७ पूर्वोदेवाभवतुसुन्वतोरथोऽस्माकंशंसोअभ्यस्तुदूढ्यः । तदाजानीतोतपुष्यतावचोऽग्नेसख्येमारिषामावयंतवं ८ वृधेदुःशंसाँअपदूढ्योजहिदूरेवायेअन्तिवाकेचिदत्रिणः ।

अथायज्ञायगृणतेसुगंकृध्यग्नेसख्येमारिषामावयंतवं १ यदयुंक्थाअरुषारोहितारथेवातंजूतावृषभस्यवतेरवः । आदिन्वसिवनिनोधूमकेतुनाग्नेसख्येमारिषामावयंतवं १० ॥ ३१ ॥ अधस्वनादुतबिभ्युःपतत्रिणोद्रप्सायत्तेयवसादो व्यस्थिरन् । सुगंतत्तेतावकेभ्योरथेभ्योऽग्नेसख्येमारिषामावयंतवं ११ अयं मित्रस्यवरुणस्यधायसेऽवयातांमरुतांहेळोअद्भुतः । मृळासुनोभूत्वेषांमनुःपुनरग्नेसख्येमारिषामावयंतवं १२ देवोदेवानामसिमित्रोअद्भुतोवसुर्वसूनामसि चारुरध्वरे । शर्मन्त्स्यामतवंसप्रथस्तमेऽग्नेसख्येमारिषामावयंतवं १३ तत्ते भद्रंयत्समिद्धःस्वेदमेसोमाहुतोजरसेमृळयत्तमः । दधासिरत्नंद्रविणंचदाशुषेऽग्ने सख्येमारिषामावयंतवं १४ यस्मैत्वंसुद्रविणोददाशोऽनागास्त्वमदितेसर्वताता । यंभद्रेणशवसाचोदयासिप्रजावतारार्धसातेस्याम १५ सत्वमग्नेसौभ-

गत्वस्यविद्वानस्माकमायुःप्रतिरेहदेव । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः १६ ॥ ३२ ॥ इति शाकलर्क्संहितायां प्रथमाष्टके षष्ठोऽध्यायः ॥ ६ ॥

द्वेएकादशौपसायवाग्नेयेसप्तथानयद्रविणोदसेपनोष्टौशुचयेगायत्रंवैश्वानरस्यतृचंवैश्वानरीयंजातवेदसएकाजातवेदस्यमेतदादीन्येकभूयांसिसूक्तसहस्रमेतत्कश्यपार्षंसयोवृषैकोनावार्षागिराक्रुञ्चाश्वाम्बरीषसहदेवभयमानसुराधसःप्रमन्दिनएकादशकुत्सश्चतुस्त्रिष्टुवन्तमाद्यागर्भस्राविष्णुपनिषादिमांतेन्त्रात्रिष्टुप्तत्तेष्टौयोनिर्नवचन्द्रमाएकोनाऽस्यस्तोवावैश्वदेवंहिपाङ्क्तमन्त्यात्रिष्टुवष्टमीमहावृहतीयवमध्येन्द्रंमित्रंसप्तत्रिष्टुवन्तंयज्ञस्तृचंयइन्द्राग्नीसप्तोनैन्द्राग्नंतुविह्यष्टौततंनवार्भवंतुपञ्चम्यन्त्येत्रिष्टुभौतक्षन्पञ्चात्यात्रिष्टुबीळेपञ्चाधिकाश्चिनमाद्यौपादौलिङ्गोक्तदैवतावन्त्येत्रिष्टुभौ ॥ ७ ॥

द्वे विरूपे एकादश कुत्स औपस्योऽग्निः शुद्धोऽग्निर्वा त्रिष्टुप् ।

१५ द्वेविरूपेचरतःस्वर्थेअन्यान्यावत्समुपधापयेते । हरिरन्यस्यांभवतिस्वधावाञ्छुक्रोअन्यस्यांदद्दृशेसुवर्चाः १ दशेमंत्वष्टुर्जनयन्तुगर्भमतन्द्रासोयुवत-

योविभृत्रम् । तिग्मानीकंस्वयशसंजनेषुविरोचमानंपरिषीनयन्ति २ त्रीणि
जानापरिभूषन्त्यस्यसमुद्रएकंदिव्येकमप्सु । पूर्वामनुप्रदिशंपार्थिवानामृतू-
न्प्रशासद्विदधावनुष्ठु ३ कइमंवोनिण्यमाचिकेतवत्सोमातृजनयतस्वधाभिः
। बह्वीनांगर्भोअपसामुपस्थान्महान्कविर्निश्चरतिस्वधावान् ४ आविष्ट्योव-
र्धतेचारुरासुजिह्वानामूर्ध्वःस्वयशाउपस्थे । उभेत्वष्टुर्विभ्यतुर्जायमानात्प्रती-
चीसिंहंप्रतिजोषयेते ५ ॥ १ उभेभद्रेजोषयेतेनमेनेगावोनवाश्राउपतस्थुरेवैः ।
सदक्षाणांदक्षपतिर्बभूवाञ्जन्तियंदक्षिणतोहविर्भिः ६ उद्यंयमीतिसवितेवबाहू
उभेसिचौयततेभीमऋञ्जन् । उच्छुक्रमत्कमजतेसिमस्मान्नवामातृभ्योवसना
जहाति ७ त्वेषंरूपंकृणुतउत्तरंयत्संपृञ्चानःसदनेगोभिरद्भिः । कविर्बुध्नंपरि
मर्मृज्यतेधीःसादेवतातासामितिर्बभूव ८ उरुतेज्रयुःपर्येतिबुध्नंविरोचमानंमहि-

पस्यधामं । विश्वेभिरग्नेस्वयंशोभिरिद्धोऽदब्धेभिःपायुभिःपाह्यस्मान् १ धन्व-न्स्रोतःकृणुतेगातुमूर्मिंशुक्रैरूर्मिभिरभिनक्षतिक्षाम् । विश्वासनानिजठरेपुवक्ते-ऽन्तर्नवासुचरतिप्रसूषु १० एवानोअग्नेसमिधावृधानोरेवत्पावकश्रवसेविभाहि । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ११ ॥ २ ॥

स मन्वथा नव कुत्सो द्रविणोदा अग्निःशुद्धोऽग्निर्वा त्रिष्टुप् ।

१६ सम्मन्वथासहसाजायमानःसद्यःकाव्यानिबळधत्तविश्वा । आपश्चमित्रं धिषणाचसाधन्देवाअग्निंधारयन्द्रविणोदाम् १ सपूर्वयानिविदाकव्यतायोरिमाः प्रजाअजनयन्मनूनाम् । विवस्वताचक्षसाद्यामपश्चदेवाअग्निंधारयन्द्रविणोदा-म् २ तमीळतप्रथमंयज्ञसाधंविशआरीराहुतमृञ्जसानम् । ऊर्जःपुत्रंभरतंसृप्र-दानुंदेवाअग्निंधारयन्द्रविणोदाम् ३ समातरिश्वापुरुवारंपुष्टिर्विदद्गातुंतनयाय

स्रुविंत् । विशांगोपाजनितारोदस्योर्देवाअग्निंधारयन्द्रविणोदाम् ४ नक्तोषा-
सावर्णमामेम्यानेषापयेतोशिशुमेकंसमीची । द्यावाक्षामारुक्मोअन्तर्विभाति
देवाअग्निंधारयन्द्रविणोदाम् ५ ॥ ३ ॥ रायोबुध्नःसंगमनोवसूनांयज्ञस्यकेतु-
र्मन्मसाधनोवेः । अमृतत्वंरक्षमाणासएनंदेवाअग्निंधारयन्द्रविणोदाम् ६ नूचं
पुराचसदनंरयीणांजातस्यचजायमानस्यचक्षाम् । सतश्चगोपांभवतश्चभूरदेवा
अग्निंधारयन्द्रविणोदाम् ७ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंस-
त् । द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः ८ एवानोअग्नेसमिधा
वृधानोरेवत्पावकश्रवसेविभाहि । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुः
पृथिवीउतद्यौः ९ ॥ ४ ॥

अपं नोऽष्टौ कुत्सः शुचिरग्निः शुद्धोऽग्निर्वा गायत्री ।

१७ अपं॒न॒ःशोशु॑चद॒घमग्नेशु॒शुग्ध्या॒र॒यिम् । अपं॒न॒ःशोशु॑चद॒घम् १ सु॒क्षे-त्रि॒यासु॑गातु॒यावसू॒याच॑यजामहे । अपं॒न॒ःशोशु॑चद॒घम् २ प्रयद्भं॑दि॒ष्ठएषां॒प्रा-स्माकां॑सश्चसू॒रयः॑ । अपं॒न॒ःशोशु॑चद॒घम् ३ प्रय॑त्तेअग्नेसू॒र॒योजा॑यें॒महि॒प्रते॑व॒यम् । अपं॒न॒ःशोशु॑चद॒घम् ४ प्रयद॒ग्नेःसहं॑स्वतोवि॒श्व॒तो॒या॒न्ति॒भा॒न॑वः । अपं॒न॒ः शोशु॑चद॒घम् ५ त्वंहि॑वि॒श्व॒तो॒मु॒ख॒वि॒श्व॑तः॒प॒रि॒भूरसि॑ । अपं॒न॒ःशोशु॑चद॒घम् ६ द्विषो॑नोविश्वतोमु॒खा॒ति॒ना॒वेव॑पारय । अपं॒न॒ःशोशु॑चद॒घम् ७ सन॒ःसिन्धु॑मिव ना॒व॒या॒ति॒प॒र्षा॒स्व॒स्तये॑ । अपं॒न॒ःशोशु॑चद॒घम् ८ ॥ ५ ॥

वैश्वानरस्य तिस्रः कुत्सो वैश्वानरोऽग्निः शुद्धोऽग्निर्वा त्रिष्टुप् ।

१८ वै॒श्वा॒न॒र॒स्य॑सु॒म॒तौ॒स्या॑म॒राजा॒हि॑कं॒भु॒व॑नानामभि॒श्रीः । इ॒तो॒जा॒तोवि-

श्वंमिदंविचंष्टेश्वानरोयंततेसूर्येण १ पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओ-
षधीरार्विवेश । वैश्वानरःसहंसापृष्टोअग्निःसनोदिवासरिपःपांतुनक्तम् २ वै-
श्वानरतवतत्सत्यमस्त्वस्मावायोंमघवानःसचन्ताम् । तन्नोंमित्रोवरुणोमामह-
न्तामदितिःसिन्धुःपृथिवीउतद्यौः ३ ॥ ६ ॥

जातवेदस एका मारीचः काश्यपो जातवेदा अग्निः शुद्धोऽग्निर्वा त्रिष्टुप् ।

११ जातवेदसेसुनवामसोमंमरातीयतोनिदंहातिवेदः । सनःपर्षदतिदुर्गा-
णिविश्वानावेवसिन्धुंदुरितात्यग्निः १ ॥ ७ ॥

स य एकोनविंशतिर्वार्षागिरा ऋज्राश्वाम्बरीषसहदेव-
भयमानसुराधस इन्द्रस्त्रिष्टुप् ।

१०० सयोवृषावृष्ण्येभिःसमोकामहोदिवःपृथिव्याश्वंसम्राट् । सतीनसत्वा

हव्योभरेषुमरुत्वान्नोभवत्विन्द्रऊती १ यस्यानाप्तःसूर्यस्येवयामोभरेभरेवृत्र-
हाशुष्मोअस्ति । वृषन्तमःसखिभिःस्वेभिरेवैर्मरुत्वान्नोभवत्विन्द्रऊती २ दि-
वोनयस्यरेतसोदुघानाःपन्थासोयन्तिशवसापरीताः । तरद्द्वेषाःसासहिःपौंस्यै-
भिर्मरुत्वान्नोभवत्विन्द्रऊती ३ सोअङ्गिरोभिरङ्गिरस्तमोभूद्वृषावृषभिःसखि-
भिःसखासन् । ऋग्मिभिर्ऋग्मीगातुभिर्ज्येष्ठोमरुत्वान्नोभवत्विन्द्रऊती ४ स
सूनुभिर्नरुद्रेभिर्ऋभ्वानृषाह्यसासह्याँअमित्रान् । सनीळेभिःश्रवस्यानितूर्वन्म-
रुत्वान्नोभवत्विन्द्रऊती ५ ॥ ८ ॥ समन्यमीःसमदनस्यकर्तास्माकेभिर्नृभिः
सूर्यसनत् । अस्मिन्नहन्त्सत्पतिःपुरुहूतोमरुत्वान्नोभवत्विन्द्रऊती ६ तमूतयो
रणयञ्छूरसातौतंक्षेमस्यक्षितयःकृण्वतत्राम् । सविश्वस्यकरुणस्येशएकोमरु-
त्वान्नोभवत्विन्द्रऊती ७ तमप्सन्तशवसउत्सवेषुनरोनरमवसेतंधनाय । सो

अन्धेचित्तमसिज्जोतिर्विदन्मरुत्वान्नोभवत्विन्द्रऊती ८ ससव्येनयमतिद्वार्धत-
श्चित्सदक्षिणेसंगृभीताकृतानि । सकीरिणाचित्सनितोधनानिमरुत्वान्नोभव-
त्विन्द्रऊती ९ सग्रामेभिःसनितासरथेभिर्विदेविश्वाभिःकृष्टिभिर्न्वद्य । सपौं-
स्येभिरभिभूरशस्तीर्मरुत्वान्नोभवत्विन्द्रऊती १० ॥ १ ॥ सजामिभिर्यत्समजा-
तिमीढेऽजामिभिर्वापुरुहूतएवैः । अपांतोकस्यतनयस्यजेषेमरुत्वान्नोभव-
त्विन्द्रऊती ११ सवज्रभृद्दस्युहाभीमउग्रःसहस्रचेताःशतनीथऋभ्वा । चम्री-
षोनशवसापाञ्चजन्योमरुत्वान्नोभवत्विन्द्रऊती १२ तस्यवज्रःक्रन्दतिस्मत्स्व-
र्नादिवोनत्येषोरवथःशिमीवान् । तंसचन्तेसनयस्तंधनानिमरुत्वान्नोभवत्विन्द्र
ऊती १३ यस्याजस्रंशवसामानमुक्थंपरिभुजद्रोदसीविश्वतःसीम् । सपारि-
षत्क्रतुभिर्मन्दसानोमरुत्वान्नोभवत्विन्द्रऊती १४ नयस्यदेवादेवतानमर्ताआपं-

श्वनशवसोअन्तमापुः । सम्परिक्तात्वक्षसाक्ष्मोदिवश्चमरुत्वान्नोभवात्विन्द्रऊती १५ ॥ १० ॥ रोहिच्छ्यावासुमदंशुर्ललामीर्युक्षारायऋज्राश्वस्य । वृषण्वन्तं बिभ्रतीधूर्षुरथंमन्द्राचिकेतनाहुषीषुविक्षु १६ एतत्त्यत्तइन्द्रवृष्णउक्थंवार्षागिरा अभिगृणन्तिराधः । ऋज्राश्वःप्रष्टिभिरम्बरीषःसहदेवोभयमानःसुराधाः १७ दस्युञ्छिम्यूंश्चपुरुहूतएवैर्हत्वापृथिव्यांशर्वानिबर्हीत् । सनत्क्षेत्रंसखिभिःश्वित्न्येभिःसनत्सूर्यसनदुपःसुवज्रः १८ विश्वाहेन्द्रोअधिवक्तानोअस्त्वपरिह्वृताःसनुयामवाजम् । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः १९ ॥ ११ ॥

म मन्दिन एकादश कुत्स इन्द्रो जगती । अन्त्याश्चतस्रस्त्रिष्टुभः ।

१०१ प्रमन्दिनेपितुमदर्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना । अवस्यवो

वृजनेमादयासे। अतआयाह्यध्वरंनोअच्छात्वायाहविश्वकुमासत्यराधः ८ त्वायेन्द्रसोमंसुषुमासुदक्षत्वायाहविश्वकुमाब्रह्मवाहः। अथानियुत्वःसगणोमरुद्भिर-स्मिन्यज्ञेवर्हिषिमादयस्व ९ मादयस्वहरिभिर्येतइन्द्रविष्यस्वशिप्रेविसृजस्वधेनें। आत्वासुशिप्रहरयोवहन्तूशन्हव्यानिप्रतिनोजुषस्व १० मरुत्स्तोत्रस्यवृजनस्यगोपावयमिन्द्रेणसनुयामवाजम्। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ११ ॥ १३ ॥

इमां त एकादश कुत्स इन्द्रो जगती। अन्त्या त्रिष्टुप्।

१०२ इमांतेधियंप्रभरेमहोमहीमस्यस्तोत्रेधिषणायतंआनजे। तमुत्सवेचप्रसवेचसासहिमिन्द्रंदेवासःशवसामदन्ननु १ अस्यश्रवोनद्यःसप्तबिभ्रतिवाक्षामापृथिवीदर्शतंवपुः। अस्मेसूर्याचन्द्रमसाभिचक्षेश्रद्धेकमिन्द्रचरतोवित-

वृषणंवज्रदक्षिणंमरुत्वन्तंसख्यायहवामहे १ योव्यंसंजाहपाणेनमन्युनायःश-
म्वरंयोअहन्पिप्रुंमव्रतम् । इन्द्रोयःशुष्णंमशुपंन्यावृणङ्मरुत्वन्तंसख्यायहवाम-
हे २ यस्यद्यावापृथिवीपौंस्यंमहद्यस्यव्रतेवरुणोयस्यसूर्यः । यस्येन्द्रस्यासि-
न्धवःसश्चंतिव्रतंमरुत्वंतंसख्यायहवामहे ३ योअश्वानांयोगवांगोपतिर्वशीय-
आरितःकर्मणिकर्मणिस्थिरः । वीळोश्चिदिन्द्रोयोअसुन्वतोधोमरुत्वन्तंसख्या-
यहवामहे ४ योविश्वस्यजगंतःप्राणतस्पतिर्योब्रह्मणेप्रथमोगाअविन्दन् । इन्द्रोयो
दस्यूँरधराँअवातिरन्मरुत्वन्तंसख्यायहवामहे ५ यःशूरैर्भिर्हव्योयश्चभीरुभिर्यो
घावद्भिर्हूयतेयश्चजिग्युभिः । इन्द्रंयंविश्वाभुवनाभिसंदधुर्मरुत्वन्तंसख्यायहवा-
महे ६॥१२॥ रुद्राणांमेतिप्रदिशांविचक्षणोरुद्रेभिर्योपांतनुतेपृथुज्रयः । इन्दैमनी-
पाअभ्यर्चतिश्रुतंमरुत्वन्तंसख्यायहवामहे ७ यद्वांमरुत्वःपरमेसधस्थेयद्वावमे

वृजनैमादयासे। अतआयाह्यध्वरंनोअच्छात्वायाहविश्वकुमासत्यराधः ८ त्वायेन्द्रसोमंसुषुमासुदक्षत्वायाहविश्वकुमाब्रह्मवाहः। अधानियुत्वःसगणोमरुद्भिर-स्मिन्यज्ञेवर्हिषिमादयस्व १ मादयस्वहरिभिर्येतइन्द्रविष्यस्वशिप्रेविसृजस्वधेनें। आत्वासुशिप्रहरयोवहन्तूशन्हव्यानिप्रतिनोजुषस्व १० मरुत्स्तोत्रस्यवृजनस्यगोपावयमिन्द्रेणसनुयामवाजम्। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ११ ॥ १३ ॥

इमां त एकादश कुत्स इन्द्रो जगती। अन्त्या त्रिष्टुप्।

१०२ इमांतेधियंप्रभरेमहोमहीमस्यस्तोत्रेधिषणायतंआनजे। तमुत्सवेचप्रसवेचसासहिमिन्द्रंदेवासःशवसामदन्नुनु १ अस्यश्रवोनद्यःसप्तबिभ्रतिवाक्षामापृथिवीदर्शतंवपुः। अस्मेसूर्याचन्द्रमसाभिचक्षेश्रद्धेकमिन्द्रचरतोवित-

तुरम् २ तंस्मारथंमघवन्त्रावंसातयेजैत्रंयंतेअनुमदांमसंगमे । आजानंइन्द्रमनंसापुरुष्टुतत्वायद्योंमघवञ्छमँयच्छनः ३ वयंजयेमत्वयायुजावृतंमस्माकमंशमुदंवाभरेंभरे । अस्मभ्यंमिन्द्रवरिंवःसुगंकृधिप्रशत्रूणांमघवन्वृष्ण्यारुज ४ नानाहित्वाहवंमानाजनांइमेधनांनांधर्तरवंसाविपन्यवंः । अस्माकँस्मारथमातिंष्ठसातयेजैत्रंहीन्द्रनिभृतंमनस्तवं ५ ॥ १४ ॥ गोजितांवाहूअभितक्रतुःसिमःकर्मँन्कर्मञ्छतमूतिःखजंकरः । अकल्पइन्द्रःप्रतिमानमोजसाथाजनाविह्वयन्तेसिषासवंः ६ उत्तेशतान्मघवन्नुच्चभूयसउत्सहस्राद्रिरिचेरकृष्टयुश्रवंः । अमात्रंत्वांधिषणातित्विषेमह्यधावृत्राणिंजिघ्नसेपुरंदर ७ त्रिविष्टिधातुप्रतिमानमोजसस्तिस्रोभूमीर्नृपतेत्रीणिंरोचना । अतीदंविश्वंभुवनंववक्षिथाशत्रुरिन्द्र जनुषासुनादंसि ८ त्वांदेवेप्रथमंहवामहेत्वंवंभूथपृतनासुसासहिः । सेमं

नःकारुमुपमन्युमुद्भिदमिन्द्रःकृणोतुप्रसवेरथंपुरः १ त्वंजिगेथनघनारुरोधिथा-
भंप्त्राजामंघवन्महत्सुच । त्वामुग्रमवसेसंशिशीमस्यथानइन्द्रहवनेषुचोद-
य १० विश्वाहेन्द्रोअधिवक्तानोअस्त्वपरिह्वृताःसनुयामवाजम् । तन्नोमित्रो
वरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ११ ॥ १५ ॥

तत्तेऽष्टौ कुत्स इन्द्रस्त्रिष्टुप् ।

१०३ तत्तइन्द्रियंपरमंपराचैरधारयन्तकवयःपुरेदम् । क्षमेदमन्याद्व्यन्य-
दस्यसमंपृच्यतेसमनेवकेतुः १ सधारयत्पृथिवींपप्रथच्चवज्रेणहत्वानिरपःस-
सर्ज । अहन्नहिमभिनद्रौहिणंव्यहन्व्यंसंमघवाशचीभिः २ सजातूभर्माश्र-
द्दधानओजःपुरोविभिन्दन्नेचरद्विदासीः । विद्वान्वज्रिन्दस्यवेहेतिमस्यार्यंसहोव-
र्धयाद्युम्नमिन्द्र ३ तदूचुषेमानुषेमायुगानिकीर्तेन्यंमघवानामबिभ्रत् । उपप्रयन्द-

स्युहत्यायवज्रीयद्धसूनुःश्रवसेनामदधे ४ तदस्येदंपश्यताभूरिपुष्टंश्रदिन्द्रस्यधत्त-
नवीयौंय । सगाअविन्दत्सोअविन्ददश्वान्त्सओषधीःसोअपःसवनानि५॥१६॥
भूरिकर्मणेवृषभायवृष्णेसत्यशुष्मायसुनवामसोमम् । यआहत्यापरिपन्थीवृशू-
रोऽर्यज्वनोविभजन्नेतिवेदः ६ तदिन्द्रप्रेववीर्यंचकर्थयत्ससन्तंवज्रेणावोधयो-
ऽहिम् । अनुत्वापत्नीर्हितंवयश्चविश्वेदेवासोअमदन्ननुत्वा ७ शुष्णंपिप्रुंकुय-
वंवृत्रमिन्द्रयदावधीर्विपुरःशम्बरस्य । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुः
पृथिवीउतद्यौः ८ ॥ १७ ॥

योऽनिष्टे नव कुत्स इन्द्रस्त्रिष्टुप् ।

१०४ योनिंष्टइन्द्रनिषदेऽकारितमानिषीदस्वानोनावा । विमुच्यावयोऽव-
सायाश्वान्दोषावस्तोर्वहीयसःप्रपित्वे १ ओत्येनरइन्द्रमूतयेगुर्नूचित्तान्त्सद्योअ-

ध्वंनोजगम्यात् । देवासोमन्युंदासंस्यश्चन्तेनआवंक्षन्तसुवितायवर्णम् २ अवृत्मनाभरतेकेतंवेदाअवृत्मनाभरतेफेनमुदन् । क्षीरेणस्नातःकुर्यवस्ययोपैहृतेतेस्यांतांप्रवणेशिफायाः ३ युयोपनाभिरुपरस्यायोःप्रपूर्वीभिस्तिरतेराष्ट्रि शूरः । अञ्जसीकुलिशीवीरपत्नीपयोहिन्वानाउदभिर्भरन्ते ४ प्रतियत्स्यानी-थादंशिदस्योरोकोनाच्छासदनंजानतीगात् । अधस्मानोमघवञ्चर्कृतादिन्मानोमघेवनिष्पपीपरादाः ५ ॥ १८ ॥ सत्वंनइन्द्रसूर्येसोअप्स्वनागास्त्वआभज जीवशंसे । मान्तरांभुजमारीरिषोनःश्रद्धितंतेमहतइन्द्रियाय ६ अधामन्ये श्रत्तेअस्माअधायिवृषाचोदस्वमहतेधनाय । मानोअकृतेपुरुहूतयोनाविन्द्रक्षुध्यद्भ्योवयंआसुतिंदाः ७ मानोवधीरिन्द्रमापरादामानःप्रियाभोजनानिप्रमोषीः । आण्डामानोमघवञ्छक्रनिर्भेन्मानःपात्राभेत्सहजानुषाणि ८ अर्वाङेहिसो-

मंकामंत्वाहुरयंसुतस्तस्यंपिबामदांय । उरुव्यचांजठरआवृषस्वापितेवनःशृणु-
हिहूयमानः १ ॥ ११ ॥

चन्द्रमा एकोनविंशतिरात्यस्तितः कुत्सो वा विश्वेदेवाः पङ्क्तिः । अष्टमी-
यवमध्या महाबृहती । अन्त्या त्रिष्टुप् ।

१०५ चन्द्रमाअप्स्व१न्तरासुपर्णोधावतेदिवि । नवोहिरण्यनेमयःपदंविन्द-
न्तिविद्युतोवित्तंमेअस्यरोदसी १ अर्थमिद्वाउंअर्थिनआजायायुवतेपतिम् । तु-
ञ्जातेवृष्ण्यंपयःपरिदायरसंदुहेवित्तंमेअस्यरोदसी २ मोषुदेवाअदःस्व१रवपादि
दिवस्परि । मासोम्यस्यशंभुवःशूनेभूमकदाचनवित्तंमेअस्यरोदसी ३ युञ्जंपृ-
च्छाम्यवमंसतद्भूतोविवोचति । कंऋतंपव्यंगुतंकस्तद्बिभर्तिनूतनोवित्तंमेअस्य
रोदसी ४ अमीयेदेवाःस्थनत्रिष्वारोचनेदिवः । कद्ऋतंकदनृतंक्वप्रत्नावआ-

हुतिर्वित्तंमेअस्यरोदसी ५ ॥ २० ॥ कद्वक्रतस्यधर्णसिकद्वरुणस्यचक्षणम् । कदर्यम्णोमहस्पथातिक्रामेमदूढ्योवित्तंमेअस्यरोदसी ६ अहंसोऽस्मियःपुरा सुतेवदामिकानिचित् । तंमाव्यन्त्याध्यो ३ वृकोनतृष्णजंमृगंवित्तंमेअस्यरोदसी ७ संमातपन्त्यभितःसपत्नीरिवपशवः । मूषोनशिभाव्यदन्तिमार्ध्यःस्तोतारंतेशतक्रतोवित्तंमेअस्यरोदसी ८ अमीयेसप्तरश्मयस्तत्रामेनाभिरातता । त्रितस्तद्वेदाप्यःसजामित्वायरेभतिवित्तंमेअस्यरोदसी ९ अमीयेपञ्चोक्षणोमध्येतस्थुर्महोदिवः । देवत्रानुप्रवाच्यंसधीचीनानिवावृतुर्वित्तंमेअस्यरोदसी १० ॥ २१ ॥ सुपर्णएतआसतेमध्यआरोधनेदिवः । तेसेधन्तिपथोवृकंतरन्तंयह्वतीरपोवित्तंमेअस्यरोदसी ११ नव्यंतदुक्थ्यंहितंदेवासःसुप्रवाचनम् । ऋतमर्षन्तिसिन्धवःसत्यंतातानसूर्योवित्तंमेअस्यरोदसी १२ अग्नेतवत्यदुक्थ्यंदेवेष्वु-

स्त्याप्यम् । सनः॑सत्तो॒मनु॒ष्वदा॑दे॒वान्य॑क्षि॒विदु॒ष्टरो॒वित्तं॑मे॒अस्य॒रोद॑सी १३ स॒त्तो होता॑मनु॒ष्वदा॑दे॒वाँअच्छा॑वि॒दु॒ष्टरः । अ॒ग्निर्ह॒व्यास॑ुदयति॒देवो॑देवे॒षुमे॑धि॒रोवित्तं॑मे अस्य॒रोद॑सी १४ ब्रह्मा॑कृणोति॒वरु॑णोगातु॒विद॑ंतमींमहे । व्यू॑र्णोति॒हृदा॑म॒तिंन-व्यो॑जायतामृ॒तंवित्तं॑मे॒अस्य॒रोद॑सी १५ ॥ २२ ॥ अ॒सौय॑:पन्था॑आदि॒त्योदि॒वि प्र॒वाच्य॑कृतः । नसदे॑वाअति॒क्रमे॒तंम॑र्तासो॒नप॑श्यथवित्तं॑मे॒अस्य॒रोद॑सी १६ त्रि॒त:कू॒पेऽव॑हितोदे॒वान्ह॑वत॒ऊत॑यै । तच्छु॑श्राव॒बृह॒स्पति॑:कृ॒ण्वन्ँहू॒र॒णादु॒रुवित्तं॑मे अस्य॒रोद॑सी १७ अरु॑णोमा॒स॒कृ॒द्वृ॒कःप॒थाय॒न्तँद॑दर्शा॒हि । उज्जि॑हीते॒नि॒चाय्या॒ तष्टे॑वपृ॒ष्ट्या॒म॒यीवित्तं॑मे॒अस्य॒रोद॑सी १८ एनाऽऽ॒पे॒ण॒व॒यामि॑न्द्रवन्तो॒ऽभि॒ष्याम॑ वृ॒जने॒सर्व॑वीराः । तन्नो॑मि॒त्रोव॒रु॑णोमामहन्ता॒मदि॑ति॒:सिन्धु॑:पृथि॒वीउ॒तद्यौः १९ ॥ २३ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले पञ्चदशोऽनुवाकः ॥ १५ ॥

इन्द्रं सप्त कुत्सो विश्वेदेवा जगती । अन्त्यां त्रिष्टुप् ।

१०६ इन्द्रंमित्रंवरुणमग्निमूतयेमारुतंशर्धोअदितिंहवामहे । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन १ तआदित्याआगंतासर्वतातयेभूतदेवावृत्रतूर्येपुरुंभुवः । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन २ अवन्तुनःपितरःसुप्रवाचनाउतदेवीर्देवपुत्रेऋतावृधा । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ३ नराशंसंवाजिनंवाजयन्निहक्षयद्वीरंपूषसंसुम्नैरीमहे । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ४ बृहस्पतेसदमिन्नःसुगंकृधिशंयोर्यत्तेमनुर्हितंतदीमहे । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ५ इन्द्रंकुत्सोवृत्रहणंशचीपतिंकाटेनिवाक्लृप्तऋषिरछदयूतये । रथंनदुर्गाद्दंसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ६ देवैनो

देव्यदितिर्निपातुदेवस्त्रातात्रायंतामप्रयुच्छन् । तन्नोमित्रोवरुणोमामहन्तामदितिः सिन्धुःपृथिवीउतद्यौः ७ ॥ २४ ॥

यज्ञो देवानां तिस्रः कुत्सो विश्वेदेवास्त्रिष्टुप् ।

१०७ यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृळयन्तः । आवोऽर्वाचींसुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत् १ उपनोदेवाअवसागमन्त्वङ्गिरसांसामभिःस्तूयमानाः । इन्द्रइन्द्रियैर्मरुतोमरुद्भिरादित्यैर्नोअदितिःशर्मयंसत् २ तन्नइन्द्रस्तद्वरुणस्तदग्निस्तद्र्यमातत्सवितावचनोधात् । तन्नोमित्रोवरुणोमामहन्तामदितिः सिन्धुःपृथिवीउतद्यौः ३ ॥ २५ ॥

य इन्द्राग्नी त्रयोदश कुत्स इन्द्राग्नी त्रिष्टुप् ।

१०८ यइन्द्राग्नीचित्रतमोरथोवामभिविश्वानिभुवनानिचष्टे । तेनायातंस- ॥ ८१ ॥

रथंतस्थिवांसाथासोमंस्यपिवतंसुतस्य १ यावंदिदंभुवनंविश्वमस्त्युरुव्यचावरि-
मतांगभीरम् । तावाँअयंपातवेसोमोअस्त्वरमिन्द्राग्नीमनसेयुवभ्याम् २ च-
क्राथेहिसध्य १ ङ्कामभद्रंसध्रीचीनावृत्रहणाउतस्थुः । तावीन्द्राग्नीसध्र्यञ्चानिष-
द्यावृष्णःसोमस्यवृषणावृषेथाम् ३ समिंद्वेष्वग्निष्वानजानायतस्रुचावृहिरुति-
स्तिराणा । तीव्रैःसोमैःपरिषिक्तेभिरर्वागेन्द्राग्नीसौमनसाययातम् ४ यानीन्द्रा-
ग्नीचक्रथुर्वीर्याणियानिरूपाण्युतवृष्ण्यानि । यावंप्रत्नानिसख्याशिवानितेभिः
सोमंस्यपिवतंसुतस्य ५ ॥ २६ ॥ यदब्रवंप्रथमंवांवृणानो ३ यंसोमोअसुरैर्नो
विहव्यः । तांसत्यांश्रद्धामभ्याहियातमथासोमंस्यपिवतंसुतस्य ६ यदिंन्द्रा-
ग्नीमदंथःस्वेदुरोणेयद्वाणिराजनिवायजत्रा । अतःपरिवृषणावाहियातमथासो-
मंस्यपिवतंसुतस्य ७ यद्रिंन्द्राग्नीयदुंक्थेपरेष्वयद्वाजुष्वनुंपूर्वरुपस्थः । अतः

परिवृणावाहियातमथासोमस्यपिबतंसुतस्य ८ यदिन्द्राग्नीअवमस्यांपृथिव्यां मध्यमस्यांपरमस्यामुतस्थः।अतःपरिवृणावाहियातमथासोमस्यपिबतंसुतस्य ९ यदिन्द्राग्नीपरमस्यांपृथिव्यांमध्यमस्यामवमस्यामुतस्थः। अतःपरिवृणावाहियातमथासोमस्यपिबतंसुतस्य १० यदिन्द्राग्नीदिविष्ठोयत्पृथिव्यांयत्पर्वतेष्वोषधीष्वप्सु। अतःपरिवृणावाहियातमथासोमस्यपिबतंसुतस्य ११ यदिन्द्राग्नी उदितासूर्यस्यमध्येदिवःस्वधयामादयेथे । अतःपरिवृणावाहियातमथासोमस्यपिबतंसुतस्य १२ एवेन्द्राग्नीपपिवांसासुतस्यविश्वास्मभ्यंसंजयतंधनानि। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः १३ ॥ २७ ॥

विश्वख्यमष्टौ कुत्स इन्द्राग्नी त्रिष्टुप्।

१०१ विश्वख्यंमनसावस्यइच्छन्निन्द्राग्नीजासउतवासजातान्। नान्यायु-

वत्प्रमांतिरस्तिमह्यंसवांधियंवाजयन्तींमतक्षम् १ अश्वंवहिभूंरिदावत्तरावांवि-
जांमातुरुतवांधास्यालात् । अथासोमंस्यप्रयतीयुवभ्यामिन्द्राग्नीस्तोमंजनया-
मिनव्यम् २ माच्छेद्मरश्मींरितिनाधमानाःपितृणांशक्तीरनुयच्छमानाः ।
इन्द्राग्निभ्यांकंवृषणोमदन्तिताह्यद्रींधिषणांयाउपस्थे ३ युवाभ्यांदेवीधिषणा
मदायेन्द्राग्नीसोमंसुशतीसुनोति । तावश्विनाभद्रहस्तासुपाणीआधावतंमधुना
पृङ्क्तमप्सु ४ युवामिन्द्राग्नीवसुनोविभागेतवस्तंमाशुश्रववृत्रहत्ये । तावासद्या
बर्हिषियज्ञेअस्मिन्प्रचर्षणीमादयेथांसुतस्य ५ ॥ २८ ॥ प्रचर्षणिभ्यःपृतनाह-
वेषुप्रपृथिव्याररिचाथेदिवश्च । प्रसिन्धुभ्यःप्रगिरिभ्योमहित्वाप्रेन्द्राग्नीविश्वाभु-
वनात्यन्या६आभरतंशिक्षतंवज्रबाहूअस्माँइन्द्राग्नीअवतंशचीभिः।इमेनुतेरश्म-

युःसूर्यस्ययेभिःसपित्वंपितरोनुआसन् ७ पुरंदरांशिक्षतंवज्रहस्तास्माँइन्द्राग्नी अवतंभरेषु । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ८॥२१॥

तते मे नव कुत्स ऋभवो जगती । पञ्चम्यन्त्ये त्रिष्टुभौ ।

११० ततंमेअपस्तदुतायतेपुनःस्वादिष्ठाधीतिरुचथायशस्यते । अयंसुमुद्र इहविश्वदेव्यःस्वाहाकृतस्यसमुतृप्णुतऋभवः १ आभोगयंप्रयदिच्छन्तऐतना-पाकाःप्राश्नोममकेचिदापयः । सौधन्वनासश्चरितस्यभूमनागच्छतसवितुर्दाशुषोगृहम् २ तत्सवितावोमृतत्वमासुवदगोह्यंयच्छवर्यन्तऐतनात्यंचिच्चमसमसुरस्यभक्षणमेकंसन्तमकृणुताचतुर्वयम् ३ विष्टीशमीतरणित्वेनवाघतोमताँसःसन्तोअमृतत्वमानशुः। सौधन्वनाऋभवःसूरचक्षसःसंवत्सरेसमपृच्यन्तधीतिभिः ४क्षेत्रमिवविममुस्तेजनेनॅएकंपात्रमृभवोजेहमानम्। उपस्तुताउपमंनावमाना

॥ ८३ ॥

अमर्त्येषुश्रवड्ड्च्छमानाः ५ ॥ ३० ॥ आमंनीपामन्तरिक्षस्यनृभ्यःस्रुचेवघृतं जुहवामविश्मना। तरणित्वायेपितुरस्यसश्चिरऋभवोवाजमरुहन्दिवोरजः ६ ऋभुर्नइन्द्रःशवसानवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः। युष्माकंदेवाअवसाहनिप्रिये ३ भितिष्ठेमपृत्सुतीरसुन्वताम् ७ निश्चर्मणऋभवोगामपिंशतसंवत्सेनासृजता मातरंपुनः। सौधन्वनासःस्वपस्ययानरोजिन्रीयुवानापितरंकृणोतन ८ वाजेभिर्नोवाजसातावविड्ढ्यृभुमाँइन्द्रचित्रमादंपिराधः। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ९ ॥ ३१ ॥

तक्षन्पञ्च कुत्स ऋभवो जगती। अन्त्या त्रिष्टुप्।

१११ तक्षन्रथंसुवृतंविश्मनापसस्तक्षन्हरीइन्द्रवाहावृषण्वसू।तक्षन्पितृभ्यामृभवोयुवद्वयस्तक्षन्वत्सायमातरंसचाभुवम् १ अनोयज्ञायतक्षतऋभुमद्वयःक-

त्वेदक्षायसुप्रजावतीमिषम् । यथाक्षयामसवीवीरयाविशातन्नःशर्धायधासथास्त्रिन्द्रियम् २ आतक्षतसातिमस्मभ्यमृभवःसातिरथायसातिमवतेनरः । सातिं नोजैत्रींसंमहेतविश्वहाजामिमजामिंपृतनासुसक्षणिम् ३ ऋभुक्षणमिंद्रमाहुव ऊतयेऋभून्वाजान्मरुतःसोमपीतये । उभामित्रावरुणानूनमश्विनातेनोहिन्वन्तुसातयेधियेजिषे ४ ऋभुर्भरायसंशिशातुसातिंसमर्यजिद्वाजोअस्माँअविष्टु । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ५ ॥ ३२ ॥

ईळे पञ्चविंशतिः कुत्सोऽश्विनौ । आद्यौ पादौ लिङ्गोक्तदैवतौ जगती । अन्त्ये त्रिष्टुभौ ।

११२ ईळेद्यावापृथिवीपूर्वचित्तयेऽग्निंघर्मंसुरुचंयामन्निष्टये । याभिर्भरेकारमंशायजिन्वथुस्ताभिरूषुऊतिभिरश्विनागतम् १ युवोर्दानायसुभराअसश्चतो

रथमातस्थुर्वचसंनमन्तवे । याभिर्धियो ऽवथुःकर्मन्निष्टयेताभिरूषुऊतिभिरश्वि-
नागतम् २ युवंतासोदिव्यस्यप्रशासनेविशांक्षयथोअमृतस्यमज्मना । याभिर्धेनु-
मस्वं १ पिन्वथोनरताभिरूषुऊतिभिरश्विनागतम् ३ याभिःपरिज्मातनंयस्यम
ज्मनाद्विमातातूर्पुतरणिर्विभूषति । याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरूषुऊ-
तिभिरश्विनागतम् ४ याभीरिभंनिवृतंसितमद्यउद्वन्दनमैरयतंस्वर्दृशे । याभिः
कण्वंप्रसिषासन्तमावतंताभिरूषुऊतिभिरश्विनागतम् ५ ॥ ३३ ॥ याभिरन्त-
कंजसमानमार्णेभुज्युंयाभिरव्यथिभिर्जिजिन्वथुः । याभिःकर्कन्धुंवय्यंचाजि-
न्वथस्ताभिरूषुऊतिभिरश्विनागतम् ६ याभिःशुचन्तिंधनसासुपंसदंतप्तंघ-
र्ममोम्यावन्तमत्रये । याभिःपृश्निंगुपुरुकुत्समावतंताभिरूषुऊतिभिरश्विनाग-
तम् ७ याभिःशचीभिर्वृषणापरावृजंप्रान्धंश्रोणंचक्षसएतवेकृथः । याभि-

र्वीतिंकांग्रसिताममुंश्वतंताभिंरूपुऊतिभिंराश्विनागंतम् ८ याभिंःसिन्धुंमधुंमन्तमसंश्वतंवसिंष्ठंयाभिंरजरावाजिंन्वतम् । याभिंःकुत्सेंश्रुतर्यंनर्यमावंतंताभिंरूपुऊतिभिंरश्विनागंतम् ९ याभिंर्विश्पलांधनुसामंथर्व्यंसहस्रंमीळ्हआजावजिंन्वतम् । याभिर्वशंमुश्न्यंप्रेणिमावंतंताभिंरूपुऊतिभिंरश्विनागंतम् १० ॥ ३४ ॥ याभिंःसुदानूऔशिजायंवणिजेंदीर्घश्रवसेमधुकोशोअक्षरत् । कक्षीवंन्तंस्तोतारंयाभिरावंतंताभिंरूपुऊतिभिंरश्विनागंतम् ११ याभींरसांक्षोदंसोन्द्रः पिंपिन्वथुंरनश्वंयाभींरथमावंतंजिंगे । याभिंस्त्रिशोकंउस्त्रियांउदाजंतंताभिंरूपुऊतिभिंरश्विनागंतम् १२ याभिंःसूर्यंपरियाथःपरावंतिंमन्धातारंक्षैत्रपत्येष्वावंतम् । याभिंर्विप्रंप्रभरद्वाजमावंतंताभिंरूपुऊतिभिंरश्विनागंतम् १३ याभिं र्महामंतिथिग्वंकंशोजुवंदिवोंदासंशम्बरहत्यआवंतम् । याभिंःपूर्भिद्यैत्रसदस्यु-

मावतंताभिरूपुऊतिभिरश्विनागतम् १४ याभिर्वृत्रंविपिपानमुपस्तुतंकृलिंयाभि-
र्वित्तजानिंदुवस्यथः । याभिर्व्यश्वमुतपृथिमावतंताभिरूपुऊतिभिरश्विनागतम्
१५॥३५॥ याभिर्नराशयवेयाभिरत्रयेयाभिःपुरामनवेगातुमीषथुः । याभिःशारी-
राजतंस्यूमरश्मयेताभिरूपुऊतिभिरश्विनागतम् १६ याभिःपठर्वाजठरस्यमन्ज-
मनाग्निर्नादीदेच्चितइद्धोअज्मन्ना । याभिःशर्यातमवथोमहाधनेताभिरूपुऊति-
भिरश्विनागतम् १७ याभिरङ्गिरोमनसानिरण्यथोऽग्रंगच्छथोविवरेगोअर्णसः ।
याभिर्मनुंशूरंमिपासमावतंताभिरूपुऊतिभिरश्विनागतम् १८ याभिःपत्नी-
विमदायंन्यूहथुराघवायाभिररुणीराशिक्षतम् । याभिःसुदासंऊहथुःसुदेव्यं
ताभिरूपुऊतिभिरश्विनागतम् १९ याभिःशन्तातीभवथोददाशुषेभुज्युंयाभि-
रवथोयाभिरध्रिगुम् । ओम्यावतींसुभरामृतस्तुभंताभिरूपुऊतिभिरश्विनागतम्

२० ॥ ३६ याभिःकृशानुमस्तनेदुवस्यथोजुवेयाभिर्यूनोअवन्तमावतम् । मधुप्रियंभरथोयत्सरड्भ्यस्ताभिरूषुऊतिभिरश्विनागतम् २१ याभिर्नरंगोषुयुधंनृषाह्येक्षेत्रंस्यसातातनंयस्याजिन्वथः । याभीरथाँअवथोयाभिरवन्तस्ताभिरूषुऊतिभिरश्विनागतम् २२ याभिःकुत्समार्जुनेयंशंतक्रतूप्रतुर्वीतिंप्रचदभीतिमावतम् । याभिर्ध्वसन्तिंपुरुषन्तिमावतंताभिरूषुऊतिभिरश्विनागतम् २३ अप्नस्वतीमश्विनावाचमस्मेकृतंनोदस्रावृषणामनीषाम् । अद्यूत्येऽवसेनिह्वयेवां वृधेचनोभवतंवाजसातौ २४ द्युभिरक्तुभिःपरिपातमस्मानारिष्टेभिरश्विनासौभगेभिः । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः २५ ॥ ३७ ॥

इति शाकलर्क्संहितायां प्रथमाष्टके सप्तमोऽध्यायः ॥ ७ ॥

इदंविंशतिरुपस्यंद्वितीयोर्धर्चोरात्रेश्चेमाएकादशरौद्रंद्वित्रिष्टुबन्तंचित्रंपट्सौर्यनासत्याभ्यांपञ्चाधिका कक्षीवान्दैर्घतमसउशिक्प्रमूतआश्विनंत्वैमध्वआवामेकादशावांरथंदशजागतंकाराधद्द्वादशान्त्यादुः-स्वप्ननाशिन्याद्यागायत्रीद्वितीयाककुमतीयाचतुर्थ्यैका विराड्नटरूप्यौ पञ्चमीतनुशिरापष्ठ्यरैरुष्णिग्विष्टारबृहतीकृतिर्गिवराड्तिस्रोगायत्र्यःकादित्यापञ्चोनावैश्वदेवा ॥ ८ ॥

इदं विंशतिः कुत्स उपो द्वितीयार्धर्चस्य रात्रिश्च त्रिष्टुप् ।

११३ इदंश्रेष्ठंज्योतिषांज्योतिरागाच्चित्रःप्रकेतोअजनिष्टविभ्वा । यथाप्रसूतासवितुःसवायैएवारात्र्युपसेयोनिमारैक् १ दृशद्वत्सारुशंतीश्वेत्यागादारैगुकृष्णासदनान्यस्याः । समानबन्धूअमृतेअनूचीद्यावावर्णंचरतंआमिनाने २ समानोअध्वास्वस्रोरनन्तस्तमन्यान्यांचरतोदेवशिष्टे । नमेथेतेनतस्थतुःसुमेकेनक्षोपासासमनसाविरूपे ३ भास्वतीनेत्रीसूनृतानामचैतिचित्राविदुरोन

आवः । प्राप्र्याजगद्व्युनोरायोअख्यदुषाअजीगर्भुवनानिविश्वा४जिह्मश्येउचरि-
तवेमघोन्याभोगयइष्टयेरायउत्वम् । दभ्रंपश्यन्नुर्वियाविचक्षउषाअजीगर्भुवना
निविश्वा ५ ॥ १ ॥ क्षत्रायत्वंश्रवसेत्वंमहीयाइष्टयेत्वमर्थमिवत्वमित्यै ।
विसदृशाजीविताभिप्रचक्षउषाअजीगर्भुवनानिविश्वा ६ एषादिवोदुहिताप्र-
त्यदर्शिव्युच्छन्तीयुवतिःशुक्रवासाः । विश्वस्येशानापार्थिवस्यवस्वउषोअद्ये-
हसुभगेव्युच्छ ७ परायतीनामन्वेतिपाथआयतीनांप्रथमाशश्वतीनाम् । व्यु-
च्छन्तीजीवमुदीरयन्त्युषामृतंकंचनबोधयन्ती ८ उषोयदग्निंसमिधेचकर्थविं
यदावश्चक्षसासूर्यस्य । यन्मानुषान्युक्ष्यमाणाँअजीगस्तद्देवेषुचकृषेभद्रमप्नः ९
कियात्यायत्समयाभवातियान्युषुर्यश्चनूनंव्युच्छान् । अनुपूर्वाँःकृपतेवावशा-
नाप्रदीध्यानाजोषमन्याभिरेति १० ॥ २ ॥ ईयुष्टेयेपूर्वतरामपश्यन्व्युच्छ-

न्तीमुपसंमर्त्यासः । अस्माभिरूनुप्रतिचक्ष्याभूदोतेर्यन्तियेअपरीषुपश्यान् ११ यावयद्वेषाऋतपाऋतेजाःसुम्नावरीसूनृताईरयन्ती । सुमङ्गलीर्बिभ्रतीदेववीतिमिहायोषाःश्रेष्ठतमाव्युच्छ १२ शश्वत्पुरोषाव्युवासदेव्यथोअद्येदंव्यावोमघोनी । अथोव्युच्छादुत्तराँअनुद्यून्जरामृताचरतिस्वधाभिः १३ व्यूञ्जिभिर्दिवआतास्वद्यौदृपंकृण्वांनिर्णिजंदेव्यावः । प्रबोधयन्त्यरुणेभिरश्वैरोषायातिसुयुजारथेन १४ आवहन्तीपोष्यावार्याणिचित्रंकेतुंकृणुतेचेकितानाः । ईयुषीणामुपमाशश्वतीनांविभातीनांप्रथमोषाव्यश्वैत् १५ ॥ ३ ॥ उदीर्ध्वंजीवोअसुर्नआगादप्प्रागात्तमआज्योतिरेति । आरैक्पन्थांयातवेसूर्यायागन्मयत्रप्रतिरन्तआयुः १६ स्यूमनावाचउदियर्तिवह्निःस्तवानोरेभउषसोविभातीः ॥ अद्यातदुच्छगृणतेमघोन्यस्मेआयुर्निदिदीहिप्रजावत् १७ यागोमतीरुषसःसर्वी-

वीराव्युच्छन्तिदाशुषेमत्यीय । वायोरिवसूनृतानामुदर्कंताअश्वदाअभवत्सोम-
सुत्वा १८ मातादेवानामदितेरनीकंयज्ञस्यकेतुर्बृहतीविभाहि । प्रशस्तिकृद्र-
ह्मणेनोव्युच्छानोजनेजनयविश्ववारे १९ यज्ञित्रमप्नउपसोवहन्तीजानायं
शशमानायभद्रम् । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः
२० ॥ ४ ॥

इमा एकादश कुत्सो रुद्रो जगती । अन्त्ये त्रिष्टुभौ ।

११४ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः । यथाशमसद्द्वि-
पदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरम् १ मृळानोरुद्रोतनोमयस्कृधिक्षयद्वी-
रायनमसाविधेमते । यच्छंचयोश्चमनुरायेजोपितातदश्यामतवरुद्रप्रणीतिषु २
अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः । सुम्नायन्निहिशोअस्माक-

॥ ८८ ॥

माचरारिष्टवीराजुहवामतेहविः ३ त्वेपंवयंरुद्रंयज्ञसाधंवंकुंकविमवंसेनिह्वया-
महे । आरेअस्मद्दैव्यंहेळोअस्यतुसुमतिमिहयमस्यावृणीमहे ४ दिवोवरा-
हमरुषंकपर्दिनंत्वेषंरूपंनमसानिह्वयामहे । हस्तेबिभ्रद्भेषुजावायौंणिशर्मवर्मं
च्छर्दिरस्मभ्यंयंसत् ५ ॥ ५ ॥ इदंपित्रेमरुतांमुच्यतेवचःस्वादोःस्वादीयोरुद्राय
वर्धनम् । रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनायमृळ ६ मानो
महान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षितम् । मानोवधीःपितरंमोत
मातरंमानःप्रियास्तन्वोरुद्ररीरिषः ७ मानस्केतोतनयेमानआयौमानोगोषु
मानोअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तःसदमित्त्वाहवा-
महे ८ उपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे । भद्राहितेः
सुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहे ९ आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसु-

न्नमस्मेतेअस्तु । मृळाचनोअधिवक्षहिदेवाधाचनःशर्मयच्छाहिबर्हाः १० अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान् । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ११ ॥ ६ ॥

चित्रं पट् कुत्सः सूर्यास्त्रिष्टुप् ।

११५ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीअन्तरिक्षंसूर्यआत्माजगतस्तस्थुषश्च १ सूर्योदेवीमुषसंरोचमानांमर्योन योषांमभ्येतिपश्चात् । यत्रानरोदेवयन्तोयुगानिवितन्वतेप्रतिभद्रायभद्रम् २ भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः । नमस्यन्तोदिवआपृष्ठमस्थुःपरिद्यावापृथिवीयन्तिसद्यः ३ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्वितंततंसंजभार । यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ४ तन्मि-

त्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे । अनन्तमन्यद्दुशदस्यपाजः कृष्णमन्यद्धरितःसंभरन्ति ५ अद्यादेवाउदितासूर्यस्यनिरंहसःपिपृतानिरवद्यात् । तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ६ ॥ ७ ॥

इति शाकलर्क्संहितायां प्रथमे मण्डले षोडशोऽनुवाकः ॥ १६ ॥

नासत्याभ्यां पञ्चविंशतिः कक्षीवानश्विनौ त्रिष्टुप् ।

११६ नासत्याभ्यांबर्हिरिवप्रवृज्येस्तोमाँइयर्म्यभ्रियेववातः । यावभँगायविमदायजायांसेनाजुवान्यूहतूरथेन १ वीळुपत्मभिराशुहेमभिर्वादेवानांवाजयन्तिभिःशाशदाना । तद्रासभोनासत्यासहस्रमाजायमस्यप्रधनेजिगाय २ तुग्रोहभुज्युमश्विनोदमेघेरयिंनकश्चिन्ममृवाँअवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ३ त्रिरुक्षपस्त्रिरहातिव्रजद्भिर्नासत्याभुज्युमूहथुः

पतत्रैः । समुद्रस्यधन्वन्नार्द्रस्यपारेत्रिभिरथैःशतपद्भिःषळश्वैः ४ अनारम्भणे तदवीरयेथामनास्थानेअग्रभणेसमुद्रे । यदश्विनाऊहथुर्भुज्युमस्तंशतारित्रांना-वमातस्थिवांसम् ५ ॥ ८ ॥ यमश्विनाददथुःश्वेतमश्वमघाश्वायशश्वदित्स्वस्ति । तद्वांनरंमहिकीर्तेन्यंभूत्पैद्वोवाजीसदमिद्धव्योअर्यः ६ युवंनरास्तुवतेपज्रि-यायकक्षीवतेअरदतंपुरंध्विम् । कारोतराच्छफादश्वस्यवृष्णःशतंकुम्भाँअसिञ्च-तंसुरायाः ७ हिमेनाग्निंघ्रंसमवारयेथांपितुमतीमूर्जमस्माअधत्तम् । ऋर्वासे अत्रिमश्विनावनीतमुक्षिन्यथुःसर्वगणंस्वस्ति ८ परावतंनासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् । क्षरन्नापोनपायनायरायेसहस्रायतृष्यतेगोतमस्य ९ जुजु-रुषोनासत्योतवाविंप्रामुञ्चतंद्रापिमिवच्यवानात्। प्रातिरतंजहितस्यायुर्दस्रादित्प-तिमकृणुतंकनीनाम् १० ॥ ९ ॥ तद्वांनराशंस्यंराध्यंचाभिष्टिमन्नासत्यावरू-

॥ १० ॥

थम् । यद्विद्वांसांनिधिमिवापगूह्यमुद्दर्शतादूपथुर्वन्दनाय ११ तद्वांनरासनये
दंसउग्रमाविष्कृणोमितन्यतुर्नवृष्टिम् । दध्यङ्ह्यन्मध्वाथर्वणोवामश्वस्यशी-
र्ष्णाप्रयदीमुवाच १२ अजोहवीन्नासत्याकरावांमहेयार्मन्पुरुभुजापुरंधिः ।
श्रुतंतच्छासुरिववध्रिमत्याहिरण्यहस्तमश्विनावदत्तम् १३ आस्नोवृकस्यवर्ति-
कामभीकेयुवंनरानासत्यामुमुक्तम् । उतोकविंपुरुभुजायुवंहकृपमाणमकृणुतं
विचक्षे १४ चरित्रंहिवेरिवाच्छेदिपर्णमाजाखेलस्यपरितक्म्यायाम् १ सद्योज
ज्ञामायतीविशपलायैधनौहितेसतीवेप्रत्यधत्तम् १५ ॥ १० ॥ शतंमेषान्वृक्ये
चक्षदानमुज्राश्वंतंपितान्धंचकार । तस्माअक्षीनासत्याविचक्षआधत्तंदस्राभि-
यजावनुर्वन् १६ आवांरथंदुहितासूर्यस्यकाष्मैवातिष्ठदवंताजयन्ती । विश्वे
देवाअन्वमन्यन्तहृद्भिःसमुश्रियानासत्यासचेथे १७ यदयातंदिवोदासायवर्ति-

भरद्वाजायाश्विनाहयन्ता । रेवदुवाहसचनोरथोवांवृषभश्चांशुमारश्चयुक्ता १८
रयिंसुक्षत्रंस्वपत्यमायुःसुवीर्यंनासत्यावहन्ता । आजह्नावींसमनसोपवाजैस्त्रि-
रह्नोभागंदधतीमयातम् १९ परिविष्टंजाहुषंविश्वतःसीसुगेभिर्नक्तंमूहथूरजोभिः।
विभिन्दुनानासत्यारथेनविपर्वताँअजरयूअयातम् २० ॥ ११ ॥ एकस्यावः
स्तोरावतंरणायुवशंमश्विनासनयेसहस्रा । निरहतंदुच्छुनाइन्द्रवन्तापृथुश्रवसो
वृषणावरातीः २१ शरस्यचिदार्चत्कस्यावतादानीचादुच्चाचक्रथुःपातवेवाः ।
शयवेचिन्नासत्याशशीभिर्जसुरयेस्तयेपिप्यथुर्गाम् २२ अवस्यतेस्तुवतेकृष्णि-
यायऋजूयतेनासत्याशचीभिः।पशुंननष्टमिवदर्शनायविष्णाप्वंददथुर्विश्वकाय
२३ दशरात्रीरशिवेनानवद्यूनवंनद्धंभयितमप्स्वन्तः । विप्रुतंरेभमुदनिप्रवृक्त ॥ ९१ ॥

मुत्रिन्यथुःसोमंमिवस्तुवेण २४ प्रवांदंसांस्यश्विनाववोचमस्यपतिःस्यांसुगवः सुवीरः । उतपश्यन्नभुवन्दीर्घमायुरस्तंमिवेज्जरिमाणंजगम्याम् २५ ॥ १२ ॥

मध्वः पञ्चविंशतिः कक्षीवानश्विनौ त्रिष्टुप् ।

११७ मध्वःसोमस्याश्विनामदायप्रत्नोहोतार्विवासतेवाम् । बर्हिष्मतीरा-तिविश्रिताघीरिषायांतंनासत्योपवाजैः १ योवांमश्विनामनसोजवीयान्रथःस्व-श्वोविशआजिगाति । येनगच्छथःसुकृतोदुरोणंतेनंनरावर्तिरस्मभ्यंयातम् २ ऋपिंनरावंहसःपाञ्चजन्यमवीसादत्रिंमुञ्चथोगणेन । मिनन्तादस्योरशिवस्यमा-याअनुपूर्वंवृषणाचोदयन्ता ३ अश्वंनगूळ्हमश्विनादुरेवैर्ऋपिंनरावृषणारेभमप्सु । संतरिणीथोविप्रुतंदंसोभिर्नवांजूर्यन्तिपूर्व्याकृतानि ४ सुषुप्वांसंननिर्ऋतेरुप-स्थेसूर्यंनदस्रातमसिक्षियन्तम् । शुभेरुक्मंनदर्शतंनिखात्मुदूपथुरश्विनावन्द-

नाय ५ ॥ १३ ॥ तद्वांनराशंस्यंपज्रियेणंकक्षीवंतानासत्यापरिंज्मन् । गुफा-
दश्वस्यवाजिनोजनायशतंकुम्भाँअसिञ्चतंमधूनाम् ६ युवंनरास्तुवतेकृष्णियाय
विष्णाप्वंददथुर्विश्वकाय । घोषायैचित्पितृषदेदुरोणेपतिंजूर्यन्त्याअश्विनाव-
वत्तम् ७ युवंश्यावायरुशतीमदत्तंमहःक्षोणस्याश्विनाकण्वाय । प्रवाच्यंतद्वृष-
णाकृतंवांयन्नार्षदायश्रवोअध्यधत्तम् ८ पुरूवपींस्यश्विनादधानानिषेदवंऊहथु-
राशुमश्वम् । सहस्रसांवाजिनमप्रतीतमहिहनंश्रवस्यं१तरुत्रम् ९ एतानिवां
श्रवस्यासुदानूब्रह्माकृण्वंसदंनरोदस्योः । यद्वांपज्रासोअश्विनाहवन्तेयातमिषा-
चंविदुषेचवाजम् १० ॥ १४ ॥ सूनोर्मानेनाश्विनागृणानावाजंविप्रायभुर-
णारदन्ता । अगस्त्येब्रह्मणावावृधानासंविश्पलांनासत्यारिणीतम् ११ कुहया-
न्तासुष्टुतिंकाव्यस्यदिवोनपातावृषणाशयुत्रा । हिरण्यस्येवकलशंनिखातमुदूं

पयुर्दशमेअश्विनाहन् १२ युवंच्यवानमश्विनाजरन्तंपुनर्युवानंचक्रथुःशचीभिः। युवोरथंदुहितासूर्यस्यसहश्रियानांसत्यावृणीत १३ युवंतुग्रायपूव्यैभिरेवैः पुनर्मन्यावंभवतंयुवाना । युवंभुज्युमर्णसोनिःसमुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः १४ अजोहवीदश्विनातौग्र्योवांप्रोळ्हःसमुद्रमव्यथिर्जगन्वान् । निष्टमूहथुःसुयुजारथेनमनोजवसावृषणास्वस्ति १५ ॥ १५ ॥ अजोहवीदश्विनावर्तिकावामास्रोयत्सीममुञ्चतंवृकस्य । विजयुपायययुःसान्वद्रेर्जातंविष्वाचोअहतंविषेण १६ शतंमेषान्वृक्येमामहानंतमःप्रणीतमशिवेनपित्रा। आक्षीक्रज्राश्वैअश्विनावधत्तंज्योतिरन्धायचक्रथुर्विचक्षे १७ शुनमन्धायभरमह्वयत्सावृकीरश्विनावृषणानरेति । जारःकनीनइवचक्षदानऋज्राश्वःशतमेकंचमेषान् १८ महीवांमूतिरश्विनामयोभूरुतस्रामंधिष्यासंरिणीथः । अथायुवामिदह्वयत्पुरंधिरागच्छतंसींवृष

णावयोभिः १९ अधेनुंदस्रास्तुर्याय विप्लुषामपिन्वतंगयवेअश्विनागाम् । युवं शचीभिर्विमदायजायान्यूहथुःपुरुमित्रस्ययोषाम् २० ॥ १६ ॥ यवंवृकेणाश्विनावपन्तेपंदुहन्तामनुपायदस्रा । अभिदस्युंबकुरेणाधमन्तोरुज्योतिश्चक्रथुरार्याय २१ आथर्वणायाश्विनादधीचेऽश्व्यंशिरःप्रत्यैरयतम् । सवांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रावपिकक्ष्यंवाम् २२ सदाकवीसुमतिमाचकेवांविश्वाधियोअश्विनाप्रावतंमे । अस्मेरयिंनासत्यावृहन्तंमपत्युसाचंश्रुत्यैरराथाम् २३ हिरण्यहस्तमश्विनारराणापुत्रंनरावध्रिमत्याअदत्तम् । त्रिधाहृश्यावमश्विनाविकस्तमुज्जीवसेऽरयतंसुदानू २४ एतानिवामश्विनावीर्याणिप्रपूर्व्याण्यायवोऽवोचन् । ब्रह्मकृण्वन्तोवृषणायुवभ्यांसुवीरासोविदथमावदेम २५ ॥ १७ ॥

११८ आवांरथौअश्विनाश्येनपत्वासुमृळीकःस्ववाँयात्वर्वाङ् । योमर्त्यस्य मनसोजवीयान्त्रिवन्धुरोवृषणावातरंहाः १ त्रिवन्धुरेणत्रिवृतारथेनत्रिचक्रेण सुवृतायातमर्वाक् । पिन्वतंगाजिन्वतमवँतोनोवर्धयतमश्विनावीरमस्मे २ प्रवद्यामनासुवृतारथेनदस्त्राविमंशृणुतंश्लोकमद्रेः । किमङ्गवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासोअश्विनापुराजाः ३ आवांश्येनासोअश्विनावहन्तुरथेयुक्तासंआशवः पतङ्गः । येअप्तुरोदिव्यासोनगृध्राअभिप्रयोनासत्यावहन्ति ४ आवांरथंयुवतिस्तिष्ठदत्रंजुष्टीनरादुहितासूर्यस्य । परिवामश्वावपुषःपतङ्गवयोवहन्त्वरुषाअभीके ५ ॥ १८ ॥ उद्वन्दनमैरतंदंसनाभिरुद्रेभंदस्रावृषणाशचीभिः । निष्टौग्र्यंपारयथःसमुद्रात्पुनश्च्यवानंचक्रथुर्युवानम् ६ युवमत्रये ऽवनीतायतप्त-

मूर्जमोमानंमश्विनावधत्तम् । युवंकण्वायापिरिप्तायचक्षुःप्रत्यधत्तंसुष्टुतिंजु-
जुषाणा ७ युवंधेनुंशयवेनाधितायापिन्वतमश्विनापूर्व्याय । अमुञ्चतंवर्तिकामं-
हसोनिःप्रतिजङ्घांविश्पलायाअधत्तम् ८ युवंश्वेतंपेदवइन्द्रंजूतमहिहनंमश्विना
दत्तमश्वंम् । जोहूत्रंमयोअभिभूतिमुग्रंसहस्रसांवृषणंवीडुवङ्गम् ९ तावांनरास्ववं-
सेसुजाताहवामहेअश्विनानाधमानाः । आनउपवसुमतारथेनगिरोजुषाणासु-
वितायंयातम् १० आश्येनस्यजवसानूतनेनास्मेयातंनासत्यासुजोषाः । हवेहि
वांमश्विनारातहव्यःशश्वत्तमायाउषसोव्युष्टौ ११ ॥ ११ ॥

आवां रथं दश कक्षीवानाश्विनौ जगती ।

११ आवांरथंपुरुमायंमंतोजुवंजीराश्वंयाञ्जियंजीवसेहुवे । सहस्रंकेतुंव-
निनंशतद्वसुंश्रुष्टीवानंवरिवोधामभिप्रयं: १ ऊर्ध्वाधीतिःप्रत्यस्यप्रयांमन्यधा-

यिशस्मन्तसमयन्तआदिशः । स्वदामिघर्मंप्रतियन्त्यूतयआवांमूर्जानीरथंमश्विनारुहत् २ संयन्मिथःपस्पृधानासोअग्मतशुभेमखाअमिताजायवोरणे । युवोरहप्रवणेचेकितेरथोयदश्विनावहथःसूरिमावरम् ३ युवंभुज्युंभुरमाणंविभिर्गतं स्वयुक्तिभिर्निवहन्तापितृभ्यआ । यासिष्टंवर्तिर्वृषणाविजेन्यं ४ दिवोदासायमहिचेतिवामवः ४ युवोरश्विनावपुंषेयुवायुजंरथंवाणीयेमतुरस्यशर्ध्यम् । आवांपतित्वंसख्यायजग्मुषीयोषावृणीतजेन्यायुवांपती ५ ॥ २० ॥ युवंरेभंपरिषूतेरुरुष्यथोहिमेनघर्मंपरितप्तमत्रये । युवंशयोरवसंपिप्यथुर्गविप्रदीर्घेणवन्दनस्तार्यायुवा ६ युवंवन्दनंनिर्ऋतंजरण्ययारथंनदस्राकरणासमिन्वथः । क्षेत्रादाविप्रंजनथोविपन्ययाप्रवामत्रीविधतेदंसनाभुवत् ७ अगच्छतंकृपमाणंपरावतिं पितुःस्वस्त्यजसानिबाधितम् । स्वर्वतीरितऊतीर्युवोरहचित्राअभीकेअभव-

न्नभिष्टयः ८ उतस्यावांमधुमन्माक्षिकारपन्मदेसोमस्यौशिजोहुवन्यति । युवं दधीचोमनआविवास्थोऽथाशिरःप्रतिवामश्व्यंवदत् ९ युवंपेदवेपुरुवारमश्वि-नास्पृधांश्वेतंतरुतारंदुवस्यथः । शर्यैरभिद्युंपृतनासुदुष्टरंचर्कृत्यमिन्द्रंमिवचर्प-णीसहंम् १० ॥ २१ ॥

का राधद्द्वादश कक्षीवानश्विनौ । आद्या गायत्री । द्वितीया ककुप् । तृतीया काविराड् । चतुर्थी नष्टरूपी । पञ्चमी तनुशिरा । षष्ठ्यक्षरैरुष्णिक् । सप्तमी विष्टारपंक्तिः । अष्टमी कृतिः । नवमी विराड् । ततस्तिस्रो गायत्र्यः ।

१२० कारांधऊत्रांश्विनावांकोवांजोपंउभयोः । कुथाविंधात्यप्रचेताः १ विद्वांसाविदुरंःपृच्छेदविद्वानित्थापरोअचेताः । नूचिन्नुमर्तेअक्रौ २ ताविद्वांसा हवामहेवांतानोविद्वांसामन्मवोचेतमद्य । प्रार्चद्दयमानोयुवाकुः ३ विपृच्छा-

मिपाक्या३ नदेवान्वपद्कृतस्याद्भुतस्यंदस्रा । पातंचसह्यंसोयुवंचरम्यंसोनः ४ प्रयाघोपेभृगवाणेनशोभेययांवाचायजंतिपाज्रियोवाम् । प्रैषयुर्नविद्वान् ५॥२२॥ श्रुतंगायत्रंतकवानस्याहंचिद्धिरिरेभाश्विनावाम् । आक्षीशुभस्पतीदन् ६ युवं ह्यास्तंमहोरन्युवंवायद्गिरतंसतम्।तानोवसूसुगोपास्यांतंपातंनोवृकादघायोः ७ माकस्मैधातमभ्यमित्रिणेनोमाकुत्रानोगृहेभ्योधेनवोगुः । स्तुनाभुजोअशिश्वीः ८ दुह्रीयन्मित्रधितयेयुवाकुरायेचनोमिमीतंवाजवत्यै । इषेचनोमिमीतं धेनुमत्यै ९ अश्विनोरसनंरथंमनश्वंवाजिनींवतोः । तेनाहंभूरिंचाकन १० अयंसंमहमातनूह्यातेजनाँअनु । सोमपेयंसुखोरथः ११ अधस्वप्नस्यनिर्विदेऽभुंजतश्चरेवतेः । उभातावस्रिनश्यतः १२ ॥ २३ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डले सप्तदशोऽनुवाकः ॥ १७ ॥

कदित्था पञ्चदश कक्षीवान्विश्वेदेवा इन्द्रो वा त्रिष्टुप् ।

१२१ कदित्थानॄंःपात्रंदेवयुतांश्रवद्गिरोअङ्गिरसांतुरण्यन् । प्रयदानड्विंशआ
हर्म्यस्योरुकंसतेअध्वरेयजत्रः १ स्तम्भींद्द्यांसधुरुणंप्रुषायद्बृहद्भुवांजांयुद्रविणं
नरोगोः । अनुस्वजांमंहिष्ठश्चक्षतव्रांमेनामश्वस्यपरिंमातरंगोः २ नक्षद्धवंमरु-
णीःपर्व्यराट्तुरोविशामाङ्गिरसामनुयून् । तक्षद्वज्रंनियुतंतस्तम्भद्द्यांचतुष्पदेन-
यांयद्विपादे ३ अस्यमदेस्वर्यंदाऋतायापींवृतमुस्रियाणामनींकम् । यद्धप्रसर्गं
त्रिकुकुन्निवर्तदपद्रुहोमानुषस्यदुरोवः ४ तुभ्यंपयोयत्पितरावनीतांरायःसुरेत-
स्तुरणेभुरण्यू । शुचियत्तेरेकणआयजन्तसबर्दुघायाःपयउस्रियायाः ५ ॥ २४ ॥
अधप्रजज्ञेतरणिर्ममत्तुप्ररोच्यस्याउपसोनसूरः । इन्दुर्यभिराष्ट्रस्वेदुहव्यैःस्रुवेण
सिञ्चञ्जरणाभिधामं ६ स्विध्मायद्वनधितिरपस्यात्सूरोअध्वरेपरिरोधनागोः ।

यद्वंप्रभासिकृत्व्याँअनुद्यूनन्विशेपश्विपेतुरार्य ७ अष्टामहोदिवआदोहरींइहद्युम्नासाहंमभियोधानउत्सम्। हरियत्तेमन्दिनंदुक्षन्वृधेगोरभस्मद्रिभिर्वीताप्यम् ८ त्वमायसंप्रतिवर्तयोगोर्दिवोअश्मानमुपनीतमृभ्वा। कुत्सायुयत्रपुरुहूतवन्वञ्छुष्णंमनुन्तैःपरियासिवधैः ९ पुरायत्सूरस्तमसोअपीतेस्तमद्रिवःफलिगंहेतिमस्य। शुष्णस्यचित्परिहितंयदोजोदिवस्परिसुग्रथितंतदादेः १०॥२५॥ अनुत्वामहीपाजसीअचक्रेद्यावाक्षामामदतामिन्द्रकर्मन्। त्वंवृत्रमाशयानंसिरासुमहोवज्रेणसिष्वपोवराहुम् ११ त्वमिन्द्रनर्योयाँअवोनृन्तिष्ठावातंस्यसुयुजोवहिष्ठान्। यंतेकाव्यउशनामन्दिनंदाद्वृत्रहणंपायंततक्षवज्रम् १२ त्वंसूरोहरितोरामयोनून्भरच्चक्रमेतशोनायमिन्द्र। प्रास्यपारंनवतिंनाव्यानामपिकर्तमवर्तयोऽयज्यून् १३ त्वंनोअस्याइन्द्रदुर्हणायाःपाहिवज्रिवोदुरितादभीके। प्रनोवाजान्रथ्यो ३

अश्वंवुध्यान्नियेयन्त्विश्रवंसेसूनृतायै १४ मासातेअस्मत्सुमतिर्विदत्सहाजंप्रमहः
सामिषोवरन्त । आनोभजमघवन्गोष्वर्योमंहिष्ठास्तेसधमादःस्याम १५॥२६॥
इति शाकलसंहितायां प्रथमाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥ इति प्रथमाष्टक समाप्तः ॥ १ ॥

मवोवैश्वदेवमावोविराडूपेपृथुःसप्तोनोपस्यंतूपाउच्छन्तीमातारत्नंसप्तस्वनयस्यदानस्तुतिरुपजगत्या-
वमन्दानितिकक्षीवान्दानतुष्टःपञ्चभिर्भावयव्यंतुष्टावान्त्येअनुष्टुभौभावयव्यरोमशयोर्दम्पत्योःसंवादो-
ऽग्निमेकादशपरुच्छेपोदैवोदासिराग्नेयंतुपारुच्छेपंसर्वमासप्टंतत्रातिधृतिःषष्ठ्यर्यंजायताष्टौयंत्वमेकाद-
शषष्ठ्यैन्दवीमभावोतिशक्वर्यावष्टिरन्त्यैन्द्र्याहिदशान्त्यात्रिष्टुबिन्द्रायसप्तत्वयावयंपडभ्युवंतमैन्द्रापार्वतो
र्धर्चउभेसप्तादौत्रिष्टुप्तिस्रोऽनुष्टुभोगायत्रीधृतिरष्टिरात्वापड्ढायव्यंत्वन्साष्टिस्तीर्णनवचतुर्थ्याद्याःपञ्चै-
न्द्र्यश्चोपान्त्येअष्टीप्रसुसप्तमैत्रावरुणंत्वन्त्येलिङ्गोक्तदेवतेअन्त्यात्रिष्टुप् ॥ ९ ॥

मवः पञ्चदश कक्षीवान्विश्वेदेवास्त्रिष्टुप् ।

१२२ ॐम् प्रवःपान्तंरघुमन्यवोऽन्धोंयज्ञंरुद्रायंमीळ्हुषेभरध्वम् । दिवोअस्तो-
ष्यसुंरस्यवीरैरिंपुध्येवंमरुतोरोदस्योः १ पत्नींवपूर्वहूंतिंवावृधध्यांउपासानक्तांपुरु-
धाविदानें । स्तरीर्नात्किंव्युतंवसानासूर्यंस्याश्रियासुदृशीहिरण्यैः २ ममत्तुंनःपरिं-

ज्मावसुर्हमिमत्तुवातोअपांवृषण्वान्। शिशीतमिन्द्रापर्वतायुवंनुस्तन्नोविश्वेवरि-
वस्यन्तुदेवाः ३ उतत्यामेयुशसाश्वेतनायैव्यन्तापान्तौशिजोहुवध्यै। प्रवोनपा-
तमपांकृणुध्वंप्रमातरारास्पिनस्यायोः ४ आवोरुव्युमौशिजोहुवध्यैघोषेवंशंस-
मजुनस्यनंशे। प्रवःपूष्णेदावनेआँअच्छावोचेयवसुतातिमग्नेः ५॥१॥ श्रुतंमेमि-
त्रावरुणाहवेमोतश्रुतंसदनेविश्वतःसीम्। श्रोतुनःश्रोतुरातिःसुश्रोतुःसुक्षेत्रासि-
न्धुरद्रिः ६ स्तुषेसावांवरुणमित्ररातिर्गवांशतापृक्षयामेषुपज्रे। श्रुतरथेप्रियरथेद-
धानाःसद्यःपुष्टिंनिरुन्धानासौअग्मन् ७ अस्यस्तुषेमहिमघस्यराधःसचासनेम
नहुषःसुवीराः। जनोयःपज्रेभ्योवाजिनीवानश्वावतोरथिनोमह्यसरिः८जनोयो
मित्रावरुणावभिद्रुगुपोनवासुनोत्यक्ष्णयाधुक्। स्वयंसयक्ष्महृदयेनिधत्तआपय-
दीहोत्राभिर्ऋतावा ९ सत्राधतोनहुषोदंसुजूतःशर्धस्तरोनराङ्मर्तश्रवाः। विसृष्ट-

रातिर्यातिवाङ्कसृत्वाविश्वांसुपुत्सुसदमिच्छूरः १०॥२॥अधुग्मन्तानहुषोहवंसूरेः श्रोतांराजानोअमृतस्यमन्द्राः । नभोजुवोयन्निरवस्यराधःप्रशंस्तयेमहिनारथं-वते ११ एतंशंधांमयस्यंसूरेरित्यंवोचन्दशतयस्यनंशे । द्युम्नानियेपुवसुतांतीरारन्विश्वेसन्वन्तुप्रभृथेपुवाजम् १२ मन्दामहेदशतयस्यधासेर्द्वियत्पञ्चविभ्रतोयन्त्यन्ना। किमिष्टाश्वंइष्टरश्मिरेतइँगानासुस्तरुपक्रजतेनॄन् १३ हिरण्यकर्णमणि-ग्रीवमर्णस्तन्नोविश्वेवरिवस्यन्तुदेवाः । अर्योगिरःसद्यआजग्मुरीरोस्राश्वांकन्तू-भयेष्वस्मे १४ चत्वारोमामशृशारस्यविश्वस्त्रयोराजआर्यवसस्यजिष्णोः । रथोवांमित्रावरुणादीर्घाप्साःस्यूमंगभस्तिःसूरोनाद्यौत् १५ ॥ ३ ॥

पृथुस्रपोदश कक्षीवानुपास्त्रिष्टुप् ।

१२३ पृथूरथोदक्षिणायाअयोज्यैनंदेवासोअमृतासोअस्थुः । कृष्णादुदस्थाद-

र्या३ विहायाश्चिकित्सन्तीमानुपायक्षयाय १ पूर्वाविश्वस्माद्भुवनादबोधिजयन्ती वाजेबृहतीसनुत्री। उच्चाव्यख्यद्युवतिःपुनर्भूरोषाअगन्प्रथमापूर्वहूतौ २यदद्यभागं विभजासिनृभ्यउपोदेविमर्त्यत्रासुजाते । देवोनोअत्रसावितादमूनाअनागसो वोचतिसूर्याय ३ गृहंगृहमहनायात्यच्छादिवेदिवेअधिनामादधाना । सिषा-सन्तीद्योतनाशश्वदागादग्रंमग्रमिद्भजतेवसूनाम् ४ भगस्यस्वसावरुणस्यजा-मिरुषःसूनृतेप्रथमाजरस्व । प्रश्वासदघ्यायोअघस्यधाताजयेमतंदक्षिणयारथेन ५ ॥ ४ ॥ उदीरतांसूनृताउत्पुरन्धीरुद्नयंःशुशुचानासोअस्थुः । स्पार्हावसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसोविभातीः ६ अपान्यदेत्यभ्यं१न्यदेतिविषुरूपेअ-हनीसंचरेते । परिक्षितोस्तमोअन्यागुहाकरद्यौदुषाःशोशुचतारथेन ७ सदृ-शीरद्यसदृशीरिदुश्वोदीर्घंसचन्तेवरुणस्यधाम । अनवद्यास्त्रिंशतंयोजनान्येकै- ॥ २ ॥

काक्रतुंपरियन्तिसद्यः ८ जानत्यह्नःप्रथमस्यनामंशुक्राकृष्णादंजनिष्टश्वितीची ।
ऋतस्ययोषानमिनातिधामाहरहर्निष्कृतमाचरन्ती १ कन्येवतन्वा शं शाशदानाँ
एषिदेविदेवमियक्षमाणम् । संस्मयमानायुवतिःपुरस्तादाविर्वक्षाँसिकृणुपेवि-
भाती १० ॥ ५ ॥ सुसंकाशामातृमृष्टेवयोषाविस्तन्वंकृणुपेदृशेकम् ।
भद्रात्वमुषोवितरंव्युच्छनतत्तेअन्याउषसोनशन्त ११ अश्वावतीर्गोमतीर्विश्व-
वारायतमानारश्मिभिःसूर्यस्य । पराचयन्तिपुनराचयन्तिभद्रानामवहमानाउ-
षासः १२ ऋतस्यरश्मिमनुयच्छमानाभद्रंभद्रंक्रतुमस्मासुधेहि । उषोनोअद्य
सुहवाव्युच्छास्मासुरायोमघवत्सुचस्युः १३ ॥ ६ ॥

उषा उच्छन्ती त्रयोदश कक्षीवानुषास्त्रिष्टुप् ।

१२४ उषाउच्छन्तीसमिधानेअग्नाउद्यन्त्सूर्यउर्विंयाज्योतिरश्रेत् । देवोनो

अत्रंसवितान्वर्थंप्रासावीद्विपत्प्रचतुष्पदित्यै १ अमिंनतीदैव्यानिव्रतानिंप्रमि-
नतीमनुष्यायुगानिं । ईयुषींणामुपमाशश्वतीनामायतीनांप्रथमोपाव्यौत् २
एषादिवोदुंहिताप्रत्यदर्शिज्योतिर्वसानासमनापुरस्तात् । ऋतस्यपन्थामन्वेति
साधुप्रजानतीवनदिशोंमिनाति ३ उषोंअदर्शिशुन्ध्युवोनवक्षोंनोघाइवाविरकृ-
तम्रियाणिं । अश्वसन्नसंस्तोवोधयन्तीशश्वत्तमागात्पुनरेयुषींणाम् ४ पूर्वेअर्धे
रजंसोअस्यस्यगवांजनित्र्यकृतप्रकेतुम् । व्युंप्रथतेवितरंवरीयुओभापृणन्तींपि-
त्रोरुपस्था ५ ॥ ७ ॥ एवेदेषापुरुतमाद्दृशेकंनाजामिंनपरिवृणक्तिजामिम् ।
अरेपसांतुन्वा३शाशदानानाभादीपतेनमहोविभाती ६ अभ्रातेवपुंसएतिप्रतीची
गर्तारुगिवसनयेधनांनाम्।जायेवपत्यउशतीसुवासाउपाहस्रेवनिरिणीतेअप्सः७
स्वसास्वस्रेज्यायस्यैयोनिमारैगपैत्यस्याःप्रतिचक्ष्येव । व्युच्छन्तीरश्मिभिःसू-

यँस्याऽअयँऽइसमनगाइवव्राः ८ आसांपूर्वाँसामहसुस्वसॄणामपरापूर्वाम्भ्यँतिप-
श्चात् । ताःप्रत्नवन्नव्यसीर्नूनमस्मेरेवदुच्छन्तुसुदिनाऽउषासः ९ प्रबोधयोषः
पृणतोमघोन्यबुध्यमानाःपणयःससन्तु । रेवदुच्छमघवद्भ्योमघोनिरेवत्स्तोत्रे
सूनृतेजारयन्ती १० ॥ ८ ॥ अवेयमश्वैद्युवतिःपुरस्ताद्युङ्क्तेगवामरुणानाम-
नीकम् । विनूनमुच्छादसतिप्रकेतुर्गृहंगृहमुपतिष्ठातेअग्निः ११ उत्तेवयश्चि-
द्वसतेरपप्तन्नरश्चयेपतुभाजोव्युष्टौ । अमासतेवहसिभूरिवाममुषोदोविदाशुषेम-
र्त्याय १२ अस्तोढ्वंस्तोम्याब्रह्मणामेऽवीवृधध्वमुशतीरुपासः । युष्माकंदेवीरव-
सासनेमसहस्रिणंचशतिनंचवाजम् १३ ॥ ९ ॥

मातारत्नं सप्त कक्षीवान्दानं त्रिष्टुप्। चतुर्थीपञ्चम्यौ जगत्यौ।

१२५ मातारत्नंपातुरित्वादघातितंचिकित्वान्प्रतिगृह्यानिधत्ते । तेनप्रजांव-

धयंमानआयूरायस्योपेणसचतेसुवीरः १ सुगुरंसत्सुहिरण्यःस्वश्वोवृहदस्मैवयइन्द्रोदधाति । यस्त्वायन्तंवसुनाप्रातरित्वोमुक्षीजयेवपादिमुत्सिनाति २ आयंमद्यसुकृतंप्रातरिच्छान्निष्टःपुत्रंवसुमतारथेन । अंशोःसुतंपाययमत्सरस्यंक्षयद्वीरंवर्धयसूनृताभिः ३ उपक्षरन्तिसिन्धवोमयोभुवईजानंचयक्ष्यमाणंचधेनवः । पृणन्तंचपपुरिंचश्रवस्यवोघृतस्यधाराउपयन्तिविश्वतः ४ नाकस्यपृष्ठेअधितिष्ठतिश्रितोयःपृणातिसहदेवेषुगच्छति । तस्माआपोघृतमर्षन्तिसिन्धवस्तस्माइयंदक्षिणापिन्वतेसदा ५ दक्षिणावतामिदिमानिचित्रादक्षिणावतांदिविसूर्यासः । दक्षिणावन्तोअमृतंभजन्तेदक्षिणावन्तःप्रतिरन्तआयुः ६ मापृणन्तोदुरितमेनआरन्माजांरिपुःसूरयःसुव्रतासः । अन्यस्तेपांपरिधिरस्तुकश्चिदपृणन्तमभिसंयन्तुशोकाः ७ ॥ १० ॥

मन्दान्सप्त कक्षीवान्भानयव्यास्त्रिष्टुप्पङ्क्तीसप्तम्योर्भावयव्यरोमशोसप्तम्या रोमशाऽन्त्ये अनुष्टुभौ ।

१२६ अर्मन्दान्स्तोमान्प्रभरेमनीषासिन्धावविंक्षियतोभाव्यस्य । योमैसह-स्रममिमीतसवानतूर्तोराजाश्वंइच्छमानः १ शतंराज्ञोनाधमानस्यनिष्का-ञ्छतमश्वान्प्रयतान्सद्यआदम् । शतंकक्षीवाँअसुरस्यगोनांदिविश्रवोऽजरमा ततान २ उपमाश्यावाःस्वनयेनदत्तावधूमन्तोदशरथासोअस्थुः । पृष्टिःसहस्र-मनुगव्यमागात्सनत्कक्षीवाँआभिपित्वेअक्षाम् ३ चत्वारिंशद्दशरथस्यशोणाः सहस्रस्याग्रेश्रेणिंनयन्ति । मदच्युतःकुशनावतोअत्यान्कक्षीवन्तउदमृक्षन्त पज्राः ४ पूर्वामनुप्रयतिमादंदेवस्त्रीन्युक्ताँअष्टावरिधायसोगाः । सुबन्धवो येविश्याइवात्राअनस्वन्तःश्रवऐषन्तपज्राः ५ आगंधितापरिगधितायाकंशीकेव जर्भरहे । तदातिमह्यंयादुरीयाशूनांभोज्याशता ६ उपोपमेपरामृशमामेद-

भ्राणिंमन्यथाः । सर्वाहमस्मिरोमशागन्धारीणामिवाविका ७ ॥ ११ ॥ इति शाकलर्क्संहितायां प्रथमे मण्डलेऽष्टादशोऽनुवाकः ॥ १८ ॥

अग्निमेकादश परुच्छेपोऽग्निरत्यष्टिः षष्ठ्यतिधृतिः ।

१२७ अग्निंहोतारंमन्येदास्वन्तंवसुंसूनुंसहसोजातवेदसंविप्रंनजातवेदसम् । यऊर्ध्वयास्वध्वरोदेवोदेवाच्याकृपा । घृतस्यविभ्राष्टिमनुवष्टिशोचिषाजुह्वानस्य सर्पिषः १ यजिष्ठंत्वायजमानाहुवेमज्येष्ठमङ्गिरसांविप्रमन्मभिर्विप्रेभिःशुक्रमन्मभिः।परिज्मानमिवद्यांहोतारंचर्षणीनाम्।शोचिष्केशंवृषणंयमिमाविशःप्रावन्तुजूतयेविशः२सहिपुरूचिदोजसाविरुक्मतादीद्यानोभवतिद्रुहन्तरःपरशुर्नद्रुहन्तरः।वीळुचिद्यस्यसमृतौश्रुवद्वनेवयास्थिरम् । निष्षहमाणोयमतेनायतेघन्वासहानायते ३ दृळ्हाचिदस्माअनुदुर्यथाविदेतेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नयेदा-

ष्टयवसे । प्रयःपुरूणिगाहतेतक्षद्वनेवशोचिषा । स्थिराचिदन्त्रानिरिणात्योजसा निस्थिराणिचिदोजसा ४ तमस्यपृक्षमुपरासुधीनहिनक्रंयःसुदशीतरोदिवा-तरादप्रायुपेदिवातरात् । आदस्यायुर्प्रभणवहीळुशर्मनसूनवे । भक्तमभक्तमवो व्यन्तोअजरांअग्नयोव्यन्तोअजराः ५ ॥ १२ ॥ सहिशर्धोनमारुतंतुविष्वणि-रप्नस्वतीपूर्वरास्विष्टनिरातीनास्विष्टनिः । आदद्भव्यान्यादिर्यज्ञस्यकेतुरर्हणा अधस्मास्यहपैतोहर्यतोविश्वेजुपन्तपन्थांनरःशुभेनपन्थाम् ६ हितायदीकी-स्तसोअभिर्यवोनमस्यन्तउपवोचन्तभृगवोमन्तोदाशाभृगवः । अग्निरीशे वसूनांशुचिर्योधर्णिरेषाम् । प्रियाँआपिधँविनिषीष्टमेधिरआवनिषीष्टमेधिरः ७ विश्वासांत्वाविशांपतिंहवामहेसर्वासांसमानंदम्पतिंभुजेसत्यगिर्वाहसंभुजे। अ-तिथिंमानुषाणांपितुर्नयस्यासया । अमीचविश्वेअमृतासआवयोहव्यादेवेष्वा

वयः ८ त्वमग्नेसहसासहन्तमःशुष्मिन्तमोजायसेदेवतातयेरयिर्नदेवतातये । शुष्मिन्तमोहितेमदोद्युम्निन्तमउतक्रतुः । अधस्मातेपरिचरन्त्यजरश्रुष्टीवानो नाजर ९ प्रवोमहेसहसासहस्वतउपस्तुषेपशुषेनाग्नयेस्तोमोवभूत्वग्नये । प्रति यदीहविष्मान्विश्वासुक्षासुजोगुवे । अग्नेरभोनजरतऋणांजूर्णिर्होतऋणाम् १० सनोनेदिष्ठंदहशानआभराग्नेदेवेभिःसचनाःसुचेतुनामहोरायःसुचेतुना । महिंशविष्ठनस्कधिसंचक्षेभुजेअस्यै । महिस्तोतृभ्योमघवन्त्सुवीर्यंमथीरुग्रो नशवसा ११ ॥ १३ ॥

अयं जायताष्टौ परुच्छेपोऽग्निरत्यष्टिः ।

१२८ अयंजायतमनुपोधरीमाणिहोतायजिष्ठउशिजामनुव्रतमग्निःस्वमनु व्रतम् । विश्वश्रुष्टिःसखीयतेरयिरिवश्रवस्यते । अदब्धोहोतानिषददिळस्पदे ॥ ६ ॥

परिवीतइळस्पदे १ तंयज्ञसाधमपिवातयामस्यृतस्यपथानमंसाहविष्मंतादेव-
तांताहविष्मंता । सनंऊर्जामुपाभृत्युयाकृपानजूर्यति । यंमातरिश्वामनवे
परावतोदेवंभाःपरावतः २ एवैनसद्यःपर्येतिपार्थिवंमुहुर्गीरेतोवृषभःकनिक्रद-
द्धयद्रेतःकनिक्रदत् । शतंचक्षाणोअक्षभिर्देवोवनेषुतुर्वणिः । सदोदधानुउपरेषु
सानुष्वग्निःपरेषुसानुषु ३ ससुक्रतुःपुरोहितोदमेदमेऽग्निर्यज्ञस्याध्वरस्यचेतति
क्रत्वायज्ञस्यचेतति । क्रत्वावेधाइपयतेविश्वाजातानिपस्पशे । यतोघृतश्रीर-
तिथिरजायतवह्निर्वेधाअजायत ४ क्रत्वायदस्यतविषीषुपञ्चतेऽग्नेरवेणमरुतांन
भोज्यैषिरायनभोज्या । सहिष्मादानुमिन्वतिवसूनांचमज्मना । सनस्त्रासते
दुरितादभिह्रुतःशंसादघादभिह्रुतः ५ ॥ १४ ॥ विश्वोविहायाअरतिर्वसु-
र्दधेहस्तेदक्षिणेतरणिर्नशिश्रथच्छवस्ययानशिश्रथत् । विश्वस्माइदिधुष्यतेदेव-

त्राह॒व्यमोहि॑षे । विश्वे॑स्माइत्सु॒कृते॑वार॑मृण्वत्य॒ग्निर्द्वारा॒व्यृ॑ण्वति ६ समानु॑षे वृ॒जने॒शन्त॑मोहि॒तो ३॒ऽग्निर्य॒ज्ञेषु॑ज॒न्यो॒नवि॒श्पति॑:प्रि॒योय॒ज्ञेषु॑वि॒श्पति॑: । स॒ह॒व्या मानु॑षाणामि॒ळाकृ॒तानि॑पत्यते । स॒नत्रा॑सते॒वरु॑णस्यधू॒र्षदं॒महो॑दे॒वस्य॑धू॒र्षदं॑: ७ अ॒ग्निं होता॑रमीळते॒वसु॑धिति॑प्रि॒यंचे॑ति॒ष्ठमर॑तिन्ये॒रिरे॑हव्य॒वाह॑न्ये॒रिरे । वि॒श्वायु॑वि॒श्ववे॑द॒सं॒होता॑रंयज॒तंक॒विम् । दे॒वासो॑रण्वमव॑से॒वसू॑यवो॒गीर्भी॑रण्वं॒वसू॑यवः ८ ॥ १५ ॥

यं त्वमेकादश परुच्छेप इन्द्रः । षष्ठ्या इन्दुः । तत्राष्टमीनवम्यावतिशक्वर्यौ ।
अन्त्याऽष्टिः । शिष्टा अनुष्टुभः ।

१२१ यंत्वंर॑थमिन्द्रमे॒धसा॑तयेऽपा॒कास॑न्तंमिपिर॒ग्रणा॑यसि॒प्रान॑वद्यनयं॑सि । स॒द्यश्चि॒त्तम॒भिष्ट॑ये॒करो॒वशं॑श्चवा॒जिन॑म् । सास्माक॑मनवद्यतूतुजान॒वे॒धसा॑मि॒मां वाचं॑नवे॒धसा॑म् १ सश्चु॑धि॒यःस्मा॒पृत॑नासु॒कासु॑चिद्दक्षा॒य्यइन्द्र॒भर॑हू॒तये॒नृभि॒रसि॒

॥ ७ ॥

प्रतूर्तयेनृभिः । यःशूरैःस्व १ :सनितायोविप्रैर्वाजंतरुता । तमींशानासइरधन्त वाजिनंपृक्षमत्यंनवाजिनम् २ दस्मोहिष्मावृषणंपिन्वसित्वचंकंचिद्यावीररुं शूरमर्त्यंपरिवृणाक्षिमर्त्यम् । इन्द्रोततुभ्यंतद्दिवेतद्दुद्रायस्वर्यशसे । मित्रायवोचं वरुणायसप्रथःसुमृळीकायसप्रथः ३ अस्माकंवइन्द्रमुश्मसीष्टयेसखायंविश्वायुं प्रासहंयुजंवाजेषुप्रासहंयुजम् । अस्माकंब्रह्मोतयेऽवापुत्सुपुकासुंचित् । नहित्वा शत्रुःस्तरतेस्तृणोषियंविश्वंशत्रुंस्तृणोषियम् ४ निपूनमातिमतिंकयस्यचित्तेजि-ष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः । नेषिणोयथापुरानेनाःशूरमन्यसे । विश्वानिपूरोरपसापिवक्षिरासावक्षिर्नोअच्छ ५ ॥१६॥ प्रतद्दोचेयंभव्यायेन्दवेहव्यो नयड्यवान्मन्मरेजतिरक्षोहामन्मरेजति । स्वयंसोअस्मदानिदोवधैरजेतदुर्म-तिम् । अवस्रवेदघशंसोऽवतरमक्षुद्रमिवस्रवेत् ६ वनेमतद्धोत्रयाचितन्त्यावृ-

नेम॑ रयिंरयिवःसुवीर्यꣳरण्वंसन्तꣳसुवीर्यꣳम् । दुर्मन्मानंसुमन्तुभिरेमिपापृचीमहि । आसत्याभिरिन्द्रंयुन्नहूतिभिर्यजत्रंयुन्नहूतिभिः ७ प्रप्रावोअस्मेस्वयशोभिरूती पंरिवर्गइन्द्रोदुर्मतीनांदरीमन्दुर्मतीनाम् । स्वयंसारिषयध्यैयानंउपेवअत्रैः । हतेमसन्नवंक्षतिक्षिताजूर्णिर्नवंक्षति ८ त्वंनइन्द्रायापरीणसायाहिपथाँअनेहसापुरोयाह्यरक्षसा । सचस्वनःपराकआसचस्वास्तमीकआ । पाहिनोदूरादारादभिष्टिभिःसदापाह्यभिष्टिभिः ९ त्वंनइन्द्रायातरूपसोग्रंचित्त्वामहिमासक्षदवसेमहेमित्रंनावसे । ओजिष्ठत्रातरवितारथंकंचिदमर्त्य । अन्यमस्मद्रिरिषेःकंचिदद्रिवोरिरिक्षन्तंचिदद्रिवः १० पाहिनइन्द्रसुष्टुतस्त्रिधौजवयातासदमिदुर्मतीनांदेवःसन्दुर्मतीनाम् । हन्तापापस्यरक्षसस्त्रातारिप्रस्यमावतः । अधा हित्वाजनिताजीजनद्वसोरक्षोहणंत्वाजीजनद्वसो ११ ॥ १७ ॥

एन्द्र याहि दश परुच्छेप इन्द्रोऽसृष्टिः । अन्त्या त्रिष्टुप् ।

१३० एन्द्रयाह्युपनःपरावतोनायमच्छाविदथानीवसत्पतिरस्तंराजेवसत्पतिः । हवामहेत्वावयंप्रयस्वन्तःसुतेसचा । पुत्रासोनपितरंवाजसातयेमंहिष्ठंवाजसातये १ पिबासोमंमिन्द्रसुवानमद्रिभिःकोशेनसिक्तमवतंनवंसगस्तातृपाणोनवंसगः । मदायहर्यतायतेतुविष्टमायुधायसे । आत्वायच्छन्तुहरितोनसूर्यमहाविश्वेवसूर्यम् २ अविन्दद्विवोनिहितंगुहानिधिंवेर्नगर्भंपरिवीतमश्मन्यनन्तेअन्तरश्मनि । व्रजंवज्रीगवामिवसिषासन्नङ्गिरस्तमः । अपावृणोदिषइन्द्रःपरीवृताद्वारइषःपरीवृताः ३ दाद्हाणोवज्रमिन्द्रोगभस्त्योःक्षयोंवतिग्ममसंनाय संहयंदहिहत्यायसंशयत् । संविव्यानओजसाशवोधिरिन्द्रमज्मना । तष्टेववृक्षंवनिनोनिवृश्चसिपरश्वेवनिवृश्चसि ४त्वंवृथानद्यइन्द्रसर्तवेऽच्छासमुद्रंसृजोरथाँइ-

ववाजयतोरथाँइव । इतऊतीरयुजतसमानमर्थमाक्षितम् । धेनूरिवमनवेविश्व-
दोहसोजनायविश्वदोहसः ५ ॥ १८ ॥ इमांतेवाचंवसूयन्तआयवोरथंनधीरः
स्वपाअतक्षिषुःसुम्नायत्वामतक्षिषुः । शुम्भन्तोजेन्यंयथावाजेषुविप्रवाजिनम् ।
अत्यंमिवशवसेसातयेधनाविश्वाधनानिसातये ६ भिनत्पुरोनवतिमिन्द्रपूरवे
दिवोदासायमहिदाशुषेनृतोवज्रेणदाशुषेनृतो । अतिथिग्वायशम्बरंगिरेरुग्रोअ-
वाभरत् । महोधनानिदयमानओजसाविश्वाधनान्योजसा ७ इन्द्रःसमत्सुय-
जमानमार्यंप्रावद्विश्वेषुशतमूतिराजिषुस्वर्मीळ्हेष्वाजिषु । मनवेशासदव्रतान्त्व-
चंकृष्णामरन्धयत् । दक्षन्नविश्वंततृषाणमोषतिन्यर्शसानमोषति ८ सूरश्चक्रंप्रवृ-
हज्जातओजसाप्रपित्वेवाचंमरुणोमुषायतीशानआमुषायति । उशनायत्परावतो-
ऽजगन्नूतयेकवे । सुम्नानिविश्वामनुषेवतुर्वणिरहाविश्वेवतुर्वणिः ९ सनोनव्येभि-

वृषकर्मन्नुक्थैःपुरांदर्तःपायुभिःपाहिशग्मैः । दिवोदासेभिरिन्द्रस्तवानोवावृधी-
थाअहोभिरिवद्यौः १० ॥ १९ ॥

इन्द्राय सप्त परुच्छेप इन्द्रश्चासृषिः ।

१३१ इन्द्रायहिद्यौरसुरोअनम्नतेन्द्रायमहीपृथिवीवरीमभिर्युम्नसातावरी-
मभिः । इन्द्रंविश्वेसजोषसोदेवासोदधिरेपुरः । इन्द्रायविश्वासवनानिमानुषारा-
तानिसन्तुमानुषा १ विश्वेयुहित्वासवनेषुतुञ्जतेसमानमेकंवृषमण्यवःपृथक्स्वः
सनिष्यवःपृथक् । तंत्वानावंनपर्षणिंशूषस्यधुरिधीमहि । इन्द्रंनयज्ञैश्चितयन्त
आयवःस्तोमेभिरिन्द्रमायवः २ वित्वाततस्रेमिथुनाअवस्यवोव्रजस्यसाताग-
व्यस्यनिःसृजःसक्षन्तइन्द्रनिःसृजः । यद्व्यन्ताहाजनास्व १ र्यन्तासमूहसि ।

आविष्करिक्रदूपणंसचाभुवंवज्रमिन्द्रसचाभुवम् ३ विदुष्टेअस्यवीर्यस्यपूरवः पुरोयदिन्द्रशारदीरवातिरःसासह्वानोअवातिरः । शासस्तमिन्द्रमर्त्यमयज्युंशवसस्पते । महीममुष्णाःपृथिवीमिमाअपोमन्दसानइमाअपः ४ आदित्तेअस्य वीर्यस्यचकिरन्मदेपुवृषन्नशिजोयदाविथसखीयतोयदाविथ । चकर्थकारमेभ्यः पृतनासुप्रवन्तवे । तेअन्यामन्यांनुदंसनिष्णतश्रवस्यन्तःसनिष्णत ५ उतोनो अस्याउषसोजुषेतह्य १ र्कस्यबोधिहविषोहवीमभिःस्वर्षाताहवीमभिः । यदिन्द्र हन्तवेमघोवृषावजिञ्चिकेतसि। आमेअस्यवेधसोनवीयसोमन्मश्रुधिनवीयसः६ त्वंतमिन्द्रवावृधानोअस्मयुरमित्रयन्तंतुविजातमर्यवज्रेणशूरमर्यम् । जहियो नोअघायतिंशृणुष्वसुश्रवस्तमः । रिष्टंनयामन्नपभूतुदुर्मतिर्विश्वापभूतुदुर्मतिः ७ ॥ २० ॥

१३२ त्वयावयंमघवन्पूर्व्यंधनुइन्द्रत्वोताःसासह्यामपृतन्यतोवनुयामवनुष्यतः । नेदिष्ठेअस्मिन्नह्न्यधिवोचानुसुन्वते । अस्मिन्यज्ञेविचयेमाभरेकृतं वाजयन्तोभरेकृतम् १ स्वर्जेषेभरआप्रस्यवक्मन्युपर्वुधःस्वस्मिन्नञ्जसिक्राणस्य स्वस्मिन्नञ्जसि । अह्नन्निन्द्रोयथाविदेशीर्ष्णाशीर्ष्णोप्रवाच्यः । अस्मत्रातेसुध्यक्सन्तुरातयोभद्राभद्रस्यरातयः २ तंत्वप्रयःप्रत्नथातेशुशुक्वांसंयस्मिन्यज्ञेवारमकृण्वतक्षयंमृतस्यवारंसिक्षयंम् । वितद्वोचेरध्वहितान्तःपश्यन्तिरश्मिभिः । सघाविदेअन्विन्द्रोगवेषणोवन्युक्षिद्भ्योगवेषणः ३ नूइत्थातेपूर्वथाचप्रवाच्यंयदङ्गिरोभ्योऽवृणोरपव्रजमिन्द्रशिक्षन्नपव्रजम् । एभ्यःसमान्यादिशास्मभ्यंजेषियोत्सिच । सुन्वभ्योरन्धयाकंचिदव्रतंहृणायन्तंचिदव्रतम् ४ संयज्जनान्क्रतुभिः

शूरऽईक्षयद्भनेहितेतरुषन्तश्रवस्यवः प्रयंक्षन्तश्रवस्यवः । तस्माआयुःप्रजावदि-
ह्राधेअर्चन्त्योजसा । इन्द्रंओकयेदिधिषन्तधीतयोदेवाँअच्छानधीतयः ५ युवंत-
मिन्द्रापर्वतापुरोयुधायोनःपृतन्यादपृतन्तमिङ्गंतंवज्रेणतन्तमिङ्गंतम् । दूरेचत्तायं-
छन्त्सद्गहंनंयदिनक्षत् । अस्माकंशत्रून्परिशूरविश्वतोदुर्मादंपोंष्टविश्वतः ६॥२१॥

उभे सप्त परुच्छेप इन्द्रः । आद्या त्रिष्टुप् । ततस्तिस्रोऽनुष्टुभः ।
पञ्चमी गायत्री । षष्ठी धृतिः । सप्तम्यत्यष्टिः ।

१३३ उभेपुंनामिरोदंसीक्रतेनंदुहोंदहामिसंमहीरंनिन्द्राः । अभिव्रग्वयत्रं
हताअमित्राविलस्थानंपरिंतृह्लाअशेरन् १ अभिव्रग्वांचिदाद्रिवःशीर्षायांतुमतीं-
नाम् । छिन्धिवटूरिणापदामहावटूरिणापदा २ अवांसांमघवञ्छिशीधांयातुम-

तीनाम् । वैलस्थानकेअर्मकेमहावैलस्थेअर्मके ३ यासौतिस्रःपञ्चाशतोऽभि-
युङ्क्तैरुपावपः । तत्सुतेमनायतितुकत्सुतेमनायति ४ पिशङ्गंभृष्टिमम्भृणंपिशा-
चिंमिन्द्रसंमृण । सर्वरक्षोनिबर्हय ५ अवर्महइंन्द्रदाद्रुहिश्रुधीनःशुशोचहिद्यौः
क्षानभीपाँअद्रिवोघृणान्नभीपाँअद्रिवः । शुष्मिन्तमोहिशुष्मिभिर्वृषैरुग्रेभिरी-
यसे । अपूरुषघ्नोअप्रतीतशूरसत्वंभिस्त्रिसप्तैःशूरसत्वंभिः ६ वृनोतिहिसुन्वन्क्ष-
यंपरीणसःसुन्वानोहिष्मायजत्यवाद्भिर्देवानामवाद्भिर्यः । सुन्वानइत्सिषासति
सहस्रावाज्यर्वृतः । सुन्वानायेन्द्रोददात्याभुवंरयिंददात्याभुवम् ७ ॥ २२ ॥
इति शाकलर्क्संहितायां प्रथमे मण्डले एकोनविंशोऽनुवाकः ॥ १९ ॥

आ त्वा पद् परुच्छेपो वायुरत्यष्टिः । अन्त्याऽष्टिः ।

१३४ आत्वाजुवोरारहाणाअभिप्रयोवायोवहन्त्विहपूर्वपीतयेसोमस्यपूर्वपी-

तये । ऊध्वांतिअनुसूनृतामनस्तिष्ठतुजानती । नियुत्वतारथेनायाहिदावनेवायो
मखस्यदावने १ मन्दन्तुत्वामन्दिनोवायविन्दवोऽस्मत्क्राणासःसुकृताअभिद्यवो-
वोगोभिःक्राणाअभिद्यवः । यद्वक्राणाऽरध्यैदक्षंसचन्तऊतयः । सध्रीचीनानियु-
तोदावनेयेउपब्रुवतऽईधियः २ वायुर्युङ्क्तेरोहितावायुररुणावायूरथेअजिराधुरि
वोळ्हवेवहिष्ठाधुरिवोळ्हवे । प्रबोधयापुरन्धिजारआससतीमिव । प्रचक्षयरोद-
सीवासयोषसःअर्वसेवासयोषसः ३ तुभ्यमुषासःशुचयःपरावतिभद्रावस्त्रान्त-
न्यतेदंसुरश्मिपुचित्रान्यंपुरश्मिपु । तुभ्यंधेनुःसंवर्दुघाविश्वावसूनिदोहते ।
अर्जनयोमरुतोवक्षणाभ्योदिवआवक्षणाभ्यः ४ तुभ्यंशुक्रासःशुचयस्तुरण्यवो
मदेसुप्राईषणन्तभुर्वण्युपामिवन्तभुर्वणि । त्वांत्सारीदसमानोभगंमीढेतकुवीर्ये ।
त्वंविश्वस्माद्भुवनात्पासिसुमैणासुर्यात्पासिसुमैणा ५ त्वंनोवायवेषामपूर्व्यःसो-

मानांप्रथमःपीतिमर्हसिसुतानांपीतिमर्हसि । उतोविहुत्मतीनांविशांवव्र्जुषीणाम् । विश्वाइत्तेधेनवोदुह्रआशिरंघृतंदुह्रतआशिरम् ६ ॥ २३ ॥

स्तीर्णं नव परुच्छेपोऽग्निष्टुः । आद्यानां तिसृणां नवम्याश्च वायुः । शिष्टानामिन्द्रः । अन्त्ये अग्नयी ।

१३५ स्तीर्णंबर्हिरुपनोयाहिवीतयेसहस्रेणनियुतांनियुत्वतेशतिनीभिर्नियुत्वते । तुभ्यंहिपूर्वपीतयेदेवादेवाययेमिरे । प्रतेसुतासोमधुमन्तोअस्थिरन्मदायक्रत्वेअस्थिरन् १ तुभ्यायंसोमःपरिपूतोअद्रिभिःस्पार्हावसानःपरिकोशंमर्षतिशुक्रावसानोअर्षति । तवायंभागआयुषुसोमोदेवेषुहूयते । वहवायोनियुतोयाह्यस्मयुर्जुषाणोयाह्यस्मयुः २ आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहिवीतयेवायोहव्यानिवीतये । तवायंभागऋत्वियःसरश्मिःसूर्येसचा । अध्वर्युभिर्भरमाणाआयंसतवायोशुक्राअयंसत ३ आवांरथोनियुत्वान्वक्षदवं-

सेऽभिप्रयाँसिसुधितानिवीतयेवायोहव्यानिवीतये । पिबंतंमध्वोअन्धसःपूर्व-
पेयंहिवांहितम् । वायवाचन्द्रेणराधसागंतमिन्द्रश्चराधसागंतम् ४ आवांधियो
ववृत्युरध्वराँउपेमिन्दुंमर्मृजन्तवाजिनंमाशुमत्यंनवाजिनम् ।तेषांपिबतमस्म-
यूआनोगन्तमिहोत्या । इन्द्रवायूसुतानामद्रिभिर्युवंमदायवाजदायुवम् ५ ॥ २४॥
इमेवांसोमाअप्स्वासुताइहाध्वर्युभिर्भरमाणाअयंसतवायोशुक्राअयंसत । एते
वामभ्यंसृक्षतातिरःपवित्रमाशवः । युवायवोऽतिरोमाण्यव्ययासोमासोअत्य-
व्ययां ६ अतिवायोससतोयाहिशश्वतोयत्रग्रावाबर्दतितत्रंगच्छतंगृहमिन्द्रश्चग-
च्छतम् । विसून्तादद्दशेरीयतेघृतमापूर्णयांनियुतायाथोअध्वरमिन्द्रश्चयाथोअ-
ध्वरम् ७ अत्राहतद्दधेमध्वआहुतिंयमश्वत्थमुपतिष्ठन्तजायवोऽस्मेतेसन्तुजा-
यवः । साकंगावःसुवतेपच्यतेयवोनतेवायउपदस्यन्तिधेनवोनापदस्यन्तिधे-

नवः ८ इमेयेतेसुवायोबाह्वोंजसोऽन्तर्नदीतेपतयन्त्युक्षणोमहिव्राधन्तउक्षणः । धन्वञ्चियेअनाशवोंजीराश्विदगिंरौकसः । सूर्यस्येवरश्मयोदुर्नियन्तवोहस्तयोर्दुर्नियन्तवः १ ॥ २५ ॥

प्रसु सप्त परुच्छेपो मित्रावरुणावसिष्टिः । अन्त्ये लिङ्गोक्तदेवते । अन्त्या त्रिष्टुप् ।

१३६ प्रसुज्येष्ठंनिचिराभ्यांवृहन्नमोहव्यंमतिंभरतामृळयद्भ्यांस्वादिष्ठंमृळयद्भ्याम् । तासुम्राजाघृतासुतीयज्ञेयज्ञउपस्तुता । अथैनोःक्षत्रंनकुतश्चनाधृषे देवत्वंनूचिदाधृषे १ अदर्शिगातुरुरवेवरीयस्यपन्थाऋतस्यसमयंस्तरश्मिभिश्चक्षुर्भगस्यरश्मिभिः । द्युक्षंमित्रस्यसादनमर्यम्णोवरुणस्यच । अथादधातेवृहदुक्थ्यंवयउपस्तुत्यंवृहद्वयः २ ज्योतिष्मतीमदितिंधारयत्क्षितिंस्वर्वतीमास-

चेतेदिवेदिवेजागृवांसादिवेदिवे । ज्योतिष्मत्क्षत्रमाशातेआदित्यादानुनस्पती ।
मित्रस्तयोर्वरुणोयातयज्जनोऽर्यमायातयज्जनः ३ अयंमित्रायवरुणायशन्तमः
सोमोभूत्ववपानेष्वाभगोदेवोदेवेष्वाभगः । तंदेवासोजुषेरतविश्वेअद्यसजोषसः।
तथाराजानाकरथोयदीमहृक्तावानायदीमहे ४ योमित्रायवरुणायाविधज्ज-
नोऽनर्वाणंतंपरिपातोअंहसोदाश्वांसंमर्तमंहसः । तमर्यमाभिरक्षत्यृजूयन्तमनु
व्रतम् । उक्थैर्यएनोःपरिभूषतिव्रतंस्तोमैराभूषतिव्रतम् ५ नमोदिवेबृहतेरो-
दसीभ्यांमित्रायवोचंवरुणायमीळ्हुषेसुमृळीकायमीळ्हुषे । इन्द्रमग्निमुपस्तुहि
द्युक्षमर्यमणंभगम् । ज्योग्जीवन्तःप्रजयासचेमहिसोमस्योतीसंचेमहि ६ ऊती
देवानावयमिन्द्रवन्तोमरुत्वतीमहिस्वयशसोमरुद्भिः । अग्निर्मित्रोवरुणःशर्मयंसन्त-
दश्यामम्घवानोवयंच ७ ॥२६॥ इति शाक०संहि० द्वि०ष्ट० प्रथमोऽध्यायः ॥१॥

सुपुमतूचमतिशाकरंप्रमचतुष्कंपौष्णमस्तुश्रौषळेकादशवैश्वदेवीमैत्रावरुण्याश्विन्यस्तिस्रऐन्द्राग्नेयी मारुत्यैन्द्राग्नीबार्हस्पत्यावैश्वदेव्यन्त्यात्रिष्टुप्पञ्चमीबृहतीवैश्वदेवमेतदेवमन्यासामपिसूक्तप्रयोगेवैश्वदेव त्वंसूक्तभेदप्रयोगेयछिद्रंसादेवतावेदिपदेसप्तोनादीर्घतमाऔचथ्यआग्नेयंतुद्वित्रिष्टुबन्तंतुत्रिष्टुब्दशमी वावळित्थासामेद्धआग्नियंआनुष्टुभमन्यैन्द्रीप्रतव्यसीमष्टावाग्नेयंतुताम्रिष्टुबन्तमेतिमसप्तजागतंतंपृच्छत पञ्चान्त्यात्रिष्टुप्त्रिमूर्धानंकथायथीन्महःसवैराजंपुरुतूचमौष्णहंमित्रंनवमैत्रावरुणंहिजागतंमैत्र्याद्यायु-वंसप्तयजामहेचतुष्कंविष्णोःपञ्चैष्णवंहिमवोजागतंत्वैन्द्रश्चाद्यस्तूचोभवपञ्चावोधिपळाश्विनंत्वन्त्योत्रि-ष्टुभौ ॥ १० ॥

सुपुम तूचं परुच्छेपो मित्रावरुणावतिशकरी ।

१३७ ॐ सुपुमांयातुमद्रिभिर्गोश्रीतामत्सराड्मेसोमांसोमत्सराड्मे । आरांजानादिविस्पृशांस्मत्रागन्तुमुपनः । इमेवांमित्रावरुणागवांशिरःसोमाः शुक्रा गवांशिरः १ इमआयातमिन्दवःसोमासोदध्याशिरःसुतासोदध्या-

शिरः । उत वांमुपसोबुधिसाकंसूर्यस्यरश्मिभिः । सुतोमित्रायवरुणायपीतये चारुर्ऋतायपीतये २ तांवांधेनुंनवासरिमंशुंदुहन्त्यद्रिभिः सोमंदुहन्त्यद्रिभिः । अस्मत्रागन्तमुपनोऽर्वाञ्चासोमंपीतये । अयंवांमित्रावरुणानृभिःसुतःसोमआ पीतयेसुतः ३ ॥ १ ॥

अम चतुष्कं परुच्छेपः पूषाऽष्टर्षिः ।

१३८ प्रप्रपूष्णस्तुविजातस्यशस्यतेमहित्वमस्यवसोनतन्दतेस्तोत्रमस्यन तंन्दते । अचाँमिसुम्नयन्नहमन्त्यूतिंमयोभुवम् । विश्वस्ययोमनआयुयुवेमखो देवआयुयुवेमखः १ प्रहित्वापूषन्नजिरंनयामंनिस्तोमेभिःकृण्वऋणवोयथामृध उष्टोनपापरोमृधः । हुवेयत्त्वांमयोभुवंदेवंसख्यायमर्त्यः । अस्माकंमाङ्गिरान्युग्मिनस्कृधिवाजेषुग्मिनस्कृधि २ यस्यतेपूषन्त्सख्येविपन्यवःक्रत्वाचित्सन्तोऽ- ॥ १५ ॥

वंसावुभुज्रिरइतिकृत्वाबुभुज्रिरे । तामनुत्वानवीयसींनियुतैरायईंमहे । अहेंळमानउरुशंसुसरींभववाजेवाजेसरींभव ३ अस्याऊषुणउपसातयेंभुवोऽहेंळमानोररिवाँअंजाश्वश्रवस्यतामंजाश्व । ओषुत्वावृतीमहिस्तोमेंभिर्दस्मसाधुभिः । नाहित्वापूपन्नतिमन्यंआघृणेनतैसख्यमंपह्नुवे ४ ॥ २ ॥

अस्तु श्रौषळेकादश परुच्छेपः । आद्यान्त्ययोर्विश्वेदेवाः । द्वितीयाया मित्रावरुणौ । ततस्तिसृणामश्विनौ । षष्ठ्या इन्द्रः । सप्तम्या अग्निः । अष्टम्या मरुतः । नवम्या इन्द्राग्नी । दशम्या बृहस्पतिः । पञ्चमी बृहती । अन्त्या त्रिष्टुप् । शिष्टा अनुष्टुपः ।

१३१ अस्तुश्रौषट्पुरोअग्निंधियादंधुआनुतच्छर्धोंदिव्यंवृणीमहइन्द्रवायूवृणीमहे । यद्धंक्राणाविवस्वंतिनाभासंदायिनव्यसी । अधप्रसून उपयन्तुधीतयो देवाँअच्छानधीतयः १ यद्धत्यन्मित्रावरुणावृतादध्यांदाथेअनृतंस्वेनमन्युना

वेदिषदे प्रयोदश दीर्घतमा अग्निर्जगती । दशमी त्रिष्टुब्जगती वा । अन्त्ये त्रिष्टुभौ ।

१४० वेदिषदेप्रियधामायसुयुतेधासिमिवप्रभरायोनिमग्नये । वस्त्रेणेववासयामन्मनाशुजिंज्योतीरथंशुक्रवर्णंतमोहनम् १ अभिद्विजन्मात्रिवृदन्नमृज्यतेसंवत्सरावृधेजग्धमीपुनः । अन्यस्यासाजिह्वयाजेन्योवृण्यन्येनवनिनोमृष्टवारणः २ कृष्णप्रुतौवेविजेअस्यसक्षिताउभातरेतेअभिमातराशिशुम् । प्राचाजिह्वंध्वसयन्तंतृष्युतमासाच्यंकुपयंवर्धनंपितुः ३ मुमुक्ष्वो३मनवेमानवस्यतेरघुद्रुवःकृष्णसीतासऊजुवः । असुमनाअजिरासोरघुष्यदोवातंजूता उपयुज्यन्तआशवः ४ आदस्यतेध्वसयन्तोवृथेरतेकृष्णमभ्वंमहिवर्पःकरिक्रतः । यत्सीमहीमवनिंप्राभिममृशदभिध्वसन्स्तनयन्नेतिनानदत् ५ ॥ ५ ॥ भूपन्नयोऽधिवभ्रूयन्नतेवृषेवपन्तीरभ्येतिरोरुवत् । ओजायमानस्तन्वश्शुम्भतेभीमो

नशृङ्गांदांवेधावदुर्गृभिः ६ सस्तिरौविष्टिरःसंगृभायतिजानन्नेवजानतीर्नित्य आशये । पुनर्वर्धन्तेअपियन्तिदेव्यंमन्यद्वपैःपित्रोःकृण्वतेसचा ७ तमग्रुवःके-शिनीःसंहिरण्यैरुरुध्वास्तंस्थुर्मघवीःप्रायवेपुनः । तासांजरांप्रमुञ्चन्नैतिनानदद-दसुंपरंजनयंजीवमस्तृतम् ८ अधीवासंपरिमातूरिहन्नहंतुविग्रेभिःसत्त्वेभियातवि जिग्युषः । वयोदधत्पद्वतेरोरिहत्सदानुश्येनीसचतेवर्तनीरहं ९ अस्माकमग्नेमघ-वत्सुदीदिह्यधश्वसीवान्वृषभोदमूनाः । अवास्याशिशुमतीरदीदेर्वमेंवयुत्सुपरि-जभ्राणः १० ॥ ६ ॥ इदमग्नेसुधितंदुर्धितादधिप्रियादुचिन्मन्मनःप्रेयोअस्तुते । यत्तेशुक्रंतन्वो३रोचतेशुचितेनास्मभ्यंवनसेरत्नमात्वम् ११ रथायनावमुतनो-गुहायनित्यारित्रांपद्वतीरास्यग्ने । अस्माकंवीराँउतनोमघोनोजनाँश्चयापारया-च्छर्मयाच्च १२ अभीनोअग्नउक्थमिज्जुगुर्याद्यावाक्षामासिन्धवश्चस्वगूर्ताः । ग-व्यंयव्ययन्तोदीर्घाहेषंवरंमरुण्योवरन्त ॥ १३ ॥ ७ ॥

१४१ वळित्थातद्वपुषेधायिदर्शतंदेवस्यभर्गःसहसोयतोजनि । यदीमुपह्वरं-
तेसाधतेमतिर्ऋतस्यधेनांअनयन्तसस्रुतः १ पृक्षोवपुःपितुमान्नित्यआशयेद्वि-
तीयमास्तक्षिवासुमातृषु । तृतीयमस्यवृषभस्यदोहसेदशप्रमतिंजनयन्तयोष-
णः २ निर्यदीबुध्नान्महिषस्यवर्पसईशानासःशवसाक्रन्तसूरयः । यदीमनुप्रादि-
वोमध्वआधवेगुहासन्तंमातरिश्वामथायति ३ प्रयत्पितुःपरमान्नीयतेपर्यापृक्षुधो-
वीरुधोदंसुरोहति । उभायदस्यजनुषंयदिन्वतआदिद्यविष्ठोअभवद्घृणाशुचिः ४
आदिन्मातृराविशद्यास्वाशुचिरहिंस्यमानउर्वियाविवावृधे । अनुयत्पूर्वाअरु-
हत्सनाजुवोनिनव्यंसीष्ववरासुधावते ५॥ ८ ॥ आदिद्धोतारंवृणतेदिविष्टिषुभगं- ॥ १८ ॥

मिवपपृचानासंऋञ्जते । देवान्यत्क्रत्वामज्मनापुरुष्टुतोमर्तंशंसंविश्वधावेतिधा-
यसे ६ वियदस्थाद्यजतोवातंचोदितोह्वारोनवक्वाजरणाअनाकृतः । तस्यपत्मं-
न्दक्षुषःकृष्णजंहसःशुचिजन्मनोरजआव्यंध्वनः ७ रथोनयातःशिक्वभिःकृतो
द्यामङ्गेभिरुपेभिरीयते । आदंस्यतेकृष्णासोदक्षिसूरयःशूरस्येवत्वेषथादीषते
वयः ८ त्वयाह्यग्नेवरुणोधृतव्रतोमित्रःशाशद्रेअर्यमासुदानवः । यत्सीमनुक्र-
तुनाविश्वथाविभुरराजनेमिःपरिभूरजायथाः ९ त्वमग्नेशशमानायसुन्वतेरत्नंय-
विष्ठदेवतातिमिन्वसि । तंत्वानुनव्यंसहसोयुवन्वयंभगंनकारमहिरत्नधीमहि १०
अस्मेरयिंनस्वर्थंदमूनसंभगंदक्षंनपपृचासिधर्णसिम् । रश्मींरिवयोयमतिज-
न्मनीउभेदेवानांशंसमृतआचसुक्रतुः ११ उतनःसुद्योत्माजीराश्वोहोतामन्द्रः
शृणवच्चन्द्ररथः । सनौनेषन्नेषतमैरमूरोऽग्निर्वामंसुवितंवस्योअच्छ १२ अस्तां-

व्यग्निःशिमींवद्भिरर्कैःसाम्राज्यायप्रतरंदधानः । अमीचयेमघवानोवयंचमिहं नसूरोअतिनिष्टतन्युः ॥ १३ ॥ ९ ॥

॥ १९ ॥

समिद्धस्त्रयोदश दीर्घतमा अग्निरनुष्टुप् ।

१४२ समिद्धोअग्नआवहदेवाँअद्ययतस्रुचे । तन्तुंतनुष्वपूर्व्यंसुतसोमायदाशुषे १ घृतवन्तमुपमासिमधुमन्तंतनूनपात् । यज्ञंविप्रस्यमावतःशशमानस्यदाशुषः २ शुचिःपावकोअद्भुतोमध्वायज्ञंमिमिक्षति । नराशंसस्त्रिरादिवोदेवोदेवेषुयज्ञियः ३ ईळितोअग्नआवहेन्द्रंचित्रमिहप्रियम् । इयंहित्वामतिर्ममाच्छासुजिह्वयतें ४ स्तृणानासोयतस्रुचोवर्हिर्यज्ञेस्वध्वरे । वृञ्जेदेवव्यंचस्तमिन्द्रायशर्मसप्रथः ५ विश्रयन्तामृतावृधःप्रयैदेवेभ्योमहीः । पावकासःपुरुस्पृहोद्वारोदेवीरसश्चतः ६॥१०॥ आभन्दमानेउषासानक्तोवासासुपेशसायह्वी

॥ १९ ॥

ऋतस्यमातरासीदंतावर्हिरासुमत् ७ मन्द्रजिह्वाजुगुर्वणीहोतारादैव्याकवी ।
यज्ञंनोयक्षतामिमंसिध्रमद्यदिविस्पृशम् ८ शुचिर्देवेष्वर्पिताहोत्रांमरुत्सुभारती ।
इळासरस्वतीमहीवर्हिःसीदन्तुयज्ञियाः ९ तन्नस्तुरीपमद्भुतंपुरुवारंपुरुत्मना ।
त्वष्टापोषायविष्यतुरायेनाभानोअस्मयुः १० अवसृजन्नुपत्मनादेवान्यक्षिवनस्पते । अग्निर्हव्यासुषूदतिदेवोदेवेषुमेधिरः ११ पूषण्वतेमरुत्वतेविश्वदेवायवायवे । स्वाहाघायुत्रवेंपसेहव्यमिन्द्रायकर्तन १२ स्वाहाकृतान्याशुहुषंहव्यानिवीतये । इन्द्रागंहिश्रुधीहवंत्वांहवन्तेअध्वरे ॥ १३ ॥ ११ ॥

प्रतव्यसीमष्टौ दीर्घतमा अग्निर्जगती । अन्त्या त्रिष्टुप् ।

११३ प्रतव्यंसीनव्यंसीधीतिमग्नयेवाचोमतिंसहसःसूनवेभरे । अपांन-

पाद्योवसुभिःसहाग्नियोहोतापृथिव्यान्यसीदद्वित्वियः १ सजायमानःपरमेव्यो-
मन्याविरग्निरभवन्मातरिश्वने । अस्यक्रत्वासमिधानस्यमज्मनाप्रद्यावाशो-
चिःपृथिवीअरोचयत् २ अस्यत्वेषाअजराअस्यभानवःसुसंदृशःसुप्रतीकस्य
सद्युतः । भात्वक्षसोअत्यक्तुर्नसिन्धवोऽग्नेरजन्तेअसंसन्तोअजराः३ यमीरिरेभृग-
वोविश्ववेदसंनाभापृथिव्याभुवनस्यमज्मना । अग्निंतंगीर्भिर्हिनुहिस्वआदमेय
एकोवस्वोवरुणोनराजति ४ नयोवरायमरुतामिवस्वनःसेनेवसृष्टादिव्यायथा-
शनिः । अग्निर्जम्भैस्तिगितैरत्तिभवंतियोधोनशत्रून्त्सवनान्यृंजते ५ कविर्नो
अग्निरुचथस्यवीरसद्वसुष्कविद्वसुभिःकाममावरत् । चोदःकविंत्तुतुज्यात्सातये
धियःशुचिंप्रतीकंतमयाधियागृणे ६ घृतप्रतीकंवऋतस्यधूर्षदमाग्निंमित्रंनसमि-
धानऋंजते । इन्धानोअक्रोविदथेषुदीद्यच्छुक्रवर्णामुदुनोयंसतेधियम् ७ अग्रे-

युच्छन्नप्रयुच्छद्भिरग्नेशिवेभिर्नःपायुभिःपाहिशग्मैः । अदब्धेभिरदितेभिरिष्टे-
निमिषद्भिःपरिपाहिनोजाः ८ ॥ १२ ॥

एति प्रसप्त दीर्घतमा अग्निर्जगती ।

१४४ एतिप्रहोतावृतमस्यमायय्वोध्वांदधानःशुचिपेशसंधियम् । अभिस्रुचः
क्रमतेदक्षिणावृतोयाअस्यधामप्रथमंहनिंसते १ अभीमृतस्यदोहनाअनूषतयो-
नौदेवस्यसदनेपरीवृताः । अपामुपस्थेविभृतोयदावसदधंस्वधाअधयद्याभिरीयते २ युयूषतःसवयसातदिद्वपुःसमानमर्थंवितरित्रतामिथः । आदीभगोनहव्यः
समस्मदावोळ्हुर्नरश्मीन्त्समयंस्तसारथिः ३ यमीहासवयसासपर्यतःसमानेयो-
नामिथुनासमोकसा । दिवाननक्तंपलितोयुवाजनिपुरूचरन्नजरोमानुषायुगा ४
तमीहिन्वन्तधीतयोदशव्रिशोदेवंमर्तासऊतयेहवामहे । धनोरधिं प्रवतआ

सऋंण्वत्यभिव्रजद्भिर्वयुनानवांधित ५ त्वंह्यग्नेदिव्यस्यराजसित्वंपार्थिवस्य-
पशुपाइवत्मना । एनीतएतेबृहतीअभिश्रियाहिरण्ययीवक्करीवर्हिराशाते ६
अग्नेजुषस्वप्रतिहर्यतद्वचोमन्द्रस्वधावऋतजातसुक्रतो । योविश्वतःप्रत्यङ्ङसि-
दर्शतोरण्वःसंदृष्टौपितुमाँइवक्षयः ॥ ७ ॥ १३ ॥

तं पृच्छत पञ्च दीर्घतमा अग्निर्जगती । अन्त्या त्रिष्टुप् ।

१४५ तंपृच्छतासजगामासवेदसचिंकित्वाँइयतेसान्वीयते । तस्मिन्त्सन्ति
प्रशिषस्तस्मिन्निष्टयःसवाजस्यशवसःशुष्मिणस्पतिः १ तमित्पृच्छन्तिन सि-
मोविपृच्छतिस्वेनेवधीरोमनसायदग्रभीत् । नमृष्यतेप्रथमंनापरंवचोऽस्यक्र-
त्वासचतेअग्रहापितः २ तमिद्गच्छन्तिजुह्वं १ स्तमवैतीविश्वान्येकःशृणवद्व-
चांसिमे । पुरुप्रैषस्तनुरियज्ञसाधनोऽच्छिद्रोतिःशिशुरादत्तसंरभः ३ उप-

स्थायँचरतियत्समारंतसद्योजातस्तत्सारयुज्येभिः। अभिश्वान्तंमृगतेनान्येमुदे यद्गींगच्छंन्त्युशतीरपिष्टितम् ४ सद्यंमृगोअप्योवनर्गुरुपत्वुच्युपमस्यांनिधायि। व्यंब्रवीद्युनामत्यैंभ्योऽग्निर्विद्वाँऋतचिद्धिसत्यः॥ ५॥ १४॥

त्रिमूर्धानं पञ्च दीर्घतमा अग्निस्त्रिष्टुप्।

१४६ त्रिमूर्धानंसप्तरश्मिगृणीषेऽनूनमग्निंपित्रोरुपस्थे। निपत्तमस्यचरतोध्रुवस्यविश्वादिवोरोचनापप्रिवांसम् १ उक्षामहाँअभिवक्षएनेअजरंस्तस्थावितऊतिर्ऋष्वः। उर्व्याःपदोनिदधातिसानौरिहन्त्यूधोअरुषासोअस्य २ समानंवत्समभिसंचरन्तीविष्वग्धेनूविचरतःसुमेके। अनपवृज्याँअध्वनोमिमानेविश्वान्केताँअधिमहोदधाने ३ धीरासःपदंकवयोनयन्तिनानाहृदारक्षमाणा अजुर्यम्। सिषासन्तःपर्यपश्यन्तसिन्धुमाविरेभ्योअभवत्सूर्योनृन् ४ दिदृक्षेण्यः

परिकाष्ठासुजेन्यईळेन्योमुहोअभीयजीवसे । पुरुत्रायदभवत्सूरहैभ्योगभैभ्यो मघवाविश्वदर्शतः ॥ ५ ॥ १५ ॥

कथा ते पञ्च दीर्घतपा अग्निस्त्रिष्टुप् ।

१४७ कथातेअग्नेशुचयन्तआयोर्वैदाशुर्वाजैभिराशुषाणाः । उभेयन्तोकेतनेयेदधानाऋतस्यसामन्त्रणयन्तदेवाः १ बोधामेअस्यवचसोयविष्ठमंहिष्ठस्यप्रभृतस्यस्वधावः । पीयतित्वोअनुत्वोगृणातिवन्दारुस्तेतन्वंवन्देअग्ने २ येपायवोमामतेयंतेअग्नेपश्यन्तोअन्धंदुरितादरक्षन् । ररक्षतान्त्सुकृतोविश्ववेदादिप्सन्त इद्रिपवोनाहदेभुः ३ योनोअग्नेअरिरोंअघायुररातीवामर्चयतिद्वयेन । मन्त्रोगुरुःपुनरस्तुसोअस्माअनुमृक्षीष्टतन्वंवुरुक्षोः ४ उतवायःसहस्यप्रविद्वान्मतोंमतंमर्चयतिद्वयेन । अतःपाहिस्तवमानस्तुवन्तमग्नेमाकिर्नोदुरितायधायीः ५॥१६॥

॥ २२ ॥

१४८ मथीद्यदीं विष्टोमांतरिश्वाहोतारंविश्वाप्सुंविश्वदेव्यम् । नियंदधुर्मनुष्यासुविक्षुस्व ऽग्निं चित्रंवपुषेविभावम् १ ददानमिन्नर्ददभन्तमन्मान्निर्वरूथंममृतस्यचाकन् । जुषन्तविश्वान्यस्यकर्मोपस्तुतिंभरमाणस्यकारोः २ नित्येचिन्नुयंसदनेजगृभ्रेप्रशस्तिभिर्दधिरेयज्ञियासः । प्रसूनयन्तगृभयंन्तइष्टावश्वासोनरथ्योरारहाणाः ३ पुरूणिदस्मोनिरिणातिजम्भैराद्रोचतेवनआविभावा । आदस्यवातोअनुवातिशोचिरस्तुर्नशर्यामसनामनूयून् ४ नयंरिपवोनरिषण्यवोगर्भेसन्तरेषणारेषयन्ति । अन्धाअपश्यानदभन्नभिख्यानित्यासईंप्रेतारोअरक्षन् ॥ ५ ॥ १७ ॥

महः स पञ्च दीर्घतमा अग्निर्विराट् ।

१४१ महःसरायएषतेपतिर्दन्निनइनस्यवसुनःपदआ । उषघ्रजन्तुमद्रयोवि-
धन्नित् १ सयोवृषानुरानरोदस्योःश्रवोभिरस्तिजीवपीतसर्गः । प्रयःसं-
स्त्राणःशिश्रीतयोनौ २ आयःपुरुनार्मिणोमर्दिदेत्यःकविर्नभन्यो ३ नावाँ ।
सूरोनरुरुक्षाञ्छतात्मा ३ अभिद्विजन्मात्रीरोचनानिविश्वारजांसिशुशुचानो
अस्थात् । होतायजिष्ठोअपांसधस्थे ४ अयंसहोतायोद्विजन्माविश्वादधेवार्या-
णिश्रवस्या । मर्तायोअस्मैसुतुकोददाश ॥ ५ ॥ १८ ॥

पुरु तृचं दीर्घतमा अग्निरुष्णिक् ।

१५० पुरुत्वादाश्वान्वोचेऽरिरग्नेतवस्विदा । तोदस्यैवशरणआमहस्य १
व्यनिनस्यधनिनःप्रहोषेचिदरुषः । कदाचनप्राजिगतोअदेवयोः २ सचन्द्रोवि-
प्रमत्योमहोव्राधन्तमोदिवि । प्रप्रेत्तेअग्नेवनुषःस्याम ॥ ३ ॥ १९ ॥

१५१ मित्रंनयंशिम्यागोर्युगव्यवःस्वाध्योविदथेअप्सुजीजनन् । अरेजे-तांरोदसीपाजसागिराप्रतिप्रियंयजतंजनुषामवः १ यहुत्यद्यौपुरुमीळ्हस्यसोमि-नःप्रमित्रासोनदधिरेस्वाभुवः । अवक्रतुंविदतंगातुमर्चतउतश्रुतंवृषणापस्त्या-वतः २ आवांभूपन्क्षितयोजन्मरोदस्योःप्रवाच्यंवृषणादक्षसेमहे । यदीमृताय-भरथोयदर्वतेप्रहोत्रयाशिम्यांवीथोअध्वरम् ३ प्रसाक्षितिरसुरयामहिंप्रियक्ष-तावानावृतमाघोषथोबृहत् । युवंदिवोबृहतोदक्षमाभुवंगांनधूर्युपयुञ्जाथेअपः ४ महीअत्रमहिनावारमृण्वथोऽरेणवस्तुजआसद्मन्धेनवः । स्वरन्तिताउपरतातिसूर्यमानिघुचंउपसस्तक्वीरिव ५ ॥ २० ॥ आवांमृतायकेशिनीरनूषतमित्र यत्रवरुणगातुमर्चथः । अवत्मनासृजतंपिन्वतंधियोयुवंविप्रस्यमन्मनामिरज्य-

थः ६ योवांयज्ञैःशशमानोहदाशतिकविर्होतायजतिमन्मसाधनः । उपाहृतं
गच्छथोवीथोअध्वरमच्छागिरःसुमतिंगन्तमस्मयू ७ युवांयज्ञैःप्रथमागोभिरञ्ज
तऋतावानामनसोनप्रयुक्तिषु । भरन्तिवांमन्मनासंयतागिरोऽद्रिंप्यतामनसारेव-
दांशाथे ८ रेवद्वयोदधाथेरेवदाशाथेनरामायाभिरितऊतिमाहिनम् । नवांद्या-
वोऽहभिर्नोतसिन्ववोनदेवत्वंपणयोनानंशुर्मघम् ९ ॥ २१ ॥

युवं सप्त दीर्घतमा मित्रावरुणौ त्रिष्टुप् ।

१५२ युवंवस्त्राणिपीवसावसाथेयुवोरच्छिद्रामन्तवोहसर्गाः । अवातिरतम-
नृतानिविश्वऋतेनमित्रावरुणासचेथे १ एतच्चनत्वोविचिकेतदेषांसत्योमन्त्रःक-
विशस्तऋघावान् । त्रिरश्रिंहन्तिचतुरश्रिरुग्रोदेवनिदोहप्रथमाअजूर्यन् २ अ-
पादेतिप्रथमापद्वतीनांकस्तद्वांमित्रावरुणाचिकेत । गर्भोभारंभरत्याचिदस्यऋतं

पिपर्त्यनृतंनितारीत् ३ प्रयन्तमित्परिजारंकनीनापश्यामसिनोपनिपद्यमानम् । अनवपृणावितताव्सानंप्रियंमित्रस्यवरुणस्यधाम ४ अनश्वोजातोअनभीशुर्वाकनिक्रदत्पतयदूर्ध्वसानुः । अचित्तंब्रह्मजुजुषुर्युवानःप्रमित्रेधामवरुणेगृणन्तः ५ आधेनवोमामतेयमवन्तीर्ब्रह्मप्रियंपीपयन्त्सस्मिन्नूधन् । पित्वोभिंक्षेतवयुनानिविद्वानासाविवासन्नदितिमुरुष्येत् ६ आवांमित्रावरुणाहव्यजुष्टिंनमसादेवावव्सावव्वृत्याम् । अस्माकंब्रह्मपृतनासुसह्याअस्माकंवृष्टिर्दिव्यासुपारा ॥ ७ ॥ २२ ॥

यजामहे चतुष्कं दीर्घतमा मित्रावरुणौ त्रिष्टुप् ।

१५३ यजामहेवांमहःसजोषाहव्येभिर्मित्रावरुणानमोभिः । घृतैर्घृतस्नूअधुयद्वांमस्मेअध्वर्यवोनधीतिभिर्भरन्ति १ प्रस्तुतिर्वांधामनप्रयुक्तिरयामिमि-

त्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा ४ तदस्यप्रियमभिपाथोअश्यां नरोयत्रदेवयवोमदन्ति। उरुक्रमस्यसहिबन्धुरित्थाविष्णोःपदेपरमेमध्वउत्सः५ तावांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृङ्गाअयासः । अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरि ॥ ६ ॥ २४ ॥

प्रवः षड् दीर्घतमा विष्णुर्जगती । आद्यानां तिसृणामिन्द्रश्च ।

१५५ प्रवःपान्तमन्धसोधियायतेमहेशूरायविष्णवेचार्चत । यासानुनिपर्वतानामदाभ्यामहस्तस्थतुरर्वतेवसाधुना १ त्वेषमित्थासमरणंशिमीवतोरिन्द्राविष्णूसुतपावामुरुष्यति । यामत्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः २ ताईवर्धन्तिमह्यस्यपौंस्यंनिमातरानयतिरेतसेभुजे।दधातिपुत्रोऽवरं परं पितुर्नामंतृतीयमधिरोचनेदिवः ३ तत्तदिदस्यपौंस्यंगृणीमसीनस्यत्रातुरवृकस्य

मीळ्हुषः । यःपार्थिवानित्रिभिरिद्विगामभिरुरुक्रमिष्टोरुगायायजीवसे ४ हेइदंस्यक्रमणेस्वर्दृशोऽभिख्यायमर्त्योभुरण्यति । तृतीयमस्यनकिरादधर्षति वयश्चनपतयन्तःपत्त्रिणः ५ चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनवृत्तंव्यँतीरवीविपत् । बृहच्छरीरोविमिमानऋक्भिर्युवाकुमारःप्रत्येत्याहवम् ॥ ६ ॥ २५ ॥

भव पञ्च दीर्घतमा विष्णुर्जगती ।

१५६ भवामित्रोनशेव्योघृतासुतिर्विभूतद्युम्नएवयाउसप्रथाः । अधातेविष्णोविदुषाचिदर्ध्यःस्तोमोयज्ञश्चराध्योहविष्मता १ यःपूर्व्यायवेधसेनवीयसेसुमज्जानयेविष्णवेददाशति । योजातमस्यमहतोमहिब्रवत्सेदुश्रवोभिर्युज्यंचिदभ्यसत् २ तमुस्तोतारःपूर्व्यंयथाविदऋतस्यगर्भंजनुषापिपर्तन । आस्यजानन्तोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहे ३ तमस्यराजावरुणस्तमम-

श्विनाक्रतुंसचन्तमारुतस्यवेधसः । दाधारदक्षंमुत्तममहर्विदंव्रजंचविष्णुःसखि-
वाँअपोर्णुते ४ आयोविवायसचथायुदैव्यइन्द्रायविष्णुःसुकृतेसुकृत्तरः । वेधा
अजिन्वत्रिषधस्थआर्यमृतस्यभागेयजमानमाभजत् ॥ ५ ॥ २६ ॥ इति शाक-
लर्कसंहितायां प्रथमे मण्डले एकविंशोऽनुवाकः ॥ २१ ॥

अबोधि पड् दीर्घतमा अश्विनौ जगती । अन्त्ये त्रिष्टुभौ ।

१५७ अबोध्यग्निर्जमउदेतिसूर्योव्युषाश्चन्द्रामह्यावोअर्चिषा । आयुक्षाता-
मश्विनायातवेरथंप्रासावीद्देवःसविताजगत्पृथक् १ यद्युञ्जाथेवृषणमश्विनारथं
घृतेननोमधुनाक्षत्रमुक्षतम् । अस्माकंब्रह्मपृतनासुजिन्वतंवयंधनाशूरसाताभजे-
महि २ अर्वाङ्त्रिचक्रोमधुवाहनोरथोजीराश्वोअश्विनोर्यातुसुष्टुतः । त्रिबन्धुरो
मघवाविश्वसौभगःशंनआवक्षद्द्विपदेचतुष्पदे ३ आनऊर्जंवहतमश्विनायुवंम-

धुमत्यान॒: कशा॑यामिमिक्षतम् । प्रायु॒स्तारि॑ष्टनीरपां॑सिमृक्षतं॒ सेध॑तं॒द्वेषो॒ भव॑तं॒स-
चा॒भुवा॒ ४ यु॒वं ह॒ गर्भं॑ जग॑तीषु धत्थो यु॒वं विश्वे॑षु॒ भुव॑नेष्व॒न्तः । यु॒वम॒ग्निं च॑ वृषणावु॒पश्च॒
वन॒स्पतीँ॑रश्विना॒वैर॑येथाम् ५ यु॒वं ह॑स्थो॒ भि॒षजा॑भे॒षजे॑भि॒रथो॑ ह॒स्थो र॒थ्या॒३॒॑ रथ्ये॑-
भिः । अथो॑ ह॒क्षत्र॑मधि॒ धत्थ उ॒ग्रायो वो॑ ह॒मि॒ष्मा॒न्मन॑सादु॒वाशं॑ ॥ ६ ॥ २७ ॥
इति शाकलर्क्संहितायां द्वितीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

पशू॒ मन्त्रानुष्टुप्पथावापश्चयावापृथिवीयन्तुजागतंतुतेहिकियुश्रेष्ठः पकूनाभंवांत्रिष्टुबन्तंमानो ऋषि-
काश्वस्तुतिस्तुतीपापष्ठयौजगत्यौदक्रन्दः सप्तोनास्यद्विपश्चादशऽप्स्तवंत्वे तत्सं यशोत्थापनमश्नम-
तिवावपान्यत्रमायेणज्ञानमोसाक्षरमशंसाचपश्यपादं साकंजानांयद्वायत्रेयं सशिङ्क्षेसप्तार्धगर्भागौरीरि-
तिजगत्यप्तदन्तंतुवैश्वदेवंतस्याःसमुद्राइतिवाचःसमुद्राआपोक्षरंसामस्तारपङ्क्तिःशकमयमितिशकधूम-
उक्षाणंपृश्निमेतिसोमस्यःकेशिनइत्यग्निः सूर्योवायुश्चकेशिनश्चत्वारिवाग्वाचइन्द्रं मित्रंसौर्यौद्वादशेति-
सवंत्सरसंस्थंकालचक्रवर्णनंयस्तेसरस्वत्यैगङ्गेनसाःयेभ्यःपरानुष्टुप्सौरीपर्जन्याग्निदेवतावान्त्यासरस्वते

सूर्यापचाकपापश्चोनासंवादस्तृतीयाद्यपुजोमरुतांवाक्यमन्त्यस्तृचोगस्यस्यच शिष्टाइन्द्रस्यैकादशीच मरुत्वांस्त्विन्द्रोदेवता ।

वसू वसू दीर्घतमा अश्विनौ त्रिष्टुप् । अन्त्याऽनुष्टुप् ।

१५८ ॐ वसूरुद्रापुरुमन्तूवृधन्तादशस्यतंनोवृषणावभिष्टौ । दस्त्राहुयद्रेकंणऔचथ्योवांप्रयत्सस्राथेअकंवाभिरूती १ कोवांदाशत्सुमतयेचिदस्यैवसूयद्वेथेनमंसापदेगोः । जिगृतमस्मेरेवतीःपुरंधीःकामप्रेणेवमनसाचरन्ता २ युक्तोहयद्वांतौग्र्यायपेरुर्विमध्येअर्णोसोधार्यिपज्रः । उपवामवःशरणंगमेयंशूरोनाज्मंपतयद्भिरेवैः ३ उपस्तुतिरौचथ्यमुरुष्येन्मामामिमेपंत्रिणीविदुग्धाम् । मामामेघोदशंतयश्चितोधाकृप्रयद्वांब्रह्मस्मानिखादंतिक्षाम् ४ नमांगरन्नद्योमातृतमादासायदीसुसंमुग्धमवाधुः । शिरोयदस्यत्रैतनोवितक्षत्स्वयंदासउरोअंसावपिग्घ५दी-

र्धंतमामामतेयोजुजुर्वान्दशमेयुगे। अपामर्थंयतीनांब्रह्माभवतिसारथेः॥६॥१॥

प्र द्यावापृथ्वी दीर्घतमा द्यावापृथिव्यौ जगती।

॥ २८ ॥

१५१ प्रद्यावायज्ञैःपृथिवीऋतावृधामहीस्तुपेविदथेषुप्रचेतसा। देवेभिर्येदेवपुत्रेसुदंससेत्थाधियावार्याणिप्रभूषतः १ उतमन्येपितुरद्रुहोमनोमातुर्महिस्वतंवस्तद्वदीमहि। सुरेतसापितराभूमचक्रतुरुप्रजायाअमृतंवरीमभिः २ ते सूनवःस्वपसःसुदंससोमहीजज्ञुर्मातरापूर्वचित्तये। स्थातुश्चसत्यंजगतश्चधर्मणिपुत्रस्यपाथःपदमद्वयाविनः ३ तेमायिनोममिरेसुप्रचेतसोजामीसयोनामिथुनासमोकसा। नव्यंनव्यंतंतुमातन्वतेदिविसमुद्रेअन्तःकवयःसुदीतयः ४ तद्राधोअद्यसवितुर्वरेण्यंवयंदेवस्यप्रसवेमनामहे। अस्मभ्यंद्यावापृथिवीसुचेतुनारयिंधत्तंवसुमन्तंशतग्विनम् ॥ ५ ॥ २ ॥

१६० तेहिद्यावापृथिवीविश्वशंभुवऋतावरीरजसोधारयत्कवी । सुजन्मनीधिषणेअन्तरीयतेदेवोदेवीधर्मणासूर्यःशुचिः १ ऊरुव्यचसामहिनीअसश्चता पितामाताचभुवनानिरक्षतः । सुधृष्टमेवपुष्ये ३ नरोदंसीपितायत्सीमभिरूपैरवासयत् २ सवज्रिःपुत्रःपित्रोःपवित्रवान्पुनातिधीरोभुवनानिमायया । धेनुंचपृश्निंवृषभंसुरेतसंविश्वाहाशुक्रंपयोअस्यदुक्षत ३ अयंदेवानामुपसामुपस्तमोयोजजानुरोदंसीविश्वशंभुवा । वियोममेरजसीसुक्रतूययाजरेभिःस्कम्भनेभिः समानृचे ४ तेनोगृणानेमहिनीमहिश्रवःक्षत्रंद्यावापृथिवीधासथोबृहत् । येनाभिकृष्टीस्ततनामविश्वहापनाय्यमोजोअस्मेसमिन्वतम् ॥ ५ ॥ ३ ॥

किमु श्रेष्ठश्चतुर्दश दीर्घतमा ऋभवो जगती । अन्त्या त्रिष्टुप् ।

१६१ किमुश्रेष्ठःकिंयविष्ठोनआजगन्किमीयतेदूत्यं१ कद्यदूचिम । नानिन्दिमचमसंयोमहाकुलोऽग्नेभ्रातर्द्रुणइद्भूतिमूंदिम १ एकंचमसंचतुरःकृणोतन तद्देवाअब्रुवन्तदुआगमम् ।सौधन्वनायद्येवाकरिष्यथसाकंदेवैर्यज्ञियासोभविष्यथ २ अग्निंदूतंप्रतियदब्रवीतनाश्वःकर्व्वोरथंउतेहकर्त्वः । धेनुःकर्त्वीयुवशा कर्त्वाहातानिभ्रातरनुवःकृत्व्येमसि ३ चकृवांसंऋभवस्तदपृच्छतकेदंभद्यःस्य दूतोनआजगन् । यदावाख्यच्चमसाञ्चतुरःकृतानादित्त्वष्टाग्मास्वन्तन्यानजे ४ हनामैनाँइतित्वष्टायदब्रवीच्चमसंयेदेवपानमनिन्दिषुः । अन्यानामानिकृण्वते सुतेसचाँअन्यैरेनान्कन्या३ नामभिःस्परत् ५ ॥ ४ ॥ इन्द्रोहरीयुयुजेअश्विना रथंवृहस्पतिर्विश्वरूपामुषांजत । ऋभुर्विभ्वावाजोदेवाँअगच्छत्स्वपसोयज्ञियँ

॥ २९ ॥

भागमैतन ६ निश्चर्मणोगार्मारिणीतधीतिभिर्यजरन्तायुवशाताकृणोतन। सौध-
न्वनाअश्वादश्वमतक्षतयुक्त्वारथमुपदेवाँअयातन ७ इदमुदकंपिवतेत्यब्रवीतनेदं-
वाघापिवतामुजनेजनम्। सौधन्वनायदितन्नेवहर्यंथतृतीयेघासवनेमादयाध्वै ८
आपोभूयिष्ठाइत्येकोअब्रवीदग्निर्भूयिष्ठइत्यन्योअब्रवीत्। वधर्यन्तींवहुभ्यःप्रैको
अब्रवीद्दतावदन्तश्चमसाँअपिंशत ९ श्रोणामेकंउदकंगामवाजतिमांसमेकःपिं-
शतिसूनयाभृतम्। आनिम्रुचःशकृदेकोअपाभरत्किंस्वित्पुत्रेभ्यःपितराउपा-
वतुः १० ॥ ५ ॥ उद्वत्स्वंस्माअकृणोतनातृणंनिवत्स्वपःस्वपस्ययानरः। अगो-
ह्यस्ययदसंस्तनागृहेतद्वयेदमृभवोनानुगच्छथ ११ संमील्ययद्भुवनापर्यसर्पतक-
स्वित्तात्यापितरावआसतुः। आशंपतयःकरस्नेवआदेयःप्राब्रवीत्प्रोतस्माअब्र-
वीतन १२ सुषुप्वांसंऋभवस्तदपृच्छतागौह्यकइदंनोअबूबुधत्। श्वानंवस्तोवोध-

यितारमब्रवीत्संवत्सरइदमन्याव्यख्यत १३ दिवायान्तिमरुतोभूम्याग्निरयंवातो-
अन्तरिक्षेणयाति।अद्भियाँतिवरुणःसमुद्रैर्युष्माँइच्छन्तःशवसोनपातः ॥१४॥६॥

मा नो द्वाविंशतिर्दीर्घतमा अश्विन्त्रिष्टुप्। तृतीयापङ्क्त्यौ जगत्यौ।

१६२ मानोमित्रोवरुणोअर्यमायुरिन्द्रऋभुक्षामरुतःपरिख्यन् । यद्वाजिनो
देवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्याणि १ यन्निर्णिजारेक्णसाप्रावृतस्यरातिं
गृभीतांमुखतोनयन्ति । सुप्राङजोमेम्यद्विश्वरूपइन्द्रापूष्णोःप्रियमप्येतिपाथः २
एषच्छागःपुरोअश्वेनवाजिनापूष्णोभागोनीयतेविश्वदेव्यः। अभिप्रियंयत्पुरोळा-
शमर्वतात्वष्टेदेनंसौश्रवसायजिन्वति ३ यद्विष्यमृतुशोदेवयानंत्रिर्मानुषाः
पर्यश्वंनयन्ति । अत्रापूष्णःप्रथमोभागएतियज्ञंदेवेभ्यःप्रतिवेदयन्नजः ४ होता-
ध्वर्युरावयाअग्निमिन्धोग्रावग्राभउतशंस्तासुविप्रः । तेनयज्ञेनस्वरंकृतेनास्विष्टेन

वृक्षणाआपृणध्वम् ॥ ५ ॥ ७ ॥ यूपव्रस्काउतयेयूपवाहाश्चषालंयेअश्वयूपायत-
क्षंति । येचावँतेपचनंसंभरंन्त्युतोतेषांमभिर्गूर्तिर्नइन्वतु ६ उपप्रागात्सुमन्मे
ऽधायिमन्मंदेवानामाशाउपवीतपृष्ठः।अन्वेनंविप्राऋषयोमदन्तिदेवानांपुष्टेचकु-
मासुवन्धुम् ७ यद्वाजिनोदामसंदानमवँतोयाशीर्ष्ण्यारशनारज्जुरस्य।यद्वाघास्य
प्रभृतमास्ये ३ तृणंसर्वाताते।अपिदेवेष्वस्तु ८ यदश्वस्यक्रविषोमक्षिकाशयद्वा
स्वरौस्वधितौरिप्तमस्ति । यद्धस्तयोःशमितुर्यन्नखेषुसर्वाताते।अपिदेवेष्वस्तु ९
यदूवध्यमुदरस्यापवाति।यआमस्यक्रविषोगन्धोअस्ति । सुकृतांच्छमितारःकृ-
ण्वंतूतमेधंशृतपाकंपचन्तु १० ॥ ८ ॥ यत्तेगात्रादग्निनापच्यमानादभिशूलं
निहंतस्यावधावंति। मातद्भूम्यामाश्रिषन्मातृणेपुदेवेभ्यस्तदुशद्भ्योरातमस्तु ११
येवाजिनंपरिपश्यंन्तिपक्वंयईमाहुःसुरभिर्निहरेति। येचावँतोमांसभिक्षामुपासत

उतोतेपामभिगूर्तिर्नइन्वतु १२ यन्नीक्षणंमांस्पचन्याउखायायापात्राणियूष्ण आसेचनानि । ऊष्मण्यापिधानाश्चरूणामङ्गःसूनाःपरिभूषन्त्यश्वम् १३ निक्रमणंनिषदनंविवर्तनंयच्छपड्वीशमवैतः । यच्छपपौयच्छघासिंजघासंसर्वातातेअपिदेवेष्वस्तु १४ मात्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखाभ्राजन्त्यभिविक्तजघ्रिः । इष्टंवीतमभिगूर्तंवषट्कृतंतंदेवासःप्रतिगृभ्णन्त्यश्वम् १५ ॥ १ ॥ यदश्वायवासंउपस्तृणन्त्यधीवासंयाहिरण्यान्यस्मैसंदानमवैन्तंपड्वीशंप्रियादेवेष्वायामयन्ति १६ यत्तेसादेमहसाशूकृतस्यपाष्ण्यावाकशायावातुतोद । स्रुचेवताहविषोअध्वरेषुसर्वातातेब्रह्मणासूदयामि १७ चतुस्त्रिंशद्वाजिनोदेवबन्धोर्वङ्क्रीरश्वस्यस्वधितिः समेति । अच्छिद्रागात्रावयुनाकृणोतपरुष्परुरनुघुष्याविशस्त १८ एकस्त्वष्टुरश्वस्याविशस्ताद्वायुन्तारामवतस्तथर्तुः । यातेगात्राणामृतुथाकृणोमितातापि

पिण्डानांप्रजुहोम्यग्नौ ११ मा त्वातपत्प्रियआत्मापियन्तंमास्वधितिस्तन्वं १
आतिष्ठिपत्ते। मातेगृध्नुरविशस्तातिहायच्छिद्रागात्राण्यसिनामिथूकः २० न वा
उएतिन्म्रियसेनीरप्यासिदेवाँइदेषिपथिभिःसुगेभिः । हरीतेयुञ्जापृषतीअभूतामु-
पास्थाद्वाजीधुरिरासंभस्य २१ सुगव्यंनोवाजीस्वश्व्यंपुंसःपुत्राँउतविश्वापुषं
रयिम्। अनागास्त्वंनोअदितिःकृणोतुक्षत्रंनोअश्वोवनतांहविष्मान् २२॥ १०॥

यदक्रन्दस्त्रयोदश दीर्घतमा अश्वास्त्रिष्टुप् ।

१६३ यदक्रन्दःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात् । श्येनस्यपक्षा
हरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन् १ यमेनदत्तंत्रितएनमायुनगिन्द्रएणंप्र-
थमोअध्यतिष्ठत् । गन्धर्वोअप्सरशनामगृभ्णात्सूरादश्वंवसवोनिरतष्ट २ असि
यमोअस्यादित्योअर्वन्नसित्रिोगुहोनव्रतेन । असिसोमेनसमयाविपृक्तआहुस्ते

त्रीणिदिविवन्धनानि ३ त्रीणितआहुर्दिविवन्धनानित्रीण्यप्सुत्रीण्यन्तःसमुद्रे । उतेवमेवरुणश्छंत्स्यर्वन्यत्रांतगृहुःपरमंजनित्रम् ४ इमातेवाजिन्नवमार्जनानीमाग्नफानांसनितुर्निवानां । अत्रांतेभद्रारशनाअपश्यमृतस्ययाअभिरक्षन्तिगोपाः ५ ॥ ११ ॥ आत्मात्तेमनसारादजानामवोदिवापतयन्तंपतङ्गम् । शिरोअपश्यंपथिभिःसुगेभिररेणुभिर्जेहमानंपतत्रि ६ अत्रांतेरूपमुत्तममपश्यं जिगींषमाणमिषआपदेगोः । यदातमर्तोअनुभोगमानळादिद्ग्रसिष्ठओषधीरजीगः ७ अनुत्वारथोअनुमर्योअर्वन्ननुगावोऽनुभगःकनीनाम् । अनुव्रातासस्तवसख्यमीयुरनुदेवामामिरेवीर्यते ८ हिरण्यशृङ्गोऽयोअस्यपादामनोजवाअवरइन्द्र आसीत् । देवाइदस्यहविरद्यमायन्योअर्वन्तंप्रथमोअध्यतिष्ठत् ९ ईर्मांतासःसिलिकमध्यमासःसंशूरणासोदिव्यासोअत्याः । हंसाइवश्रेणिशोयतन्तेयदाक्षिषुः

दिव्यमज्मन्मश्वाः १० ॥ १२ ॥ तवशरीरंपतयिष्ण्वर्वन्तवंचित्तंवातइव ध्रजीमान् । तवशृङ्गाणिविष्ठितापुरुत्रारण्येषुजभुराणाचरन्ति ११ उपप्रागाच्छ-सनंवाज्यर्वीदेवद्रीचामनसादीध्यानः । अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयो यन्तिरेभाः १२ उपप्रागात्परमंयत्सधस्थमर्वाँअच्छापितरंमातरंच । अद्या देवाञ्जुष्टतमोहिगम्याअथाशास्तेदाशुषेवार्याणि १३ ॥ १३ ॥

अस्य द्विपञ्चाशद्दीर्घतमा विश्वेदेवाः । द्विचत्वारिंशत्तम्याः पूर्वार्धस्य वाक् । उत्तरार्धस्याऽऽपः । त्रिचत्वारिंशत्तम्याः पूर्वार्धस्य शकधूमः । उत्तरार्धस्य सोमः । चतुश्चत्वारिंशत्तम्या अग्निःसूर्यो वायुश्च । पञ्चचत्वारिंशत्तम्या वायुः । ततो द्वयोः सूर्यः । अष्टाचत्वारिंशत्तम्याः कालः । ऊनपञ्चाशत्तम्याः सरस्वती । पञ्चाशत्तम्याः साध्याः । एकपञ्चाशत्तम्याः सूर्यः पर्जन्याग्नी वा । द्विपञ्चाशत्तम्याः सरस्वान् सूर्यो वा । द्वादशीपञ्चदशीत्रयोविंशतितम्येकोनत्रिंशत्तमीषट्त्रिंशत्तम्यकचत्वारिंशत्तम्यो जगत्यः । द्विचत्वारिंशत्तमी भुरिक्पङ्क्तिः । एकपञ्चाशत्तम्यनुष्टुप् । शिष्टास्त्रिष्टुभः ।

१६४ अस्यवामस्यपलितस्यहोतुस्तस्यभ्रातामध्यमोअस्त्यश्नः । तृतीयो भ्रातांघृतपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रम् १ सप्तयुञ्जन्तिरथमेकंचक्रमेकोअश्वोवहतिसप्तनामा । त्रिनाभिचक्रमजरंमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः २ इमंरथमधियेसप्ततस्थुःसप्तचक्रंसप्तवहन्त्यश्वाः । सप्तस्वसारोअभिसंनवंतेयत्र गवांनिहितासप्तनाम ३ कोददर्शप्रथमंजायमानमस्थन्वन्तंयदनस्थाबिभर्ति । भूम्याअसुरसृगात्माक्वस्वित्कोविद्वांसमुपगात्प्रष्टुमेतत् ४ पाकःपृच्छामिमनसाविजानन्देवानामेनानिहितापदानि । वत्सेवष्कयेऽधिसप्ततन्तून्वितंन्निरेकवयओतवाउ ५ ॥ १४ ॥ अचिकित्वाञ्चिकितुषश्चिदत्रकवीन्पृच्छामिविद्मनेनविद्वान् । वियस्तस्तम्भषळिमारजांस्यजस्यरूपेकिमपिस्विदेकम् ६ इहब्रवीतुयइमञ्चवेदास्यवामस्यनिहितंपदंवेः । शीर्ष्णःक्षीरंदुह्रतेगावोअस्यवव्रिंवसानाः

उदकंपदापुः ७ मातापितरंमृतआवभाजधीत्यग्रेमनसासंहिजग्मे । सावीभत्सु-
गर्भरसानिविद्वानमंस्वन्तइदुपवाकमीयुः ८ युक्तामातासीद्धुरिदक्षिणायाअति-
ष्ठद्गोवृजनीष्वन्तः । अर्मीमेह्वत्सोअनुगामपश्यद्विश्वरूप्यंत्रिपुयोजनेषु ९ तिस्रो
मातॄस्त्रीन्पितॄन्बिभ्रदेकऊर्ध्वस्तस्थौनेमवग्लापयन्ति । मन्त्रयन्तेदिवोअमुष्यपृष्ठे
विश्वविदंवाचमविश्वमिन्वाम् १० ॥ १५ ॥ द्वादशारंनहितज्जरायवर्वर्तिचक्रं
परिद्यामृतस्य । आपुत्राअग्नेमिथुनासोअत्रसप्तशतानिविंशतिश्चतस्थुः ११
पञ्चपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणम् । अथेमेअन्यउपरेविचक्षणं
सप्तचक्रेषळरआहुरर्पितम् १२ पञ्चारेचक्रेपरिवर्तमानेतस्मिन्नातस्थुर्भुवनानि
विश्वा । तस्यनाक्षस्तप्यतेभूरिभारःसनादेवनशीर्यतेसनाभिः १३ सनेमिचक्र-
मजरंविवायदृतउत्तानायांदशयुक्तावहन्ति । सूर्यस्यचक्षूरजसैत्यावृतंतस्मिन्नार्पि-

ताभुवनानिविश्वा १४ साकज्ञानीसप्तथमाहुरेकजंपाळिद्यमाक्रपयोदेवजाइति । तेपामिष्टानिविहितानिधामशःस्थात्रेरेजन्तेविकृतानिरूपशः १५ ॥ १६ ॥ स्त्रियःसतीस्ताँउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदन्धः । क्रविर्यःपुत्रःसईमाचिकेतयस्तावित्जानात्सपितुष्पितासत् १६ अवःपरेणपरएनावरेणपदावत्संविभ्रतीगौरुदस्थात् । साकद्रीचीकंस्विदर्धंपरागात्कंस्वित्सूतेनहियूथेअन्तः १७ अवःपरेणपितरंयोअस्यानुवेदपरएनावरेण । कवीयमानःकइहप्रवोचद्देवंमनः कुतोअधिप्रजातम् १८ येअर्वाञ्चस्ताँउपराचआहुर्येपराञ्चस्ताँउअर्वाचआहुः । इन्द्रश्चयाचक्रथुःसोमतानिवुरानयुक्तारजसोवहन्ति १९ द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्योअभिचाकशीति २० ॥ १७ ॥ यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरन्ति । इनो

विश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश २१ यस्मिन्वृक्षेमध्वदःसुपर्णानिविशन्तेसुवंतेचाधिविश्वे । तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंन वेद २२ यद्गायत्रेअधिगायत्रमाहितंत्रैष्टुभाद्वात्रैष्टुभंनिरतक्षत । यद्वाजगज्जगत्याहितंपदंयइत्तद्विदुस्तेअमृतत्वमानशुः २३ गायत्रेणप्रतिमिमीतेअर्कमर्केणसामत्रैष्टुभेनवाकम् । वाकेनवाकंद्विपदाचतुष्पदाक्षरेणमिमतेसप्तवाणीः २४ जगंतासिन्धुंदिव्यस्तभायद्रथन्तरेसूर्यंपर्यपश्यत् । गायत्रस्यसमिधस्तिस्रआहुस्ततो मह्नाप्ररिरिचेमहित्वा २५ ॥ १८ ॥ उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनाम् । श्रेष्ठंसवंसवितासाविषन्नोऽभीद्धोघर्मस्तदुषुप्रवोचम् २६ हिङ्कृण्वतीवसुपत्नीवसूनांवत्समिच्छन्तीमनसाभ्यागात् । दुहामश्विभ्यांपयोअघ्येयंसावर्धतांमहतेसौभगाय २७ गौरमीमेदनुवत्समिष्यन्तंमूर्धानंहिङ्कृणोन्मातवाउ ।

सृक्काणंघर्ममभिवावशानामिमांतिमायुंपर्यंतेपयोभिः २८ अयंसशेंऽक्तेयेनुगौ-
रभीवृतामिमांतिमायुंध्वसनावधींश्रिता । साचित्तिभिर्निहिचकारमर्त्यंविद्युद्र-
वन्तीप्रतिवव्रिमौहत २९ अनच्छयेतुरगांतुजीवमेजद्ध्रुवंमध्यआपस्त्यानाम् ।
जीवोमृतस्यचरतिस्वधाभिरमर्त्योमर्त्येनासयोनिः ३० ॥ ११ ॥ अपश्यंगोपा-
मनिपद्यमानमाचपराचपथिभिश्चरन्तम् । ससध्रीचीःसविषूचीर्वसानआवरीवर्ति
भुवनेष्वन्तः ३१ य ईंचकारनसोअस्यवेदय ईंददर्शहिरुगिन्नुतस्मात् । समातुर्यो-
नापरिवीतोअन्तर्बहुप्रजानिर्ऋतिमाविवेश ३२ द्यौर्मेपिताजनितानाभिरत्रब-
न्धुर्मेमातापृथिवीमहीयम् । उत्तानयोश्चम्वो ३ र्योनिरन्तरत्रापितादुहितुर्गर्भमा-
धात् ३३ पृच्छामित्वापरमंतंपृथिव्याःपृच्छामियत्रभुवनस्यनाभिः । पृच्छामि
त्वावृष्णोअश्वस्यरेतःपृच्छामिवाचःपरमंव्योम ३४ इयंवेदिःपरोअन्तःपृथिव्या

अयंयज्ञोभुवनस्यनाभिः । अयंसोमोवृष्णोअश्वस्यरेतोब्रह्मायंवाचःपरमंव्योम ३५ ॥ २० ॥ सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठन्तिप्रदिशाविधर्मणि । तेधीतिभिर्मनसातेविपश्चितःपरिभुवःपरिभवन्तिविश्वतः ३६ नविजानामियदिवेदमस्मिन्निण्यःसंनद्धोमनसाचरामि । यदामागन्प्रथमजाऋतस्यादिद्वाचोअंभुवेभागमस्याः ३७ अपाङ्प्राङेतिस्वधयागृभीतोऽमर्त्योमर्त्येनासयोनिः । ताशश्वन्ताविपूचीनावियन्तान्यं न्यंचिक्युर्ननिचिक्युरन्यम् ३८ ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः।यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासते ३९ सूयवसाद्भगवतीहिभूयाअथोवयंभगवन्तःस्याम । अद्धितृणमद्मयेविश्वदानींपिबशुद्धमुदकमाचरन्ती ४० ॥ २१ ॥ गौरीर्मिमायसलिलानि तक्षत्येकपदीद्विपदीसाचतुष्पदी । अष्टापदीनवपदीबभूवुषींसहस्राक्षरापरमेव्योम

मन् ४१ तस्याःसमुद्राअधिविक्षरन्तितेनजीवन्तिप्रदिशश्चतस्रः । ततःक्षरत्यक्षरं तद्विश्वमुपजीवति ४२ शकमयंधूममारादपश्यंविषूवतापरएनावरेण । उक्षाणं पृश्निमपचन्तवीरास्तानिधर्मांणिप्रथमान्यासन् ४३ त्रयःकेशिनऋतुथाविचक्षते संवत्सरेवपतएकएषाम् । विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरेकस्यदद्दृशेनरूपम् ४४ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेङ्गयन्तितुरीयंवाचोमनुष्यावदन्ति ४५ इन्द्रंमित्रंवरुणमग्निमाहुरथोदिव्यः ससुपर्णोगुरुत्मान् । एकंसद्विप्राबहुधावदन्त्यग्निंयमंमातरिश्वानमाहुः४६॥२२॥ कृष्णंनियानंहरयःसुपर्णाअपोवसानादिवमुत्पतन्ति। तआववृत्रन्त्सदनादृतस्यादिद्धृतेनपृथिवीव्युद्यते ४७ द्वादशप्रधयश्चक्रमेकंत्रीणिनभ्यानिकउतच्चिकेत । तस्मिन्त्साकंत्रिशतानशंकवोऽर्पिताःषष्टिर्नचलाचलासः ४८ यस्तेस्तनःशशयो

योमयोभूर्यनविश्वापुष्यसिवार्याणि । योरत्नधावसुविदःसुदत्रःसरस्वतितमि-
हधातवेकः ४९ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकं
महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः ५० समानमेतदुदकमुच्चैत्यवचा-
हभिः । भूमिंपर्जन्याजिन्वन्तिदिवंजिन्वन्त्यग्नयः५१ दिव्यंसुपर्णंवायसंबृहन्तंम-
पांगर्भंदर्शतमोषधीनाम् । अभीपतोवृष्टिभिस्तर्पयन्तंसरस्वन्तमवसेजोहवीमि
५२ ॥ २३ ॥ इति शाकलसंहितायां प्रथमे मण्डले द्वाविंशोऽनुवाकः ॥ २२ ॥

कया पञ्चदशेन्द्रो मरुत्वानिन्द्रस्त्रिष्टुप् । तृतीयापञ्चमीसप्तमी-
नवमीनां मरुतः । अन्त्यानां तिसृणामगस्त्यः ।

१६५कयाशुभासवयसःसनीळाःसमान्यामरुतःसंमिमिक्षुः । कयामतीकु-
तएतासएतेऽर्चन्तिशुष्मंवृषणोवसूया १ कस्यब्रह्माणिजुजुषुर्युवानःकोअध्वरेम-

रुतआववर्त। श्येनाँइवध्रजतोअन्तरिक्षेकेनंमहामनसारीरमाम २ कुतस्त्वमिन्द्र माहिनःसन्नेकोयासिसत्पतेकिंतइत्था। संपृच्छसेसमराणःशुभानैर्वोचेस्तन्नोहरिवोयत्तेअस्मे ३ ब्रह्माणिमेमतयःशंसुतासःशुष्मंइयर्तिप्रभृतोमेअद्रिः। आशासतेप्रतिहर्यन्त्युक्थेमाहरीवहतस्तानोअच्छ ४अतोवयमन्तमेभिर्युजानाःस्वक्षत्रेभिस्तन्वः शुम्भमानाः। महोभिरेताँउपयुज्महेन्विन्द्रस्वधामनुहिनोवभूथ ५ ॥ २४ ॥ कं स्यावोमरुतःस्वधासीद्यन्मामेकंसमधत्ताहिहत्ये। अहंह्युग्रस्तविषस्तुविष्मान्विश्वस्यशत्रोरनमंवधस्नैः ६ भूरिचकर्थयुज्येभिरस्मेसमानेभिर्वृषभपौंस्येभिः। भूरीणिहिकृणवामाशविष्ठेन्द्रक्रत्वामरुतोयद्दशाम ७ वधीवृत्रंमरुतइन्द्रियेणस्वेनभामेनतविषोबभूवान्। अहमेतामनवेविश्वश्चन्द्राःसुगाअपश्चकरवज्रबाहुः ८ अनुत्तमातेमघवन्नकिर्नुनत्वावाँअस्तिदेवताविदानः॥

नजायमानोनशतेनजातोयानिकरिष्याकृणुहिप्रवृद्ध १ एकस्याचिन्मेविभ्वं १-
स्वोजोयानुदधृष्वान्कृणवैमनीषा । अहंह्यु १ ग्रोमरुतोविदानोयानिच्यवमिन्द्र
इदीशएषाम् १० ॥२५॥ अमन्दन्मामरुतःस्तोमोअत्रयन्मेनरःश्रुत्यंब्रह्मचक्र ।
इन्द्रायवृष्णेसुमखायमह्यंसख्येसखायस्तन्वेतनूभिः ११ एवेदेतेप्रतिमारोचमा-
नाअनेद्यःश्रवएषोदधानाः । संचक्ष्यामरुतश्चन्द्रवर्णाअच्छान्तमेछदयाथाचनू-
नम् १२कोन्वत्रमरुतोमामहेवःप्रयातनसखीरच्छासखायः।मन्मानिचित्राअपि-
वातयन्तएषांभूतनवेदामऋतानाम् १३आयद्रुवस्याद्रुवसेनकारुरस्माञ्चक्रेमान्य-
स्यमेधा । ओषुवर्तमरुतोविप्रमच्छेमाब्रह्माणिजरितारोअर्चत १४ एषवःस्तो-
मोमरुतइयंगीर्मान्दार्यस्यमान्यस्यकारोः । एषायासीष्टतन्वेवयांविद्यामेषंवृजनं
जीरदानुम् १५ ॥ २६ ॥ इति शाकलर्क्संहितायां द्वितीयाष्टके तृतीयोऽध्यायः॥३॥

तच्चगस्त्येमारुतंहिद्वित्रिष्टुवन्तंमित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसंदृष्ट्वासतीवरेकुम्भेरेतोऽप तत्ततोऽगस्त्यवासिष्ठावजायेतांसहस्रमेकादशाद्यैन्द्री यज्ञायज्ञादश त्रिष्टुवन्तं महोष्टौद्वितीयाविराण्ननूनं पञ्चागस्त्येनेन्द्रेहविषिमरुतामुग्रतइन्द्रागस्त्ययोःसंवाद ऐन्द्रस्तत्राद्यातृतीयाचेन्द्रवाक्यंचतुर्थीचादौब्द-हतीतिस्रोनुष्टुभः मतिवः षण्मारुतंतुचतस्रोन्त्यामरुत्वतीया श्रित्रस्तृचंगायद्गायत्सप्तोनात्वंराजादश-मतिसप्त्यानुष्टुभंतुत्रिष्टुवन्तंत्वाद्यास्कन्धोग्रीवीवामतिसनआचर्षणिप्राः पञ्चयद्वस्यापूर्वीःषड्जायापत्यो-र्लोपामुद्रायाअगस्त्यस्यचद्रुचाभ्यांरत्यर्थं संवादंश्रुत्वोन्तवासी ब्रह्मचर्यन्तेवृहत्सादीअपश्यद्युत्रोदशा श्विनंवैकदुनवाभूदिदमष्टौपश्यन्त्रैष्टुभौतंयुञ्जाथांपट् ॥

तत्तु पञ्चदशागस्त्यो मरुतो जगती । अन्त्ये त्रिष्टुभौ ।

१६६ॐम् तन्नुवोचामरभसायुजन्मनेपूर्वंमहित्वंवृषभस्यकेतवेऽएधेव्यामन्म-रुतस्तुविष्वणोयुधेवंशक्रास्तविषाणिकर्तन १ नित्यंनसूनुंमधुबिभ्रतउपक्रीळन्ति क्रीळाविदथेषुघृष्वयः। नक्षन्तिरुद्राअवसानमस्विनंनमर्धन्तिस्वतवसोहविष्कृ-

तंम्२यस्मा॒ऊमां॑सोअ॒मृता॒अरां॑सतरा॒यस्पोषं॑चह॒विषां॑ददा॒शुषे॑।उ॒क्षन्त्य॑स्मैम॒रुतो॑ हि॒ताइ॑वपु॒रूरजां॑सिपर्यसामयो॒भुवः॑ ३ आये॒रजां॑सि॒तवि॑षीभि॒रव्य॑तप्रव॒एवा॑सः स्वय॑तासोअध्रजन् । भर्यन्ते॒विश्वा॒भुव॑नानिह॒म्र्याचि॒त्रोवो॒यामः॒प्रय॑तास्वृ॒ष्टिषु॑ ४ यत्त्वे॒षयामा॒नदय॑न्त॒पर्व॑तान्दि॒वोवा॑पृ॒ष्ठंन॑र्याअचु॒च्यवुः । विश्वो॑वो॒अज्म॑न्भयते॒ वन॒स्पतीं॑रथी॒यन्तीं॑व्र॒जिंहीत॒ओष॑धीः ५ ॥ १ ॥ यूयं॑नउग्रामरुतः॒सुचे॑तुनारि॑ष्ट-ग्रामाः॒सुम॒तिंपि॑पर्तन। यत्रा॑वो॒दिद्यु॒द्रद॑ति॒क्रिवि॑र्दतीरि॒णाति॑पृ॒श्वःसुधि॑तेवब॒र्हणा॑ ६ प्रस्क॒म्भदे॑ष्णाअनव॒भ्ररा॑धसोऽला॒तृणा॑सो॒विद॑थे॒ष्वृ॒ञ्जसे॑ । अच्छ॑न्त्य॒र्कंम॑दि॒र-स्य॑पी॒तये॑विदु॒र्वी॒रस्य॑प्रथ॒मानि॒पौंस्या॑ ७ ग॒तभु॑जि॒भि॒स्तम॒भि॒हु॒तेर॒घात्पू॒र्भीर॑क्ष-तामरुतो॒यमाव॑त । जन॑यमु॒ग्रास्त॒वसो॒विरा॑ज्ञिनः॒पाथ॑ना॒शंसा॒त्तन॑यस्यपु॒ष्टिषु॑ ८ विश्वा॑नि॒भद्रा॑मरुतो॒रथे॑षु॒वो॒मि॒थस्पृ॒ध्येव॑तवि॒षाण्याहि॑ता । अंसे॑ष्वा॒वः॒प्रप॑थे॒षु

खादयोऽक्षोवश्चक्रासमयाविवावृते ॥ भूरीणिभद्रानयेषुवाहुषुवक्षःसुरुक्मारभ-
तासोअञ्जयः । अंसेष्वेताःपविषुक्षुराअधिवयोनपक्षान्व्यनुश्रियोधिरे १०॥ २ ॥
महान्तोमह्नाविभ्वो ॥ विभूतयोदरेदृशोयेदिव्याइवस्तृभिः । मन्द्राःसुजिह्वाःस्व-
रितारआसभिःसंमिश्लाइन्द्रेमरुतःपरिष्टुभः ११ तद्वःसुजातामरुतोमहित्वनंदी-
घ्रंवोदात्रमदितेरिवव्रतम् । इन्द्रश्चनत्यजसाविहुणातितज्जनायययस्मैसुकृतेअरा-
ध्वम् १२ तद्वोजामित्वंमरुतःपरेयुगेपुरूयच्छंसंममृतासुआवत।अयाधियामन-
वश्रुष्टिमाव्यासाकंनरोदंसनैराचिकित्रिरे १३ येनंवोघंमरुतःशूशवांमयुष्माकेन
परीणसातुरासः । आयत्तनंन्वृजनेजनासएभिर्यज्ञेभिस्तदभीष्टिमश्याम् १४
एषवःस्तोमोमरुतइयंगीर्मान्दार्यस्यमान्यस्यकारोः । एषायांसीष्टतन्वेवयांविद्या-
मेषंवृजनंजीरदानुम् १५ ॥ ३ ॥

सहस्रमेकादशागस्त्यो मरुतश्चिष्टुप् । आद्यायाः इन्द्रः ।

१६७ सहस्रंतइन्द्रोतयोनःसहस्रामिषोहरिवोगूर्ततमाः । सहस्रंरायोमादयध्यै सहस्रिणउपनोयन्तुवाजाः १ आनोऽवोभिर्मरुतोयान्त्वच्छाज्येष्ठेभिर्वावृधानैवैः सुमायाः । अधयदेषांनियुतःपरमाःसमुद्रस्यचिद्धनयन्तपारे २ मिम्यक्षयेषुसुधितावृताचीहिरण्यनिर्णिगुपरानकृष्टिः । गुहाचरन्तीमनुषोनयोषासुभावतीविदथेवसंवाक् ३ परांशुभ्राअयासोयुग्यासोधारण्येवंमरुतोमिमिक्षुः । नरोवसी अपनुदन्तघोराजुषन्तवृधंसख्यायदेवाः ४ जोवृधदीमसुर्यांसचध्यैविपितस्तुकारोदसीनृमणाः । आसूर्यंवविधतोरथंगात्वेषप्रतीकानभसोनेत्या५॥४॥ आस्थापयन्तयुवतिंयुवानःशुभेनिमिंश्लांविदथेषुपज्राम् । अर्कोयद्वोमरुतोहविष्मान्गायद्वाथंसुतसोमोदुवस्यन् ६ प्रतंविवक्मिवक्म्योयएषांमरुतांमहिमास्त्योअस्ति ।

सचायद्वीर्यमगाअहंयुःस्थिराचिज्जनीर्वहतेसुभागाः ७ पान्तिमित्रावरुणावव्-
याच्चर्यतईमर्यमोअप्रशस्तान् । उतच्यवन्तेअच्युताध्रुवाणिवावृधईमरुतोदातिं-
वारः ८ नहीनुवोमरुतोअन्यस्मेआरात्ताच्छिच्छवसोअन्तमापुः । तेधृष्णुनाशव-
साशूशुवांसोऽर्णोनद्वेपोधूपतापरिष्ठुः ९ वयमद्येन्द्रस्यप्रेष्ठावयंश्वोवाचेमहिस-
मयोवयंपुरामहिंचनोअनुद्यून्त्रक्षभुक्षानरामनुष्यात् १० एषवःस्तोमोमरुत
इयंगीर्मान्द्यार्यस्यमान्यस्यकारोः । एषायासीष्टतन्वेवयांविद्यामेषंवृजनंजीर-
दानुम् ११ ॥ ५ ॥

यज्ञायज्ञा दशागस्त्यो मरुतो जगती । अन्त्यास्तिस्रस्त्रिष्टुभः ।

१६८ यज्ञायज्ञावःसमनातुतुर्वणिर्धियंधियंवोदेवयाउदाविध्वे । आवोऽर्वाचः
सुवितायरोदस्योर्महेवंवृत्यामवसेसुवृक्तिभिः १ वज्रासोनयेस्वजाःस्वर्वसइषुं

स्वरभिजार्यन्तधूतयः । सहस्रियासोअपांनोर्मयंआसागावोवन्द्यासोनोक्षणः २ सोमासोनयेसुतास्तृप्तांशवोहृत्सुपीतासोदुवसोनासते । ऐषामंसेपुरुभृणीवरारभेहस्तेपुखादिश्वकृतिश्चसंदधे ३ अवस्वयुक्तादिवआवृथायुरमर्त्याःकशया चोदतत्मना । अरेणवस्तुविजाताअचुच्यवुर्दृळ्हानिचिन्मरुतोभ्राजदृष्टयः ४ कोवोऽन्तमंरुतऋष्टिविद्युतोरेजंतित्मनाहन्वैवजिह्वया । धन्वच्युतइवांनयामंनिपुरुप्रैषांअहन्योऽनैतंशः ५ ॥ ६ ॥ कस्मिदस्यरजसोमहस्परंकावरंमरुतोयस्मिन्नायय । यद्यावयंथाविथुरेवसंहितंव्यद्रिंणापतथन्वेषमर्णवम् ६ सातिर्नवोऽमवतीस्वर्वतीत्वेषाविपांकामरुतःपिपिष्वती । भद्रावोरातिःपृणतोनदक्षिणापृथुज्रयीअसुर्यैवजजंती ७ प्रतिष्टोभन्तिसिन्धवःपविभ्योयदभ्रियांवाचमुदीरयन्ति । अवस्मयन्तविद्युतःपृथिव्यांयदीघृतंमरुतःप्रुष्णुवन्ति ८ असूतपृश्निर्महतेरणाय

त्वेषमयासांमरुतामनीकम्। ते संप्सरासोऽजनयन्ताभ्रमादित्स्वधामिरिरांपयँ पश्यन् १ एषवःस्तोमोमरुतइयंगीर्मान्दार्यस्यमान्यस्यकारोः। एषायांस्तिष्टतुन्वे वयांविद्यामेषंवृजनंजीरदानुम् १० ॥ ७ ॥

महोऽष्टावगस्त्य इन्द्रस्त्रिष्टुप्। द्वितीया चतुष्पदा विराट्।

१६१ महश्चित्त्वमिन्द्रयतएतान्महश्चिदसित्यजसोवरूता। सनोवेधोमरुतांचिकित्वान्त्सुम्नावनुष्वतवहिप्रेष्ठा १ अयुज्रन्तइन्द्रविश्वकृष्टीर्विदानासोनिष्पधोमर्त्यत्रा। मरुतांपृत्सुतिर्हासमानास्त्मन्मीळ्हस्यप्रधनस्यसातौ २ अभ्यक्तातइन्द्रऋष्टिरस्मेसनेम्यस्त्वमरुतोजुनन्ति। अग्निश्चिद्विष्मातसेशुशुक्वानापोनद्रीपंदधति प्रयांसि ३ त्वंतूनइन्द्रतरायिंदाओजिष्ठयादक्षिणयेवरातिम्। स्तुतश्चयास्तेचकन्नन्तवायोःस्तनंनमध्वःपीपयन्तवाजैः४ त्वेरायइन्द्रतोशतमाःप्रणेतारःकस्यचिह-

तायोः । तेपुणोमरुतोमृळयन्तुयेस्मापुरागातूयन्तीवदेवाः ५॥८॥ प्रतिप्रयाहीन्द्र मीळ्हुषोनॄन्महःपार्थिवेसदनेयतस्वाअधयदेषांपृथुबुध्नासएतास्तिर्थेनार्यःपौंस्यानि तस्थुः ६ प्रतिघोराणामेतानामयासांमरुतांशृण्वआयतामुपब्दिः । येमर्त्यंपृतनायन्तमूमैर्ऋणावानंनपृतयन्तसर्गैः ७ त्वंमानेभ्यइन्द्रविश्वजन्यारदोमरुद्भिःशुरुधोगोअग्राः । स्तवानेभिःस्तवसेदेवदेवैर्विद्यामेषंवृजनंजीरदानुम् ८ ॥ १ ॥

ननूनं पञ्चागस्त्य इन्द्रः । द्वितीयापञ्चम्योरगस्त्यः ।
आद्या बृहती । ततस्तिस्रोऽनुष्टुभः । अन्त्या त्रिष्टुप् ।

१७०ननूनमस्तिनोश्वःकस्तद्वेदयदद्भुतम्।अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्यति १ किंनइन्द्रजिघांससिभ्रातरोमरुतस्तव । तेभिःकल्पस्वसाधुयामानःसमरणेवधीः २ किंनोभ्रातरगस्त्यसखासन्नतिमन्यसे । विद्माहितेयथामनो-

ऽस्मभ्यमित्रदित्ससि ३ अरंकृण्वन्तुवेदिंसमग्निमिंन्वतांपुरः।तत्रामृतंस्युचेतंनंयज्ञंतंतनवावहै ४ त्वमींशिषेवसुपतेवसूनांत्वंमित्राणांमित्रपतेधेष्ठः । इन्द्रत्वंमरुद्भिःसंवदस्वाधप्राशानऋतुधाहवींषि ५ ॥ १० ॥

मति वः पण्णगस्त्यो मरुतास्त्रिष्टुप्। अन्यानां चतसृणां मरुत्वानिन्द्रः ।

१७१ प्रतिंवएनानमंसाहमेंमिस्तृक्तेनंभिक्षेसुमतिंतुराणाम् । ररांणतांमरुतोवेद्याभिर्हिहेळोंधत्तविमुंचध्वमश्वान् १ एषवःस्तोमोंमरुतोनमस्वान्हृदातष्टोमनंसाधायिदेवाः । उपेमायांतमनंसाजुषाणायूयंहिष्ठानमंसइद्धवासः २ स्तुतासोंनोमरुतोंमृळयन्तूतस्तुतोमघवाशंभंविष्ठः। ऊर्ध्वानःसन्तुकोम्यावनान्यहांनिविश्वांमरुतोजिगीषा ३ अस्मादहंतंविषादीषमाणइन्द्राद्रियामरुतोरेजमानः । युष्मभ्यंहव्यानिशिंतान्यासन्तान्यारेचंकुमामृळतानः ४ येनुमानांसश्चितयंन्त

उस्राव्युष्टिषुशर्वसाशश्वतीनाम्। सनोमरुद्भिर्वृषभश्रवोधाउग्रउग्रेभिःस्थविरःसहोदाः ५ त्वंपाहीन्द्रसहीयसोनॄन्भवामरुद्भिरवयातहेळाः । सुप्रकेतेभिःसास्रहिर्दधानोविद्यामेषंवृजनंजीरदानुम् ६ ॥ ११ ॥

चित्रस्तूचमगस्त्यो मरुतो गायत्री ।

१७२ चित्रोवोऽस्तुयामंश्चित्रऊतीसुदानवः । मरुतोअहिभानवः १ आरेसावःसुदानवोमरुतऋञ्जतीशरुः । आरेअश्मायमस्यथ २ तृणस्कन्दस्यनुविशः परिवृङ्क्तसुदानवः । ऊर्ध्वान्नःकर्तजीवसे ३ ॥ १२ ॥

गायत्रयोदशागस्त्य इन्द्रस्त्रिष्टुप् ।

१७३ गायत्सामनभन्यं१ यथावेरर्चामतद्वावृधानंस्वर्वत् । गावोधेनवोबर्हिष्यदब्धाआयत्सद्मानंदिव्यंविवासान् १ अर्चद्वृषावृषभिःस्वेदुहव्यैर्मृगोनाभो-

अतियज्जुगुर्यात्। प्रमन्दयुर्मनांगूर्तहोताभरतेमयोमिथुनायजत्रः २ नक्षद्धोतापरिसद्मेमितायन्भरद्भर्माशरदःपृथिव्याः।क्रन्ददश्वोनयमानोरुवद्गौरन्तर्दूतोनरोदसीचरद्वाक् ३ ताकर्मापंतरास्मैप्रय्यौत्नानिदेवयन्तोभरन्ते।जुजोषदिन्द्रोदुस्मर्वर्चानासत्येवसुगम्योरथेष्ठाः ४ तमुहुहीन्द्रंयोहसत्वायःशूरोमघवायोरथेष्ठाः। प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसोविहन्ता ५ ॥ १३ ॥ प्रयदित्थामहिनानृभ्योअस्त्यरंरोदसीकक्ष्येऽ नास्मै। संविव्यइन्द्रोवृजनंनभूमाभातिंस्वधावाँओपशमिवद्याम् ६ समत्सुत्वाशूरसतामुराणंप्रपथिंतमंपरितंसयध्यैसजोषसइन्द्रंमदेक्षोणीःसूरिचिद्येअनुमदन्तिवाजैः ७ एवाहितेशंसवनासमुद्रआपोयत्तआसुमदन्तिदेवीः। विश्वातेअनुजोष्याभूद्गौःसूरीश्चिद्यादिषितोवेषिजनान् ८ ॥ ४३ ॥

असामयथासुवृक्तिभिर्वयंएनस्वभिष्टयोनरांनशंसैः । असद्यथानइन्द्रोवन्दनेष्टास्तुरो नकर्मनयमानउक्था ९ विष्पर्धसोनरांनशंसैरस्माकासदिन्द्रोवज्रहस्तः । मित्रा-युवोनपूपतिंसुशिष्टौमध्यायुवउपशिक्षन्तियज्ञैः १० ॥ १४॥ यज्ञोहिष्मेन्द्रंकश्चि-द्दृन्धऋजुहुराणश्चिन्मनसापरियन् । तीर्थेनाच्छातातृषाणमोकोदीर्घोनसिध्रमाकृ-णोत्यध्वा ११ मोषूणइन्द्रात्रपुत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः ।महश्चिद्यस्यमीळ्हुषोयव्याहविष्मतोमरुतोवन्दतेगीः १२ एषःस्तोमइन्द्रतुभ्यमस्मेएतेनगातुंहरिवोविदोनः ।आनोववृत्याःसुवितायदेवविद्यामेषंवृजनंजीरदानुम् १३ ॥१५॥

। त्वं राजा दशागस्त्य इन्द्रस्त्रिष्टुप् ।

१७४ त्वंराजेन्द्रयेचदेवारक्षान्नृन्पाह्यसुरत्वमस्मान् । त्वंसत्पतिर्मघवानस्तरुत्रस्त्वंसत्योवसवानःसहोदाः १ दनोविशइन्द्रमुध्रवाचःसप्तयत्पुरःशर्मशारदीर्दर्त् ।

ऋणोरपोअनवद्याणायूनेवृत्रंपुरुकुत्सायरन्धीः २अजावृतइन्द्रशूरपत्नीर्याँचयेभिः
पुरुहूतनूनम् । रक्षोअग्निमशुषंतूर्वयाणंसिंहोनदमेअपांसिवस्तोः ३ शेषद्भुतइन्द्र
सस्मिन्योनौप्रशस्तयेपवीरवस्यमन्ना । सृजदर्णस्यवयद्युधागास्तिष्ठद्धरीधृषता
मृष्टवाजान् ४ वहकुत्समिन्द्रयस्मिञ्चाकन्त्स्यूमन्यूरुज्रावातस्याश्वा । प्रसूरश्व-
क्रंवृहतादभीकेऽभिस्पृधोयासिषद्वज्रबाहुः ५ ॥ १६ ॥ जघन्वाँइन्द्रमित्रेरुशो-
दप्रवृद्धोहरिवोअदाशून् । प्रयेपश्यन्नर्यमणंसचायोस्त्वयाशूर्तावहमानाअप-
त्यम् ६ रपत्कविरिन्द्रार्कसातौक्षांदासायोपबर्हणीकः।करत्तिस्रोमघवादानुचित्रा
निदुर्योणेकुयवाचंमुषिश्रेत् ७सनाताताइन्द्रनव्याआगुःसहोनभोऽविरणायपूर्वीः।
भिनत्पुरोनभिदोअदेवीर्ननमोवधरदेवस्यपीयोः ८ त्वंधुनीरिन्द्रधुनिमतीरृणोरपः
सीरानस्रवन्तीः। प्रयत्समुद्रमतिशूरपर्षिपारयातुर्वशंयदुंस्वस्ति ९त्वमस्मा-

कंमिन्द्रविश्वधंस्याअवृकतमोनरांनृपाता । सनोविश्वासांस्पृधांसंहोदाविद्यामेषं वृजनंजीरदांनुम् १० ॥ १७ ॥

मतिस षडगस्य इन्द्रोऽनुष्टुप् । आद्या स्कन्धोग्रीवी बृहती । अन्त्या त्रिष्टुप् ।

१७५ मत्स्यपांयितेमहःपात्रंस्येवहरिवोमत्सरोमदःवृषांतेवृष्णइन्दुर्वाजीसंहस्रसातमः १ आनंस्तेगन्तुमत्सरोवृषामदोवरेण्यः । सहावाँइन्द्रसानसिःपृतनापाळमर्त्यः २ त्वंहिशूरःसनिताचोदयोमनुषोरथम् । सहावान्दस्युमव्रतमोपःपात्रंनशोचिषा ३ मुषायसूर्यंकवेचक्रमीशानओजसा । वहशुष्णायवधंकुत्संचातस्याश्वैः ४ शुष्मिन्तंमोहितेमदोद्युम्नितंमउतक्रतुः । वृत्रघ्नावरिवोविदामंसीष्टाअश्वसातमः ५ यथापूर्वेभ्योजरितृभ्यइन्द्रमयइवापोनतृष्यतेवभूथ । तामनुत्वानिविदंजोहवीमिविद्यामेषंवृजनंजीरदांनुम् ६ ॥ १८ ॥

॥ ४५ ॥

। मत्सिनः पडगस्त्य इन्द्रोऽनुष्टुप् । अन्त्या त्रिष्टुप् ।

१७६ मत्सिनोवस्यइष्टयइन्द्रमिन्दोवृषाविश । ऋघायमाणइन्वसिशत्रुमान्ति नविन्दसि १ तस्मिन्नावेशयागिरोयएकश्चर्षणीनाम् । अनुस्वधायमुप्यतेयवंनच-कँयवृधा २ यस्यविश्वानिहस्तयोःपञ्चक्षितीनांवसु । स्पाशयस्वयोअस्मध्रुग्दिव्ये-वाशनिर्जहि ३ असुन्वन्तंसमंजहिदूणाशंयोनतेमयः । अस्मभ्यंमस्यवेदंनंदद्धि-सूरिश्चिदोहते ४ आवोयस्यंहिवहँसोऽकँपुसानुपगसत् । आजाविन्द्रस्येन्दोप्रावो वाजेषुवाजिनम् ५ यथापूर्वेभ्योजरितृभ्यइन्द्रमयंदवापोनतृष्यतेवभूथ । तामनुत्वानिविदँजोहवीमिविद्यामेषंवृजनंजीरदानुम् ६ ॥ १९ ॥

। आ चर्षणिप्राः पक्षागस्त्य इन्द्रस्त्रिष्टुप् ।

१७७ आचर्षणिप्रावृषभोजनानांराजाकृष्टीनांपुरुहूतइन्द्रः । स्तुतःश्रवस्य-

न्वसोपमद्रिंयुक्त्वाहरीवृषणायाह्यर्वाङ् १ येतेवृषणोवृषभासइन्द्रब्रह्मयुजोवृषरथासोअत्याः । ताँआतिष्ठतेभिरायाह्यर्वाङ्हवामहेत्वासुतइन्द्रसोमें २ आनिष्ठ रथंवृषणंवृषातेसुतःसोमःपरिषिक्तामधूनि। युक्त्वावृषभ्यांवृषभक्षितीनांहरिभ्यां याहिप्रवतोपमद्रिक्, ३ अयंयज्ञोदेवयाअयंमियेधइमाब्रह्माण्ययमिन्द्रसोमः । स्तीर्णंबर्हिरातुशक्रयाहिपिबानिषद्यविमुंचाहरीइह ४ ओसुष्टुतइन्द्रयाह्यर्वाङुपब्रह्माणिमान्यस्यकारोः । विद्यामवस्तोरवसागृणन्तोविद्यामेषंवृजनंजीरदानुम् ५ ॥ २० ॥

यद्द स्या पश्चागस्त्य इन्द्रस्त्रिष्टुप् ।

१७८ यद्वस्यातइन्द्रश्रुष्टिरस्तिययाबभूथंजरितृभ्यंऊती । मानःकामंमहयन्तमाधग्विश्वातेअस्यांपर्यापआयोः १ नघाराजेन्द्रआदभन्नोयानुस्वसाराकृण-

वंन्तयोनौ । आपंश्चिदस्मैसुतुकांअवेपन्गमंन्नइन्द्रंःसख्यावयंश्च २ जेतानृभि-
रिन्द्रंःपृत्सुशूरंःश्रोताहवंनाधमानस्यकारोः । प्रभंर्तारथंदाशुषंउपाकउद्यन्तागिरो
यदिंचत्मनाभूत् ३ एवानृभिरिन्द्रंःसुश्रवस्याप्रंखादःपृक्षोअभिमिंत्रिणोभूत् ।
समर्यइषःस्तंवतेविवांचिसत्राकरोयजंमानस्यशंसंः ४ त्वयांवयंमघवन्निन्द्रशत्रू-
नभिष्यांममहतोमन्यंमानान् । त्वंत्रातात्वमुनोवृधेभूर्विद्यामेषंवृजनंजीरदा-
नुम् ५ ॥ २१ ॥

पूर्वीः षड्ग्रयाणां द्वचानां लोपामुद्रागस्त्यान्तेवासिब्रह्मचारिणो रातिस्तुष्टुप् ।

अन्त्या बृहती ।

१७१ पूर्वीरहंगरदंःशश्रमाणादोषावस्तोरुषसोजरयंन्तीः । मिनातिश्रियं
जरिमातनूनामप्यूनुपत्नीर्वृषणोजगम्युः १ येचिद्धिपूर्वेऋतसापुआसंन्त्साकंदेवे-

भिरवदन्नृतानि । तेचिदवासुर्नह्यन्तमापुःसमूनुपत्नीर्वृषभिर्जगम्युः २ नमूपा
३३ आतेंपितर्मरुतांसुम्नमेंतुमान्:सूर्यंस्यसंदृशोंयुयोथाः । अभिनोंवीरो अर्वंतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः १ त्वादंत्तेभिरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः । व्यं१ स्मद्वेषोंवितरंव्यंह्होंऽयमींवाश्चातयस्वाविपूंचीः २ श्रेष्ठोंजातस्य रुद्रश्रियासितवस्तंमस्तवसांवज्रबाहो । पर्षिंण:पारमंहसःस्वस्तिविश्वा अभींतीरपसोयुयोधि ३ मात्वांरुद्रचुक्रुधामानमोंभिर्मादुष्टुतीवृषभमासहूंती । उन्नोंवीराँअर्पयभेषजेभिर्भिषक्तंमंत्वाभिषजांशृणोमि ४ हवींमभिर्हवंतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय । ऋदूदरंःसुहवोमानोंअस्यैवभ्रुःसुशिप्रोंरीरधन्मनायै ५ ॥ १६ ॥ उन्मांममन्दवृषभोमरुत्वान्त्वक्षीयसावयसानाधमानम् । घृणींवच्छायामरपाअशीयाविवासेयंरुद्रस्यसुम्नम् ६ क ं १ स्यतेरुद्रमृळयाकुर्हस्तो

योऽस्तिभेषजोजलाषः ॥ अपभर्तारपसोदैव्यस्याभिनुमोवृषभचक्षसीथाः ७ प्रवभ्रवेवृषभायश्वितीचेमहोमहींसुष्टुतिमीरयामि । नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम ८ स्थिरेभिरङ्गैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः । ईशानादस्यभुवनस्यभूरेर्नवाउयोपद्युद्रादसुयमम् ९ अहँन्बिभर्पिसायकानिधन्वाहँन्निष्कंयजतंविश्वरूपम् । अहँन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति १० ॥ १७ ॥ स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रम् । मृळाजरित्रेरुद्रस्तवानोऽन्यंतेअस्मन्निवपन्तुसेनाः ११ कुमारश्चित्पितरंवन्दमानंप्रतिनानामरुद्रोपयन्तम् । भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे १२ यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु । यानिमनुरवृणीतापितानुस्ताशंचयोश्चरुद्रस्यवश्मि १३ परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्यदुर्मति- ॥ ८२ ॥

र्महीगात् । अवस्थिराम्घवद्भ्यस्तनुष्वमीद्वस्तोकायतनंयायमृळ १४ एवाव-
भ्रोवृषभचेकितानयथादेवनहंणीषेनहंसि । हवनश्रुन्नोरुद्रेहवोधिबृहद्देमविद-
थेसुवीराः १५ ॥ १८ ॥

धारावराः पञ्चदश गृत्समदो मरुतो जगती । अन्त्या त्रिष्टुप् ।

३४ धारावरामरुतोधृष्णवोजसोमृगानभीमास्तविषीभिरर्चिनः । अग्नयोनशु-
शुचानाऋजीषिणोभृमिंधमन्तोअपगाअवृण्वत १ द्यावोनस्तृभिश्चितयन्तखादि-
नोर्यं १ भ्रियानद्युतयन्तवृष्टयः । रुद्रोयद्वोमरुतोरुकमवक्षसोवृषाजनिपृश्न्याः
शुक्रऊधनि २ उक्षन्तेअश्वाँअत्याँइवाजिषुनदस्यकर्णैस्तुरयन्तआशुभिः । हि-
रण्यशिप्रामरुतोदविध्वतःपृक्षंयाथपृषतीभिःसमन्यवः ३ पृक्षेताविश्वाभुवनाव-
वक्षिरेमित्रायवासदमाजीरदानवः । पृषदश्वासोअनवभ्रराधसऋजिप्यासोनव-

युनेयुधूर्पदः ४ इन्धन्वभिर्धेनुभीरप्शदूधभिरध्वस्मभिःपथिभिर्भ्राजदृष्टयः । आहंसासोनस्वसंराणिगन्तनमधोर्मदायमरुतः समन्यवः ५ ॥ ११ ॥ आनोब्रह्माणिमरुतःसमन्यवोनरांनशंसःसवनानिगन्तन । अश्वामिवपिप्यतधेनुमूधनिकर्ताधियंजरित्रेवाजपेशसम् ६ तंनोदातमरुतोवाजिनंरथंआपानंब्रह्मचितयेद्विवेदिवे । इषंस्तोतृभ्योवृजनेपुकारवेसनिंमेधामरिष्टंदुष्टरंसहः ७ ययुजतेमरुतोरुक्मवक्षसोऽश्वान्रथेषुभगुआसुदानवः । धेनुर्नशिश्वेस्वसंरेपुपिन्वतेजनायरातहविषेमहीमिषम् ८ योनोमरुतोवृकतातिमत्यौरिपुर्दधेवसवोरक्षतारिषः । वर्तयंततपुषाचक्रियाभितमवरुद्राअशसोहन्तनावधः ९ चित्रंतद्वोमरुतोयामचेकितेपृश्न्यायदूधरप्यापयोदुहुः । यद्वानिदेनवमानस्यरुद्रियास्त्रितंजरायजुरतामदाम्याः १० ॥ २० ॥ तान्वोमहोमरुतएवयावतोविष्णोरेषस्यप्रभृथेहवामहे । हि-

रण्यवर्णान्ककुहान्यतस्रुचोब्रह्मण्यन्तःशंस्यंराधईमहे ११ तेदशंग्वाःप्रथमायज्ञ-
मूहिरेतेनोहिन्वन्तूपसोव्युष्टिषु । उपानरामीररुणैरपोर्णुतेमहोज्योतिषाशुचता-
गोअर्णसा १२ तेक्षोणीभिररुणेभिर्नाञ्जिभीरुद्राऋतस्यसदनेषुवावृधुः । निमेघ-
मानाअत्येनपाजसासुश्चन्द्रंवर्णंदधिरेसुपेशसम् १३ ताँइयानोमहिवरूथमूतय
उपघेदेनानमसागृणीमसि । त्रितोनयान्पश्वहोतृनभिष्टयआववर्तदवराञ्चक्रिया-
वसे १४ ययारध्रंपारयथात्यंहोययानिदोमुश्वथंवन्दितारम् । अर्वाचीसामरुतो
यावऊतिरोषुवाश्रेवसुमतिर्जिगातु १५ ॥ २१ ॥

उपेम पञ्चदश गृत्समदोऽपांनपात्त्रिष्टुप् ।

२५ उपेमसृक्षिवाजयुर्वचस्यांचनोदधीतनाद्योगिरोमे । अपांनपादाशुहेमा
कुवित्ससुपेशंसस्करतिजोषिद्धि १ इमंस्वस्मैहृदआसुतंष्टंमन्त्रंवोचेमकुविद-

स्युवेदत् । अपांनपांदसुर्यस्यमह्नाविश्वान्युर्योभुवनाजजान२समन्यायन्त्युपय-
न्त्युन्याःसंमानमूर्वन्यंःपृणन्ति । तमूशुचिंशुचंयोदीदिवांसंमपांनपांतंपरितस्थु-
रापः ३ तमस्मैरायुवतयोयुवानंमर्मृज्यमानाःपरियन्त्यापः । तशुक्रेभिःशिक्वभी
रेवदस्मेदीदायानिध्मोघृतनिर्णिगप्सु ४ अस्मैतिस्रोअव्यथ्यायनारीर्देवायदेवी-
र्दिधिषन्त्यन्नम् । कृताइवोपहिप्रसत्रेअप्सुसपीयूषंवयतिपूर्वसूनाम् ५ ॥ २२ ॥
अश्वस्यात्रजनिमास्यचस्वर्द्रुहोरिषःसंपृचःपाहिसूरीन् । आमासुपूर्षुपरोअप्रमृ-
ष्यंनारातयोविनशन्नानृतानि ६ स्वआदमेसुदुघायस्यधेनुःस्वधांपीपायसुभ्वन्न-
मत्ति । सोअपांनपादूर्जयन्नप्स्व१न्तर्वसुदेयायविधतेविभाति ७ योअप्स्वाशुचे
नादैव्येनऋतावाजस्रउर्वियाविभाति । वयाइदन्याभुवनान्यस्यप्रजायन्तेवीरुधश्च
प्रजाभिः ८ अपांनपादाह्यस्थादुपस्थेजिह्मानामूर्ध्वोविद्युतंवसानः । तस्यज्येष्ठं

महिमानंवहन्तीहिरण्यवर्णाःपरियन्तियह्वीः १ हिरण्यरूपःसहिरण्यसंदृगुपांन-
पात्सेदुहिरण्यवर्णः।हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै १०॥२३॥
तदस्यानीकमुतचारुनामापीच्यंवर्धतेनप्तुरपाम्। यमिन्धतेयुवतयःसमित्थाहिरं-
ण्यवर्णंघृतमन्नमस्य ११ अस्मैबहूनामवमायसख्येयज्ञैर्विधेमनमसाहविर्भिः।सं
सानुमार्ज्मिदिधिषामिबिल्मैर्दधाम्यन्नैःपरिवन्दऋग्भिः १२ सईंवृषाजनयत्तासु
गर्भंसईंशिशुर्धयतितंरिहन्ति।सोअपांनपादनभिम्लातवर्णोऽन्यस्यैवृहतन्वाविवे-
ष १३ अस्मिन्पदेपरमेतस्थिवांसंमध्वस्मभिर्विश्वहादीदिवांसम्। आपोनप्त्रे
घृतमन्नंवहन्तीःस्वयमत्कैःपरिदीयन्तियह्वीः १४ अयांसमग्नेसुक्षितिंजनायायां-
समुमघवंभ्यःसुवृक्तिम्।विश्वंतद्भद्रंयदवन्तिदेवाबृहद्वदेमविदथेसुवीराः १५॥२४॥

॥ ८५ ॥ ३६ तुभ्यँहिन्वानोवसिष्टगाअपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः । पिबेन्द्रस्वा-
हाप्रहुतंवषट्कृतंहोत्रादासोमंप्रथमोयईशिषे १ यज्ञैःसंमिश्लाःपृषतीभिर्ऋष्टिभि-
र्याभंञ्छुभ्रासोअञ्जिषुप्रियाउत । आसद्यावर्हिर्भरतस्यसूनवःपोत्रादासोमंपिव-
तादिवोनरः २ अमेवनःसुहवाआहिगन्तनानिवर्हिषिसदतनारणिष्टन । अथामं-
न्दस्वजुजुषाणोअन्धसस्त्वष्टर्देवेभिर्जनिभिःसुमद्गणः ३ आवक्षिदेवाँइहविप्रय-
क्षिंचोशन्होतर्निषदायोनिषुत्रिषु । प्रतिवीहिप्रस्थितंसोम्यंमधुपिवाग्नीध्रात्त्वंभा-
गस्यतृप्णुहि ४ एवस्यतेतन्वोनृम्णवर्धनःसहओजःप्रदिविबाह्वोर्हितः । तुभ्यंसु-
तोमंघवन्तुभ्यमाभृतस्त्वमस्यब्राह्मणादातृपत्पिब ५जुषेथाँयज्ञंबोधतंहवस्यमेस-

नोहोतानिविदःपूर्व्याअनु । अच्छाराजानानमंएत्यावृतंप्रशास्त्रादापिवतंसोम्यं मधु ६ ॥ २५ ॥ इति शाकलर्क्संहितायां द्वितीयाष्टके सप्तमोऽध्यायः ॥ ७ ॥

मन्दस्वोदुष्यएकादशसावित्रंग्रावाणेवाष्टावाश्विनंसोमापूषणापट्सोमापौष्णमन्त्योर्धर्चोऽप्यादितेर्वायोसैकागायत्रमुक्तादेवताःप्रउगेणाद्येतुतृचेन्त्रैन्द्रवायवीद्यावापृथिव्योन्त्यस्तृचोहाविर्धानोवातृतीयःपादोवाग्नेयोम्वितमेऽनुष्टुभौबृहतीचकनिक्रदत्तृचंमदक्षिणिज्जागतंमध्येतिशक्वर्यष्टिर्वैताभ्यामृषिरध्वनिवाश्यमानंशकुन्तं तुष्टावकुशिकस्त्वैपीरथिरिन्द्रतुल्यंपुत्रमिच्छन्ब्रह्मचर्यंचचारतस्येन्द्रएवगाथीपुत्रोजज्ञेगाथिनोविश्वामित्रःसप्तदशीयंमण्डलमपश्यत्सोमस्यव्यधिकावैश्वानरायपञ्चोनावैश्वानरीयंतुजागतंतुवैश्वानरायैकादशसमित्समिदाग्नियःप्रत्याग्नेःमकारवइत्याग्नेययोरन्यासामपिनिपातोदृश्यते ।

मन्दस्व पट् गृत्समदो जगती । आद्याश्चतस्रो लिङ्गोक्त-
देवताः । पञ्चम्या अश्विनौ । षष्ठ्या अग्निः ।

३७ ॐम् मन्दस्वहोत्रादनुजोपमन्धसोऽध्वर्यवःसपूर्णांवष्ट्यासिचम् । तस्मा

एतंभरततद्वशोदविहोत्रात्सोमेंद्रविणोदःपिबर्क्रतुभिः १ यमुपूर्वमहुवेतामिदंहुवेसे-
दुहव्योदविर्योनामुपत्यते। अध्वर्युभिःप्रस्थितंसोम्यंमधुपोत्रात्सोमेंद्रविणोदःपि-
बर्क्रतुभिः २ मेद्यन्तुतेवह्नयोयेभिरीयसेऽरिषण्यन्वीळयस्वावनस्पते । आयूयां
धृष्णोअभिगूर्यात्वनेष्टात्सोमेंद्रविणोदःपिबर्क्रतुभिः ३ अपांह्नोत्रादुतपोत्रादमं-
त्तोतनेष्टादजुषतप्रयोहितम् । तुरीयंपात्रममृक्तममर्त्यंद्रविणोदाःपिबतुद्राविणो-
दसः ४ अर्वाञ्चमद्यपूष्यंनुवाहणंरथंयुञ्जाथामिहवोविमोचनम् । पृङ्क्तंहवींषिम-
धुनाहिकंगतमथासोमंपिबतंवाजिनीवसू ५ जोष्यग्नेसमिधंजोष्याहुतिंजोषि
ब्रह्मजन्यंजोषिसुष्टुतिम् । विश्वेभिर्विश्वाँऋतुनावसोमहउशन्देवाँउशतःपायया
हविः ६ ॥ १ ॥

उदुष्येकादश गृत्समदः सविता त्रिष्टुप् ।

३८ उदुष्यदेवः सवितासुवाय शश्वत्तमंतदपावर्हिरस्थात् । नूनंदेवेभ्योविहि धातिरत्नमथाभजद्वीतिहोत्रंस्वस्ती १ विश्वस्यहिश्रुष्टयेदेवऊर्ध्वःप्रवाहवापृथुपाणिःसिसर्ति । आपाश्चिदस्यव्रतआनिमृग्राअयंचिद्रातोरमतेपरिज्मन् २ आशुभिंश्चियान्विमुचातिनूनमरीरमदर्तमानंचिदेतोः । अह्यपूणांचिन्नयंयाँअविष्यामनुव्रतंसवितुर्मोकयागात् ३ पुनःसमंज्यद्वितंतंवयन्तीमध्याकर्तोन्यधाच्छकमधीरः । उत्संहायास्याद्यौतूँरदर्धरन्मतिःसवितादेवआगात् ४ नानौकांसिदुर्यांविश्वमायुर्वितिष्ठतेप्रभवःशोकोअग्रेः । ज्येष्ठंमातासूनवेभागमाधादन्वस्यकेतमियतंसवित्रा ५॥२॥ समावंवर्तिविष्ठितोजिगीषुर्विश्वेषांकाम्श्चरतामुमाभूत् । शश्वाँअपोविकृतंहित्वागादनुव्रतंसवितुर्दैव्यस्य ६ त्वयाहितमप्यमप्सुभागंध-

न्वान्वामृगयसोवितस्थुः । वनानिविभ्योनकिरस्यतानिव्रतादेवस्यसवितुर्मिन-
न्ति ७ याद्राध्यं१वरुणोयोनिमप्यमनिशितंनिमिषिजभुराणः । विश्वोमार्ता-
ण्डोव्रजमापशुर्गात्स्थशोजन्मानिसविताव्याकः ८ नयस्येन्द्रोवरुणोनामित्रो-
व्रतमर्यमानमिनन्तिरुद्रः । नारातयस्तमिदंस्वस्तिहुवेदेवंसवितारंनमोभिः ९
भगंधियंवाजयन्तःपुरंधिंनराशंसोग्नास्पतिंनोअव्याः । आयेवामस्यसंगथेरयी-
णांप्रियादेवस्यसवितुःस्याम १० अस्मभ्यंतद्दिवोअद्यःपृथिव्यास्त्वयादत्तंका-
म्यंराधआगात् । शंयत्स्तोतृभ्यआपयेभवात्युरुशंसायसवितर्जरित्रे ११॥ ३ ॥

ग्रावाणेवाष्टौ गृत्समदोऽश्विनौ त्रिष्टुप् ।

३१ ग्रावाणेवतादिदर्थंजरेथेगृध्रेववृक्षंनिधिमन्तमच्छ । ब्रह्माणेवविदथंउक्थ-
शासादूतेवहव्याजन्यापुरुत्रा १ प्रातर्यावाणारथ्येववीराजेवयुमावरमासचेथे ।

मेनेइवतन्वा३ शुम्भमानेदम्पतीवक्रतुविदाजनेषु २ शृङ्गेवनःप्रथमागन्तमर्वाक् शफाविवजर्भुराणातरोभिः । चक्रवाकेवप्रतिवस्तोरुस्रावाश्वांयातंरथ्येवशक्रा ३ नावेवनःपारयतंयुगेवनभ्येवनउपधीवंप्रधीवं । श्वानेवनोअरिषण्यातनूनांखृग-लेवविस्रसःपातमस्मान् ४ वातेवाजुर्यानयेवरीतिरक्षीइवचक्षुषायातमर्वाक् । हस्ताविवतन्वे३ शम्भविष्ठापादेवनोनयतंवस्योअच्छ ५॥४॥ ओष्ठाविवमध्वास्ने वदन्तास्तनाविवपिप्यतंजीवसेनः । नासेवनस्तन्वोरक्षितारा कर्णाविवसुश्रुताभू-तमस्मे ६ हस्तेवशक्तिमभिसंदीनःक्षामेवनःसमंजतंरजांसि । इमागिरोअ-श्विनायुष्मयन्तीःक्षणोत्रेणेवस्वधितिंसंशिशीतम् ७ एतानिवामश्विनावर्धना-निब्रह्मस्तोमंगृत्समदासोअक्रन् । तानिनराजुजुषाणोपयातंबृहद्वदेमविदथे सुवीराः ८ ॥ ५ ॥

सोमापूषणा पङ्क्त गृत्समदः सोमापूषणौ त्रिष्टुप् । अन्त्यार्धर्चस्यादितिश्च ।

४० सोमापूषणाजनंनारयीणांजनंनादिवोजनंनापृथिव्याः । जातौविश्वस्य भुवनस्यगोपौदेवाअकृण्वन्नमृतस्यनाभिम् १ इमौदेवौजायमानौजुषन्तेमौतमांसिगूहतामजुष्टा। आभ्यामिन्द्रःपक्वमामास्वन्तःसोमापूषभ्यांजनदुस्रियासु २ सोमापूषणारजसोविमानंसप्तचक्रंरथमविश्वामिन्वम् । विषूवृतंमनसायुज्यमानंतंजिन्वथोवृषणापञ्चरश्मिम् ३ दिव्यंन्यःसदनंचक्रउच्चापृथिव्यामन्योअध्यन्तरिक्षे । तावस्मभ्यंपुरुवारंपुरुक्षुरायस्पोषंविष्यतांनाभिमस्मे ४ विश्वान्यन्योभुवनाजजानविश्वमन्योअभिचक्षाणएति । सोमापूषणावर्वतंधियंमेयुवाभ्यांविश्वाःपृतनाजयेम ५ धियंपूषाजिन्वतुविश्वमिन्वोरयिंसोमोरयिपतिंदधातु । अर्वतुदेव्यदितिरनर्वाबृहद्देमविदथेसुवीराः ६ ॥ ६ ॥

वापवेकविंशतिर्गृत्समदो गायत्री । षोडशीसप्तदश्यावनुष्टुभौ । अन्त्या बृहती । आद्ययोर्वायुः । तृतीयाया इन्द्रवायू । ततस्तिसृणां मित्रावरुणौ । ततस्तिसृणामश्विनौ । ततस्तिसृणामिन्द्रः । ततस्तिसृणां विश्वेदेवाः । ततस्तिसृणां सरस्वती । ततस्तिसृणां द्यावापृथिव्यौ हविर्धाने वा । एकोनविंश्या अन्त्यपादस्य द्यावापृथिव्यौ हविर्धाने वाश्विनौ ।

४३ वायोयेतेसहस्रिणोरथांस्तेभिरागहि । नियुत्वान्त्सोमंपीतये १ नियुत्वान्वायवागह्ययंशुक्रोअयामिते । गन्तासिसुन्वतोगृहम् २ शुक्रस्याद्यगवाशिरइन्द्रंवायूनियुत्वतः । आयातंपिबतंनरा ३ अयंवांमित्रावरुणासुतःसोमऋतावृधा । ममेदिहश्रुतंहवम् ४ राजानावनमिद्रुहाध्रुवेसदस्युत्तमे । सहस्रस्थूणआसाते ५ ॥ ७ ॥ तासम्राजाघृतासुतीआदित्यादानुनस्पती । सचैतेअनवह्वरम् ६ गोमद्वयुनासत्याश्वावद्यातमश्विना । वर्तीरुद्रानुपाय्यम् ७नयत्परोनान्त-

रआदधर्षद्वृषण्वसू । दुःशंसोमर्त्योरिपुः ८ तानुआवोळ्हमश्विनारयिंपिशङ्गंसंदृशम् । धिष्ण्यावरिवोविदम् ९ इन्द्रोअङ्गमहद्भयमभीषदप्चुच्यवत् । सहिस्थिरो विचर्षणिः १० ॥ ८ ॥ इन्द्रश्चमृळयातिनोननःपश्चादघंनशत् । भद्रंभवातिनः पुरः ११ इन्द्रआशाभ्युस्परिसर्वाभ्योअभयंकरत् । जेताशत्रून्विचर्षणिः १२ विश्वेदेवासुआगतशृणुतामइमंहवम् । एदंबर्हिर्निषीदत १३ तीव्रोवोमधुमाँ-अयंशुनहोत्रेषुमत्सरः । एतंपिबतुकाम्यम् १४ इन्द्रज्येष्ठामरुद्गणादेवासः पूषरातयः । विश्वेममंशृताहवम् १५ ॥ ९ ॥ अम्बितमेनदीतमेदेवितमेसरस्वति । अप्रशस्ताइवस्मसिप्रशस्तिमम्बनस्कृधि १६ त्वेविश्वासरस्वतिश्रितायूंषिदेव्याम् । शुनहोत्रेषुमत्स्वप्रजांदेविदिदिड्ढिनः १७ इमाब्रह्मसरस्वतिजुषस्वंवाजिनीवति । यातेमन्मंगृत्समदाक्रुतावरिप्रियादेवेषुजुह्वति १८ प्रेतांयज्ञ-

स्यशंभुवायुवामिदावृणीमहे । अग्निंचहव्यवाहनम् १९ द्यावानःपृथिवीइमं सिध्रमद्यदिविस्पृशम् । यज्ञंदेवेषुयच्छताम् २० आवांमुपस्थमद्रुहादेवाःसीदन्तुयज्ञियाः । इहाद्यसोमपीतये २१ ॥ १० ॥

कानिक्रदत्सूक्तं गृत्समद इन्द्रः कपिञ्जलरूपी त्रिष्टुप् ।

४२ कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचंमरितेवनावम् । सुमङ्गलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्यावदत् १ मात्वाश्येनउद्वधीन्मासुपर्णोमात्वाविददिषुमान्वीरोअस्ता । पित्र्यामनुप्रदिशंकनिक्रदत्सुमङ्गलोभद्रवादीवदेह २ अवक्रन्ददक्षिणतोगृहाणांसुमङ्गलोभद्रवादीशंकुन्ते। मानःस्तेनईशतमाघशंसोवृहद्वदेमविदथेसुवीराः ३ ॥ ११ ॥

प्रदक्षिणित्वृचं गृत्समद इन्द्रः कपिञ्जलरूपी जगती । द्वितीयाऽतिशक्वर्याष्टियौ ।

४३ प्रदक्षिणिद्भिगृणन्तिकारवोवयोवदन्तऋतुथाशकुन्तयः।उभेवाचौवदति सामगाइवगायत्रंचत्रैष्टुभंचानुराजति १ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइव सवनेषुशंससि । वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतो नःशकुनेपुण्यमावद २ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः । यदुत्पतन्वदासिकर्करियैथावृहद्वदेमविदथेसुवीराः ३ ॥ १२ ॥ इति शाकलर्कसंहितायां द्वितीये मण्डले चतुर्थोऽनुवाकः ॥ ४ ॥

॥ इति द्वितीयं मण्डलं समाप्तम् ॥

सोमस्य त्रयोविंशतिर्विश्वामित्रो गाथिनोऽग्निस्त्रिष्टुप् ।

१ सोमंस्यमातवस्तवक्ष्यग्नेवह्निंचकर्थविदथेयजध्यै । देवाँअच्छादीद्यद्युञ्जे

॥ ९० ॥

अद्रिंशमायेअग्नेतन्वंजुषस्व १ प्राञ्चंयज्ञंचकृमवर्धतांगीःसमिद्भिरग्निंनमसादुव-
स्यन् । दिवःशंशासुर्विदथाकवीनांगृत्सायचित्तवसेगातुमीषुः २ मयोदधेमेधि-
रः पूतदक्षोदिवःसुवन्युर्जनुषांपृथिव्याः । अविन्दद्युदर्शतमप्स्व१न्तर्देवासोअ
ग्निमपसिस्वसॄणाम् ३ अवर्धयन्त्सुभगंसप्तयह्वीःश्वेतंजज्ञानमरुषंमहित्वा ।
शिशुंनजातमभ्यारुरश्वादेवासोअग्निंजनिमन्वपुष्यन् ४ शुक्रेभिरङ्गैरजआतत-
न्वान्क्तुंपुनानःकविभिःपवित्रैः । शोचिर्वसानःपर्यायुरपांश्रियोमिमीतेबृहती-
रनूनाः ५ ॥ १३ ॥ वव्राजासोमनदतीरदब्धादिवोयह्वीरवसानाअनग्नाः । सना
अत्रयुवतयःसयोनीरेकंगर्भंदधिरेसप्तवाणीः ६ स्तीर्णबर्हिरुषसेयामन्नस्मिन्हविर्धाने
तस्थुषीणाम् । अस्थुरत्रधेनवःपिन्वमानामहीदूस्मस्यमातरांस-
मीची ७ बभ्राणःसूनोसहसोव्यद्यौदधानःशुक्रारभसावपूंषि । श्रोतन्तिधारामधु-

नोघृतस्यवृषायत्रंवावृधेकाव्येन ८ पितुश्चिदूधर्जनुषांविवेद व्यंस्यधारांअसृजद्वि धेनाः । गुहाचरन्तंसखिभिःशिवेभिर्दिवोयह्वीभिर्नगुहांबभूव १ पितुश्चगर्भंजनितुश्चवभ्रेपूर्वीरेकोअवयत्पीप्यानाः । वृष्णेसपत्नीशुचयेसबन्धूउभेअस्मैमनुष्येनिपाहि १० ॥ १४ ॥ उरौमहाँअनिबाधेववर्धापोअग्नियशसःसंहिपूर्वीः । ऋतस्ययोनावशयद्दमूनाजामीनामग्निरपसिस्वसॄणाम् ११ अक्रोनवभ्रिःसमिथेमहीनांदिद्युक्षेयःसूनवेभाऋंजीकः । उदुस्रियाजनितायोजजानापांगर्भोनृतमोयह्वोअग्निः १२ अपांगर्भंदर्शतमोषधीनांवनाजजानसुभगाविरूपम् । देवासश्चिन्मनसासंहिजग्मुः पनिष्ठंजातंतवसंदुवस्यन् १३ वृहन्तइद्भानवोभाऋंजीकमग्निंसचन्तविद्युतोनशुक्राः । गुहेववृद्धंसदसिस्वेअन्तरपारऊर्वेअमृतंदुहानाः १४ इळेचत्वायजमानोहविर्भिरीळेसखित्वंसुमतिंनिकामः । देवैरवोमि- ॥ ९१ ॥

मीहिसंजरित्रेरक्षांचनोदम्यैभिरनीकैः १५ ॥ १५ ॥ उपक्षेतारस्तवसुप्रणीतेऽग्ने विश्वानिधन्यादधानाः। सुरेतसाश्रवसातुजमानाअभिष्यामपृतनायूँरदेवान् १६ आदेवानांमभवःकेतुरग्नेमन्द्रोविश्वानिकाव्यानिविद्वान् । प्रतिमतीँ अवासयोदमूनाअनुदेवान्रथिरोयासिसाधन् १७ निदुरोणेअमृतोमर्त्यानांराजासससाद विदथानिसाधन् । घृतप्रतीकउर्वियाव्यद्यौदग्निर्विश्वानिकाव्यानिविद्वान् १८ आनोगहिसख्येभिःशिवेभिर्महान्महीभिरूतिभिःसरण्यन्। अस्मेरयिंबहुलंसंतरुत्रंसुवाचंभागंयशसंकृधीनः १९ एतातेअग्नेजनिमासनानिप्रपूर्व्यायनूतनानि वोचम्। महान्तिवृष्णेसवनाकृतेमाजन्मन्जन्मन्निहितोजातवेदाः २० जन्मन् जन्मन्निहितोजातवेदाविश्वामित्रेभिरिध्यतेअजस्रः । तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम २१ इमंयज्ञंसहसावन्त्वंनोदेवत्राधेहिसुक्रतोररांणः ।

प्रयाँसिहोतर्बृहतीरिषोनोऽग्नेमहिद्रविणमायजस्व २२ इळामग्नेपुरुदंसँस-
निंगोःशश्वत्तमंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भू-
त्वस्मे २३ ॥ १६ ॥

वैश्वानराय पञ्चदश विश्वामित्रोऽग्निर्वैश्वानरो जगती ।

२ वैश्वानरायधिषणामृतावृधेघृतंनपूतमग्नयेजनामसि । हिताहोतारंमनुष-
श्चराधतोधियारथंनकुलिशःसमृण्वति १ सरोचयज्जनुषारोदसीउभेसमात्रोर-
भवत्पुत्रईड्यः । हव्यवाळग्निरजरश्चनोहितोदूळभोविशामतिथिर्विभावसुः २
कृत्वादक्षस्यतरुषोविधर्मणिदेवासोअग्निंजनयन्तचित्तिभिः । रुरुचानंभानुना
ज्योतिषामहामत्यंनवाजंसनिष्यन्नुपब्रुवे ३ आमन्द्रस्यसनिष्यन्तोवरेण्यंवृणी-
महेअह्रयंवाजमृग्मियम् । रातिंभृगूणामुशिजंकविक्रतुमग्निंराजन्तंदिव्येनशो-

चिषा ४ अग्निंसुम्नायदधिरेपुरोजनावाजंश्रवसमिहवृक्तबर्हिषः । यतस्रुचःसुरु-
चैविश्वदेव्यंरुद्रंयज्ञानांसाधदिष्टिमपसाम् ५॥ १७ ॥ पावकशोचेतवाहिक्षयंपरि
होतर्यज्ञेषुवृक्तबर्हिषोनरः । अग्नेदुवइच्छमानासुआप्यमुपासतेद्रविणंधेहितेभ्यः ६
आरोदसीअपृणदास्मंहज्जातंयदेनमुपसोअधारयन् । सोअध्वरायुपरिणीयते
कविरत्योनवाजंसातयेचनोहितः ७ नमस्यतेहव्यदातिंस्वध्वरंदुवस्यतदम्यंजात-
वेदसम् । रथीर्ऋतस्यबृहतोविचर्षणिरग्निर्देवानामभवत्पुरोहितः ८ तिस्रोयह्वस्य
समिधःपरिज्मनोऽग्नेरपुनन्नुशिजोअमृत्यवः । तासामेकामदधुर्मर्त्येभुजंमुलो-
कमुहेउपजामिमीयतुः ९ विशांकविंविश्पतिंमानुषीरिषःसंसीमकृण्वन्त्स्वर्दृ-
शंनतेजसे । सउद्वतोनिवतोयातिवेविषत्सगर्भमेषुभुवनेषुदीधरत् १०॥ १८ ॥
सजिन्वतेजठरेषुप्रजज्ञिवान्वृषाचित्रेषुनानदन्नसिंहः । वैश्वानरःपृथुपाजाअम-

प्रयꣳसिहोतर्बृहतीरिषो नोऽग्नेमहिद्रविणमायजस्व २२ इळामग्नेपुरुदꣳसꣳस-
निंगोःशश्वत्तमंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भू-
त्वस्मे २३ ॥ १६ ॥

वैश्वानराय पञ्चदश विश्वामित्रोऽग्निर्वैश्वानरो जगती ।

२ वैश्वानरायधिषणामृतावृधेघृतंनपूतमग्नयेजनामसि । द्विताहोतारंमनुष-
श्चवाघतोधियारथंनकुलिंशःसमृण्वति १ सरोचयज्जनुषारोदसीउभेसमात्रोरं-
भवत्पुत्रईड्यः । हव्यवाळग्निरजरश्चनोहितोदूळभोविशामतिथिर्विभावसुः २
कृत्वादक्षस्यतरुषोविधर्मणिदेवासोअग्निंजनयन्तचित्तिभिः । रुरुचानंभानुना
ज्योतिषामहामत्यंनवाजंसनिष्यन्नुपब्रुवे ३ आमन्द्रस्यसनिष्यन्तोवरेण्यंवृणी-
महेअह्रयंवाजंमृग्मियम् । रातिंभृगूणामुशिजंकविक्रतुमग्निंराजन्तंदिव्येनशो-

चिर्या ४ अग्निंसुम्नायेदधिरेपुरोजनावाजंश्वसमिहवृक्तबर्हिषः । यतस्रुचःसुरु-
चंविश्वदेव्यंरुद्रंयज्ञानांसाधदिष्टिमपसाम् ५॥ १७॥ पावकशोचेतवाहिक्षयंपरि
होतर्यज्ञेषुवृक्तबर्हिषोनरः । अग्नेदुवइच्छमानासुआप्यमुपासतेद्रविणंधेहितेभ्यः ६
आरोदसीअपृणदास्मंहज्जातंयदेनमपसोअधारयन् । सोअध्वरायुपरिणीयते
कविरत्योनवाजंसातयेचनोहितः ७ नमस्यतेहव्यदातिंस्वध्वरंदुवस्यतदम्यंजात-
वेदसम् । रथीर्ऋतस्यबृहतोविचर्षणिरग्निर्देवानामभवत्पुरोहितः ८ तिस्रोयह्वस्य
समिधःपरिज्मनोऽग्नेरपुनन्नृशिजोअमृत्यवः । तासामेकामदधुर्मर्त्यभुजंमुलो-
कमुहेउपजामिमीयतुः ९ विशांकविंविश्पतिंमानुषीरिषःसंसीमकृण्वन्त्स्वधि-
तिंनतेजसे । सउद्वतोनिवतोयातिवेविषत्सगर्भमेषुभुवनेषुदीधरत् १०॥ १८॥
सजिन्वतेजठरेषुप्रजज्ञिवान्वृषाचित्रेषुनानदन्नसिंहः । वैश्वानरःपृथुपाजाअम-

त्योंवसुरत्रादयंमानोविदाशुषे ११ वैश्वानरःप्रत्नथानाकमारुहद्दिवस्पृष्ठंभन्दमानःसुमन्मभिः । सपूर्वज्जनयंज्जन्तवेधनंसमानमज्मंपर्येतिजागृविः १२ ऋतावानंयज्ञियंविप्रमुक्थ्यं १मायंदधेमातरिश्वादिविक्षयम् । तंचित्रयामंहरिकेशमीमहेसुदीतिमग्निंसुवितायनव्यसे १३ शुचिंनयामन्निपिरंस्वर्दृशंकेतुंदिवोरोचनस्थामुपब्रुधम् । अग्निंमूर्धानंदिवोअप्रतिष्कुतंतमींमहेनमसावाजिनंबृहत् १४ मन्द्रंहोतारंशुचिमद्वयाविनंदमूनसमुक्थ्यंविश्वचर्षणिम् । रथंनचित्रंवपुषायदर्शतंमनुहितंसदमिद्रायईमहे १५ ॥ १९ ॥

वैश्वानरायैकादश विश्वामित्रोऽग्निर्वैश्वानरो जगती ।

३ वैश्वानरायपृथुपाजसेविपोरत्नाविधन्तधरुणेषुगातवे । अग्निर्हिदेवाँअमृतोदुवस्यत्यथाधर्माणिसनतानदूदुषत् १ अन्तर्दूतोरोदसीदस्मईयतेहोतानिषत्तोम

नुंपःपुरोहितः । क्षयंबृहन्तंपरिभूषतिद्युभिर्देवेभिरग्निरिषितोधियावसुः २ केतुं यज्ञानांविदथस्यसाधनंविप्रासोअग्निंमहयन्तचित्तिभिः । अपांसियस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानियजमानआचके ३ पितायज्ञानामसुरोविपश्चितांवि-मानमग्निर्वयुनैचवाघताम् । आविर्वेशरोदसीभूरिवर्पसापुरुप्रियोभन्दतेधामभिः कविः ४ चन्द्रमग्निंचन्द्ररथंहरिव्रतंवैश्वानरमप्सुवर्दस्वर्विदम् । विगाहंतूर्णितवि-षीभिरावृतंभूर्णिंदेवासइहसुश्रियंदधुः ५॥ २० ॥ अग्निर्देवेभिर्मनुषश्चजन्तुभिस्त-न्वानोयज्ञंपुरुपेशसंधिया । रथीरन्तरीयतेसाधदिष्टिभिर्जीरोदमूनाअभिशस्ति-चातनः ६ अग्नेजरस्वस्वपत्यआयुन्यूर्जापिन्वस्वसमिषोदिदीहिनः । वयांसि जिन्वबृहतश्चजागृवउशिग्देवानामसिसुक्रतुर्विपाम् ७ विशपतिंयह्वमतिंथिंनरः सदायन्तारंधीनामुशिजंचवाघताम् । अध्वराणांचेतनंजातवेदसंप्रशंसन्तिनम-

साजूतिभिर्वृधे ८ विभावादेवःसुरणःपरिक्षितीरग्निर्वैभूवशवसासुमद्रथः । तस्यव्रतानिभूरिपोषिणोवयमुपभूषेमदमआसुवृक्तिभिः ९ वैश्वानरतवधामान्याचकेयेभिःस्वर्विदभवोविचक्षण । जातआपृणोभुवनानिरोदसीअग्नेताविश्वा परिभूरसित्मना १० वैश्वानरस्यदंसनाभ्योबृहदरिणादेकःस्वपस्ययाकविः । उभापितरामहयन्नजायताग्निर्द्यावापृथिवीभूरिरेतसा ११ ॥ २१ ॥

सामित्सामिदेकादश विश्वामित्र आग्नेयस्त्रिष्टुप् ।

१ सामित्सामित्सुमनावोध्यस्मेशुचाशुचासुमतिरासिवस्वः । आदेवदेवान्यजथायवक्षिसखासखीन्त्सुमनायक्ष्यग्ने १ यंदेवासस्त्रिरहन्नायजन्तेदिवेदिवेवरुणोमित्रोअग्निः । सेमंयज्ञंमधुमन्तंकृधीनस्तनूनपाद्घृतयोनिंविधन्तम् २ प्रदीधितिर्विश्ववाराजिगातिहोतारमिळःप्रथमंयजध्यै । अच्छानमोभिर्वृषभंवदध्यैसदे- ॥ ९४ ॥

वान्यंक्षदिपितोयजीयान् ३ ऊध्वोवांगातुरध्वरेअकार्यूर्ध्वाशोचींषिप्रस्थितार-
जांसि । दिवोवानाभान्यंसादिहोतास्तृणीमहिंदेवव्यंचाविवाहिः ४ सप्तहोत्राणि
मनसावृणानाइन्वन्तोविश्वंप्रतियन्नृतेन । नृपेशंसोविदथेषुप्रजाताअभी३मंयज्ञं
विचरन्तपूर्वीः ५ ॥ २२ ॥ आभन्दमानेउषसाउपाकेउतस्मयेतेतन्वा३विरूपे ।
यथानोमित्रोवरुणोजुजोषदिन्द्रोमरुत्वाँउतवामहोभिः ६ दैव्याहोतारापथमा
न्यृञ्जेसप्तपृक्षासःस्वधयामदन्ति । ऋतंशंसन्तऋतमित्तआहुरनुव्रतंव्रतुपादीध्या-
नाः ७ आभारंतीभारंतीभिःसजोषाइळादेवैर्मनुष्येभिरग्निः । सरस्वतीसारस्व-
तेभिरर्वाक्तिस्रोदेवीर्बर्हिरेदंसदन्तु ८ तन्नस्तुरीपमध्पोपयित्नुदेवंत्वष्टर्विरराण
स्यंस । यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामः ९ वनस्पतेऽवसृजो-
पदेवान्हविःशमितासूदयाति । सेदुहोतासत्यतरोयजातियथादेवानांजनिमा-

निवेद १० आयाह्यग्नेसमिधानोअर्वाङिन्द्रेणदेवैःसरथंतुरेभिः । बर्हिर्नआस्ता-
मदितिःसुपुत्रास्वाहादेवाअमृतांमादयन्ताम् ११ ॥ २३ ॥

॥ ९५ ॥

मत्स्यिरेकादश विश्वामित्रोऽग्निस्त्रिष्टुप् ।

५ प्रत्यग्निरुषसश्चेकितानोऽवोधिविप्रःपदवीःकवीनाम् । पृथुपाजादेवयद्भिः
समिद्धोऽप्द्वारातमंसोवह्निरावः १ प्रेद्धग्निर्वावृधेस्तोमेभिर्गीर्भिःस्तोतॄणांनमस्य
उक्थैः । पूर्वीर्ऋतस्यसंदृशश्चकानःसंदूतोअद्यौदुषसोविरोके २ अधाय्यग्निर्मा-
नुषीषुविक्ष्वा ३ पांगभौमित्रऋतेनसाधन् । आहर्यतोयजतःसान्वस्थादभूदुविप्रो
हव्योमतीनाम् ३ मित्रोअग्निर्भवतियत्समिद्धोमित्रोहोतावरुणोजातवेदाः ।
मित्रोअध्वर्युरिषिरोदमूनामित्रःसिन्धूनामुतपर्वतानाम् ४ पातिप्रियंरिपोअग्रंप-
दंवेःपातियुह्वश्वरणंसूयस्य । पातिनाभासुमृशीर्पाणमग्निःपातिदेवानामुपमाद-

॥ ९५ ॥

मृष्वः ५ ॥ २४ ॥ ऋभुश्चक्रईड्यंचारुनामविश्वानिदेवोवयुनानिविद्वान् । सस-स्यचमँघृतवत्पदंवेस्तदिद्गमेरक्षत्यप्रयुच्छन् ६ आयोनिमग्निर्घृतवन्तमस्थात्पृथुप्र-गाणमुशन्तमुशानः । दीद्यानःशुचिर्क्रुष्वःपावकःपुनःपुनर्मातरानव्यसीकः ७ सद्योजातओषधीभिर्ववक्षेयदीवर्धन्तिप्रस्वोघृतेन । आपइवप्रवताशुम्भमानाउ-रुष्यदग्निःपित्रोरुपस्थे ८ उदुष्टुतःसमिधायह्वोअद्यौद्वप्मान्दिवोअधिनाभापृथि-व्याः । मित्रोअग्निरीड्योमातरिश्वादूतोवक्षद्यजथायदेवान् ९ उदस्तम्भीत्समि-धानाकमूष्वोऽग्निर्भवन्नुत्तमोरोचनानाम् । यदीभृगुभ्यःपरिमातरिश्वागुहास्न्तँ हव्यवाहँसमीधे १० इळामग्नेपुरुदंसँसनिंगोःशश्वत्तमंहवमानायसाध । स्याच्नः सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ११ ॥ २५ ॥

६ प्रकारवोमनुनावृज्यमानादेवद्रीचींनयतदेवयन्तः । दक्षिणावाड्वाजिनी प्राच्येतिहविर्भरन्त्यग्नयेघृताचीं १ आरोदसीअरुणाजायमानउतग्मरिक्थाअधनुप्रयज्यो । दिवश्चिदग्नेमहिनापृथिव्यावृज्यन्तेवह्नयःसप्तजिह्वाः २ द्यौश्चत्वा पृथिवीयज्ञियासोनिहोतारंसादयन्तेदमाय । यदीविशोमानुषीर्देवयन्तीःप्रयस्वतीरीळतेशुक्रमर्चिः ३ महान्त्सधस्थेध्रुवआनिषत्तोऽन्तर्यावामाहिनेहयँमाणः । आस्क्रेसपत्नीअजरेअमृक्तेसबर्दुघेउरुगायस्यधेनू ४ व्रतातेअग्नेमहतोमहानितवक्त्वारोदसीआततन्थ । त्वंदूतोअभवोजायमानस्त्वंनेतापृषभचर्षणीनाम् ५ ॥२६॥ऋतस्यवाकेशिनायोग्याभिर्घृतस्नुवारोहिताधुरिधिष्व । अथावहेदेवान्देव

विश्वान्त्स्वध्वराकृणुहिजातवेदः ६ दिवश्चिदातेरुचयन्तरोकाउषोविभातीरनुभासिपूर्वीः । अपोयदग्नउशधग्वनेपुहोतुर्मन्द्रस्यप्रनयन्तदेवाः ७ उरौवायेअन्तरिक्षेमदन्तिदिवोवायेरोचनेसन्तिदेवाः । ऊमावायेसुहवासोयजत्राआयेभिरेरथ्योअग्नेअश्वाः ८ ऐभिरग्नेसरथंयाह्यर्वाङ्नानारथंवाविभवोह्यश्वाः । पत्नीवतस्त्रिंशतंत्रीँश्चदेवाननुष्वधमावहमादयस्व ९ सहोतायस्यरोदसीचिदुर्वीयज्ञंयज्ञमभिवृधेगृणीतः । प्राचीअध्वरेवंतस्थतुःसुमेकेक्रुतावरीक्रुतजातस्यसत्ये १० इळामग्नेपुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध। स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ११ ॥ २७ ॥ इति शाकलर्क्संहितायां द्वितीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥ इति द्वितीयाष्टकःसमाप्तः ॥ २ ॥

प्रसेऽअन्तियूपस्तुतिः पङ्क्त्याद्याभिर्बृहत्योन्त्याऽग्निश्चिन्यष्टमीवैश्वदेवीवातृतीयासप्तम्यावनुष्टुभौसखायो नवत्वार्हतंत्रिष्टुवन्तंत्वामग्नऽऔष्णिहमग्निर्होतागायत्रंत्विन्द्राग्नीऐन्द्राग्नंभवः सप्तऋषभस्त्वानुष्टुभमाहोता विपाजसाकासउत्कीलस्त्वयमग्निःपट्प्रागाथंसमिध्यमानःपञ्चकतोवैश्वामित्रस्तुभवानोऽग्निर्होतारंगा-थीहाग्निमुपसमाधान्येवैश्वदेव्याविमंनउपाधेअनुष्टुभौविराड्पासतोबृहतीचान्त्यायंसऽउपान्त्यानुष्टुप्पु-रीष्येभ्योग्निभ्योनिर्मथितोदेवश्रवादेववातश्चभारतौतृतीयासतोबृहत्यग्नेसहस्वगायत्रमाद्यानुष्टुबग्नेदिवो वैराजमुपान्त्याग्नेन्द्रीवैश्वानरंनवतृचोवैश्वानरीयमारुतौजागतौद्वृचआत्मस्तुतिर्वापूर्वात्मगीतान्त्योपा ध्यायस्तुतिः प्रवः पञ्चोनागायत्रंत्वृतव्यावाद्याग्नेजुपस्वपट्तृतीयाद्युष्णिक्त्रिष्टुब्जगत्योस्तीदंपोळशा-द्याचतुर्थीदशमीद्वादश्योनुष्टुभःपङ्क्त्येकादश्युपान्त्येचजगत्यःपञ्चम्यृत्विग्भ्योवा ।

प्र य एकादश विश्वामित्रोऽग्निस्त्रिष्टुप् ।

७ ॐ प्र॒ यऽआ॒रुः शि॑ति॒पृष्ठ॑स्य॒ धा॒सेरा मा॒तरा॑ विविशुः स॒प्तवा॑णीः । परि॑क्षिता पि॒तरा॑ सं॒चरे॑ते॒ प्रस॑स्राते॒ दीर्घ॑मायुः॒ प्रय॑क्षे १ दि॒वक्ष॑सो धे॒नवो॒ वृष्णो॒ अश्वा॑ दे॒वीरा-तं॑स्थौ॒ मधु॑म॒द्वह॑न्तीः । ऋ॒तस्य॑ त्वा॒ सद॑सि क्षेम॒यन्त॑ं पर्ये॑का॑ चरति॒ वर्त॑निं॒ गौः २ आ-

सीमरोहत्सुयमाभवन्तीः पतिश्चिकित्वान्त्रयिविद्रयीणाम् । प्रनीलपृष्ठोअतसस्य धासेस्ताअवासयत्पुरुधप्रतीकः ३ महित्वाष्टूर्जयन्तीरजुर्यंस्तभूयमानंवहतो वहन्ति । व्यङ्गेभिर्दिद्युतानःसधस्थएकामिद्वरोदसीआविवेश ४ जानन्तिवृष्णो अरुषस्यशेवमुतब्रध्नस्यशासनेरणन्ति । दिवोरुचःसुरुचोरोचमानाइळायेषां गण्यामाहिनागीः ५ ॥ १ ॥ उतोपितृभ्यांप्रविदानुघोषंमहोमह्यामनयन्त शूषम् । उक्षाहयत्रपरिधानमस्कोरनुस्वधामजरितुर्ववक्ष ६ अध्वर्युभिःपञ्चभिः सप्तविप्राःप्रियंरक्षन्तेनिहितंपदंवेः । प्राञ्चोमदन्त्युक्षणोअजुर्यादेवादेवानामनुव्रतागुः ७ दैव्याहोतारोप्रथमान्यृञ्जेसप्तपृक्षासःस्वधयामदन्ति । ऋतंशंसन्त ऋतमित्तआहुरनुव्रतंव्रतपादीध्यानाः ८ वृषायन्तेमहेअत्यायपूर्वीर्वृष्णेचित्राय रश्मयःसुयामाः। देवहोतर्मन्द्रतरश्चिकित्वान्महोदेवान्रोदसीएहवक्षि ९ पृक्षप्र-

यजोद्रविणःसुवाचःसुकेतवउपसोरेवदूषुः । उतोचिदग्नेमहिनापृथिव्याःकृतंचिदेनःसंमहेदंशस्य १० इळामग्नेपुरुदंससंसुनिंगोःशश्वत्तमंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ११ ॥ २ ॥

अजन्त्येकादश विश्वामित्रस्त्रिष्टुप् । तृतीयासप्तम्यावनुष्टुभौ । आद्यानां पञ्चानां यूपः । ततः पञ्चानां यूपाः । अष्टम्या विश्वे देवा वा । एकादश्याश्चोन्नयूपस्य मूलभूतः स्थाणुः ।

८ अजन्तित्वामध्वरेदेवयन्तोवनस्पतेमधुनादैव्येन । यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याउपस्थे १ समिद्धस्यश्रयमाणःपुरस्ताद्ब्रह्मवन्वानोअजरंसुवीरम् । आरेअस्मदमतिंबाधमानउच्छ्रयस्वमहतेसौभगाय २ उच्छ्रयस्ववनस्पतेवर्ष्मन्पृथिव्याअधि । सुमितीमीयमानोवंवाय्वाज्ञवाहसे ३ युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः । तंधीरासःकवयउन्नयन्तिस्वाध्यो-

ओ३म् मनसादेवयन्तः १ जातोजायतेसुदिनत्वेअह्नांसमर्यआविदथेवर्धमानः । पुनन्तिधीराअपसोमनीषादेवयाविप्रउदियर्तिवाचम् ५ ॥ ३ ॥ यान्वोनरोदेवयन्तोनिमिम्युर्वनस्पतेस्वधितिर्वाततक्ष । तेदेवासःस्वरवस्तस्थिवांसःप्रजावदस्मेदिधिषन्तुरत्नम् ६ येवृक्णासोअधिक्षमिनिमितासोयतस्रुचः । तेनोव्यन्तुवायवेदेवत्राक्षेत्रसाधसः७ आदित्यारुद्रावसवःसुनीथाद्यावाक्षामापृथिवीअन्तरिक्षम् । सजोषसोयज्ञमवन्तुदेवाऊर्ध्वंकृण्वन्त्वध्वरस्यकेतुम् ८ हंसाइवश्रेणिशोयतानाःशुक्रावसानाःस्वरवोनआगुः । उन्नीयमानाःकविभिःपुरस्ताद्देवादेवानामपियन्तिपाथः ९ शृङ्गाणीवेच्छृङ्गिणांसंदृहश्रेचषालवन्तःस्वरवःपृथिव्याम् । याघद्रिर्वाविहवेश्रोपमाणाअस्माँअवन्तुपृतनाज्येषु १० वनस्पतेशतवल्शोविरोह

सहस्रंवल्शाविवयंरुहेम । यंत्वामयंस्वधितिस्तेजमानःप्रणिनायमहतेसौभ-
गाय ११ ॥ ४ ॥

सखायो नव विश्वामित्रोऽग्निर्बृहती । अन्त्या त्रिष्टुप् ।

१ सखायस्त्वाववृमहेदेवंमर्ताँसऊतये । अपांनपातंसुभगँसुदीदितिंसुप्रतू-
र्तिमनेहसम् १ कायमानोवनात्वंयन्मातृरजंगन्नपः । नतत्तेअग्नेप्रमृषेनिवर्तनं
यद्दूरेसन्निहाभवः २ अतितृष्टंवावक्षिथाथैवसुमनाअसि । प्रप्रान्येयन्तिपर्यन्य
आसनेयेषांसख्येअसिश्रितः ३ ईयिवांसमतिस्रिधःशश्वतीरतिंसश्चतः । अन्वीं-
मविन्दन्निचिरासोअद्रुहोऽप्सुसिंहमिवश्रितम् ४ ससृवांसंमिवत्मनाग्निमित्था-
तिरोहितम् । ऐनंनयन्मातरिश्वापरावतोदेवेभ्योमथितंपरि ५ ॥ ५ ॥ तंत्वा-
मर्ताअगृभ्णतदेवेभ्योहव्यवाहन । विश्वान्यद्यज्ञाँअभिपासिमानुषतवक्रत्वाय-

विष्ठय ६ तद्रद्रंनवंदुंसनापाकांयचिच्छदयति । त्वांयदंग्नेपशवंःसमासंतेसमिं-
द्धमपिशर्वरे ७ आजुंहोतास्वध्वरंशीरंपावकशोंचिषम् । आशुंदूतमंजिरंप्रत्न-
मीड्यंश्रुष्टीदेवंसंपर्यत ८ त्रीणिंशतात्रीसहस्राण्यग्निंत्रिंशच्चदेवानवंचासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माआदिद्धोतारंन्यसादयन्त ९ ॥ ६ ॥

त्वामग्ने नव विश्वामित्रोऽग्निरुष्णिक् ।

१० त्वामंग्नेमनीषिणंःसम्राजंचर्षणीनाम् । देवंमतींसइन्धतेसमंध्वरे १ त्वां
यज्ञेष्वृत्विजमग्नेहोतारमीळते । गोपाऋतस्यंदीदिहिस्वेदमें २ सघायस्तेददा-
शतिसमिधांजातवेदसे । सोअंग्नेधत्तेसुवीर्यंसपुष्यति ३ सकेतुरंध्वराणांमग्निर्दे-
वेभिरागंमत् । अजानःसप्तहोतृभिर्हविष्मंते ४ प्रहोत्रेपूर्व्यंवचोऽग्नयेभरतावृ-
हत् । विपांज्योतींषिबिभ्रतेनवेधसे ५ ॥ ७ ॥ अग्निंवर्धन्तुनोगिरोयतोजायंत

उक्थ्यः । महेवाजायद्रविणायदर्शतः ६ अग्नेयजिष्ठोअध्वरेदेवान्देवयतेयज ।
होतामन्द्रोविराजन्स्यतिस्रियः ७ सनःपावकदीदिहियुमद्रमेसुवीर्यम् । भवा
१००॥ त्तोतृभ्योअन्तमः स्वस्तये ८ तंत्वाविप्राविपन्यवोजागृवांसःसमिन्धते । हव्य
वाहममर्त्यंसहोवृधम् १ ॥ ८ ॥

अग्निर्होता नव विश्वामित्रोऽग्निर्गायत्री ।

११ अग्निर्होतापुरोहितोऽध्वरस्यविचर्षणिः । सवेदयज्ञमानुषक् १ सहव्य-
वाळमर्त्यउशिग्दूतश्चनोहितः । अग्निर्धियासमृण्वति २ अग्निर्धियासचेतति
केतुर्यज्ञस्यपूर्व्यः । अर्थह्यस्यतरणि ३ अग्निंसूनुंसनश्रुतंसहसोजातवेदसम् ।
वह्निंदेवाअकृण्वत ४ अदाभ्यःपुरएताविशामग्निर्मानुषीणाम् । तूर्णीरथःसदा
नवः ५ ॥ १ ॥ साह्वान्विश्वाअभियुजःक्रतुर्देवानासमुक्तः । अग्निस्तुविश्रव- ॥१००॥

स्तमः ६ अभिप्रयांसिवाहसादाश्वाँअंभोतिमत्यीः । क्षयंपावकशोचिषः ७ परि-
विश्वानिसुविंताग्नेरंश्यामुमन्मभिः । विप्रासोजातवेदसः ८ अग्नेविश्वानिवार्या
वाजेंषुसनिषामहे । त्वेदेवासएरिरे १ ॥ १० ॥

इन्द्राग्नी नव विश्वामित्र इन्द्राग्नी गायत्री ।

१२ इन्द्राग्नीआगतंसुतंगीर्भिर्नभोवरेण्यम् । अस्यपातंधियेषिता १ इन्द्राग्नी
जरितुःसचायज्ञोजिगातिचेतनः । अयापातमिमंसुतम् २ इन्द्रमुश्किंकविच्छदा
युज्ञस्यजूत्यावृणे । तासोमस्येहतृम्पताम् ३ तोशावृत्रहणाहुवेसजित्वानापरा-
जिता । इन्द्राग्नीवाजसातमा ४ प्रवामर्चन्त्युक्थिनोनीथाविदोजरितारः ।
इन्द्राग्नीइषआवृणे ५ ॥ ११ ॥ इन्द्राग्नीनवतिंपुरोदासपंत्नीरधूनुतम् । साकमे-
केनकर्मणा ६ इन्द्राग्नीअपसस्पर्युपप्रयन्तिधीतयः । ऋतस्यपथ्याऽनु ७ इ-

न्द्राग्नीतविषाणिवांसधस्थानिप्रयाँसिच । युवोरप्सूयँहितम् ८ इन्द्राग्नीरोचना दिवःपरिवाजेयुभूयथः । तद्वांचेतिप्रवीयँम् ९ ॥ १२ ॥ इति शाकलर्क्संहितायां तृतीये मण्डले प्रथमोऽनुवाकः ॥ १ ॥

म वः सप्त ऋषभो वैश्वामित्रोऽग्निरनुष्टुप् ।

१३ प्रवोदेवायाग्नयेवर्हिष्ठमर्चास्मै । गमद्देवेभिरासनोयजिष्ठोवर्हिरासदत् १ ऋतावायस्परोदसीदक्षंसचन्तऊतयः । हविष्मन्तस्तमीळतेतंसानिष्यन्तोऽवसे २ सयन्ताविप्रएषांसयज्ञानामथाहिषः । अग्निंतंवोदुवस्यतुदातायोवनिंताम्-घम् ३ सनःशमींणिवीतयेऽग्नियँच्छतुशंतमा । यतोनःप्रुष्णवद्वसुंदिविक्षितिभ्योअप्स्वा ४ दीदिवांसमपूर्व्यंवस्वींभिरस्यधीतिभिः । ऋक्वाणोअग्निमिन्धतेहोतारंविश्पतिंविशाम् ५ उत्तनोब्रह्मन्नविषउक्थेषुदेवहूतमः । शंनःशोचामरुद्वधोऽ- ॥१०१॥

ग्नेसहस्रसातमः ६ नूनोरास्वसहस्रवत्तोकवत्पुष्टिमद्वसु । द्युमदग्नेसुवीर्यंवर्षिष्ठ-मनुपक्षितम् ७ ॥ १३ ॥

आ होता सप्त ऋषभो वैश्वामित्रोऽग्निस्त्रिष्टुप् ।

१४ आहोतामन्द्रोविदथान्यस्थात्सत्योयज्वाकवितमःसवेधाः । विद्युद्रथःसहसस्पुत्रोअग्निःशोचिष्केशःपृथिव्यांपाजोअश्रेत् १ अयामितेनमउक्तिंजुषस्वऋतावस्तुभ्यंचेततेसहस्वः । विद्वाँआवक्षिविदुषोनिषत्तिमध्यआवहिरूतयेयजत्र २ द्रवंतांतउपसोवाजयन्तीअग्नेवातस्यपथ्याभिरच्छ । यत्सीमञ्जन्तिपूर्व्यं हविर्भिरावन्धुरेवतस्थतुर्दुरोणे ३ मित्रश्चतुभ्यंवरुणःसहस्वोऽग्नेविश्वेमरुतःसुम्नमर्चन् । यच्छोचिषासहसस्पुत्रतिष्ठाअभिक्षितीःप्रथयन्त्सूर्योनृन् ४ वयंतेअद्यरिमाहिकामंमुत्तानहस्तानमसोपसद्य । यजिष्ठेनमनसायक्षिदेवानस्रेधतामन्म-

नाविप्रोऽअग्ने ५ त्वद्विपुत्रसहसोविपूर्वीर्वेवस्यन्त्यूतयोविवाजाः । त्वंदेहिसहस्रिणंरयिंनोऽद्रोघेणवचसासत्यमग्ने ६ तुभ्यंदक्षकविक्रतोयानीमादेवमतासो अध्वरेअकर्म । त्वंविश्वस्यसुरथस्यवोधिसर्वंतदग्नेअमृतस्वदेह ७ ॥ १४ ॥

विपाजसा सप्त कान्योत्कीलोऽग्निस्त्रिष्टुप् ।

१५ विपाजंसापृथुनाशोशुंचानोवाधंस्वद्विषोरक्षसोअमींवाः । सुशर्मंणोबृहतःशर्मंणिस्यामग्नेरहंसुहवस्यप्रणीतौ १ त्वंनोऽस्याउषसोव्युष्टौत्वंसूरऽउदितेवोधिगोपाः । जन्मेवनित्यंतनयंजुषस्वस्तोमंमेअग्नेतन्वांसुजात २ त्वंनश्चक्षावृषभानुपूर्वीःकृष्णास्त्वग्नेअरुषोविभाहि । वसोनेपिचपविचात्यंहःकृधीनोराययुशोजोयविष्ठ ३ अपाङ्ङोअग्नेवृषभोदिदीह्यपुरोविश्वाःसौभगासंजिगीवान् । यज्ञस्यनेताप्रथमस्यपायोर्जातवेदोबृहतःसुप्रणीते ४ अच्छिद्राशर्मजरितःपुरूणिदेवाँ

अच्छादीयानःसुमेधाः । रथोनसस्निरभिवक्षिवाजमग्नेत्वंरोदसीनःसुमेके ५ प्रपींपयवृषभजिन्ववाजानग्नेत्वंरोदसीनःसुदोघे । देवेभिर्देवसुरुचारुचानोमानो मर्तस्यदुर्मतिःपरिष्ठात् ६ इळामग्नेपुरुदंससंसुनिंगोःशश्वत्तमंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ७ ॥ १५ ॥

अयमग्निः पङ्क्त्यौत्कीलोऽग्निः । आद्या तृतीया पञ्चमी च बृहत्यः । शिष्टाः सतोबृहत्यः ।

१६ अयमग्निःसुवीर्यस्येशेमहःसौभगस्य । रायईशेसुपत्यस्यगोमतईशेवृत्रहथानाम् १ इमंनरोमरुतःसश्चतावृधंयस्मिन्रायःशेवृधासः । अभियेसन्तिपृतनासुदूढ्योविश्वाहाशत्रुंमादभुः २ सत्वंनोरायःशिशीहिमीढ्वोअग्नेसुवीर्यस्य । तुविद्युम्नवर्षिष्ठस्यप्रजावतोऽनमीवस्यशुष्मिणः ३ चक्रियोविश्वाभुवनाभिसासहिश्चक्रिर्देवेष्वादुवः । आदेवेषुयतंतुआसुवीर्यआशंसउतनृणाम् ४ मानो

अग्नेऽमंतयेमावीरंतायैरीरधः । मागोतायैसहस्रंपुत्रमानिदेऽपद्वेषांस्याकृधि ५ शाग्धिवाजंस्यसुभगप्रजावतोऽग्नेवृहतोअध्वरे । संरायाभूयंसासृजमयोभुना तुविद्युम्नयशंस्वता ६ ॥ १६ ॥

समिध्यमानः पञ्च कतो वैश्वामित्रोऽग्निस्त्रिष्टुप् ।

१७ समिध्यमानःप्रथमानुधर्मासमक्तुभिरज्यतेविश्ववारः । शोचिष्केशो घृतनिर्णिक्पावकःसुयज्ञोअग्निर्यजथायदेवान् १ यथायंजोहोत्रमंग्नेपृथिव्यायथा दिवोजातवेदश्चिकित्वान् । एवानेनंहविषायक्षिदेवान्मनुष्वद्यज्ञंप्रतिरेमद्य २ त्रीण्यायूंषितवंजातवेदस्तिस्रआजानीरुषसस्तेअग्ने । ताभिर्देवानामवोयक्षि विद्वानथाभवयजमानायशंयोः ३ अग्निंसुदीतिंसुदृशंगृणन्तोनमस्यामस्त्वेडयं जातवेदः । त्वांदूतमरतिंहव्यवाहंदेवाअकृण्वन्नमृतस्यनाभिम् ४ यस्त्वद्रोता

पूर्वोऽअग्नेयजीयान्हिताव॒सत्तास्व॒धयाचशंभुः । तस्यानु॒धर्म॒प्रय॑जाचिकि॒त्वोऽथा नोधाअध्व॒रंदे॒ववी॑तौ ५ ॥ १७ ॥

भवानः पञ्चकतो वैश्वामित्रोऽग्निस्त्रिष्टुप् ।

१८ भवा॑नोअग्नेसु॒मना॒उपे॑तौ॒सखे॑व॒सख्येपि॒तरे॑वसा॒धुः । पु॒रु॒द्रु॒हो॒हि॒क्षि॒तयो॒ जना॑नां॒प्रति॑प्र॒तीची॑दहता॒दरा॑तीः १ तपो॒ष्वग्नेअन्त॑राँ॒अमि॑त्रान्तपा॒शंस॒मर॑रुषः परस्य । तपो॑वसोचिकि॒ता॒नोअ॒चित्ता॒न्वि॒तेति॑ष्ठन्ताम॒जरा॒अया॑सः २ इ॒ध्मेना॑ग्न इ॒च्छमा॑नोघृ॒तेनं॑जुहोमिह॒व्यं॑तरे॒बला॑य । याव॒दीशे॒ब्रह्म॑णा॒वन्द॑मानइ॒मांधियं॑ शत॒सेया॑यदे॒वीम् ३ उच्छो॒चिषा॑सहस॒स्पुत्र॒स्तुतो॑वृ॒हद्व॑यः॒शश॑मा॒नेषु॑धेहि । रे॒व-दग्नेवि॒श्वामि॑त्रेषु॒शंयो॑र्म॒मृज्मा॑ते॒तन्वं॑१ भू॒रि॒कृ॒त्वः ४ कृ॒धि॒र॒त्नंसु॒सनि॑त॒र्धना॑नां॒सघे-दग्नेभव॒सि॒यत्स॑मि॒द्धः॑स्तो॒तुर्दु॑रो॒णेसु॒भग॑स्यरे॒वत्सू॒प्रा॒कु॒रस्रा॑दधिषे॒वपूं॑षि ५॥ १८॥

अग्निं होतारं पञ्च गाथ्याग्निस्त्रिष्टुप् ।

११ अग्निंहोतारंप्रवृणेमियेधेगृत्संकविंविश्वविदममूरम् । सनोयक्षद्देवतांत्रा यजीयान्त्रायेवाजांयवनतेमघानि १ प्रतेअग्नेहविष्मतीमियर्म्यच्छांसुद्युम्नांरातिनींघृताचीम् । प्रदक्षिणिद्देवतांतिमुराणःसंरातिभिर्वसुभिर्यज्ञमश्रेत् २ सतेजीयसामनसात्वोतंउतशिक्षस्वपत्यस्यशिक्षोः । अग्नेरायोनृतमस्यप्रभूतौभूयामतेसुष्टुतयश्चवस्वः ३ भूरीणिहित्वेदधिरेअनीकाग्नेदेवस्ययज्यवोजनासः । सआवहदेवतांतियविष्ठशर्धोयद्यदिव्यंयजासि ४ यस्त्वाहोतारमनजन्मियेधोनिषादयन्तोयजथायदेवाः।सत्वंनोअग्नेऽवितेहबोध्यधिश्रवांसिधेहिनस्तनूषु ५॥११॥

अग्निमुपसं पञ्च गाथ्याग्निस्त्रिष्टुप् । आद्यापञ्चम्योविश्वेदेवाः ।

१२० अग्निमुपसंमश्विनादधिक्रांव्युष्टिषुहवतेवह्निरुक्थैः । सुज्योतिषोनः

शृण्वन्तुदेवाः सजोषसोऽध्वरंवावशानाः १ अग्नेत्रीतेवाजिनात्रीषधस्था तिस्रस्तेजिह्वाऋतजातपूर्वीः । तिस्रउतेतन्वोदेववातास्ताभिर्नःपाहिगिरोअप्रयुच्छन् २ अग्नेभूरीणितवजातवेदोदेवस्वधावोऽमृतस्यनाम । याश्चमायामायिनांविश्वमिन्वत्वेपूर्वीःसंदधुःपृष्टबन्धो ३ अग्निर्नेताभगइवक्षितीनांदैवीनांदेवऋतुपाऋतावा । सत्राहासनयोविश्ववेदाःपर्याद्विश्वातिदुरितागृणन्तम् ४ दधिक्राम्णिमुपसंचदेवींबृहस्पतिंसवितारंचदेवं । अश्विनामित्रावरुणाभगंचवसून्रुद्राँआदित्याँइहहुवे ५ ॥ २० ॥

इमं नः पञ्च गाध्यग्निः । अन्त्या विराड्रूपा सतोबृहती । उपाद्ये अनुष्टुभौ । शिष्टे त्रिष्टुभौ ।

२१ इमंनोयज्ञममृतेषुधेहीमाहव्याजातवेदोजुषस्व । स्तोकानामग्नेमेदसो घृतस्यहोतःप्राशानप्रथमोनिषद्य १ घृतवन्तःपावकतेस्तोकाःश्वोतन्तिमेदसः ।

स्वधर्मन्देववीतयेश्रेष्ठंनोधेहिवार्यम् २ तुभ्यंस्तोकाघृतश्चुतोऽग्नेविप्रायसन्त्य ।
ऋषिःश्रेष्ठःसमिध्यसेयज्ञस्यप्राविताभव ३ तुभ्यंश्चोतन्त्यध्रिगोशचीवःस्तोकासोअग्नेमेदसोघृतस्य । कविशस्तोबृहताभानुनागाहव्याजुषस्वमेधिर ४ ओजिष्ठंतेमध्यतोमेदउद्भृतंप्रतेवयंददामहे । श्चोतन्तितेवसोस्तोकाअधित्वचिप्रीतान्दैवशोविहि ५ ॥ २१ ॥

अयं स पञ्च गाथी पुरीष्या अग्नयस्त्रिष्टुप् । चतुर्थ्यनुष्टुप् ।

२२ अयंसोअग्निर्यस्मिन्त्सोममिन्द्रःसुतंदधेजठरेवावशानः । सहस्रिणंवाजमत्यंनसप्तिंससवान्त्सन्त्स्तूयसेजातवेदः १ अग्नेयत्तेदिविवर्चःपृथिव्यांयदोषधीष्वप्स्वायजत्र । येनान्तरिक्षमुर्वाततन्थत्वेपःसभानुरर्णवोनृचक्षाः २ अग्नेदिवो अर्णमच्छाजिगास्यच्छादेवाँऊचिषेधिष्ण्याये । याराोचनेपरस्तात्सूर्यस्ययाश्वा- ॥१०५॥

वस्तोरुपतिष्ठन्तआपः ३ पुरीष्यासोअग्नयःप्रावणेभिःसजोषसः । जुषन्तांयज्ञ-
मद्रुहोऽनमीवाइषोमहीः ४ इळामग्नेपुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध ।
स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ५ ॥ २२ ॥

निर्मथितः पञ्च देवश्रवा देववातश्च भारतावग्निस्त्रिष्टुप् । तृतीया सतोबृहती ।

२३ निर्मथितःसुधितआसधस्थेयुवाकविरध्वरस्यप्रणेता । जूर्यत्स्वग्निरजरो
वनेष्वत्रादधेअमृतंजातवेदाः १ अमन्थिष्टांभारतारेवदग्निंदेवश्रवादेववातःसुद-
क्षम् । अग्नेविपश्यबृहताभिरायेषांनोनेताभवतादनुद्यून् २ दशक्षिपःपूर्व्यसीम-
जीजनन्त्सुजातंमातृषुप्रियम् । अग्निंस्तुहिदैववातंदेवश्रवोयोजनानामसद्वशी ३
नित्वादधेवरआपृथिव्याइळायास्पदेसुदिनत्वेअह्नाम् । दृषद्वत्यांमानुषआपयायां

तरिश्वानमुक्थ्यम् । बृहस्पतिमनुपोदेवतातयेविप्रंश्रोतारमातिथिंरघुष्यदम् २ अश्वोनक्रन्दञ्जनिभिःसमिध्यतेवैश्वानरःकुशिकेभिर्युगेयुगे । सनोअग्निःसुवीर्यंस्वश्व्यंदधातुरत्नममृतेषुजागृविः ३ प्रयन्तुवाजास्तविषीभिरग्नयःशुभेसमिश्लाःपृषतीरयुक्षत । बृहदुक्षोमरुतोविश्ववेदसःप्रवेपयन्तिपर्वताँअदाभ्याः ४ अग्निश्रियोमरुतोविश्वकृष्टयआत्वेषमुग्रमवसेमहेवयम् । तेस्वानिनोरुद्रियावर्पनिर्णिजःसिंहानहेषक्रतवःसुदानवः ५ ॥ २६ ॥ व्रातंव्रातंगणंगणंसुशस्तिभिरग्नेर्भामंमरुतामोजसेमहे । पृषदश्वासोअनवभ्रराधसोगन्तारोयज्ञंविदथेषुधीराः ६ अग्निरस्मिजन्मनाजातवेदाघृतमेचक्षुरमृतंमआसन् । अर्कस्त्रिधातूरजसोविमानोऽजस्रोघर्मोहविरस्मिनाम ७ त्रिभिःपवित्रैरपुपोध्यर्कंहृदामतिंज्योतिरनुप्रजानन् । वर्षिष्ठंरत्नमकृतस्वधाभिरादिद्यावापृथिवीपर्यपश्यत् ८ शतधारमुत्समं

क्षीयमाणंविपश्चितंपितरंवक्त्वानाम् । मेळिंमदन्तंपित्रोरुपस्थेतरोदसीपितृतंस-त्यवाचम् १ ॥ २७ ॥

भ वः पञ्चदश विश्वामित्रोऽग्निर्गायत्री । आद्याया ऋतवो वा ।

२७ प्रवोवाजाअभिद्यवोहविष्मन्तोघृताच्या । देवाञ्जिगातिसुम्नयुः १ ईळेअग्निंविपश्चितंगिरायज्ञस्यसाधनम् । श्रुष्टीवानंधितावानम् २ अग्नेशकेमतेवयंय-मंक्षस्यंवाजिनः । अतिद्वेषांसितरेम ३ समिध्यमानोअध्वरेऽग्निःपावकईड्यः । शोचिष्केशस्तमीमहे ४ पृथुपाजाअमर्त्योघृतनिर्णिक्स्वाहुतः । अग्निर्यज्ञस्यहव्यवाट् ५ ॥ २८ ॥ तंसवाधीयतसुचइत्याधियायज्ञवन्तः । आचक्रुरग्निमूतये ६ होतादेवोअमर्त्यःपुरस्तादेतिमायया । विदथानिप्रचोदयन् ७ वाजीवाजेषुधीयतेऽध्वरेषुप्रणीयते । विप्रोयज्ञस्यसाधनः ८ धियाचक्रेवरेण्योभूतानांगर्भमा

दंधे । दक्षंस्यपितरंतना १ नित्वांदधेवरेण्यंदक्षंस्येळासहस्कृत । अग्नेंसुदीतिमु-
शिजम् १० ॥ २१ ॥ अग्निंयन्तुरंमतुरंमृतस्ययोगेंवनुषंः । विप्रावाजैःसमि-
न्धते ११ ऊर्जोनपांतमध्वरेदीदिवांसमुपद्यवि । अग्निमीळेकविक्रंतुम् १२ इळे-
न्योनमस्यास्तिरस्तमांसिदर्शतः । समग्निरिध्यतेवृषा १३ वृषोअग्निःसमिध्यते-
ऽश्वोनदेववाहनः । तंहविष्मन्तईळते १४ वृषणंत्वावयंवृषन्वृषणःसमिधीमहि ।
अग्नेदीद्यंतंबृहत् १५ ॥ ३० ॥

अग्ने जुषस्व पञ्चविंशामित्रोऽग्निर्गायत्री । तृतीयोष्णिक् । चतुर्थी त्रिष्टुप् । पञ्चमी जगती ।

२८ अग्नेंजुषस्वनोहविःपुरोळाशंजातवेदः । प्रातःसावेधियावसो १ पुरोळा
अग्नेपचतस्तुभ्यंवाघापरिष्कृतः । तंजुषस्वयविष्ठय २ अग्नेवीहिपुरोळाशमाहु-
तंतिरोअह्नयम् । सहसःसूनुरस्यध्वरेहितः ३ माध्यंदिनेसवनेजातवेदःपुरोळाश-

मिहकंवेजुपस्व । अग्नेयह्वस्यतवंभागधेयंनप्रमिनन्तिविदथेंपुधीराः ४ अग्नेतृतीयेसवनेहिकानिंपःपुरोळाशंसहसःसूनवाहुतम् । अथादेवेष्वध्वरंविपन्ययाधारत्नवन्तममृतेंपुजागृविम् ५ अग्नेवृधानआहुतिंपुरोळाशंजातवेदः । जुषस्वंतिरोअंकयम् ६ ॥ ३१ ॥

अस्तीदं षोडश विश्वामित्रोऽग्निः । पञ्चम्या ऋत्विजो वा । आद्याचतुर्थीदशमी-द्वादश्योऽनुष्टुभः । पष्ठ्येकादश्युपान्त्ये च जगत्यः । शिष्टास्त्रिष्टुभः ।

२१ अस्तीदमधिमन्थनमस्तिप्रजननंकृतम् । एतांविश्पत्नीमाभराग्निमन्थामपूर्व्यां १ अरण्योर्निहितोजातवेदागर्भइवसुधितोगर्भिणीषु । दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः २ उत्तानायामवभराचिकित्वान्त्सद्यःप्रवीतावृषणंजजान । अरुषस्तूपोरुशदस्यपाजइळायास्पुत्रोवयुनेऽजनिष्ट ३ इळा-

यास्त्वापदेवयंनाभांपृथिव्याअधि। जातवेदोनिधीमह्यग्नेहव्यायवोढवे ४ मन्थ-
तानरःकविमद्वयन्तप्रचेतसममृतंसुप्रतीकम्। यज्ञस्यकेतुंप्रथमंपुरस्तादग्निंनरो
जनयतासुशेवम् ५ ॥ ३२ ॥ यदीमन्थन्तिबाहुभिर्विरोचतेऽश्वोनवाज्यरुषोवने-
ष्वा। चित्रोनयामन्नश्विनोरनिवृतःपरिवृणक्त्यश्मनस्तृणादहन् ६ जातोअग्नी
रोचतेचेकितानोवाजीविप्रःकविशस्तःसुदानुः। यंदेवासईडयंविश्वविदंहव्यवा-
हमदधुरध्वरेषु ७ सीदहोतःस्वउलोकेचिकित्वान्त्सादयायज्ञंसुकृतस्ययोनौ।
देवावीर्देवान्हविषायजास्यग्नेबृहद्यजमानेवयोधाः ८ कृणोतधूमंवृषणंसखायो-
स्मैधन्तइतनवाजमच्छ। अयमग्निःपृतनाषाट्सुवीरोयेनदेवासोअसहन्तदस्यू-
न् १ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाःतंजानन्नग्नआसीदाथानोवर्धया
गिरः १० ॥३३॥ तनूनपादुच्यतेगर्भआसुरोनराशंसोभवतियद्विजायते। मात-

रिश्वायदमिमीतमातरिवातस्यसर्गोअभवत्सरीमणि ११ सुनिर्मथानिमथितः सुनिधानिहितःकविः । अग्नेस्वध्वराकृणुदेवान्देवयतेयज १२ अजीजनन्नमृतं मर्त्यासोऽस्त्रेमाणंतरणिंवीळुजम्भम् । दशस्वसारोअग्रुवःसमीचीःपुमांसंजातमभिसंरभन्ते १३ प्रसप्तहोतासनकादरोचतमातुरुपस्थेयदशोचदूधनि । न निमिंषतिसुरणोदिवेदिवेयदसुरस्यजठरादजायत १४ अमित्रायुधोमरुतामिव प्रयाःप्रथमजाब्रह्मणोविश्वमिदुः । द्युम्नवद्ब्रह्मकुशिकासएरिरएकएकोदमेअग्निंसमीधिरे १५ यदद्यत्वाप्रयतियज्ञेअस्मिन्होतश्चिकित्वोऽवृणीमहीह । ध्रुवमयाध्रुवमुताशमिष्ठाःप्रजानन्विद्वाँउपयाहिसोमम् १६ ॥ ३४ ॥ इति शाकलकसंहितायां तृतीयाष्टके प्रथमोऽध्यायः ॥ १ ॥ इति शाकलकसंहितायां तृतीये मण्डले द्वितीयोऽनुवाकः ॥ २ ॥

इच्छन्तिमाधिकैन्द्रंशासत्कुशिकोविश्वामित्रएववाश्रुतेरिन्द्रसोमंऽशूनामपर्वतानांसप्तीनासंवादोनदी-भिर्विश्वामित्रस्योत्तितीर्षोस्तत्रनदीवाक्यंचतुर्थीषष्ठ्यष्टमीदशम्यःषष्टीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टु-विन्द्रःपूर्भिदेकादशतिष्टाहरीइमामूपूषान्त्सांवोरोऽपश्यत्सानिर्दहेच्छस्यमानेतिश्रूयतेवार्त्रहत्यायगाय-त्रमन्त्यानुष्टुभमितष्टेवदशमजापतिःसवैश्वामित्रोवाच्योवाद्वौवातौनवैकोपीन्द्रंमतिर्नव ।

इच्छन्ति द्वाविंशतिर्विश्वामित्र इन्द्रस्त्रिष्टुप् ।

३० ॐम् इच्छन्तित्वासोम्यासःसखायःसुन्वन्तिसोमंदधतिप्रयांसि । तितिक्षन्तेअभिशस्तिंजनानामिन्द्रत्वदाकश्चनहिप्रकेतः १ नतेदूरेपरमाचिद्रजांस्यातुम्रयाहिहरिवोहरिभ्याम् । स्थिरायवृष्णेसवनाकृतेमायुक्ताग्रावाणःसमिधानेअग्नौ २ इन्द्रःसुशिप्रोमघवातरुत्रोमहाव्रातस्तुविकूर्मिर्ऋघावान् । यदुग्रोधावाधितोमर्त्यैर्वृक्ष्यातेवृषभवीर्याणि ३ त्वंहिष्माच्यावयन्नच्युतान्येकोवृत्राचरसि

जिघ्नमानःतवद्यावापृथिवीपर्वतासोऽनुव्रतायुनिमितेवतस्थुः ४ उताभयेपुरुहूत श्रवोभिरेकोद्दळ्हमवदोवृत्रहासन् । इमेचिदिन्द्ररोदसीअपारेयत्संक्रुम्णामघवन्काशिरित्ते ५ ॥ १ ॥ प्रसूतइन्द्रप्रवताहरिभ्यांप्रतेवज्रःप्रमृणन्नेतुशत्रून् । जहिप्रतीचोअनूचःपराचोविश्वंसत्यंकृणुहिविष्टमस्तु ६ यस्मैधायुरदधामर्त्यायाभक्तंचिद्रजतेगेह्यं१सः । भद्रातइन्द्रसुमतिर्घृताचीसहस्रदानापुरुहूतरातिः ७ सहदानुंपुरुहूतक्षियन्तंमहस्तमिन्द्रसंपिणक्कृणारुम् । अभिवृत्रंवर्धमानंपियारुमपादमिन्द्रतवसाजघन्थ ८ निसामनामिबिरामिन्द्रभूमिंमहीमपारांसदनेससत्थ । अस्तभ्नाद्द्यांवृषभोअन्तरिक्षमप्रन्त्वापस्त्वयेहप्रसूताः ९ अलातृणोबलइन्द्रव्रजोगोःपुराहन्तोर्भयमानोव्यार । सुगान्पथोअकृणोन्निरजेगाःप्रावन्वाणीःपुरुहूतंधमन्तीः १० ॥ २ ॥ एकोद्वसुमतीसमीचीइन्द्रआपंप्रापृथिवीमुतद्याम् ।

उतान्तरिक्षादभिनः समीकेऽधोरथीः सयुजः शूरवाजान् ११ दिशः सूर्योनमिना-
तिप्रदिष्टादिवेदिवे हर्यश्वप्रसूताः । संयदानळध्वनआदिदश्वैर्विमोचनंकृणुतेत-
त्वस्य १२ दिदृक्षन्तउपसोयामन्नक्तोर्विवस्वत्यामहिचित्रमर्णीकम् । विश्वेजान-
न्तिमहिनायदागादिन्द्रस्यकर्मसुकृतापुरूणि १३ महिज्योतिर्निहितंवक्षणास्वा-
मापक्वंचरतिविभ्रतीगौः । विश्वंस्वाद्मसंभृतमुस्रियायांयत्सीमिन्द्रोअदधाद्भोज-
नाय १४ इन्द्रहव्यामकोशाअभूवन्यज्ञायशिक्षगृणतेसखिभ्यः। दुर्मायवोदुरेवा
मर्त्यासोनिषङ्क्षणोरिपवोहन्त्वांसः १५ ॥ ३ ॥ संघोषःशृण्वेऽवमैरमित्रैर्जह्ही
न्येष्वशनिंतापिपिष्ठाम् । वृश्चेमधस्ताद्विरुजासहस्वजहिरक्षोमघवन्बन्धयस्व १६
उद्गृहरक्षःसहमूलमिन्द्रवृश्चाग्र्यंप्रत्यग्रंशृणीहि । आकीवतःसललूकंचकर्थ
ब्रह्मद्विषेतपुषिंहेतिमस्य १७ स्वस्तयेवाजिभिश्चप्रणेतःसंयन्महीरिषआसत्सि

पर्वीः । रायोवन्तारोवृहतःस्यामास्मेअस्तुभगइन्द्रप्रजावान् १८ आनोभरभग-मिन्द्रद्युमन्तंनितेदेष्णस्यधीमहिप्ररेके । ऊर्वईवपप्रथेकामोअस्मेतमापृणवसु-पतेवसूनाम् १९ इमंकामंमन्दयागोभिरश्वैश्चन्द्रवतारार्धसापप्रथंश्च । स्वर्यवो मतिभिस्तुभ्यंविप्राइन्द्रायवाहःकुशिकासोअक्रन् २० आनोगोत्रादर्दृहिगोपते-गाःसमस्मभ्यंसनयोयन्तुवाजाः । दिवक्षाअसिवृषभसत्यशुष्मोऽस्मभ्यंसुमघ-वन्वोधिगोदाः २१ शृनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्व-न्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् २२ ॥ ४ ॥

शासद्वाविंशतिर्विश्वामित्रः कुशिको वा इन्द्रस्त्रिष्टुप् ।

३१ शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँऋतस्यदीधितिंसपर्यन्नापितायत्रदुहितुःसेक-मृञ्जन्त्संशग्म्येनमनसादधन्वे १ नजामयेतान्वोरिक्थमारैक्चकारगर्भंसनितु-

निधानम् । यदीमातरोजनयन्तवह्निमन्यःकर्तासुकृतोरन्यऋन्धन् २ अग्निर्जज्ञे
जुह्वा३रेजमानोमहस्पुत्राँअरुषस्यप्रयक्षे । महान्गर्भोमह्याजातमेषांमहीप्रवृद्ध-
पँश्वस्ययज्ञैः ३ अभिजैत्रीरसचन्तस्पृधानंमहिज्योतिस्तमसोनिरजानन् । तं
जानतीःप्रत्युदायन्नुषासःपतिर्गवामभवदेकइन्द्रः ४ वीळौसतीरभिधीरामतृन्द-
न्नाचाहिन्वन्मनसासप्तविप्राः । विश्वामविन्दन्पथ्यामृतस्यप्रजानन्नित्तानमसा
विवेश ५ ॥ ५ ॥ विदद्यदीसरमारुग्णमद्रेर्महिपाथःपूर्व्यसध्र्यक्कः । अग्रं
नयत्सुपद्यक्षराणामच्छारवैप्रथमाजानतीगात् ६ अगच्छदुविप्रतमःसखीयन्त्स्सू-
दयत्सुकृतेगर्भमद्रेः । ससानमर्योयुवभिर्मखस्यन्नथाभवदङ्गिराःसद्योअर्चन् ७
सतःसतःप्रतिमानंपुरोभूविश्वावेदजनिमाहन्तिशुष्णम् । प्रणोदिवःपदवी-
र्गव्युरर्चन्त्सखासखींरमुञ्चन्निरवद्यात् ८ निगव्यतामनसासेदुरर्कैःकृण्वानासो

अमृतत्वायगातुम् । इदंचिन्नुसदनंभूयेंयांयेनमासाँअसिंषासन्नृतेन १ संपश्यमा-
नाअमदन्नभिस्वंपयःप्रत्नस्यरेतसोदुघानाः । विरोदसीअतपद्घोषएषांजातेनिष्षा-
मदधुर्गोषुवीरान् १० ॥ ६ ॥ सजातेभिर्वृत्रहासेदुह्व्यैरुदुस्रियाअसृजदिन्द्रो
अर्कैः । उरूव्यस्मैघृतवद्धरन्तीमधुस्वाद्मदुदुहेजेन्यागौः ११ पित्रेचिच्चक्रुःसदनं-
समस्मैमहित्विषींमत्सुकृतोविहिख्यन् । विष्कभ्नन्तःस्कम्भनेनाजनित्रीआ-
सीनाऊर्ध्वंरभसंविमिन्वन् १२ महीयदिंधिषणाशिश्नथेधात्सद्योवृधंविभ्वं१रो-
दस्योः । गिरोयस्मिन्ननवद्याःसमीचीर्विश्वाइन्द्रायतविषीरनुत्ताः १३ मह्यातेस-
ख्यंवशिमशक्रीरावृत्रघ्नेनियुतोयन्तिपूर्वीः । महिस्तोत्रमवआगन्मसूरेरस्माकंसु
मंघवन्बोधिगोपाः १४ महिक्षेत्रंपुरुश्चन्द्रंविविद्वानादित्सखिंभ्यश्चरथंसमैरत् ।
इन्द्रोनृभिरजनद्दीद्यानःसाकंसूर्यमुषसंगातुमग्निम् १५॥७॥ अपश्चिदेपविभ्वो ३

दर्मूनाःप्रसधीचीरसृजद्विश्वश्चन्द्राः। मध्वःपुनानाःकविभिःपवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः १६ अनुकृष्णेवसुधितीजिहातेउभेसूर्यस्यमंहनायजत्रे । परियत्तेमहिमानंवृजध्यैसखायइन्द्रकाम्याऋजिप्याः १७ पतिर्भववृत्रहन्त्सूनृतानांगिरांविश्वायुर्वृषभोवयोधाः । आनोगहिसख्येभिःशिवेभिर्महान्महीभिरूतिभिःसरण्यन् १८ तमङ्गिरस्वन्नमसासपर्यन्नव्यंकृणोमिसन्यसेपुराजाम् । द्रुहोवियाहिबहुलाअदेवीःस्वश्चनोमघवन्त्सातयेधाः १९ मिहःपावकाःप्रततामभूवन्त्स्वस्तिनःपिपृहिपारमासाम्। इन्द्रत्वंरथिरःपाहिनोरिषोमक्षूमंक्षूकृणुहिगोजितौनः २० अदेदिष्टवृत्रहागोपतिर्गाअन्तःकृष्णाँअरुषैर्धामभिर्गात्। प्रसूनृतादिशमानऋतेनदुरश्चविश्वाअवृणोदपस्वाः २१ शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् २२ ॥ ८ ॥

इन्द्र सोमं सप्तदश विश्वामित्र इन्द्रास्त्रिष्टुप् ।

३२ इन्द्रसोमंसोमपतेपिबेमंमाध्यंदिनंसवनंचारुयत्तै । प्रप्रुथ्याशिप्रेमघवन्वृजीपिन्विमुच्याहरीइहमादयस्व १ गवांशिरंमन्थिनंमिन्द्रशुक्रंपिबासोमंररिमातेमदाय । ब्रह्मकृतामारुतेनागणेनसजोषारुद्रैस्तृपदावृषस्व २ येतेशुष्मंयेतविषीमवर्धन्यैश्चन्तइन्द्रमरुतस्तओजः । माध्यंदिनेसवनेवज्रहस्तपिबारुद्रेभिः सगणःसुशिप्र ३ तइन्वस्यमधुमद्दिविप्रइन्द्रस्यशर्धोमरुतोयआसन् । येभिर्वृत्रस्यैषितोविवेदामर्मणोमन्यमानस्यममँ ४ मनुष्वदिन्द्रसवनंजुषाणःपिबासोमंशश्वतेवीर्याय । सआववृत्स्वहर्यश्वयज्ञैःसरण्युभिरपोअर्णांसिसस्रुषे ५ ॥ १ ॥ त्वमपोयद्वृत्रंजघन्वाँअत्याँइवप्रासृजःसर्तवाजौशयानमिन्द्रचरतावधेनवत्रिवांसंपरिदेवीरदेवम् ६ यजामइन्नमसावृधमिन्द्रंबृहन्तमृष्वमजरंयुवानम् ।

यस्यप्रियेममतुर्यज्ञियस्यनरोदसीमहिमानंमुमातें ७ इन्द्रस्यकर्मसुकृतापुरूणिव्रतानिदेवानामिनन्तिविश्वे । दाधारयःपृथिवींद्यामुतेमांजजानसूर्यंमुषसंसुदंसाः ८ अद्रोघसत्यंतवतन्महित्वंसद्योयज्जातोअपिवोहसोमम् । नद्यावइन्द्रतवसस्तुओजोनाहानमासांशरदोवरन्त ९ त्वंसद्योअपिवोजातइन्द्रमदायसोमंपरमेव्योमन् । यद्द्यावापृथिवीआविवेगीरथाभवःपूर्व्यःकारुधायाः१० ॥१०॥ अहन्नहिंपरिशयानमर्णओजायमानंतुविजातत्यान् । नतेमहित्वमनुभूदधौर्यदन्ययास्फिग्या ३ क्षामवस्थाः११ यज्ञोहितइन्द्रवर्धनोभूदुतप्रियःसुतसोमोमिमेघैः । यज्ञेनयज्ञमवयज्ञियःसन्यज्ञस्तेवज्रंमहिहत्यंआवत् १२ यज्ञेनेन्द्रमवसाचक्रेअर्वागैनंसुम्नायनव्यसेववृत्याम् । यःस्तोमेभिर्विदधेपूर्व्यंधियोमध्यमेभिरुतनूतनेभिः १३ विवेषयन्मांविषणाजजानस्तवैपुरापार्यादिन्द्रमह्नः । अंहसोय- ॥१२४॥

त्रपीपरत्यथानोनावेवयान्तंमुभयेहवन्ते १४आपूर्णोअस्यकलशःस्वाहासेक्तेवकोशंसिसिचेपिबध्यै । समुप्रियाआववृत्रन्मदायप्रदक्षिणिदभिसोमासइन्द्रम् १५ नत्वागभीरःपुरुहूतसिन्धुर्नाद्रयःपरिषन्तोवरन्त । इत्थासखिभ्यइषितोयदिन्द्राद्रुक्षंचिदरुजोगव्यंमूवम् १६ शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् १७ ॥ ११ ॥

म पर्वतानां त्रयोदश विश्वामित्र इन्द्रस्त्रिष्टुप् । अन्त्यानुष्टुप् ।

३३ प्रपर्वतानामुशतीउपस्थादश्वेइववियतेहासमाने । गावेवशुभ्रेमातरारिहाणेविपाट्छुतुद्रीपयसाजवेते १ इन्द्रेषितेप्रसवंभिक्षमाणेअच्छासमुद्रंरथ्येवयाथः । समाराणेऊर्मिभिःपिन्वमानेअन्यावांमन्यामप्येतिशुभ्रे २ अच्छासिन्धुंमातृतमामयासंविपाशमुर्वींसुभगामगन्म । वत्समिवमातरासंरिहाणेसमानं

योनिमनुसंचरन्ती ३ एनावयंपर्यसापिन्वमानाअनुयोनिंदेवकृतंचरन्तीः । नव-
तंवेप्रसवःसर्गतक्तःकिंयुर्विप्रोनद्योजोहवीति ४ रमध्वंमेवचसेसोम्यायऋतावरी-
रुपमुहूर्तमेवैः । प्रसिन्धुमच्छावृहतीमनीषावस्युरह्वेकुशिकस्यसूनुः ५ ॥ १२ ॥
इन्द्रोअस्माँअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनाम् । देवोऽनयत्सावितासुपाणि-
स्तस्यवयंप्रसवेयामउर्वीः ६ प्रवाच्यंशश्वधावीर्येण तदिन्द्रस्यकर्मयदहिंविवृश्चत् ।
विवज्रेणपरिषदोजघानायन्नापोऽयनमिच्छमानाः ७ एतद्वचोजरितर्मापिमृ-
ष्ठाआयत्तेयोषानुत्तरायुगानि । उक्थेयुकारोप्रतिनोजुषस्वमानोनिकःपुरुषत्रान-
मंस्ते ८ ओषुस्वसारःकारवेशृणोतयथाविदूरादनसारथेन । निषूनमध्वंभवता
सुपाराअधोअक्षाःसिन्धवःस्रोत्याभिः ९ आतेकारोशृणवामावचांसियथादूरा-
दनसारथेन। नितेनंसैपीप्यानेवयोयामर्यायेवकन्याशश्वचैते १० ॥ १३ ॥ यद्-

श्रत्वाभरताःसंतरेयुर्व्यन्प्रामंइषितइन्द्रजूतः । अर्षादहप्रसवःसर्गतक्रआवोवृणे सुमतिंयज्ञियानाम् ११ अतारिषुर्भरतागव्यवःसमभक्तविप्रःसुमतिंनदीनाम् । प्रपिन्वध्वमिषयन्तीःसुराधाआवक्षणाःपृणध्वंयातशीभम् १२ उद्वऊर्मिःशम्या हन्त्वापोयोक्त्राणिमुञ्चत । मादुष्कृतौव्येनसाग्न्यौगून्मारंताम् १३ ॥ १४ ॥

इन्द्रः पूर्भिदेकादश विश्वामित्र इन्द्रस्त्रिष्टुप् ।

१४ इन्द्रःपूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानोविशत्रून् । ब्रह्मजूतस्तन्वा वावृधानोभूरिदात्रआपृणद्रोदसीउभे १ मखस्यतेतविषस्यप्रजूतिमियर्मिवाचे-ममृतायभूषन् । इन्द्रक्षितीनामसिमानुषीणांविशांदैवीनामुतपूर्वयावा २ इन्द्रो वृत्रमवृणोच्छर्धनीतिःप्रमायिनाममिनाद्वर्पणीतिः । अहन्व्यंसमुशधग्वनेष्वा-विर्धेनाअकृणोद्ब्राम्याणाम् ३ इन्द्रःस्वर्षाजनयन्नहानिजिगायोशिग्भिःपृतना

अभिष्टिः । प्रारोचयन्मनवेकेतुमह्नामविन्दज्ज्योतिर्बृहतेरणाय ४ इन्दुस्तुजो बर्हणाआविवेशनृवद्दधानोनर्यापुरूणि । अचेतयद्धियंइमाजरित्रेप्रेमंवर्णंमातिरच्छुक्रमासाम् ५ ॥ १५ ॥ महोमहानिपनयन्त्यस्येन्द्रस्यकर्मसुकृतापुरूणि । वृजनेनवृजिनान्त्संपिपेषमायाभिर्दस्यूँराभिभूत्योजाः ६ युधेन्द्रोमह्नावरिवश्चकारदेवेभ्यःसत्पतिश्चर्षणिप्राः । विवस्वतःसदनेअस्यतानिविप्राउक्थेभिःकवयोगृणन्ति ७ सत्रासाहंवरेण्यंसहोदांससवांसंस्वरपश्चदेवीः । ससानयःपृथिवीद्यामुतेमामिन्द्रंमदन्त्यनुधीरणासः ८ ससानात्याँउतसूर्यंससानेन्द्रःससानपुरुभोजंसंगाम् । हिरण्ययंमुतभोगंससानहत्वीदस्यून्प्रार्यंवर्णंमावत् ९ इन्द्रओषधीरसनोदहानिवनस्पतीँरसनोदन्तरिक्षम् । विभेदवलंनुनुदेविवाचोऽथाभवद्- ॥११६

मिताभिक्रतूनाम् १० शुनंहुवेमघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ ।
शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ११ ॥ १६ ॥

तिष्ठा हरी एकादश विश्वामित्र इन्द्रस्त्रिष्टुप् ।

३५ तिष्ठाहरीरथआयुज्यमानायाहिवायुर्ननियुतोनोअच्छ । पिबास्यन्धो अभिसृष्टोअस्मेइन्द्रस्वाहारिरिमातेमदाय १ उपाजिरापुरुहूतायसप्तीहरीरथस्य धूर्ष्वायुनज्मि । द्रवद्यथासंभृतंविश्वतश्चिदुपेमंयज्ञमावहातइन्द्रम् २ उपोनयस्व वृषणातपुष्पोतेमंवत्वंवृषभस्वधावः । ग्रसेतामश्वाविमुचेहशोणादिवेदिवेसहशीरह्विधानाः ३ ब्रह्मणातेब्रह्मयुजायुनज्मिहरीसखायासधमादआशू । स्थिरंरथंसुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँउपयाहिसोमम् ४ मातेहरीवृषणावीतपृष्ठा निरीरमन्यजमानासोअन्येअत्यायाहिशश्वतोवयंतेऽरंसुतेभिःकृणवामसोमैः ५

॥ १७ ॥ तवायंसोमस्त्वमेह्यर्वाङ्शश्वत्तमंसुमनाअस्यपाहि । अस्मिन्यज्ञेबर्हिष्यानिषद्यादधिष्वेमंजठरइन्दुमिन्द्र ६ स्तीर्णंतेबर्हिःसुतइन्द्रसोमःकृताधाना अत्तवितेहरिभ्याम् । तदोकसेपुरुशाकायवृष्णेमरुत्वतेतुभ्यंरातास्तवीमभि ७ इमं नरःपर्वतास्तुभ्यमापुःसमिन्द्रगोभिर्मधुमन्तमक्रन् । तस्यागत्यासुमनाऋष्व पाहिप्रजानन्विद्वान्पथ्या३अनुस्वाः ८ याँआभजोमरुतइन्द्रसोमेयेत्वामवर्धु-न्नभवन्गणस्ते । तेभिरेतंसजोषावावशानो३ग्नेःपिवजिह्वयासोमंमिन्द्र ९ इन्द्र पिबस्वधयाचित्सुतस्याग्नेर्वापाहिजिह्वयायजत्र । अध्वर्योर्वाप्रयतंशक्रहस्ताद्धो-तुर्वायज्ञंहविषोजुषस्व १० शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ११ ॥ १८ ॥

इमामूष्वेकादश विश्वामित्र इन्द्रस्त्रिष्टुप् । दशम्या आङ्गिरसः ।

३६ इमामू॒ प्रभृ॑तिं सा॒तये॑धाः शश्वच्छश्वदू॒तिभि॒र्याद॑मानः । सु॒ते सु॑ते वावृधे॒ वर्ध॑नेभि॒र्यः कर्म॑भि॒र्महद्भि॑: सु॒श्रुतो॑ भूत् १ इन्द्रा॑य सोमाः प्र॒दिवो॒ विदा॑ना ऋ॒भुर्ये॑भि॒र्वृष॑पर्वा॒ विहा॑याः । प्रय॑म्यमाना॒न्प्रति॑ पू॒र्गृभा॑येन्द्रपिब॒ वृष॑धूतस्य॒ वृष्ण॑: २ पिबा॒ वर्ध॑स्व॒ तव॑धा सु॒तास॒ इन्द्र॑सोमा॑सः प्रथ॒माऽउ॒तेमे । यथा॑पिब॒: पूर्व्याँ॑ इन्द्र॒सोमाँ॑ एवा॑पा॒ह्यप॑न्योऽअ॒ग्यान॑वीयान् ३ म॒हाँअ॑मत्रो॒ वृज॑नेवि॒रप्श्यु॑ग्रंशवः॒ पत्य॑तेधृष्णो॒जः । नाह॑वि॒ष्याच॑पृथि॒वीच॒नैन॑न्त्सो॒मासो॒ह्यश्व॑मम॒न्दन् ४ म॒हाँऽउ॒ग्रो वा॑वृधे॒ वी॒र्या॑य स॒माच॑क्रे॒ वृष॑भः॒ काव्ये॑न । इन्द्रो॒ भगो॒ वाज॒दाऽअ॑स्य॒ गाव॒: प्रजा॑यन्ते॒ दक्षि॑णाऽअस्य॒ पूर्वी॑: ५ ॥ ११ ॥ प्रयत्सिन्ध॑वः॒ प्रस॑वं॒ यथा॒यन्नापः॑ समु॒द्रं र॒थ्ये॑व जग्मुः । अत॑श्चि॒दिन्द्रः॑ सदसो॒वरी॑या॒न्यदी॑सो॒मः पृ॒णति॑ दु॒ग्धो अं॒शुः ६ स॒मु॒द्रेण॑ सिन्धवो॒ याद॑मानाऽइन्द्रा-

यसोमंसुषुतंभरन्तः । अंशुंदुहन्तिहस्तिनोभरित्रैर्मध्वःपुनन्तिधारयापवित्रैः ७
ह्रदाइवकुक्षयःसोमधानाःसमींविव्याचसवनापुरूणि । अन्नायदिन्द्रःप्रथमाव्या-
शवत्रंजघन्वाँअवृणीतसोमम् ८ आतूभरमाकिरेतत्परिष्ठाद्विद्माहित्वावसुपतिं
वसूनाम् । इन्द्रयत्तेमाहिनंदत्रमस्त्यस्मभ्यंतद्धर्यश्वप्रयन्धि ९ अस्मेप्रयन्धिमघ-
वन्नृजीषिन्निन्द्रायोविश्ववारस्यभूरेः । अस्मेशतंशरदोजीवसेधाअस्मेवीराञ्छ-
श्वतइन्द्रशिप्रिन् १० शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृ-
ण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ११ ॥ २० ॥

वार्त्रहत्यायैकादश विश्वामित्र इन्द्रो गायत्री । अन्त्यानुष्टुप् ।

३७ वार्त्रहत्यायशवसेपृतनायाद्याय च । इन्द्रत्वावर्तयामसि १ अर्वाचीनं
सुतेमनउतचक्षुःशतक्रतो । इन्द्रकृण्वन्तुवाघतः २ नामानितेशतक्रतोविश्वाभि- ॥११८॥

गीभिरीमहे । इन्द्राभिमातिषाह्ये ३ पुरुहूतस्यधार्मभिःशतेनमहयामसि । इन्द्रस्यचर्षणीधृतः ४ इन्द्रंवृत्रायहन्तवेपुरुहूतमुपब्रुवे । भरेवृवाजसातये ५ ॥ २१ ॥ वाजेषुसासहिंभवत्वामीमहेशतक्रतो । इन्द्रंवृत्रायहन्तवे ६ द्युम्नेषुपृतनाज्येपृत्सुतूर्षुश्रवःसुच । इन्द्रसाक्ष्वाभिमातिषु ७ शुष्मिंतमंनऊतयेद्युम्निनंपाहिजागृविम् । इन्द्रसोमंशतक्रतो ८ इन्द्रियाणिशतक्रतोयातेजनेषुपञ्चसु । इन्द्रतानितआवृणे ९ अर्गन्निन्द्रश्रवोबृहद्युम्नंदधिष्वदुष्टरम् । उत्तेशुष्मंतिरामसि १० अर्वावतोनआगह्यथोशक्रपरावतः । उलोकोयस्तेअद्रिवइन्द्रेहतत्आगहि ११ ॥ २२ ॥

अभितष्टेव देश मजापतिर्वैश्वामित्रो वाच्यो वा द्वौ वा तौ विश्वामित्रो वेन्द्रस्त्रिष्टुप् ।
३८ अभितष्टेवदीधयामनीषामत्योनवाजीसुधुरोजिहानः । अभिप्रियाणि

मर्मृ॒ज्यात्परा॑णिकु॒र्वीरि॑च्छामि॒संद॒शेसु॒मे॒धाः १ इ॒नोत॑पृ॒च्छ॒जनि॑माकवी॒नांमे॒नो-
धृ॒तःसु॒कृ॒तस्तक्ष॒त्वाम्। इ॒माउ॑तेप्र॒ण्यो॒३॒॑वर्ध॑मानाम॒नोवा॒ताअ॒धनु॒घर्म॑णिग्मन् २
नि॒यी॒मिद॒त्रगु॒ह्यादधा॑नाउ॒तक्ष॒त्रायु॒रोद॑सी॒सम॑ञ्जन् । सं॒मा॒त्रा॑भिर्म॒मि॒रे॒यु॒रु॒र्वी
अ॒न्तर्म॒हीस॑मृ॒तेधा॑यसेधुः ३ आ॒ति॒ष्ठ॒न्तं॒परि॒विश्वे॑अभूष॒ञ्छ्रि॒योव॑सा॒नश्च॑रति॒स्व-
रो॑चिः। म॒हत्त॒द्कृ॒ष्णो॒असु॑र॒स्य॒नामा॒वि॒श्व॒रू॒पो॒अ॒मृ॒ता॑नितस्थौ ४ अ॒सू॒त॒पूर्वो॑वृ॒प॒-
भो॒ज्याया॑नि॒माअ॑स्यगो॒रुवः॑सन्तिपु॒र्वीः। दि॒वो॑नपा॒ताविद॑थ॒स्यधी॒भि॒:क्ष॒त्रंरा॑जा-
ना॒प्र॒दि॒वो॑दधाथे ५ ॥ २३ ॥ त्रीणि॑राजाना॒वि॒द॒थे॒पु॒रू॒णि॒परि॒विश्वा॑नि॒भू॒य॒थः॒स-
द्मा॑सि। अप॑श्यमत्र॒मन॑सा॒जगु॒न्वान्ब॒तेग॑न्ध॒र्वाँ॒अपि॑वा॒यु॒के॒शान् ६ तदि॑न्वे॒स्यवृ-
ष॒भस्य॑धे॒नो॒रानाम॑भि॒र्ममि॑रे॒सक्म्यं॑गोः। अ॒न्यद॑न्यदसु॒र्यं॑१॒॑वसा॑ना॒नि॒मा॒यि॒नो॒म-
मि॒रे॒रू॒प॒मस्मिन् ७तदि॑न्वे॒स्यस॒वि॒तु॒र्न॒कि॒र्मे॒हि॒र॒ण्य॒यी॒म॒म॒ति॒यामशी॑श्रेत्। आसु-

द्युतीरोदसीविश्वमिन्वेअपींवयोपाजानिमानिवन्ने ८ युवंप्रत्नस्यसाधथोमहोयदै-
वीस्वस्तिःपरिणःस्यातम् । गोपाजिह्वस्यतस्थुषोविरूपाविश्वेपश्यन्तिमायिनः
कृतानि १ शृनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमू-
तयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् १० ॥ २४ ॥ इति शाकलसंहितायां
तृतीये मण्डले तृतीयोऽनुवाकः ॥ ३ ॥

इन्द्रं मतिर्नव विश्वामित्र इन्द्रस्त्रिष्टुप् ।

३९ इन्द्रंमतिर्हृदआवच्यमानाच्छापतिंस्तोमंतष्टाजिगाति । याजागृविर्विदथे-
शस्यमानेन्द्रयत्तेजायतेविछितस्य १ दिवश्चिदापूर्व्याजायमानाविजागृविर्विदथे
शस्यमाना । भद्रावस्त्राण्यर्जुनावसानासेयमस्मेसनजापिर्याधीः २ यमाचिदत्र
यमसूरसूतजिह्वायाअग्रंपतदाद्यस्थात् । वपूंषिजातामिथुनासचेतमोहनातपुंषो

वुघ्नएतां ३ नकिरेषांनिन्दितामर्त्यःपुयेअस्माकंपितरोगोपुयोधाः।इन्द्रंएषांद्दंहिता माहिंनावानुद्रोत्राणिससृजेदंसनावान् ४ सखाह्यत्रसाखिभिर्नवंग्वैरभिज्वा सत्वंभिर्गाअनुग्मन् । सत्यंतादिन्द्रोदृशभिर्दशंग्वैःसूर्यंविवेदतमंसिक्षियन्तम् ५ ॥ २५ ॥ इन्द्रोमधुसंभृतमुस्रियायांपद्वद्विवेदशफवज्जमेगोः । गुहाहितंगुह्यंगूळ्ह-मप्सुहस्तेदधेदक्षिणेदक्षिणावान् ६ ज्योतिर्वृणीततमसोविजानन्नारेस्यामदुरि-तादभीके । इमागिरःसोमपाःसोमवृद्धजुषस्वेन्द्रपुरुतमस्यकारोः ७ ज्योतिर्य-ज्ञायरोदसीअनुष्यादारेस्यामदुरितस्यभूरेः । भूरिचिद्धितुजतोमर्त्यस्यसुपारासो वसवोवर्हणावत् ८ शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्व-न्तंमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ९ ॥ २६ ॥ इति शाकलसं-हितायां तृतीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

इन्द्रत्वागायत्रंवातूनउपनआयाद्यष्टावयंतेपञ्चवाहंतंत्वामन्द्रैर्युध्मस्यमरुत्वान्सप्तयोहशंसामहाभिन्द्र-स्याहाचर्षणिधृतंद्वादशाधान्यौतृचौजागतगायत्रौधानावन्तमष्टौपूर्वार्धगायत्रंपष्टीजगतीन्द्रापर्वताचतु-र्विंशतिराधेन्द्रापार्वतीपञ्चदश्यादिदेवाचंससर्पर्यैचतस्रोरथाङ्गस्तुतयोन्त्याअभिशापार्थास्तावासिष्ठद्वेपि ष्णोनवसिष्ठाःशृण्वन्तिदशमीषोळश्यौजगत्यौत्रयोदशीगायत्रीद्वादशीविंशीद्वाविंश्यानुष्टुभोष्टादशीवृ-हतीमंमहेन्नधिकोक्तगोत्रःप्रजापतिर्हिवैश्वदेवंहोपसः ॥

इन्द्र त्वा नव विश्वामित्र इन्द्रो गायत्री ।

४० ओम् इन्द्रंत्वावृषभंवयंसुतेसोमेहवामहे । सपाहिमध्वोअन्धसः १ इन्द्र क्रतुविदंसुतंसोमंहर्यपुरुष्टुत । पिबावृषस्वतातृपिम् २ इन्द्रप्रणेधितावानंयज्ञं विश्वेभिर्देवेभिः । तिरःस्तवानविश्पते ३ इन्द्रसोमाःसुताइमेतवप्रयन्तिसत्पते । क्षयंचन्द्रासइन्दवः ४ दधिष्वाजठरेसुतंसोमंमिन्द्रवरेण्यम् । तवद्युक्षासइन्दवः५

॥ १ ॥ गिर्वणःपाहिनःसुतंमधोर्धारांभिरज्यसे । इन्द्रत्वादातमिद्यशः ६ अभि द्युम्नानिवनिनइन्द्रंसचन्तेअक्षिता । पीत्वीसोमस्यवावृधे ७ अर्वावतोनआगहि परावतश्चवृत्रहन् । इमाजुषस्वनोगिरः ८ यदन्तरापरावतमर्वावतंचहूयसे । इन्द्रेहततआगहि ९ ॥ २ ॥

आ तू नो नव विश्वामित्र इन्द्रो गायत्री ।

११ आतूनइन्द्रमद्रिग्घुवानःसोमपीतये । हरिभ्यांयाह्यद्रिवः १ सत्तोहोतान ऋत्वियःसतिस्तिरेवाहिरानुषक् । अयुजन्प्रातरद्रयः २ इमाब्रह्मब्रह्मवाहःक्रियन्त आवहिःसीद । वीहिशूरपुरोळाशम् ३ रारन्धिसवनेषुणएषुस्तोमेषुवृत्रहन् । उक्थेष्विन्द्रगिर्वणः ४ मतयःसोमपामुरुंरिहन्तिशवसस्पतिम् । इन्द्रंवत्संन मातरः ५ ॥ ३ ॥ समिन्दस्वाह्यन्धसोराधसेतन्वामहे । नस्तोतारंनिदेकरः ६

वयमिन्द्रत्वायवोहविष्मन्तोजरामहे । उतत्वमस्मयुर्वसो ७ मारेअस्मद्विमुमुचोहरिप्रियार्वाङ्याहि । इन्द्रस्वधावोमत्स्वेह ८ अर्वाञ्चंत्वासुखेरथेवहंतामिन्द्र केशिना । घृतस्नूबर्हिरासदे १ ॥ ४ ॥

उप नो नव विश्वामित्र इन्द्रो गायत्री ।

४२ उपनःसुतमागहिसोममिन्द्रगवाशिरम् । हरिभ्यांयस्तेअस्मयुः १ तमिन्द्रमदमागहिबर्हिःष्ठांग्रावभिःसुतम् । कुविन्त्वस्यतृप्णवः २ इन्द्रमित्थागिरो ममाच्छागुरिषिताइतः । आवृतेसोमपीतये ३ इन्द्रंसोमस्यपीतयेस्तोमैरिह हवामहे । उक्थेभिःकुविदागमत् ४ इन्द्रसोमाःसुताइमेतान्दधिष्वशतक्रतो । जठरेवाजिनीवसो ५ ॥ ५ ॥ विद्माहित्वाधनंजयंवाजेषुदधृषंकवे । अधांते सुम्नमीमहे ६ इममिन्द्रगवाशिरंयवाशिरंचनःपिब । आगत्यावृषभिःसुतम् ७

तुभ्येदिन्द्रस्त्वोक्येऽ३सोमंचोदामिपीतये । एषरारन्तुतेहृदि ८ त्वांसुतस्यपीतये
प्रतमिन्द्रहवामहे । कुशिकासोअवस्यवः १ ॥ ६ ॥

आयाह्यष्टौ विश्वामित्र इन्द्रस्त्रिष्टुप् ।

४३ आयाह्यर्वाङुपवन्धुरेष्वास्तवेदनुप्रदिवःसोमपेयम् । प्रियासखायाविमुचोपवर्हिस्त्वामिमेहव्यवाहोहवन्ते १ आयाहिपूर्वीरतिचर्षणीराँअर्यआशिषउपनोहरिभ्याम् । इमाहित्वामतयःस्तोमतष्टाइन्द्रहवन्तेसख्यंजुषाणाः २आनोयज्ञंनमोवृधंसजोषाइन्द्रदेवहरिभिर्याहितूयम् । अहंहित्वामतिभिर्जोहवीमिघृतप्रयाःसधमादेमधूनाम् ३ आचत्वामेतावृषणावहातोहरीसखायासुधुरास्वङ्गा । धानावदिन्द्रःसवनंजुषाणःसखासख्युःशृणवद्वन्दनानि ४ कुविन्मांगोपांकरसेजनस्यकुविद्राजानंमघवन्नृजीषिन् । कुविन्मऋषिंपपिवांससुतस्यकुविन्मेवस्वो

अमृतस्यशिक्षाः ५ आत्वावृहन्तोहरयोयुजानाअर्वागिन्द्रसधमादोवहन्तु । प्रयेहितादिवक्रुजन्त्याताःसुसंमृष्टासोवृषभस्यमूराः ६ इन्द्रपिवृषधूतस्यवृष्णुआयंतेश्येनउशतेजभारं । यस्यमदेन्यावर्यसिप्रकृष्टीर्यस्यमदेअपगोत्रावर्धं ७ शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ८ ॥ ७ ॥

अयं ते पञ्च विश्वामित्र इन्द्रो बृहती ।

११ अयंतेअस्तुहर्यतःसोमआहरिभिःसुतः । जुषाणइन्द्रहरिभिर्नआगह्यातिष्ठहरितंरथम् १ हर्यन्नुषसमर्चयःसूर्यंहर्यन्नरोचयः । विद्वांश्चिकित्वान्हर्यश्ववर्धसइन्द्रविश्वाअभिश्रियः २ यामिन्द्रोहरिधायसंपृथिवींहरिवर्पसम् । अधारयद्धरितोर्भूरिभोजनंययोरन्तर्हरिश्चरत् ३ जज्ञानोहरितोवृषाविश्वमाभातिरो-

चनम् । हर्यश्वोहरितंधत्तआयुधमावज्रंवाह्वोर्हरिम् ४इन्द्रोहर्यन्तमर्जुनंवज्रेणुकै-
रभीवृतम् । अपावृणोद्धरिभिरद्रिभिःसुतमुद्गाहरिभिराजत ५ ॥ ८ ॥

आमन्द्रैः पञ्च विश्वामित्र इन्द्रो बृहती ।

४५ आमन्द्रैरिन्द्रहरिभिर्याहिमयूररोमभिः। मात्वाकेचिन्नियमन्विनपाशिनोऽतिधन्वेवताँइहि १ वृत्रखादोवलंरुजःपुरांदर्मोअपामजः । स्थातारथंस्यहर्योरभिस्वरइन्द्रोदृळ्हाचिदारुजः २ गम्भीराँउदधीरिवक्रतुंपुष्यसिगाइव । प्रसुगोपायवंसंघेनवोयथाह्रदंकुल्याइवाशत ३ आनस्तुजंरयिंभरांशंनप्रतिजानते। वृक्षंपक्वंफलंमङ्कीवंधूनुहीन्द्रसंपारणंवसु ४ स्वयुरिन्द्रस्वराळसिस्मद्दिष्टिःस्वयशस्तरः । सवावृधानओजसापुरुष्टुतभवानःसुश्रवस्तमः ५ ॥ ९ ॥

४६ युध्मस्यतेवृषभस्यस्वराजउग्रस्ययून:स्थविरस्यघृष्वे: । अजूर्यतोवज्रि-
णोवीर्याउणीन्द्रश्रुतस्यमहतोमहानि १ महाँअंसिमहिपृवृष्ण्येभिर्धनस्पृदुग्रसह-
मानोअन्यान् । एकोविश्वस्यभुवनस्यराजासयोधयाचक्षयाचजनान् २ प्रमा-
त्राभिरिरिचेरोचमान:प्रदेवेभिर्विश्वतोअप्रतीत: । प्रमज्मनादिवइन्द्र:पृथिव्या:
प्रोरोर्महोअन्तरिक्षाद्जीपी ३ उरुंगभीरंजनुषाभ्युग्रंविश्वव्यचसमवतंमतीना-
म् । इन्द्रंसोमास:प्रदिविसुतास:समुद्रंनस्रवतआविशन्ति ४ यंसोममिन्द्रपृ-
थिवीद्यावागर्भंनमाताबिभृतस्त्वाया । तंतेहिन्वन्तितमुतेमृजन्त्यध्वर्यवोवृषभ
पातवाउ ५ ॥ १० ॥

मरुत्वान्पञ्च विश्वामित्र इन्द्रस्त्रिष्टुप् ।

४७ मरुत्वाँइन्द्रवृषभोरणायपिवासोमंमनुष्वधंमदाय। आसिंञ्चस्वजठरेमध्वऊर्मिंत्वंराजासिप्रदिवःसुतानाम् १ सजोषाइन्द्रसगणोमरुद्भिःसोमंपिववृत्रहाशूरविद्वान् । जहिशत्रूरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः २ उतक्रतुभिर्ऋतुपाःपाहिसोममिन्द्रदेवेभिःसखिभिःसुतंनः । याँआभजोमरुतोयेत्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ३ येत्वाहिहत्यैमघवन्नवर्धन्येशाम्बरेहरिवोयेगविष्टौ । येत्वानूनमनुमदन्तिविप्राःपिबेन्द्रसोमंसगणोमरुद्भिः ४ मरुत्वन्तंवृषभंवावृधानमकवारिंदिव्यंशासमिन्द्रम् । विश्वासाहमवसेनूतनायोग्रंसहोदामिहतंहुवेम ५ ॥ ११ ॥

सद्यो ह पञ्च विश्वामित्र इन्द्रस्त्रिष्टुप् ।

४८ सद्योहजातोवृषभःकनीनःप्रभर्तुमावदन्धसःसुतस्य । साधोःपिबप्रति-
कामंयथातेरसाशिरःप्रथमंसोम्यस्य १ यज्जायंथास्तदहरस्यकामेंशोःपीयूष-
मपिबोगिरिष्ठाम् । तंतेमातापरियोपाजनित्रीमहःपितुर्दमआसिञ्चदग्रे २ उप-
स्थायंमातरमन्नमैट्टत्रिग्मभंपश्यदभिसोममूधंः। प्रयावयन्नचरद्वृत्सोअन्यान्महा-
निंचक्रेपुरुधप्रतीकः ३ उग्रस्तुराषाळभिभूत्योजायथावशंतन्वंचक्रएषः । त्वष्टा-
रमिन्द्रोजनुषाभिभूयामुष्यासोमंमपिबच्चमूषु ४ शुनंहुवेममघवानमिन्द्रम-
स्मिन्भरेनृतंमंवाजसातौ । शृण्वन्तंमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ५ ॥ १२ ॥

शंसा महां पञ्च विश्वामित्र इन्द्रस्त्रिष्टुप्।

४१ शंसामहामिन्द्रंयस्मिन्विश्वाआकृष्टयःसोमपाःकाममव्यन् । यंसुक्रतुं धिषणेविभ्वतष्टंघनंवृत्राणांजनयन्तदेवाः १ यंनुनाकिःपृतनासुस्वराजाँहितातरं-तिनृतमंहरिष्ठाम् । इनतमःसत्वभिर्योहशूषैःपृथुज्रयाअमिनादायुर्दस्योः २ सहावांपृत्सुतरणिर्नार्वाँव्यानशीरोदसीमेहनावान् । भगोनकारेहव्योमतीनां पितेवचारुःसुहवोवयोधाः ३ धर्तादिवोरजसस्पृष्टऊर्ध्वोरथोनवायुर्वसुभिर्नियु-त्वान् । क्षपांवस्ताजनितासूर्यस्यविभक्ताभागंधिषणेववाजम् ४ शृनंहुवेममघ-वानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसं-जितंधनानाम् ५ ॥ १३ ॥

इन्द्रः स्वाहा पञ्च विश्वामित्र इन्द्रस्त्रिष्टुप् ।

५० इन्द्रःस्वाहापिबतुयस्यसोमंआगत्यातुम्रोवृषभोमरुत्वान् । ओरुव्यचाः पृणतामेभिरन्नैरास्यंहविस्तुर्व्वीःकामंमृध्याः १ आतेसपर्यूजवसेयुनज्मियया-रनुप्रदिवःश्रुष्टिमावः । इहत्वांधेयुर्हरयःसुशिप्रपिबात्वस्यसुषुतस्यचारोः २ गोभिर्मिमिक्षुंदधिरेसुपारमिन्द्रंज्यैष्ठ्यायधायसेगृणानाः । मन्दानःसोमंपपिवाँ ऋजीषिन्त्समस्मभ्यंपुरुधागाइषण्य ३ डुमंकामंमन्दयागोभिरश्वैश्चन्द्रवतारार्धसापप्रथंश्च । स्वर्यवोमतिभिस्तुभ्यंविप्राइन्द्रायवाहःकुशिकासोअक्रन् ४ शुनं हुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तं वृत्राणिसंजितंधनानाम् ५ ॥ १४ ॥

५१ चर्षणीधृतंमघवानमुक्थ्यं१मिन्द्रंगिरोबृहतीरभ्यनूषत। वावृधानंपुरुहूतंसुवृक्तिभिरमर्त्यंजरमाणंदिवेदिवे १ शतक्रतुमर्णवंगाकिनंनरंगिरोमइन्द्रमुपयन्तिविश्वतः। वाजसनिंपूर्भिदंतूर्णिमप्तुरंधामसाचंमभिषाचंस्वर्विदम् २ आकरेवसोजरितापनस्यतेऽनेहसःस्तुभइन्द्रोदुवस्यति। विवस्वतःसदनआहिपीप्रियेसत्रासाहंमभिमातिहनंस्तुहि ३ नृणामुत्वानृतमंगीभिरुक्थैरभिप्रवीरमर्चतासवार्धः। संसहसेपुरुमायोजिहीतेनमोअस्यप्रदिवएकईशे ४ पूर्वीरस्यनिष्षिधोमर्त्येषुपुरूवसूनिपृथिवीबिभर्ति। इन्द्रायद्यावओषधीरुतापोरयिंरक्षन्तिजीरयोवनानि ५॥ १५ ॥ तुभ्यंब्रह्माणिगिरइन्द्रतुभ्यंसुत्रादधिरेहरिवोजूपस्व ।

त्रोध्या३पिरवसोनूतनस्यसखेवसोजरितृभ्योवयोधाः ६ इन्द्रमरुत्वइहपाहिसोमंयथाशार्यातेअपिवःसुतस्य । तवप्रणीतीतवशूरशर्मन्नाविवासन्तिकवयःसुयज्ञाः ७ सवावशानइहपाहिसोमंमरुद्भिरिन्द्रसखिभिःसुतंनः । जातंयत्त्वापरिदेवाअभूवन्महेभरायपुरुहूतविश्वे ८ अनूयेमरुतआपिरेवोऽमन्दन्निन्द्रमनुदातिवाराः । तेभिःसाकंपिवतुवृत्रखादःसुतंसोमंदाशुषःस्वेसधस्थे ९ इदंह्यन्वोजसासुतंराधानांपते । पिबात्वस्यगिर्वणः १० यस्तेअनुस्वधामसत्सुतेनियच्छतुन्वम् । सत्वांममत्तुसोम्यम् ११ प्रतेअश्नोतुकुक्ष्योःप्रेन्द्रब्रह्मणाशिरः । प्रबाहूशूरराधसे १२ ॥ १६ ॥

धानावन्तमष्टौ विश्वामित्र इन्द्रः । आद्याश्चतस्रो गायत्र्यः । षष्ठी जगती । शिष्टास्त्रिष्टुभः ।

५२ धानावन्तंकरम्भिणंमपूपवन्तमुक्थिनम् । इन्द्रंप्रातर्जुषस्वनः १ पुरो-

ळाशंपचत्यंजुषस्वेन्द्रागुरस्वच । तुभ्यंहव्यानिंसिस्रते २ पुरोळाशंचनोघसो जोषयासेगिरश्चनः । वधूयुरिंवयोषणाम् ३ पुरोळाशंसनश्रुतप्रातःसावेजुषस्व नः । इन्द्रक्रतुर्हितेंबृहन् ४ माध्यंदिनस्यसवनस्यधानाःपुरोळाशंमिन्द्रकृष्वेह चारुम् । प्रयत्स्तोताजरितातूर्ण्यंर्थोवृषायमाणउपगीभिरीट्टे ५ ॥ १७ ॥ तृतीयेधानाःसवनेपुरुष्टुतपुरोळाशमाहुतंमामहस्वनः । ऋभुमन्तंवाजवन्तंत्वाकवे प्रयस्वन्तउपशिक्षेमधीतिभिः६ पूषण्वतेतेचकृमाकरम्भंहरिवतेहर्यश्वायधानाः । अपूपमद्भिसगणोमरुद्भिःसोमंपिववृत्रहाशूरविद्वान् ७ प्रतिधानाभरतूर्यमस्मै-पुरोळाशंवीरतमायनृणाम् । दिवेदिवेसदृशीरिन्द्रतुभ्यंवर्धन्तुत्वासोमपेयायधृष्णो ८ ॥ १८ ॥

इन्द्रापर्वता चतुर्विंशतिर्विश्वामित्रः । भार्ग्यांया इन्द्रापर्वतौ । पञ्चदशीषोडश्योर्वाक् । सप्तदश्यादिचतसृणां रथाङ्गानि । शिष्टानामिन्द्रः । दशमीषोडश्यौ जगत्यौ । द्वादशीविंशीद्वाविंश्योऽनुष्टुभः । त्रयोदशी गायत्री । अष्टादशी बृहती । शिष्टास्त्रिष्टुभः ।

५३ इन्द्रापर्वतावृहतारथेनवामीरिषआवहतंसुवीराः। वीतंहव्यान्यध्वरेषुदेवा वर्धेथांगीर्भिरिळयामदन्ता १ तिष्ठासुकंमघवन्मापरागाःसोमस्यनुत्वासुषुतस्य यक्षि । पितुर्नपुत्रःसिचमारभेतइन्द्रस्वादिष्टयागिराशंचीवः २ शंसावाध्वर्यो प्रतिमेगृणीहीन्द्रायुवाहःकृणवावजुष्टम् । एदंबर्हिर्यजमानस्यसीदाथाचभूदुक्थमिन्द्रायशस्तम् ३ जायेदस्तंमघवन्त्सेदुयोनिस्तदित्त्वायुक्ताहरयोवहन्तु । यदा कदाचसुनवामसोममग्निष्ट्वादूतोधन्वात्यच्छ ४ परायाहिमघवन्नाचयाहीन्द्रभ्रातरुभयत्रातिअर्थम्।यत्रारथस्यबृहतोनिधानंविमोचनंवाजिनोरासभस्य५॥१९॥

अपाःसोममस्तमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते । यत्रारथस्यबृहतोनिधानंविमोचनंवाजिनोदक्षिणावत् ६ इमेभोजाअङ्गिरसोविरूपादिवस्पुत्रासो असुरस्यवीराः । विश्वामित्रायददतोमघानिसहस्रसावेप्रतिरन्तआयुः ७ रूपंरूपं मघवाबोभवीतिमायाःकृण्वानस्तन्वं१ परिस्वाम्।त्रिर्यद्दिवःपरिमुहूर्तमागात्स्वैर्मन्त्रैरनृतुपाऋतावा ८ महाँऋषिर्देवजादेवजूतोऽस्तभ्नात्सिन्धुमर्णवंनृचक्षाः । विश्वामित्रोयदवहत्सुदासमप्रियायतकुशिकेभिरिन्द्रः ९ हंसाइवकृणुथश्लोकमद्रिभिर्मदन्तोगीर्भिरध्वरेसुतेसचाँदेवाँविप्राऋषयोनृचक्षसोविपंविप्रंकुशिकाः सोम्यंमधु १० ॥ २० ॥ उपप्रेतंकुशिकाश्चेतयध्वमश्वंरायेप्रमुञ्चतासुदासः । राजावृत्रंजङ्घनत्प्रागपागुदगथायजातेवरआपृथिव्याः ११ यइमेरोदसीउभेअहमिन्द्रमतुष्टवम् । विश्वामित्रस्यरक्षतिब्रह्मेदंभारतंजनम् १२ विश्वामित्राअरा-

सत्रह्मेन्द्रायवज्रिणे । करदिन्नःसुराधसः १३ किंतेकृण्वन्तिकीकटेषुगावो
नाशिरंदुह्रेनतपन्तिघर्मम् । आनोभरप्रमगंदस्यवेदोनैचाशाखंमघवन्नन्धया
नः १४ ससर्परीरमतिंबाधमानावृहन्निमायजमदग्निदत्ता । आसूर्यस्यदुहिता
ततानश्रवोदेवेष्वमृतमजुर्यम् १५॥ २१॥ ससर्परीरभरत्तूयमेभ्योऽधिश्रवःपाञ्च-
जन्यासुकृष्टिषु । सापक्ष्याऽनव्यमायुर्दधानायांमेपलस्तिजमदग्नयोददुः १६
स्थिरौगावोभवतांवीळुरक्षोमेषाविवाहिमायुगंविशारि । इन्द्रःपातल्यैददतांशरी-
तोररिष्टनेमेअभिनःसचस्व १७ वलंधेहितनूपुनोवलमिन्द्रानळुत्सुनः । वलं
तोकायतनायजीवसेत्वंहिवलदाअसि १८ अभिव्ययस्वखदिरस्यसारमोजो
धेहिस्पंदनेशिंशपायाम्। अक्षंवीळोवीळितवीळयस्वमायामादुस्मादवंजीहिपो
नः ११ अयमस्मान्वनस्पतिर्माचहामाचंरीरिषत् । स्वस्त्यागृहेभ्यआवसाआ

विमोचनात् २० ॥ २२ ॥ इन्द्रोतिभिर्बहुलाभिर्नोअद्ययाच्छेष्ठाभिर्मघवञ्छूर जिन्य । योनोद्वेष्टयधरःसस्पदीष्टयमुद्विष्मस्तमुप्राणोजहातु २१ पुरश्चिद्धि तपतिशिम्बलंचिद्विवृश्चति । उखाचिदिन्द्रयेयन्तीप्रयस्ताफेनमस्यति २२ न सायकस्यचिकितेजनासोलोधंनयन्तिपशुमन्यमानाः । नावाजिनंवाजिनाहासयन्तिनगर्दभंपुरोअश्वान्नयन्ति २३ इमईन्द्रभरतस्यपुत्राअपपित्वंचिकितुर्नप्रपित्वम् । हिन्वन्त्यश्वमरणंननित्यंज्यावाजंपरिणयन्त्याजौ २४ ॥ २३ ॥ इति शाकलसंहितायां तृतीये मण्डले चतुर्थोऽनुवाकः ॥ ४ ॥

इमं महे द्वाविंशतिः प्रजापतिर्विश्वामित्रो वाच्यो वा विश्वे देवास्त्रिष्टुप् ।

५४ इमंमहेविदध्यायशूषंशश्वत्कृत्वईड्यायप्रजभ्रुः । शृणोतुनोदम्यैभिरनीकैःशृणोत्वग्निर्दिव्यैरजस्रः १ महिमहेदिवेअर्चापृथिव्यैकामोमइच्छाइरति

॥१२९॥

प्रजानन् । यथोहस्तोमैर्विदथेषुदेवाःसपर्यवोमादयन्तेसचायोः २ युवोर्ऋतंरोदसीसत्यमस्तुमहेषुणःसुवितायप्रभूतम् । इदंदिवेनमोअग्नेपृथिव्यैसपर्यामिप्रयसायामिरत्नम् ३ उतोहिवांपूर्व्याआविविद्रेऋतावरीरोदसीसत्यवाचः नरश्चिद्वांसमिथेशूरसातौववन्दिरेपृथिविवेविदानाः ४ कोअद्धावेदकइहप्रवोचद्देवाँअच्छापथ्या३कासमेति । दक्षंश्रएषामनुमासदांसिपरेषुयागुह्येषुव्रतेषु ५ ॥ २४ ॥ कविर्नृचक्षाअभिषीमचष्टऋतस्ययोनाविधृतेमदन्ती । नानाचक्रातेसदनंयथावेः समानेनऋतुनासंविदाने ६ समान्यावियुतेदूरेअन्तेध्रुवेपदेतस्थतुर्जागरूके । उत स्वसारायुवतीभवन्तीआदुब्रुवातेमिथुनानिनाम ७ विश्वेदेतेजनिमासंविविक्तो महोदेवान्बिभ्रतीनव्यथेते । एजद्ध्रुवंपत्यतेविश्वमेकंचरत्पतत्रिविषुणंविजातम् ८ सनापुराणमध्येम्यारान्महःपितुर्जनितुर्जामितत्नः । देवासोयत्रपनितारएवैरुरौ

पथिभ्युतेतस्थुरन्तः १ इमंस्तोमंरोदसीप्रवंवीम्यृदूदरांःशृणवन्नग्निजिह्वाः । मित्रः
सम्राजोवरुणोयुवानआदित्यासःकवयःपप्रथानाः १० ॥ २५ ॥ हिरण्यपाणिः
सवितासुजिह्वस्त्रिरादिवोविदथेपत्यमानः । देवेषुचसवितःश्लोकमश्रेरादस्म-
भ्यमासुवसर्वतातिम् ११ सुकृत्सुपाणिःस्ववाँऋतावादेवस्त्वष्टावसेतानिनोधात्
पूषण्वन्तंऋभवोमादयध्वमूर्ध्वग्रावाणोअध्वरमतष्ट १२ विद्युद्रथामरुतंऋष्टिम-
न्तोदिवोमर्याँऋतजातांताअयासः । सरस्वतीगृणवन्यज्ञियासोधातारयिंसहवी-
रंतुरासः १३ विष्णुंस्तोमासःपुरुदस्ममर्कांभगंस्येवकारिणोयामंनिरमन् ।
उरुक्रमःकंकुहोयस्यपूर्वीर्नमंधन्तियुवतयोजनित्रीः १४ इन्द्रोविश्वैर्वीर्यै३ःपत्य
मानउभेआपप्रौरोदसीमहित्वा । पुरंदरोवृत्रहाधृष्णुषेणःसंगृभ्यानआभराभूरि
पुश्चः १५॥ २६ ॥ नासत्यामेपितरावन्धुपृच्छांसजात्यमश्विनोश्वारुनाम । युवंहि

स्थोरयिदौनोरयीणांदात्रंरक्षेथेअकवैरदंव्धा १६ महत्तद्वःकवयश्चारुनामयज्जंदे-
वाभवथविश्वइन्द्रे । सख्यंऋभुभिःपुरुहूतप्रियेभिरिमांधियंसातयेतक्षतानः १७
अर्यमाणोअदितिर्यज्ञियासोऽदब्धानिवरुणस्यव्रतानि । युयोतनोअनपत्यानिगन्-
तोःप्रजावान्नःपशुमाँअस्तुगातुः १८ देवानांदूतःपुरुधप्रसूतोऽनागान्नोवोचतुसर्व-
तातां । शृणोतुनःपृथिवीद्यौरुतापःसूर्योनक्षत्रैरुर्वन्तरिक्षम् १९ शृण्वन्तुनोव्-
र्णःपर्वतासोध्रुवक्षेमासइळयामदन्तः । आदित्यैनोअदितिःशृणोतुयच्छन्तुनो
मरुतःशर्मभद्रम् २० सदासुगःपितुमाँअस्तुपन्थामध्वादेवाओपधीःसंपपृक्त ।
भगोमिअग्नेसख्येनमंध्याउद्रायोअश्यांसदनंपुरुक्षोः २१ स्वदस्वहव्यासमिषोदि-
दीह्यस्मद्र्यक्संमिमीहिश्रवांसि । विश्वाँअग्नेपत्सुताजेषिशत्रूनहाविश्वासुमना
दीदिहीनः २२ ॥ २७ ॥

उषसो द्वाविंशतिः प्रजापतिर्विश्वेदेवास्त्रिष्टुप्। आद्याया उषाः। ततो नवानामग्निः

एकादश्या अहोरात्रौ। ततस्त्रिसृणां रोदसी। पञ्चदश्या रोदसी द्युनिशौ वा।

षोडश्या दिशः। शिष्टानामिन्द्रः पर्जन्यात्मा त्वष्टा वाग्निश्च।

५५ उषसःपूर्वाअधयद्व्युषुर्महद्विजज्ञेअक्षरंपदेगोः। व्रतादेवानामुपनुप्रभूषन्महद्देवानामसुरत्वमेकम् १ मोषूणोअत्रजुहुरन्तदेवामापूर्वेअग्नेपितरःपदज्ञाः। पुराण्योःसद्मनोःकेतुरन्तर्महद्देवानामसुरत्वमेकम् २ विमेपुरुत्रापतयन्तिकामाः शम्यच्छादीयेपूर्व्याणि। समिद्धेअग्नावृतमिद्दधेममहद्देवानामसुरत्वमेकम् ३ समानोराजाविभृतःपुरुत्राशयेशयासुप्रयुतोवनानु। अन्यावत्संभरतिक्षेतिमाता

॥१२१॥

महद्देवानामसुरत्वमेकम् ४ आक्षित्पूर्वास्वपराअनूरुत्सद्योजाताासुतरुणीष्वन्तः। अन्तर्वतीःसुवतेअप्रवीतामहद्देवानामसुरत्वमेकम् ५ ॥ २८ ॥ शयुःपरस्ता-दधुनाद्यमातावन्वनश्चरतिवत्सएकः। मित्रस्यतावरुणस्यव्रतानिमहद्देवानामसु-रत्वमेकम् ६ द्यमाताहोतांविदथेपुरुत्राळन्वग्रंचरतिक्षेतिबुध्नः। प्ररण्यानिरण्य-वाचोभरन्तेमहद्देवानामसुरत्वमेकम् ७ शूरस्येवयुध्यतोअन्तमस्यप्रतीचीनंद-दृशेविश्वमायत्। अन्तर्मतिश्चरतिनिष्षिधंगोर्महद्देवानामसुरत्वमेकम् ८ निवे-वेतिपलितोदूतआस्वन्तर्महांश्चरतिरोचनेन। वपूंषिबिभ्रदभिनोविचष्टेमहद्देवा-नामसुरत्वमेकम् ९ विष्णुर्गोपाःपरमंपातिपाथःप्रियाधामान्यमृतादधानः। अग्निष्टाविश्वाभुवनानिवेदमहद्देवानामसुरत्वमेकम् १० ॥ २९ ॥ नानाचक्राते

यस्याऽवपूँषितयोरन्यद्रोचतेकृष्णमन्यत् । श्यावीचयदरुषीचस्वसारौमहद्देवानामसुरत्वमेकम् ११ माताचयत्रदुहिताचधेनूसबर्दुघापयसेतसर्माची । ऋतस्यतेसदसीळेअन्तर्महद्देवानामसुरत्वमेकम् १२ अन्यस्यावत्संरिहतीमिमायकयाभुवानिदधेधेनुरूधः । ऋतस्यसापयसापिन्वतेळांमहद्देवानामसुरत्वमेकम् १३ पदावस्तेपुरुरूपावपूँष्यूर्ध्वातस्थौऽवविरेरिहाणा । ऋतस्यसद्मविचरामिविद्वान्महद्देवानामसुरत्वमेकम् १४ पदेइवनिहितेदस्मेअन्तस्तयोरन्यद्गुह्यमाविरन्यत् । सध्रीचीनापथ्याऽसाविपूचीमहद्देवानामसुरत्वमेकम् १५ ॥ ३० ॥ आधेनवोधुनयन्तामशिश्वीःसबर्दुघाःशशयाअप्रदुग्धाः । नव्यानव्यायुवतयोभवन्तीर्महद्देवानामसुरत्वमेकम् १६ यदन्यासुवृषभोरोरवीतिसोअन्यस्मिन्यूथेनिदधाति-

रेतः । सहिक्षपावान्त्सभगुःसराजामहद्देवानामसुरत्वमेकम् १७ वीरस्यनुस्व-
२व्यंजनासःप्रनुवोचामविदुरस्यदेवाः । योह्लायुक्ताःपश्वंपश्वावहन्तिमहद्देवानाम-
सुरत्वमेकम् १८ देवस्त्वष्टासविताविश्वरूपःपुपोषप्रजाःपुरुधाजजान । इमाच
विश्वाभुवनान्यस्यमहद्देवानामसुरत्वमेकम् १९ महीसमैरच्छम्बासमीचीउभेते
अंस्यवसुनान्त्यंष्टे । शृण्वेवीरोविन्दमानोवसूनिमहद्देवानामसुरत्वमेकम् २०
इमांचनःपृथिवींविश्वधायाउपक्षेतिहितमित्रोनराजा । पुरःसदःशर्मसदोनवीरा
महद्देवानामसुरत्वमेकम् २१ निष्विध्वरीस्तओषधीरुतापोरयिंतइन्द्रपृथिवीवि-
भर्ति । सखायस्तेवामभाजःस्याममहद्देवानामसुरत्वमेकम् २२ ॥ ३१ ॥ इति
शाकलर्क्सांहितायां तृतीयाष्टके तृतीयोऽध्यायः ॥ ३ ॥

नताष्टौमयेषड्घेनुर्नवाश्चनंमित्रोमैत्रंचतुर्गायत्र्यंतमिहेहसप्तार्षंवंजागतंतृचोऽन्त्यऐन्द्रश्चोषउपस्यामि-
माउन्यूनेन्द्रावरुणवार्हस्पत्यपौष्णसाविंत्रसौम्यमैत्रावरुणास्तृचाअन्त्योजमदग्न्यापोवाचतुर्थ्याद्यागा-
यत्रयोवामदेवोगौतमश्चतुर्थमण्डलमपश्यत्त्वांग्नेविंशतिरष्टपतिर्जगतीधृतिरुपाद्याश्चतस्रोवारुण्यश्चवायो
मत्यैष्वावः षोळशर्क्षुण्वपश्चोनाराशंसोग्नए ।

न ताष्टौ प्रजापतिर्विश्वे देवास्त्रिष्टुप् ।

५६ ॐम् नतामिनन्तिमायिनोनधीरांव्रतादेवानांप्रथमाध्रुवाणि । नरोदंसी अद्रुहाविद्याभिर्नपर्वंतानिनमेतास्थिवांसः १ षड्राराँएकोअचरान्विभर्त्यृतंवर्षिष्ठ-
मुपगावआगुः । तिस्रोमहीरुपरास्तस्थुरत्यागुहाद्वेनिहितेदशर्यका २ त्रिपाज-
स्योवृषभोविश्वरूपउतव्युधापुरुधप्रजावान् । त्र्यनीकःपत्यतेमाहिनावान्त्सरे-
तोधावृषभःशश्वतीनाम् ३ अभीकंआसांपदवीरवोध्यादित्यानामदितेश्चारुनाम ।

आपश्चिदस्माअरमन्तदेवीःपृथुग्रजन्तीःपरिपीमवृञ्जन् ४त्रीषधस्थासिन्धवस्त्रिः कर्वीनामुतत्रिमातावितथेपुसम्राट् । ऋतावरीर्योपणास्तिस्रोअप्यास्त्रिरादिवो वितथेपत्यमानाः ५ त्रिरादिवःसवितुर्वार्याणिदिवेदिवआसुवत्रिर्नोअह्नः । त्रिधातुरायआसुवावसूनिभगंत्रातारंपणेसातयेधाः ६ त्रिरादिवःसवितासोपवीति राजानामित्रावरुणासुपाणी । आपश्चिदस्यरोदसीचिद्वीरंभिक्षन्तसवितुःसवाय ७ त्रिरुत्तमादूणशारोचनात्रयोराजन्त्यसुरस्यवीराः । ऋतावान इषिरावूळहांसस्त्रिरादिवोवितथेसन्तुदेवाः ८ ॥ १ ॥

म मे पङ्क्तिश्चामित्रो विश्वे देवास्त्रिष्टुप्।।

५७ प्रमेविविक्वाँअविदन्मनीषांधेनुंचरन्तींप्रयुतामगोपाम् । सद्यश्चिद्यादुदुहेभूरिधासेरिन्द्रस्तद्वन्निःपनितारोअस्याः १ इन्द्रःसुपूषावृषणासुहस्तादिवोन

प्रीताःशंशयंदुदुहे । विश्वेयदस्यांरणयन्तदेवाःप्रवोऽत्रंनसवःसुम्नमंश्याम् २ या जामयोवृष्णंइच्छन्तिशक्तिंनमस्यन्तीर्जानतेगर्भमस्मिन् । अच्छापुत्रंधेनवोवावशानामहश्चरन्तिबिभ्रतंवपूंषि ३ अच्छाविवक्मिरोदसीसुमेकेग्राव्णोयुजानोअध्वरेमनीषा । इमाउतेमनवेभूरिवाराऊर्ध्वाभवन्तिदर्शतायजत्राः ४ यातेजिह्वामधुमतीसुमेधाअग्नेदेवेष्वृत्यंतऊर्चा । तयेहविश्वाँअवसेयजत्रानासादय पाययाचामधूनि ५ यातेअग्नेपर्वतस्येवधारासश्चन्तीपीपयदेवचित्रा । तामस्मभ्यंप्रमतिंजातवेदोवसोरास्वसुमतिंविश्वजन्याम् ६ ॥ २ ॥

धेनुर्नव विश्वामित्रोऽश्विनौ त्रिष्टुप् ।

५८ धेनुःप्रत्नस्यकाम्यंदुहानान्तःपुत्रश्चरतिदक्षिणायाः । आद्योतनिंवहतिशुभ्रयामोषसःस्तोमोअश्विनावजीगः १ सुयुग्वहन्तिप्रतिवामृतेनोर्ध्वाभवन्ति ॥१३४॥

पितरेवमेथाः । जरेथामस्मद्विपणेमनीषांयुवोरवश्चकुमायातमर्वाक् २ सुयु-
ग्भिरश्वैःसुवृतारथेनदस्रावि मंशृणुतश्लोकमद्रेः । किमङ्गवांप्रत्यवर्तिगमिष्ठाहुवि-
प्रासोअश्विनापुराजाः ३ आमन्येथामागंतंकञ्चिदेवैर्विश्वेजनासोअश्विनाहवन्ते ।
इमाहिवांगोऋजीकामधूनिप्रमित्रासोनददुस्रोअग्रे ४ तिरःपुरूचिदश्विनार-
जांस्याक्रूयोवांमघवानाजनेषु । एहयातंपुथिभिर्देवयानैर्दस्रावि मेवांनिधयोमधू-
नाम् ५ ॥ ३ ॥ पुराणमोकःसख्यंशिवंवांयुवोर्नरावविणंजुह्वाठ्याम् । पुनः
कृण्वानाःसख्याशिवानिमध्वामदेमसहनूसमानाः ६ अश्विनावायुनायुवंसुद-
क्षानियुद्भिश्चसजोषसायुवाना । नासत्यातिरोअह्न्यंजुपाणासोमंपिवतमस्रिधा
सुदानू ७ अश्विनापारेवामिषःपुरूचीरीयुर्गीर्भिर्यतमानाअमृध्राः । रथोहवा-

मृतजाअद्रिजूतःपरिद्यावापृथिवीयन्तिसद्यः ८ अश्विनामधुपुत्तमोयुवाकुःसोम-
स्तंपातमागतंदुरोणेरथोहवांभूरिवर्पःकरिक्रत्सुतावतोनिष्कृतमागमिष्ठः १॥४॥

मित्रो नव विश्वामित्रो मित्रः । अन्त्याश्चतस्रो गायत्र्यः । शिष्टास्त्रिष्टुभः ।

५१ मित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्याम् । मित्रःकृष्टी-
रनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहोत १ प्रसमित्रमतीॅअस्तुप्रयस्वान्यस्त
आदित्यशिक्षतिव्रतेन । नहन्यतेनजीयतेत्वोतोनैनमंहोॅअश्नोत्यन्तितोनदूरात् २
अनमीवासइळयामदन्तोमितज्ञवोवारंमन्नापृथिव्याः । आदित्यस्यव्रतमुपक्षिय-
न्तोवयंमित्रस्यसुमतौस्याम ३ अयंमित्रोनमस्यःसुशेवोराजासुक्षत्रोअजनिष्ट
वेधाः । तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ४ महाँआदित्योनमसो-
पसद्योयातयज्जनोगृणतेसुशेवः । तस्माएतत्पन्यतमायजुष्टंमित्रायहविरा-

जुहोत ५ ॥ ५ ॥ मित्रस्यचर्षणीधृतोऽवोदेवस्यसानसि । द्युम्नंचित्रश्रवस्तमम् ६ अभियोमहिनादिवंमित्रोबभूवसप्रथाः । अभिश्रवोभिःपृथिवीम् ७ मित्राय पञ्चयेमिरेजनाअभिष्टिशवसे । सदेवान्बिभ्रान्विभर्ति ८ मित्रोदेवेष्वायुजनायवुक्थवाहिषे । इषंइष्टव्रताअकः ९ ॥ ६ ॥

इहेह सप्त विश्वामित्र ऋभवो जगती । अन्त्यानां तिसृणामिन्द्रश्च ।

६० इहेहवोमनसावन्धुतानरउशिजोजग्मुरभितानिवेदसा । याभिर्मायाभिःप्रतिजूतिवर्पसःसौधन्वनायज्ञियंभागमानश १ याभिःशचीभिश्चमसाँ अपिंशतययाधियागामरिंणीतचमूणः । येनहरीमनसानिरतंक्षततेनदेवत्वमृभवः समानश २ इन्द्रस्यसख्यमृभवःसमानशुर्मनोर्नपातोअपसोदधन्विरे । सौधन्वनासोअमृतत्वमेरिरेविष्टीशमीभिःसुकृतःसुकृत्यया ३ इन्द्रेणयाथसरथंसुते

सचाँअथोवज्ञानांभवथासहश्रिया । नवःप्रतिमैसुकृतानिवाघतःसौधन्वनाऋभ-
वोवीर्याणिच ४ इन्द्रंऋभुभिर्वाजवद्भिःसमुक्षितंसुतंसोममावृषस्वागभस्त्योः ।
धियेषितोमघवन्वाशुषोगृहेसौधन्वनेभिःसहमत्स्वानृभिः ५ इन्द्रंऋभुमा-
न्वाजवान्मत्स्वेहनोऽस्मिन्त्सवनेशच्यापुरुष्टुत । इमानितुभ्यंस्वसराणियेमिरे
व्रतादेवानांमनुषश्चधर्मभिः ६ इन्द्रंऋभुभिर्वाजिभिर्वाजयन्निहस्तोमंजरितुरुप
याहियज्ञियम् । शतंकेतभिरिषिरेभिरायवेसहस्रिणीथोअध्वरस्यहोमनि ७ ॥ ७॥

उपः सप्त विश्वामित्र उषास्त्रिष्टुप् ।

६१ उषोवाजेनवाजिनिप्रचेताःस्तोमंजुषस्वगृणतोमघोनि । पुराणीदेवि
युवतिःपुरन्धिरनुव्रतंचरसिविश्ववारे १ उषोदेव्यमर्त्याविभाहिचन्द्ररथासूनृता
ईरयन्ती । आत्वांवहन्तुसुयमासोअश्वाहिरण्यवर्णांपृथुपाजसोये २ उषःप्रतीची ॥१३६॥

भुवनानिविश्वोर्ध्वातिष्ठस्यमृतस्यकेतुः। समानमर्थंचरणीयमानाचक्रमिवनव्यस्यावृत्स्व ३ अवस्यूमेवचिन्वतीमघोन्युषायातिस्वसरस्यपत्नीं। स्वर्जनन्ती सुभगासुदंसाआन्तादिवःपप्रथआपृथिव्याः ४ अच्छावोदेवीमुपसंविभातींप्रवोभरध्वंनमसासुवृक्तिम्। ऊर्ध्वंमधुधादिविपाजोअश्रेत्प्ररोचनारुरुचेरण्वसन्दृक् ५ ऋतावरीदिवोअर्कैरबोध्यारेवतीरोदसीचित्रमस्थात्। आयतीमग्नउपसंविभातीं वाममेषिद्रविणंधिक्षमाणः ६ ऋतस्यबुध्नउपसामिषण्यन्वृषामहीरोदसीआविवेश। महीमित्रस्यवरुणस्यमायाचन्द्रेवभानुंविदधेपुरुत्रा ७ ॥ ८ ॥

इमा उ अष्टादश विश्वामित्रो गायत्री। अन्त्यानां तिसृणां जमदग्निर्वा। अन्त्यास्तिस्रस्त्रिष्टुभः। षण्णां तृचानां क्रमेणेन्द्रावरुणौ बृहस्पतिः पूषा सविता सोमो मित्रावरुणौ देवताः।

६२ इमाउवांमुमयोमन्यमानायुवावतेनतुज्यांअभूवन्। कंत्यदिन्द्रावरु-

णायशौवायेनस्मासिनंभरथः सखिभ्यः १ अयमुवांपुरुतमोरयीयञ्छश्वत्तमम-
वसेजोहवीति । सजोषाविन्द्रावरुणामरुद्भिर्दिवापृथिव्याशृणुतंहवंमे २ अस्मे
तदिन्द्रावरुणावसुंप्यादस्मेरयिर्मरुतःसर्ववीरः ।अस्मान्वरूत्रीःशरणैरवन्त्वस्मा-
न्होत्राभारतीदक्षिणाभिः ३ बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य । रास्वरत्नानि
दाशुषे ४ शुचिंमकैर्बृहस्पतिमध्वरेपुनमस्यत । अनाम्योजआचके ५ ॥ १ ॥
वृषभंचर्षणीनांविश्वरूपमदाभ्यम् । बृहस्पतिंवरेण्यम् ६ इयंतेपूषन्नाघृणेसुष्टु-
तिर्देवनव्यसी । अस्माभिस्तुभ्यंशस्यते ७ तांजुषस्वगिरंममवाजयन्तीमवा-
धियम् । वधूयुरिवयोषणाम् ८ योविश्वाभिविपश्यतिभुवनासंचपश्यति । सनः
पूषाविताभुवत् ९ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोद- ॥१३७

यात् १० ॥ १० ॥ देवस्यसवितुर्वयंवाजयन्तःपुरन्ध्या । भगस्यरातिमी-
महे ११ देवंनरःसवितारंविप्रायज्ञैःसुवृक्तिभिः । नमस्यन्तिधियेषिताः १२
सोमोजिगातिगातुवित्तोदेवानामेतिनिष्कृतम् । ऋतस्ययोनिमासदम् १३ सोमो
अस्मभ्यंद्विपदेचतुष्पदेचपशवे । अनमीवाइषस्करत् १४ अस्माकमायुर्वर्धय-
न्नभिमातीःसहमानः । सोमःसधस्थमासदत् १५ आनोमित्रावरुणाघृतैर्गव्यू-
तिमुक्षतम् । मध्वारजांसिसुक्रतू १६ उरुशंसानमोवृधामक्षादक्षस्यराजथः ।
द्राघिष्ठाभिःशुचिव्रता १७ गृणानाजमदग्निनायोनावृतस्यसीदतम् । पातंसो-
ममृतावृधा १८ ॥ ११ ॥ इति शाकलकसंहितायां तृतीये मण्डले पञ्चमोऽनुवाकः ॥ ५ ॥

इति तृतीयं मण्डलं समाप्तम् ॥ ३ ॥

त्वां ह्यग्ने विंशतिर्वामदेवोऽभिष्टिष्टुप् । द्वितीयादिचतसृणामग्निर्वा वरुणश्च ।

प्रथमार्ष्टिः । द्वितीयातिजगती । तृतीया धृतिः ।

१ त्वांह्यग्नेसदमित्समन्यवोदेवासोदेवमरातिन्येरिरइतिक्रत्वान्येरिरे । अमर्त्यंयजतमर्त्येष्वादेवमादेवंजनतप्रचेतसंविश्वमादेवंजनतप्रचेतसम् १ सभ्रातरं वरुणमग्नआवृवृत्स्वदेवाँअच्छासुमतीयज्ञवनसंज्येष्ठंयज्ञवनसम् । ऋतावानमादित्यंचर्षणीधृतंराजानंचर्षणीधृतम् २ सखेसखायमभ्यावृवृत्स्वाशुंनचक्रंरथ्येवरंह्यास्मभ्यंदस्मरंह्या । अग्नेमृळीकंवरुणेसचाविदोमरुत्सुविश्वभानुषु । तोकायतुजेशुंशुचानुशंकुध्यस्मभ्यंदस्मशंकुधि ३ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेळोऽवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ४ सत्वंनोअग्नेऽनुमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ । अवयक्ष्वनोवरु-

णंररांणोवीहिमृळीकंसुहवोनएधि ५ ॥ १२ ॥ अस्यश्रेष्ठांसुभगस्यसंदृग्देवस्य-
चित्रतंमामत्यैपु । शुचिंघृतंनतप्तमङ्क्ष्यायाःस्पार्हादेवस्यमंहनैवधेनोः ६ त्रिर-
स्यतापरमासंन्तिसत्यास्पार्हादेवस्यजनिमान्यग्नेः । अनन्तेअन्तःपरिवीतआगा-
च्छुचिंःशुक्रोअर्योरोरुचानः ७ सदूतोविश्वेदभिवष्टिसद्माहोताहिरण्यरथोरंसु-
जिह्वः । रोहिदश्वोवपुष्योविभावासदारुण्वःपितुमतीवसंसत् ८ सचेतयन्मनु-
षोयज्ञबन्धुःप्रतंमह्यारंशनयानयन्ति । सक्षेत्यस्यदुर्यासुसाधन्देवोमतंस्यसधनि-
त्वमाप १ सतूनोअग्निर्नयतुप्रजानन्नच्छारत्नंदेवभक्तंयदस्य । धियायद्विश्वेअमृ-
ताअकृण्वन्द्यौष्पिताजनितासत्यमुक्षन् १० ॥ १३ ॥ सजायतप्रथमःपस्त्या-
सुमहोबुध्नेरजसोअस्ययोनौ । अपादशीर्षागुहमानोअन्तायोयुवानोवृषभस्य
नीळे ११ प्रशर्धआर्तप्रथमंविपन्याँऋतस्ययोनावृषभस्यनीळे । स्पार्होयुवावपु-

ष्योविभावासप्रियासोऽजनयन्तवृष्णे १२ अस्माकमत्रपितरोमनुष्याअभि
प्रसेदुर्ऋतमाशुषाणाःअश्मव्रजाःसुदुघाववृत्रेअन्तरुस्राआजन्नुपसोहुवानाः १३
तेममृजतदृवांसोअद्रिंतदेषामन्येअभितोविवोचन् । पश्वयन्त्रासोआभिकारम-
र्चन्विदन्तज्योतिश्चकृपन्तधीभिः १४ तेगव्यतामनसादृध्रमुर्वंगायेमानंपरिष-
न्तमद्रिम् । दृळ्हंनरोवचसादैव्येनव्रजंगोमन्तमुशिजोविवव्रुः १५ ॥ १४ ॥ तेम
न्वतप्रथमंनामधेनोस्त्रिःसप्तमातुःपरमाणिविन्दन् । तज्जानतीरभ्यनूषतव्राआ-
विर्भुवदरुणीर्यशसागोः १६ नेशत्तमोदुधितंरोचतद्यौरुदेव्याउषसोभानुरर्त ।
आसूर्यावृहतस्तिष्ठदज्राँऋजुमेतेपुवृजिनाचपश्यन् १७ आदित्पश्चाबुबुधानाव्यख्यन्नादिद्रत्नंधारयन्तद्युभक्तम् । विश्वेविश्वासुदयासुदेवामित्रंधियेवरुणसत्य-
मस्तु १८ अच्छावोचेयशुशुचानमग्निंहोतारंविश्वभरसंयजिष्ठम् । शुच्यूधोअतृ-

णन्नग्वामन्धोनपूतंपरिषिक्तमंशोः १ विश्वेषामदितिर्यज्ञियानांविश्वेषामातिथि-
र्मानुषाणाम् । अग्निर्देवानामवआवृणानःसुमृळीकोभवतुजातवेदाः २ ॥१५॥

यो मर्त्येषु त्रिंशतिर्वामदेवोग्निस्त्रिष्टुप् ।

२ योमर्त्येष्वमृतऋतावादेवोदेवेष्वरतिर्निधायि। होतायजिष्ठोमहाशुचध्यैह-
व्यैरग्निर्मनुषईरयध्यै १ इहत्वंसूनोसहसोनोअद्यजातोजाताँउभयाँअन्तरग्ने ।
दूतईयसेयुयुजानऋष्वऋजुमुष्कान्वृषणःशुक्रांश्च २ अत्यावृधस्नूरोहिताधृतस्नू
ऋतस्यमन्येमनसाजविष्ठा । अन्तरीयसेअरुषायुजानोयुष्मांश्चदेवान्विशआचु
मताँन् ३ अर्यमणंवरुणंमित्रमेषामिन्द्राविष्णूंमरुतोअश्विनोत । स्वश्वोअग्ने
सुरथःसुराधाएदुंवहसुहविषेजनाय ४ गोमाँअग्नेऽविमाँअश्वीयज्ञोनृवत्सखा
सदमिदप्रमृष्यः । इळावाँएषोअसुरप्रजावान्दीर्घोरयिःपृथुबुध्नःसभावान् ५

॥ १६ ॥ यस्तइध्मंजभरत्सिष्विदानोमूर्धानंवातितपतेत्वाया। भुवस्तस्यस्तवाँः पायुरग्नेविश्वस्मात्सीमघायतउरुष्य ६ यस्तेभरादन्नियतेचिदन्नंनिशितंन्मन्द्रमतिथिमुदीरत्। आदेवयुरिनधतेदुरोणेतस्मिन्नायिधुवोअस्तुदास्वान् ७ यस्त्वाद्वेषायदुपसेप्रशंसात्प्रियंवात्वाकृणवतेहविष्मान्। अश्वोनस्वेदमआहेम्यावान्तमंहसःपीपरोदाश्वांसम् ८ यस्तुभ्यमग्नेअमृतायदाशदुवस्त्वेकृणवतेयतस्रुक्। नसरायाशंशमानोवियोपन्नेनमंहःपरिवरदघायोः ९ यस्यत्वमग्नेअध्वरंजुजोषोदेवोमर्तस्यसुधितंरराणः। प्रीतेदंसद्मोत्रासायविष्टासोमयस्यविधतोवृधासः १० ॥ १७ ॥ चित्तिमचित्तिंचिनवद्विविद्वान्पृष्ठेवंवीतावृजिनाचमतान्। रायेचनःस्वपत्यायदेवदितिंचरास्वादितिमुरुष्य ११ कविंशशासुःकवयोऽदब्धानिधारयन्तोदुर्यास्वायोः। अतस्त्वंदृश्याँअग्नएतान्पड्भिःपश्येरद्भुताँअर्यएवैः १२ त्वमग्ने

वाघतेसुप्रणीतिःसुतसोमायविधतेयविष्ठ। रत्नंभरशशमानायघृष्वेपृथुश्चन्द्रमव-
सेचर्षणिप्राः १३ अधाह्युहयमग्नेत्वायापड्भिर्हस्तेभिश्चकृमातनूभिः । रथंनक्र-
न्तोअपसाभुरिजोर्ऋतंयेमुःसुध्यआशुषाणाः १४ अधामातुरुपसःसप्तविप्राजा-
येमहिप्रथमावेधसोनॄन् । दिवस्पुत्राअङ्गिरसोभवेमाद्रिरुजेमधुनिनंशुचन्तः १५
॥ १८ ॥ अधायथानःपितरःपरासःप्रत्नासोअग्नऋतमाशुषाणाः । शुचीदयुन्दी-
धितिमुक्थशासःक्षामाभिन्दन्तोअरुणीरपव्रन् १६ सुकर्माणःसुरुचोदेवयन्तो-
ऽयोनदेवाजनिमाधर्मन्तः । शुचन्तोअग्निंववृधन्तइन्द्रंमरुत्वन्तंपरिपदन्तोअ-
र्कैः १७ आयूंषेवक्षुमतिंपश्वोअख्यदेवानांयज्जनिमान्त्युग्र । मर्तानांचिदुर्व-
शीरकृप्रन्वृधेचिदर्यउपरस्यायोः १८ अकर्मतेस्वपसोअभूमऋतमवस्रन्नुषसोवि-
भातीः । अनूनमग्निंपुरुधासुश्चन्द्रंदेवस्यमर्मृजतश्चारुचक्षुः १९ एतातेअग्नउच-

थानिवेधोऽवोचामकृवयेताजुषस्व । उच्छोचस्वकृणुहिवस्यसोनोमहोरायःपुरु-
वारप्रयन्धि २० ॥ १९ ॥

आ वः षोडश वामदेवोऽग्निस्त्रिष्टुप् । आद्याया रुद्रः ।

३ आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः।अग्निंपुरातनयित्नोरचि-
त्ताद्धिरण्यरूपमवसेकृणुध्वम् १ अयंयोनिश्चकृमायंवयंतेजायेवपत्यउशतीसुवा-
सांः । अर्वाचीनःपरिवीतोनिषीदेमाउतेस्वपाकप्रतीचीः २ आशृण्वतेअद्दपिताय
मन्मंनुचक्षंसेसुमृळीकायवेधः । देवायशस्तिमृतायशंसग्रावेवसोतामधुषुद्य-
मीळे ३ त्वंचिन्नःशम्योअग्नेअस्याऋतस्यबोध्यृतचित्स्वाधीः । कदातउक्थासध-
माद्यानिकदाभवन्तिसख्यागृहेतेऽकथाहृतद्वरुणायत्वमग्नेकथादिवेगर्हसेकन्नआ-
गः । कथामित्रायमीळुषेपथिन्यैब्रवःकदर्यम्णेकद्रगाय ५ ॥२०॥ कद्विष्ण्यांसुवृ-

घसानोअग्नेकद्दातायप्रतवसेशुभंवे।परिज्मनेनासत्यायक्षेब्रवःकदग्नेरुद्रायनृघ्ने ६
कुथामहेपुष्टिंभरायपूष्णेकद्रुद्रायसुमखायहविर्दे। कद्विष्णवउरुगायायरेतोब्रवः
कदग्नेशर्ववृहत्यै ७ कुथाशर्धायमरुतामृताय कुथासूरेबृहतेपृच्छ्यमानः। प्रतिं
ब्रवोऽदितयेतुरायसाधादिवोजातवेदश्चिकित्वान् ८ ऋतेनऋतंनियतमीळआ
गोरामासचामधुमत्पक्वमग्ने। कृष्णासतीरुशतीधासिनैषाजामर्येणपयसापी-
पाय ९ ऋतेनाहिष्मावृषभश्चिदक्तःपुमाँअग्निःपयसापृष्ठ्येन। अस्पन्दमानो
अचरद्वयोधावृषाशुक्रंदुदुहेपृश्निरूधः १० ॥ २१ ॥ ऋतेनाद्रिंव्यसन्भिदन्तःसम-
ङ्गिरसोनवन्तगोभिः। शुनंनरःपरिषदन्नुषासमाविःस्वरभवज्जातेअग्नौ ११
ऋतेनदेवीरमृताअमृक्ताअर्णोभिरापोमधुमद्भिरग्ने। वाजीनसर्गेष्वप्रस्तुभानःप्र
सदमित्सविंतवेदधन्युः १२ माकस्ययक्षंसदमिद्धुरोगामावेशस्यप्रमिनतोमापेः।

माभ्रातुरग्नेअनृजोऋणंवेर्मासख्युर्दक्षंरिपोभुजेम १३ रक्षाणोअग्नेतवरक्षणेभीरा-
रक्षाणःसुमखप्रीणानः । प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिचिद्वावृधानम् १४
एभिर्भवसुमनाअग्नेअर्कैरिमान्स्पृशमन्मभिःशूरवाजान् । उतब्रह्माण्यङ्गिरो
जुषस्वसंतेशस्तिर्देववातांजरेत १५ एताविश्वाविदुषेतुभ्यंवेधोनीथान्यग्नेनिण्या
वचांसि । निवचनाकवयेकाव्यान्यशंसिषंमतिभिर्विप्रउक्थैः १६ ॥ २२ ॥

कृणुष्व पाजः पञ्चदश वामदेवोऽग्नी रक्षोहा त्रिष्टुप् ।

१ कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाँइभेन । तृष्वीमनुप्रसितिंद्रूणानोऽस्तासिविध्यरक्षस्तपिष्ठैः १ तवभ्रमासआशुयापतन्त्यनुस्पृशधृषता
शोशुचानः । तपूंष्यग्नेजुह्वापतङ्गानसंदितोविसृजविष्वगुल्काः २ प्रतिस्पशो
विसृजतूर्णितमोभवायुर्विशोअस्याअदब्धः । योनोदूरेअघशंसोयोअन्त्यग्ने ॥१४२॥

माकिष्टेव्यथिरादधर्षीत् ३ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँओषतात्तिग्महेते ।
योनोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कम् ४ ऊर्ध्वोभवप्रतिविध्या-
ध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने। अवस्थिरातनुहियातुजूनांजामिमजामिंप्रमृणी-
हिशत्रून् ५ ॥ २३ ॥ सतेजानातिसुमतिंयविष्ठयईवतेब्रह्मणेगातुमैरत् ।
विश्वान्यस्मैसुदिनानिरायोद्युम्नान्ययोविदुरोअभिद्यौत् ६ सदग्नेअस्तुसुभगःसु-
दानुर्यस्त्वानित्येनहविषायउक्थैः । पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसुदिना
सासदिष्टिः ७ अर्चामितेसुमतिंघोष्यर्वाक्संतेवायाताजरतामियंगीः । स्वश्वा-
स्त्वासुरथामजयेमास्मेक्षत्राणिधारयेरनुद्यून् ८ इहत्वाभूर्याचरेदुपत्मन्दोषावस्त-
र्दीदिवांसमनुद्यून् । क्रीळन्तस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवांसोजनानाम् ९ यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन । तस्यत्राताभवासि

धाः । प्रयेमिनन्तिवरुणस्यधामप्रियामित्रस्यचेततोध्रुवाणिं ४ अभ्रातरोनयो
पणोव्यन्तः पतिरिपोनजनयोदुरेवाः । पापासःसन्तोअनृताअसत्याइदंपदमजन-
तागभीरम् ५ ॥ १ ॥ इदंमेअग्नेकियतेपावकामिनतेगुरुभारंनमन्म । बृहद्धा
धधृतागंभीरंयद्वंपृष्ठंप्रयसासप्रधातु ६ तमिन्वेऽवसमनासमानमभिक्रत्वापुन-
तीधीतिरश्याः । ससस्यचर्मन्नधिचारुपृश्नेरग्रेरुपआरुपितंजबारु ७ प्रवाच्यंवचसः
किंमेअस्यगुहाहितमुपनिणिग्वदन्ति । यदुस्रियाणामपवारिवुव्रन्पातिप्रियरुपो
अग्रंपदंवेः ८ इदमुत्यन्महिमहामनीकंयदुस्रियासचंतपूर्व्यगौः । ऋतस्यपदे
अधिदीद्यानंगुहारघुष्यद्रघुयद्विवेद ९ अधद्युतानःपित्रोः सचासामनुतगुह्यंचारु
पृश्नेः । मातुष्पदेपरमेअन्तियन्नोर्वृष्णःशोचिषःप्रयतस्यजिह्वा १० ॥ २ ॥ ऋतं
वोचेनमसापृच्छयमानस्तवाशसाजातवेदोयदीदम् । त्वमस्यक्षयस्यियद्विश्वं

दिवियदुद्रविणंयत्पृथिव्याम् ११ किंनोअस्यद्रविणंकद्वरत्नंविनोयोचोजातवेदश्चिकित्वान् । गुहाध्वनःपरमंयन्नोअस्येरेकुपदंनिधानाअगन्म १२ कामर्यादावयुनाकद्ववाममच्छागमेमरधवोनवाजम् । कदानोदेवीरमृतस्यपत्नीःसूरोवर्णेन ततनन्नुषासः १३ अनिरेणवचसाफल्गवेनप्रतीत्येनकृधुनातृषासः । अधातेअग्ने किमिहावदन्त्यनायुधासआसतासचन्ताम् १४ अस्यश्रियेसमिधानस्यवृष्णो वसोरनीकंदमआरुरोच । रुशद्वत्सानःसुदृशीकरूपःक्षितिर्नरायापुरुवारोअद्यौत् १५ ॥ ३ ॥

ऊर्ध्व ऊष्वेकादश वामदेवोग्निस्त्रिष्टुप् ।

६ ऊर्ध्वऊषुणोअध्वरस्यहोतरग्नेतिष्ठदेवतातायजीयान् । त्वंहिविश्वंमभ्यसिमन्मप्रवेधसंश्चित्तिरसिमनीषाम् १ अमूरोहोतान्यसादिविक्ष्वा ३ग्निर्मन्द्रोविदथेन-

पुप्रचेताः । ऊर्ध्वोभानुंसविताश्रेन्मेतेवधूमंस्तंभायदुपद्याम् २ यतासुजूर्णीरा-
तिर्नीघृताचीप्रदक्षिणिद्देवतातिमुराणः । उदुस्वरुर्नवजानाक्रःपृश्वोअनाक्रिसुधि-
तःसुमेकः ३ स्तीर्णेबर्हिषिसमिधानेअग्नाऊर्ध्वोअध्वर्युर्जुजुषाणोअस्थात् ।
पर्याग्निःपशुपानहोतात्रिविष्टयेतिप्रदिवउराणः ४ परित्मनामितद्रुरेतिहोताग्निर्म-
न्द्रोमधुवचाऋतावा । द्रवन्त्यस्यवाजिनोनशोकाभर्यन्तेविश्वाभुवनायदभ्राट् ५
॥ ४ ॥ भद्रातेअग्नेस्वनीकसंदृग्घोरस्यसतोविषुणस्यचारुः । नयत्तेशोचि-
स्तमसावरन्तुनध्वस्मानंस्तन्वीरेरपआधुः ६ नयस्यसातुर्जनितोरवारिनमात-
रापितरानूचादिष्टौ । अधामित्रोनसुधितःपावकोऽग्निर्दीदायमानुषीषुविक्षु ७
द्विर्यंपञ्चजोजनन्त्संवसानाःस्वसारोअग्निमानुषीषुविक्षु । उपर्वुधमथयोऽनदन्तं
शुक्रंस्वासंपरशुनातिग्मम् ८ तवत्येअग्नेहरितोघृतस्नारोहितासऋज्वञ्चःस्वञ्चः ।

अरुषत्सोवृषंणक्रुजुमुष्काआदेवतांतिमह्वन्तदस्माः १ येहत्येतेसहमानाअयास-स्त्वेषासोअग्नेअर्चयश्चरन्ति । श्येनासोनदुवसनासोअर्थंतुविष्वणसोमारुतंनशु-धंः ॥ १० ॥ अकारिब्रह्मसमिधानतुभ्यंशंसात्युक्थंयजतेव्यूधाः । होतारमग्निं मनुषोनिषेदुर्नमस्यन्तउशिजःशंसमायोः ११ ॥ ५ ॥

अयमिहैकादश वामदेवोऽग्निः । आद्या जगती । ततः पञ्चानुष्टुभः । शिष्टास्त्रिष्टुभः ।

७ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः । यमप्नवानोभृ-गवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे १ अग्नेकदातआनुषग्भुवद्देवस्यचेतनम् । अधाहित्वाजगृभ्रिरेमर्तासोविक्ष्वीड्यम् २ ऋतावानंविचेतसंपश्यन्तोयामि-वस्तृभिः । विश्वेषामध्वराणांहस्कर्तारंदमेदमे ३ आशुंदूतंविवस्वतोविश्वायश्चर्-षणीरभि । आजभ्रुःकेतुमायवोभृगवाणंविशेविशे ४ तमीहोतारमानुषीरिकि-

त्वांसंनिषेदिरे । रण्वंपावकशोचिषंयजिष्ठंसप्तधामभिः ५ ॥ ६ ॥ तंशश्वंतीषु मातृषुवनआवृतिमश्रिंतम् । चित्रंसन्तंगुहांहितंसुवेदंकूचिदर्थिनम् ६ ससस्य यद्विषुतासस्मिन्नूधन्नस्यसामंन्रणयन्तदेवाः । महाँअग्निर्नमसारातहव्योवेर ध्वरायसदमिद्तावा ७ वेरध्वरस्यदूत्यानिविद्वानुभेअन्तारोदसीसञ्चिकित्वान् । दूतईयसेप्रदिवउराणोविदुष्टरोदिवआरोधनानि ८ कृष्णंतएमरुशंतःपुरोभाश्वरिष्ण्वर्चिर्वपुषामिदेकम् । यदप्रवीतादधतेहगर्भंसद्यश्चिज्जातोभवसीदुदूतः ९ सद्योजातस्यददृशानुमोजोयदस्यवातोअनुवातिशोचिः । वृणक्तिंतिग्मामतसेषुजिह्वांस्थिराचिदन्नादयतेविजम्भैः १० तृषुयदन्नांतृषुणावक्षंतृषुदूतंकृणुतेयह्वो अग्निः । वातस्यमेळिंसचतेनिजूर्वन्नाशुनवाजयतेहिन्वेअर्वा ११ ॥ ७ ॥

दूतं वोष्टौ वामदेवोऽग्निर्गायत्री ।

८ दूतंवोविश्ववेदसंहव्यवाहममर्त्यम् । यजिष्ठमृञ्जसेगिरा १ सहिवेदावसुधितिंमहाँआरोधनंदिवः । सदेवाँएहवक्षति २ सवेददेवआनमंदेवाँऋतायतेदमे । दातिंप्रियाणिंचिद्वसु ३ सहोतासेदुदूत्यंचिकित्वाँअन्तरीयते । विद्वाँआरोधनं दिवः ४ तेस्याम्येअग्नयेददाशुर्हव्यदातिभिः । यईंपुष्यन्तइन्धते ५ तेरायाते सुवीर्यैःससवांसोविशंण्विरे । येअग्नादाधिरेदुवः ६ अस्मेरायोदिवेदिवेसंचरन्तु पुरुस्पृहः । अस्मेवाजासईरताम् ७ सविप्रश्चर्षणीनांशवसामानुषाणाम् । अतिक्षिप्रेवविध्यति ८ ॥ ८ ॥

अग्ने मूळाष्टौ वामदेवोऽग्निर्गायत्री ।

१ अग्नेमूळमहाँअसियईमादेवयुंजनम् । इयेथबर्हिरासदम् १ समानुषीषु

दळभोविक्षुप्रावीरमर्त्यः । दूतोविश्वेषांभुवत् २ ससद्मपारणीयतेहोतामन्द्रोदिविष्टिषु । उतपोतानिषीदति ३ उतन्राअग्निरध्वरउतोगृहपतिर्दमे । उतब्रह्मानिषीदति ४ वेषिह्यध्वरीयतामुपवक्ताजनानाम् । हव्याचमानुषाणाम् ५ वेषीहव्यमुत्यं१यस्यजुजोषोअध्वरम् । हव्यंमतस्यवोळ्हवे ६ अस्माकंजोष्यध्वरमस्माकंयज्ञमङ्गिरः । अस्माकंशृणुधीहवम् ७ परितेदूळभोरथोऽस्माँअश्वोतुविश्वतः । येनरक्षसिदाशुषः ८ ॥ १ ॥

अग्ने तमद्याष्टौ वामदेवोग्निः । आद्यास्तिस्रः पदपङ्क्तयः । पञ्चमी महापदपङ्क्तिः । अन्त्योष्णिक् । शिष्टा उष्णिहः पदपङ्क्तयो वा ।

१० अग्नेतमद्याश्वंनस्तोमैःक्रतुंनभद्रंहृदिस्पृशम् । ऋध्यामात्तओहैः १ अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः । रथीर्ऋतस्यबृहतोबभूथ २ एभिर्नोअर्कैर्भवा नोअर्वाङ्स्वर्१ण्यज्योतिः । अग्नेविश्वेभिःसुमनाअनीकैः ३ आभिष्टेअद्यगीर्भि ॥१४७॥ अ.३अ.५

गृणन्तोऽग्नेदाशेम । प्रतेदिवोनस्तनयन्तिशुष्माः ४ तवस्वादिष्ठाग्नेसंदृष्टिरिदा चिदह्नडुदाचिदक्तोः । श्रियेरुक्मोनरोचतउपाके ५ घृतंनपूतंतनूरेपाःशुचि हिरण्यम् । तवेरुक्मोनरोचतस्वधावः ६ कृतंचिद्धिष्मासनेमिद्वेयोऽग्नेऽनोयिमतीत् । कृत्वायजमानाहृतावः ७ शिवानेः सख्यासन्तुभ्रात्राग्नेदेवेषुयुष्मे । सानोनाभिः सदनेसस्मिन्नूधन् ८ ॥ १० ॥ इति शाकलर्क्संहितायां चतुर्थमण्डले प्रथमोऽनुवाकः १ ॥

भद्रं पङ्क्तामदेवोऽग्निस्त्रिष्टुप् ।

११ भद्रंतेअग्नेसहसिन्ननीकमुपाकओराचतेसूर्यस्य । रुशद्दृशेदृशेनक्रुयाचिदरूक्षितंदृशआरूपेअन्नम् १ विपाह्यग्नेगृणतेमनीषांखंवेषंसातुविजातस्तवानः । विश्वेभिर्यहावनंःशुक्रदेवैस्तन्नोरास्वसुमहोभूरिमन्म २ त्वदग्नेकाव्यात्वन्मनी-

नोपास्यदुक्थाजायन्तेराध्यानि । त्वदेतिद्रविणंवीरपेशाइत्थाधियेदाशुषेमर्त्याय ३ त्वद्वाजीवाजंभरोविहायाअभिष्टिकृज्जायतेसत्यशुष्मः । त्वद्रयिर्देवजूतोमयोभुस्त्वदाशुर्जूजुवाँअग्नेअर्वा ४ त्वामग्नेप्रथमंदेवयन्तोदेवंमर्ताअमृतमन्द्रजिह्वम् । द्वेयुतमाविवासन्तिधीभिर्दमूनसंगृहपतिममूरम् ५ आरेअस्मदमतिमारेअंहआरेविश्वांदुर्मतिंयन्निपासि । दोषाशिवःसहसःसूनोअग्नेयंदेवआचित्सचसेस्वस्ति ६ ॥ ११ ॥

यस्त्वां पङ्क्तामदेवोग्निस्त्रिष्टुप् ।

१२ यस्त्वामग्नइनधतेयतस्रुक्त्रिस्तेअन्नंकृणवत्सस्मिन्नहन् । समुद्युन्नैरभ्यस्तुप्रसक्षत्तवक्रत्वाजातवेदश्चिकित्वान् १ इध्मंयस्तेजभरच्छश्रमाणोमहोअग्नेअनीकमासपर्यन् । सइधानःप्रतिदोषामुषासंपुष्यन्रयिंसचतेघ्नन्नमित्रान् २

अग्निरीशेवृहतः क्षत्रियस्याग्निर्वाजस्यपरमस्यरायः । दधातिरत्नंविधतेयविष्ठो व्यानुषङ्मर्त्यायस्वधावान् ३ यञ्जिह्वितैपुरुपुत्रायविष्पाचित्तिभिश्चकृमाकञ्चिदागः । कृधीष्व१स्माँअदितेरनागान्व्येनांसिशिश्रथोविष्वगग्ने ४ महश्चिदग्न एनसोअभीकंऊर्वाद्दिवानामुतमर्त्यानाम् । मातेसखायःसदमिद्रिपामयच्छातोकायतनंयायुजंयोः ५ यथाहत्यद्दंसवोगौर्यंचित्पदिताममुञ्चतायजत्राः । एवोष्व१स्मन्मुञ्चतान्यंहःप्रतार्यग्नेप्रतरंनआयुः ६ ॥ १२ ॥

प्रत्यग्निः पञ्च वामदेवोग्निर्लिङ्गोक्तदेवता वा त्रिष्टुप् ।

१३ प्रत्यग्निरुषसामग्रमख्यादृभातीनांसुमनारत्नधेयम् । यातमश्विनासुकृतोदुरोणमुत्सूर्योज्योतिषादेवएति १ ऊर्ध्वभानुंसवितादेवोअश्रेद्वयुत्संदविध्वद्गविषोनसत्वा । अनुव्रतंवरुणोयन्तिमित्रेयत्सूर्यंदिव्यारोहयन्ति २ यंसीमकृण्वन्त-

नोपास्त्यदुक्थाजायन्तेराध्यानि । त्वदेतिद्रविणंवीरपेशाइत्थाधियेदाशुषेमर्त्याय ३ त्वद्वाजीवाजंभरोविहायाअभिष्टिकृज्जायतेसत्यशुष्मः । त्वद्रयिर्देवजूतोमयोभुस्त्वदाशुर्जूजुवाँअग्नेअर्वा ४ त्वामग्नेप्रथमंदेवयन्तोदेवंमर्ताअमृतमन्द्रजिह्वम् । द्वेषोयुतमाविवासन्तिधीभिर्दमूनसंगृहपतिममूरम् ५ आरेअस्मदमतिमारेअंहआरेविश्वांदुर्मतिंयन्निपासि । दोषाशिवःसहसःसूनोअग्नेयंदेवआचित्तसचसेस्वस्ति ६ ॥ ११ ॥

यस्त्वां पङ्क्तिरामदेवोग्निस्त्रिष्टुप् ।

१२ यस्त्वामग्नइनधतेयतस्रुक्त्रिस्तेअन्नंकृणवत्सस्मिन्नहन् । ससद्युन्नरभ्यस्तुप्रसक्षत्तवक्रत्वाजातवेदश्चिकित्वान् १ इध्मंयस्तेजभरच्छश्रमाणोमहोअग्नेअनीकमासपर्यन् । सइधानःप्रतिदोषामुषासंपुष्यन्नयिंसचतेघ्नन्नमित्रान् २

अग्निरांशेबृहतः क्षत्रियस्याग्निर्वाजस्यपरमस्यरायः । दधातिरत्नंविधतेयविष्ठो व्यानुषङ्मर्त्यायस्वधावान् ३ यच्चिद्धितंपुरुवारायविष्पाचित्तिभिश्चकृमाकञ्चिदागः । कृधीष्व१स्माँअदितेरनागान्व्येनांसिशिश्रथोविष्वगग्ने ४ महश्चिदग्न एनसोअभीकऊर्वाद्दिवानामुतमर्त्यानाम् । मातेसखायःसदमिद्रिषाम्यच्छातोकायतनंयायजंयोः ५ यथाहत्यद्धसवोगौर्यंचित्पदिषिताममुञ्चतायजत्राः । एवोष्व१स्मन्मुञ्चताव्यंहःप्रतार्यग्नेप्रतरंनआयुः ६ ॥ १२ ॥

प्रत्यग्निः पञ्च वामदेवोग्निर्लिङ्गोक्तदेवता वा त्रिष्टुप् ।

१३ प्रत्यग्निरुषसामग्रमख्यादृभातीनांसुमनारत्नधेयम् । यातमश्विनासुकृतोदुरोणमुत्सूर्योज्योतिषादेवएति १ ऊर्ध्वभानुंसविताद्देवोअश्रेद्बृप्सदविंधद्वविषोनसत्वा । अनुव्रतंवरुणोयन्तिमित्रेयत्सूर्यंदिव्यारोहयन्ति २ यंसोमकृण्वन्त-

मसेविपूचेधुवक्षेमाअनंवस्यन्तोअर्थम् । तंसूर्यंहरितःसप्तयह्वीःस्पशंविश्वस्यजगतोवहन्ति ३ वहिष्ठेभिर्विहरन्यासितन्तुमव्ययन्नसितंदेववस्म । दविध्वतोरुशमयः सूर्यस्यचर्मेवावाधुस्तमोअप्स्वन्तः ४ अनायतोअनिबद्धःकथायंन्यङ्ङुत्तानोऽवपद्यतेन । कयायातिस्वधयाकोदंदर्शादिवःस्कम्भःसमृतः पात्यन्नाकम् ५ ॥ १३ ॥

प्रसग्निः पञ्च वामदेवोग्निर्लिङ्गोक्तदेवता वा त्रिष्टुप् ।

१४ प्रत्यग्निरुषसोजातवेदाअख्यद्देवोरोचमानामहोभिः । आनासत्योरुगायारथेनेमंयज्ञमुपनोयातमच्छ १ ऊर्ध्वकेतुंसविताद्देवोअश्रेज्ज्योतिर्विश्वस्मैभुवनायकृण्वन् । आप्राद्यावापृथिवीअन्तरिक्षंविसूर्योरश्मिभिश्चेकितानः २ आवहन्त्यरुणीज्योतिषागान्महीचित्रारश्मिभिश्चेकितानाप्रबोधयन्तीसुवि- ॥१४२॥

तायदेव्यु१पाइँयतेसुयुजारथेन ३ आवांवहिष्ठाइहतेवहन्तुरथाअश्वांसउपसो व्युष्टौ । इमेहिवांमधुपेर्यायुसोमाअस्मिन्यज्ञेवृषणामादयेथाम् ४ अनायतोअनिबद्धःकथायंन्यङ्क्तानोऽवपद्यतेन । कयायातिस्वधयाकोदंदर्शादिवःस्कम्भः समृतःपातिनाकम् ५ ॥ १४ ॥

अग्निर्होता दश वामदेवोग्निर्गायत्री । सप्तम्यष्टम्योः सोमकः साहदेव्यः । अन्त्ययोरश्विनौ ।

१५ अग्निर्होतानोअध्वरेवाजीसन्परिणीयते । देवोदेवेषुयज्ञियः १ परि त्रिविष्टयध्वरंयात्यग्नीरथीरिव । आदेवेषुप्रयोदधत् २ परित्वाजंपतिःकविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानिदाशुषे ३ अयंयःसृञ्जयेपुरोदैववातेसमिध्यते । द्युमाँअमित्रदम्भनः ४ अस्यंघावीरईवतोऽग्नेरीशीतमर्त्यः । तिग्मजंम्भस्यमी-

ह्वयः ५ ॥ १५ ॥ तमवन्तुनसानसिमरुषंनदिवः शिशुम् । मर्मृज्यन्तोदिवे-
दिवे ६ वोधयन्माहरिभ्यांकुमारःसाहदेव्यः । अच्छानहूतउदरम् ७ उतत्या
यंजुताहरीकुमारात्साहदेव्यात् । प्रयतासद्यआददे ८ एषवांदेवावश्विनाकुमारः
साहदेव्यः । दीर्घायुरस्तुसोमकः ९ तंयुवंदेवावश्विनाकुमारंसाहदेव्यम् । दीर्घा-
युंपंकृणोतन १० ॥ १६ ॥

आ सत्य एकविंशतिर्वामदेव इन्द्राश्विष्टुप् ।

१६ आसत्योयातुमघवाँऋजीषीद्रवन्त्वस्यहरयउपनः । तस्माइदन्धःसुषु-
मासुदक्षमिहाभिपित्वंकरतेगृणानः १ अवस्यशूराध्वनोनान्तेऽस्मिन्नोअद्यसव-
नेमन्दध्यै । शंसात्युक्थमुशनेववेधाश्चिकितुषेअसुर्यायमन्म २ क्रविर्ननिण्यं
विदथानिसाधन्वृषायत्सेकंविपिपानोअर्चात् । दिवइत्याजीजनत्सप्तकारूनहा

चिच्चकुर्युनांगृणन्तः ३ स्वर्१यद्वेदिंसुदृशींकमर्कैर्महिज्योतींरुरुचुर्यद्धवस्तोः ।
अन्वातमांसिदुधितांविचक्षेनृभ्यश्चकारनृतमोअभिष्टौ ४ ववक्षइन्द्रोअमितमृ-
जीप्यु१भेआपप्रौरोदसीमहित्वा । अतश्चिदस्यमहिमाविरेच्याभियोविश्वाभुव-
नावभूव ५ ॥ १७ ॥ विश्वांनिशक्रोनर्याणिविद्वानपोरिरेचसखिभिर्निकामैः ।
अश्मानंचिद्येविभिदुर्वचोभिर्व्रजंगोमन्तमुशिजोविवव्रुः ६ अपोवृत्रंवव्रिवांसं
पराहन्प्रावत्तेवज्रंपृथिवीसचेताः । प्राणांसिसमुद्रियाण्यैनोःपतिर्भवञ्छवसाशू-
रधृष्णो ७ अपोयदद्रिंपुरुहूतददराविर्भुवत्सरमापूव्यंते । सनोनेतावाजमादर्षि
भूरिगोत्रारुजन्नङ्गिरोभिर्गृणानः ८ अच्छाकविंनृमणोगाअभिष्टौस्वर्षातामघव-
न्नाधमानम् । ऊतिभिस्तमिषणोद्युम्नहूतौनिमायावानव्रह्मादस्युरर्त ९ आद-
स्युग्रामनंसायाह्यस्तुभवत्तेकुत्सःसख्येनिकामः । स्वेयोनौनिषदतंसरूपाविवां

चिकित्सद्दृतचिह्ननारीं १० ॥ १८ ॥ यामिकुत्सेनसरथमवस्युस्तोदोवातस्य हर्योरीशानः । ऋज्रावाजंनगध्यंयुयूषन्कविर्यदह्न्पायीयभूषात् ११ कुत्साय शुष्णंमशुषंनिवर्हीः प्रपित्वेअह्नःकुयवंसहस्रा । सद्योदस्यून्प्रमृणकुत्स्येनप्रसूरश्रुकंवृहतादभीकें १२ त्वंपिप्रुंमृगंयंशूशुवांसंमृजिश्वनेवैदथिनायरन्धीः । पञ्चाशत्कृष्णानिवपः सहस्रात्कंनपुरोजरिमाविदर्दः १३ सूरंउपाकेतन्वं१दधानोवियत्तेचेत्यमृतस्यवर्पः । मृगोनह्स्तीतविषीमुपाणः सिंहोनभीमआयुधानिविभ्रत् १४ इन्द्रंकामावसूयन्तोअग्मन्त्स्वर्मीळ्हेनसवनेचकानाः । अवस्यवःशशमानासंउक्थैरोकोनरण्वासुदृशींवपुष्टिः १५ ॥११॥ तमिद्दइन्द्रंसुहवंहुवेमयस्ताचकारनर्यापुरूणि । योमावतेजरित्रेगध्यंचिन्मक्षूवाजंभरतिस्पार्हराधाः १६ तिग्मायदन्तरशनिःपतातिकस्मिञ्चिच्छूरमुहुकेजनानाम् । घोरायदर्यसमृतिर्भ- ॥१५१॥

वात्यर्धस्मानस्तन्वोबोधिगोपाः १७ भुवोऽवितावामदेवस्यधीनांभुवःसखावृ-
कोवाजसातौ । त्वामनुप्रमतिमाजगन्मोरुशंसोजरित्रेविश्वधस्याः १८ एभि-
र्नृभिरिन्द्रत्वायुभिष्ट्वामघवद्भिर्मघवन्विश्वआजौ । द्यावोनवुभ्नैरभिसन्तोअर्यःक्ष-
पोमदेमशरदश्चपूर्वीः १९ एवेदिन्द्रायवृषभायवृष्णेब्रह्माकर्मभृगवोनरथम् । नूचि-
द्यथानःसख्यावियोषदसन्नउग्रोऽवितातनूपाः २० नूष्टुतइन्द्रनूगृणानइषेजरित्रे
नद्योऽनर्पिपेः । अकारितेहरिवोब्रह्मनव्यधियास्यामरथ्यःसदासाः २१ ॥ २० ॥

त्वं महानेकविंशतिर्वामदेव इन्द्रस्त्रिष्टुप् । पञ्चदश्येकपदा ।

१७ त्वंमहाँइन्द्रतुभ्यंहक्षाअनुक्षत्रंमंहनामन्यतद्यौः । त्वंवृत्रंशवसाजघ-
न्वान्त्सृजःसिन्धूँरहिनाजग्रसानान् १ तवत्विषोजनिमन्रेजतद्यौरेजद्भूमिभि-
यसास्वस्यमन्योः । ऋघायन्तंसुभ्वं१ःपर्वतासआर्दन्धन्वानिसरयन्तआपः २

शिनद्रिरिंशर्वसावज्रमिष्णन्नाविष्कृण्वानःसंहसानओजः । वधीर्हुत्रंवज्रेण मन्दसानःसरन्नापोजवसाहुतवृष्णीः ३ सुवीरस्तेजनितामन्यतुद्यौरिन्द्रस्यकर्ता स्वपस्तमोभूत् । यईंजुजानस्वर्यंसुवज्रमनपच्युतंसदसोनभूमं ४ यएकइन्द्यावयतिप्रभूमाराजाकृष्टीनांपुरुहूतइन्द्रः । सत्यमेनमनुविश्वेमदन्तिरातिंदेवस्यगृणतोमघोनः ५ ॥ २१ ॥ सत्रासोमाअभवन्नस्यविश्वेसत्रामदासोबृहतोमदिष्ठाः । सत्राभवोवसुपतिर्वसूनांदत्रेविश्वाअधिथाइन्द्रकृष्टीः ६ त्वमधप्रथमंजायमानोऽमेविश्वाअधिथाइन्द्रकृष्टीः । त्वंप्रतिप्रवतआशयानमहिंवज्रेणमघवन्विवृश्चः ७ सत्राहणंदार्धृषिंतुम्रमिन्द्रंमहामपारंवृषभंसुवज्रम् । हन्तायोवृत्रंसनितोतवाजंदातामघानिमघवासुराधाः ८ अयंवृतश्चातयतेसमीचीर्यआजिषुमघवाशृण्वएकः । अयंवाजंभरतियंसनोत्यस्यप्रियासः सख्येस्याम ९ अयंशृण्वे ॥१५२॥

अधजयंश्चुतघ्नत्रयमुतप्रकृणुतेयुधागाः । यदासत्यंकृणुतेमन्युमिन्द्रोविश्वंदृळ्हंभयतएजदस्मात् १० ॥ २२ ॥ समिन्द्रोगाअजयत्संहिरण्यासमश्वियामघवायोहंपूर्वीः । एभिर्नृभिर्नृतमोअस्यशाकैरायोर्विभक्तासंभरश्चवस्वः ११ कियंत्स्विदिन्द्रोअध्येतिमातुःकियत्पितुर्जनितुर्योजजान । योअस्यशुष्मंमुहुकैरियर्तिवातोनजूतः स्तनयद्भिरभ्रैः १२ क्षियन्तंत्वमक्षियन्तंकृणोतीयर्तिरेणुंमघवासमोहंम् । विभञ्जनुरशनिंमाँइवद्यौरुतस्तोतारंमघवावसौधात् १३ अयंचक्रमिंपणत्सूर्यस्यन्येतंशरीरमत्ससृमाणम् । आकृष्णईंजुहुराणोजिघर्तित्वचोबुध्नेरजसोअस्ययोनौ १४ असिक्त्यांयजमानोनहोता १५ ॥ २३ ॥ गृणन्तइन्द्रंसख्यायविप्राअश्वायन्तोवृषणंवाजयन्तः । जनीयन्तोजनिदामक्षितोतिमाच्यावयामोऽवतेनकोशम् १६ त्रातानोबोधिदृशानआपिरभिख्याताभंद्रासोम्या-

नाम् । सखापितापितृतमःपितॄणांकर्तेमुलोकमुशतेवयोधाः १७ सखीयतामं-
वितावोधिसखागृणानइन्द्रस्तुवतेवयोधाः । वयंह्यातेचकृमासवाधंआभिःशमी-
भिर्महयन्तइन्द्र १८ स्तुतइन्द्रोमघवायद्धवृत्राभूरीण्येकोअप्रतीनिहन्ति । अस्य-
प्रियोजरितायस्यशर्मन्नकिर्देवावारयन्तेनमर्ताः १९ एवानइन्द्रोमघवाविरप्शी
करत्सत्यार्चर्पणीधृदनर्वा । त्वंराजाजनुषांधेह्यस्मेअधिश्रवोमाहिनंयज्जरित्रे २०
नूष्टुतइन्द्रनूगृणानइषेजरित्रेनद्योनपीपेः । अकारितेहरिवोब्रह्मनव्यंधियास्याम
रथ्यःसदासाः २१ ॥ २४ ॥

अयं पन्थास्त्रयोदश संवाद इन्द्रादितिवामदेवानां त्रिष्टुप् ।

१८ अयंपन्थाअनुवित्तःपुराणोयतोदेवाउदजायन्तविश्वे । अतश्चिदाजनि- ॥१५३॥

पीष्टप्रवृद्धोमामातरंममुयापत्तवेकः १ नाहमतोनिरयादुर्गहैतत्तिरश्चतापार्श्वान्निं-
गँमाणि । वहूनिंमेअकृताकर्त्वानियुध्यैत्वेनसंत्वेनपृच्छै २ परायतींमातरमन्व-
चष्टननानुगान्यनुनूगंमानि । त्वष्टुर्गृहेऽपिवत्सोमंमिन्द्रःशतधन्यंचम्वोःसुतस्य३
किंसऋधंकृणवद्यंसहस्रंमासोजभारंशरदश्चपूर्वीः । नहीन्द्रस्यप्रतिमानमस्त्य-
न्तर्जातेषूतयेजनित्वाः ४ अवद्यमिवमन्यमानागुहाकरिन्द्रंमातावीर्येणान्यृष्टम्।
अथोदस्थात्स्वयमत्कंवसानआरोदसीअपृणाज्जायमानः ५ ॥ २५ ॥ एता
अर्षन्त्यलला भवन्तीर्कृतावरीरिवसंक्रोशमानाः । एताविपृच्छकिमिदंभनन्ति
कमापोअद्रिंपरिधिंरुजन्ति ६ किमुष्विदस्मैनिविदोभनन्तेन्द्रस्यावद्यंदिधिषन्त-
आपः । ममैतान्पुत्रोमहतावधेनवृत्रंजघन्वाँअसृजद्विसिन्धून् ७ ममच्छनत्वा

युवतिःपरासममञ्चनत्वाकुपवाजगार। ममाच्छिदापःशिशवेममृड्युर्ममाच्छिदिन्द्रः
सहसोदंतिष्ठत् ८ ममच्छनेतमधवन्यॅसोनिविविध्वाँअपहनूजघान। अधानि-
विद्ऊत्तरोबभूवाञ्छिरोदासस्यसंपिणग्वधेन १ गृष्टिःससूवस्थविरंतवागामना-
धृष्यंवृषभंतुग्रमिन्द्रम्। अरीळ्हंवत्संचरथायमातास्वयंगातुंतन्वड्इच्छमानम् १०
उतमातामहिषमन्ववेनदमीत्वाजहातिपुत्रदेवाः। अथाब्रवीद्वृत्रामिन्द्रोहनिष्यन्त्स-
खेविष्णोवितरंविक्रमस्व ११ कस्तेमातरंविधवामचक्रच्छयुंकस्त्वामजिघांस-
च्चरन्तम्। कस्तेदेवोअधिमाडीकआसीद्यत्प्राक्षिणाःपितरंपादगृह्य १२ अवर्त्या-
शुनआन्त्राणिपिचेनदेवयुंविविदेमडितारम्। अपश्यंजायाममहीयमानामधामे
श्येनोमध्याजभार १३ ॥२६॥ इतिशाकलकसंहितायां तृतीयाष्टके पञ्चमोऽध्यायः॥५॥

एवैकादशानआयातुयन्नःकथोपान्त्यास्तिस्रऋतदेव्योवाकामुष्टुतिरुपान्त्यानुष्टुपको अवाष्टावहंमनुः सप्तभ्याभिस्तिसृभिरिन्द्रमिवात्मानमृषिस्तुष्टावेन्द्रोवात्मानं परानवाष्टौवाश्येनस्तुतिर्गर्भेनुपञ्चान्त्याशकरीत्यायुनैन्द्रासोमंवानःस्तुतोनकिश्चतुर्विंशतिर्दैवश्चित्तृचउपस्यश्चगायत्रंबृहत्यन्त्ये अनुष्टुभौकयापशोनाभीपुपादानिचृदानूनश्चतुर्विंशतिरन्त्याभ्यामैन्द्राश्चौस्तुतौ ।

एवैकादश वामदेव इन्द्रस्त्रिष्टुप् ।

११ ओम् एवात्वामिन्द्रवज्रिन्नत्रविश्वेदेवासःसुहवासऊमाः । महामुभेरोदसीवृद्धमृष्वंनिरेकमिद्दृंणतेवृत्रहत्ये १ अवासृजन्तजिव्रयोनदेवाभुवःसम्राळिन्द्र सत्ययोनिः । अहन्नहिंपरिशयानमर्णःप्रवर्तनीरदोविश्वधेनाः २ अतृप्णुवन्तं वियंतमवुध्यमवुध्यमानंसुषुपाणमिन्द्र । सप्तप्रतिंप्रवतआशयानमहिंवज्रेणविरिणाअपर्वन् ३ अक्षोदयच्छवसाक्षामबुध्नंवार्णवात्स्तविषीभिरिन्द्रः । दृळ्हान्यौभ्नादुशमानओजोऽवाभिनत्ककुभःपर्वतानाम् ४ अभिप्रदंद्रुर्जनंयोनगर्भंरथा-

इवप्रयंयुःसाकमद्रयः । अतर्पयोविसृतंउब्जऊर्मीन्त्वंवृताँअरिणाइन्द्रसिन्धून् ५
॥ १ ॥ त्वंमहीमवनिँविश्वधैनांतुर्वीतयेवय्यायक्षरन्तीम् । अरमयोनमसैज-
दृणँःसुतरणाँअकृणोरिन्द्रसिन्धून् ६ प्रायुवोनभन्वो३नवक्वाध्वस्त्राअपिन्वद्युव-
तीऋँतज्ञाः । धन्वान्यज्राँअपृणक्तृषाणाँअधोगिन्द्रःस्तर्यो३दंसुपत्नीः ७ पूर्वीरुष-
सःशरदश्चगूर्तावृत्रंजघन्वाँअसृजद्विसिन्धून् । परिष्ठिताअतृणद्बद्बधानाःसीराइ-
न्द्रःस्रवितवेपृथिव्या ८ वज्रीभिःपुत्रमग्रुवोअदानंनिवेशनाद्धरिवआजभर्थ ।
व्यं१न्योअख्यदहिमादधानोनिभूदुखच्छित्समरन्तपर्वं ९ प्रतेपूर्वाणिकरणानि-
विप्राविद्वाँआहविदुषेकरांसि । यथायथावृष्ण्यानिस्वगूर्तापांसिराजन्नर्याविवेषीः १० नूष्टुतइन्द्रनृगृणानइषँजरित्रेनद्यो३नपीपेः । अकारितेहरिवोब्रह्मनव्यँ
धियास्यांमरुत्यःसदासाः ११ ॥ २ ॥

आ न एकादश वामदेव इन्द्रस्त्रिष्टुप् ।

२० आनइन्द्रोदूरादानआसादभिष्टिकृदवसेयासदुग्रः । ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसङ्गेसमत्सुतुर्वणिःपृतन्यून् १ आनइन्द्रोहरिभिर्याह्यच्छार्वाचीनोऽवसेराधसेच । तिष्ठातिवज्रीमघवन्विरप्शीमंयज्ञमनुनोवाजसातौ २ इमंयज्ञंत्वमस्माकमिन्द्रपुरोदधत्सनिष्यसिक्रतुंनः । श्वघ्नीवंवज्रिन्त्सनयेधनानांत्वयावयमर्य आजिंजयेम ३ उशन्नुषुणःसुमनाउपाकेसोमस्यनुसुषुतस्यस्वधावः । पाइन्द्र प्रतिभृतस्यमध्वःसमन्धसाममदःपृथस्वेन ४ वियोरप्शक्रविभिर्नवेभिर्वृक्षोन पक्वःसृण्योनजेता । मर्योनयोषामभिमन्यमानोऽच्छाविवक्मिपुरुहूतमिन्द्रम् ५ ॥३॥ गिरिर्नयःस्वतवाँऋष्वइन्द्रःसनादेवसहसेजातउग्रः । आदर्तावज्रंस्थविरंन भीमउद्नेवकोशंवसुनान्यृष्टम् ६ नयस्यवर्ताजनुषान्वस्तिनराधसआमरीताम-

घस्य । उद्वावृषाणस्तविषीव उग्रास्मभ्यंदद्धिपुरुहूतरायः ७ ईक्षेरायःक्षयस्यच-र्षणीनामुतव्रजमपवर्तासिगोनाम् । शिक्षानरःसमिथेषुप्रहावान्वस्वोराशिमभिनेतासिभूरिम् ८ कयातच्छृण्वेशच्याशचिष्ठोययाकृणोतिमुहुकाचिदृष्वः । पुरुदाशुषेविचयिष्ठोअंहोऽथादधातिद्रविणंजरित्रे ९ मानोमर्धीराभरादर्द्धितव्रः प्रदाशुषेदातवेभूरियत्ते । नव्येदेष्णेशस्तेअस्मिन्तुक्थेप्रब्रवामवयमिन्द्रस्तुवन्तः १० नूष्टुतइन्द्रनूगृणानइषेजरित्रेनद्योऽनपीपेः । अकारितेहरिवोब्रह्मनव्यं धियास्यामरथ्यः सदासाः ११ ॥ ४ ॥

आ यात्वेकादश वामदेव इन्द्रस्त्रिष्टुप् ।

२१ आयात्विन्द्रोऽवसउपनऽहस्तुतःसधमादस्तुशूरः । वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्षत्रमभिभूतिपुष्यात् १ तस्येदिहस्तवथवृष्ण्यानितुविद्युम्नस्यतुविरा- ॥१५६॥

धसोनृन्। यस्यक्रतुर्विदथ्यो३नसत्राट्सान्तरुत्रोअभ्यस्तिकृष्टीः २ आयात्विन्द्रोदिवआपृथिव्यामक्षूसमुद्रादुतवापुरीषात् । स्वर्णरादवसेनोमरुत्वान्परावतोवासदनादृतस्य ३ स्थूरस्यरायोबृहतोयईशेतमुष्टवामविदथेष्विन्द्रम्। योवायुनाजयतिगोमतीषुप्रधृष्णुयानयतिवस्योअच्छ ४ उपयोनमोनमसिस्तभायन्नियर्तिवाचंजनयन्यजध्यै । ऋजूसानःपुरुवारउक्थैरेन्द्रंकृण्वीतसदनेषुहोता ५ ॥ ५ ॥ घिषायदिधिषण्यन्तःसरण्यान्त्सदन्तोअद्रिंमौञ्जिजस्यगोहे । आदुरोषाःपास्त्यस्यहोतायोनोमहान्त्संवरणेषुवह्निः ६ सत्रायदीभार्वरस्यवृष्णःसिषक्तिशुष्मःस्तुवतेभराय । गुहायदीमौञ्जिजस्यगोहेप्रयद्धियेप्रायसेमदाय ७ वियद्वरांसिपर्वतस्यवृष्वेपयोभिर्जिन्वेअपांजवांसि । विदद्गौरस्यगवयस्यगोहेयदीवाजायसुध्यो३वहन्ति ८ भद्रातेहस्तासुकृतोतपाणीप्रयन्तारास्तुवतेराधइन्द्र । कातेनिष-

त्तिःकिमुनोमंमन्तिकिंनोदुंदुहर्षसेदातवाउं १ एवावस्वइन्द्रंःसत्यःसम्राड्न्तावृत्रं वरिवःपूरवेंकः । पुरुष्टुतक्रत्वानःशग्धिरायोभक्षीयतेऽवसोदैव्यस्य १० नृष्टुतइन्द्र नूगृणानइषंजरित्रेनद्योउनर्पीपेः । अकारितेहरिवोब्रह्मनन्यंधियास्यांमरुथ्यंःस-दासाः ११ ॥ ६ ॥ इति शाकलर्क्संहितायां चतुर्थे मण्डले द्वितीयोऽनुवाकः ॥ २ ॥

यत्र एकादश वामदेव इन्द्रास्त्रिष्टुप् ।

२२ यत्रइन्द्रोजुजुषेयज्ञवाष्टितन्नोंमहान्कंरातिशुष्म्याचित् । ब्रह्मस्तोमंमघवा सोमंमुक्थायोअश्मानंशवसाविभ्रदेति १ वृषावृषन्धिचतुरश्रिमस्यन्नुग्रोवाहुभ्यां नृतंमःशचीवान् । श्रियेपरुष्णीमुपमाणऊर्णायस्याःपवींणिसख्यायविव्ये २ योदेवोदेवतमोजायमानोमहोवाजेभिर्महद्भिश्चशुष्मैः । दधानोवज्रंबाह्वोरुशन्तं

यामर्मेनरेजयत्प्रभूमं ३ विश्वारोधांसिप्रवतश्चपूर्वीर्द्यौर्न्कृष्वाज्जनिमन्नेजत्क्षाः। आमातराभरतिशुष्म्यागोर्नृवत्परिज्मन्नोनुवन्तुवार्ताः ४तातूतंइन्द्रमहतोमहानि विश्वेष्वित्सवनेषुप्रवाच्या। यच्छूरधृष्णोधृषतादधृष्वानहिंवज्रेणशवसाविवेषीः५ ॥ ७ ॥ तातूतेसत्यातुविनृम्णविश्वाप्रधनेवःसिस्रतेवृष्णऊर्भः । अधाहत्वद्वृषमणोभियानाःप्रसिन्धवोजवसाचक्रमन्त ६ अत्राहतेहरिवस्ताउदेवीरवोभिरिन्द्रस्तवन्तस्वसारः। यत्सीमनुप्रमुचोवद्धधानादीर्घामनुप्रसितिंस्यन्द्रयध्यै ७ पिप्पीळेअंशुर्मद्योनासिन्धुरात्वाशमींशशमानस्यशक्तिः । अस्मद्र्यक्शुशुचानस्ययम्याआशुर्नरश्मिंतुव्योजसंगोः ८ अस्मेवर्षिष्ठाकृणुहिज्येष्ठानृम्णानिसत्रासहुरेसहांसि । अस्मभ्यंवृत्रासुहनानिरन्धिजहिवधंर्वनुषोमर्त्यस्य ९ अस्माकमित्सुशृणुहित्वमिन्द्रास्मभ्यंचित्राँउपमाहिवाजान् । अस्मभ्यंविश्वाइषणःपुरन्धीर्-

स्माकंसुमंघवन्वोधिगोदाः १० नूष्टुतइन्द्रनूगृणानइषंजरित्रेनद्यो३नपींपेः । अकारितेहरिवोब्रह्मनव्यंधियास्यामरथ्यःसदासाः ११ ॥ ८ ॥

कथैकादश वामदेव इन्द्रस्त्रिष्टुप् । उपान्त्यानां तिरश्चीनामृतदेवो वा ।

२३ कथामहामवृधत्कस्यहोतुर्यज्ञंजुषाणोअभिसोममूधः । पिबन्नुशानोजुषमाणोअन्धोवावक्षक्रुष्वःशुचतेधनाय १ कोअस्यवीरःसधमादंमापसमानंशसुमतिभिःकोअस्य । कदस्यचित्रंचिकितेकदूतीवृधेभुवच्छशमानस्ययज्योः २ कथा शृणोतिहूयमानमिन्द्रःकथाशृण्वन्नवसामस्यवेद । काअस्यपूर्वीरुपमातयोहकथैनमाहुःपपुरिंजरित्रे ३ कथासवार्धःशशमानोअस्यनशदभिद्रविणंदीध्यानः । देवोभुवन्नवेदामऋतानांनमोजगृभ्वाँअभियज्जुजोषत् ४ कथाकदस्याउषसो व्युष्टौदेवोमर्तस्यसख्यंजुजोष । कथाकदस्यसख्यंसखिभ्योयेअस्मिन्कामेसुयु- ॥१५८॥

जैतऽत्रे ५ ॥ १ ॥ किमादमंत्रंसख्यंसखिभ्यःकदानुतेभ्रात्रंप्रब्रवाम । श्रिये सुदृशोवपुरस्यसर्गाःस्व१र्णचित्रतममिषआगोः ६ बृहंजिघाँसन्ध्वरसंमनिन्द्रां तेतिक्तेतिग्मातुजसेअनीका । ऋणाचिद्यत्रंऋणयानउग्रोदूरेअज्ञाताउपसोव-वाधे ७ ऋतस्यहिशुरुधःसन्तिपूर्वीऋतस्यधीतिर्वृजिनानिहन्ति । ऋतस्यश्लोको बधिरातंतर्दकर्णाबुधानःशुचमानआयोः ८ ऋतस्यद्रुह्वाधरुणानिसन्तिपुरूणि चन्द्रावपुषेवपूंषि । ऋतेनदीर्घमिषणन्तपृक्षऋतेनगावऋतमाविवेशुः ९ ऋतंये-मानऋतमिद्वनोत्यृतस्यशुष्मंस्तुरयाउगृण्युः । ऋतायपृथ्वीबहुलेगभीरेऋतायधेनूपरमेदुहाते १० नूष्टुतइन्द्रनूगृणानइषेजरित्रेनद्योरनपाँपेः । अकारितेहरि-वोब्रह्मनन्यँधियास्यामरथ्यःसदासाः ११ ॥ १० ॥

का सुष्टुतिरेकादश वामदेव इन्द्रस्त्रिष्टुप् । उपान्त्यानुष्टुप् ।

२४ कासुष्टुतिःशवसःसूनुमिन्द्रमर्वाचीनंराधस्तुआववर्तत् । ददिर्हिवीरोगृणतेवसूनिसगोपतिर्नियविधानोजनासः १ सवृत्रहत्येहव्यःसईड्यःससुष्टुतइन्द्रः सत्यराधाः । सयामन्नामघवामर्त्यायब्रह्मण्यतेसुष्वयेवरिवोधात् २ तमिन्नरो विह्वयन्तेसमीकेरिरिक्वांसस्तन्वःकृण्वतत्राम् । मिथोयत्त्यागमुभयासोअग्मन्नरस्तोकस्यतनयस्यसातौ ३ क्रतूयन्तिक्षितयोयोगउग्राशुषाणासोमिथोअर्णसातौ । संयद्दिशोऽवृत्रंतयुध्माआदिन्नेमइन्द्रयन्तेअभीके ४ आदिद्धनेमइन्द्रियंयजन्तआदित्पक्तिःपुरोळाशंरिरिक्यात् । आदित्सोमोविपपृच्यादसुष्वीनादिज्जुजोषवृषभंयजध्यै ५ ॥ ११ ॥ कृणोत्यस्मैवरिवोयइत्थेन्द्रायसोममुशते सुनोति । सध्रीचीनेनमनसाविवेनन्तमित्सखायंकृणुतेसमत्सु ६ यइन्द्रायसुन-

वत्सोमंमद्यपचांत्पक्तीरुतभृज्जातिंधानाः । प्रीतंमनायोरुचथांनिहर्यन्तस्मिन्द-धृर्षणंशुष्ममिन्द्रः ७ यदासंमर्यंव्यचेद्घावादीर्घंयदाजिमभ्यख्यंदर्षः । अचि-क्रदद्वृषणंपत्न्यच्छांदुरोणआनिशितंसोमसुद्भिः ८ भूयसावस्नमंचरत्कनीयो-ऽविंक्रीतोअकानिषंपुनर्यन् । सभूयसाकर्नायोनारिरेचीद्धीनादक्षाविदुंहन्तिप्रवा-णम् ९ कइमंदशभिर्ममेन्द्रंक्रीणातिधेनुभिः । यदावृत्राणिजङ्घनदथैनंमेपुनर्द-दत् १० नूष्टुतइन्द्रनूगृणानइषेजरित्रेनयोऽनपीपेः । अकारितेहरिवोब्रह्मनव्यं धियास्यांमरथ्यःसदासाः ११ ॥ १२ ॥

को अष्टौ वामदेव इन्द्रस्त्रिष्टुप् ।

२५ कोअद्यनर्योदेवकामउशन्निन्द्रस्यसख्यंजुजोष । कोवांमहेऽवसेपार्याययस-मिद्धेअग्नौसुतसोमईट्टे १ कोनांनामवचसासोम्यायमनायुर्वांभवतिवस्तउस्राः ।

कइन्द्रस्ययुज्यंकःसंखित्वंकोभ्रात्रंवष्टिक्रवयेकऊती २ कोदेवानामवोअद्यावृ-
णीतेकआदित्याँअदितिंज्योतिरीष्टे । कस्याश्विनाविन्द्रोअग्निःसुतस्यांशोःपिंव-
न्तिमनसाविवेनम् ३ तस्माअग्निर्भारतःशर्मयंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
यइन्द्रायसुनवामेत्याहनरेनर्याय्नृतमायनृणाम् ४ नतंजिनन्तिवहवोनदभ्राउ-
वैस्माअदितिःशर्मयंसत् । प्रियःसुकृत्प्रियइन्द्रेमनायुःप्रियःसुप्रावीःप्रियोअस्य
सोमी ५ ॥ १३ ॥ सुप्राव्यःप्राशुयाळवीरःसुष्वैःपक्तिंकृणुतेकेवलेन्द्रः । नांसु-
ष्वेरापिर्नसखानजामिर्दुष्प्राव्योऽवहन्तेदवाचः ६ नरेवतापणिनासख्यमिन्द्रो-
ऽसुन्वतासुतपाःसंगृणीते । आस्यवेदःखिवतिहन्तिनग्नंविसुष्वयेपक्तयेकेवलो
भूत् ७ इन्द्रंपरेऽवरेमध्यमासइन्द्रंयान्तोऽवसितासइन्द्रम् । इन्द्रंक्षियन्तउतयुध्य-
मानाइन्द्रंनरोवाजयन्तोहवन्ते ८ ॥ १४ ॥

अहं मनुः सप्त वामदेवस्त्रिष्टुप् । आद्यानां तिसृणामिन्द्रो वा । आद्यानां तिसृणामिन्द्र आत्मा वा । शिष्टानां चतसृणां श्येनः ।

२६ अहंमनुरभवंसूर्यश्चाहंकक्षीवाँऋषिरस्मिविप्रः । अहंकुत्समार्जुनेयंन्यृञ्जेऽहंकविरुशनापश्यंतामा १ अहंभूमिंमददामार्यायाहंवृष्टिंदाशुषेमर्त्यायं । अहमपोअनयंवावशानाममंदेवासोअनुकेतमायन् २ अहंपुरोमन्दसानोव्यैरंनवंसाकंनवतीःशम्बरस्य । शततमंवेश्यंसर्वतातादिवोदासमतिथिग्वंयदावंम् ३ प्रसुपविभ्योमरुतोविरस्तुप्रश्येनःश्येनेभ्यआशुपत्वा । अचक्रयायत्स्वधयासुपर्णोहव्यंभरन्मनवेदेवजुष्टम् ४ भरद्यदिविरतोविजानःपथोरुणामनोजवाअसर्जि । तूयंययौमधुनासोम्येनोतश्रवोविविदेश्येनोअत्र ५ ऋजीपीश्येनोददमानोअंशुंपरावतःशकुनोमन्द्रंमदंम् । सोमंभरद्दाक्षायणोदेवावान्दिवोअमुष्मादुत्त-

रादादाय ६ आदायश्येनोअभरत्सोमंसहस्रंसवाँअयुतंचसाकम् । अत्रापुरंधि-
रजहादरातीर्मदेसोमस्यमूराअमूरः ७ ॥ १५ ॥

गर्भे नु पञ्च वामदेवः श्येनास्त्रिष्टुप् । पञ्चम्या इन्द्रो वा । अन्त्या शक्वरी ।

२७ गर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमानिविश्वा । शतंमापुरआयसीर-
रक्षन्नधश्येनोजवसानिरदीयम् १ नघासमामपजोपंजभारभीमासत्वक्षंसा
वीर्येण । ईर्मापुरंधिरजहादरातीरुतवाताँअतरच्छूशुवानः २ अवयच्छ्येनोअस्व-
नीदध्योर्वियद्दिवातंजहुःपुरंधिम् । सृजद्यदस्माअवहस्रिपज्ज्यांकृशानुरस्ता
मनसाभुरण्यन् ३ ऋजिप्यईमिन्द्रावतोनभुज्युंश्येनोजभारबृहतोअधिष्णोः ।
अन्तःपतत्पतत्र्यस्यपर्णमध्यामनिप्रसितस्यतद्वेः ४ अवश्येतंकलशंगोभिरक्त-

मांपिप्यानंमघवांशुक्रमन्धः। अध्वर्युभिःप्रयतंमध्वोअग्रमिन्द्रोमदायप्रतिधृत्पिबध्यैशूरोमदायप्रतिधृत्पिबध्यै ५ ॥ १६ ॥

त्वा युजा पञ्च वामदेव इन्द्रासोमौ त्रिष्टुप्।

२८ त्वायुजातवृतत्सोमसख्यइन्द्रोअपोमनवेसस्रुतस्कः॥ अहन्नहिमरिणात्सप्तसिन्धूनपावृणोदपिहितेवखानि १ त्वायुजानिखिदत्सूर्यस्येन्द्रश्चक्रंसहसासद्यइन्दो। अधिष्णुनाबृहतावर्तमानंमहोद्रुहोअपविश्वायुधायि २ अहन्निन्द्रो अदहदग्निरिन्दोपुरादस्यून्मध्यंदिनादभीके। दुर्गेदुरोणेक्रत्वानयातांपुरूसहस्रा शवांनिबर्हीत् ३ विश्वस्मात्सीमधमाँइन्द्रदस्यून्विशोदासीरकृणोरप्रशस्ताः। अवाधेथाममृणतंनिशत्रूनविन्देथामपचितिंवधत्रैः ४ एवासत्यंमघवानायुवं

तदिन्द्रश्वसोमोर्वमश्व्यंगोः । आदर्दृतमपिहितान्यश्वारिरिचथुःक्षाश्चित्तृ- अ.३अ.६
दाना ५ ॥ १७ ॥

आ नः स्तुतः पञ्च वामदेव इन्द्राग्निबृहती ।

२१ आनःस्तुतउपवाजेभिरूतीइन्द्रयाहिहरिभिर्मन्दसानः । तिरश्चिदर्यःस-
वनापुरूण्याङ्गूषेभिर्गृणानःसत्यराधाः १ आहिष्मायातिनयंश्चिकित्वान्हूयमानः
सोतृभिरुपयज्ञम् । स्वश्वोयोअभीरुर्मन्यमानःसुष्वाणेभिर्मदतिसंहवीरैः २ आ-
ववेदस्यकर्णावाजयध्यैजुष्टामनुप्रदिशंमन्दयध्यै । उद्ववृषाणोरार्धसेतुविष्मा-
न्करन्नइन्द्रःसुतीर्थाभयंच ३ अच्छायोगन्तानार्वमानमूतीउत्याविप्रंहवमानंगृण-
न्तम् । उपत्मनिदधानोधुर्याशून्त्सहस्राणिशतानिवज्रबाहुः ४ त्वोतासोमघ- ॥१६२॥

वन्निन्द्रविप्रावयंतैस्यामसूरयोगृणन्तः । भेजानासोबृहद्दिवस्यरायआकाय्यंस्य दावनेपुरुक्षोः ५ ॥ १८ ॥

नाकिश्चतुर्विंशतिर्वामदेव इन्द्रो गायत्री । नवम्यादितिसृणामुषाश्च ।
अष्टमीचतुर्विंश्यावनुष्टभौ ॥

३० नकिरिन्द्रत्वदुत्तरोनज्यायाँअस्तिवृहत्रन् । नकिरेवायथात्वम् १ सत्रा तेअनुकृष्टयोविश्वाचक्रेवावृतुः । सत्रामहाँअसिश्रुतः २ विश्वेचनेदनात्वांदेवासइन्द्रयुयुधुः । यदहानक्रुमार्तिरः ३ यत्रोतवाघतेभ्यश्चक्रंकुत्सायुयुध्यते । मुषायइन्द्रसूर्यम् ४ यत्रदेवाँऋघायतोविश्वाँअयुध्यएकइत् । त्वमिन्द्रवनूँरहन् ५ ॥ १९ ॥ यत्रोतमर्त्याँयकमरिणाइन्द्रसूर्यम् । प्रावःशचीभिरेतशम् ६ किमादुतासिवृत्रहन्मघवन्मन्युमत्तमः । अत्राहदानुमार्तिरः ७ एतद्धेदुतवी-

यँ१मिन्द्रंचकर्थपौंस्यम् । स्त्रियंयद्दुर्हणायुवंवधींदुर्हितरंदिवः ८ दिवश्चिद्धादुहि-
तरंमहान्महीयमानाम् । उषासमिन्द्रसंपिणक् ९ अपोषाअनसःसरत्संपिष्टाद-
हविभ्युपीं । नियत्सींशिश्नथद्वृषा १० ॥ २० ॥ एतदस्याअनःशयेसुसंपिष्टंवि-
पाश्या । ससारसींपरावतः ११ उतसिन्धुंविवाल्यंवितस्थानामधिक्षमि । परि
ष्ठाइन्द्रमायया १२ उतशुष्णस्यधृष्णुयाप्रमृक्षोअभिवेदनम् । पुरोयदस्यसंपि-
णक् १३ उतदासंकौलितरंबृहतःपर्वतादधि । अवाहन्निन्द्रशम्बरम् १४ उतदा
सस्यवर्चिनःसहस्राणिशतावधीः । अधिपञ्चप्रधीरिव १५ ॥ २१ ॥ उतत्यंपु-
त्रमग्रुवःपरावृक्तंशतक्रतुः । उक्थेष्विन्द्रआभजत् १६ उतत्यातुर्वशायदूंअस्ना-
ताराशचीपतिः । इन्द्रोविद्वाँअपारयत् १७उतत्यासद्यआयाँसरयोरिन्द्रपारतः ।
अणोश्चित्रथावधीः १८ अनुद्राजंहितानयोऽन्धंश्रोणंचवृत्रहन् । नतत्तेसुम्नम-

ष्टवे १९ शतमश्मन्मयीनांपुरामिन्द्रोव्यास्यत् । दिवोदासायदाशुषे २०॥२२॥ अस्वापयद्दभीतयेसहस्रात्रिंशतंहथैः । दासानामिन्द्रोमायया २१ सघेदुतासि वृत्रहन्त्समानइंद्रगोपतिः । यस्ताविश्वानिचिक्युषे २२ उतनूनंयदिंन्द्रियंकरि-ष्याइंन्द्रपौंस्यम् । अद्यानकिष्टदामिनत् २३ वामंवामंतआदुरेदेवोदंदात्वर्यमा। वामंपूषावामंभगोवामंदेवःकरूळती २४ ॥ २३ ॥

कया पञ्चदश वामदेव इन्द्रो गायत्री । तृतीया पादनिचृत् ।

३१ कयानश्चित्रआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता १ कस्त्वासत्योमदानांमंहिष्ठोमत्सदन्धसः । दृळ्हाचिदारुजेवसु २ अभीषुणःसखीनामविताजरितॄणाम् । शतंभवास्यूतिभिः३अभीनआवृत्स्वचक्रंनवृत्तमर्वतः ।

नियुद्भिश्चर्षणीनाम् ४ प्रवताहिकतूनामाहापदेवगच्छसि । अभक्षिसूर्यसचा ५
॥ २४ ॥ संयत्तइन्द्रमन्यवःसंचक्राणिदधन्विरे । अधत्वेअधसूयै ६ उतस्माहि
त्वामाहुरिन्मघवानंशचीपते । दातारमविदीधयुम् ७ उतस्मासद्यइत्पारिशश-
मानायसुन्वते । पुरूचिन्मंहसेवसु ८ नहिष्मातेशतंचनराधोवरन्तआमुरः । न
च्यौत्नानिकरिष्यतः ९ अस्माँअवन्तुतेशतमस्मान्त्सहस्रंमूतयः । अस्मान्वि-
श्वाअभिष्टयः १० ॥२५॥ अस्माँइहावृणीष्वसख्यायस्वस्तये । महोराये दिवि-
त्मते ११ अस्माँअविड्डिविश्वहेन्द्रायापरीणसा । अस्मान्विश्वाभिरूतिभिः १२
अस्मभ्यंताँअपावृधिव्रजाँअस्तेवगोमतः । नवाभिरिन्द्रोतिभिः १३ अस्माकं
घृष्णुयारथोद्युमाँइन्द्रानपच्युतः । गव्युरश्वयुरीयते १४ अस्माकमुत्तमंकृधि
श्रवोदिवेपुसूर्यं । वर्षिष्ठंद्यामिवोपरि १५ ॥ २६ ॥

आ तू नश्चतुर्विंशतिर्वामदेव इन्द्रो गायत्री । अन्त्ययोरिन्द्राश्वौ ।

२२ आतूनइन्द्रवृत्रहन्त्स्माकंमर्धमागंहि । महान्महीभिरूतिभिः १ भूमिश्चिद्द्यामिवावृधे तुजिराचित्तुजिष्टये । चित्रंकृणोष्युतये २ दुध्रेभिश्चिच्छशीयांसंहंसिव्रार्धन्तमोजसा । सखिभिर्येत्वेसचा ३ वयमिन्द्रत्वेसचावयंत्वाभिनोनुमः । अस्माँअस्माँइदुदव ४ सनश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरागंहि ५ ॥ २७ ॥ भूयामोपुत्वावंतःसखायइन्द्रगोमंतः । युजोवाजायघृष्वये ६ त्वंह्येकईशिंपइन्द्रवाजस्यगोमंतः । सनोयन्धिमहीमिषम् ७ नत्वावरंतेअन्यथायद्वित्सांसिस्तुतोमघम् । स्तोतृभ्यइन्द्रगिर्वणः ८ अभित्वागोतमागिरानूषतप्रदावने । इन्द्रवाजायघृष्वये ९ प्रतेवोचामवीर्याऽउयामन्दस्यान आरुजः । पुरोदासीरभीत्य १० ॥ २८ ॥ तातेगृणन्तिवेधसोयानिचकर्थपौं

स्या । सुतेष्विन्द्रागिर्वणः १९ अवीवृधन्तगोतमाइन्द्रत्वेस्तोमंवाहसः । ऐषुधा
वीरवद्यशः १२ याह्यिद्दिशश्चतामसीन्द्रसाधारणस्त्वम् । तंत्वावयंहवामहे १३
॥१६५॥ अर्वाचीनोवसोभवास्मेसुमत्स्वान्धसः । सोमानामिन्द्रसोमपाः १४ अस्माकँ
त्वामतीनामास्तोमइन्द्रयच्छतु । अवगावंतयाहरी १५ पुरोळाशंचनोघसो
जोषयासेगिरश्चनः । वधूयुरिवयोषणाम् १६ ॥ २१ ॥ सहस्रंव्यतीनांयुक्ता-
नामिन्द्रंमीमहे । शतंसोमस्यखार्यः १७ सहस्रातेशतावयंगवामाच्यावया-
मसि । अस्मत्रारार्धएतुते १८ दशतेकुलशानांहिरण्यानामधीमहि । भूरिदाअं-
सिवृत्रहन् १९ भूरिदाभूरिदेहिनोमादभ्रंभूर्याभर । भूरिघेदिन्द्रदित्ससि २०
भूरिदाह्यसिश्रुतःपुरुत्राशूरवृत्रहन् । आनोभजस्वराधसि २१ प्रतेवोच्चविचक्षण
शंसामिगोषणोनपात् । माभ्यांगाअनुशिश्रथः २२ कनीनकेवविद्रधेनवेदुपदे ॥१६५॥

अर्भके । वभ्रूयामेपुशोभेते २३ अरंमदुस्रयाम्णेऽरमनुस्रयाम्णे । वभ्रू यामेप्वस्त्रिधा २४ ॥ ३० ॥ इति शाकलर्क्संहितायां तृतीयाष्टके षष्ठोऽध्यायः ॥६॥ इति शाकलर्क्संहितायां चतुर्थे मण्डले तृतीयोऽनुवाकः ॥ ३ ॥

मऋभुभ्यएकादशार्भवंवाऋभुर्विभ्वेहोपनवानश्चोन्त्यात्रिष्टुबुपनोष्टौचतुरनुष्टुबन्तमुतोहिदशदाधिक्रंहिष्यावापृथिव्याद्यागुंपळन्त्यानुष्टुब्दधिक्राव्णः पञ्चचतस्रोन्त्याजगत्यस्रोन्त्यासौरीन्द्राकोवामेकादशैन्द्रावरुणंनुममद्वितादशप्रसदस्युःपौरुकुत्स्यः पळाद्याआत्मस्तवः कउश्रवत्सप्तपुरुमीळ्हाजमीळ्हौसौहोत्रौत्वाष्टिनंहितंवामेपस्त्यत्रिष्टुबन्तमग्नंवायव्याद्यैन्द्रवायवंतुगायत्रंवायोचतुष्कमानुष्टुभंत्वाद्यावायव्याविहिपश्चवायव्यमिदंवांपळैन्द्रावाईस्पत्यंगायत्रंयस्तस्तम्भैकादशवार्हस्पत्यमन्त्येऐन्द्र्यौचोपान्त्याजगती ।

म ऋभुभ्य एकादश वामदेव ऋभवस्त्रिष्टुप् ।

३३ ॐम् प्रऋभुभ्योदूतमिवुवाचंमिष्यउपस्तिरेश्वैतरींधेनुमींळे । येवातंजूतास्तरणिंभिरेवैःपरिद्यांसद्योअपसोवभूवुः १ युदारमक्रन्नृभवःपितृभ्यांपरिविष्टी

स्या । सुतेष्विन्द्रगिर्वणः ११ अवीवृधन्तगोतमाइन्द्रत्वेस्तोमवाहसः । ऐषुधा
वीरवद्यशः १२ यच्चिद्धिशश्वतामसीन्द्रसाधारणस्त्वम् । तंत्वावयंहवामहे १३
अर्वाचीनोवसोभवास्मेसुमत्स्वान्धसः । सोमानामिन्द्रसोमपाः १४ अस्माकँ
त्वामतीनामास्तोमइन्द्रयच्छतु । अर्वागावर्तयाहरीँ १५ पुरोळाशँचनोघसो
जोषयासेगिरश्चनः । वधूयुरिवयोषणाम् १६ ॥ २१ ॥ सहस्रंव्यतीनांयुक्ता-
नामिन्द्रंमीमहे । शतंसोमस्यखार्यः १७ सहस्रातेशतावयंगवामाच्यावया-
मसि । अस्मत्राराधंएतुते १८ दशतेकुलशानांहिरण्यानामधीमहि । भूरिदाअ-
सिवृत्रहन् १९ भूरिदाभूरिदेहिनोमादभ्रंभूर्याभर । भूरिघेदिन्द्रदित्ससि २०
भूरिदाह्यसिश्रुतःपुरुत्राशूरवृत्रहन् । आनोभजस्वराधसि २१ प्रतेवभ्रूविचक्षण
शंसामिगोषणोनपात् । माभ्यांगाअनुशिश्रथः २२ कनीनकेवविद्रधेनवेदुपदे ॥१६५॥

अर्भके । वभ्रूयामेंपुशोभेते २३ अरंमउस्रयाम्णेऽरमनुस्रयाम्णे । बभ्रूयामेंप्वस्रिधा २४ ॥ ३० ॥ इति शाकलर्क्संहितायां तृतीयाष्टके षष्ठोऽध्यायः ॥६॥ इति शाकलर्क्संहितायां चतुर्थे मण्डले तृतीयोऽनुवाकः ॥ ३ ॥

मऋभुभ्यएकादशार्भवंवाऋभुविभ्वेहोपनवानश्चोन्त्यात्रिष्टुवुपनोष्टौचतुरनुष्टुवन्तमुतोहिदशदाधिकं हिरण्यावापृथिव्याद्याशुंपळन्त्यानुष्टुब्दधिक्राव्णः पञ्चचतस्रोन्त्याजगत्योन्त्यासौरीन्द्राकोवामेकादशैन्द्रावरुणंतुमंद्रितादशत्रसदस्युःपौरुकुत्स्यः पळाद्याआत्मस्तवः कुउश्रवत्सप्तपुरुमीढ्वाजमीढ्वौसौहोत्रौत्वाष्ट्रिनंहितंवामेपस्त्यत्रिष्टुवन्तमग्नंवायव्याद्यैन्द्रवायवंतुगायत्रंवायोचतुष्कमानुष्टुभंत्वाद्यावायव्याविहिपश्चवायव्यमिदंवांपळैन्द्रावार्हस्पत्यंगायत्रंयस्तस्तम्भैकादशवार्हस्पत्यमन्त्येऐन्द्र्यौचोपान्त्याजगती ।

म ऋभुभ्य एकादश वामदेव ऋभवस्त्रिष्टुप् ।

३३ ॐम् प्रऋभुभ्योदूतमिंववाचंमिप्यउपस्तिरेश्वैतरींधेनुमींळे । येवातंजूतास्तरणिंभिरेवैःपरियांन्त्योअपसोंवभूवुः १ युदारमक्रंन्नृभवंःपितृभ्यांपरिंविष्टी

वेषणादंसनाभिः । आदिद्देवानामुपसख्यमायन्धीरासःपुष्टिमंवहन्मनायै २ पुनर्येचक्रुःपितरायुवानासनायूपेवजरणाशयानाः । तेवाजोविभ्वाँऋभुरिन्द्रवन्तो मधुष्टरसोनोऽवन्तुयज्ञम् ३ यत्संवत्समृभवोगामरक्षन्यत्संवत्समृभवोमाआपेशन् । यत्संवत्समभरन्भासोअस्यास्ताभिःशमीभिरमृतत्वमाशुः ४ ज्येष्ठआहचमसाद्वाकरेतिकनीयान्त्वीन्कृणवामेत्याह । कनिष्ठआहचतुरस्करेतित्वष्टृऋभवस्तत्पनयद्वचोवः ५ ॥ १ ॥ सत्यमूचुर्नरएवाहिचक्रुरनुस्वधामृभवोजग्मुरेताम् । विभ्राजमानाश्चमसाँअहेवावेनत्त्वष्टाचतुरोददृश्वान् ६ द्वादशद्यून्यदगोह्यस्यातिथ्येरणन्नृभवःसस्मन्तः । सुक्षेत्राकृण्वन्नयन्तसिन्धून्वन्वातिष्ठन्नोपधीर्निम्नमापः ७ रथंयेचक्रुःसुवृतंनरेष्ठांयेधेनुंवेश्वजुवंविश्वरूपाम् । तआतक्षन्त्वृभवोरयिंनःस्ववसःस्वपसःसुहस्ताः ८ अपोह्येषामजुषन्तदेवाअभिक्रत्वामनसा

दीध्यानाः । वाजोदेवानामभवत्सुकर्मेन्द्रस्यऋभुक्षावरुणस्यविभ्वा १ येहरीं मेधयोक्थामदन्तइन्द्रायचक्रुःसुयुजायेअश्वा । तेरायस्पोषंद्रविणान्यस्मेधत्तऋभवःक्षेमयन्तोनमित्रम् १० इदाह्नःपीतिमुतवोमदंधुर्नऋतेश्रान्तस्यसख्यायदेवाः । तेनूनमस्मेऋभवोवसूनितृतीयेअस्मिन्त्सवनेदधात ११ ॥ २ ॥

ऋभुर्विभ्वैकादश वामदेव ऋभवस्त्रिष्टुप् ।

३४ ऋभुर्विभ्वावाजइन्द्रोनोअच्छेमंयज्ञंरत्नधेयोपयात । इदाहिवोधिषणादेव्यह्नामधात्पीतिंसमदांअग्मतावः १ विदानासोजन्मनोवाजरत्नाउतऋतुभिर्ऋभवोमादयध्वम् । संवोमदाअग्मंतसंपुरंधिःसुवीरामस्मेरयिमेरयध्वम् २ अयंवोयज्ञऋभवोऽकारियमामनुष्वत्प्रदिवोदविध्वे । प्रवोऽच्छाजुजुषाणासोअस्थुर-

भूतविश्वेअग्रियोतवाजाः ३ अभूदुवोविधतेरत्नधेयमिदानरोदाशुषेमर्त्याय । पिबतवाजाऋभवोददेवोमहितृतीयंसवनंमदाय ४ आवाजायातोपनऋभुक्षाम्-होनरोद्रविणसोगृणानाः । आवःपीतयोऽभिपित्वेअह्नामिमाअस्तंनवस्वइवग्मन् ५॥ ३ ॥ आनंपातःशवसोयातनोपेमंयज्ञंनमसाहूयमानाः । सजोषसः-सूरयोयस्यचस्थमध्वःपातरत्नधाइन्द्रवन्तः ६ सजोषाइन्द्रवरुणेनसोमंसजोषाः पाहिगिर्वणोमरुद्भिः । अग्रेपाभिर्ऋतुपाभिःसजोषाग्नास्पत्नीभिरत्नधाभिःसजोषाः ७ सजोषसआदित्यैर्मादयध्वंसजोषसऋभवःपर्वतेभिः । सजोषसोदैव्यैर्नासत्याभ्यांसजोषसःसिन्धुभिरत्नधेभिः ८ येअश्विनायेपितरायऊतीधेनुंतक्षुर्ऋभवोयेअश्वा । येअंसत्रायऋधग्रोदसीयेविभ्वोनरःस्वपत्यानिचक्रुः ९ येगोमन्तंवाजवन्तंसुवीरंरयिंधत्थवसुमन्तंपुरुक्षुम् । तेअग्रेपाऋभवोमन्दसानाअस्मेधत्त

येचरातिंगृणन्ति १० नापाभूतनवोऽतीतृपामानिःशस्ताऋभवोयज्ञेअस्मिन् ।
समिन्द्रेणमदेथसंमरुद्भिःसंराजभीरत्नधेयायदेवाः ११ ॥ ४ ॥

इहोप नव वामदेव ऋभवस्त्रिष्टुप् ।

३५ इहोपयातशवसोनपातःसौधन्वनाऋभवोमापभूत । अस्मिन्हवःसवनेरत्नधेयंगमन्तिन्द्रमनुवोमदासः १ आगन्नृभूणामिहरत्नधेयमभूत्सोमस्यसुषुतस्यपीतिः । सुकृत्ययायत्स्वपस्ययाचँएकंविचक्रचमसंचतुर्धा २ व्यकृणोत चमसंचतुर्धासखेविशिक्षेत्यब्रवीत। अथैतवाजाअमृतस्यपन्थांगणंदेवानामृभवः सुहस्ताः ३ किंमर्यःस्विच्चमसएषआसयंकाव्यैनचतुरोविचक्र । अथासुनुध्वंसवनंमदायपातऋभवोमधुनःसोम्यस्य ४ शच्याकर्तपितरायुवानाशच्याकर्तचमसंदेवपानम् । शच्याहरीधनुतरावतष्टेन्द्रवाहावृभवोवाजरत्नाः ५ ॥ ५ ॥ यो

वंःसुनोत्यभिपित्वेअह्नांतीव्रंवाजासःसवंनंमदाय । तस्मैंरयिंमृभवःसर्ववीरमा तक्षतवृषणोमन्दसानाः ६ प्रातःसुतमपिवोहर्यश्वमाध्यंदिनंसवंनंकेवलंते । समृभुभिःपिवस्वरत्नधेभिःसखींयाँइन्द्रचकृषेसुकृत्या ७ येदेवासोअभवतासुकृत्याश्येनाइवेदधिदिविनिषेद । तेरत्नंधातशवसोनपातःसौधन्वनाअभवतामृताः ८ यत्तृतीयंसवंनंरत्नधेयमकृणुध्वंस्वपस्यासुहस्ताः । तद्भवःपरिषिक्तंव एतत्संमदेभिरिन्द्रियेभिःपिबध्वम् ९ ॥ ६ ॥

अनश्वो नव वामदेव ऋभवो जगती । अन्त्या त्रिष्टुप् ।

३६ अनश्वोजातोअनभीशुरुक्थ्यो३रथंखिचक्रःपरिवर्ततेरजः । महत्तद्वोदेव्यस्यप्रवाचनंद्यामृभवःपृथिवींयच्चपुष्यथ १ रथंयेचक्रुःसुवृतंसुचेतसोऽविह्वरन्तंमनसस्परिष्यवा । ताँऊन्व१स्यसवनस्यपीतयआवोवाजाऋभवोवेदया- ॥१६८॥

मसि २ तद्वोवाजाऋभवःसुप्रवाचनंदेवेषुविभ्वोअभवन्महित्वनम् । जिव्रीय-
त्सन्तापितरासनाजुरापुनर्युवानाचरथायतक्षथ ३ एकंविचक्रचमसंचतुर्वयं नि-
श्चर्मणोगामरिणीतधीतिभिः । अथादेवेष्वमृतत्वमानशश्रुष्टीवाजाऋभवस्तद्व
उक्थ्यम् ४ ऋभुतोरयिःप्रथमश्रवस्तमोवाजश्रुतासोयमजीजनन्नरः । विभ्व-
तष्टोविदथेषुप्रवाच्योयंदेवासोऽवथासविर्वणिः ५ ॥ ७ ॥ सवाज्यर्वासऋभि-
र्वचस्ययासशूरोअस्तापृतनासुदुष्टरः । सरायस्पोषंससुवीर्यंदधेयंवाजोविभ्वाऋ-
भवोयमाविषुः ६ श्रेष्ठंवःपेशोअधिधायिदर्शतंस्तोमोवाजाऋभवस्तंजुजुष्टन ।
धीरासोहिष्ठाकवयोविपश्चितस्तान्वएनाब्रह्मणावेदयामसि ७ यूयमस्मभ्यंधिष-
णाभ्यस्परिविद्वांसोविश्वानर्याणिभोजना । द्युमन्तंवाजंवृषशुष्ममुत्तममानोर-

यिमृभवस्तक्षतावयः ८ इहप्रजामिहरयिंरराणाइहश्रवोवीरवत्तक्षतानः । येन वयंचितयेमात्यन्यान्तंवाजंचित्रमृभवोददानः १ ॥ ८ ॥

उप नोष्टौ वामदेव ऋभवस्त्रिष्टुप् । अन्त्याश्चतस्रोनुष्टुभः ।

३७ उपनोवाजाअध्वरमृभुक्षादेवायातपथिभिर्देवयानैः । यथायज्ञंमनुषोविक्ष्वा३सुदधिध्वेरण्वाःसुदिनेष्वह्नाम् १ तेवोहृदेमनसेसन्तुयज्ञाजुष्टासोअद्य घृतनिर्णिजोगुः । प्रवःसुतासोहरयन्तपूर्णाः ऋत्वेदक्षायहर्षयन्तपीताः २ ऋभुदा-यदेवहितंयथावःस्तोमोवाजाऋभुक्षणोददेवः॥ जुह्वेमनुष्वदुपरासुविक्षुयुष्मेसचा वृहदिवेषुसोमम् ३ पीवोअश्वाःशुचद्रथाहिभूतायंःशिप्रावाजिनःसुनिष्काः । इन्द्रस्यसूनोशवसोनपातोऽनुवश्वेत्याग्रियंमदाय ४ ऋभुमृभुक्षणोरयिंवाजेवाजि-न्तमंयुजम् । इन्द्रंखन्तंहवामहेसदासातममश्विनम् ५॥१॥ सेहृभवोयमवंथयूय-

मिन्द्रंश्रवस्यवम् । सधीभिरस्तुसनितामेधसातासोअवंता ६ विनोवाजाऋभुक्षणःपथश्चितनयष्टवे । अस्मभ्यंसूरयःस्तुताविश्वाआशास्तरीषणि ७ तंनोवाजा ऋभुक्षणइन्द्रनासत्यारयिम् । समश्वंचर्षणिभ्यआपुरुशंस्तमघत्तये ८ ॥ ३० ॥

उतो हि दश वामदेवो दधिक्रास्त्रिष्टुप् । आद्याया द्यावापृथिव्यौ ।

३८ उतोहियंदात्रासन्तिपूर्वायापुरुभ्यस्त्रसदस्युर्नितोशे । क्षेत्रासांददथुरुर्वरासांघनंदस्युभ्योअभिभूतिमुग्रम् १ उतंवाजिनंपुरुनिष्षिध्वानंदधिक्रामुददथुर्विश्वकृष्टिम् । ऋजिप्यंश्येनंप्रुषितप्सुमाशुंचर्कृत्यमर्योनृपतिंनशूरम् २ यंसीमनुप्रवतेवद्रवन्तंविश्वःपूरुर्मदंतिहर्षमाणः । पड्भिर्गृध्यन्तंमेधयुंनशूरंरथतुरंवातमिवध्रजन्तम् ३ यःस्मारुन्धानोगध्यासुमत्सुसनुतरश्चरतिगोषुगच्छन् । आविर्ऋजीकोविदथानिचिकयत्तिरोअरतिंपर्यापआयोः ४ उतस्मैनंवस्त्रमथिंनतायु-

मनुक्रोशन्तिक्षितयोभरेषु । नीचायमानंजसुरिंनशेयेनंश्रवश्चाच्छापशुमच्चयू-
पम् ५ ॥ ११ ॥ उतस्मासुप्रथमःसरिष्यन्निर्वेवेतिश्रेणिभिरियानाम् । स्रजंकृ-
ण्वानोजन्योनशुभ्वारेणुंरेरिहत्क्रिरणंददश्वान् ६ उतस्यवाजीसहुरिर्ऋतावाशु-
श्चूपमाणस्तन्वासमर्ये । तुरंयतीपुतुरयन्नृजिप्योऽधिभ्रुवोःकिरतेरेणुमुज्जन् ७ उत
स्मास्यतन्यतोरित्योर्ऊँघायतोअभियुजोभयन्ते । यदासहस्रमभिपीमयोधी-
र्वर्तुःस्माभवतिभीमरुजन् ८ उतस्मास्यपनयन्तिजनाजूतिंकृष्टिप्रोअभिभू-
तिमाशोः । उतैनमाहुःसमिथेवियन्तःपरावधिक्राअंसरत्सहस्रैः ९ आदधिक्राः
शवसापञ्चकृष्टीःसूर्यइवज्योतिषापस्ततान । सहस्रसाःशतसावाज्यवांपृणक्तु-
मघ्नासमिमावज्वांसि १० ॥ १२ ॥

आशुं पङ्क्तामदेवो दधिक्राखिष्टुप् । अन्त्यानुष्टुप् ।

३१. आशुंदधिक्रांतमुनुष्टवामदिवस्पृथिव्याउतचर्किराम । उच्छन्तीर्मामुषसःसूदयन्त्वातिविश्वानिदुरितानिपर्षन् १ महश्चर्कर्म्यर्वतःक्रतुप्रादधिक्राव्णःपुरुवारस्यवृष्णः । यंपूरुभ्योदीदिवांसंनाग्निंददथुर्मित्रावरुणातनूरिम् २ योअश्वस्य दधिक्राव्णोअकारीत्समिद्धेअग्नाउषसोव्युष्टौ । अनागसंतमदितिःकृणोतुसमित्रेणवरुणेनासजोषाः ३ दधिक्राव्णइषऊर्जोमहोयदमन्माहिमरुतांनामभद्रम् । स्वस्तयेवरुणंमित्रमग्निहवामहइन्द्रंवज्रबाहुम् ४ इन्द्रमिवेदुभयेविह्वयन्तउदीराणायज्ञमुपप्रयन्तः । दधिक्रामुसूदनंमत्यायददथुर्मित्रावरुणानोअश्वम् ५ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः । सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ६ ॥ १३ ॥

दधिक्राव्णः पञ्च वामदेवो दधिक्रा जगती । अन्त्यायाः सूर्यः । आद्या त्रिष्टुप् ।

४० दधिक्राव्णइदुनुचाकिरामविश्वाइन्मामुषसःसूदयन्तु । अपामग्नेरुषसः सूर्यस्यबृहस्पतेराङ्गिरसस्यजिष्णोः १ सत्वाभरिषोगाविषोदुवन्यसच्छ्वस्यादिव उषसस्तुरण्यसत् । सत्योद्रवोद्वरःपतङ्गरोदधिक्रावेषमूर्जंस्वर्जनत् २ उतस्मास्यद्रवतस्तुरण्यतःपर्णंनवेरनुवातिप्रगर्धिनः । श्येनस्येवध्रजतोअङ्कसंपरिदधिक्राव्णः सहोर्जातरित्रतः ३ उतस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांबद्धोअपिकक्षआसनि । क्रतुंदधिक्राअनुसंतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ४ हंसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतम् ५ ॥ १४ ॥

इन्द्रा को वामेकादश वामदेव इन्द्रावरुणौ त्रिष्टुप् ।

४१ इन्द्राकोवांवरुणासुम्नमांपस्तोमोंहविष्माँअमृतोनहोता। योवांहृदिक्रतुमाँ
अस्मदुक्तःपस्पशँदिन्द्रावरुणानमंस्वान् १ इन्द्राहयोवरुणाचक्रआपीदेवौमतैः
सख्यायप्रयंस्वान्। सहंन्तिवृत्रासंमिथेषुशत्रूनवोभिर्वांमहद्भिःसप्रगृण्वे २ इन्द्रा
हरत्नंवरुणाधेष्ठेत्थानृभ्यःशशमानेभ्यस्ता। यदीसखायासख्यायसोमैःसुतेभिः
सुप्रयसांमादयैते ३ इन्द्रांयुवंवरुणादिद्युमंस्मिन्नोजिष्ठमुग्रानिवंधिष्टंवज्रम्। यो
नोदुरेवोवृकतिंर्दभीतिस्तस्मिन्निमाथामभिभूत्योजः४इन्द्रांयुवंवरुणाभूतमस्या
धियःप्रेतारावृषभेवधेनोः। सानोदुहीयद्यवसेवगत्वीसहस्रधारापयसामहीगौः ५
॥ १५ ॥ तोकेहितेतनयउर्वरासुसूरोदृशीकेवृषणश्वपौंस्ये । इन्द्रांनोअत्रवरुणा
स्यातामवोभिर्दस्मापरितक्म्यायाम् ६ युवामिद्यवसेपूर्व्यायपरिप्रभूतीगविषंः

स्वांपो। वृणीमहेसख्यायप्रियायशूरामंहिष्ठापितरेवशंभू७ तावांधियोऽवसेवाज-
यन्तीराजिंनजग्मुर्युवयूःसुदानू । श्रियेनगावुपसोमेमस्थुरिन्द्रंगिरोवरुणंमेम-
नीषाः ८ इमाइन्द्रंवरुणंमेमनीषाअग्मन्नुपद्रविणमिच्छमानाः । उपेमस्थुर्जो-
ष्टारंइववस्वोरघ्वीरिवश्रवसोभिक्षमाणाः ९ अश्व्यस्यत्मनारथ्यस्यपुष्टेर्नित्यस्य
रायःपतयःस्याम । ताचक्राणाऊतिभिर्नव्यसीभिरस्मत्रारायोनियुतःसचन्ता-
म् १० आनोवृहन्तावृहतीभिरूतीइन्द्रयातंवरुणवाजसातौ । यद्विद्यवःपृतनासु
प्रक्रीळान्तस्यवांस्यामसनितारंआजेः ११ ॥ १६ ॥

मम द्विता दश वसदस्युः पौरुकुत्स्यस्त्रिष्टुप् । अन्त्यानां चतसृणामिन्द्रा-
वरुणौ । शिष्टानामात्मा ।

१२ ममद्वितारा१क्षत्रियस्यविश्वायोर्विश्वेअमृतायथानः । क्रतुंसचन्तेवरु- ॥१७॥

णस्यदेवाराजामिकृष्टेरुपमस्यवव्रेः १ अहंराजावरुणोमह्यंतान्यसुर्याणिप्रथमा धारयन्त । ऋतुंसचन्तेवरुणस्यदेवाराजामिकृष्टेरुपमस्यवव्रेः २ अहमिन्द्रोवरुणस्तेमहित्वोर्वीगंभीरेरजसीसुमेके । त्वष्टेवविश्वाभुवनानिविद्वान्त्समैरयंरोदसी धारयंच ३ अहमपोअपिन्वमुक्षमाणाधारयंदिवंसदंनऋतस्य । ऋतेनपुत्रोअदितेर्ऋतावोतत्रिधातुप्रथयद्विभूमं ४ मानरःस्वश्वावाजयन्तोमावृताःसमरणेहवन्ते। कृणोम्याजिंमघवाहमिन्द्रइयंमिरेणुमभिभूत्योजाः ५ ॥ १७ ॥ अहंताविश्वा चकरंनकिर्मादैव्यंसहोवरतेअप्रतीतम् । यन्मासोमासोमुमदन्यदुक्थोभेभयेते रजसीअपारे ६ विदुष्टेविश्वाभुवनानितस्युताप्रवीषिवरुणायवेधः।त्वंवृत्राणि-शृण्विषेजघन्वान्त्वंवृताँअरिणाइन्द्रसिन्धून् ७ अस्माकमत्रपितरस्तआसन्त्सप्त ऋषयोदौर्गहेवध्यमाने । तआयजन्तत्रसदस्युमस्याइंद्रंनवृत्रतुरमर्धदेवम् ८

पुरुकुत्सानीहिवामदाशद्ध्व्येभिरिन्द्रावरुणानमोभिः । अथाराजानंत्रसदस्यु-
मर्स्यानृत्रहणंददथुर्देवम् १ रायावयंसस्वांसोमदेमहव्येनदेवायवंसेनुगावः ।
तांधेनुमिन्द्रावरुणायुवंनोविश्वाहाधत्तमनपस्फुरन्तीम् १० ॥ १८ ॥

क उ श्रवत्सप्त पुरुमीळ्हाजमीळ्हौ सौहोत्रावश्विनौ त्रिष्टुप् ।

४३ कउंश्रवत्कतमोयज्ञियानांवन्दारुदेवःकतमोजुषाते । कस्येमांदेवीमृत-
तेपुप्रेष्ठांहृदिश्रेषामसुष्टुतिंसुहव्याम् १ कोमृळातिकतमआगमिष्ठोदेवानांमुक-
तमःशंभविष्ठः । रथंकमाहुर्द्रवदश्वमाशुंयंसूर्यस्यदुहितावृणीत २ मक्षूहिष्माग-
च्छेथुईवंतोद्यूनिन्द्रोनशक्तिंपरितक्म्यायाम् । दिवआजातादिव्यासुपर्णाकयाश-
चीनांभवथुःशचिष्ठा ३ कावांभूदुपमातिःकयानुआश्विनागमथोहूयमाना ।
कोवांमहश्चित्त्यजसोअभीकेउरुष्यतंमाध्वीदस्रानऊती ४ उरुवांरथःपरिनक्षति ॥१.७३॥

यामायत्समुद्रादभिवर्ततेवाम् । मध्वामाध्वीमधुवाभ्रुपायन्यत्सींवांपृक्षोभुरजन्त पक्काः ५ सिन्धुर्हवांरसयासिश्चदश्वान्घृणावयोऽरुषासःपरिग्मन् । तदूषुवांमजिरंचेतियानंयेनपतीभवथःसूर्यायाः ६ इहेहयद्वांसमनापपृक्षेसेयमस्मेसुमतिर्वाजरत्ना । उरुष्यतंजरितारंयुवंहाश्रितःकामोनासत्यायुवाद्रिक् ७ ॥ १९ ॥

तं वा सप्त पुरुमीळ्हाजमीळ्हौ सौहोत्रावश्विनौ त्रिष्टुप् ।

४४ तंवांरथंवयमद्याहुवेमपृथुज्रयंमश्विनासंगतिंगोः । यःसूर्यांवहतिवन्धुरायुगिर्वाहसंपुरुतमंवसूयुम् १ युवंश्रियंमश्विनादेवतातांदिवोनपातावनथःशचीभिः । युवोर्वपुरभिपृक्षःसचन्तेवहन्तियत्ककुहासोरथेवाम् २ कोवांमद्याकरतेरातहव्यऊतयेवासुतपेयायवार्कैः । ऋतस्यंवावनुयेपूर्व्यायनमोयेमानोअश्विनावर्वतत् ३ हिरण्ययेनपुरुभूरथेनेमंयज्ञंनासत्योपयातम् । पिबाथइन्मधुनःसोम्य-

स्यदधथोरत्नंविधतेजनाय ४ आनोयातंदिवोअच्छापृथिव्याहिरण्ययेनसुवृतार-
थेन । मावांमन्येनियमन्देवयन्तःसंयद्वदेनाभिःपूर्व्यावाम् ५ नूनोरयिंपुरुवीरं-
बृहन्तंदस्रामिमाथामुभयेष्वस्मे । नरोयद्वांमाश्विनास्तोममावन्त्सधस्तुतिमाज-
मीळ्हासोअग्मन् ६ इहेहयद्वांसमनापपृक्षेसेयमस्मेसुमतिर्वाजरत्ना । उरुष्यतं
जरितारंयुवंहाश्रितःकामोनासत्यायुवद्रिक् ७ ॥ २० ॥

एष स्य सप्त वामदेवोऽश्विनौ जगती । अन्त्या त्रिष्टुप् ।

४५ एषस्यभानुरुदियर्तियुज्यतेरथःपरिज्मादिवोअस्यसानवि । पृक्षासो
अस्मिन्मिथुनाअधिक्षयोद्वर्तिस्तुरीयोमधुनोविरप्शते १ उद्वांपृक्षासोमधुमन्तई-
रतेरथाअश्वासउपसोव्युष्टिषु । अपोर्णुवन्तस्तमआपरीवृतंस्व१र्णशुक्रंतन्वन्तआ
रजःरमध्वःपिबतंमधुपेभिरासभिरुतप्रियंमधुनेयुञ्जाथांरथम् । आवर्तुनिंमधुना

जिन्वथस्तपोदृतिंवहेथेमधुमन्तमश्विना ३ हंसासोयेवांमधुमन्तोअस्रिधोहिरण्य-
पर्णाउहुवउषर्बुधः । उदप्रुतोमन्दिनोमन्दिनिस्पृशोमध्वोनमक्षःसवनानिगच्छ-
थः ४ स्रुघ्रासोमधुमन्तोअग्नयउस्राजरन्तेप्रतिवस्तोरश्विना । यन्निक्तहस्तस्तर-
णिर्विचक्षणःसोमंसुषावमधुमन्तमद्रिभिः ५आकेनिषासोअहंभिर्दविध्वतःस्व१-
र्णशुक्रंतन्वन्तआरजः।सूरश्चिदश्वान्युयुजानईयतेविश्वाँअनुस्वधयाचेतथस्पथः ६
प्रयांमनोचमश्विनाधियंघारथःस्वश्वोअजरोयोअस्ति । येनसद्यःपरिरजांसियाथो
हविष्मन्तंतरणिंभोजमच्छे७॥२१॥इति शा०सं० चतुर्थे मण्डले चतुर्थोऽनुवाकः ४

अग्निं नरो वामदेव इन्द्रवायू गायत्री । आद्यापा वायुः ।

१६ अग्नेपिबामधूनांसुतंनायोविविष्टिषु । त्वंहिपूर्वपाअसि १ शतेनानोअ-
भिष्टिभिर्नियुत्वाँइन्द्रसारथिः । वायोंसुतस्यतृम्पतम् २ आवांसहस्रंहरयइन्द्र-

वायूअभिप्रयः । वहन्तुसोमपीतये ३ रथींहिरण्यवन्धुरमिन्द्रवायूस्वध्वरम् । आहिस्थाथोदिविस्पृशम् ४ रथेनपृथुपाजसादाश्वांसमुपगच्छतम् । इन्द्रवायू इहागतम् ५ इन्द्रवायूअयंसुतस्तंदेवेभिःसजोषसा । पिबतंदाशुषोगृहे ६ इहप्रयाणमस्तुवामिन्द्रवायूविमोचनम् । इहवांसोमपीतये ७ ॥ २२ ॥

वायो चतुष्कं वामदेव इन्द्रवायू अनुष्टुप् । आद्यायाः वायुः ।

१७ वायोशुक्रोअयामितेमध्वोअग्रंदिविष्टिषु । आयाहिसोमपीतयेस्पार्हो देवनियुत्वता १ इन्द्रश्चवायवेषांसोमानांपीतिमर्हथः । युवांहियन्तीन्दवोनिम्नमापोनसःसमुद्रियम् २ वायविन्द्रश्चशुष्मिणांसरथंशवसस्पती । नियुत्वन्तानऊतय आयातंसोमपीतये ३ यावांसन्तिपुरुस्पृहोनियुतोदाशुषेनरा । अस्मेतायज्ञवाहसेन्द्रवायूनियच्छतम् ४ ॥ २३ ॥

विहि पञ्च वामदेवो वायुरनुष्टुप् ।

४८ विहिहोत्राअवीतावि॒पोन॒रायोअ॒र्यः । वायु॒वाच॒न्द्रेण॒रथे॑न॒याहि॑सु॒तस्य॑पी॒तये॑ १ नि॒र्यु॒वा॒णोअ॑शस्ती॒र्नि॒युत्वाँ॒इन्द्र॑सारथिः । वायु॒वाच॒न्द्रेण॒रथे॑न॒याहि॑सु॒तस्य॑पी॒तये॑ २ अनु॑कृ॒ष्णेव॑सु॒धिती॒येमा॑ते॒विश्व॑पेशसा । वायु॒वाच॒न्द्रेण॒रथे॑न॒याहि॑ सु॒तस्य॑पी॒तये॑ ३ वह॑न्तु॒त्वाम॑नो॒युजो॒यु॒क्तासो॑न॒व॒तिर्न॑व । वायु॒वाच॒न्द्रेण॒रथे॑न॒याहि॑ सु॒तस्य॑पी॒तये॑ ४ वायो॑श॒तंह॒री॒णां॒यु॒व॒स्व॒पो॒ष्या॑णाम् । उ॒तवा॑ते॒सह॑स्रिणो॒रथ॒आ या॑तु॒पाज॑सा ५ ॥ २४ ॥

इदं वां पङ्क्तिर्वामदेव इन्द्रावृहस्पती गायत्री ।

४९ इ॒दंवां॒मा॒स्ये॑ह॒विः॒प्रि॒यमि॑न्द्रावृहस्पती॒उ॒क्थंम॑दश्च॒शस्य॑ते १ अ॒यंवां॒परि॑षि॒च्य॒ते॒सोम॑इन्द्रावृहस्पती । चारु॒र्मदा॑यपी॒तये॑ २ आ॒न॒इन्द्रा॑वृहस्पती॒गृ॒ह॒मि॒न्द्रं॑श्च॒ग॒च्छ॒त॒म् । सो॒म॒पा॒सो॒म॑पी॒तये॑ ३ अ॒स्मे॒इन्द्रा॑वृहस्पती॒र॒यिं॑ध॒त्त॒ंश॒त॒ग्विन॑म् ।

अश्वावन्तंसहस्त्रिणम् ४ इन्द्रावृहस्पतीवयंसुतेगीर्भिर्हवामहे । अस्यसोमस्य पीतये ५ सोममिन्द्रावृहस्पतीपिबतंदाशुषोगृहे । मादयेथांतदोकसा ६॥२५॥

यस्तस्तम्भैकादश वामदेवो बृहस्पतिस्त्रिष्टुप् । अन्त्ययोरिन्द्रावृहस्पती । उपान्त्या जगती ।

५० यस्तस्तम्भसहसाविज्मोअन्तान्बृहस्पतिस्त्रिषधस्थोरवेण । तंप्रत्नासऋ-यवोदीध्यानाःपुरोविप्रादधिरेमन्द्रजिह्वम् १ धुनेतयःसुप्रकेतंमदन्तोबृहस्पतेअभि येनंस्ततस्रे । पृषन्तंसृप्रमदब्धमूर्वंबृहस्पतेरक्षतादस्ययोनिम् २ बृहस्पतेयापरमा परावदतआतंऋतस्पृशोनिषेदुः । तुभ्यंखाताअवताअद्रिदुग्धामध्वःश्चोतन्त्यभि-तोविरप्शम् ३ बृहस्पतिःप्रथमंजायमानोमहोज्योतिषःपरमेव्योमन् । सप्ता-स्यस्तुविजातोरवेणविसप्तरश्मिरधमत्तमांसि ४ ससप्तुभासऋक्वतागणेनवलं रुरोजफलिगंरवेण । बृहस्पतिरुस्त्रियाहव्यसूदःकनिक्रदद्वावशतीरुदाजत् ५

॥ २६ ॥ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः । बृहस्पतेसुप्रजा वीरवन्तोवयंस्यामपतयोरयीणाम् ६ सइद्राजाप्रतिजन्यानिविश्वाशुष्मेणतस्थावभिवीर्येण । बृहस्पतिंयःसुभृतंबिभर्तिवल्गूयतिवन्दतेपूर्वभाजम् ७ सइत्क्षैतिसुधितओकसिस्वेतस्माइळापिन्वतेविश्वदानीम् । तस्मैविशःस्वयमेवानमन्तेयस्मिन्ब्रह्माराजनिपूर्वएति ८ अप्रतीतोजयतिसंधनानिप्रतिजन्यान्युतया सजन्या । अवस्यवेयोवरिवःकृणोतिब्रह्मणेराजातमवन्तिदेवाः ९ इन्द्रश्चसोमं पिबतंबृहस्पतेऽस्मिन्यज्ञेमन्दसानावूपण्वसू । आवांविशन्त्विन्दवःस्वाभुवोऽस्मे रयिंसर्ववीरंनियच्छतम् १० बृहस्पतइन्द्रवर्धतंनःसचासावांसुमतिर्भूत्वस्मे । अविष्टंधियोजिगृतंपुरंधीर्जजस्तमर्योवनुषामरातीः ११ ॥ २७ ॥ इति शाकलसंहितायां तृतीयाष्टके सप्तमोऽध्यायः ॥ ७ ॥

इदमुपस्यंतुमतिष्यासप्तगायत्रंतदेवस्यसावित्रंतुजागतमभूद्देवःपदृत्रिष्टुवन्तंकोवोदशवैश्वदेवंत्रिगाय-
त्र्यन्तंतुमहीसप्तद्यावापृथिवीयंक्षेत्रस्याष्टौतिस्रःक्षैत्रपत्याःशुनायैकापरापुरउष्णिकसान्त्याचशुनासीरा-
भ्यामुपान्त्येसीतायैतेचानुष्टुभावाद्याचतुर्थीचसमुद्रादेकादशाग्नेयंजगत्यन्तंसौर्यंवापंवागव्यंवाघृतस्तु-
तिर्वानमोत्रिभ्योभौमोत्रिःपञ्चमेमण्डलेनुक्तगोत्रमात्रेयंविधापङ्क्त्यन्तस्यचसूक्तस्यशेषमानुष्टुभमवोधिद्वा-
दशबुधगविष्ठिरौकुमारंकुमारोवृशोवाजानउभौवाशक्र्यन्तंकंवीत्यृचोस्तुवृशएवत्वमग्ने वसुश्रुतआत्रेय-
राट्बृहतीयामारुतरौद्रावैष्णवीत्वामग्नएकादशसुसमिद्धायामंगायन्नमग्निंतंदशपाङ्क्तंसखायइषःपङ्क्त्यन्त-
त्वामग्नेसप्तजागतम्।

इदमेकादश वामदेव उपास्त्रिष्टुप्।

५१ ओम् इदमुत्यत्पुरुतमंपुरस्ताज्ज्योतिस्तमसोवयुनावदस्थात्। ननंदिवो दुहितरोविभातीर्गातुंकृणवन्नुषसोजनाय १ अस्थुरुचित्राउषसःपुरस्तान्मिताइव स्वरवोऽध्वरेषु। व्यूर्वजस्यतमसोद्वारोच्छन्तीरवन्छुचयःपावकाः २ उच्छन्तीं- ॥१७७॥

रद्यचितयन्तभोजात्रांधोदेयांयोपसोमघोनीः । अचित्रेअन्तःपणयःससन्त्वबु-
ध्यमानास्तमसोविमध्ये ३ कुवित्सदेवीःसनयोनवोवायामोवभूयादुषसोवो
अद्य । येनानवग्वेअङ्गिरोदशग्वेससास्यैरेवतीरेवदूष ४ यूयंहिदेवीर्ऋतयुग्भिरश्वैः
परिप्रयाथभुवनानिसद्यः । प्रबोधयन्तीरुषसःससन्तंद्विपाच्चतुष्पाच्छुरथायजी-
वम् ५ ॥ १ ॥ कंस्विदासांकतमापुराणीययाविधानाविदधुर्ऋभूणाम् । शुभं
यच्छुभ्राउषसश्चरन्तिनविज्ञायन्तेसदृशीरजुर्याः ६ ताघाताभद्राउषसःपुरासुर-
भिष्टियुन्नाऋतजातसत्याः । यास्वींजानःशंशमानउक्थैःस्तुवञ्छंसन्द्रविणंसद्य
आर्षे ७ ताआचरन्तिसमनापुरस्तात्समानतःसमनापप्रथानाः । ऋतस्यदेवीः
सदसोबुधानागवांनसर्गाउषसोजरन्ते ८ ताइन्वे ३ वसमनासमानीरमीतवर्णा
उषसश्चरन्ति । गूहन्तीरन्धमसिंतरुशद्भिःशुक्रास्तनूभिःशुचयोरुचानाः ९ रयिं

दिवोदुहितरोविभातीःप्रजावन्तंयच्छतास्मासुदेवीःस्योनादावःप्रतिबुध्यमानाः सुवीर्यस्यपतयःस्याम १० तद्वोदिवोदुहितरोविभातीरुपब्रुवउपसोयज्ञकेतुः । वयंस्यामयशसोजनेषुतद्द्यौश्चधत्तांपृथिवीचदेवी ११ ॥ २ ॥

प्रति प्या सप्त वामदेव उषा गायत्री ।

५२ प्रतिष्यासूनरीजनीव्युच्छन्तीपरिस्वसुः । दिवोअदर्शिदुहिता १ अश्वै-वचित्रारुषीमातागवामृतावरी । सखाभूदश्विनोरुषाः २ उतसखास्यश्विनोरुत मातागवामसि । उतोषोवस्वईशिषे ३ यावयद्द्वेषसंत्वाचिकित्वित्सूनृतावरि । प्रतिस्तोमैरभुत्स्महि ४ प्रतिभद्राअदृक्षतगवांसर्गानरश्मयः । ओषाअप्राउरु ज्रयः ५ आपप्रुषीविभावरिन्यावुज्र्योतिषातमः । उषोअनुस्वधामव ६ आवहं तनोषिरुडिमभिरान्तरिक्षमुरुप्रियम् । उषःशुक्रेणशोचिषा ७ ॥ ३ ॥

तदेवस्य सप्त वामदेवः सविता गायत्री ।

५३ तदेवस्यसवितुर्वार्यंमहद्वृणीमहेअसुरस्यप्रचेतसः । छर्दिर्येनदाशुषेय-च्छतित्मनातन्नोमहाँउदयान्देवोअक्तुभिः १ दिवोधर्ताभुवनस्यप्रजापतिःपिशङ्गं द्रापिंप्रतिमुञ्चतेकविः। विचक्षणःप्रथयन्नापृणद्भुर्वजीजनत्सवितासुम्नमुक्थ्यम् २ आप्रारजांसिदिव्यानिपार्थिवाश्लोकंदेवःकृणुतेस्वायधर्मणे । प्रवाहूअस्त्राक्स-वितासवीमनिनिवेशयन्प्रसुवन्नक्तुभिर्जगत् ३ अदाभ्योभुवनानिप्रचाकशद्व्रता-निदेवःसविताभिरक्षते । प्रास्त्रांग्वाहूभुवनस्यप्रजाभ्योधृतव्रतोमहोअज्मस्य राजति ४ त्रिरन्तरिक्षंसवितामहित्वनात्रीरजांसिपरिभूस्त्रीणिरोचना । तिस्रो दिवःपृथिवीस्तिस्रइन्वतित्रिभिर्व्रतैरभिनोरक्षतित्मना ५ बृहत्सुम्नःप्रसवी-तानिवेशनोजगतःस्थातुरुभयस्ययोवशी । सनोदेवःसविताशर्मयच्छत्वस्मेक्ष-

यांयत्रिवरूथमंहसः ६ आगंन्देवक्रतुभिर्वर्धतुक्षयंदधांतुनःसवितासुप्रजामिषम् ।
सनंःक्षपाभिरहंभिश्चजिन्वतुप्रजावंन्तंरयिमस्मेसमिंन्वतु ७ ॥ ४ ॥

अभूदेवः पङ्क्तिदेवः सविता जगती । अन्त्या त्रिष्टुप् ।

५४ अभूंद्देवःसंवितावन्द्योनुनंइदानींमह्नंउपवाच्योनृभिंः । वियोरत्नाभजंतिमानुषेभ्यःश्रेष्ठंनोअत्रद्रविंणंयथादधंत् १ देवेभ्योहिप्रथमंयज्ञियेभ्योऽमृतत्वंसुवसिभागमुत्तमम् । आदिद्दामानंसवितर्व्यूर्णुपेऽनूचीनाजीवितामानुषेभ्यः २ अचित्तीयच्चकृमादैव्येजनेदीनैर्दक्षैःप्रभूतीपूरुवत्वता । देवेषुचसवितर्मानुषेषुचत्वंनोअत्रसुवतादनागसः ३ नप्रमियेसवितुर्दैव्यस्यतत्यथाविश्वंभुवनंधारायिष्यति । यत्पृथिव्यावरिमन्नाक्षुरिवप्मन्दिवःसुवतिसत्यमस्यतत् ४ इन्द्रंज्येष्ठान्मरुद्भ्यःपर्वतेभ्यःक्षयाँएभ्यःसुवसिपस्त्यावतः । यथायथापतयन्तोवियेमिरएवा ॥१७९॥

वैवर्तस्थुःसवितःसवायते ५ येतेत्रिरहन्त्सवितःसवासोदिवेदिवेसौभगमासुवन्ति । इन्द्रोद्यावापृथिवीसिन्धुरद्रिरादित्यैर्नोअदितिःशर्मयंसत् ६ ॥ ५ ॥

को वो दश वामदेवो विश्वे देवास्त्रिष्टुप् । अन्त्यास्तिस्रो गायत्र्यः ।

५५ कोवस्त्रातावसवःकोवरूताद्यावाभूमीअदितेत्रासथानः । सहीयसोवरुणमित्रमर्तात्कोवोऽध्वरेवरिवोधातिदेवाः १ प्रयेधामानिपूर्व्याण्यर्च्यान्वियदुच्छान्विंयोतारोअमूराः । विधातारोवितेदधुरजस्राऋतधीतयोरुरुचन्तदस्माः २ प्रपस्त्याउमदितिंसिन्धुमर्कैःस्वस्तिमींळेसख्यायदेवीम् । उभेयथानोअहनीनिपातउषासानक्तांकरतामदब्धे ३ व्यर्यमावरुणश्चेतिपन्थांमित्रस्पतिःसुवितंगातुमग्निः । इन्द्राविष्णूवदुपुस्तवानाशर्मनोयंतममवद्वरूथम् ४ आपर्वतस्यमरुतामवांसिदेवस्यत्रातुरवृभगस्य । पात्पतिर्जन्यादंहसोनोमित्रोमित्रियादुतनः

उरुष्येत् ५ ॥ ६ ॥ नूरोदसीअहिनावुद्न्येनस्तुवीतदेवीअप्योभिरिष्टैः । समुद्रेन संचरणेसनिष्यवोयमस्वरसोनद्योऽअपव्रन् ६ देवैनोदेव्यदितिर्निपातुदेवस्त्राता त्रायतामप्रयुच्छन् । नहिमित्रस्यवरुणस्यधासिमहीमसिप्रमियंसान्वग्नेः ७ अग्रिरीशेवसव्यस्याग्निर्महःसौभगस्य । तान्यस्मभ्यंरासते ८ उषोमघोन्यावहसूनृतेवाय्यापुरु । अस्मभ्यंवाजिनीवति १ तत्सुनःसविताभगोवरुणोमित्रोअर्यमा । इन्द्रोनोराधसागमत् १० ॥ ७ ॥

महीं सप्त वामदेवो द्यावापृथिव्यौ त्रिष्टुप् । अन्त्यास्तिस्रो गायत्र्यः ।

५६ महीद्यावापृथिवीइहज्येष्ठेरुचाभवतांशुचयद्भिरर्कैः । यत्सीवरिष्ठेबृहती विमिन्वन्नुवक्षोक्षाणप्रथानेभिरेवैः १ देवीदेवेभिर्यजतेयजत्रैरमिनतीतस्थतुरुक्षमाणे । ऋतावरीअद्रुहादेवपुत्रेयज्ञस्यनेत्रीशुचयद्भिरर्कैः २ सइत्स्वपाभुवनेष्वा- ॥१८०॥

सयङ्मेद्यावापृथिवीजजान । उर्वीगभीरेरजसीसुमेकेअवंशेधीरःशच्यासमै-
रत् ३ नूरोदसीवृहद्भिर्नोवरूथैःपत्नीवद्भिरिषयन्तीसजोषाः । उरूचीविश्वेयजते
निपातंधियास्यामरध्यःसदासाः ४ प्रवांमहित्यवीअभ्युपस्तुतिंभरामहे । शुची
उपप्रशस्तये ५ पुनानेतन्वांमिथःस्वेनदक्षेणराजथः । ऊह्याथेसनाहृतम् ६
मही मित्रस्यसाधथस्तरन्तीपिप्रतीऋतम् । परियज्ञंनिषेदथुः ७ ॥ ८ ॥

क्षेत्रस्यापौ वामदेवः । आद्यानां तिसृणां क्षेत्रपतिः । चतुर्थ्याः शुनः । पञ्चम्यष्टम्ययोः
शुनासीरौ । नवान्त्ययोः सीता । द्वितीयातृतीयाष्टम्यस्त्रिष्टुभः । पञ्चमी पुरउष्णिक् ।
शिष्टा अनुष्टुभः ।

५७ क्षेत्रस्यपतिनावयंहितेनेवजयामसि । गामश्वंपोषयित्न्वासनोमृळातीदृ-

दृशे १ क्षेत्रस्यपतेमधुमन्तमूर्मिंधेनुरिवपयोअस्मासुधुक्ष्व । मधुश्चुतंघृतमिव सुपूतमृतस्यनःपतयोमृळयन्तु २ मधुमतीरोषधीर्द्यावआपोमधुमन्नोभवत्वन्तरिक्षम् । क्षेत्रस्यपतिर्मधुमान्नोअस्त्वरिष्यन्तोअन्वेनंचरेम ३ शुनंवाहाःशुनंनरः शुनंकृषतुलाङ्गलम् । शुनंवरत्रावध्यन्तांशुनमष्ट्रामुदिङ्गय ४ शुनासीराविमां वाचंजुषेथांयद्दिविचक्रथुःपयः । तेनेमामुपसिञ्चतम् ५ अर्वाचीसुभगेभवसीतेवन्दामहेत्वा । यथानःसुभगाससियथानःसुफलाससि ६ इन्द्रःसीतांनिगृह्णातुतांपूषानुयच्छतु । सानःपयस्वतीदुहामुत्तरामुत्तरांसमाम् ७ शुनंनःफालाविकृषन्तुभूमिंशुनंकीनाशाअभियन्तुवाहैः । शुनंपर्जन्योमधुनापयोभिःशुनासीराशुनमस्मासुधत्तम् ८ ॥ १ ॥

॥१८२॥

समुद्रादेकादश वामदेवोऽग्निः सूर्यो वापो वा गावो वा घृतं वा त्रिष्टुप् ।
अन्त्या जगती ।

५८ समुद्रादूर्मिर्मधुमाँउदारदुपांशुनासममृतत्वमानट् । घृतस्यनाम गुह्यं यदस्तिजिह्वादेवानाममृतस्यनाभिः १ वयंनाम प्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः । उपब्रह्माशृणवच्छस्यमानंचतुःशृङ्गोऽवमीद्गौरएतत् २ चत्वारिशृङ्गात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेश ३ त्रिधाहितंपणिभिर्गुह्यमानंगविदेवासोघृतमन्वविन्दन् । इन्द्र एकंसूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः ४ एताअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे । घृतस्यधाराअभिचाकशीमिहिरण्ययोवेतसोमध्यआसाम् ५ ॥ १० ॥ सम्यक्स्रवन्तिसरितोनधेनाअन्तर्हृदामनसापूयमानाः ।

एतेअर्षन्त्यूर्मयोघृतस्यमृगाईवक्षिपणोरीषमाणाः ६ सिन्धोरिवप्राध्वनेशूघनासोवातप्रमियःपतयन्तियह्वाः । घृतस्यधारा अरुषोनवाजीकाष्ठाभिन्दन्नूर्मिभिः पिन्वमानः ७ अभिप्रवन्तसमनेवयोषाःकल्याण्यः स्मयमानासोअग्निम् । घृतस्यधाराःसमिधोनसन्ततोजुषाणोहर्यतिजातवेदाः ८ कन्याइववहतुमेतवाउ अज्यंजानाअभिचाकशीमि । यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितत्पवन्ते ९ अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त । इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवन्ते १० धामन्तेविश्वंभुवनमधिश्रितमन्तःसमुद्रे हृद्यन्तरायुषि । अपामनीकेसमिथेयआभृतस्तमश्याममधुमन्तंतऊर्मिम् ११ ॥ ११ ॥ इति शाकलर्क्संहितायां चतुर्थे मण्डले पञ्चमोऽनुवाकः ॥ ५ ॥

इति चतुर्थं मंण्डलं समाप्तम् ॥ ४ ॥

१ अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासम् । यह्वाइवप्रयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ १ अबोधिहोतायजथायदेवानूर्ध्वोअग्निःसुमनाःप्रातरस्थात् । समिद्धस्यरुशददर्शिपाजोमहान्देवस्तमसोनिरमोचि २ यदींगणस्यरशनामजीगःशुचिंरङ्कुशुचिभिर्गोभिरग्निः । आद्दक्षिणायुज्यतेवाजयन्त्युत्तानामूर्ध्वोअधयज्जुहूभिः ३ अग्निमच्छादेवयतांमनांसिचक्षूंषीवसूर्यसंचरन्ति । यदींसुवातेउषसाविरूपेश्वेतोवाजीजायतेअग्रेअह्नाम् ४ जनिष्टहिजेन्योअग्रेअह्नांहितोहितेष्वरुषोवनेषु । दमेदमेसप्तरत्नादधानोऽग्निर्होतानिषसादायजीयान् ५ अग्निर्होतान्यसीदद्यजीयानुपस्थेमातुःसुरभाउलोके । युवाकविःपुरुनिष्ठऋतावाधर्ताकृष्टीनामुतमध्यइद्धः ६ ॥ १२ ॥ प्रणत्यंविप्र-

मध्वरेषुसाधुमग्निंहोतारमीळतेनमोभिः । आयस्तुतानुरोदसीऋतेनानित्यंमृज-
न्तिवाजिनंघृतेन ७ मार्जाल्योमृज्यतेस्वेदमूनाःकविप्रशस्तोअतिथिःशिवोनः।
सहस्रंशृङ्गोवृषभस्तदोजाविश्वाँअग्नेसहसाप्रास्युन्यान् ८ प्रसद्योअग्नेअत्येष्यु-
न्यानाविर्यस्मैचारुतमोबभूथ । ईळेन्योवपुष्योविभावाप्रियोविशामतिथिर्मानु-
षीणाम् ९ तुभ्यंभरन्तिक्षितयोयविष्ठबलिमग्नेअन्तितओतदूरात् । आभन्दिष्ठस्य
सुमतिंचिकिद्धिबृहत्तेअग्नेमहिशर्मभद्रम् १० आद्यरथंभानुमोभानुमन्तमग्ने
तिष्ठयजतेभिःसमन्तम्।विद्वान्पथीनामुर्वन्तरिक्षमेहदेवान्हविरद्यायवक्षि ११
अवोचामकुवयेमेध्यायवचोवन्दारुवृषभायवृष्णे । गविष्ठिरोनमसास्तोममग्नौ
दिवीवरुक्ममुरुव्यञ्चमश्रेत् १२ ॥ १३ ॥

कुमारं द्वादश कुमार आत्रेयो वृशो वा जार उभौ वाग्निस्त्रिष्टुप् ।
द्वितीयानवम्योर्वृशः । अन्त्या शक्वरी ।

२ कुमारंमातायुवतिःसमुच्धंगुहाबिभर्तिनदंदातिपित्रे । अनींकमस्यनमि-
नज्जनासःपुरःपश्यन्तिनिहितमरतौ १ कमेतंत्वंयुवतेकुमारंपेषीविभर्षिमहिषी
जजान । पूर्वीहिंगर्भःशरदोवर्धापश्यञ्जातंयदसूतमाता २ हिरण्यदन्तंशुचि-
वर्णमारात्क्षेत्रादपश्यमायुधामिमानम् । ददानोअस्माअमृतंविपृक्तिंकामम-
निन्द्राःकृणवन्ननुक्थाः ३ क्षेत्रादपश्यंसनुतश्चरन्तंसुमद्यूथंनपुरुशोभमानम् । न
ताअगृभ्रन्नजनिष्टहिषःपलिक्नीरियुवतयोभवन्ति ४ केमेमर्यकंवियवन्तगोभिर्न
येषांगोपाअरणश्चिदासं । यईंजगृभुरवतेसृजन्त्वाजातिपश्चउपनश्चिकित्वान् ५
वसोराजानंवसतिंजनानामरातयोनिदधुर्मर्त्येषु । ब्रह्माण्यत्रेरवतंसृजन्तुनिन्दि-

तारोनिन्द्यासोभवन्तु ६ ॥ १४ ॥ शुनश्चिच्छेपंनिदितंसहस्राद्यूपादमुञ्चोअश-
मिष्टुहिपः । एवास्मदग्नेविमुमुग्ध्यूपाशान्होतश्चिकित्वइहतानिषद्य ७ हृणीय-
मानोअपहिमदेयेःप्रमेदेवानांव्रतपाउवाच । इन्द्रोविद्वाँअनुहित्वाचुचक्षतेनाहम-
ग्नेअनुशिष्टआगाम् ८ विज्योतिषावृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा ।
प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृङ्गेरक्षसेविनिक्षे ९ उतस्वानासोदिविषन्त्व
ग्नेस्तिग्मायुधारक्षसेहन्तवाउ । मदेचिदस्यप्ररुजन्तिभामानवंरन्तेपरिवाधोअदे-
वीः १० एतंतेस्तोमंतुविजातविप्रोरथंनधीरःस्वपाअतक्षम् । यदीदग्नेप्रतित्वंदेव
हर्याःस्वर्वतीरपएनाजयेम ११ तुविग्रीवोवृषभोवावृधानोऽशत्रुर्यःसमजाति
वेदाः । इतीममग्निममृताअवोचन्बर्हिष्मतेमनवेशमीयंसद्मविष्मतेमनवेशमीयं-
सत् १२ ॥ १५ ॥

त्वमग्ने द्वादश वसुश्रुत आत्रेयोग्निस्त्रिष्टुप् । तृतीयाया मरुतो रुद्रो विष्णुः ।

३ त्वमग्नेरुणोजायसेयत्त्वंमित्रोभवसियत्समिद्धः । त्वेविश्वेसहसस्पुत्रदे-
वास्त्वमिन्द्रोदाशुषेमर्त्याय १ त्वमर्यमाभवसियत्कनीनांनामस्वधावन्गुह्योवि-
भर्षि । अञ्जन्तिमित्रंसुधितंनगोभिर्यद्दम्पतीसमनसाकृणोषि २ तवाग्नियेमरुतो
मर्जयन्तरुद्रयत्तेजनिमचारुचित्रम् । पदंयद्विष्णोरुपमंनिधायितेनपासिगुह्यंनाम
गोनाम् ३ तवाग्नियासुदृशोदेवदेवाःपुरूदधानाअमृतंसपन्त । होतारमग्निंमनु-
षोनिषेदुर्दशस्यन्तउशिजःशंसमायोः ४ नत्वद्धोतापूर्वोअग्नेयजीयान्नकाव्यैःपरो
अस्तिस्वधावः । विशश्चयस्याअतिथिर्भवासिसयज्ञेनवनवेष्वमर्त्य ५ वयमग्ने
वनुयामत्वोतावसूयवोहविषाबुध्यमानाः । वयंसमर्येविदथेष्वह्नांवयंरायासह-
स्पुत्रमतीन् ६ ॥ १६ ॥ योनआगोअभ्येनोभरात्यधीदघमघशंसेदधात ।

जहीचिकित्वोअभिशस्तिमेतामग्नेयोनोमर्चयतिद्वयेन ७ त्वामस्याव्युपिदेवपूर्वे दूतंकृण्वानाअयजन्तहव्यैः। संस्थेयदग्नईयसेरयीणांदेवोमर्तैर्वसुभिरिध्यमानः ८ अवस्पृधिपितरंयोधिविद्वान्पुत्रोयस्तेसहसःसूनऊहे । कदाचिकित्वोअभिचक्षसे नोऽग्नेकदाँऋतुचिद्यातयासे ९ भूरिनामवन्दमानोदधातिपितावसोयादृतज्जोषयासे । कुविद्देवस्यसहसाचकानःसुम्नमग्निर्वनतेवावृधानः १० त्वमङ्गजरितारं यविष्ठविश्वान्यग्नेदुरितातिपर्षि । स्तेनाअदृश्रन्रिपवोजनासोऽज्ञातकेतावृजिना अभूवन् ११ इमेयामासस्त्वद्रिगभूवन्यसंवेवातदिदागोअवाचि । नाहायमाग्नेरभिशस्तयेनोनरीपतेवावृधानःपरादात् १२ ॥ १७ ॥

त्वामग्न एकादश वसुश्रुत आत्रेयोऽग्निस्त्रिष्टुप् ।

१ त्वामग्नेवसुपतिंवसूनामभिप्रमन्देअध्वरेषुराजन् । त्वयावाजंवाजयन्तो ॥१८५॥

जयेमाभिष्यामपृत्सुतिर्मर्त्यानाम् १ हव्यवाळग्निरजरः पितानो विभुर्विभावा सुदक्षो अस्मे । सुगार्हपत्याः समियो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि २ विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् । निहोतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ३ जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य । जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ४ जुष्टो दमूना अतिथिर्दुरोणइमं नो यज्ञमुप याहि विद्वान् । विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि ५ ॥ १८ ॥ वधेन दस्युं प्रहि चातयस्व वयः कृण्वानस्तन्वे स्वायै । पिपर्ति यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतमो वाजे अस्मान् ६ वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावकभद्रशोचे । अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ७ अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् । वयं देवेषु सु-

कृतंःस्याम॒शमँणानास्त्रिवरूथेनपाहि ८ विश्वानिनोदुर्गहांजातवेदःसिन्धुंनना-
वादुरितातिपर्षि । अग्नेअत्रिवन्नमसागृणानो३स्माकंबोध्यविताततनूनाम् ९
यस्त्वांहृदाकीरिणांमन्यमानोऽमर्त्यंमर्त्योजोहवीमि । जातवेदोयशोअस्मासुधे-
हिप्रजाभिरग्नेअमृतत्वमंश्याम् १० यस्मैत्वंसुकृतेजातवेदउलोकमंग्नेकृणवः
स्योनम् । अश्विनंसपुत्रिणंवीरवन्तंगोमन्तंरयिंनशतेस्वस्ति ११ ॥ ११ ॥

सुसमिद्धायैकादश वसुश्रुत आत्रेय आर्षं गायत्री ।

५ सुसंमिद्धायशोचिषेघृतंतीव्रंजुहोतन । अग्नयेजातवेदसे १ नराशंसः
सुपूदतीमंयज्ञमदाभ्यः । कविर्हिमधुहस्त्यः २ ईळितोअग्नआवहेन्द्रंचित्रमिह
प्रियम् । सुखैरथैमिरुतये ३ ऊर्णम्रदाविप्रंथस्वाभ्यर्काअनूषत । भवानःशुभ्र

सातये ४ देवींर्द्वारोविश्रयध्वंसुप्रायणानऊतये । प्रप्रयुज्ञंपृणीतन ५ ॥ २० ॥
सुप्रतीकेवयोवृधायह्वीक्रतस्यमातरा । दोषामुषासंमीमहे ६ वातस्यपत्मन्नी-
ळितादेव्याहोतारामनुषः । इमंनोयज्ञमागंतम् ७ इळासरस्वतीमहीतिस्रोदेवी-
मयोभुवः । बर्हिःसीदन्त्वस्रिधः ८ शिवस्त्वष्टरिहागहिविभुःपोषउतत्मना । यज्ञे-
यज्ञेनउदव ९ यत्रवेत्थवनस्पतेदेवानांगुह्यानामानि । तत्रहव्यानिगामय १०
स्वाहाग्नयेवरुणायस्वाहेन्द्रायमरुद्भ्यः । स्वाहादेवेभ्योहविः ११ ॥ २१ ॥

अग्निं तं दश वसुश्रुत आत्रेयोग्निः पङ्क्तिः ।

६ अग्निंतंमन्येयोवसुरस्तंयंन्तिधेनवः । अस्तमर्वन्तआशवोऽस्तंनित्यासो
वाजिनइषस्तोतृभ्यआभर १ सोअग्नियोंवसुर्गृणेसंयमायन्तिधेनवः । समर्वन्तो

रघुद्रुवःसंसुजातासःसूरयइषस्तोतृभ्यआभर २ अग्निर्हिवाजिनंविशेददातिवि-
श्वचर्षणिः । अग्नीरायेस्वाभुवंसप्रीतोयातिवार्यमिषस्तोतृभ्यआभर ३ आतेअग्न
इधीमहिद्युमन्तंदेवाजरम् । यद्धस्यातेपनीयसीसमिद्दीदयतिद्यवीषस्तोतृभ्यआ
भर ४ आतेअग्नऋचाहविःशुक्रस्यशोचिषस्पते । सुश्चन्द्रदस्मविश्पतेहव्यंवाट्
तुभ्यंहूयतइषस्तोतृभ्यआभर ५ ॥ २२ ॥ प्रत्येअग्नयोऽग्निभुविश्वंपुष्यन्तिवा-
र्यम् । तेहिन्विरेतइन्विरेतइषण्यन्त्यानुषगिषस्तोतृभ्यआभर ६ तवत्येअग्ने
अर्चयोमहिंव्राधन्तवाजिनः । येपत्वभिःशफानांव्रजाभुरन्तगोनामिषस्तोतृभ्य
आभर ७ नवानोअग्नआभरस्तोतृभ्यःसुक्षितीरिषः । तेस्यामयआनृचुस्त्वादू-
तासोदमेदमइषस्तोतृभ्यआभर ८ उभेसुश्चन्द्रसर्पिषोदर्वीश्रीणीषआसनि । उ-

तोनउत्पुपूर्याउक्थेषुशवसस्पतइषंस्तोतृभ्यआभर ९ एवाँअग्निमंजुर्यमुर्गीभिर्य-
ज्ञेभिरानुषक् । दधद्रत्नमेसुवीर्यंमुतत्यदाश्वश्व्यमिषंस्तोतृभ्यआभर १०॥२३॥

सखायो दशेप आत्रेयोग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

७ सखायःसंवःसम्यञ्चमिषंस्तोमंचाग्नये । वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसह-
स्वते १ कुत्राचिद्यस्यसमृतौरण्वानरोनृषदने । अहन्तश्चिद्यमिन्धतेसंजनयन्ति
जन्तवः २ संयदिषोवनामहेसंहव्यामानुषाणाम् । उतद्युम्नस्यशवसक्रतस्य
रश्मिमाददे३सःस्माकृणोतिकेतुमानक्तंचिद्दूरआसते । पावकोयद्वनस्पतीन्प्रस्मा
मिनात्यजरः ४ अवस्मयस्यवेपणेस्वेदेपाथिषुजुह्वति । अभीमहस्वजेन्यंभूमापृष्ठे-
वरुरुहुः ५॥२४॥यंमर्त्यःपुरुस्पृहंविदद्विश्वस्यधायसे । प्रस्वादनंपितूनामस्तंताति

चिदायवे ६ सहिष्माधन्वाक्षितंदातानदात्यापशुः । हिरिश्मश्रुःशुचिदन्नृभुरनि-
मृष्टतविषिः ७ शुचिःष्मयस्मांअत्रिवत्स्वधितीवरीयते । सुपूरंसूतमाताक्रा-
णायदानशोभगम् ८ आयस्तेसर्पिरासुतेऽग्रेशमास्तिधायसे । ऐषुद्युम्नमुतश्रव
आचित्तंमर्त्येषुधाः १ इतिचिन्मन्युमध्रिजस्त्वादातमापशुंदंदे । आदग्नेअपृण-
तोऽत्रिःसासह्याद्वस्यूनिषःसासह्यान्नॄन् १० ॥ २५ ॥

त्वामग्ने सप्तेप आत्रेयोग्निर्जगती ।

८ त्वामग्नऋतायवःसमींधिरेग्रत्नंग्रत्नासऊतयेसहस्कृत । पुरुश्चन्द्रंयजतंविश्व-
धायसंदमूनसंगृहपतिंवरेण्यम् १ त्वामग्नेअतिथिंपूर्व्यंविशःशोचिष्केशंगृहपतिं
नियेदिरे । बृहत्केतुंपुरुरूपंधनस्पृतंसुशर्माणंस्ववंसंजरद्विषम् २ त्वामग्नेमानुषी-

रीळतेविशोहोत्राविदंविविंचिरत्नधातमम् । गुहासन्तंसुभगविश्वदर्शतंतुविष्वणसंसुयजेघृतश्रियम् ३ त्वामग्नेधर्णसिविश्वधावयंगीर्भिर्गृणन्तोनमसोपसेदिम । सनोजुषस्वसमिधानोअङ्गिरोदेवोमर्तस्ययशसासुदीतिभिः ४ त्वमग्नेपुरुरूपोविशेविशेवयोदधासिप्रत्नथापुरुष्टुत । पुरूण्यन्नासहसाविराजसित्विविःसातेतित्विषाणस्यनाधृषे ५ त्वामग्नेसमिधानंयविष्ठचदेवादूतंचक्रिरेहव्यवाहनम् । उरुज्रयेसंघृतयोनिमाहुतंत्वेपंचक्षुर्दधिरेचोदयन्मति ६ त्वामग्नेप्रदिवआहुतंघृतैःसुम्नायवःसुषमिधासमीधिरे । सवावृधानओषधीभिरुक्षितोऽभिज्रयांसिपार्थिवाविवित्सते ७ ॥ २६ ॥ इति शाकलसंहितायां तृतीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥ इति तृतीयाष्टकः समाप्तः ॥ ३ ॥

चिदायवे ६ सहिष्माघन्वाक्षितंदातानदात्यापशुः । हिरिश्मश्रुःशुचिदन्नृभुरानि-
भृष्टविपिः ७ शुचिःष्मयस्माअत्रिवत्प्रस्वर्षितीवरीयते । सुपूरसूतमाताक्रा-
णायदानशेभगम् ८ आयस्तेसार्पिरासुतेऽग्नेशमस्तिधायसे । ऐषुद्युम्नमुतश्रव
आचित्तंमर्त्येषुधाः १ इतिचिन्मन्युमाधिजस्त्वादातमापशुंददे । आदग्नेअपृण-
तोऽत्रिःसासह्यादस्यूनिपःसासह्यान्नृन् १० ॥ २५ ॥

त्वामग्ने सप्तेप आत्रेयोग्निर्जगती ।

८ त्वामग्नऋतायवःसमीधिरेप्रत्नंप्रत्नासऊतयेसहस्कृत । पुरुश्चन्द्रंयजतंविश्व-
धायसंदमूनसंगृहपतिंवरेण्यम् १ त्वामग्नेअतिथिंपूर्व्यंविशःशोचिष्केशंगृहपतिं
निषेदिरे । बृहत्केतुंपुरुरूपंधनस्पृतंसुशर्माणंस्ववसंजरद्विषम् २ त्वामग्नेमानुषी- ॥१८८॥

रीळतेविशोहोत्राविदंविविंचिंरत्नधातमम् । गुहासन्तंसुभगविश्वदर्शतंतुविष्व-
णसंसुयजंघृतश्रियंम् ३ त्वामग्नेधर्णसिंविश्वधावयंगीभिर्गृणन्तोनमसोपसेदिम ।
सनोजुषस्वसमिधानोअङ्गिरोदेवोमतस्यशसासुदीतिभिः ४ त्वमग्नेपुरुरूपो
विशेविशेवयोदधासिप्रतथांपुरुष्टुत । पुरूण्यन्नासहसाविराजसित्विषिःसातेति-
त्विषाणस्यनाधृषे ५ त्वामग्नेसमिधानंयविष्ठयदेवादूतंचक्रिरेहव्यवाहनम् ।
उरुज्रयसंघृतयोनिमाहुतंत्वेपंचक्षुर्दधिरेचोदयन्मति ६ त्वामग्नेप्रदिवआहुतंघृतैः
सुम्नायवःसुषमिधासमीधिरे । सवावृधानओषधीभिरुक्षितोऽभिज्रयांसिपार्थि-
वाविदिष्ठसे ७ ॥ २६ ॥ इति शाकलर्क्संहितायां तृतीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥
इति तृतीयाष्टकः समाप्तः ॥ ३ ॥

त्वामग्नेगयोन्त्वापञ्चम्यौपङ्क्ती अग्नओजिष्ठमन्त्वाचतुर्थ्यौचजनस्यपद्सुतंभरोजागतंत्वाग्नयेचन्तोगाय-
त्रंत्वाग्निस्तोमेनप्रवेधसेपञ्चाङ्गिरसोयरुणोवृहत्पूरुः पङ्क्तन्तंत्वायज्ञैः मातर्मृक्तवाहाद्वितोभ्यवस्थावत्रिर्गाय-
त्यावनुष्टुभौविराड्पायमग्नेचतुष्कंप्रयस्वन्तः पङ्क्तन्तंहमनुष्वत्तसः प्रविश्वसामन्विश्वसामाग्नेघुम्नोविश्व-
चर्षणिरग्नेत्वंगौपायनालौपायनावावन्धुःसुवन्धुः श्रुतवन्धुर्विप्रवन्धुश्चैकचांद्वैपदमच्छावोनवसूयवआ-
नुष्टुभमग्नेगायत्रमन्त्यावैश्वदेव्यनस्वंतापट्वैवृष्णपौरुकुत्स्यौद्वौभ्यरुणसदस्यूराजानौभारतश्चाश्वमेधो-
न्त्यास्तिस्रोनुष्टुभोनात्मात्मनेदधादितिसर्वास्वित्येकेचिदन्त्यैन्द्राग्नी सामिद्धोविश्ववाराग्नेयी त्रिष्टुब्जगती-
त्रिष्टुवनुष्टुब्गायत्र्यौष्यर्यमापञ्चोनागौरिवीतिःशाक्त्यऐन्द्रमुशनायदौशनसोवापादःकस्यवभ्रुर्ऋणंचयो-
प्यत्रराजास्तुवइन्द्रोरथायसप्तोनावस्युरुग्राभितिकौत्स्यौशनसौवापादौपरैन्द्राकौत्स्यदर्दर्द्वादशगातुः ।

त्वामग्ने सप्त गय आत्रेयोग्निरनुष्टुप् । अन्त्यापञ्चम्यौपङ्क्ती ।

१ ॐम् त्वामग्नेहविष्मन्तोदेवंमर्तासईळते । मन्येत्वाजातवेदसंसहव्यावं-
क्ष्यानुषक् १ अग्निर्होतादास्वंतःक्षयस्यवृक्तबर्हिषः । संयज्ञासश्चरन्तियंसंवाजा- ॥१८९॥

सःश्रवस्यवः २ उतस्मयंशिशुंयथानवंजानिंष्टारणीं । धर्तारंमानुषीणांविशा-
मग्निंस्वध्वरम् ३ उतस्मदुर्गृभीयसेपुत्रोनह्वार्याणाम् । पुरूयोदग्धासिवनाग्नेपु-
शुर्नयंवसे ४ अधस्मयस्यार्चयःसम्यक्संयन्तिधूमिनः । यदीमहत्रितोदिव्युप
ध्मातेवधमंतिशिशीतेध्मातरीयथा५तवाहमग्नऊतिभिर्मित्रस्यचप्रशस्तिभिः ।
द्वेषोयुतोनदुरितातुर्यमममत्यानाम् ६ तंनोअग्नेअभीनरोरयिंसहस्वआभर । स
क्षेपयत्सपोपयद्भुवद्वाजस्यसातयउतैधिपृत्सुनोवृधे ७ ॥ १ ॥

अग्न ओजिष्ठं सप्त गय आत्रेयोग्निरनुष्टुप् । अन्त्याचतुर्थ्यौ पङ्क्ती ।

१० अग्नओजिष्ठमाभरद्युम्नमस्मभ्यमध्रिगो । प्रनोरायापरीणसारत्सिवाजा-
यपन्थाम् १ त्वंनोअग्नेअद्भुतक्रत्वादक्षस्यमंहना । त्वेअसुर्यं१मारुहत्क्राणाम्ि-
त्रोनयज्ञियः २ त्वंनोअग्नएपांगयंपुष्टिंचवर्धय । येस्तोमेभिःप्रसूरयोनरोमघा-

रायः ३ केतेंअग्नेरिपवेवन्धनासःकेपायवःसनियन्तधुमन्तः । केधासिमंग्नेअनृ-
तस्यपान्तिकआसंनोवचंसःसन्तिगोपाः ४ सखायस्तेविपुणाअग्नएतेशिवासः
सन्तोअशिवाअभूवन् । अधूर्पतस्वयमेतेवचोभिर्ऋजूयतेवृजिनानिब्रुवन्तः ५
यस्तेअग्नेनमंसायज्ञमीट्टंऋतंसपात्यरुषस्यवृष्णः । तस्यक्षयःपृथुरासाधुरैतुप्रस-
स्राणस्यनहुषस्यशेषः ६ ॥ ४ ॥

अ.४अ.

अर्चन्तः षट् सुतंभर आत्रेयोऽग्निर्गायत्री ।

१ अर्चन्तस्त्वाहवामहेऽर्चन्तःसमिधीमहि । अग्नेअर्चन्तऊतयें १ अग्नेः
स्तोमंमनामहेसिध्रमद्यादिविस्पृशः । देवस्यद्रविणस्यवः २ अग्निर्जुषतनोगिरो
होतायोमानुषेष्वा । सयक्षद्दैव्यंजनम् ३ त्वमंग्नेसप्रथाअसिजुष्टोहोतावरेण्यः ।

॥१९१॥

त्वयायज्ञंवितन्वते ४ त्वामग्नेवाजसातमंविप्रावर्धन्तिसुष्टुतम् । सनोरास्वसुवीर्यम् ५ अग्नेनेमिरराँइववेवांस्त्वंपरिभूरसि । आराधश्चित्रमृंजसे ६ ॥ ५ ॥

अग्निं स्तोमेन पञ्च सूतंभर आत्रेयोऽग्निर्गायत्री ।

१४ अग्निंस्तोमेनबोधयसमिधानोअमर्त्यम् । हव्यादेवेषुनोदधत् १ तमध्वरेष्वीळतेदेवंमर्ताअमर्त्यम् । यजिष्ठंमानुषेजने २ तंहिशश्वन्तईळतेस्रुचादेवं घृतश्चुतं । अग्निंहव्यायवोह्वे ३ अग्निर्जातोअरोचतघ्नन्दस्यून्ज्योतिषातमः । अविन्दद्गाअपःस्वः ४ अग्निमीळेन्यंकविंघृतपृष्ठंसपर्यत । वेतुमेशृणवद्धवम् ५ अग्निंघृतेनवावृधुःस्तोमेभिर्विश्वचर्षणिम् । स्वाधीभिर्वचस्युभिः ६ ॥ ६ ॥ इति शाकलसंहितायां पञ्चमे मण्डले प्रथमोऽनुवाकः ॥ १ ॥

१५ प्रवेधसेकवयेवेद्यायगिरंभरेयशसेपूर्व्यायं । घृतप्रसत्तोअसुरःसुशेवोरायो धर्ताधरुणोवस्वोअग्निः १ ऋतेनंऋतंधरुणंधारयन्तयज्ञस्यशाकेपरमेव्योमन् । दिवोधर्मन्धरुणेसेदुषोनृजातैरजांताँअभियेननक्षुः २ अंहोयुवंस्तन्वंस्तन्वतेविवयोमहदुष्टरंपूर्व्यायं । ससंवतोनवंजातस्तुतुर्यात्सिहंनक्रुद्धमभितःपरिष्ठुः ३ मातेवयद्धरसेपप्रथानोजनंजनंधायसेचक्षसेच । वयोवयोजरसेयद्दधानःपरित्मनाविपुरूपोजिगासि ४ वाजोनुतेशवसस्पात्वन्तमुरुंदोधंधरुणंदेवरायः । पुदंनतायुर्गुहादधानोमहोरायेचितयन्नत्रिमस्पः ५ ॥ ७ ॥

बृहत्पञ्च पूरुरात्रेयोऽग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

१६ बृहद्वयोहिभानवेऽर्चादेवायाग्नये।यंमित्रंनप्रशस्तिभिर्मर्ताँसोदधिरेपुरः१

सहिद्युभिर्जनानांहोतादक्षस्यबाह्वोः । विहव्यमग्निरानुषग्भगोनवारमृण्वति २ अस्यस्तोमेमघोनःसख्येवृद्धशोचिषः । विश्वायस्मिन्तुविष्वणिसमर्येशुष्ममादधुः ३ अधाह्यग्नएषांसुवीर्यस्यमंहना । तमिद्यह्वंनरोदंसीपरिश्रवोवभूवतुः ४ नूनएहिवार्यमग्नेगृणानआभर । येवयंयेचसूरयःस्वस्तिधामहेसचोतैधिपृत्सुनो वृधे ५ ॥ ८ ॥

आ यज्ञैः पञ्च पूरूरात्रेयोग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

१७ आयज्ञैर्देवमर्त्यइत्थातव्यांसमूतये । अग्निंकृतेस्वध्वरेपूरुरीळीतावसे १ अस्याहिस्वर्यशस्तरआसाविधर्मन्मन्यसे । तंनाकंचित्रशोचिषंमन्द्रंपरोमनीषया २ अस्यवासाउअर्चिषायआयुक्तजागिरा । दिवोनयस्यरेतसावृहच्छोचन्त्यर्चयः ३ अस्यक्रत्वाविचेतसोदस्मस्यवसुरथआ । अधाविश्वासुहव्योऽग्निर्विक्षु

प्रशस्यते ४ नूनद्विवायैमासासंचन्तसूरयः । ऊर्जोनपादभिष्टयेपाहिशाग्धि स्वस्तयउतैधिपृत्सुनोवृधे ५ ॥ १ ॥

मातः पञ्च द्वितो मृक्तवाहा आत्रेयोग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

१८ मातरग्निःपुरुप्रियोविशःस्तवेतातिथिः । विश्वानियोअमर्त्योहव्यामर्तेषुरण्यति १ द्वितायमृक्तवाहसेस्वस्यदक्षस्यमंहना । इन्दुंसचन्तआनुषक्स्तोताचित्ते अमर्त्य २ तंवोदीर्घायुशोचिषंगिराहुवेमघोनाम् । अरिष्टोयेपारथोव्यश्वदावन्नीयते ३ चित्रावायेषुदीधितिरासन्नुक्थापान्तिये । स्तीर्णबर्हिःस्वर्णरेश्रवांसिदधिरेपरि ४ येमेपञ्चाशतंदुरश्वानांसवस्तुति । द्युमदग्नेमहिश्रवोबृहत्कृधिमघोनाम् नृवदमृतनूणाम् ५ ॥ १० ॥

अभ्यवस्थाः पञ्च वात्रिरात्रेयोग्निः। आद्ये गायत्र्यौ। उपान्त्ये अनुष्टुभौ। अन्त्या विराड्रूपा।

११ अभ्यवस्थाःप्रजायन्तेप्रवत्वेर्वत्रिश्चिकेत। उपस्थेमातुर्विचेष्टे१ जुहुरेविचितयन्तोऽनिमिषंनृम्णंपान्ति। आद्द्रह्मांपुरंविविशुः२ आश्वैत्रेयस्यजन्तवोयुमद्वर्धन्तकृष्टयः। निष्कग्रीवोबृहदुक्थएनामध्वानवाजयुः३ प्रियंदुग्धंनकाम्यमजामिजाम्योःसचा। घर्मोनवाजंजठरोऽदब्धःशश्वतोदभः४ क्रीळन्नोरश्मआभुवःसंभस्मनावायुनावेविदानः। ताअस्यसन्धृषजोनतिग्माःसुसंशितावक्ष्योवक्षणेस्थाः ५ ॥ ११ ॥

यमग्ने चतुष्कं प्रयस्वन्तोत्रयोग्निरनुष्टुप्। अन्त्या पङ्क्तिः।

२० यमंग्नेवाजसातमत्वंचिन्मन्यसेरयिम्। तंनोगीर्भिःश्रवाय्यंदेवत्रापनयायुजम् १ येअग्नेनेरयन्तितेवृद्धाउग्रस्यशवसः। अपद्वेषोअपह्वरोऽन्यव्रतस्यसश्चि-

रे २ होतारंत्वावृणीमहेऽग्नेदक्षस्यसाधनम् । यज्ञेषुपूर्व्यंगिराप्रयस्वन्तोहवामहे ३ इत्थायथातऊतयेसहसावन्दिवेदिवे । रायऋतायसुक्रतोगोभिःष्यामसधमादोवीरैःस्यामसधमादः ४ ॥ १२ ॥

मनुष्वच्चतुष्कं सप्तात्रेयोग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

२१. मनुष्वत्त्वानिधीमहिमनुष्वत्समिधीमहि । अग्नेमनुष्वदङ्गिरोदेवान्देवयतेयज १ त्वंहिमानुषेजनेऽग्नेसुप्रीतइध्यसे । स्रुचस्त्वायन्त्यानुपक्सुजातसर्पिरासुते २ त्वांविश्वेसजोषसोदेवासोदूतमकृत । सपर्यन्तस्त्वाकवेयज्ञेषुदेवमीळते ३ देवंवोदेवयज्ययाग्निमीळीतमर्त्यः । समिद्धःशुक्रदीदिह्यृतस्ययोनिमासदः ससस्ययोनिमासदः ४ ॥ १३ ॥

प्रविश्वसामचतुष्कं विश्वासामाग्नेयोऽग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

२२ प्रविश्वसामन्नात्रिवदर्चापावकशोचिषे । योअध्वरेष्वीड्योहोतामन्द्रत-
मोविशि १ न्यं१ग्निंजातवेदसंदधातादेवमृत्विजम् । प्रयज्ञऐत्वानुषग्यादेव-
व्यंचस्तमः २ चिकित्विन्मनसंत्वादेवंमतासऊतयै । वरेण्यस्यतेऽवसइयानासो
अमन्महि ३ अग्नेचिकिद्ध्यं१स्यनेद्दंवचःसहस्य । तंत्वासुशिप्रदम्पतेस्तोमैर्व-
र्धन्त्यत्रयोगीर्णाःशुम्भन्त्यत्रयः ४ ॥ १४ ॥

अग्ने युम्नो विश्वचर्षणिरग्निरनुष्टुप् । अन्त्या पङ्क्तिः ।

२३ अग्नेसहन्तमाभरद्युम्नस्यप्रासहारयिम् । विश्वायश्चर्षणिरभ्या३सावा-
जेषुसासहत् १ तमग्नेपृतनाषहंरयिंसहस्वआभर । त्वंहिसत्योअद्भुतोदातावा-
जस्यगोमतः २ विश्वेहित्वासजोषसोजनासोवृक्तबर्हिषः । होतारंसप्रयस्वतीं-य-

न्तिवार्यापुरु ३ सहिष्मावि॒श्वचर्षणिरभिमातिसहोदधे। अग्नेएयुक्षयेष्वारेवन्नः शुक्रदीदिहियुमत्पावकदीदिहि ४ ॥ १५ ॥

अग्ने त्वं चतुष्कं क्रमेण बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च गौपायना लौपायना वाग्नेर्द्विपदा विराट्।

२४ अग्नेत्वंनोअन्तमउतत्राताशिवोभवावरूथ्यः १ वसुरग्निर्वसुश्रवाअच्छा नक्षिद्युमत्तमंरयिंदाः २ सनोवोधिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ३ तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः ४ ॥ १६ ॥

अच्छा वो नव वसूयव आग्नेया अग्निरनुष्टुप्।

२५ अच्छावोअग्निमवसेदेवंगासिसनोवसुः। रासत्पुत्रऋणामुतावांपर्व-तिहिपः १ सहिसत्योयंपूर्वाचिद्देवासश्चिद्यमीधिरे। होतारंमन्द्रजिह्वामत्सुदीति-

भिर्विभावसुम् २ सनोधीतीवरिष्ठयाश्रेष्ठयाचसुमत्या । अग्नेरायोदिदीहिनः सुवृक्तिभिर्वरेण्य ३ अग्निर्देवेषुराजत्यग्निर्मर्तेष्वाविशन् । अग्निर्नोहव्यवाहनोऽग्निर्धीभिःसपर्यत ४ अग्निस्तुविश्रवस्तमंतुविब्रह्माणमुत्तमम् । अतूर्तश्रावत्पतिंपुत्रंददातिदाशुषे ५ ॥ १७ ॥ अग्निर्ददातिसत्पतिंसासाहयोयुधानृभिः । अग्निरत्यंरघुष्यदंजेतारमपराजितम् ६ यद्वाहिष्ठंतदग्नयेबृहदर्चाविभावसो । महिषीवत्त्वद्रयिस्त्वद्वाजाउदीरते ७ तवद्युमन्तोअर्चयोग्रावेवोच्यतेबृहत् । उतो तेतन्यतुर्यथास्वानोअर्तत्मनादिवः ८ एवाँअग्निंवसूयवःसहसानंवन्दिम । स नोविश्वाअतिद्विषःपर्षन्नावेवसुक्रतुः ९ ॥ १८ ॥

अग्ने नव वसूयव आग्नेया अग्निर्गायत्री । अन्त्याया विश्वे देवाः ।

२६ अग्नेपावकरोचिषामन्द्रयादेवजिह्वया । आदेवान्वक्षियक्षिच १ तंत्वा-

घृतस्नवीमहेचित्रभानोस्वर्दृशम् । देवाँआवीतयेवह २ वीतिहोत्रंत्वाकवेद्युमन्तं समिधीमहि । अग्नेबृहन्तमध्वरे ३ अग्नेविश्वेभिरागहिदेवेभिर्हव्यदातये । होतारंत्वावृणीमहे ४ यजमानायसुन्वतआग्नेसुवीर्यंवह । देवैरासत्सिबर्हिंपि ५ ॥ १९ ॥ समिधानःसहस्रजिदग्नेधर्माणिपुष्यसि । देवानादूतउक्थ्यः ६ न्यृञ्जसेग्निंजातवेदसंहोत्रवाहंयविष्ठ्यम् । दधातादेवमृत्विजम् ७ प्रयज्ञएत्वानुषग्यादेवव्यचस्तमः । स्तृणीतबर्हिरासदे ८ एवंमरुतोअश्विनामित्रःसीदन्तुवरुणः । देवासःसर्वयाविशा १ ॥ २० ॥

अनस्वन्ता पद् ऽयरुणश्चवृष्णश्चसदस्युश्च पौरुकुत्स्योश्वमेधश्च भारतोग्निर्वाग्निः । अन्त्याया इन्द्राग्नी । आद्यास्तिस्रस्त्रिष्टुभः । अन्त्यास्तिस्रोनुष्टुभः ।

२७ अनस्वन्तासत्पतिर्मामहेमेगावाचेतिष्ठोअसुरोमघोनः । त्रैवृष्णोअग्ने

दशभिः सहस्रैर्वैश्वानरऋर्षरुणश्चिकेत १ योमेगृताचंविंशतिंचगोनांहरीचयुक्ता सुधुरादर्दाति । वैश्वानरसुष्टुतोवावृधानोऽग्नेयच्छऋर्षरुणायशर्म २ एवातेअग्ने सुमतिंचकानोनविष्ठायनवमंत्रसदस्युः । योमेगिरस्तुविजातस्यपूर्वीर्युक्तेनाभिऋर्षरुणोगृणाति ३ योमइतिप्रवोचत्यश्वमेधायसूरये । ददद्गचासानिंयतेददन्मेधामृतायते ४ यस्यमापरुषाःशतमुद्गपर्यन्त्युक्षणः । अश्वमेधस्यदानाःसोमाइवऋर्षाशिरः ५ इन्द्राग्नीशतदाऋश्वमेधेसुवीर्यम् । क्षत्रंधारयतंबृहद्दिविसूर्यमिवाजरम् ६ ॥ २१ ॥

सप्तिर्द्धः षड्विंशवारात्रेय्यग्निः । आद्यातृतीये त्रिष्टुभौ । द्वितीया जगती । चतुर्थ्यनुष्टुप् । अन्त्ये गायत्र्यौ ।

२८ समिद्धोअग्निर्दिविशोचिरश्रेत्प्रत्यङ्कपर्समुर्वियाविभाति । एतिप्राचीं

विश्ववारानमोभिर्देवाँईळानाहविर्घृताची १ समिध्यमानोअमृतस्यराजसि हविष्कृण्वन्तंसचसेस्वस्तये । विश्वंसधत्तेद्रविणंयमिन्वसेयातिध्यमग्नेनिचधत्त इत्पुरः २ अग्नेशर्धंमहतेसौभगायतवद्युम्नान्युत्तमानिसन्तु । संजास्पत्यंसुयममा कृणुष्वशत्रूयतामभितिष्ठामहांसि ३ समिद्वस्यप्रमहसोऽग्नेवन्देतवश्रियम् । वृषभोद्युम्नवाँअसिसमध्वरेष्विध्यसे४ तमिद्वोअग्नआहुतदेवान्यक्षिस्वध्वर । त्वंहि हव्यवाळसि ५ आजुहोतादुवस्यताग्निंप्रयत्यध्वरे । वृणीध्वंहव्यवाहनम् ६॥२२॥

ऽर्यमा पञ्चदश गौरिवीतिः शाक्त्य इन्द्रस्त्रिष्टुप् । नवम्या द्वितीयार्धस्योशना वा ।

२१ ऽर्यमामनुपोदेवतात्रीरोचनादिव्याधारयन्त । अचँन्तित्वामरुतःपृतदक्षास्त्वमेषामृषिरिन्द्रासिधीरः १ अनयदीमरुतोमन्दसानमार्चन्निन्द्रंपपिवांसंसुतस्य । आदत्तवज्रमभियदहिहन्नपोयह्वीरसृजत्सर्तवाउ २ उतब्रह्माणोमरुतो

मेअस्येन्द्रःसोमस्यसुषुतस्यपेयाः। तद्धिह्यर्यमनुपेगाअविन्दद्बह्मणस्पतिवाँइन्द्रो अस्य ३ आद्रोदसीवितरंविष्कभायत्संविव्यानश्चिद्रियसेमुगंकः । जिगर्तिंमिन्द्रोअपजगुरणःप्रतिश्वसन्तमवदानवंहन् ४ अधक्रत्वामघवन्तुभ्यंदेवाअनुविश्वे अवदुःसोमपेयम् । यत्सूर्यस्यहरितःपतन्तीःपुरःसतीरुपराएतशेकः ५ ॥ २३ ॥ नवयदस्यनवतिंचभोगान्त्साकंवज्रेणमघवाविवृश्चत् । अर्चन्तीन्द्रैमरुतःसधस्थे त्रैष्टुभेनवचसाबाधतव्याम् ६ सखासख्येअपचत्तूयमग्निरस्यक्रत्वामहिषात्रीशतानि । श्रीसाकमिन्द्रोमनुषःसरांसिसुतंपिबद्वृत्रहत्यायसोमम् ७ श्रीयच्छताम्हिषाणामघोमास्त्रीसरांसिमघवासोम्यापाः । कारंनविश्वेअह्वन्तदेवाभरमिन्द्राययदहिंजघान ८ उशनायत्सहस्यैरयातंगृहमिन्द्रजूजुवानेभिरश्वैः । वन्वानोअ-

त्रंसरथंययाथकुत्सेनदेवैरवनोर्हशुष्णम् १ प्रान्यच्चक्रमवृहःसूर्यस्यकुत्सायान्यद्ध-
रिवोयातवेऽकः। अनासोदस्यूँरमृणोवधेनानिर्दुर्योणआवृणग्ध्रवाचः १०॥२४॥
स्तोमासस्त्वागौरिवातेरवर्धन्नरन्धयोवैदथिनायपिप्रुम्। आत्वामृजिश्वासख्यायं
चक्रेपचन्पक्तीरपिवःसोममस्य ११ नवग्वासःसुतसोमासइन्द्रंदशग्वासोअभ्यर्-
चन्त्यर्कैः। गव्यंचिदूर्वमपिधानवन्तंतंचिन्नरःशशमानाअपव्रन् १२ कथोनुते
परिचराणिविद्वान्वीर्यामघवन्याचकर्थ। यांचोनुनव्याकृणवःशविष्ठप्रेदुतातेविव-
दथेंयुव्रवाम १३ एताविश्वाचकृवाँइन्द्रभूर्यपरीतोजनुषावीर्येण। याचिन्नुवज्रि-
न्कृणवोदधृष्वान्नतेवर्तातविष्याअस्तितस्याः १४ इन्द्रब्रह्मक्रियमाणाजुषस्वया
तैशविष्ठनव्याअकर्म।वस्त्रेवभद्रासुकृतावसूयवेनधीरःस्वपाअतक्षम् १५॥२५॥

ऋस्य पञ्चदश वभ्रुरात्रेय इन्द्र ऋणंचयश्च त्रिष्टुप् ।

३० कस्यवीरःकोअपश्यदिन्द्रंसुखरथमीयमानंहरिभ्याम् । योरायावज्री सुतसोमामिच्छन्तदोकोगन्तापुरुहूतऊती १ अवाचचक्षंपदमस्यसस्वरुग्निधातुरन्वायमिच्छन् । अपृच्छमन्याँउततेमआहुरिन्द्रंनरोबुबुधानाअशेम २ प्रनुवयं सुतेयातेकृतानीन्द्रत्रवामयानिनोजुजोषः । वेददविद्वाञ्छृणवच्चविद्वान्वहतेऽयं मघवासवँसेनः ३ स्थिरंमनश्चकृपेजातइन्द्रवेपीदेकोयुधयेभूर्यसाश्वित् । अश्मानं चिच्छवसाविद्युतोविविदोगवामूर्वमुस्रियाणाम् ४ पुरोयत्त्वंपरमआजनिष्ठाः परावतिश्रुत्यंनामबिभ्रत् । अतश्चिदिन्द्रादभयन्तदेवाविश्वाअपोअजयद्दासपत्नीः ५ ॥ २६ ॥ तुभ्येदेतेमरुतःसुशेवाअचँन्त्यर्कंसुन्वन्त्यन्धः । अहिंमोहा-

नमुपआशयानुप्रमायाभिर्मायिनंसक्षादिन्द्रः ६ विषूमृधोजनुषादानमिन्वन्नह-
न्गवामघवन्त्संचकानः। अत्रादासस्यनमुचेःशिरोयदवर्तयोमनवेगातुमिच्छन् ७
युजंहिमामकृथाआदिदिन्द्रशिरोदासस्यनमुचेर्मथायन्। अश्मानंचित्स्वर्यं१व-
र्तमानंप्रचक्रियेवरोदसीमरुद्भ्यः ८ स्त्रियोहिदासआयुधानिचक्रेकिंमाकरन्नबला
अस्यसेनाः। अन्तर्ह्यख्यदुभेअस्यधेनेअथोपप्रैद्युधयेदस्युमिन्द्रः ९ समत्रगावो-
ऽभितोऽनवन्तेहेहवत्सैवियुतायदासन्। संताइन्द्रोअसृजदस्यशाकैर्यदीसोमासः
सुषुताअमन्दन्। १० ॥ २७ ॥ यदीसोमावभ्रुषूताअमन्दन्नरोरवीद्वृषभःसाद-
नेषु। पुरंदरःपपिवाँइन्द्रोअस्यपुनर्गवामददादुस्त्रियाणाम् ११ भद्रमिदंरुशमा
अग्नेअक्रन्गवांचत्वारिददतःसहस्रा। ऋणंचयस्यप्रयतामघानिप्रत्यग्रभीष्मनृ-

तंमस्यनृणाम् १२ सुपेशंसंमावंसृजन्त्यस्तंगवांसहस्रैरुशमांसोअग्ने । तीव्रा इन्द्रंममन्दुःसुतासोऽक्तोव्युँष्टौपरितक्म्यायाः १३ औच्छत्सारात्रीपरितक्म्या यांक्रुणंचयेराजंनिरुशमांनाम् । अत्योनवाजीरघुरज्यमानोबभ्रुश्चत्वार्यसनत्सहस्रा १४ चतुंःसहस्रंगव्यस्यपश्वःप्रत्यग्रभीष्मरुशमेष्वग्ने । घर्मश्चित्तप्तःप्रवृजे यआसीदयुस्मयुस्तम्वादांमविप्राः १५ ॥ २८ ॥

इन्द्रो रथाय त्रयोदशावस्युरात्रेय इन्द्रस्त्रिष्टुप् । अष्टम्यास्तृतीयपादस्य कुत्सो वा । तस्या एव चतुर्थपादस्योशना वा । नवम्याः कुत्सश्च ।

३१ इन्द्रोरथायप्रवतंकृणोतियमध्यस्थान्मघवावाजयन्तम् । यूथेवपश्योव्युनो-तिगोपाअरिष्टोयातिप्रथमःसिषासन् १ आमन्द्रंवहरिवोमाविवेनुःपिशङ्गरातेअ-

भिनःसचस्व । नहित्वदिन्द्रवस्योअन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ २ उद्यत्सहःसहसआजनिष्टदिदिष्टइन्द्रइन्द्रियाणिविश्वा । प्राचोदयत्सुदुघांवव्रेअन्तर्विज्योतिषासंववृत्वत्तमोऽवः ३ अनवस्तेरथमश्वायतक्षन्त्वष्टावज्रंपुरुहूतद्युमन्तम् । ब्रह्माणइन्द्रंमहयन्तोअर्कैरवर्धयन्नहयेहन्तवाउ ४ वृष्णेयत्तेवृषणोअर्कमर्चानिन्द्र ग्रावाणोअदितिःसजोषाः । अनश्वासोयेपवयोऽरथाइन्द्रेषिताअभ्यवर्तन्तदस्यून् ५ ॥ २१ ॥ प्रतेपूषाणंकरणानिवोचंप्रनूतनामघवन्याचकर्थ । शक्तीवोयद्दिभरारोदसीउभेजयन्नपोमनवेदानुचित्राः ६ तदिन्नुतेकरणंदस्मविप्राहिंयद्वज्रन्नोजोअत्रामिमीथाः । शुष्णस्यचित्परिमायाअगृभ्णाःप्रपित्वंयन्नपदस्यूरसेधः ७ त्वमपोयदवेतुर्वशायारमयःसुदुघाःपारइन्द्र । उग्रमयातुमवहोहूकुत्संसंहयद्वा-

मुशनारन्तदेवाः ८ इन्द्राकुत्सावहमानारथेनावामत्याअपिकर्णेवहन्तु । निः
षीमन्योधमथोनिःषधस्थान्मघोनोहृदोवरथस्तमांसि ९ वातस्ययुक्तान्त्सुयुजः-
श्चिदश्वान्कविश्चिदेषोअजगन्नवस्युः । विश्वेतेअत्रमरुतःसखायइन्द्रब्रह्माणितवि-
षीमवर्धन् १० ॥ ३० ॥ सूरश्चिद्रथंपरितक्म्यायांपूर्वंकरदुपरंजूजुवांसम् । भरे-
ष्वक्रमेतशःसरिणातिपुरोदधत्सानिष्यतिक्तुंनः ११ आयंजनाअभिचक्षेजगामे-
न्द्रःसखायंसुतसोममिच्छन् । वदन्ग्रावाववदिभ्रियातेयस्यजीरमध्वर्यवश्चरे-
न्ति १२ येचाकनन्तचाकनन्तनूतेमतांअमृतमोतेअंहआरन् । वावन्धियज्यूँरुत
तेदुधेह्योजोजनेपुयेपुतेस्याम १३ ॥ ३१ ॥

अदर्दर्द्वादश गातुरात्रेय इन्द्रस्त्रिष्टुप् ।

३२ अदर्दरुत्समसृजोविखानित्वमर्णवान्बद्बधानाँअरम्णाः । महान्तमिन्द्र

पर्वतंवियद्भःसृजोविधाराअवंदानुवंहन् १ त्वमुत्साँऋतुभिर्वद्बधानाँअरंहऊधः
पर्वतस्यवज्रिन् । अहिंचिदुग्रप्रयुतंशयानंजघन्वाँइन्द्रतविषीमधत्थाः २ त्यस्य
चिन्महतोनिर्मृगस्यवर्धर्जघानतविषीभिरिन्द्रः । यएकइद्प्रतिमन्यमानआद-
स्मादन्योअजनिष्टतठ्यान् ३ त्यंचिदेषांस्वधयामदन्तंमिन्वोनपातंसुवृधंतमोगा-
म् । वृषप्रभर्मादानुवस्यभामंवज्रेणवज्रीनिजघानशुष्णम् ४ त्यंचिदस्यक्रतुभि-
र्निषत्तममर्मणोविददिदस्यमर्मं । यदींसुक्षत्रप्रभृतामदस्युयुयुत्सन्तंतमसिहन्यें
धाः ५ त्यंचिदित्थाकंत्पयंशयानमसूर्यंतमसिवावृधानम् । तंचिन्मन्दानोवृषभः
सुतस्योग्रैरिन्द्रोअपगूर्याजघान ६ ॥ ३२ ॥ उद्यदिन्द्रोमहतेदानवायवधर्यमिष्ट
सहोअप्रतीतम् । यदींवज्रस्यप्रभृतौदधाभुविश्वस्यजन्तोरधमंचकार ७ त्यंचि-

दर्णमघुपंशर्पानमस्निन्वंवृत्रंमघादद्रुग्रः । अपादमत्रंमहतावधेनुनिदुर्योणआवृ-
णग्भ्रवाचम् ८ कोअस्यशुष्मंतविषीवरातुएकोधनाभरतेअप्रतीतः । इमेचि-
दस्यज्रयसोनुदेवीइन्द्रस्यौजसोभियसाजिहाते ९ न्यस्मैदेवीस्वधितिर्जिहीतइ-
न्द्रायगातुरुशतीवयेमे । संयदोजोयुवतेविश्वमाभिरनुस्वधाव्रक्षितयोनमन्त १०
एकंनुत्वासत्पतिंपाञ्चजन्यंजातंशृणोमियशसंजनेषु । तंमेजगृभ्रआशसोनविष्टं
वोपावस्तोर्हवमानासइन्द्रम् ११ एवाहित्वामृतुथायातयन्तंमघाविप्रेभ्योददंतंशृ-
णोमि । किंतेब्रह्माणोगृहतेसखायोयेत्वायानिदधुःकामंमिन्द्र १२ ॥ ३३ ॥
इति शाकलर्क्संहितायां चतुर्थाष्टके प्रथमोऽध्यायः ॥ १ ॥ इति पञ्चमे मण्डले द्वितीयोऽनुवाकः ॥ २ ॥

माहिदशप्राजापत्यःसंवरणोजातश्चुंनवत्रिष्टुबन्तंयस्तेष्टौमभूवसुराङ्गिरसःपङ्क्त्यन्तंसआगमत्पङ्क्तीयाजगतीसंभानुनापञ्चात्त्रिरुरोरानुष्टुभंयादिन्द्रपङ्क्त्यन्तमायाहिनवऋचुष्णगायत्र्यन्त्यानुष्टुम्मध्येचसासौरीतदादीतिहासःस्तुतिकर्मत्वादात्रिरेवदेवःकोनुविशातिर्वैश्वदेवंवैतत्पौष्णंयाद्यतिजगत्यावन्त्यैकपदामशंतमाद्व्यूनैकादशीरौद्याधनेवरुणूनैतयोरुपान्त्यैकपदातंप्रत्नथापञ्चोनाकाश्यपोवत्सारोन्येचऋषयोत्रद्वयलिङ्गाद्वित्रिष्टुबन्तावेदाएकादशसदापृणोहयोष्टौमतिक्षत्रोन्त्योद्वचोदेवपत्नीस्तवोन्त्यात्रिष्टुब्द्वितीयाच ॥

माहि दश संवरणः प्राजापत्य इन्द्रस्त्रिष्टुप् ।

३३ ओम् माहिंमहेतवसेदीध्येनूनिन्द्रायेत्थातवसेअतव्यान् । योअस्मैसुमतिंवाजसातौस्तुतोजनेसमर्यऋधिकेत १ सत्वनेइन्द्राधियसानोअकैर्हरीणांवृषन्योक्रमश्रैः । याइत्थामघवन्नेनुजोषंवक्षोअभिप्रायंसक्षिजनान् २ नतेतइन्द्राभ्यं १ स्मदृष्वायुक्तासोअब्रह्मतायदसन् । तिष्ठारथमधितंवज्रहस्तारश्मिंदेवयमसेखश्वैः

३ पुरूयत्तइन्द्रसन्त्युक्थागवेचकथोर्वरासुयुध्यन् । ततक्षेसूर्यायचिदोकसिस्वे-
पांसमत्सुदासस्यनामचित् ४ वयंतेतइन्द्रयेचनरःशर्धोजज्ञानायाताश्वरथाः ।
आस्माजगम्यादहिशुष्मसत्वाभगोनहव्यःप्रभृथेपुचारुः ५ ॥ १ ॥ पपृक्षेण्यमि-
न्द्रत्वेह्योजोनृम्णानिचनृतमानोअमर्तः । सनएनींवसवानोरयिंदाःप्रार्यःस्तुपेतु-
विमघस्यदानम् ६ एवानइन्द्रोतिभिरवपाहिगृणतःशूरकारून् । उतत्वचंददतो
वाजसातौपिप्रीहिमध्वःसुपुतस्यचारोः ७ उतत्येमांपौरुकुत्स्यस्यसूरेस्रसदस्यो-
हिरण्निनोररांणाः । वहन्तुमादग्राश्येतासोअस्यगौरिक्षितस्यक्रतुभिर्नुसंश्चे ८ उत
त्येमांमारुताश्वस्यशोणाःक्रत्वामघासोविदथस्यरातौ।सहस्रामेड्यवंतानोददान
आनूकमर्योवपुपेनाचैत् ९ उतत्येमांध्वन्यस्यजुष्टांलक्ष्मण्यंस्यसुरुचोयतानाः ।
मन्नारायःसंवरणस्यऋषेर्व्रजंनगावःप्रयताअपिग्मन् १० ॥ २ ॥

३४ अजातशत्रुमजरास्ववर्त्यनुस्वधामिताद॒स्मर्मीयते । सुनोतनपचतब्र-
॥२०३॥ ह्मवाहसेपुरुष्टुतार्यप्रतरंदधातन १ आयःसोमेनजठरमपिप्रतामन्दतमघवामध्वो
अन्धसः । यदींमृगायहन्तवेमहावधःसहस्रभृष्टिमुशनावधंयमंत् २ योअस्मैघं-
सउतवायऊधनिसोमंसुनोतिभवतिद्युमाँअह । अपापशक्रस्ततनुष्टिमूहतितनू-
शुभ्रंमघवायःकवासखः ३ यस्यावधीत्पितरंयस्यमातरंयस्यशक्रोभ्रातरंनातई-
पते । वेतीदस्यप्रयतायतंकरोनकिल्विषादीपतेवस्वआकरः ४ नपञ्चभिर्दशभि-
र्वष्ट्यारभंनासुन्वतासचतेपुष्यताचन । जिनातिवेदमुयाहन्तिवाधुनिरादेवयुंभ-
जतिगोमतिव्रजे ५ ॥ ३ ॥ वित्वक्षणःसमृतौचक्रमासुजोऽसुन्वतोविषुणःसुन्व-
तोवृधः । इन्द्रोविश्वस्यदमितविभीषणोयथावशंनयतिदासमार्यः ६ समीप-
॥२०३॥

णेरंजतिभोजनंमुपेविदाशुषेभजातिसूनरंवसु । दुर्गेचनध्रियतेविश्वआपुरुजनो योअस्यतविंषीमचुक्रुधत् ७ संयज्जनौसुधनौविश्वशर्धसाववेदिन्द्रोमघवागोषु शुभ्रिषु । युजंह्यन्यमकृतप्रवेपन्युर्दीगव्यंसृजतेसत्वभिर्धनिः ८ सहस्रसामाग्निवेशिगृणीषेशत्रिमग्नउपमांकेतुमर्यः । तस्माआपःसंयतःपीपयन्ततस्मिन्क्षत्रममवत्त्वेपमस्तु १ ॥ ४ ॥

यस्तेष्टौ प्रभूवसुराङ्गिरस इन्द्रोनुष्टुप् । अन्त्या पङ्क्तिः ।

३५ यस्तेसाधिष्ठोऽवसइन्द्रक्रतुष्टमाभरा अस्मभ्यंचर्षणीसहंसस्त्रिंवाजेषुदुष्टरम् १ यदिन्द्रतेचतस्रोयच्छूरसन्तितिस्रः । यद्वापञ्चक्षितीनामवस्तत्सुनआभर २ आतेऽवोवरेण्यंवृणीमहे । वृषजूतिर्हिजाञ्जिषेआभूषिरिन्द्रतुर्वणिः ३ वृषा ह्यसिराधसेजञ्जिषेवृष्णिंतेशवः । स्वक्षत्रंतेधृषन्मनःसत्राहमिन्द्रपौंस्यम् ४ त्वं

तमिन्द्रमत्यँमामित्रयन्तंमद्रिवः। सुरथाशंतक्रतोनियांहिशवसस्पते ५ ॥ ५ ॥ त्वामिद्वृत्रहन्तमजनासोवृक्तबर्हिषः। उग्रंपूर्वीषुपृत्यँहवन्तेवाजसातये ६ अस्माकमिन्द्रदुष्टरंपुरोयावानमाजिषु। सयावानंवनेधनेवाजयन्तंमवारथम् ७ अस्माकमिन्द्रेहिनोरथंमवापुरन्ध्या । वयंशविष्ठवार्यंदिविश्रवोदधीमहिदिविस्तोमं मनामहे ८ ॥ ६ ॥

स आ गमत्पद् भभूवसुराङ्गिरस इन्द्रस्त्रिष्टुप्। तृतीया जगती।

३६ सआगंमदिन्द्रोयोवसूनांचिकेतदातुंदामनोरयीणाम् । धन्वचरोनवंसगस्तृषाणश्चकमानःपिबतुदुग्धमंशुम् १ आतेहनूहरिवःशूरशिप्रेरुहत्सोमोनपवंतस्यपृष्ठे । अनुत्वाराजन्नवतोनहिन्वन्गीर्भिर्मदेमपुरुहूतविश्वे २ चक्रंनवृत्तं पुरुहूतवेपतेमनोभियामेअमतेरिदद्रिवः। रथादधित्वाजरितासदावृधकृविन्नुस्तो-

पन्मघवन्पुरूवसुः ३ एषग्रावैवजरितर्तइन्द्रेयंतिवाचंबृहदाशुषाणः । प्रसव्येन मघवन्यंसिरायःप्रदक्षिणिद्धरिवोमाविवेनः ४ वृषात्वावृषणंवर्धतुद्यौर्वृषावृषभ्यां वहसेहरिभ्याम् । सनोवृषावृषरथःसुशिप्रवृषक्रतोवृषावाजिन्भरेधाः ५ योरोहितौवाजिनौवाजिनीवान्त्रिभिःशतैःसचमानावदिष्ट । यूनेसमस्मैक्षितयोनमन्तांश्रुतरथायमरुतोदुवोया ६ ॥ ७ ॥

सं भानुना पञ्चात्रिरिन्द्रस्त्रिष्टुप् ।

३७ संभानुनायततेसूर्यस्याजुह्वानोघृतपृष्ठःस्वञ्चाः । तस्माअमृध्राउपसोव्युच्छान्यइन्द्रायसुनवामेत्याह १ समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावासुतसोमो जराते । ग्रावाणोयस्यैपिरंवदन्त्यध्वर्युर्हविषावाजसन्धुम् २ वधूरियंपतिमिच्छन्त्येतियंईवहातेमहिषीमिषिराम् । आस्यश्रवस्याद्रथआचघोषात्पुरूसहस्राप-

रिवर्तयाते ३ नसराजांव्यथतेयस्मिन्निन्द्रंस्तीव्रंसोमंपिबातिगोसखायम् । आस-
त्वनैरजातिहान्तिवृत्रंक्षेतिक्षितीःसुभगोनामपुष्यन् ४ पुष्यात्क्षेमेअभियोगेभवा-
त्युभेवृतौसंयतीसंजयाति । प्रियःसूर्येप्रियोअग्नाभवातियइन्द्रायसुतसोमोददा-
शत् ५ ॥ ८ ॥

उरोष्टः पञ्चात्रिरिन्द्रोनुष्टुप् ।

३८ उरोष्टइन्द्रराधसोविभ्वीरातिःशतक्रतो । अधानोविश्वचर्षणेद्युम्नासुक्षत्र
मंहय १ यदींमिन्द्रश्रवाय्यमिषंशविष्ठदधिषे । पप्रथेदीर्घश्रुत्तमंहिरण्यवर्णदुष्ट-
रम् २ शुष्मांसोयेतेअद्रिवोमेहनाकेतसापवः । उभादेवावभिष्टयेदिवश्चग्मश्च
राजथः ३ उतानोअस्यकस्यचिद्दक्षस्यतववृत्रहन् । अस्मभ्यंनुम्णमाभराऽस्म-

श्येनृमणस्यसे ४ नूतआभिरभिष्टिभिस्तवशमँञ्छतक्रतो । इन्द्रस्यामंसुगोपाः शूरस्यामंसुगोपाः ५ ॥ १ ॥

यदिन्द्र पञ्चात्रिरिन्द्रोनुष्टुप् । अन्त्या पङ्क्तिः ।

३१ यदिंन्द्रचित्रमेहनास्तित्वादांतमद्रिवः । राधस्तन्नोंविदद्वसउभयाहस्त्या भंर १ यन्मन्यसेवरेण्यमिन्द्रंद्युक्षंतदाभंर । विद्यामतस्यंतेवयमकूपारस्यदावनें २ यत्तेदित्सुप्रराध्यंमनोअस्तिंश्रुतंबृहत् । तेनंद्युक्षाचिंदद्रिवआवाजेंदर्पिसातयें ३ मंहिष्ठंवोमघोनांराजानंचर्षणीनाम् । इन्द्रमुप्रशंस्तयेपूर्वीभिर्जुजुष्टेगिरः ४ अस्माइत्काव्यंवचंउक्थमिन्द्रायशंस्यम् । तस्माउब्रह्मवाहसेगिरोवर्धन्त्यत्र्योगिरःशुम्भन्त्यत्रयः ५ ॥ १० ॥

आ याहि नवात्रिः । आद्यानां चतुर्णामिन्द्रः । पञ्चम्याः सूर्यः । शिष्टानामत्रिः ।
आद्यास्तिस्र उष्णिहः । पञ्चमीनवम्यावनुष्टुभौ । शिष्टास्त्रिष्टुभः ।

४० आया॒ह्यद्रि॑भिः सु॒तं सोमं॑ सोमपते पिब । वृष॑न्निन्द्र वृष॑भिर्वृत्रहन्तम १ वृषा॒ ग्रावा॑ वृषा॒ मदो॑ वृषा॒ सोमो॑ अयं सु॒तः । वृष॑न्निन्द्र वृष॑भिर्वृत्रहन्तम २ वृषा॑ त्वा वृष॑णं हुवे वज्रि॑ञ्चित्राभि॑ ऊ॒तिभिः॑ । वृष॑न्निन्द्र वृष॑भिर्वृत्रहन्तम ३ ऋ॒जी॒षी व॒ज्री वृ॑षभ॒स्तु॒रा॒षाट्छु॒ष्मी रा॑जा॑ वृत्र॒हा सो॑म॒पावा॑ । यु॒क्त्वा हरि॑भ्या॒मुप॑ या॒सद्व॑र्वा॒ आ ध्या॑दिने सव॑ने॒ मत्सा॑दिन्द्रः ४ यत्त्वा॑ सू॒र्य॒ स्व॑र्भानु॒स्तम॒सा वि॑ध्य॒दासु॑रः । अक्षे॑त्रवि॒द्यथा॑ मु॒ग्धो भुव॑ना॒न्यदी॑धयुः ५ ॥ ११ ॥ स्व॑र्भानो॒रध॒ यदि॑न्द्र मा॒या अ॑वो॒दिवो॒ वर्त॑माना॒ अवा॑हन् । गू॒ळ्हं सूर्य॑स्य॒ तम॒सापव्र॑तेन तु॒रीये॑ण ब्रह्म॒णावि॑न्द॒दत्रिः॑ ६ मामा॒मिमं॑ त॒व सन्त॑मत्र॒ इर॒स्याद्व॑ग्धो॒भि यसा॒न्नि गा॑रीत् । त्वं मि॒त्रो अ॑सि सत्य॒रा॒धास्तौ मे॒हाव॑तं॒ वरु॑णश्च यु॒

राजा ७ ग्राव्णोवह्न्यायुयुजानःसंपर्यन्कीरिणादेवान्नमंसोपशिक्षन् । अत्रिःसूर्यस्यदिविचक्षुराधात्स्वर्भानोरपमायाअधुक्षत् ८ यंवैसूर्यंस्वर्भानुस्तमसाविध्यदासुरः । अत्रयस्तमन्वविन्दन्नह्यन्येअशक्नुवन् ९ ॥ १२ ॥

को नु विंशतिरात्रिर्विश्वे देवास्त्रिषटुप् । षोडशीसप्तदश्यावतिजगत्यौ । अन्त्यैकपदा ।

४१ कोनुवांमित्रावरुणावृतायन्दिवोवांमहःपार्थिवस्यवादे । ऋतस्यवासदसित्रासीथांनोयज्ञायतेवांपशुर्नवाजान् १ तेनोमित्रोवरुणोअर्यमाधुरिन्द्रऋभुक्षामरुतोजुषन्त । नमोभिर्वायेदधतेसुवृक्तिंस्तोमंरुद्रायमीळ्हुषेसजोषाः २ आवांयेष्ठाश्विनाहुवध्यैवातस्युपत्मन्नध्यस्यपुष्टौ । उतवांदिवोअसुरायमन्मन्प्रान्धांसीवयज्यवेभरध्वम् ३ प्रसक्षणोदिव्यःकण्वहोतात्रितोदिवःसजोषावातोअग्निः । पूषाभगःप्रभृथेविश्वभोजाआजिंनजग्मुराश्वश्वतमाः ४ प्रवोरयिंयुक्ताश्वंभरध्वंरा-

यएऐऽवसेदधीतधीः। सुशेवएवैरौशिजस्यहोतायेवएवांमरुतस्तुराणाम् ५॥१३॥ प्रवोवायुंरथयुजंकृणुध्वंप्रदेवंविप्रंपनितारमर्कैः। इषुध्यवंऋतसापुःपुरंधीर्वस्वीनोअत्रपत्नीराधियेधुः ६ उपवएवन्द्यैभिःशूषैःप्रयह्वीदिवाश्चितयद्भिरर्कैः। उपास्तानक्तांविदुषीवविश्वमाहावहतोमर्त्यायंयज्ञम् ७ अभिवोअर्चेपोष्यावतोनून्वास्तोष्पतिंत्वष्टारंररांणः। धन्यांसजोषांधिषणानमोभिर्वनस्पतीरोषधीरायएवेट ८ तुजेनस्तनेपर्वताःसन्तुस्वैतवोयेवसवोनवीराः। पनितआह्योयजतःसदानोवर्धान्नःशंसंनयोआभिष्टौ ९ वृष्णोअस्तोषिभूम्यस्यगर्भात्रितोनपातमपांसुवृक्ति। गृणीतेअग्निरेतरीनशूषैःशोचिष्केशोनिरिणातिवना १० ॥१४॥ कथामहेरुद्रियायब्रवामकद्राचेचिकितुषेभगाय। आपओषधीरुतनोऽवन्तुद्यौर्वनागिरयोवृक्षकेशाः ११ शृणोतुनऊर्जापतिर्गिरःसनभस्तरीयाँइषिरःपरिज्मा। शृण्वन्त्वापः

पुरोनशुभ्राःपरिस्रुचोवबृहाणस्यार्द्रैः १२ विदाचिन्नुमंहान्तोयेवएवाग्रवांमदस्मा
वार्युदधानाः। वयंश्वनसुम्व१ आवयन्तिक्षुभामर्तमनुयतंवधस्नैः १३ आदैव्यानि
पार्थिवानिजन्मापश्याच्छासुमंखायवोचम्। वर्धन्तांद्यावोगिरश्चन्द्राग्रांउदावर्ध-
न्तामभिषांताअर्णाः १४ पदेपदेमजरिमानिधायिवरूत्रीवाशक्रायापायुभिश्च।
सिषक्तुमाताम्हीरसानस्मत्सूरिभिर्ऋजुहस्तैऋजुवनिः १५ ॥ १५ ॥ कुथादा-
शेमनमंसामुदानूनेवयामरुतोअच्छोक्तौप्रश्रवसोमरुतोअच्छोक्तौ। मानोऽहि-
र्बुध्योरिषेधादस्माकंभूदुपमातिवनिः १६ इतीचिन्नुप्रजायैपशुमत्यैदेवासोवनंते
मर्त्यौवआदेवासोवनतेमर्त्यौवः।अत्राशिवांतन्वोधासिमस्याजरांचिन्मेनिऋंति-
र्जग्रसीत १७ तांवोदेवाःसुमतिमूर्जयंन्तीमिषंमश्यामवसवःशसागोः। सानः
सुदानुर्मृळयंन्तीदेवीप्रतिद्रवंन्तीसुविताय गम्याः१८ अभिनइळायुथस्यमातास्म-

न्नदीभिरुर्वशीवागृणातु । उर्वशीवावृहद्दिवागृणानाभ्यूर्ण्वानाप्रभूथस्यायोः १९ सिपक्तुनऊर्ज्जव्यस्यपुष्टेः २० ॥ १६ ॥

म शंतमाष्टादशात्रिर्विश्वे देवास्त्रिष्टुप् । एकादश्या रुद्रः । उपान्त्यैकपदा ।

४२ प्रशंतमावरुणंदीधितिर्गीर्मित्रंभगमदितिंनूनमश्याः । पूषंयोनिःपञ्चहोताशृणोत्वर्तपन्थाअसुरोमयोभुः १ प्रतिमेस्तोममदितिर्जगृभ्यात्सूनुंनमाता हृद्यंसुशेवम् । ब्रह्मप्रियंदेवहितंयदस्त्यहंमित्रेवरुणेयन्मयोभु २ उदीरयकविर्तमंकवीनामुनत्तैनमभिमध्यांघृतेन । सनोवसूनिप्रयताहितानिचन्द्राणिदेवःसवितासुवाति ३ समिन्द्रणोमनसानेषिगोभिःसंसूरिभिर्हरिवःसंस्वस्ति । संब्रह्मणादेवहितंयदस्तिसंदेवानांसुमत्यायज्ञियानाम् ४ देवोभगःसवितारायोअंश इन्द्रोवृत्रस्यसंजितोधनानाम् । ऋभुक्षावाजउतवापुरन्धिरवन्तुनोअमृतासस्तु- ॥२०८॥

रासः ५ ॥ १७ ॥ मरुत्वतोअप्रतीतस्यजिष्णोरजूर्यतःप्रत्नवामाकृतानि । नते पूर्वेमघवन्नापरासोनवीयेनूतनःकश्चनाप ६ उपस्तुहिप्रथमंरत्नधेयंबृहस्पतिंसनितारंधनानाम् । यःशंसतेस्तुवतेशम्भविष्ठःपुरूवसुरागमज्जोहुवानम् ७ तंवोतिभिःसचमानाअरिष्टाबृहस्पतेमघवानःसूरीरः । येअश्वदाउतवासन्तिगोदायेवस्वदाःसुभगास्तेउरायः ८ विसर्मणिंकृणुहिचित्रमेषांयेभुञ्जतेअपृणन्तोन उक्थैः । अपव्रतान्प्रसवेवावृधानान्ब्रह्मद्विषःसूर्याद्यावयस्व ९ यओहतेरक्षसेद्विषतीतायचक्रेभिस्तंमरुतोनियात । योवःशमीशमानस्यनिन्दात्तुच्छयान्कामान्करतेसिष्यदानः १० ॥ १८ ॥ तमुष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभेषजस्य । यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसुरंदुवस्य ११ वमूनसोअपसोयेसहस्तावृष्णःपत्नीर्नद्योविभ्वतष्टाः । सरस्वतीबृहद्दिवोत-

राकादंशस्यन्तींवरिवस्यन्तुशुभ्राः १२ प्रसूमहेसुशरणायमेधांगिरंभरेनव्य-
सींजायमानाम् । यआह्नादुहितुर्वक्षणासुरूपामिनानोअकृणोदिदंनः १३
प्रसुष्टुतिःस्तनयन्तंरुवन्तंमिळस्पतिंजरितर्नूनमंश्याः । योअब्दिमाँउदनिमाँइ-
यर्तिप्रविद्युतारोदसीउक्षमाणः १४ एषस्तोमोमारुतंशर्धोअच्छारुद्रस्यसूनूँयुव-
न्यूँरुदंश्याः । कामोरायेहवतेमास्वस्त्युपस्तुहिपृणंदश्वाँअयासः १५ प्रैषःस्तोमः
पृथिवीमन्तरिक्षंवनस्पतीरोषधीरायेअंश्याः । देवोदैवःसुहवोभूतुमह्यंमानोमाता
पृथिवीदुर्मतौधात् १६ उरौदेवाअनिवाधेस्याम १७ समश्विनोरवसानूतनेन
मनयोभुवासुप्रणीतीगमेम । आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभ-
गानि १८ ॥ ११ ॥

४३ आधेनवःपयसातूर्ण्यर्थाअमर्धन्तीरुपनोयन्तुमध्वा । महोरायेबृहतीः सप्तविप्रोमयोभुवोजरिताजोहवीति १ आसुष्टुतीनमसावर्तयध्यैधावावाजायपृथिवीअमृध्रे । पितामातामधुवचाःसुहस्ताभरेभरेनोयशसावविष्टाम् २ अध्वर्यवश्चकुवांसोमधूनिप्रवायवेभरतचारुशुक्रम् । होतेवनःप्रथमःपाह्यस्यदेवमध्वोररिमातेमदाय ३ वशाक्षिपोयुजतेवाहूअद्रिंसोमस्ययाशमितारासुहस्ता । मध्वोरसंसुगभस्तिर्गिरिष्ठांचनिश्चदहुदुहेशुक्रमंशुः ४ असाविंतेजुजुषाणायसोमःक्रत्वेदक्षायवृहतेमदाय । हरीरथेसुधुरायोगेअर्वागिन्द्रंप्रियाकृणुहिहूयमानः५ ॥ २० ॥ आनोमहीमरमतिंसजोषाग्मांदेवींनमसारातहव्याम् । मधोर्मदायबृहतीमृतज्ञामाग्नेवहपथिभिर्देवयानैः ६ अजन्तियंप्रथयन्तोनविप्रांवपावन्तंना-

म्निनातपन्तः । पितुर्नपुत्रउपासिप्रेष्ठआघर्मोअग्निमृतयन्नसादि ७ अच्छामही बृहतीशंतमागीर्दूतोनगन्त्वश्विनाहुवध्यै । मयोभुवासुरथायातमर्वाग्गन्तंनिधिं धुरंमाणिर्ननाभिम् ८ प्रतन्यसोनमउक्तिंतुरस्याहंपूष्णउतवायोरदिक्षि । या राधसाचोदितारामतीनांयावाजस्यद्रविणोदाउतत्मन् ९ आनामभिर्मरुतोवाक्षि विश्वानारूपेभिर्जातवेदोहुवानः । यज्ञंगिरोजरितुःसुष्टुतिंचविश्वेगन्तमरुतोविश्व ऊती १० ॥ २१ ॥ आनोदिवोबृहतःपर्वतादासरस्वतीयजतागन्तुयज्ञम् । हवं देवीजुजुषाणाघृताचीशग्मांनोवाचमुशतीशृणोतु ११ आवेधसंनीलपृष्ठंवृह-न्तंवृहस्पतिंसदनेसादयध्वम् । सादयोनिंदमआदीदिवांसंहिरण्यवर्णमरुषंसपेम १२ आवर्णसिवृहद्दिवोरराणोविश्वेभिर्गन्त्वोमभिर्हुवानः।मावसानओषधीर-

मृध्रस्त्रिधातुशृङ्गोवृषभोवयोधाः १३ मातुष्पदेपरमेशुक्रआयोर्विपन्यवोरास्पिरासोअग्मन् । सुशेव्यंनमंसारातहव्याःशिशुंमृजन्त्यायवोनवासे १४ बृहद्वयोबृहतेतुभ्यंमग्नेधियाजुरोमिथुनासःसचन्त । देवोदेवःसुहवोभूतुमह्यंमानोमातापृथिवीदुर्मतौधात् १५ उरौदेवाअनिबाधेस्याम १६ समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम । आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि १७ ॥ २२ ॥

तं मत्रथा पञ्चदशावत्सारः काश्यपोन्ये च ऋषयो दृष्टलिङ्गा विश्वे देवा जगती ।
अन्त्ये त्रिष्टुभौ ।

४४ तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदंस्वर्विदम् । प्रतीचीनंवृजनंदो-

हसेगिराशुंजयन्तुमनुयासुवर्धसे १ श्रियेसुदृशीरुपरस्यया:स्वर्विरोचमानःकुकु-
भांमचोदते । सुगोपाआसिनदभायसुक्रतोपरोमायाभिर्ऋतआसुनामते २ अत्यं
हविःसचतेसञ्चधातुचारिष्टगातुःसहोतासहोभरिः । प्रसस्त्राणोअनुबर्हिर्वृषाशि-
शुर्मध्येयुवाजरोविसुहार्हितः ३ प्रवएतेसुयुजोयामन्निष्टयेनीचीरमुष्मैयम्यंऋ-
तावृधः । सुयन्तुभिःसर्वशासैरभीशुभिःक्रिविर्नामानिप्रवणेमुपायति ४ संज-
भुराणस्तरुभिःसुतेगृभेवयाकिनोचित्तगर्भासुसुस्वरुः । धारवाकेष्वजुगाथशोभ-
सेवर्धस्वपत्नीरभिजीवोअध्वरे ५ ॥ २३ ॥ याहगेवदृशेताहगुच्यतेसंछायया
दधिरेसिध्रयाप्स्वा । महीमुस्मभ्यमुरुषामुरुज्रयोवृहत्सुवीरमनपच्युतंसहः ६
वेत्यग्रुर्जनिवान्वाअतिस्पृधःसमर्यतामनसासूर्यःकविः । घ्नंसंरक्षन्तंपरिविश्वतो

गयंमस्माकंशर्मवनवत्स्वावसुः ७ ज्यायांसमस्ययतुनंस्यकेतुनंऋषिस्वरंचरति यासुनामते । याहृशिमन्वायितमंपस्पयांविदद्यउस्वयंवहंतेसोअरंकरत् ८ समुद्रमांसामवंतस्थेअग्रिमानारिष्यतिसर्वनंयस्मिन्नायंता । अत्रानहार्दिक्रवणस्यरेजतेयत्रांमतिर्विद्यतेपूतबन्धनी ९ सहिक्षत्रस्यमनसस्यचित्तिभिरेवावदस्ययजतस्यसध्रेः । अवत्सारस्यस्पृणवामरण्वभिःशविष्ठंवाजंविदुषांचिदध्यैम् १० ॥ २४ ॥ श्येनआंसामदितिःकक्ष्यो ३ मदोविश्ववारस्ययजतस्यमायिनः । समन्यमन्यमर्थयन्त्येतवेविदुर्विषाणंपरिपानमन्तिते ११ सदापृणोयजतोविद्विषोवधीद्वाहुवक्तःश्रुतविन्तयोवःसचा । उभासवराप्रत्येतिभातिचयदींगुणंभजतेसुम्नयावभिः १२ सुतंभरोयजमानस्यसत्पतिर्विश्वांसामूधःसाधियामुदञ्चनः । भरं-

द्वेनूरसंवच्छिश्रियेपयोऽनुब्रुवाणोअध्यैतिनस्वपन् १३ योजागारतमृचःकामयन्तेयोजागारतमुसामानियन्ति । योजागारतमुयंसोमंआहृतवाहमंस्मिसख्ये न्योकाः १४ अग्निर्जागारतमृचःकामयन्तेऽग्निर्जागारतमुसामानियन्ति। अग्निर्जागारतमुयंसोमंआहृतवाहमंस्मिसख्येन्योकाः १५ ॥ २५ ॥ इति शाकलर्कसंहितायां पञ्चमे मण्डले तृतीयोऽनुवाकः ॥ ३ ॥

विदा एकादश सदापृण आत्रेयो विश्वे देवास्त्रिष्टुप् ।

४५ विदादिवोविष्यन्नद्रिंमुक्थैरायत्याउपसोअर्चिनोगुः । अपावृतव्रजिनीरुत्स्वर्गाद्दिदुरोमानुषीर्देवआवः १ विसूर्योअमतिंनश्रियंसादोर्वाद्वर्मातराजानुतीर्गात्। घन्वंर्णसोनुयं १ःखादोअर्णाःस्थूणेवसुमिंताहंहतुर्योः २ अस्माउक्थाय

पर्वतस्यगर्भौमहीनांजनुषेपूर्व्यायं। विपर्वतोजिहीतसाधत्यौराविवासन्तोदसय-
न्तभूम ३ सूक्तेभिर्वोवचोभिर्देवजुष्टैरिन्द्राग्नी३ अवसेहुवध्यै। उक्थेभिर्हिष्मा-
कवयःसुयज्ञाआविवासन्तोमरुतोयजन्ति ४ एतोन्वी३ न्द्रंस्तृध्यो३ भवाम्प्रदुच्छुना
मिनवामावरीयः। आरेबाधेसिसनुतर्दधामायाम्प्राञ्चोयजमानमच्छ ५ ॥२६॥
एताधियंकृणवामासखायोऽपयामताँऋणुतव्रजंगोः। ययामनुर्विशिशिप्रंजि-
गायययावणिग्वङ्कुरापापुरीषम् ६ अनूनोदत्रहस्तयतोअद्रिरार्चन्येनदशंमासोन-
वग्वाः। ऋतंयतीसरमागाअविन्दद्विश्वानिसत्याङ्गिराश्चकार ७ विश्वेअस्याव्यु-
षिमाहिनायाःसंयद्भिरङ्गिरसोनवन्त। उत्सआसांपरमेसधस्थेऋतस्यपथासु-
रमाविदद्राः ८ आसूर्योयातुसप्ताश्वःक्षेत्रंयदस्योर्वियादीर्घयाथे। रघुःश्येनःपत-

यदन्वोअच्छायुवाकविर्दीदयद्वोपुगच्छन् १ आसूर्योंअरुहच्छुक्रमर्णोऽर्युक्तयद्धरि-
तौवीतपृष्ठाः । उद्ग्राननावमनयन्तधीरांआशृण्वतीरापोअर्वागतिष्ठन् १० धियं
वोअप्सुदधिषेस्वर्षांययातरन्दशमासोनवग्वाः । अयाधियास्यामदेवगोपाअया
धियातुतुर्यामात्यंहः ११ ॥ २७ ॥

. . हयोष्टौ मतिक्षत्र आत्रेयो विश्वे देवा जगती अन्त्ययोर्देवपत्न्यः । द्वितीयान्त्ये त्रिष्टुभौ ।

४६ हयोनविद्वाँअयुजिस्वयंधुरितांवहामिप्रतरणीमवस्युवम् । नास्यावशिम
विमुचंनावृतंपुनर्विद्वान्पथःपुरएतऋजुनेषति १ अग्नइन्द्रवरुणामित्रदेवाःशर्धः
प्रयन्तमारुतोतविष्णो । उभानासत्यारुद्रोअधग्नाःपूषाभगःसरस्वतीजुषन्त २
इन्द्राग्नीमित्रावरुणादितिंस्वःपृथिवींद्यांमरुतःपर्वतॉअपः । हुवेविष्णुंपूषणंब्रह्म- ॥२१३॥

णस्पतिंभगंनुशंसंसवितारमूतयें ३ उतनोविष्णुरुतवातोअस्त्रिधोद्रविणोदाउत सोमोमयस्करत् । उतऋभवउतरायेनोअश्विनोतत्वष्टोतविभ्वानुमंसते ४ उत त्यन्नोमारुतंशर्धआगमद्विक्षयंयजतंवाहिरासदे । बृहस्पतिःशर्मपूषोतनोयमद्वरूथ्यं१वरुणोमित्रोअर्यमा ५ उतत्येनःपर्वतासःसुशस्तयःसुदीतयोनव्य१स्त्रामणेभुवन् । भगोविभक्ताशवसावसागमदुरुव्यचाअदितिःश्रोतुमेहवम् ६ देवानांपत्नीरुशतीरवन्तुनःप्रावन्तुनस्तुजयेवाजसातये । याःपार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मयच्छत ७ उतम्याव्यन्तुदेवपत्नीरिन्द्राण्य१म्याव्यश्विनीराट् । आरोदसीवरुणानीशृणोतुव्यन्तुदेवीर्यऋतुर्जनीनाम् ८ ॥ २८ ॥ इति शाकलकसंहितायां चतुर्थाष्टके द्वितीयोऽध्यायः ॥ २ ॥

प्रयुञ्जतीसप्तप्रतिरथःकदुपञ्चप्रतिभानुर्जागतंदेवंवःप्रतिमभोन्त्यातृणपाणिर्विश्वस्त्वस्त्यात्रेयःपङ्क्त्यन्त-
मग्नेपञ्चोनाचतुर्थ्यैन्द्रायवीत्रायव्यैकैन्द्रावायव्यौचतस्रोगायत्र्यःपळुष्णहस्तिसोजगत्यस्त्रिष्टुभोवान्त्ये
अनुष्टुभौमश्यावाश्वेन्यूनाश्यावाश्वोमारुतंहतत्पङ्क्तिप्पष्ठचन्त्येचकोवेदपोळशककुब्बृहत्यनुष्टुप्पुरउष्ण-
ककुप्सतोबृहत्यौगायत्रीसतोबृहतीककुभौगायत्रीसतोबृहत्यौककुप्सतोबृहतीमशर्धायपञ्चोनाजागतमु-
पान्त्यात्रिष्टुप्पयज्यवोदशान्त्यात्रिष्टुवग्नेनवार्हतंतृतीयासप्तम्यौसतोबृहत्यावारुद्रासोष्टौद्वित्रिष्टुवन्तंत-
मुभवास्त्रिष्टुवन्तमीळेद्विजगत्यन्तमाग्नेयंचचाकेष्टैकोनागायत्रंश्वावाश्वोत्रवैददश्वीतरंतपुरुमीळ्हौदाभ्यंरथ-
वीतिंमरुतश्चदानतुष्टःप्रशशंसबुद्ध्याचतरन्तमहिपींशशीयसींपञ्चम्यनुष्टुप्नवमीसतोबृहत्यृतेननवश्रुतवि-
न्मैत्रावरुणंवैतत् ।

प्रयुञ्जती सप्त प्रतिरथ आत्रेयो विश्वेदेवास्त्रिष्टुप् ।

४७ ॐम् प्रयुञ्जतीदिवएतिव्रुवाणामहीमातादुहितुर्बोधयन्ती । आविर्वासन्ती
युवतिर्मनीषापितृभ्यआसदनेजोहुवाना १ अजिरासस्तदपईयमानाआतस्थिवां-

सोअमृतस्यनाभिम् । अनन्तासउरवोविश्वतःसीपरिद्यावापृथिवीयन्तिपन्थाः२ उक्षासमुद्रोअरुणःसुपर्णःपूर्वस्ययोनिंपितुराविवेश । मध्येदिवोनिहितःपृश्निरश्मापविचक्रमेरजसस्पात्यन्तौ ३ चत्वारईंबिभ्रतिक्षेमयन्तोदशगर्भंचरसंधापयन्ते । त्रिधातवःपरमाअस्यगावोदिवश्चरन्तिपरिसद्योअन्तान् ४ इदंवपुर्निवचनं जनासश्चरन्तियन्नद्यस्तस्थुरापः । द्वेयदीविभृतोमातुरन्येइहेहजातेयम्याइसवन्वू ५ वितन्वतेधियोअस्माअपांसिवस्त्रापुत्रायमातरोवयन्ति । उपप्रक्षेवृषणोमोदमानादिवस्पथावध्वोयन्त्यच्छं ६ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तम् । अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ७ ॥ १ ॥

कदु पश्च प्रतिभानुरात्रेयो विश्वे देवा जगती ।

४८ कदुप्रियायधाम्नेमनामहेस्वक्षत्रायस्वयंशसेमहेवयम् । आमेन्यस्यरजं-

सोयदभ्रआँअपोवृणानाविंतनोतिमायिनीं १ ताअंतवयुनेवीरवंक्षणंसमान्या वृतयाविश्वमारजंः । अपोअपाचीरपराअपैजतेप्रपूवाँभिस्तिरतेदेवयुर्जनः २ आग्रावंभिरहन्यैभिरक्तुभिर्वरिष्ठुवज्रमाजिंघर्तिमायिनि । शतंवायस्यप्रचरन्त्सेदमेसंवर्तयन्तोविचंवर्तयन्नहा ३ तामस्यरीतिंपरशोरिवप्रत्यनीकमख्यंभुजेअंस्यवपंसः । सचायदीपितुमन्तमिवक्षयंरत्नंदधातिभरहूतयेविशे ४ साजिह्वयाचतुरनीकऋजतेचारुवसानोवरुणोयतन्नरिम् । नतस्यविघ्नपुरुषत्वतावयंयतोभगंः सवितादातिवार्यम् ५ ॥ २ ॥

देवं वः प्रतिप्रभ आत्रेयो विश्वे देवास्त्रिष्टुप् ।

१ देवंवोअद्यसवितारमेवेभगंचरत्नंविभजन्तमायोः । आवांनरापुरुभुजा ववृत्यांदिवेदिवेचिदश्विनासखीयन् १ प्रतिप्रयाणमसुरस्यविद्वान्त्सूक्तैर्देवंसवि- ॥२१५॥

तारंदुवस्य । उपंब्रुवीतनमंसाविजानञ्ज्येष्ठंचरत्नंविभजन्तमायोः २ अदत्रया दयतेवार्याणिपूषाभगोअदितिर्वस्तउस्रः । इन्द्रोविष्णुर्वरुणोमित्रोअग्निरहानि भद्राजनयन्तदस्माः ३ तन्नोअनर्वासंवितावरूथंतत्सिन्धवइषयन्तोअनुग्मन् । उपयह्वोचेअध्वरस्यहोतारायःस्यामपतयोवाजरत्नाः४ प्रयेवसुभ्यईवदानमोदुर्ये-मित्रेवरुणेसूक्तवाचः । अवैत्वभ्वंकृणुतावरीयोदिवस्पृथिव्योरवसामदेम५॥ ३ ॥

विश्वः पञ्च स्वस्त्यात्रेयो विश्वे देवा अनुष्टुप् । अन्त्या पङ्क्तिः ।

५० विश्वोदेवस्यनेतुर्मर्तोवुरीतसख्यम् । विश्वोरायइषुध्यतिद्युम्नंवृणीतपु-ष्यसे १ तेतेदेवनेतर्येचेमाँअनुशसे । तेरायातेह्याइषूचेसचेमहिसचथ्यैः २ अतो नुआनृनतिथीनतःपत्नीर्दशस्यत । आरेविश्वंपथेष्ठांद्विषोयुयोतुयूयुविः ३ यत्र वह्निराभिहितोदुद्रवद्वोण्यःपशुः । नृमणावीरपस्त्योऽर्णाधीरवसनिता ४ एवते

तेनेतान्यम्नि:शंसिः । शंसेशंस्तुस्तयंडुःस्तुतोमनामहेदेवस्तुतोमनामहे ५ ॥ ४ ॥

अग्ने यजस्व सप्तभिर्वो विश्वे देवाः । भारद्वाजो गायत्रः । एकादशर्चास्त्रिष्टुभः पञ्चमस्तु जगती वा । अन्त्ये भुरिक्पङ्क्तिः । शिष्टा उष्णिहः ।

१) अग्नेसुतस्यपीतयेनिष्ट्रीक्षमभिरागहि । देवेभिर्हव्यदातये १ ऋतंयीतय आगंहुमन्वंगमन्नोअध्वरम् । अग्नेःपिबतजिह्वया २ विप्रेभिर्विप्रसन्त्यमातुर्यामभिरागहि । देवेभिःसोमपीतये ३ अयंसोमश्चमूसुतोऽमत्रेपरिषिच्यते । प्रियइन्द्रायवायवे ४ वायुरायाहिपीतयेजुषाणोहव्यदातये । पिबासुतस्यान्धसो मतीप्रभर्षः ५ ॥ ५ ॥ उन्द्रेअनायनेवांसुतानांपीतिमर्हथः । ताञ्जुषेथामरेपसा-वृतिभर्षः ६ सुताइन्द्रायवायवेसोमासोदध्याशिरः । निम्नंनयन्तिसिन्धवो अति

प्रयः ७ सजूर्विश्वेभिर्देवेभिरश्विभ्यांसजूः । आयाह्यग्नेअत्रिवत्सुतेरण ८ सजूर्मित्रावरुणाभ्यांसजूःसोमेनाविष्णुना । आयाह्यग्नेअत्रिवत्सुतेरण ९ सजूरादित्यैर्वसुभिःसजूरिन्द्रेणवायुना । आयाह्यग्नेअत्रिवत्सुतेरण १० ॥ ६ ॥ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः । स्वस्तिपूषाअसुरोदधातुनः स्वस्तिद्यावापृथिवीसुचेतुना ११ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्ति भुवनस्ययस्पतिः । बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवन्तुनः १२ विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तयै । देवाअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः १३ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति । स्वस्तिन इन्द्रश्चाग्निश्चस्वस्तिनोअदितेकृधि १४ स्वस्तिपन्थामनुचरेमसूर्याचन्द्रमसाविव । पुनर्ददताघ्नताजानतासंगमेमहि १५ ॥ ७ ॥

५२ प्रइन्द्रांवाश्वधृष्णुयाचाँमरुद्भिर्ऋक्वभिः । येअद्रोघमनुष्वधंश्रवोमदन्ति यज्ञियाः १ तेहिस्थिरस्यशवंसःसखायःसन्तिधृष्णुया । तेयामन्नाधृषद्विनस्त्मनां पान्तिशाश्वतः २ तेस्पन्द्रासोनोक्षणोऽतिष्कन्दन्तिशर्वरीः । मरुतामधामहो दिविक्षमाचमन्महे ३ मरुत्सुवोदधीमहिस्तोमंयज्ञंचधृष्णुया । विश्वेयेमानुषा युगापान्तिमर्त्यरिपः ४ अहँन्तोयेसुदानवोनरोअसामिशवसः। प्रयज्ञंयज्ञियेभ्यो दिवोअर्चामरुद्भ्यः ५ ॥ ८ ॥ आरुक्मैरायुधानरंक्रुप्वाऋष्टीरंसृक्षत । अन्वेनाँ-अहंविद्युतोमरुतोजज्झतीरिवभानुरर्तत्मनादिवः ६ येवावृधन्तपार्थिवायउरा-वन्तरिक्षआ । वृजनेवानदीनासधस्थेवांमहोदिवः ७ शर्धोमारुतमुच्छंससत्य-शवसमृभ्वसम् । उतस्मतेशुभेनरःप्रस्पन्द्रायुजतत्मना ८ उतस्मतेपरुष्णया-

मूर्णावसतशुन्ध्यवः । उतप्व्यारथानामद्रिभिन्दुन्त्योजसा ९ आपथयोविप-
थयोऽन्तस्पथाअनुपथाः । एतेभिर्मह्यंनामभिर्यज्ञंविष्टारओहते १० ॥ ३ ॥
अधानरोन्योहतेऽधानियुतओहते । अधापारावताइतिचित्रारूपाणिदर्शा ११
छन्दःस्तुभःकुभन्यवउत्समाकारिणोनृतुः । तेमेकेचिन्नतायवऊमाआसन्दृशि-
त्विपे १२ यक्रुप्वाक्रष्टिर्विद्युतःकवयःसन्तिवेधसः । तमृपेमारुतंगणंनमस्या
रमयागिरा १३ अच्छंक्रपेमारुतंगणंदानामित्रंनयोपणा । दिवोवाधृष्णवओ-
जसास्तुताधीभिरिषण्यत १४ नूमन्वानएषांदेवाँअच्छानवक्षणा । दानासंचेत
सूरिभिर्यामश्रुतेभिराजिभिः १५ प्रयेमेवन्ध्वेयेगांवोचन्तसूरयःपृश्निंवोचन्तमा-
तरम् । अधापितरंमिष्मिणंरुद्रंवोचन्तशिक्वसः १६ सप्तमेसप्तशाकिनएकमे-
काशताददुः । यमुनायामधिश्रुतमुद्राधोगव्यंमृजेनिराधोअश्व्यंमृजे १७॥१०॥

यथा । स्यन्नाअश्वाइवाध्वनोविमोचनेवियद्वतन्तएन्यः ७ आयातमरुतोदिव आन्तरिक्षादमादुत । मावस्थातपरावतः ८ मावोरसानेतभाकुभाकुमुर्मावः सिन्धुर्निरीरमत् । मावःपरिष्ठात्सरयुःपुरीषिण्यस्मेइत्सुम्नमस्तुवः ९ तंवःशर्धो रथानांत्वेषंगणंमारुतंनव्यसीनाम् । अनुप्रयन्तिवृष्टयः १० ॥ १२ ॥ शर्धंशर्धं वएषांव्रातंव्रातंगणंगणंसुशस्तिभिः । अनुक्रामेमधीतिभिः ११ कस्माअद्यसुजातायरातहव्यायप्रयंयुः । एनायामेनमरुतः १२ येनंतोकायतनंयायधान्यं१ वीजंवहध्वेअक्षितम् । अस्मभ्यंतद्धत्तनयद्वईमहेराधोविश्वायुसौभगम् १३ अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्यमरातीः।वृष्टीशंयोरापउस्रियेपुजंस्यामं मरुतःसह १४ सुदेवःसंमहासतिसुवीरोनरोमरुतःसमत्यैः । यंत्रायध्वेस्याम

ते १५ स्तुहिभोजान्स्तुवतोअस्यया॑मन्नि॒रण्न्गावो॒नय॑वसे । यु॒तःपू॒र्वाँइ॒व॒स-
खी॑रनु॒ह्वयगिरागृ॑णीहिका॒मिनः॑ १६ ॥ १३ ॥

प्र शर्धाय पञ्चदश ऋचाश्व आत्रेयो मरुतो जगती । उपान्त्या त्रिष्टुप् ।

५४ प्रशर्धा॑यमारु॒ताय॒स्वभा॑नवइ॒मांवाच॑मनजापर्वत॒च्युते॑ । घर्म॒स्तुभं॑दि॒व
आपृ॒ष्ठय॒र्व॑नेद्यु॒म्नश्र॑वसेमहि॒नृम्ण॑मर्चत १ प्रवो॑मरुतस्तवि॒षाउ॑दन्य॒वो॑वयो॒वृधो॑
अश्व॒युजः॑पारि॒ज्रयः॑ । सं॑वि॒द्युता॒दध॑ति॒वाशा॑ति॒त्रितः॑स्वर॒न्त्यापो॑अ॒न्ना॒पारि॑ज्रयः २
वि॒द्युन्म॑हसो॒नरो॑अश्म॒दिद्य॒वो॑वा॒तत्वि॑षो॒मरु॑तः॒पर्व॑त॒च्युतः॑ । अ॒व॒द्या॒चि॒न्मुहु॒रा
ह्लादु॑नी॒वृतः॑स्तन॒यद॑मारु॒साउ॑दौ॒जसः॑ ३ व्य॑१॒॑क्तून्द्रा॒व्यहा॑निशि॒क्वसो॒व्य॑१॒॑न्त-
रि॑क्षं॒विरजा॒॑सिधू॒तयः॑ । वि॒यद॒ञ्जा॒॒अ॒ज॒थ॒नावई॑यथा॒विदु॒र्गाणि॑मरुतो॒नाह॑रिष्यथ ४
तद्धी॒यंवो॑मरुतोमहित्व॒नंदी॒र्घंत॑ताना॒सूर्यो॑नयोजनम् । एता॒नया॑मे॒अगृ॑भीतशो॒चि

पोऽनश्वदायन्नयातनागिरिम् ५ ॥ १४ ॥ अभ्राजिशर्धोमरुतोयदर्णसंमोपथा वृक्षंकपनेववेधसः।अधस्मानोअरमतिंसजोषसश्चक्षुरिवयन्तमनुनेषथासुगम् ६ नसजीयतेमरुतोनहन्यतेनस्रेधतिनव्यथतेनरिष्यति। नास्यरायउपदस्यन्तिनो-तयऋषिंवायंराजानंवासुपूदथ ७ नियुत्वन्तोग्रामजितोयथानरोऽर्यमणोनमरुतः कवन्धिनः। पिन्वन्त्युत्संयदिनासोअस्वरन्व्युन्दन्तिपृथिवीमधोअन्धसा ८ प्र-वत्वतीयंपृथिवीमरुद्भ्यःप्रवत्वतीद्यौर्भवतिप्रयद्भ्यः। प्रवत्वतीःपथ्याअन्तरिक्ष्याः प्रवत्वन्तःपर्वताजीरदानवः ९ यन्मरुतःसभरसःस्वर्णरःसूर्यंदिवितेमदथादिवो नरः। नवोऽश्वाःश्रथयन्ताहसिस्रतःसद्योअस्याध्वनःपारमंशुथ १० ॥ १५ ॥ अंसेषुवक्रुष्टयःपत्सुखादयोवक्षःसुरुक्मामरुतोरथेशुभः। अग्निभ्राजसोविद्युतो गभस्त्योःशिप्राःशीर्षसुवितंताहिरण्ययीः ११ तंनाकमर्योअगृभीतशोचिषंरुश-

त्पिप्पलंमरुतोविधूनुथ । समंज्यन्तवृजनातित्विषन्तयत्स्वरन्तिघोषंवितन्तमृता-
यवः १२ युष्मादत्तस्यमरुतोविचेतसोरायःस्यामरथ्योऽवयस्वतः । नयोयुच्छं-
तितिष्योऽयथादिवोऽस्मेरारन्तमरुतःसहस्त्रिणम् १३ यूयंरयिंमरुतःस्पार्हवीरं
यूयमृषिंमवथसामविप्रम् । यूयमवन्तंभरतायुवाजंयूयंधत्थराजानंश्रुष्टिम-
न्तम् १४ तद्वोयामिन्द्रविणंसधऊतयोयेनास्वर्णतनामनूरभि । इदंसुमेमरु-
तोहर्यतावचोयस्यतरेमतरसाशतंहिमाः १५ ॥ १६ ॥

अ यज्यवो दश श्यावाश्च आत्रेयो मरुतो जगती । अन्त्या त्रिष्टुप् ।

५५ प्रयंज्यवोमरुतोभ्राजदृष्टयोवृहद्वयोदधिरेरुक्मवक्षसः । ईयन्तेअश्वैःसु-
यमेभिराशुभिःशुभंयातामनुरथाअवृत्सत १ स्वयंदधिध्वेतविद्यीयथाविदबृह-
न्महान्तऽविंयाविराजथ । उतान्तरिक्षंममिरेव्योजसाशुभंयातामनुरथाअवृत्स-

त २ साकंजाताःसुभ्वःसाकमुक्षिताः श्रियेचिदाप्तरंवावृधुर्नरः । विरोकिणः सूर्यस्येवरश्मयःशुभंयातामनुरथाअवृत्सत ३ आभूषेण्यंवोमरुतोमाहित्वनंदिद्युक्षेण्यंसूर्यस्येवचक्षणम्।उतोअस्माँअमृतत्वेदधातनशुभंयातामनुरथाअवृत्सत ४ उदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणः । नवोदस्राउपदस्यन्तिधेनवःशुभंयातामनुरथाअवृत्सत ५ ॥ १७ ॥ यादश्वान्वूर्पुषतीरयुग्ध्वंहिरण्ययान्प्रत्यत्काँअमुग्ध्वम्। विश्वाइत्स्पृधोमरुतोव्यस्यथशुभंयातामनुरथाअवृत्सत ६ नपर्वतानन्योवरन्तवोयत्राचिध्वंमरुतोगच्छथेदुतत् । उतद्यावापृथिवीयाथनापरिशुभंयातामनुरथाअवृत्सत ७ यत्पृश्न्यंमरुतोयच्चनूतनंयदुद्यतेवसवोयच्चशस्यते । विश्वस्यतस्यंभवथानवेदसःशुभंयातामनुरथाअवृत्सत ८ मृळतंनोमरुतोमावधिष्टनास्मभ्यंशर्मबहुलंवियन्तन । अधिस्तोत्रस्यसख्यस्यगातनशुभं

यातामनुरथाअवृत्सत १ यूयमस्मान्नयतवस्योअच्छानिरँहतिभ्योमरुतोगृणा-
नाः । जुषध्वंनोहव्यदातिंयजत्रावयंस्यामपतयोरयीणाम् १० ॥ १८ ॥

अग्ने नव श्यावाश्च आत्रेयो मरुतो वृहती । तृतीयासप्तम्यौ सतोवृहत्यौ ।

५६ अग्रेशर्धन्तमागुणंपिष्टंरुक्मेभिरञ्जिभिः । विशोअद्यमरुतामवह्वयेदिव-
श्चिद्रोचनादधि १ यथाचिन्मन्यसेहृदातादिन्मेजग्मुराशसः । येतेनेदिष्ठंहवं-
नान्यागमन्तान्वर्धभीमसंदृशः २ मीळ्हुष्मंतीवपृथिवीपराहतामर्दन्त्येत्यस्मदा ।
ऋक्षोनवोमरुतःशिमीवाँअमोदुध्रोगौरिवभीमयुः ३ नियेरिणन्त्योजसावृथा
गावोनदर्धुरः । अश्मानंचित्स्वर्यं१पर्वतंगिरिंरज्यांवयन्तियामभिः ४ उत्तिष्ठ
ननमैषांस्तोमैःसमुक्षितानाम्मरुतांपुरुतममूर्ज्यंगवांसगोमिवह्वये ५ ॥ १९ ॥
युङ्ध्वरुपोरथेयुङ्धरथेपुरोहितः । युङ्धहरीअजिरावुरिवोळ्हवेवहिष्ठावुरिवोळ्हवे ६ ॥२२१॥

उतस्यवाज्यरुपस्तुविष्वणिरिहस्मधायिदर्शतः । मावोयामेपुमरुतश्चिरंकरत्प्रतं रथेपुचोदत ७ रथंनुमारुतंवयंश्रवस्युमाहुवामहे । आयास्मिन्तस्थौसुरणानि बिभ्रतीसचामरुत्सुरोदसी ८ तंवःशर्धोरथेशुभंत्वेषंपनस्युमाहुवे । यास्मिन्त्सुजातासुभगामहीयतेसचामरुत्सुमीळ्हुषी ९ ॥ २० ॥ इति शाकलसंहितायां पञ्चमे मण्डले चतुर्थोऽनुवाकः ॥ ४ ॥

आ रुद्रासोष्टौ श्यावाश्व आत्रेयो मरुतो जगती । अन्त्ये त्रिष्टुभौ ।

५७ आरुद्रासइन्द्रवन्तःसजोषसोहिरण्यरथाः सुविताय गन्तन । इयंवो अस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्सांउदन्यवे १ वाशीमन्तऋष्टिमन्तोमनीषिणःसुधन्वानइषुमन्तोनिषङ्गिणः । स्वश्वाःस्थसुरथाःपृश्निमातरःस्वायुधासः

रुतोयाथनाशुभंम् २ धूनुथयांपर्वतान्दाशुषेवसुनिवोवनाजिहतेयामनोभिया ।
कोपयंथपृथिवींपृश्निमातरःशुभेयदुग्राःपृषतीरयुग्ध्वम् ३ वातंत्विषोमरुतोवर्प-
र्णिंजोयुमाइववसुसंदृशःसुपेशसः । पिशङ्गाश्वाअरुणाश्वाअरेपसःप्रत्वक्षसो
महिनाद्यौरिवोरवः ४ पुरुद्रप्साअञ्जिमन्तःसुदानवस्त्वेषसंदृशोअनवभ्रराधसः ।
सुजातासोजनुषारुक्मवक्षसोदिवोअर्काअमृतंनामभेजिरे ५॥ २१ ॥ ऋष्टयोवो
मरुतोअंसयोरधिसहओजोबाह्वोर्बलंहितम्।नृम्णाशीर्षस्वायुधारथेषुवोविश्वो
वःश्रीरधितनूषुपिपिशे ६ गोमदश्वावद्रथवत्सुवीरंचन्द्रवद्राधोमरुतोददानः।प्रशं-
सितनःकृणुतरुद्रियासोभक्षीयवोऽवसोदैव्यस्य ७ हुवेनरोमरुतोमृळतानस्तुवीम-
घासोअमृताऋतज्ञाः । सत्यश्रुतःकवयोयुवानोबृहद्गिरयोबृहदुक्षमाणाः८॥२२॥

५८ तꣳ नूनंतविषीमन्तमेषांस्तुषेगणंमारुतंनव्यसीनाम् । यआश्वश्वाअमवद्वहन्तउतेशिरेअमृतस्यस्वराजः १ त्वेषंगणंतवसंखादिहस्तंधुनिव्रतंमायिनंक्षातिवारम् । मयोभुवोयेअमिताअहित्वावन्दस्वविप्रतुविराधसोनॄन् २ आवोयन्तूदवाहासोअद्यवृष्टिंयेविश्वेमरुतोजुनन्ति । अयंयोअग्निर्मरुतःसमिद्धएतंजुषध्वंकवयोयुवानः ३ यूयंराजानमिर्यंजनायविभ्वतꣳजंजनयथायजत्राः । युष्मदेतिमुष्टिहावाहुजूतोयुष्मत्सदश्वोमरुतःसुवीरः ४ अराड्वेदचरमाअहैवप्रप्रजायन्तेअर्कवामहोभिः। पृश्नेःपुत्राउपमासोरभिष्ठाःस्वयामत्यामरुतःसंमिमिक्षुः५ यत्प्रायासिष्टुपूर्पतीभिरश्वैर्वीळुपविभिर्मरुतोरथेभिः । क्षोदन्तआपोरिणतेवनान्यवोस्त्रियोवृषभःक्रन्दतुद्यौः ६ प्रथिष्टयामन्पृथिवीचिदेषांभेतेवगर्भस्वमिच्छवो

धुः । वातान्ह्यश्वान्धुर्यायुयुज्रेवर्षस्वेदंचक्रिरुद्रियासः ७ हयेनरोमरुतोमृळतानस्तुवीमघासोअमृताऋतज्ञाः । सत्यश्रुतःकवयोयुवानोबृहद्गिरयोवृहदुक्षमाणाः ८ ॥ २३ ॥

प्र वोष्टौ श्यावाश्व आत्रेयो मरुतो जगती । अन्त्या त्रिष्टुप् ।

५१ प्रवःस्पळंक्रन्त्सुवितायदावनेऽचाँदिवेप्रपृथिव्याऋतंभरे । उक्षन्तेअश्वान्तरुषन्तआरजोऽनुस्वंभानुंश्रथयन्तेअर्णवैः १ अमादेषांभियसाभूमिरेजतिनौर्न पूर्णाक्षरतिव्यथिर्यती । दूरेदृशोयेचितयन्तएमभिरन्तर्महेविदथेयेतिरेनरः२गवामिवश्रियसेशृङ्गमुत्तमंसूर्योनचक्षूरजसोविसर्जने । अत्याइवसुभ्वश्चारवःस्थनमर्याइवश्रियसेचेतथानरः ३ कोवोमहान्तिमहतामुदश्नवत्कस्काव्यामरुतःको हपौंस्या । यूयंहभूमिंकिरणंनरेजथप्रयद्ध्वंसुवितायदावने ४ अश्वाइवेदरुषासः ॥२२३॥

सर्वन्ववः शूराइवप्रयुधः प्रोतयुयुधुः। मर्याइवसुवृधोवावृधुर्नरः सूर्यस्यचक्षुः प्रमिनन्तिवृष्टिभिः ५ तेअज्येष्ठाअकनिष्ठासउद्भिदोऽमध्यमासोमहसाविवावृधुः । सुजातासोजनुषापृश्निमातरोदिवोमर्याआनोअच्छाजिगातन ६ वयोनयेश्रेणीःपुरोजसान्तान्दिवोवृहतःसानुनस्परि । अश्वासएषामुभयेयथाविदुःप्रपर्वतस्यनभनूँरचुच्यवुः ७ मिमातुद्यौरदितिर्वीतयेनःसंदानुचित्राउषसोयतन्ताम् । आचुच्यवुर्दिव्यंकोशमेतत्रुषेरुद्रस्यमरुतोगृणानाः ८ ॥ २४ ॥

ईळेष्टौ श्यावाश्व आत्रेयो मरुतो मरुतो वाग्निश्च त्रिष्टुप्। अन्त्ये जगत्यौ।

६० ईळेअग्निंस्ववसंनमोभिरिहप्रसत्तोविचयत्कृतंनः।रथैरिवप्रभरेवाजयद्भिः प्रदक्षिणिन्मरुतांस्तोममृध्याम् १ आयेतस्थुःपृषतीषुश्रुतासुसुखेषुरुद्रामरुतोर-

केष्टुकोनविंशतिः श्यावाश्व आत्रेयो गायत्री । पञ्चम्यनुष्टुप् । नवमी सतोबृहती । पञ्चम्यादेचतसृणां त्रिष्टुभां त्रिष्टुप् । नवम्याः पुरुमीढो वैददश्विः । दशम्यास्तरन्तो वैददश्विः । अन्त्यानां तिसृणां रथवीतिर्दाल्भ्यः । शिष्टानां मरुतः ।

६१ केष्टानरःश्रेष्ठतमायएकंएकआयय । परमस्याःपरावतः १ कं१वो ऽश्वाः का३भीशवःकथंशेककथायय । पृष्ठेसदोनसोर्यमः २ जघनेचोदएषांविसक्थानिनरोयमुः । पुत्रकुथेनजनयः ३ परावीरासएतनमयांसोभद्रजानयः । अग्रितपोयथासथ ४ सनत्साश्व्यंपशुमुतगव्यंशतावयम् । श्यावाश्वस्तुतायुयादोर्वीरायोपववृहत् ५ ॥ २६ ॥ उतत्वास्त्रीशशीयसीपुंसोभवतिवस्यसी । अदेवत्रादराधसः ६ वियाजानातिजसुरिंवितृप्यन्तंविकामिनम् । देवत्राकंणुतेमनः ७

।ध नाचिदुग्राजिहतेनिवोभियापृथिवीचिद्रेजतेपर्वताश्चित् २ पर्वताश्चिन्महिवृ-
द्धोविभ्रायदिवश्चित्सानुरिजतस्वनेवः। यत्क्रीळथमरुतऋष्टिमन्तआपइवसध्र्यञ्चो
धवाणृचे ३ वराडुवेद्रैवतासोहिरण्यैरभिस्वधाभिस्तन्वःपिपिश्रे। श्रियेश्रेयांसस्त-
सोरथेपुत्रामहांसिचक्रिरेतनूषु ४ अज्येष्ठासोअकनिष्ठासएतेसंभ्रातरोवावृधुः
सौभगाय। युवापितास्वपारुद्रएषांसुदुघापृश्निःसुदिनामरुद्भ्यः ५ यदुत्तमेमरुतो
मध्यमेवायद्वावमेसुभगासोदिविष्ठ। अतोनोरुद्राउतवान्वस्यायेविद्याद्धविषो
यद्यजाम ६ अग्निश्चयन्मरुतोविश्ववेदसोदिवोवह्ध्वउत्तरादधिष्णुभिः। तेमन्द-
सानाधुनयोरिशादसोवामंधत्तयजमानायसुन्वते ७ अग्नेमरुद्भिःशुभयद्भिर्ऋक्व-
भिः सोमंपिवमन्दसानोगणश्रिभिः। पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानरम्र-
दिवाकेतुनासजूः ८ ॥ २५ ॥

केष्टैकोनविंशतिः श्यावाश्च आत्रेयो गायत्री । पञ्चम्यनुष्टुप् । नवमी सतोबृहती । पञ्चम्यादि-
चतस्रृणां त्रयीयसी तरन्तमाहिषी । नवम्याः पुरुमीढो वैददश्विः । दशम्यास्तरन्तो
वैददश्विः । अन्त्यानां तिसृणां रथवीतिर्दाल्भ्यः । शिष्टानां मरुतः ।

६१ केष्टानरःश्रेष्ठतमायएकंएकआयय । परमस्यांःपरावतः १ कं१वोऽश्वाः
का३भीशवःकथंशोककथायय । पृष्ठेसदोनसोर्यमः २ जघनेचोदएषांविसक्था-
निनरोयमुः । पुत्रकृथेनजनयः ३ परांवीरासएतनमर्यांसोभद्रंजानयः । अग्नित-
पोयथासथ ४ सनत्साश्व्यंपशुमुतगव्यंशतावयम् । श्यावाश्वस्तुताययादोर्वी-
रायोपवबृहत् ५ ॥ २६ ॥ उतत्वास्त्रीशर्शीयसीपुंसोभवतिवर्यसी । अदेव-
त्रादराधसः ६ वियाजानातिजसुरिंवितृष्यन्तंविकामिनम् । देवत्राकृणुतेमनः ७

उतघानेमोअस्तुतःपुमाँइतिब्रुवेपणिः । सवैरंदेयइत्समः ८ उतमेऽरपद्युवति-
मँमन्दुपीप्रतिश्यावायंवर्तनिम् । विरोहिंतापुरुमील्हायंयेमतुर्विप्रायदीर्घयशसे९
योमेधेनूनांशतंवैदंदश्विर्यथाददत् । तरन्तइवमंहना १० ॥ २७ ॥ यईंवहन्त
आशुभिःपिबन्तोमदिरंमधु । अत्रश्रवाँसिदधिरे ११ येषाँश्रियाधिरोदसीविभ्रा-
जन्तेरथेष्वा । दिविरुक्मइवोपरि १२ युवासमारुतोगणस्त्वेषरथोअनेद्यः । शुभं-
यावाप्रतिष्कुतः १३ कोवेदनूनमेषांयत्रामदन्तिधूतयः । ऋतजाताअरेपसः १४
यूयंमर्तंविपन्यवःप्रणेतारंइत्थाधिया । श्रोतारोयामहूतिषु १५ ॥ २८ ॥
तेनोवसूनिकाम्यापुरुश्चन्द्रारिशादसः । आर्यज्ञियासोवव्रत्तन १६ एतंमेस्तोम-
मूर्म्येदाम्न्यायुपरावह । गिरोदेविरथीरिव १७ उतमेवोचतादितिसुतसोमेरथं-

वीतौ । नकामोअपवेतिमे १८ एपक्षेतिरथवीतिर्मघवागोमंतीरनु । पर्वतेष्व-
पश्रितः १९ ॥ २९ ॥

ऋतेन नव श्रुतविदात्रेयो मित्रावरुणौ त्रिष्टुप् ।

६२ ऋतेनऋतमपिहितंध्रुवंवांसूर्यस्ययत्रविमुचन्त्यश्वान् । दशशतासहस्र-
स्थुस्तदेकंदेवानांश्रेष्ठंवपुषामपश्यम् १ तत्सुवांमित्रावरुणामहित्वमीर्मातस्थु-
षीरहभिर्दुदुक्षे । विश्वांःपिन्वथःस्वसरस्यधेनाअनुवामेकःपविराववर्त २ अधा-
रयतंपृथिवीमुतद्यांमित्रराजानावरुणामहोभिः । वर्धयतमोषधीःपिन्वतंगाअव
वृष्टिंसृजतंजीरदानू ३ आवामश्वासःसुयुजोवहन्तुयुतरश्मयउपयन्त्ववर्वाक् ।
घृतस्यनिर्णिगनुवर्ततेवामुपासिन्धवःप्रदिविक्षरन्ति ४ अनुश्रुतामुमतिंवर्धदुर्वी-

हिरण्ययंजुपारक्षेमाणा । नमस्वन्ताधृतदक्षाधिगर्तेमित्रासाथेवरुणेळास्वन्तः ५
॥ ३० ॥ अक्रंविहस्तासुकृतेपरस्पायंत्रासाथेवरुणेळास्वन्तः । राजानाक्षत्रम-
हणीयमानासहस्रस्थूणंबिभृथःसहद्वौ ६ हिरण्यनिर्णिगयोअस्यस्थूणाविभ्राज-
तेदिव्यश्वाजनीव । भद्रेक्षेत्रेनिमितातिल्विलेवासनेममध्वोअधिगर्त्यस्य ७
हिरण्यरूपमुषसोव्युष्टावयःस्थूणमुदितासूर्यस्य । आरोहथोवरुणमित्रगर्तमतश्च-
क्षाथेअदितिंदितिंच ८ यद्वंहिष्ठंनातिविधेसुदानूअच्छिद्रंशर्मभुवनस्यगोपा ।
तेननोमित्रावरुणाविचृतंसिषासन्तोजिगीवांसःस्याम ९ ॥ ३१ ॥ इति शाकल-
कसंहितायां चतुर्थाष्टके तृतीयोऽध्यायः ॥ ३ ॥

ऋतस्यसम्राचेनानाजागतंवरुणंपङ्क्त्यन्तंतुपश्चिकेतपद्रातहव्यआचिकितानानुष्टुभंतुपाळित्थापञ्चयजतः
मवोगायत्रंत्रीरोचनाचतुष्कमुरुचक्रिःपुरूरुणागायत्रंत्वानस्तृचंबाहुवृक्तआमित्रौळिहंयदद्यदशपौर-
आश्विनंतदानुष्टुभंतुकूष्टुमतिनवावस्युःपाङ्क्तमाभातिपञ्चात्रिःमातर्यावाणाश्विनौनवसप्तवधिरुपुष्णि-
गादिचतुर्थीत्रिष्टुप्पञ्चानुष्टुभोन्त्याःपञ्चगर्भस्राविण्यउपनिपन्महेदशसत्यश्रवाउषस्यंतुपाङ्क्तंद्युतद्यामांन
पङ्क्तंजतेपञ्चत्र्यावाश्वःसावित्रंतुजागतंतत्सवितुर्नवगायत्रमाद्यानुष्टुवच्छदशात्रिःपार्जन्यमुपाद्यास्तिस्रो
जगत्यउपान्त्यानुष्टुब्वाळित्थातृचंपार्थिवमानुष्टुभंयत्सम्राजेष्टौवारुणमिन्द्राग्नीपलैन्द्राग्नमानुष्टुभंविराट्पू-
र्वान्तंमवोनवैवयामरुन्मारुतमतिजागतंबार्हस्पत्योभरद्वाजःपङ्क्तंमण्डलमपश्यत्त्वंह्यग्नेसप्तोन ।

ऋतस्य सम्राचेनाना आत्रेयो मित्रावरुणौ जगती ।

६३ ऋतस्यगोपावधितिष्ठथोरुयंसत्यधर्माणापरमेव्योमनि । यमत्रमित्रावरुणावथोयुवंतस्मैवृष्टिर्मधुमत्पिन्वतेदिवः १ सम्राजावस्यभुवनस्यराजथोमित्रावरुणाविदर्थेस्यृदृशा । वृष्टिंवांराधोअमृतत्वमीमहेद्यावापृथिवीविचरन्तितु-

न्यर्वः २ सम्राजाउग्रावृषभादिवस्पतीपृथिव्यामित्रावरुणाविचर्षणी । चित्रेभिः-
रभ्रैरुपतिष्ठथोरवंद्यांवर्षयथोअसुरस्यमायया ३ मायावांमित्रावरुणादिविश्रिता
सूर्योज्योतिश्चरतिचित्रमायुधम् । तमभ्रेणवृष्टयागूहथोदिविपर्जन्यद्रप्सामधुम-
न्तईरते ४ रथंयुञ्जतेमरुतःशुभेसुखंशूरोनमित्रावरुणागविष्टिषु । रजांसिचित्रा
विचरन्तितन्यवोदिवःसम्राजापयसानउक्षतम् ५ वाचंसुमित्रावरुणाविरावतीं
पर्जन्यश्चित्रांवदतित्विषीमतीम् । अभ्रावसतमरुतःसुमाययाद्यांवर्षयतमरुणा-
मरेपसम् ६ धर्मणामित्रावरुणाविपश्चिताव्रतारक्षेथेअसुरस्यमायया । ऋतेन
विश्वंभुवनंविराजथःसूर्यमाधत्थोदिविचित्र्यंरथम् ७ ॥ १ ॥

वरुणं सप्तार्चनाना आत्रेयो मित्रावरुणावनुष्टुप्। अन्त्या पङ्क्तिः ।

६४ वरुणंवोरिशादसमृचामित्रंहवामहे । परिव्रजेववाह्नोजंगन्वांसास्वर्ण-

रम् १ तावाहवासुचेतुनाप्रयन्तमस्माअर्चते । शेवंहिजार्यंवांविश्वासुक्षासुजो-
गुवे २ यन्नूनमश्यांगतिंमित्रस्यंयायांपथा । अस्यंप्रियस्यशर्मण्यहिंसानस्यस-
श्चिरे ३ युवाभ्यांमित्रावरुणोपमंघेयामृचा । यद्रक्षयेमघोनांस्तोतृणांचस्पूर्धसे ४
आनोंमित्रसुदीतिभिर्वरुणश्चसुघस्थआ । स्वेक्षयेमघोनांसखींनांचवृधसे ५ युवं
नोयेषुवरुणक्षत्रंबृहच्चविभृथः । उरुणोवाजंसातयेकृतंरायेस्वस्तये ६ उच्छन्त्यां
मेयजतादेवक्षत्रेरुशंदृवि । सुतंसोमंनहस्तिभिरापृड्भिर्धावतंनरा विभ्रंतावर्चना-
नंसम् ७ ॥ २ ॥

यश्चिकेत पङ्क्तिदृष्य आत्रेयो मित्रावरुणावनुष्टुप् । अन्त्या पङ्क्तिः ।

६५ यश्चिकेतससुकर्तुर्देवत्रासत्रवीतुनः । वरुणोयस्यदर्शतोमित्रोवावनतेगिरः १ तांहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा । तासत्पतीक्रतावृधक्रतावानाज-

नेंजने २ तावांमियानोऽवंसेपूर्वाउपंब्रुवेसचा । स्वश्वांसःसुचेतुनावाजाँअभिग्र-
दावनें ३ मित्रोअंहोश्चिदादुरुक्षयांयगातुंवनते । मित्रस्यहिप्रतूर्वतःसुमतिरास्ते
विधतः ४ वयंमित्रस्यावंसिस्यामंसप्रथस्तमे । अनेहंसत्वोतयःसत्रावरुणशो-
पसः ५ युवंमित्रेमंजनंयथःसंचनयथः । मामघोनःपरिख्यतंमोअस्माकमृ-
षीणांगोपीयेनउरुष्यतम् ६ ॥ ३ ॥

आ चिकितान पड्रातहव्य आत्रेयो मित्रावरुणावनुष्टुप् ।

६६ आचिंकितानसुक्रतूंदेवौमर्तरिशादसा । वरुंणायऋतपेशसेदधीतप्रयंसे
महे १ ताहिक्षत्रमविंहुतंसम्यगंसुर्यं१माशाते । अधंव्रतेवमानुंस्वं१र्णधांयिद-
शेतम् २ तावामेरथानामुर्वींगव्यूतिमेषाम् । रातहंव्यस्यसुष्टुतिंदधृक्स्तोमैर्म-
नामहे ३ अधाहिकाव्यांयुवंदक्षस्यपूर्भिरंद्रुहा । निकेतुनाजनानांचिकेथेंपूतद-

क्षसा ४ तद्दतंपृथिविबृहच्छ्रवएषक्रपीणाम् । जरयसानावरंपृथ्वातिक्षरन्तियामभिः ५ आयद्दामीयचक्षसामित्रंवयंचसूरयः । व्यचिष्ठेबहुपाय्येयतेमहिस्वराज्ये ६ ॥ ४ ॥

वळित्था पञ्च यजत आत्रेयो मित्रावरुणावनुष्टुप् ।

६७ वळित्थादेवनिष्कृतमादित्यायजतंबृहत् । वरुणमित्रार्यमन्वर्षिष्ठंक्षत्रमाशाथे १ आयद्योनिंहिरण्ययंवरुणमित्रसदथः । धर्तारंचर्षणीनांयन्तंसुम्नंरिशादसा २ विश्वेहिविश्ववेदसोवरुणोमित्रोअर्यमा । व्रतापदेवसश्चिरेपान्तिमर्त्यंरिषः ३ तेहिसत्याऋतस्पृशंऋतावानोजनेजने । सुनीथासःसुदानवोंहोश्चिदुरुचक्रयः ४ कोनुवांमित्रास्तुतोवरुणोवातनूनाम् । तत्सुवामेपतेमतिरित्रम्युएपतेमतिः ५ ॥ ५ ॥

६८ प्रवोमित्रायगायतवरुणायविपागिरा। महिक्षत्रावृतंबृहत् १ सम्राजा याघृतयोनीमित्रश्चोभावरुणश्च। देवादेवेषुप्रशस्ता २ तानःशक्तंपार्थिवस्यमहोरायोदिव्यस्य। महिवांक्षत्रंदेवेषु ३ ऋतमृतेनसपन्तेपिरंदक्षमाशाते। अद्रुहादेवौवर्धते ४ वृष्टियावारीत्यापेपस्पतीदानुमत्याः। बृहन्तंगर्तमाशाते ५ ॥६॥

त्री रोचना चतुष्कमुरुचक्रिरात्रेयो मित्रावरुणौ त्रिष्टुप्।

६९ त्रीरोचनावरुणत्रीरुतद्यून्त्रीणिमित्रधारयथोरजांसि। वावृधानावमतिंक्षत्रियस्यानुव्रतंरक्षमाणावजुर्यम् १ इरावतीर्वरुणधेनवोवांमधुमद्वांसिन्धवोमित्रदुह्रे। त्रयस्तस्थुर्वृषभासस्तिसृणांधिषणानांरेतोधाविद्युमन्तः २ प्रातर्देवीमदितिंजोहवीमिमध्यंदिनउदितासूर्यस्य। रायेमित्रावरुणासर्वतातेळेतोकायतनं- ॥२२९॥

यायशंयोः ३ यायर्तारारजंसोरोचनस्योतादित्यादिव्यापार्थिवस्य । नवांदेवा अमृताआमिनन्तिव्रतानिंमित्रावरुणाध्रुवाणि ४ ॥ ७ ॥

पुरूरुणा चतुष्कपुरुचक्रिरात्रेयो मित्रावरुणौ गायत्री ।

७० पुरूरुणाचिद्ध्यस्त्यवोनूनंवांवरुण।मित्रवंसिवांसुमतिम् १ तावांसम्यग्द्रुह्वाणेषमश्यामधायसे । वयंतेरुद्रास्याम २ पातंनोरुद्रापायुभिरुतत्रायेथांसुत्रात्रा । तुर्यामदस्यून्तनूभिः ३ माकस्यांद्भुतक्रतूयक्षंभुजेमातनूभिः । माशेषसामातनंसा ४ ॥ ८ ॥

आ नस्तूचं वाहुवृक्त आग्नेयो मित्रावरुणौ गायत्री ।

७१ आनोगन्तंरिशादसावरुणमित्रंवर्हणा । उपेमंचारुमध्वरम् १ विश्वस्य

हिप्रचेतसावरुणमित्रराजथः । ईशानापिप्यतंधियः २ उपनःसुतमागंतंवरुण मित्रदाशुषः । अस्यसोमस्यपीतये ३ ॥ ९ ॥

आ मित्रे तृचं वाहुवृक्त आत्रेयो मित्रावरुणावुष्णिक् ।

७२ आमित्रेवरुणेवयंगीर्भिर्जुहुमोअत्रिवत् । निवर्हिपिसदतंसोमपीतये १ व्रतेनस्थोध्रुवक्षेमाधर्मणायातुयज्जना । निवर्हिपिसदतंसोमपीतये २ मित्रश्चं नोवरुणश्चजुषेतांयज्ञमिष्टये । निवर्हिपिसदतांसोमपीतये ३ ॥ १० ॥ इति शाकलर्क्संहितायां पञ्चमे मण्डले पञ्चमोऽनुवाकः ॥ ५ ॥

यदद्य दश पौर आत्रेयोऽश्विनावनुष्टुप् ।

७३ यदद्यस्थःपरावतियदर्वावत्यश्विना । यद्वापुरूपुरुभुजायदन्तरिक्षआगतम् १ इहत्यापुरुभूतमापुरूदंसासिनिध्रता । वरस्यायाम्यध्रिगूहुवेतुविष्टमा ॥२३०॥

भुजे २ ईर्मान्यद्वपुषेवपुंश्चक्रंरथस्ययेमथुः । पर्यन्यानाहुषायुगामह्वारजांसिदी-
यथः ३ तद्वपुर्वामिनाकृतंविश्वायद्वामनुष्टवे । नानाजातावरेपसासमस्मेबन्धुमे-
यथुः ४ आयद्वांसूर्यारथंतिष्ठद्रघुष्यदंसदा । परिवामरुषावयोघृणावरन्तआ-
तपः ५॥११॥ युवोरत्रिश्चिकेतातिनरासुम्नेनचेतसा । घर्मंयद्वामरेपसंनासत्यास्ना
भुरण्यति ६ उग्रोवांककुहोयायिःशृण्वेयामेपुसंतनिः । यद्वांदंसोभिरश्विनात्रि-
नरावर्वर्तति ७ मध्वऊपुमधूयुवारुद्रासिवक्तिपिप्युषी । यत्समुद्रातिपर्षथःपक्वाः
पृक्षोभरन्तवाम् ८ सत्यमिद्वाउअश्विनायुवामाहुर्मयोभुवा । तायामन्यामहूत-
मायामन्नामृळयत्तमा ९ इमाब्रह्माणिवर्धनाश्विभ्यांसन्तुशंतमा । यातक्षाम्मर-
थाँइवावोचामबृहन्नमः १० ॥ १२ ॥

७४ कूष्ठोदेवावश्विनाद्यादिवोमनावसू । तच्छ्रेवथोवृषण्वसूअत्रेर्वांमावित्रवा-
॥२३१॥ सति १ कुहत्याकुहनुश्रुतादिविदेवानासत्या । कस्मिन्नायंतथोजनेकोवांनदीनां
सचा २ कंयाथःकंहगच्छथःकमच्छायुञ्जाथेरथम् । कस्यब्रह्माणिरण्यथोवयंवां-
मुश्मसीष्टये ३ पौरंचिद्ध्युदप्रुतंपौरंपौरायाजिन्वथः । यदींगृभीततातयेसिंहमिव
द्रुहस्पदे ४ प्रच्यवानाज्जुजुरुषोविश्वेमत्कंनमुञ्चथः । युवायदीकृथःपुनराकामं-
मृण्वेवध्वः ५ ॥ १३ ॥ अस्तिहिवांमिहस्तोतास्मसिवांसंदृशेश्रिये । नूश्रुतंम
आगंतमवोभिर्वाजिनीवसू ६ कोवांमद्यपुरूणामावव्नेमर्त्यानाम् । कोविप्रोवि-
प्रवाहसाकोयज्ञैर्वाजिनीवसू ७ आवांरथोरथानांयेष्ठोयात्वश्विना । पुरूचिदस्म-
युस्तिरआङ्गूषोमर्त्येष्वा ८ शमूषुवांमधूयुवास्माकंमस्तुचर्कृतिः । अर्वाचीना ॥२३१॥

विचेतसाविभिःश्येनेवदीयतम् १ अश्विनायद्गृकहिंचिच्छ्रूयातमिमंहवम् ।
वस्वीरूषुवांभुजःपृञ्चन्तिसुवांपृचः १० ॥ १४ ॥

प्रति नवावस्युरात्रेयोश्विनौ पङ्क्तिः ।

७५ प्रतिप्रियतमंरथंवृषणंवसुवाहनम् । स्तोतावांमश्विनावृषिःस्तोमेनप्रति
भूषतिमाध्वीममंश्रुतंहवम् १ अत्यायातमश्विनातिरोविश्वांअहंसना । दस्रा
हिरण्यवर्तनीसुषुम्नासिन्धुवाहसामाध्वीममंश्रुतंहवम् २ आनोरत्नानिबिभ्रता-
वश्विनागच्छतंयुवम् । रुद्राहिरण्यवर्तनीजुषाणावाजिनीवसूमाध्वीममंश्रुतंह-
वम् ३ सुष्टुभोवांवृषण्वसूरथेवाणीच्याहिता । उतवांककुहोमृगःपृक्षःकृणोति
वापुषोमाध्वीममंश्रुतंहवम् ४ वोधिन्मनसारथ्येपिराहवनश्रुता । विप्रिश्यवा-
नमश्विनानियाथोअद्ध्यावितंमाध्वीममंश्रुतंहवम् ५ ॥ १५ ॥ आवांनरामनो-

युजोऽश्वांसःप्रुषितप्सवः।वयोवहन्तुपीतयेसहस्रमेभिरश्विनामाध्वीममंश्रुतंहवं-
म् ६ अश्विनावेहगच्छतंनासत्यामाविवैनतम्। तिरश्चेदर्ययापरिवर्तियाँतमदा-
भ्यामाध्वीममंश्रुतंहवम् ७ अस्मिन्यज्ञेअदाभ्याजरितारंशुभस्पती। अवस्यु-
मश्विनायुवंगुणन्तमुपभूषथोमाध्वीममंश्रुतंहवम् ८ अभूदुपारुशत्पशुराग्निरंधा-
ष्यत्वियः। अथोजिवांवृषण्वसूरथोदस्रावमर्त्योमाध्वीममंश्रुतंहवम् ९ ॥१६॥

आ भाति पञ्चात्रिरश्विनौ त्रिष्टुप्।

७६ आभात्यग्निरुषसामनीकमुद्विप्राणांदेवयावाचोअस्थुः। अर्वाञ्चानूनंर-
थ्येहयातंपीपिवांसमश्विनाघर्ममच्छ १ नसंस्कृतंप्रमिमीतोगमिष्ठान्तिनूनम-
श्विनोपस्तुतेह। दिवाभिपित्वेऽवसागमिष्ठाप्रत्यवर्तिंदाशुषेशंभविष्ठा २ उता
यातंसङ्गवेप्रातरह्नोमध्यंदिनउदितासूर्यस्य। दिवानक्तमवसाशंतमेननेदानींपी-

तिरश्विनातंताव ३ इदंहिवांप्रदिविस्थानमोकइमेगृहाअश्विनेदंदुरोणम् । आनो दिवोबृहतःपर्वतादाश्योयातमिषमूर्जंवहन्ता ४ समश्विनोरवसानूतनेनमयोभुवांसुप्रणीतीगमेमाआनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ५॥१७॥

प्रातर्यावाणा पञ्चात्रिरश्विनौ त्रिष्टुप् ।

७७ प्रातर्यावाणाप्रथमायंजध्वंपुरागृध्रादरुषःपिबातः । प्रातर्हियज्ञमश्विनादधातेप्रशंसन्तिकवयःपूर्वभाजः १ प्रातर्यंजध्वमश्विनाहिनोतनसायमस्ति देवयाअजुष्टम् । उतान्योअस्मद्यजतेविचावःपूर्वैःपूर्वोयजमानोवनीयान् २ हिरण्यत्वङ्मधुवर्णोघृतस्नुःपृक्षोवहन्नारथोवर्ततेवाम् । मनोजवाअश्विनावातरंहा येनांतियाथोदुरितानिविश्वा ३ योभूयिष्ठंनासत्याभ्यांविवेषचनिष्ठंपित्वोररंतेविभागे । सतोकमस्यपीपरच्छमींभिरनूर्ध्वभासुःसदमित्तुतुर्यात् ४ समश्विनोरव-

युवंवृक्षंसंचविचाचथः ६ यथावातःपुष्करिणींसमिङ्गयतिसर्वतः । एवातेगर्भएजतुनिरैतुदशंमास्यः ७ यथावातोयथावनंयथासमुद्रएजति । एवात्वंदशमास्य सहावेहिजरायुणा ८ दशमासांञ्छशयानःकुमारोअधिमातरि । निरैतुजीवोअक्षतोजीवोजीवन्त्याअधि ९ ॥ २० ॥

महे दश सत्यश्रवा आत्रेय उषाः पङ्क्तिः ।

७९ महेनोअद्यबोधयोषोराये दिवित्मती । यथाचिन्नोअबोधयःसत्यश्रवसिवाय्येसुजातेअश्वसूनृते १ यासुनीथेशौचद्रथेव्यौच्छोदुहितर्दिवः । साव्युच्छसहीयसिसत्यश्रवसिवाय्येसुजातेअश्वसूनृते २ सानोअद्याभरद्वसुव्युच्छादुहितर्दिवः । योव्यौच्छःसहीयसिसत्यश्रवसिवाय्येसुजातेअश्वसूनृते ३ अभियेत्वाविभावरिस्तोमैर्गृणन्तिवह्नयः । मघैर्मघोनिसुश्रियोदामन्वन्तःसुरातयःसुजातेअ-

श्वंसूनृते ४ यञ्जिह्वितेगुणाइमेछदयंन्तिमघत्तये । परीचिद्वष्टयोदधुर्ददतोराधोअ-
ह्वयंसुजातेअश्वंसूनृते ५ ॥ २१ ॥ ऐषुवावीरवद्यशउपोमघोनिसूरिपुं । येनो
राधांस्यह्वयामघवानोअरांसतसुजातेअश्वंसूनृते ६ तेभ्योद्युम्नंवृहद्यशउपोमघो-
न्यावह । येनोराधांस्यश्व्यांगव्याभजन्तसूरयःसुजातेअश्वंसूनृते ७ उतनोगोम-
तीरिषुआवंहादुहितर्दिवः । साकंसूर्यस्यरश्मिभिःशुक्रैःशोचद्भिरर्चिभिःसुजाते
अश्वंसूनृते ८ व्युच्छादुहितर्दिवोमाचिरंतनुथाअपः । नेत्त्वांस्तेनंयथारिपुंतपा-
तिसूरोअर्चिपासुजातेअश्वंसूनृते ९ एतावद्देदुषस्त्वंभूयोवादातुमर्हसि । यास्तो-
तृभ्योविभावर्युच्छन्तीनप्रमीयंसेसुजातेअश्वंसूनृते १० ॥ २२ ॥

द्युतद्यामानं पट् सत्यश्रवा आत्रेय उषास्त्रिष्टुप् ।

८० द्युतद्यामानंवृहतीमृतेनंऋतावंरीमरुणप्सुंविभातीम् । देवीमुषसंस्वर्रा-

वहन्तीप्रतिविप्रासोमतिभिर्जरन्ते १ एषाजनंदर्शतावोधयन्तीसुगान्पथःकृण्वती यात्यग्रे । बृहद्रथावृहतीविश्वमिन्वोषाज्योतिर्यच्छत्यग्रेअह्नाम् २ एषागोभिररुणेभिर्युजानास्त्रैवन्तीरायिमश्नायुचक्रे । पथोरदन्तीसुविताय देवीपुरुष्टुताविश्ववारावि भाति ३ एषाव्यैनीभवतिह्विवहींआविष्कृण्वानातन्वंपुरस्तात् । ऋतस्य पन्थामन्वेतिसाधुप्रजानतीवयुनादिशोमिनाति ४ एषाशुभ्रानतन्वोविदानोर्ध्वेव स्नातीहृशयेनोअस्थात् । अपद्वेषोबाधमानातमांस्युषादिवोदुहिताज्योतिषागात् ५ एषाप्रतीचीदुहितादिवोनून्योषेवभद्रानिरिणीतेअप्सः । व्यूर्ण्वतीदाशुषे वार्याणिपुनर्ज्योतिर्युवतिःपूर्वथाकः ६ ॥ २३ ॥

युञ्जते पञ्च श्यावाश्व आत्रेयः सविता जगती ।

८१ युञ्जतेमनउतयुञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः । विहोत्रादधेवयु-

नाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः १ विश्वारूपाणिप्रतिमुञ्चतेकविःप्रासा-
वीद्भद्रंद्विपदेचतुष्पदे । विनाकंमख्यत्सवितावरेण्योऽनुप्रयाणंमुषसोविराजति २
यस्यप्रयाणमन्वन्यइद्ययुर्देवादेवस्यमहिमानमोजसा । यःपार्थिवानिविममेस
एतशोरजाँसिदेवःसवितामहित्वना ३ उतयासिसवितस्त्रीणिरोचनोतसूर्यस्यर-
श्मिभिःसमुच्यासि । उतरात्रीमुभयतःपरीयसउतामित्रोभवासिदेवधर्मभिः ४
उतेशिषेप्रसवस्यत्वमेकइदुतपूषाभवासिदेवयामभिः। उतेदंविश्वंभुवनंविराजसि
श्यावाश्वस्तेसवितःस्तोमंमानशे ५ ॥ २४ ॥

तत्सवितुर्नव श्यावाश्च आत्रेयः सविता गायत्री आद्यानुष्टुप् ।

८२ तत्सवितुर्वृणीमहेवयंदेवस्यभोजनम् । श्रेष्ठंसर्वधातमंतुरंभगस्यधीम-
हि १ अस्यहिस्वयंशस्तरंसवितुःकच्चनप्रियम् । नमिनन्तिस्वराज्यम् २ साहिर-

त्वानिदाशुषेसुवातिसविताभगः । तंभागंचित्रमीमहे ३ अद्यानोदेवसवितःप्र-
जावत्सावीःसौभगम् । परादुःष्वप्न्यंसुव ४ विश्वानिदेवसवितर्दुरितानिपरा
सुव । यद्भद्रंतन्नआसुव ५ ॥ २५ ॥ अनागसोअदितयेदेवस्यसवितुःसवे । वि-
श्वावामानिधीमहि ६ आविश्वदेवंसत्पतिंसूक्तैरद्यावृणीमहे । सुत्यसंवंसविता-
रम् ७ यइमेउभेअहंनीपुरएत्यप्रयुच्छन् । स्वाधीर्देवःसविता ८ यइमाविश्वा
जातान्याश्रावयंतिश्लोकेन । प्रचंसुवातिसविता ९ ॥ २६ ॥

अच्छा दशाग्निः पर्जन्यस्त्रिष्टुप् । उपाद्यास्तिस्रो जगत्यः । उपान्त्यानुष्टुप् ।

८३ अच्छांवदतवसंगोभिरांभिःस्तुहिपर्जन्यंनमसाविवास । कनिक्रदद्वृ-
षभोजीरदानूरेतोदधात्योषधीषुगर्भम् १ विवृक्षान्हंन्त्युतहंन्तिरक्षसोविश्वंवि-
भायभुवनंमहावधात् । उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयन्नहन्तिदु-

प्कृतः २ रथीवकशयाश्वांअभिक्षिपन्नाविर्दूतान्कृणुतेवृष्ण्यँ३अह । दूरात्सिंहस्य स्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यं१नभः ३ प्रवातावान्तिपतयन्तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः । इराविश्वस्मैभुवनायजायतेयत्पर्जन्यःपृथिवीरेतसावति ४ यस्यव्रतेपृथिवीनन्नमीतियस्यव्रतेशफवज्जर्भुरीति । यस्यव्रतओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ५ ॥ २७ ॥ दिवोनोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोअश्वस्यधाराः । अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिञ्चन्नसुरःपितानः ६ अभिक्रन्दस्तनयगर्भमाधाउदन्वतापरिदीयारथेन । दृतिंसुकर्णाविषितंन्यञ्चंसमा भवन्तूद्वतोनिपादाः ७ महान्तंकोशमुदचानिषिञ्चस्यन्दन्तांकुल्याविषिताःपुरस्तात् । घृतेनद्यावापृथिवीव्युन्धिसुप्रपाणंभवत्वघ्न्याभ्यः ८ यत्पर्जन्यकनिक्रदत्स्तनयन्हंसिदुष्कृतः । प्रतीदंविश्वंमोदतेयत्किंचपृथिव्यामधि १ अवर्षीर्व्यमुदूपू

गृभायाकुर्वन्वान्यत्येतवाउ । अजींजनओषधीर्भोजनायकमुतप्रजाभ्योऽविदोमनीषाम् १० ॥ २८ ॥

बळित्था तूचमग्निः पृथिव्यनुष्टुप् ।

८४ वळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि । प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि १ स्तोमासस्त्वाविचारिणिप्रतिष्टोभन्त्यक्तुभिः । प्रयावाजंनहेषन्तंपेरुमस्यस्यर्जुनि २ दृळ्हाचिद्यावनस्पतीन्क्ष्मयादर्धर्ष्योजसा । यत्तेअभ्रस्यविद्युतो दिवोवर्षन्तिवृष्टयः ३ ॥ २९ ॥

म सम्राजेष्टावाश्विर्वरुणस्त्रिष्टुप् ।

८५ प्रसम्राजेबृहदर्चागभीरंब्रह्मप्रियंवरुणायश्रुतायं । वियोजघानशमितेव चर्मोपस्तिरेपृथिवीसूर्यायं १ वनेपुव्यं१न्तरिक्षंततानवाजमर्वत्सुपर्यंउस्रियासु ।

हृत्सुकृतुंवरुणोअप्स्व१ग्निंदिविसूर्यंमदधात्सोममद्रौ २ नीचीनबारंवरुणःकबन्धं प्रससर्जरोदसीअन्तरिक्षम् । तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूमं ३ उनत्तिभूमिंपृथिवीमुतद्यांयदादुग्धंवरुणोवष्ट्यादित् । समुद्रेणवसतपवीतासस्त-विषीयन्तःश्रथयन्तवीराः ४ इमामूष्वासुरस्यश्रुतस्यमहींमायांवरुणस्यप्रवोचम् । मानेनेवतस्थिवाँअन्तरिक्षेवियोमभेपृथिवींसूर्येण ५॥३०॥ इमामूनुकवितमस्यमायांमहींदेवस्यनकिरादधर्ष । एकंयदुद्वानपृणन्त्येनीरासिञ्चन्तीरवनयःसमुद्रम् ६ अर्यम्णंवरुणमित्र्यंवासखायंवासदमिद्भ्रातरंवा । वेशंवानित्यंवरुणारणंवायत्सीमागश्चकृमाशिश्रथस्तत् ७ कितवासोयद्रिरिपुर्नदीवियद्वाघा सत्यमुतयन्नविद्म । सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः ८॥३१॥

इन्द्राग्नी पञ्चत्रिरिन्द्राग्नी अनुष्टुप् । अन्त्या विराट्पूर्वा ।

८६ इन्द्राग्नीयमवथ उभावाजेषुमर्त्यम् । दृळ्हाचित्सप्रभेदतिद्युम्नावाणीरिव त्रितः १ यापृतनासुदुष्टरायावाजेषुश्रवाय्या । यापञ्चचर्षणीरभीन्द्राग्नीताहवामहे २ तयोरिदमवच्छवस्तिग्मादिद्युन्मघोनोः । प्रातिद्रुणागभस्त्योर्गवांवृत्रघ्नएवते ३ तावामेषेरथानामिन्द्राग्नीहवामहे । पतीतुरस्यराधसोविद्वांसागिर्वणस्तमा ४ तावुधन्तावनुद्यून्मतींयदेवावदभा । अहन्ताचित्पुरोदधेशेवदेवावते ५ एवेन्द्राग्निभ्यामहाविहव्यंशूष्यंघृतंनपूतमद्रिभिः । तासूरिपुश्रवोबृहद्रयिंगृणत्सुदिधृतमिषंगृणत्सुदिधृतम् ६ ॥ ३२ ॥

म वो नवैवयामरुदात्रेयो मरुतोतिजगती ।

८७ प्रवोमहेमतयोयन्तुविष्णवेमरुत्वतेगिरिजाएवयामरुत् । प्रशर्धायप्रयं-

ज्यवेतुखादयेतवसेभन्ददिष्टयेधुनिव्रतायशवसे १ प्रयेजातामहिनायेचनुस्वयंप्र
विद्मनाब्रुवतएवयामरुत् । कृत्वातद्वोमरुतोनाधृषेशवोदानामह्वातदेवामधृष्टा-
सोनाद्रयः २ प्रयेद्दिवोबृहतःशृण्विरेगिरासुशुक्रासःसुम्भएवयामरुत् । नयेपा-
मिरीसघस्थईष्टआँअग्नयोनस्वर्विद्युतःप्रस्पन्द्रासोधुनीनाम् ३ सचक्रमेमहतो
निरुरुक्रमःसमानस्मात्सदसएवयामरुत् । यदायुक्तत्मनास्वादधिष्णुभिर्विष्प-
र्धसोविमहसोजिगातिशेवृधोनृभिः ४ स्वनोनवोऽमवान्त्रेजयद्वृषात्वेषोयायिस्त-
विषएवयामरुत् । येनासहन्तक्रुञ्चतस्वरोचिषःस्थारश्मानोहिरण्ययाःस्वायुधा-
सइष्मिणः ५ ॥ ३३ ॥ अपारोवोमहिमावृद्धशवसस्त्वेषंशवोऽवत्वेवयामरुत् ।
स्थातारोहिप्रसितौसंदृशिस्थनतेनउरुष्यतानिदःशुशुक्वांसोनाग्नयः ६ तेरुद्रासः ॥२३८॥

सुमंखाअग्नयोयथातुविद्युन्नाअवन्त्वेवयामरुत् । दीर्घंपृथुप्रथेसद्मपार्थिवंयेपा-
मज्मेष्वामहःशर्धांस्यद्भुतैनसाम् ७ अह्वेयोनोमरुतोगातुमेतनओताहवंजरितु-
रेवयामरुत् । विष्णोर्महःसमन्यवोयुयोतनस्मद्र्थ्यो३नदंसनापद्वेषांसिसनुतः ८
गन्तानोयज्ञंयज्ञियाःसुशमिश्रोताहवंमरक्षएवयामरुत् । ज्येष्ठासोनपर्वतासो
व्योमनियूयंतस्थप्रचेतसःस्यातदुर्धर्तवोनिदः ९ ॥ ३४ ॥ इति शाकलसंहितायां
पञ्चमे मण्डले षष्ठोऽनुवाकः ॥ ६ ॥

इति पञ्चमं मण्डलं समाप्तम् ॥ ५ ॥

त्वं खलु त्रयोदश भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् ।

१ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता । त्वंसींवृषन्नकृणोर्दुष्टरी-

तुसहोविश्वस्मैसहसेसहध्यै १ अधाहोतान्यसीदोयजीयानिळस्पदइषयन्नीड्यः सन् । तंत्वानरःप्रथमंदेवयन्तोमहोरायेचितयन्तोअनुग्मन् २ वृतेवयन्तंवहुभिर्वसव्यै३स्त्वेरयिंजागृवांसोअनुग्मन् । रुशन्तमग्निंदर्शतंवृहन्तंवपावन्तंविश्वहा दीदिवांसम् ३ पदंदेवस्यनमसाव्यन्तःश्रवस्यवःश्रवंआपन्नमृक्तम् । नामानि चिद्दधिरेयज्ञियानिभद्रायांतेरणयन्तसंदृष्टौ ४ त्वांवर्धन्तिक्षितयःपृथिव्यांत्वां रायउभयासोजनानाम् । त्वंत्रातातरणेचेत्योभूःपितामातासदमिन्मानुषाणाम् ५ ॥ ३५ ॥ सपर्येण्यःसप्रियोविक्ष्वग्निर्होतामन्द्रोनिषसादायजीयान् । तंत्वावयंदमआदीदिवांसमुपज्ञुवाधोनमसासदेम ६ तंत्वावयंसुध्योऽनव्यमग्ने सुम्नायवईमहेदेवयन्तः । त्वंविशोअनयोदीद्यानोदिवोअग्नेवृहतारोचनेन ७ ॥२३९॥

विशांकविंविश्पतिंशश्वतीनांनितोशंनंवृषभंचर्षणीनाम् । प्रेतीषणिमिषयन्तं पावकंराजन्तमग्निंयजतंरयीणाम् ८ सोअग्नईजेशशमेचमर्तोयस्त्रआनट्समिधाहव्यदातिम् । यआहुतिंपरियेदानमोभिर्विश्वेत्सवामादधत्वोतः ९ अस्माउतेमहिंमहेविधेमनमोभिरग्नेसमिधोतहव्यैः । वेदीसूनोसहसोगीभिरुक्थैरातेभद्रायांसुमतौयतेम १० आयस्तंथुरोदसीविभासाश्रवोभिश्रवस्यैस्तरुत्रः । बृहद्भिर्वाजैस्थविरेभिरस्मेरेवद्भिरग्नेवितरंविभाहि ११ नूचन्द्रंसोसद्रमिद्धेह्यस्मेभूरितोकायतनायपश्वः । पूर्वीरिषोबृहतीरारेअघाअस्मेभद्रासौश्रवसानिसन्तु १२ पुरूण्यग्नेपुरुधात्वायावसूंनिराजन्वसुतांतेअश्याम् । पुरूणिहित्वेपुरुवारसन्त्यग्नेवसुविधतेराजनित्वे १३ ॥ ३६ ॥ इति शाकलसंहितायां चतुर्थाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

त्वंह्येकादशानुष्टुभंशक्वर्यन्तमग्नेष्टौयथाहोतर्नेषसन्नमनव्पसामूर्धानंवैश्वानरीयंहिद्विजगत्यन्तंपृक्षस्या-न्त्रिष्टुबहश्चपुरोवोद्विपदान्तंयजस्वषण्मध्येत्वद्विश्वाग्नायआनुष्टुभंशक्वर्यन्तामिमपूष्वेकोनाविंशतिहव्यक्र-पिर्वाजागतंप्रान्दशम्यास्तृतीयापञ्चदश्यौशक्वर्यौपष्ठयतिशक्वर्यनुष्टुब्बृहत्याउपान्त्येत्वमग्नेष्टाचत्वारिंश-द्वायव्यंवर्धमानाद्यापष्ठीचसप्तविंश्यनुष्टुप्त्रिष्टुप्पूर्वेचान्त्ये ।

त्वं ह्येकादश भरद्वाजो बार्हस्पत्योऽग्निरनुष्टुप् । अन्त्या शक्वरी ।

२ ओम् त्वंहिक्षैतंवृधशोऽग्नेमित्रोनपत्यसे । त्वंविचर्षणेश्रवोवसोपुष्टिंनपुष्यसि १ त्वांहिष्माचर्षणयोयज्ञेभिर्गीर्भिरीळते । त्वांवाजीयांत्यवृकोरजस्तूर्विश्वचर्षणिः २ सजोषस्त्वादिवोनरोयज्ञस्यकेतुमिन्वते । यद्ध्रुयमानुषोजनःसुम्नायुर्जुह्वेअध्वरे ३ ऋधद्यस्तेसुदानवेधियामर्तःशशमते । ऊतीपवृहनोदिवोद्विषोअंहोनतरति ४ समिधायस्तआहुतिंनिशितिंमर्त्योनशत् । वयावन्तंसपुष्यतिक्षयंमग्नेशतायुषम् ५ ॥ १ ॥ त्वेषस्तेधूमऋण्वतिदिविषञ्छुक्रआततः । ॥२४०॥

सूरोनहिद्युतात्वंकृपापावकरोचसे ६ अधाहिविक्ष्वीड्योऽसिप्रियोनोअतिथिः । रण्वःपुरीवजूर्यःसूनुर्नत्रयायर्यः ७ क्रत्वाहिद्रोणेअज्यसेऽग्नेवाजीनकृत्व्यः । परिज्मेवस्वधागयोऽत्योनह्वार्यःशिशुः ८ त्वंत्याचिदच्युताग्नेपशुर्नयवसे । धामाह्यत्तेअजरवनावृश्चन्तिशिक्वसः ९ वेषिह्यध्वरीयतामग्नेहोतादमेविशाम् । समृधोविश्पतेकृणुजुषस्वहव्यमङ्गिरः १० अच्छानोमित्रमहोदेवदेवानग्नेवोचःसुमतिंरोदस्योः । वीहिस्वस्तिंसुक्षितिंदिवोनॄन्हिषोअंहांसिदुरितातरेमतातरेमतवावसातरेम ११ ॥ २ ॥

अग्नेष्टौ भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् ।

१ अग्नेसक्षेपहतपाक्रंतेजाउरुज्योतिर्नशतेदेवयुष्टे । यंत्वंमित्रेणवरुणःसजोषादेवपासित्यजसामर्तमंहः २ ईजेयज्ञेभिःशशमेशमीभिर्क्रुधद्वारायाग्नयेदजोषादेवपासित्यजसामर्तमंहः २ ईजेयज्ञेभिःशशमेशमीभिर्क्रुधद्वारायाग्नयेद-

दाश । एवाचनंतयशसामजुष्टिनाँह्योमतँनशतेनप्रहांसिः २ सूरोनयस्यदृशातिरं-
रेपाभीमायदेतिंशुचतस्तुआवीः । हेषंस्वतःशुरुधोनायमक्तोःकुत्राँचिद्रण्वोवंस-
तिर्वनेजाः ३ तिग्मंचिदेमहिवर्पोंअस्यभसदश्वोनयंमसानआसा । विजेहं-
मानःपरशुर्नजिह्वांद्रविर्द्रावयतिदारुधक्षत् ४ सइदस्तेवप्रतिधादसिष्यञ्छशी-
तातेजोऽयंसोनधाराम् । चित्रध्रंजतिररतिर्योअक्तोर्वेर्नद्रुषद्वारघुपत्मंजंहाः ५॥३॥
सईरेभोनप्रतिवस्तउस्राःशोचिर्यारारपीतिमित्रमंहाः । नक्तंयदीमरुषोयोदिवा-
नूनमंत्योंअरुषोयोदिवानून् ६ दिवोनयस्यविधतोनवींनोद्वर्यारुक्षओषधीषुनू-
नोत् । घृणानयोधजंसापत्मनायन्नारोदंसीवसुनादंसुपत्नी ७ धायोभिर्वायोयु-
ज्येभिरर्कैर्विद्युन्नदविद्योत्स्वेभिःशुष्मैः । शर्धोवायोमरुतांततक्षऋभुर्नत्वेपोरंभ-
सानोअद्यौत् ८ ॥ ४ ॥

यथा होतरष्टौ भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् ।

१ यथाहोतर्मनुषोदेवतातायज्ञेभिःसूनोसहसोयजांसि । एवानोअद्यसमनासमानानुशन्नग्नउशतोयक्षिदेवान् २ सनोविभावाचक्षणिर्नवस्तोरग्निर्वन्दारुवेद्यश्चनोधात् । विश्वायुर्योअमृतोमर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ३ द्यावोनयस्यपुनयन्त्यभ्वंभासोसिवस्तेसूर्योनशुक्रः । वियड्नोत्यजरःपावकोऽभस्यचिच्छिश्नथत्पूर्व्याणि ४ वह्नाहिसूनोअस्यद्भसद्वाचक्रेअग्निर्जनुषाज्मान्नम् । सत्वंनऊर्जसनऊर्जंधाराजेवजेरवृकेक्षेष्यन्तः ५ निर्तिक्तियोवारणमन्नमत्तिंवायुर्नराष्ट्र्यत्येत्यक्तून् । तुर्यामयस्तंआदिशामरातीरत्योनह्रुतःपतंतःपरिह्रुत् ६ ॥ ५ ॥ आसूर्योनभानुमद्भिरर्कैरग्नेतनन्थरोदसीविभासा । चित्रोनयत्परितमांस्यक्तःशोचिषापत्मन्नौशिजोनदीयन् ७ त्वांहिमन्द्रतममर्कशोकैर्ववृमहेमहिनःश्रो-

व्यग्ने। इन्द्रंनत्वाशवसादेवतावायुंपृणन्तिराधसानृतमाः ७नूनोंअग्नेऽवृकेभिःस्व-
स्तिवेपिरायःपथिभिःपर्य्यहः । तास्सूरिभ्योगृणतेरासिसुम्नंमदैमशताहिमाःसु-
वीराः ८ ॥ ६ ॥

हुवे वः सप्त भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् ।

५ हुवेवःसूनुंसहसोयुवानमद्रोघवाचंमतिभिर्यविष्ठम् । यइन्वतिद्रविणानि
प्रचेतावि्श्ववाराणिपुरुवारोअध्रुक् १ त्वेवसूनिपूर्वणीकहोतर्दोषावस्तोरेरिरेय-
ज्ञियासः । क्षामेवविश्वाभुवनानियस्मिन्त्संसौभगानिदधिरेपावके २ त्वंविक्षु
प्रदिवःसीदआसुक्रत्वारथीरभवोवायाणाम् । अतंइनोपिविधतोचिकित्वोव्यानु-
षग्जातवेदोवसूनि ३ योनःसनुत्योअभिदासदग्नेयोअन्तरोमित्रमहोवनुष्यात् ।
तमजरेभिर्वृषभिस्तवस्वैस्तपातपिष्ठतपसातपस्वान् ४ यस्तेयज्ञेनसमिधायदु-

क्थैरकैभिःसूनोसहसोददाशत् । समत्यैष्वमृतप्रचेतारायाद्युम्नेनश्रवसाविभा-
ति ५ सतत्कृधीषितस्तूयमग्नेस्पृधोवाधस्वसहसास्पृधस्वान् । यच्छस्यसेद्युभि-
रक्तोवचोभिस्तज्जुषस्वजरितुर्घोषिमन्मे ६ अश्यामतंकाममग्नेतवोतीअश्यामर-
यिंरयिवःसुवीरम् । अश्यामवाजमभिवाजयन्तोऽश्यामद्युम्नमजराजरंते ७ ॥७॥

म नव्यसा सप्त भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् ।

६ प्रनव्यसासहसःसूनुमच्छायज्ञेनगातुमवइच्छमानः । वृश्चद्वनंकृष्णयांमं
रुशन्तंवीतीहोतारंदिव्यंजिगाति १ सःश्वितानस्तन्यतूरोचनस्थाअजरेभिर्नानद-
द्भिर्यविष्ठः । यःपावकःपुरुतमःपुरूणिंपृथून्यग्निरनुयातिभर्वन् २ वितेविष्व-
ग्वातंजूतासोअग्नेभामासःशुचेशुचयश्चरन्ति । तुविम्रक्षासोदिव्यानवंग्वावना
वनन्तिधृषतारुजन्तः ३ येतेशुक्रासःशुचयःशुचिष्मःक्षांवपन्तिविषितासोअ-

श्वाः । अर्धभ्रमस्तंउर्वियाविभातियातयमानोअधिसानुपृश्नेः ४ अर्धाजिह्वापा-
पतीतिप्रवृष्णोगोषुयुधोनाशनिःसृजाना । शूरस्येवप्रसितिःक्षातिरग्नेर्दुर्वर्तुर्भीमो
दयतेवनानि ५ आभानुनापार्थिवानिज्रयांसिमहस्तोदस्यधृषतातंतन्थ । सवा-
धस्वापभयासहोभिःस्पृधोवनुष्यन्वनुषोनिजूर्व ६ सचित्रचित्रंचितयन्तमस्मे
चित्रक्षत्रचित्रतमंवयोधाम् । चन्द्ररयिंपुरुवीरंबृहन्तंचन्द्रचन्द्राभिर्गृणतेयुवस्व ७ ॥ ८ ॥

मूर्धानं सप्त भरद्वाजो बार्हस्पत्यो वैश्वानरस्त्रिष्टुप् । अन्त्ये जगत्यौ ।

७ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निम् । कविंसम्राजम-
तिथिंजनानामासन्नापात्रंजनयन्तदेवाः १ नाभिंयज्ञानांसदनंरयीणांमहामाहा-
वमभिसंनवन्त । वैश्वानरंरथ्यमध्वराणांयज्ञस्यकेतुंजनयन्तदेवाः २ त्वद्विप्रो

जायतेवाज्यग्नेत्वद्वीरासोअभिमातिषाहः । वैश्वानरत्वमस्मासुधेहिवसूनिराज-
न्स्पृहयाय्याणि ३ त्वांविश्वेअमृतजायमानंशिशुंनदेवाअभिसंनवन्ते । तवक्रतु-
भिरमृतत्वमायन्वैश्वानरयत्पित्रोरदीदेः ४ वैश्वानरतवतानिव्रतानिमहान्यग्नेन-
किरादधर्ष । यज्जायमानःपित्रोरुपस्थेऽविन्दःकेतुंवयुनेष्वह्नाम् ५ वैश्वानरस्य
विमितानिचक्षसासानूनिदिवोअमृतस्यकेतुना । तस्येदुविश्वाभुवनाधिमूर्धनिव-
याइवरुरुहुःसप्तविस्रुहः ६ वियोरजांस्यमिमीतसुक्रतुर्वैश्वानरोविदिवोरोचना
कविः । परियोविश्वाभुवनानिपप्रथेऽदब्धोगोपाअमृतस्यरक्षिता ७ ॥ १ ॥

पृक्षस्य सप्त भरद्वाजो बार्हस्पत्यो वैश्वानरो जगती । अन्त्या त्रिष्टुप् ।

८ पृक्षस्यवृष्णोअरुषस्यनूसहःप्रनुवोचंविदथाजातवेदसः । वैश्वानरायमतिं-
र्नव्यसीशुचिःसोमइवपवतेचारुरग्नये ९ सजायमानःपरमेव्योमनिव्रतान्यग्नि

व्रतपाअरक्षत । व्यन्तरिक्षममिमीतसुक्रतुर्वैश्वानरोमहिनाकंमस्पृशत् २ व्यस्तभ्नाद्रोदसीमित्रोअद्भुतोऽन्तर्ववंदक्रणोज्ज्योतिषातमः । विचर्मणीवधिषणेअवर्तयद्वैश्वानरोविश्वंमधत्तवृष्ण्यम् ३ अपामुपस्थेमहिषाअगृभ्णतविशोराजानमुपतस्थुरृग्मियम् । आदूतोअग्निमभरद्विवस्वतोवैश्वानरंमातरिश्वापरावतः ४ युगेयुगेविदथ्यंगृणद्भयोऽग्नेरयिंयशसंधेहिनव्यसीम् ।पव्येवराजन्नघशंसमजरन्नीचानिवृश्चवनिनंनतेजसा ५ अस्माकंमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यम् । वयंजयेमशतिनंसहस्रिणंवैश्वानरवाजमग्नेतवोतिभिः ६ अदब्धेभिस्तवगोपाभिरिष्टेऽस्माकंपाहित्रिषधस्थसूरीन् । रक्षाचनोदुपांशवोऽग्नेवैश्वानरप्रचेतारीःस्तवानः ७ ॥ १० ॥

अहश्च सप्त भरद्वाजो बार्हस्पत्यो वैश्वानरस्त्रिष्टुप् ।

१ अहश्चकृष्णमहरर्जुनं चविवर्तेतेरजसीवेद्याभिः । वैश्वानरोजायमानोनरा-
जावातिरज्ज्योतिषाग्निस्तमांसि १ नाहंतन्तुंनविजानाम्योतुंनयंवयन्तिसमरे-
ऽतमानाः । कस्यस्वित्पुत्रइहवक्त्वानिपरोवदात्यवरेणपित्रा २ सइत्तन्तुंसविजा-
नात्योतुंसवक्त्वान्यृतुथादंदाति । यईंचिकेतदमृतस्यगोपाअवश्चरन्परोअन्येनप-
श्यन् ३ अयंहोताप्रथमःपश्यतेममिदंज्योतिरमृतंमर्त्येषु । अयंसजज्ञेध्रुवआनि-
षत्तोऽमर्त्यस्तन्वा३वर्धमानः ४ ध्रुवंज्योतिर्निहितंदृशयेकंमनोजविष्ठंपतयत्स्व-
न्तः । विश्वेदेवाःसमनसःसकेताएकंक्रतुमभिवियन्तिसाधु ५ विमेकर्णापतय-
तोविचक्षुर्वी३दंज्योतिर्हृदयआहितंयत् । विमेमनश्चरतिदूरआधीःकिंस्विद्वक्ष्या-

मिकिमुनूमनिष्ये ६ विश्वेदेवाअनमस्यन्भियानास्त्वामग्नेतमसितस्थिवांसम् ।
वैश्वानरोऽवतूतयेनोऽमर्त्योऽवतूतयेनः ७ ॥ ११ ॥

पुरो वः सप्त भरद्वाजो बार्हस्पत्योऽग्निस्त्रिष्टुप् । अन्त्या द्विपदा ।

३० पुरोवोमन्द्रंदिव्यंसुवृक्तिंप्रयतियज्ञेअग्निमध्वरेदधिध्वम् । पुरउक्थेभिः
सहिनोविभावास्वध्वराकरतिजातवेदाः १ तमुयुमःपुर्वणीकहोतरग्नेअग्निभिर्म-
नुषइधानः । स्तोमंयमस्मैममतेवशूंघृतंनशुचिमतयःपवन्ते २ पीपायसःअत-
सामत्यँपयोअग्नयेददाशुविप्रउक्थैः । चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्यसा-
तागोमतोदधाति ३ आयःप्रौजायमानउर्वीदूरेदृशोभासाकृष्णाध्वा । अधवु-
हुचित्तमऊर्म्याँयास्तिरःशोचिषादद्दशेपावकः ४ नूनाश्चित्रंपुरुवाजाभिरूतीअग्नै
रयिंमघवद्भ्यश्चधेहि । येराधसाश्रवसाचात्यन्यान्त्सुवीर्याभिश्चाभिसन्तिजना- ॥२४६॥

न्र ५ इमंयज्ञंचनोधाअग्नउशन्यंतआसानोजुहुतेहविष्मान् । भरद्वाजेपुदधिये सुवृक्तिमंवीर्वाजस्यगध्यस्यसातौ ६ विद्वेषांसीनुहिवर्धयेळांमदेमशतहिमाःसुवीराः ७ ॥ १२ ॥

पजस्व पद्भरद्वाजो बार्हस्पत्योग्निस्त्रिष्टुप् ।

११ यजस्वहोतरिषितोयजीयानग्नेवाधोमरुतांनप्रयुक्ति । आनोमित्रावरुणानासत्याद्यावाहोत्रायंपृथिवीववृत्याः १ त्वंहोतामन्द्रतमोनोअध्रुगन्तर्देवोविदथामर्त्येषु । पावकयाजुह्वा३वह्निरासाग्नेयजस्वतन्वं१तवस्वाम् २ धन्याचिद्धित्वेधिषणावष्टिप्रदेवाजन्मगृणतेयजध्यै । वेषिष्ठोअङ्गिरसांयद्धविष्मोमधुच्छन्दोभनंतिरेभइष्टौ ३ अदिद्युतत्स्वपाकोविभावाग्नेयजस्वरोदसीउरूची । आयुंनयंनमसारातहव्याअजन्तिसुप्रयसंपञ्चजनाः ४ वृजेहयन्नमसावहिरग्नावयामिस्रुग्घृ-

तवंतीसुवृक्तिः । अग्न्यक्षिसद्मसदनेपृथिव्याअश्वांयिज्ञःसूर्येनचक्षुः ५ दशस्या नःपुर्वणीकहोतर्देवेभिरग्नेअग्निभिरिधानः । रायःसूनोसहसोवावसानाअतिस्त्र-सेमवृजनंनांहः ६ ॥ १३ ॥

मध्ये पद्भरद्वाजो बार्हस्पत्योग्निस्त्रिष्टुप् ।

१२ मध्येहोतादुरोणेवाहिंपोराळग्निस्तोदस्यरोदसीयजध्यै । अयंससूनुःसह-सक्रतावादुरात्सूर्योनशोचिषाततान १ आयस्मिन्त्वेस्वपाकेयजत्रयक्षद्राजन्त्स-र्वतातेवनुष्यौः । त्रिषधस्थस्ततुरिषोनजंहोहव्यासुधानिमानुषायजध्यै २ तेजि-ष्ठायस्यारतिर्वनेराट्तोदोअध्वन्नवृधसानोअद्यौत् । अद्रोघोनद्रंवितावेतातित्मन्न-मर्त्योऽवर्त्रओषधीषु ३ सास्माकेभिरेतरीनशूषैरग्निःष्टवेदप्सुआजातवेदाः । द्रुन्नो वन्वन्नक्त्वानावोह्यःपितेवजारयायियज्ञैः ४ अधस्मास्यपनयन्तिभासोवृथायत्त-

क्षेदनुयातिपृथ्वीम् । सुयोयःस्पन्द्रोविषितोधवीयानृणोनतायुरतिधन्वाराट् ५ सत्वंनोअर्वन्निदायाविश्वेभिरग्नेअग्निभिरिधानः। वेषिरायोवियासिदुच्छुनामदेम शतहिमाःसुवीराः ६ ॥..१४ ॥

त्वद्दिक्षा पङ्भरद्वाजो बार्हस्पत्योग्निस्त्रिष्टुप् ।

१३ त्वद्विश्वासुभगसौभगान्यग्नेवियन्तिवनिनोनवयाः । श्रुष्टीरयिर्वाजोवृत्रतूर्यंद्यावोवृष्टिरीडयोरीतिरपाम् १ त्वंभगोनआहिरत्नमिषेपरिज्मेवक्षयसिद्स्मवर्चाः । अग्नेमित्रोनबृहतक्रतुस्यासिक्षत्तावामस्यदेवभूरेः २ ससत्पतिःशवसाहन्तिवृत्रमग्नेविप्रोविपृणेभर्तिवाजम् । यंत्वंप्रचेतऋतजातरायासजोषानप्त्रापांह्निनोपि ३ यस्तेसूनोसहसोगीर्भिरुक्थैर्यज्ञैर्मर्तोनिशितिंवेद्यानट् । विश्वंसदेवप्रतिवारमग्नेधत्तेधान्यं १ पत्यतेवसव्यैः ४ तानूभ्यआसौश्रवसासुवीराग्नेसू-

नोसहसःपुष्यसेधाः । कृणोषियच्छवसाभूरिपश्वोवयोवृकायारयेजसुरये ५ व-
ह्यासूनोसहसोनोविहायाअग्नेतोकंतनयंवाजिनोदाः । विश्वाभिगीर्भिरभिपूर्ति
मश्यामदेमशतहिमाःसुवीराः ६ ॥ १५ ॥

अग्ना यः षड् भरद्वाजो बार्हस्पत्योग्निरनुष्टुप् । अन्त्या शाक्करी ।

१४ अग्नायेमत्योदुवोधियंजुजोषधीतिभिः । भसन्नुषप्रपूर्व्यइषंवुरीतावसे १
अग्निरिद्धिप्रचेताअग्निर्वेधस्तमःकविः । अग्निंहोतारमीळतेयज्ञेषुमनुषोविशः २
नानाह्यग्नेऽवसेस्वर्धन्तेरायोअर्यः । तूर्वन्तोदस्युमायवोव्रतैःसीक्षन्तोअव्रतम् ३
अग्निरुक्षामृतीषहंवीरंददातिसत्पतिम् । यस्यत्रसन्तिशवसःसंचक्षिशत्रवोभि-
या ४ अग्निर्हिविष्मनानिदोदेवोमर्तंमुरुष्यति । सहावायस्यावृतोरयिर्वाजेष्ववृ-

तः ५ अच्छानोमित्रमहोदेवदेवानग्नेवोचःसुमतिंरोदस्योः । वीहिस्वस्तिंसुक्षि-
तिंदिवोनॄन्द्विषोअंहांसिदुरितातंरेमतातंरेमतवावंसातरेम ६ ॥ १६ ॥

इममूष्वेकोनविंशतिर्भरद्वाजो बार्हस्पत्यो वीतहव्यो वाग्निः । तृतीयापञ्चद-
श्यौ शक्वर्यौ । षष्ठ्यतिशक्करी । दशम्याद्याः पञ्च षोडश्यन्त्येच त्रिष्टुभः ।
सप्तदश्यनुष्टुप् । उपान्त्या बृहती । शिष्टा जगत्यः ।

१५ इममूषुवोअतिंथिमुषर्बुधंविश्वासांविशांपतिंमृञ्जसेगिरा । वेतीद्विवोजनु-
षाकच्चिदाशुचिर्ज्योकचिदत्तिगर्भोयदच्युतम् १ मित्रंनयंसुधितंभृगवोदधुर्वनस्प-
तावीड्यंमूर्ध्वशोचिषम् । सत्वंसुप्रीतोवीतहव्येअद्भुतप्रशस्तिभिर्मंहयसेदिवेदि-
वे २ सत्वंदक्षंस्यावृकोवृधोभूर्यःपरस्यान्तरस्यतरुषः । रायःसूनोसहसोमर्त्ये-
ष्वाच्छर्दिर्यच्छवीतहव्यायसप्रथोभरद्वाजायसप्रथः ३ द्युतानंवोअतिंथिंस्वर्णरम-

अग्निंहोतारंमनुषःस्वध्वरम् । विप्रंनयुक्षवचसंसुवृक्तिभिर्हव्यवाहंमरतिंदेवमृंजसे ४ पावकयायश्चितयन्त्याकृपाक्षामंन्नरुचउषसोनभानुना । तूर्वन्नयामन्नेतशस्यनूरणआयोघृणेनततृषाणोअजरः ५ ॥ १७ ॥ अग्निमग्निंवःसमिधादुवस्यतप्रियंप्रियंवोअतिथिंगृणीषणिं । उपवोगीर्भिरमृतंविवासतदेवोदेवेषुवनतेहिवार्यंदेवोदेवेषुवनतेहिनोदुवः ६ समिद्धमग्निंसमिधागिरागृणेशुचिंपावकंपुरोअध्वरेध्रुवम् । विप्रंहोतारंपुरुवारमद्रुहंकविंसुम्नैरीमहेजातवेदसम् ७ त्वांदूतमग्नेअमृतंयुगेयुगेहव्यवाहंदधिरेपायुमीड्यम् । देवासश्चमतींसश्चजागृविंविभुंविश्पतिंनमसानिषेदिरे ८ विभूषन्नग्नउभयाँअनुव्रतादूतोदेवानांरजसीसमीयसे । यत्तेधीतिंसुमतिमावृणीमहेऽध स्मानस्त्रिवरूथःशिवोभव ९ तंसुप्रतीकंसुदृशंत्वश्चमविद्वांसोविदुष्टरंसपेम । सयक्षद्विश्वायुनानिविद्वान्प्रहव्यमग्निरमृतेषुवोचत् १० ॥ १८ ॥

तमग्नेपास्युततंपिपर्षिपस्तआनंडुवयेशूरधीतिम् । यज्ञस्यंवानिशितिंवोदितिंवा तमित्पृणक्षिशवंसोतराया ११ त्वमग्नेवनुष्युतोनिपाहित्वमुनःसहसावन्नवद्यात्। संत्वांध्वस्मन्वदभ्येतुपाथःसंरयिःस्पृहयाय्यःसहस्री १२ अग्निर्होतागृहपतिःस राजाविश्वांवेदजनिमाजातवेदाः । देवानामुतयोमर्त्यानांयजिष्ठःसप्रयंजतामृतावा १३ अग्नेयद्यविशोअध्वरस्यहोतःपावकशोचेवेष्टंहियज्वा । ऋतायंजासिमहिनाविधद्भर्हव्यावहयविष्ठयातेअद्य १४ अभिप्रयांसिसुधितानिहिख्योनित्वांदधीतरोदसीयजध्यै । अवानोमघवन्वाजसातावग्नेविश्वानिदुरितातरेमतातरेमतवावसातरेम १५ ॥ ११ ॥ अग्नेविश्वेभिःस्वनीकदेवैरूणावन्तंप्रथमःसीदयोनिम् । कुलायिनंघृतवन्तंसवित्रेयज्ञंनययजमानायसाधु १६ इममृत्यमथर्ववदग्निंमन्थन्तिवेधसः । यमंकूयन्तमानयुन्नमूरंश्याव्याभ्यः १७ जनिष्वादेववीतये

तयेसर्वतातास्वस्तये । आदेवान्वक्ष्यमृताँऋतावृधोयज्ञंदेवेषुपिस्पृशः १८ वयमु त्वागृहपतेजनानामग्नेअकर्मसमिधावृहन्तम्।अस्थूरिनोगार्हपत्यानिसन्तुतिग्मे-नंनस्तेजसासंशिशाधि ११ ॥ २० ॥ इति शाकलर्क्संहितायां षष्ठे मण्डले प्रथमो-ऽनुवाकः ॥ १ ॥

त्वमग्नेष्टाचत्वारिंशद्बरद्वाजो बार्हस्पत्योऽग्निर्गायत्री । आद्यापञ्चौ वर्धमाने । पञ्चत्वारिंशत्तमी त्रिष्टुप् । सप्तविंश्यन्त्ये चानुष्टुभौ ।

१६ त्वमग्नेयज्ञानांहोताविश्वेषांहितः । देवेभिर्मानुषेजने १ सनोमन्द्राभि-रध्वरेजिह्वाभिर्यजामहः । आदेवान्वक्षियक्षिच २ सेत्याहिवैधोअध्वनःपथश्च देवाञ्जसा । अग्नेयज्ञेषुसुक्रतो ३ त्वामीळेअध्वरेताभरतोवाजिभिःशुनम् । इ-जेयज्ञेषुयज्ञियम् ४ त्वमिमावायोपुरुदिवोदासायसुन्वते । भरद्वाजायदाशु-

न ५ ॥ २१ ॥ त्वंदूतो अमर्त्यआवहादैव्यंजनम् । शृण्वन्विपस्यसुष्टुतिम् ६ त्वामग्नेस्वाध्यो३मतीसोवेववीतये । यन्नेपुदेवमीळते ७ तवप्रयक्षिसंदृशंमृत क्रतुंसुदानवः । विश्वेजुषन्तकामिनः ८ त्वंहोतामनुर्हितोवह्निरासाविदुष्टरः । अग्नेयक्षिदिवोविशः ९ अग्रआयांहिवीतयेगृणानोहव्यदातये । निहोतासत्सि बर्हिषि १० ॥ २२ ॥ तंत्वासमिद्भिरङ्गिरोघृतेनवर्धयामसि । बृहच्छोचायविष्ठय ११ सनःपृथुश्रवाय्यमच्छादेववितासरि । बृहदग्नेसुवीर्यम् १२ त्वामग्ने पुष्करादध्यथर्वानिरमन्थत । मूर्ध्नोविश्वस्यवाघतः १३ तमुत्वादध्यङ्ङृषिःपुत्र ईधेअथर्वणः । वृत्रहणंपुरंदरम् १४ तमुत्वापाड्योवृषासमीधेदस्युहन्तमम् । धनंजयंरणेरणे १५ ॥ २३-॥ एह्यूषुब्रवाणितेऽग्नइत्थेतरागिरः । एभिर्वर्धास इन्दुभिः १६ यन्नकंचतेमनोदक्षंदधसउत्तरम् । तन्नासदःकृणवसे १७ नहितं

पूर्तमक्षितपद्ववन्नेमानंवसो । अथादुवोवनवसे १८ आग्निरंगामिभारंतोवृत्रहा
पुरुचेतनः । दिवोदासस्यसत्पतिः १९ सहिविश्वातिपार्थिवारयिंदाशन्महित्व-
ना । वन्वन्नवातोअस्तृतः २० ॥ २४ ॥ सप्रक्षवन्नवीयसाग्नेद्युम्नेनसंयता ।
बृहत्तंतन्थभानुना २१ प्रवःसखायोअग्नयेस्तोमंयज्ञंचधृष्णुया । अर्चगायंच
वेषसे २२ साहियोमानुषायुगासीदद्धोताकविक्रतुः । दूतश्चहव्यवाहनः २३
ताराजानाशुचिव्रतादित्यान्मारुतंगणम् । वसोयक्षोहरोदसी २४ वस्वीतेअग्ने
संदृष्टिरियतेमर्त्याय । ऊर्जोनपादमृतस्य २५ ॥ २५ ॥ ऋत्वादाअंस्तुश्रेष्ठो ऽय
त्वावन्वन्त्सुरेक्णाः । मर्तआनाशसुवक्तिम् २६ तेतेअग्नेत्वोतादयर्यन्तोविश्व-
मायुः । तरन्तोअर्योअरातीर्वन्वन्तोअर्योअरातीः २७ अग्निस्तिग्मेनशोचिषा
यासद्विश्वंन्यं त्रिणम् । अग्निर्नोवनतेरयिम् २८ सुवीरंरयिमाभरजातवेदो

विचर्षणे । जहिरक्षांसिसुक्रतो २९ त्वंनःपाह्यंहसोजातवेदोअघायुतः । रक्षा णोब्रह्मणस्कवे ३० ॥ २६ ॥ योनोअग्नेदुरेवुआमतोंवधायुदाशति । तस्मान्नः पाह्यंहसः ३१ त्वंतंदेवजिह्वयापरिबाधस्वदुष्कृतम् । मर्तोयोनोजिघांसति ३२ भरद्वाजायसप्रथःशर्मयच्छसहंत्य । अग्नेवरेण्यंवसु ३३ अग्निर्वृत्राणिजङ्घन द्भविण स्युर्विपन्यया । समिद्धः शुक्रआहुतः ३४ गर्भंमातुःपितुष्पितावेदिद्यु तानोअक्षरे । सीदन्नृतस्ययोनिमा ३५ ॥ २७ ॥ ब्रह्मप्रजावदाभरजातवेदो विचर्षणे । अग्नेयद्दीदयद्दिवि ३६ उपत्वाग्नवसंदृशंप्रयस्वन्तः सहस्कृत । अ ग्नेससृज्महेगिरः ३७ उपच्छायामिवघृणेरगन्मशर्मतेवयम् । अग्नेहिरण्यसं दृशः ३८ येउग्रइवशर्यहातिग्मशृङ्गोनवंसगः । अग्नेपुरोरुरोजिथ ३९ आयं हस्तेनखादिनंशिशुंजातंनबिभ्रति । विशामग्निंस्वध्वरम् ४० ॥ २८ ॥ प्रदे-

वंदेववीतयेभरतावसुवित्तमम् । आस्येयोनौनिषीदतु ४१ आजातंजातवेदसि प्रियंशिशीतातिथिम् । स्योनआगृहपतिम् ४२ अग्नेयुक्ष्वाहियेतवाश्वासोदेव साधवः । अरंवहन्तिमन्यवे ४३ अच्छानोयाह्यावहाभिप्रयांसिवीतये । आदेवान्त्सोमंपीतये ४४ उदग्नेभारतद्युमदजस्रेणदविद्युतत् । शोचाविभाह्यजर ४५ ॥ २१ ॥ वीतीयोदेवंमतींदुवस्येदग्निमींळीताध्वरेहविष्मान् । होतारंसत्ययजंरोदस्योरुत्तानहस्तोनमसाविवासेत् ४६ आतेअग्नऋचाहविर्हदा तुष्टंभरामसि । तेतेभवन्तूक्षणंऋषभासोवशाउत ४७ अग्निंदेवासोअग्रियमिन्धतेवृत्रहन्तमम् । येनावसून्याभृतातृक्षारक्षांसिवाजिना ४८ ॥ ३० ॥ इति शाकलसंहितायां चतुर्थाष्टके पञ्चमोऽध्यायः ॥ ५ ॥

पिवपञ्चोनैन्द्रत्रैष्टुभंद्विपदान्तंतपुष्टुहिमहान्तसप्तोनाद्यौर्नविपिप्रोविंराळिमाउद्वादशनवम्येकादश्यौवैश्वदेव्यौयपकइदेकादशमुतइदशवृषायातेनवश्रुधीनोष्टौकिमस्यान्त्याचायमानस्याभ्यावर्तिनोदानस्तुतिरागायोगव्यंद्वितीयैन्द्रीचान्त्यश्चपादोन्त्यानुष्टुब्जागतस्तूचोद्वितीयादिः ।

पिव पञ्चदश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् । अन्त्या द्विपदा ।

१७ ओम् पिवासोमंमाभियमुग्रतर्दंऊर्नंगव्यंमहिगृणानइन्द्रावियोधृष्णोवधिंपो वज्रहस्तविश्वावृत्रमंमित्रियाशवोभिः १सईंपाहियऋजीपीतरुत्रोयःशिप्रंवान्वृत्रभोयोमंतीनाम् । योगोत्रभिर्द्वज्रभृद्योहरिष्ठाःसईन्द्रचित्राँअभितृन्धिवाजान् २ एवापाहिप्रत्नथामन्दतुत्वाशुधिब्रह्मंवावृधस्वोतगीर्भिः । आविःसूर्यंकृणुहिपीपिहीषोजहिशत्रूरभिगाइन्द्रतृन्धि ३ तेत्वामदांवृहदिन्द्रस्वधावइमेपीताउक्षयन्तयुमन्तम् । महामनूनंतवसंविभूतिंमत्सरासोजर्हृषन्तप्रसाहम् ४ येभिःसूर्यंमुपसं

मन्दसानोऽवासयोऽपद्दह्लानिदर्द्दत् । महामद्रिंपरिगाइन्द्रसन्तंनुत्थाअच्युतंसद-
सःपरिस्वात् ५ ॥ १ ॥ तवक्रत्वातवदंसनाभिरामासुपक्वंशच्यानिदीधः ।
और्णोर्दुरउस्रियाभ्योविदद्दह्लोदुवाद्राअसृजोअङ्गिरस्वान् ६ प्रपाथक्षांमाहिदंसो
व्यु१र्वीमुपद्यामष्वोवृहदिन्द्रस्तभायः । अधारयोरोदसीदेवपुत्रेप्रत्नेमातरायह्वीऋ-
तस्य ७ अधत्वाविश्वेपुरइन्द्रदेवाएकंतवसंदधिरेभराय । अदेवोयदभ्यौहिष्टदेवा-
न्त्स्वर्षातावृणतइन्द्रमत्रं ८ अधद्यौश्चित्तेअपसानुयज्ञांदद्दितानंमद्रियसास्वस्यंम-
न्योः । अहिंयदिन्द्रोअभ्योहंसानंनिचिद्दिश्वायुःशयथेजघानं १ अधत्वष्टातेमह
उग्रवज्रंसहस्रभृष्टिंववृतच्छताश्रिम् । निकाममरमणसंयेननवन्तमहिंसंपिणगृ-
जीषिन् १० ॥ २ ॥ वर्धान्यंविश्वेमरुतःसजोषाःपचच्छतंमहिषाँइन्द्रतुभ्यम् ।
पूषाविष्णुस्त्रीणिसरांसिधावन्वृत्रहणंमदिरमंशुमस्मै ११ आक्षोदोमहिवृतंनदी-

नांपरिष्ठितमसृजऊर्मिमपाम् । तासामनुप्रवतइन्द्रपन्थांप्रादैयोनीचीरपसःसमुद्रम् १२ एवाताविश्वांचकृवांसमिन्द्रंमहामुग्रमजुर्यंसंहोदाम् । सुवीरंत्वास्वायुधंसुवज्रमाब्रह्मन्व्यमवंसेवधृत्यात् १३ सनोवाजायश्रवसइपेचरायेधेहियुमतइन्द्रविप्रान् । भरद्वाजेनवतइन्द्रसूरीन्दिविचंस्मैधिषायैनइन्द्र १४ अयावाजंदेवहितंसनेममदेमशतहिमाःसुवीराः १५ ॥ ३ ॥

तमुष्टुहि पञ्चदश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

१८ तमुष्टुहियोअभिभूत्योजावन्वन्नवातःपुरुहूतइन्द्रः । अषाळ्हमुग्रंसहमानमाभिर्गीर्भिर्वर्धवृषभंचर्षणीनाम् १ सयुध्मःसत्वाखजकृत्समद्वातुविम्रक्षोनदनुमाँऋजीषी । बृहद्रेणुश्यवनोमानुषाणामेकःकृष्टीनामभवत्सहावा २ त्वंह्नुत्यदंदमायोदस्यूरेकःकृष्टीरवनोरार्याय । अस्तिस्विन्नुवीर्यं१तत्तइन्द्रनस्विदस्तित-

आसहस्रंपथिभिरिन्द्रयातुर्विद्युम्नतुविराजेभिरर्वाक्। याहिसूनोसहसोयस्यनू चिददेवईशेपुरुहूतयोतौः ११ प्रतुविद्युम्नस्यस्थविरस्यघृष्वेर्दिवोररप्शेमहिमापृथिव्याः। नास्यशत्रुर्नप्रतिमानमस्तिनप्रतिष्ठिःपुरुमायस्यसह्योः १२ प्रतत्तेअद्याकरणंकृतंभूत्कुत्संयदायुमतिथिग्वमस्मै। पुरूसहस्रानिशिशाअभिक्षामुत्तूर्वयाणंधृषतानिनेथ १३ अनुत्वाहिंद्रेअधदेवदेवामदन्विश्वेकवितमंकवीनाम्। करोयत्रवरिवोवाधितायादिवेजनायतन्वेगृणानः १४ अनुद्यावापृथिवीतत्तओजोऽमर्त्याजिहतइन्द्रदेवाः। कृष्वाकृत्नोअकृतंयत्तेअस्त्युक्थंनवीयोजनयस्वयज्ञैः १५॥ ६॥

महांस्त्रयोदश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप्।

१ महाँइन्द्रोनृवदार्चर्षणिप्राउतद्विवर्हाँअमिनःसहोभिः। अस्मद्र्यंग्वावृधेवीर-

यॉयोरुःपृथुःसुकृतःकर्तृभिर्भूत् १ इन्द्रमेवधिषणासातयेधाद्वृहन्तमृष्वमजरंयुवानम् । अपाळेनशवसाशूशुवांसंसद्यश्चिद्योवावृधेअसामि २ पृथूकरस्नावहुलागभस्तीअस्मद्र्य १ क्संमिमीहिश्रवांसि । यूथेवपश्वःपशुपादमूनाअस्माँइन्द्राभ्याववृत्स्वाजौ ३ तंवइन्द्रंचतिनंमस्यशाकैरिहूनंवाजयन्तोहुवेम । यथाचित्पूर्वेजरितारआसुरनेद्याअनवद्याअरिष्टाः ४ धृतव्रतोधनदाःसोमवृद्धःसहिवामस्यवसुनःपुरुक्षुः । संजग्मिरेपथ्याइरायोअस्मिन्त्समुद्रेनसिन्धवोयादमानाः ५ ॥ ७ ॥ शविष्ठंनआभरगूरशवऽओजिष्ठमोजोअभिभूतउग्रम् । विश्वाद्युम्नावृष्ण्यामानुषाणामस्मभ्यंदाहरिवोमादयध्यै ६ यस्तेमदःपृतनाषाळमृध्रइन्द्रतंनआभरशूशुवांसम् । येनतोकस्यतनयस्यसातौमॅसीमहिजिगीवांसस्त्वोताः ७ आनोभरवृषणंशुष्ममिन्द्रधनस्पृतंशूशुवांसंसुदक्षम् । येनवंसामपृतनासुशत्रू-

न्तयोतिभिरुतजामीँरजामीन् ८ आतेशुष्मोवृषभएतुपश्चादोत्तरादधरादापुरस्तात्। आविश्वतोअभिसमेत्यूर्वाङिन्द्रद्युम्नंस्वर्वद्धेह्यस्मे ९ नूचत्तइन्द्रनृतमाभिरूतीवसोमहिवामंश्रोमतेभिः। ईक्षेहिवस्वउभयस्यराजन्धारत्नंमहिस्थूरंबृहन्तम् १० मरुत्वन्तंवृषभंवावृधानमकवारिंदिव्यंशासमिन्द्रम्। विश्वासाह्वमवसेनूतनायोग्रंसहोदामिहतंहुवेम ११ जनेवज्रिन्महिचिन्मन्यमानमेभ्योनृभ्योरन्धयायेष्वस्मे। अधाहित्वापृथिव्यांशूरसातौहवामहेतनयेगोष्वप्सु १२ वयंतएभिःपुरुहूतसख्यैःशत्रोःशत्रोरुत्तरइत्स्याम। घ्नन्तोवृत्राण्युभयानिशूरारायामदेमबृहतात्वोताः १३ ॥ ८ ॥

द्यौर्न त्रयोदश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप्। सप्तमी विराट्।

२० द्यौर्नयइन्द्राभिभूमार्यस्तस्थौरयिःशवसापृत्सुजनान्। तंनःसहस्रंभर-

ध्यै ८ सड्डैस्पृधोवनतेअप्रतीतोविभ्रद्वज्रंवृत्रहणंगभस्तौ । तिष्ठद्धरीअध्यस्तेवग-
तेवचोयुजावहतइन्द्रमूष्वम् १ सुनेमतेऽवसानव्यइन्द्रप्रपूर्वःस्तवन्तएनायज्ञैः ।
सप्तयत्पुरःशर्मशारदीर्दर्द्धन्दासीःपुरुकुत्सायशिक्षन् १० त्वंवृधइन्द्रपूर्व्योभूर्वरि-
वस्यन्नुशनेकाव्याय । परानवंवास्त्वमनुदेयंमहेपित्रेददाथुस्वंनपातम् ११ त्वं
धुनिरिन्द्रधुनिमतीर्ऋणोरपःसीरानस्रवन्तीः । प्रयत्समुद्रमतिशूरपार्षिपारया
तुर्वशंयदुंस्वस्ति १२ तवहत्यदिन्द्रविश्वमाजौसस्तोधुनीचुमुरीयाहसिष्वपू ।
दीदयदित्तुभ्यंसोमेभिःसुन्वन्दभीतिरिध्मभृतिःपक्थ्यशैकः १३ ॥ १० ॥

इमा उ द्वादश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् । नवम्युपान्त्ययोर्विश्वे देवाः ॥

२१ इमाउत्वापुरुतमस्यकारोर्हव्यंवीरहव्याहवन्ते । धियोरथेष्ठामजरंनवीं-
योरयिर्विभूतिरीयतेवचस्या १ तमुस्तुषइन्द्रंयोविदानोगिर्वाहसंगीर्भिर्यज्ञवृद्ध-

म् । यस्यदिवमतिंमह्नापृथिव्याःपुरुमायस्यंरिरिचेमहित्वम् २ सइत्तमोऽवयुनं
तंतन्वत्सूर्येणवयुनंवच्चकार । कुदातेमताँअमृतंस्यधामेयंक्षन्तोनामिनन्तिस्वधा-
वः ३ यस्ताचकारसकुहस्विदिन्द्रःकमाजनंचरतिकासुविक्षु । कस्तेयज्ञोमनं-
सेशंवरायकोअर्कइन्द्रकतुमःसहोता ४ इदाहितेवेविषतःपुराजाःप्रत्नासआसुः
पुरुकृत्सखायः । येमध्यमासउतनूतनासउतावमस्यपुरुहूतवोधि ५ ॥ ११ ॥
तंपृच्छन्तोऽवरासःपराणिप्रत्नातइन्द्रश्रुत्यानुयेमुः । अचाँमसिवीरब्रह्मवाहोया-
देवविश्मतात्त्वांमहान्तम् ६ अभित्वापाजोरक्षसोवितस्थेमहिजज्ञानमभितत्सुतिं-
ष्व । तवप्रत्नेनयुज्येनसख्यावज्रेणवृष्णोअपतानुदस्व ७ सतुश्रुधीन्द्रनूतनस्यब्रह्म-
ण्यतोवीरकारुधायः । त्वंह्याँपिःप्रदिविपितॄणांश्रद्धभूथंसुहवएष्टौ ८ प्रो-
तयेवरुणंमित्रमिन्द्रंमरुतःकृण्वावसेनोअद्य । प्रपूषणंविष्णुमग्निंपुरंधिंसवितार-

मोषधीःपर्वतांश्च ९ इमउत्वापुरुशाकप्रयज्योजरितारोअभ्यर्चन्त्यर्कैः । श्रुधी हवमाहुवतोहुवानोनत्वावाँअन्योअमृतत्वदस्ति १० नूमआवाचमुपयाहिविद्वान्विश्वेभिःसूनोसहसोयजत्रैः । येअग्निजिह्वाऋतसापआसुर्येमनुंचक्रुरुपरंदसाय ११ सनोवोधिपुरएतासुगेपूतदुर्गेपुपथिकृद्विदानः । येअश्वमासउरवोवहिष्ठास्तेभिर्नइंद्राभिवक्षिवाजम् १२ ॥ १२ ॥

य एक एकादश भरद्वाजो वार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

२२ यएकइद्व्यश्वपर्णीनामिन्द्रंतंगीर्भिरभ्यर्चआभिः । यःपत्यंतेवृषभोवृष्ण्यावान्त्सत्यःसत्वापुरुमायःसहस्वान् १ तमुनःपूर्वेपितरोनवग्वाःसप्तविप्रासोअभिवाजयन्तः । नक्षद्वामंततुरिंपर्वतेष्ठामद्रोघवाचंमतिभिःशविष्ठम् २ तमीमहइन्द्रंमस्यरायःपुरुवीरस्यनृवतःपुरुक्षोः।योअस्कंधोयुरजरःस्वर्वान्तमाभ-

रहरिवोमादयध्यै ३ तन्नोविवोचोयदितेपुराचिज्जरितारंआनशुःसुम्नमिन्द्र । क-
स्तेभागःकिंवयोदुध्रखिद्वःपुरुहूतपुरूवसोऽसुघ्नः ४ तंपृच्छन्तीवज्रहस्तंरथेष्ठा-
मिन्द्रंवेपीवक्करीयस्यनूगीः । तुविग्राभंतुविकूमिंरभोदांगातुमिषेनक्षतेतुम्नम-
च्छं ५ ॥ १३ ॥ अयाहत्यंमाययावावृधानंमनोजुवास्वतवःपर्वतेन । अच्युता
चिद्वीळितास्तोजोरुजोविद्वाधृतावीरपशिन् ६ तंवोधियानव्यस्याशविष्ठंप्रत्नं
प्रत्नवत्परितंसयध्यै । सनोवक्षदनिमानःसुवह्येन्द्रोविश्वान्यतिदुर्गहाणि ७ आ
जनायद्वह्वणेपार्थिवानिदिव्यानिदीपयोऽन्तरिक्षा । तपोवृषन्विश्वतःशोचिषातान्
ब्रह्मद्विषेशोचयक्षामपश्च ८ भुवोजनस्यदिव्यस्यराजापार्थिवस्यजगतस्त्वेषसंदृक् ।
धिष्ववज्रंदक्षिणइन्द्रहस्तेविश्वाअजुर्यदयसेविमायाः ९ आसंयतमिन्द्र
णःस्वस्तिशंतुतूर्याहिवृत्रतीममुंधाम् । ययादासान्यार्याणिवृत्राकरोवज्रिन्त्सुतु-

कानाहुपाणि १० सनोनियुद्भिःपुरुहूतवेधोविश्ववाराभिरागंहिप्रयज्यो । नया अदेवोवरतेनदेवआभिर्याहितूयमामंद्यद्रिक् ११ ॥ १४ ॥

सुत इन्द्र ऋषभरद्वाजो बार्हस्पत्य इन्द्रास्त्रिष्टुप् ।

२३सुतइत्त्वंनिमिश्लइन्द्रसोमेस्तोमेब्रह्मणिशस्यमानउक्थे।यद्वायुक्ताभ्यांमघवन्हरिभ्यांविभ्रद्वज्रंबाह्वोरिन्द्रयासि १ यद्वादिविपार्येसुष्विमिन्द्रवृत्रहत्येऽवसिशूरसातौ । यद्वादक्षस्यविभ्युषोआविभ्यदरन्धयःशर्धतइन्द्रदस्यून् २ पातासुतमिन्द्रोअस्तुसोमंप्रणेनीरुग्रोजरितारमूती । कतावीरायसुष्वयउलोकंवातावसुस्तुवतेकीरयेचित् ३ गन्तेयान्तिसवनाहरिभ्यांवृत्रिर्वज्रंपपिःसोमंदृदिग्राः । कतावीरंनयसिवंचीरंश्रोताहवंगृणतःस्तोमवाहाः ४ अस्मैवयंयद्वावानतद्विद्मइन्द्राययोनंःप्रदिवोअपस्कः । सुतेसोमेस्तुमसिशंसदुक्थेन्द्रायब्रह्मवर्धनंयथा-

संत् ५ ॥ १५ ॥ ब्रह्माणिहिचकृषेवर्धनानितावच्चइन्द्रमतिभिर्विविष्मः । सुते सोमेसुतपाःशंतमानिरान्ध्याक्रियास्मवक्षणानियज्ञैः ६ सनोवोधिपुरोळाशंर-राणःपिवातुसोमंगोऋजीकमिन्द्र । एदंवर्हिर्यजमानस्यसीदोरुंकृधित्वायतउ-लोकम् ७ समन्दस्वाह्यनुजोषंमुग्रप्रत्वांयज्ञासइमेअभुवन्तु । प्रेमेहवांसःपुरु-हूतमस्मेआत्वेयंधीरवंसइन्द्रयन्याः ८ तंवःसखायःसंयथासुतेषुसोमेभिरिंपृण-ताभोजमिन्द्रम् । कुवित्तस्माअसंतिनोभरायनसुष्विमिन्द्रोऽवंसेमृधाति ९ एवे-दिन्द्रःसुतेअस्ताविसोमेभरद्वाजेषुक्षयदिन्मघोनः । असद्यथाजरित्रउतसूरिरिन्द्रो रायोविश्ववारस्यदाता १० ॥ १६ ॥ इति शा० सं० षष्ठे मण्डले द्वितीयोऽनुवाकः॥ २॥

वृषा दश भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

२४ वृषामदइन्द्रेश्लोकंउक्थासचासोमेषुसुतपाऋजीषी । अर्चन्योमघवा

नृभ्यऽउक्थैर्युक्षोराजाँगिरामक्षितोतिः १ ततुरिर्वीरोनयोविचेताःश्रोताहवंगृणत उव्यूतिः । वसुःशंसोनरांकारुधायावाजीस्तुतोविदथेदातिवाजम् २ अक्षोन चक्र्योःशूरवृहन्प्रतेमल्लारिंरिचेरोदस्योः । वृक्षस्यनुतेपुरुहूतवयाव्यूइतयोरुरुहुरिन्द्रपूर्वीः ३ शचीवतस्तेपुरुशाकशाकागवामिवस्तुतयःसंचरणीः । वत्सानां नतन्तयस्तइन्द्रदामन्वन्तोअदामानःसुदामन् ४ अन्यद्द्यकर्वरमन्यदुश्वोऽसंच सन्मुहुराचक्रिरिन्द्रः । मित्रोनोअत्रवरुणश्चपूषार्योवशंस्यपर्यतास्ति ५ ॥ १७ ॥ वित्वदापोनपर्वतस्यपृष्ठादुक्थेभिरिन्द्रानयन्तयज्ञैः । तंत्वाभिःसुष्टुतिभिर्वाजयन्तआजिंनजग्मुर्गिर्वाहोअश्वाः ६ नयंजरन्तिशरदोनमासानद्यावइन्द्रमवक्रर्शयन्ति । वृद्धस्यचिद्वर्धतामस्यतनूःस्तोमैभिरुक्थैश्चशस्यमाना ७ नवीळवे नमतेनस्थिरायनशर्धतेदस्युंजूतायस्तवान् । अजाइन्द्रस्यगिरयश्चिदुष्वागम्भी-

रोचिंद्रवतिगाधमस्मै ८ गम्भीरेणउरुणामत्रिन्प्रेषोयंन्धिसुतपावन्वाजान् ।
स्थाऊषुऊर्ध्वऊतीअरिंषण्यन्नक्तोव्युँष्टौपरितक्म्यायाम् १ सचस्वनायमवसे
अभीकंइतोवातमिंन्द्रपाहिरिपः । अमाचैनमरंण्येपाहिरिषोमदैमशतहिंमाः
सुवीराः १० ॥ १८ ॥

या ते नव भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

२५ यातंऊतिरंवमायापरमायामंध्यमेन्द्रंगुग्मिन्नास्ति । ताभिरूषुवृत्रहत्यै-
ऽवीर्णभिश्चवाजैर्महान्नउग्र १ आभिःस्पृधोमिथतीरंरिषण्यन्नमित्रस्यव्यथया
मन्युमिन्द्र । आभिर्विश्वाअभियुजोविपूचीरार्याय विशोऽवतारीर्दासीः २ इन्द्र
जामयंउतयेजामयोऽर्वाचीनासोवनुषोयुयुज्रे । त्वमेषांविथुराशवांसिजहिवृ-
ष्ण्यानिकृणुहीपरांचः ३ शूरोवाशूरैवनतेशरीरैस्तनूरुचातरुषियत्कृणवैते । ॥२५२॥

तोकेषुगोषुतनयेषुदप्सुविक्रन्दसीउर्वरासुब्रवैते ४ नहित्वाशूरोनतुरोनधृष्णुर्न त्वायोधोमन्यमानोयुयोध । इन्द्रनकिर्ह्वाप्रत्यस्त्येषांविश्वाजातान्युभ्यसिता-नि ५ ॥ ११ ॥ सपत्यतउभयोर्नृम्णमयोर्यदींवेधसःसमिथेहवन्ते । वृत्रेवा महोनृवतिक्षयेवाव्यचस्वन्तायदिवितन्तसैते ६ अधस्मातेचर्षणयोयदेजानिन्द्र-त्रातोतभवावरूता । अस्माकांसोयेनृतमासोअर्यइन्द्रसूरयोदधिरेपुरोनः ७ अनुतेदायिमहइन्द्रियायसत्रातेविश्वमनुवृत्रहत्यै । अनुक्षत्रमनुसहोयजत्रेन्द्रदे-वेभिरनुतेनृषह्यै ८ एवानःस्पृधःसमजासमत्स्विन्द्रराराधिमिथतीरदेवीः । वि-द्यामवस्तोरवसागृणन्तोभरद्वाजाउततइन्द्रनूनम् ९ ॥ २० ॥

श्रुधी नोष्टौ भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

२६ श्रुधीनइन्द्रब्रह्मयामसित्वामहोवाजस्यसातौवावृपाणाः । संयद्विशोऽयन्त

शूरसाताउप्रंनोऽनुःपार्येअहंन्दाः १ त्वांवाजीहवतेवाजिनेयोमहोवाजस्यगध्यस्यसातौ । त्वांवृत्रेष्विन्द्रसत्पतिंतरुत्रंत्वांचेष्टेमुष्टिहागोषुयुध्यन् २ त्वंकविंचोदयोऽकंसांतौत्वंकुत्सायशुष्णंदाशुषेवक् । त्वंशिरोअमुमणःपराहन्नतिथिग्वायशंस्यंकरिष्यन् ३ त्वंरथंप्रभंरोयोषमुष्वमावोयुध्यन्तंवृषभंदशद्युम् । त्वंतुग्रंवेतसवेसचाहन्त्वंतुजिंगुणन्तमिन्द्रतूतोः ४ त्वंतदुक्थमिन्द्रबर्हणाकृःप्रयच्छतासहस्रांशूरदर्षि । अवंगिरेदामंशम्बरंहन्प्रावोदिवोदासंचित्राभिरूती ५ ॥ २१ ॥ त्वंश्रद्धाभिर्मन्दसानःसोमैर्दभीतयेचुमुरिमिन्द्रसिष्वप् । त्वंरजिंपिठीनसेदशुष्यन्वृष्टिंसहस्राशच्यासचाहन् ६ अहंचनतत्सूरिभिरानशेयांतवज्यायइन्द्रसुम्नमोजेः । त्वंपायत्स्तर्वन्तेसप्तवीरीर्वीरान्विवरूथेनुनहुंयाशविष्ठ ७ वयंतेअस्यामिन्द्र ॥२१॥

युम्नहूतौसखायःस्याममहिनुमेष्ठाः । प्रातर्दनिःक्षत्रश्रीरस्तुश्रेष्ठोघनेवृत्राणांसन-येधनानाम् ८ ॥ २२ ॥

किमस्याष्टौ भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् । अन्यायाऽभ्यावर्तिनश्चायमानस्य दानस्तुतिः ।

२७ किमंस्युमदेकिम्वंस्यपीताविन्द्रःकिमंस्यसख्येचकार । रणांवायेनिपदिकिंतेअंस्यपुराविंविद्रेकिमुनूतंनासः १ सदंस्युमदेसदंस्यपीताविन्द्रःसदंस्यसख्येचकार । रणांवायेनिपदिसत्तेअंस्यपुराविंविद्रेसदुनूतंनासः २ नहिनुतेमहिमनःसमस्युनमंघवन्मघवत्त्वस्यंविध्र । नराधंसोराधसोनूतनस्येन्द्रनकिर्ददशइन्द्रियंते ३ एतत्त्यत्तइन्द्रियमंचेतियेनावधीर्वरशिंखस्यशेपः । वज्रंस्ययत्तेनिहंतस्यशुष्मात्स्वनाच्चिदिन्द्रपरमोदद्रारं ४ वधीदिन्द्रोवरशिंखस्यशेपोऽभ्यावर्तिनेचायमानायशिक्षन् । वृचीवंतोयदंहरियूपीयायांहन्पूर्वेअर्धेभियसापरोदर्त् ५ ॥ २३ ॥

त्रिंशच्छतंवर्मिणइन्द्रसाकंयव्यावत्यांपुरुहूतश्रवस्या।वृचीवन्तःशरवेपत्यमानाः
पात्राभिन्दानान्यर्थान्यायन्दयस्यगावांवरुपासूयवस्यूअन्तरूधुचरंतोरेरिहाणा।
ससृज्रंयायतुर्वशंपरांदाद्वृचीवंतोदैववाताधशिक्षन् ७ हुयाँअग्नेरथिनोविंशतिंगा
वधूमंतोमघवामह्यंसम्राट् । अभ्यावर्तीचायमानोदंदातिदूणाशेयंदक्षिणापार्थि-
वानाम् ८ ॥ २४ ॥

आ गावोष्टौ भरद्वाजो बार्हस्पत्यो गायत्रिष्टुप्। अष्टम्या अन्त्यपादस्योपाद्या-
याश्चेन्द्रो वा। आद्या पञ्चम्याद्यास्तिसृश्च त्रिष्टुभः। अन्त्यानुष्टुप्।

२८ आगावोअग्मन्नुतभद्रमक्रन्त्सीदन्तुगोष्ठेरणयन्त्वस्मे। प्रजावतीःपुरुरू-
पाइहस्युरिन्द्रायपूर्वीरुषसोदुहानाः १ इन्द्रोयज्वनेपृणतेचशिक्षत्युपेद्ददातिनस्वं

मुपायंति । भूयोभूयोरयिमिदस्यवर्धयन्नभिन्नेखिल्येनिदधातिदेवयुम् २ नतानंशान्त्रिनदंभातितस्करोनासामामित्रोव्यथिरादधर्षति । देवाँश्चयाभिर्यजतेददातिचज्योगिताभिःसचतेगोपतिःसह ३ नताअर्वारेणुकंकाटोअश्नुतेनसंस्कृतत्रमुपयन्तिताअभि । उरुगायमभयंतस्यताअनुगावोमदंस्यविचरन्तियज्वनः ४ गावोभगोगावइन्द्रोमेअच्छान्गावःसोमस्यप्रथमस्यभक्षः। इमायागावःसजनासइन्द्रइच्छामीद्धृदामनसाचिदिन्द्रम् ५ यूयंगावोमेदयथाकृशंचिदश्रीरंचित्कृणुथासुप्रतीकम् । भद्रंगृहंकृणुथभद्रवाचोबृहद्वोवयउच्यतेसभासु ६ प्रजावतीःसूयवसंरिशन्तीःशुद्धाअपःसुप्रपाणेपिबन्तीः। मावःस्तेनईशतमाघशंसःपरिवोहेतीरुद्रस्यवृज्याः ७ उपेदमुपपर्चनमासुगोपूपपृच्यताम् । उपक्रमस्यरेतस्युपेन्द्रतवीर्ये ८ ॥ २५ ॥ इति शाकलर्क्संहितायां चतुर्थाष्टके षष्ठोऽध्यायः ॥ ६ ॥

इन्द्रंपड्भ्यःपञ्चाभूरेकःसुहोत्रस्तुचतुर्थीशक्वर्यपूर्व्यायओजिष्ठःशुनहोत्रस्तुसंत्वेकदानरस्तुसत्रावाग्रि-
यमपान्मन्द्रस्येन्द्रपिवाहेळमानःप्रत्यस्मैचतुष्कमानुष्टुभंबृहत्यन्तंयस्यौष्णहंयोरियवश्चतुर्विंशतिःशंयुर्बा-
॥२६२॥ र्हस्पत्योक्षादौपळनुष्टुभस्तिसश्चविराजोमध्यमैववासांयआनयत्रयस्त्रिंशद्वायत्रंपुरूतममतिंनिचृदधिवृवुः
पादानिचृदन्त्यानुष्टुप्चेन्त्येवृवुस्तक्षादेवतंत्वामिद्धिपळूनामागायंस्वादुरेकत्रिंशद्वर्गःपञ्चादौसौम्योग-
व्यूत्यर्धर्चोलिङ्गोक्तदेवतःप्रस्तोकइतित्रिष्टुबनुष्टुप् गायत्रीद्विपदासार्ञ्जयस्यप्रस्तोकस्यदानस्तुतिःपरौ-
वृचौरथवुन्दुभिदेवत्यावैन्द्रोन्त्योर्धर्चोयुजानोबृहतीदिवस्पृथिव्याजगती ।

इन्द्रं पड् भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप्।

२१ ॐम् इन्द्रंवोनरःसख्यायसेपुर्महोयन्तःसुमतयेचकानाः । महोहिदाता वज्रंहस्तोअस्तिमहामुरण्वमवसेयजध्वम् १ आयस्मिन्हस्तेनयामिमिक्षुरारथे हिरण्ययेरथेष्ठाः । आरुहमयोगभस्त्योःस्थूरयोराध्वन्नश्वासोवृषणोयुजानाः २ ॥२६२॥

श्रि॒येते॒पाद॒दुव॒आमि॑मिक्षुर्घृ॒ष्णुर्व॒जीशव॑सा॒दक्षि॑णावान् । वसा॑नो॒अत्कं॑सु॒राभिं॒द्-
शेकं॑स्व॒१॒॑र्णनृ॑तविप्रि॒रोवं॑भूथ ३ ससो॒म॒आमि॑श्लतमः॒सुतो॑भू॒द्यस्मि॑न्प्र॒क्तिःप॒च्यते
सन्ति॑घा॒नाः । इन्द्रं॑नरः॒स्तुव॑न्तो॒ब्रह्म॑का॒राउ॒क्थाशं॑स॒न्तोदे॒ववा॑ततमाः ४ नते॒अ-
न्तः॒शव॑सोधा॒य्यस्यवितु॒र्बाव॒धेरोद॑सीमहि॒त्वा । आता॑सू॒रिःपृ॑णति॒तूतु॑जानो॒यूथे-
वा॒प्सुस॒मीज॑मानऊ॒ती ५ ए॒वेदिन्द्रं॑सु॒हव॑मू॒ष्वो॑अ॒स्तूतीअ॑नू॒तोहि॑रिशि॒प्रःसत्वा॑ ।
ए॒वाहि॒जा॒तोअ॑स॒मात्योजाः॒पुरू॑च॒वृत्राह॑न॒ति॒निद॑स्यून् ६ ॥ १ ॥

भूयः पञ्च भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

३० भूयु॒इद्वा॑चू॒धेवी॒र्याँ॑य॒ँएको॑अजु॒र्योद॑यते॒वस॑नि । प्रारि॑रिचे॒दिव॒इन्द्रं॒॑पृथि॒व्या
अ॒र्धमि॑द॒स्यप्र॑ति॒रोद॑सीउ॒भे १ अधा॑मन्ये॒वृह॑द॒सु॒र्यं॑मस्य॒यानि॑दा॒धार॒नकि॑रा॒मिना-
ति । दि॒वेदि॑वे॒सूर्यो॑दर्श॒तोभू॒द्विसद्मा॑न्यु॒र्विया॑सु॒क्रतु॑र्धात् २ अ॒द्याचि॒त्रूचि॒त्तदपो॑न-

दीनांयदाभ्योअरंदोगातुमिन्द्र । निपर्वताअञ्जसादोनसैदुस्त्वयादृळ्हानिसुक्रतोर जाँसि ३ सत्यमित्तन्नत्वावाँअन्योअस्तीन्द्रदेवोनमर्त्योज्यायान् । अहन्नहिंपरिशयानमर्णोऽवासृजोअपोअच्छासमुद्रम् ४ त्वमपोविदुरोविपूचीरिन्द्रदृळ्हमरुजःपर्वतस्य । राजाभवोजगतश्चर्षणीनांसाकंसूर्यंजनयन्द्यामुषासम् ५ ॥ २ ॥

अभूरेकः पञ्च मुहोत्र इन्द्रस्त्रिष्टुप् । उपान्त्या शक्करी ।

३१ अभूरेकोरयिपतेरयीणामाहस्तयोरविथाइन्द्रकृष्टीः । वितोकेअप्सुतनयेचसूरेऽवोचन्तचर्षणयोविवाचः १ त्वद्रियेन्द्रपार्थिवानिविश्वाच्युताचिद्व्यावयन्तेरजाँसि । द्यावाक्षामापर्वतासोवनानिविश्वंदृळ्हंभयतेअज्मन्नातें २ त्वंकुत्सेनाभिशुष्णमिन्द्राशुषंयुध्यकुयवंगविष्टौ । दशप्रपित्वेअधसूर्यस्यमुषायश्चक्रमविवेरपाँसि ३ त्वशतान्यवशम्बरस्यपुरोजघन्थाप्रतीनिदस्योः । अशिक्षोय- ॥२६३॥

त्रशच्यांशचीवोदिवोदासायसुन्वतेसुतक्रेभरद्वाजायगृणतेवसूनि ४ ससत्यसत्त्व-न्महतेरणायरथमातिष्ठतुविनृम्णभीमम् । याहिप्रपथिन्नवसोपमद्रिकप्रचेश्रुत श्रावयचर्षणिभ्यः ५ ॥ ३ ॥

अपूर्व्या पञ्च सुहोत्र इन्द्रस्त्रिष्टुप् ।

३२ अपूर्व्यापुरुतमान्यस्मैमहेवीरायतुवसेतुरायं । विरप्शिनेवज्रिणेशंत-मानिवचौस्यासास्थविरायतक्षम् १ समातरासूर्येणाकवीनामवासयद्रुजदद्रिं गृणानः । स्वाधीभिर्ऋकभिर्वावशानउदुस्रियाणामसृजन्निदानम् २ सवह्निभि-र्ऋकभिर्गोपुशस्वन्मितज्ञुभिःपुरुकृत्वाजिगाय। पुरःपुरोहासखिभिःसखीयन्दृळ्हा रुरोजकविभिःकविःसन् ३ सनीळ्याभिर्जरितारमच्छामहोवाजेभिर्महद्भिश्व शुष्मैः । पुरुवीराभिर्वृषभक्षितीनामार्गिर्वणःसुवितायप्रयांहि ४ ससर्गेणशव-

सातक्तोअत्यैरपइन्द्रोदक्षिणतस्तुराषाट् । इत्थासृजानाअनपावृदर्धादिवेदिवेविविपुरप्रमृष्यम् ५ ॥ ४ ॥

य ओजिष्ठः पञ्च शुनहोत्र इन्द्रस्त्रिष्टुप् ।

३३ यओजिष्ठइन्द्रतंसुनोदामदोवृषन्त्स्वभिष्टिर्दास्वान् । सौवश्व्यंयोवनवत्स्वश्वोवृत्रासुमत्सुसासहदमित्रान् १ त्वांहीन्द्रावसेविवाचोहवन्तेचर्षणयः शूरसातौ । त्वंविप्रेभिर्विपणीरशायस्त्वोतइत्सनितावाजमर्वा २ त्वंताँइन्द्रो भयँआमित्रान्दासावृत्राण्यायँचशूर । वधीर्वनेवसुधितेभिरत्कैरापृत्सुदंभिनृणां नृतम ३ सत्वंनइन्द्राकवाभिरूतीसखाविश्वायुरविताबृधेभूः । स्वर्षाताय द्ध्वयामसित्वायुध्यन्तोनेमधितापृत्सुशूर ४ नूनंनइन्द्रापुरायँचस्याभवामृळीकउतनो अभिष्टौ । इत्थागृणन्तोमहिनस्यशर्मन्दिविष्यामपार्येगोपतमाः ५ ॥ ५ ॥

सं च त्वे पञ्च शुनहोत्र इन्द्रस्त्रिष्टुप् ।

३४ संचत्वेजग्मुर्गिरइन्द्रपूर्वीर्विचत्वद्यन्तिविभ्वोमनीषाः । पुरानूनंचस्तुतय ऋषीणांपस्पृधइन्द्रेअर्ध्युक्थाकर्का १ पुरुहूतोयःपुरुगूर्तऋभ्वाँएकःपुरुप्रशस्तोअस्तियज्ञैः । रथोनमहेशवसेयुजानोऽस्माभिरिन्द्रोअनुमाद्योभूत् २ नयंहिंसन्तिधीतयोनवाणीरिन्द्रंनक्षन्तीदभिवर्धयन्तीः । यदिस्तोतारःशतंयत्सहस्रंगृणन्तिगिर्वणसंशंतदस्मै ३ अस्माएतद्दिव्यं१ चैवमासामिमिक्षइन्द्रेन्ययामिसोमः । जनंनधन्वन्नभिसंयदापःसत्रावावृधुर्हवनानियज्ञैः ४ अस्माएतन्मह्यङ्रूपमस्मा इन्द्रायस्तोत्रंमतिभिरवाचि । असद्यथामहतिवृत्रतूर्यइन्द्रोविश्वायुरवितावृधश्च ५ ॥ ६ ॥

३५ कदाभुवन्नथक्षयाणिब्रह्मकदास्तोत्रेसहस्रपोष्यंदाः । कदास्तोमंवासयोऽस्यरायाकदाधियंःकरस्तिवाजरत्नाः १ काँहिंस्विच्चदिन्द्रयन्नृभिर्नून्वीरैर्वीरान्नीळयासेजयाजीन् । त्रिधातुगाअधिंजयासिगोष्विन्द्रद्युम्नंस्ववंद्देह्यस्मे २ काँहिं स्विच्चदिन्द्रयज्जरित्रेविश्वप्सुब्रह्मकृणवंःशविष्ठ । कदाधियोननियुतोंयुवासेकदा गोमंघाहवंनानिगच्छाः ३ सगोमंघाजारित्रेअश्वंश्चन्द्रावाजंश्रवसोअधिंधेहिपृक्षः । पीपिहीषंःसुदुघामिन्द्रधेनुंभरद्वाजेषुसुरुचोंरुरुच्याः ४ तमानूनंवृजनंमन्यथांचिच्छूरोयच्छक्रविदुरोंगृणंपे । मानिरंशुक्रदुघंस्यधेनोरांगिरसान्ब्रह्मणाविप्रजिन्व ५ ॥ ७ ॥

३६ सत्रामदांसस्तर्वविश्वजन्याःसत्रारायोऽध्येपार्थिवासः । सत्रावाजा-
नामभवोविभक्तायहेवेधुरयंथाअसुर्यम् १ अनुप्रयेजेजनओजोअस्यसत्रादं-
धिरेअनुवीर्यायं । स्यूमगृभेदुधयेऽवंतेचक्रतुर्वज्रन्त्यपिवृत्रहत्यै २ तंसध्रीचीरूत-
योवृष्ण्यानिपौंस्यानिनियुतःसश्चुरिन्द्रम् । समुद्रंनसिन्धवउक्थशुष्माउरुव्यचं
संगिरआविंशन्ति ३ सरायस्खामुपंसृजागृणानःपुरुश्चन्द्रस्यत्वमिन्द्रवस्वः ।
पतिर्वभूथासमोजनानामेकोविश्वस्यभुवनस्यराजा ४ सतुश्रुधिश्रुत्यायोदुवो
युद्यौर्नभूमाभिरायोअर्यः । असोयथानःशर्वसाचकानोयुगेयुगेवयसाचेकि-
त्तानः ५ ॥ ८ ॥

अर्वाक्पथ भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

३७ अर्वाग्रथंविश्ववारंतउग्रेन्द्रयुक्तासोहरयोवहन्तु । कीरिश्चिद्धित्वाहवंते स्वर्वान्नृषीमहिसधमादस्तेअद्य १ प्रोद्रोणेहरयःकर्मांग्मन्पुनानासऋज्यन्तोअभूवन् । इन्द्रोनोअस्यपूर्व्यःपपीयायुक्षोमदस्यसोम्यस्यराजा २ आसत्राणासःशवसानमच्छेन्द्रंसुचक्रेरथ्यासोअश्वाः । अभिश्रवऋज्यन्तोवहेयुर्नाचिन्नुवायोरमृतंविदस्येत् ३ वरिष्ठोअस्यदक्षिणामियर्तीन्द्रोमघोनांतुविकूर्मितमः । ययावजिवःपरियास्यंहोमघाचंधृष्णोदयसेविसूरीन् ४ इन्द्रोवाजस्यस्थविरस्यदातेन्द्रोगीर्भिर्वर्धतांवृद्धमहाः। इन्द्रोवृत्रंहनिष्ठोअस्तुसत्वातासूरिःपृणतितूतुजानः५॥१॥

अपातपश्च भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

३८ अपादितउदुनश्चित्रतमोमहींभर्पद्युमतींमिन्द्रहूतिम् । पन्यसींधीतिंदै-

व्यस्ययामञ्जनस्यरातिंवनतेसुदानुः १ दूराच्चिदावसतोअस्यकर्णाघोषादिन्द्रस्य तन्यतिंबुवाणः। एयमेनंदेवहूतिर्ववृत्यान्मद्र्य१ग्इन्द्रमियमृच्यमाना २ तंवोधि-यापरमयापुराजामजरमिन्द्रमभ्यनूष्यकैः । ब्रह्माचगिरोदधिरेसमस्मिन्महा-श्वस्तोमोअधिवर्धदिन्द्रे ३ वर्धाद्यंयज्ञउतसोममिन्द्रंवर्धाद्ब्रह्मगिरंउक्थाचमन्म। वर्धाहैनमुपसोयामंनक्तोर्वर्धान्मासाःशरदोद्यावइन्द्रम् ४ एवाजंजानंसहसे असामिवावृधानंराधसेचश्रुतायं । महामुग्रमवसेविप्रनूनमाविवासेमवृत्रतू-र्यंषु ५ ॥ १० ॥

मन्द्रस्य पञ्च भरद्वाजो बार्हस्पत्य इन्द्रोऽनुष्टुप् ।

३१ मन्द्रस्यकवेर्दिव्यस्यवह्नेर्विप्रमन्मनोवचनस्यमध्वः । अपानस्तस्यसच-नस्यदेवेषोयुवस्वगृणतेगोअग्राः १ अयमुशानःपर्यद्रिमुस्राकृतधीतिभिर्नृतयु-

ग्युंजानः । रुजदरुंग्णंविवलस्यसानुंपर्णांवंचोभिराभियोंधदिन्द्रः २ अयंद्योतय-
द्युतोव्यं१क्तून्दोषावस्तोःशरदइन्दुरिन्द्र । इमंकेतुमंदधुर्नूचिदह्नांशुचिंजन्मनउ-
षसश्चकार ३ अयंरोचयदुरुचोरुचानो३यंवासयद्यृ१तेनपूर्वीः । अयमीयतऋतु-
युग्भिरश्वैःस्वविंदानाभिनाचर्षणिप्राः ४ नूगृंणानोगृंणतेप्रत्नराजन्निषःपिन्वव-
सुदेयायपूर्वीः । अपओषंधीरविषावनांनिगाअवंतोनृंचसेरिरीहि ५ ॥ ११ ॥

इन्द्र पिब पञ्च भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप् ।

४० इन्द्रपिवृतुभ्यंसुतोमदायावंस्युहरीविमुंचासखायां । उतप्रगांयगृणआ
निषद्यार्थायज्ञायंगृणतेवयोंधाः १ अस्यंपिवयस्यंजजानइंन्द्रमदायक्रत्वेआपंवो
विरप्शिन् । तमुंतेगावोनरआपोअद्रिरिन्दुंसमह्यन्पीतयेसमंस्मै २ समिंद्रेअग्नौ
सुतइन्द्रसोमआत्वांवहन्नुहरयोवहिष्ठाः । त्वायतामनसाजोहवीमीन्द्रायाहिसु-

वितार्यमहेनः ३ आयाहिशश्वदुशतार्यायाथेन्द्रमहामनसासोमपेयम्। उपब्रह्मा
णिशृणवद्वमानोऽथातेयज्ञस्तन्वे३वयोधात् ४यदिन्द्रदिविपार्येयद्वधुग्यह्वास्वेसद-
नेयत्रवासि। अतोनोयज्ञमवसेनियुत्वान्त्सजोषाःपाहिगिर्वणोमरुद्भिः ५॥१२॥

अहेळमानः पञ्च भरद्वाजो बार्हस्पत्य इन्द्रस्त्रिष्टुप्।

४१ अहेळमानउपयाहियज्ञंतुभ्यंपवन्तइन्दवःसुतासः।गावोनवज्रिन्त्स्वमो-
कोअच्छेन्द्रागहिप्रथमोयज्ञियानाम्१यातेकाकुत्सुकृतावरिष्ठायायाश्वत्पिव-
सिमध्वऊर्मिम्। तयापाहिप्रतेअध्वर्युरस्थात्संतेवज्रोवर्ततामिन्द्रगव्युः २ एषद्र-
प्सोवृषभोविश्वरूपइन्द्रायवृष्णेसमकारिसोमः। एतंपिबहरिवःस्थातरुग्रयस्ये-
शिषेमदिवियस्तेअन्धः ३ सुतःसोमोअसुतादिन्द्रवस्यानयंश्रेयांसिकितुपेरणाय।

एतंतितिर्वउपयाहियज्ञंतेनविश्वास्तविंपीरापृणस्व ४ ह्वयामसित्वेन्द्रयाह्यर्वाङ्रँ
तेसोमस्तन्वेभवातिशतंक्रतोमादयस्वासुतेयुप्रास्माँअवपृतनासुप्रविक्षु ५॥ १३

मत्स्मै चतुष्कं भरद्वाजो बार्हस्पत्य इन्द्रोनुष्टुप् । अन्त्या बृहती ।

४२ प्रत्यस्मैपिपीषतेविश्वानिविदुषेभर । अरंगमायजग्मयेऽपश्चाद्दध्वनेनरे १
एमेनंप्रत्येतनसोमेभिःसोमपातमम्।अमंत्रेभिर्ऋजीषिणमिन्द्रंसुतेभिरिन्दुभिः२
यदीसुतेभिरिन्दुभिःसोमेभिःप्रतिभूयथ । वेदाविश्वस्यमेधिरोधष्टन्तमिदेषते ३
अस्माअस्माइदन्धसोऽध्वर्योप्रभरासुतम् । कुवित्समस्यजेन्यस्यशर्धतोऽभिशस्तेरवस्परत् ४ ॥ १४ ॥

यस्य चतुष्कं भरद्वाजो बार्हस्पत्य इन्द्र उष्णिक् ।

४३ यस्यत्यच्छम्वरंमदेदिवोदासायरन्धयः । अयंससोमइन्द्रतेसुतःपिब १

यस्येतीव्रसुतंमदंमध्यमन्तंचरक्षसे। अयंससोमइन्द्रतेसुतःपिब २ यस्युगाअन्तरश्मनोमदेदृह्लाअवासृजः। अयंससोमइन्द्रतेसुतःपिब ३ यस्यमन्दानोअन्धसोमाघोनंदधिषेशवः। अयंससोमइन्द्रतेसुतःपिब ४ ॥ १५ ॥ इति शाकलसंहितायां षष्ठे मण्डले तृतीयोऽनुवाकः ॥ ३ ॥

यो रयिवश्चतुर्विंशतिः शंयुर्बार्हस्पत्य इन्द्रस्त्रिष्टुप्। आद्याः षडनुष्टुभः। सप्तमीनवम्यौ विराजौ। अष्टमी विराट्।

४ योरयिवोरयिन्तमोयोद्युम्नैर्द्युम्नवत्तमः। सोमःसुतःसइन्द्रतेऽस्तिस्वधापतेमदः १ यःशग्मस्तुविशग्मतेरायोदामामतीनाम्। सोमःसुतःसइन्द्रतेऽस्तिस्वधापतेमदः २ येनवृद्धोनशवसातुरोनस्वाभिरूतिभिः। सोमःसुतःसइन्द्रतेऽस्तिस्वधापतेमदः ३ त्यमुवोअप्रहणंगृणीषेशवसस्पतिम्। इन्द्रंविश्वासाहंनरंमंहि-

ष्टंविश्वचर्षणिम् ४ यंवर्धयन्तोद्विरःपंतितुरस्यराधंसः। तमिन्द्रंस्यरोदंसीदेवीश् प्मंसपर्यतः ५ ॥ १६ ॥ तद्वंउक्थस्यंबर्हणेन्द्रायोपस्तृणीपणि । वियोनयस्यो-तयोवियद्रोहंन्तिसक्षितः ६ अविंदद्दक्षंमित्रोनवीयान्पपानोदेवेभ्योवस्योंअचैत् । सत्यवान्त्स्तोलाभिर्धौतरीभिरुरुष्यापायुरभवत्सखिभ्यः ७ ऋतस्यंपथिवेधाअ-पायिश्रियेमनांसिदेवासोंअक्रन् । दधानोनामंमहोवचोंभिर्वपुंदृशयेवेन्योव्या-यः ८ द्युमत्तंमंदक्षंधेह्यस्मेसेधाजनांनांपूर्वीररातीः। वर्षीयोवयःकृणुहिशचींभि-र्धनंस्यसातावस्माँअविड्ढि ९ इन्द्रंतुभ्यमिन्मंघवन्नभूमवयंदात्रेहरिवोमाविवेनः। नकिरापिदंदृशेमर्त्यत्राकिमङ्गरंध्रचोदंनंत्वाहुः १० ॥ १७॥ माजस्वंनेवृषभनो ररीथामातेरवंतःसख्येरिषाम । पूर्वीष्टइन्द्रनिःषिधोजनेषुजह्यसुष्वीन्प्रवृहापृण-तः ११ उदभ्राणांवस्तनयंन्नियर्तीन्द्रोराधांस्यश्व्यानिगव्या । त्वंमसिप्रदिवः ॥२६९॥ १.४अ.७

कारुर्धायामात्वादामानुआदभन्मघोनः १२ अध्वर्योवीरप्रमहेसुतानामिन्द्राय भरसह्यस्यराजा । यःपूर्व्याभिरुतनूतनाभिर्गीर्भिर्वावृधेगृणतामृषीणाम् १३ अस्यमदेपुरुवर्पांसिविद्वानिन्द्रोवृत्राण्यप्रतीजघान । तमुप्रहोपिमधुमन्तमस्मै सोमंवीरायशिप्रिणेपिबध्यै १४ पातासुतमिन्द्रोअस्तुसोमंहन्तावृत्रंवज्रेणमन्दसानः । गन्तायज्ञंपरावतश्चिदच्छावसुर्धीनामवितारुधायाः १५ ॥ १८ ॥ इदंत्यत्पात्रमिन्द्रपानमिन्द्रस्यप्रियममृतंमपायि । मत्सद्यथासौमनसायदेवंव्यस्मद्द्वेषोयुयवद्यंहः १६ एनामन्दानोजहिशूरशत्रूंजामिमजामिंमघवन्नमित्रान् । अभिपेणाँअभ्याददीदिशानान्पराचइन्द्रप्रमृणाजहीच १७ आसुष्माणो मघवन्निन्द्रपृत्स्वस्मभ्यंमहिवरिवःसुगंकः । अपांतोकस्यतनयस्यजेषइन्द्रसूरीन्कृणुहिस्मानोअर्धम् १८ आत्वाहरयोवृषणोयुजानावृषरथासोवृषरश्मयो-

त्याः । अस्मत्रांचोवृषणोवज्रबाहोवृष्णेमदायसुयुजोवहन्तुः ११ आतेवृषन्वृषणोद्रोणमस्थुर्घृतप्रुषोनोर्मयोमदन्तः । इन्द्रप्रतुभ्यंवृषाभिःसुतानांवृष्णेभरन्ति वृषभायसोमम् २० ॥ ११ ॥ वृषासिदिवोवृषभःपृथिव्यावृषासिन्धूनांवृषभःस्तियानाम् । वृष्णेतइन्दुर्वृषभपीपायस्वादुरसोमधुपेयोवरायं २१ अयंदेवःसहसाजायमानइन्द्रेणयुजापणिमंस्तभायत् । अयंस्वस्यापितुरायुधानीन्दुरमुष्णादशिवस्यमायाः २२ अयमकृणोदुषसःसुपत्नीरयंसूर्यंअदधाज्ज्योतिरन्तः । अयंत्रिधातुदिविरोचनेपुत्रितेपुविन्ददमृतंनिगूळ्हम् २३ अयंद्यावापृथिवीविष्कभायदयंरथंमयुनक्सप्तरश्मिम् । अयंगोषुशच्यापक्वमन्तःसोमोदाधारदशयन्त्रमुत्सम् २४ ॥ २० ॥

य आनयत्रयस्त्रिंशच्छंबुर्बार्हस्पत्य इन्द्रो गायत्री । अन्त्यानां तिसृणां बृहतीगर्भा । एकोनत्रिंशत्तम्यतिनिचृत् । अन्त्यानुष्टुप् ।

१५ यआनयत्परावतः सुनीतीतुर्वशंयदुम् । इन्द्रःसनोयुवासखा १ अविप्रे चिद्ध्योदधदनाशुनाचिदवँता । इन्द्रोजेतोहितंधनम् २ महीरस्यप्रणीतयः पूर्वीरुतप्रशस्तयः । नास्यक्षीयन्तऊतयः ३ सखायोब्रह्मवाहसेऽर्चंतप्रचंगायत । सहिनःमर्मतिर्महीं ४ त्वमेकस्यवृत्रहन्नविताद्वयोरसि । उतेदृशेयथावयम् ५ ॥ २१ ॥ नयसीदतिद्विषःकृणोष्युक्थशंसिनः । नृभिःसुवीरउच्यसे ६ ब्रह्माणं ब्रह्मवाहसंगीर्भिःसखायमृग्मियम् । गांनदोहसेहुवे ७ यस्यविश्वानिहस्तयोरूचुर्वसूनिनिह्नुता । वीरस्यपृतनासहः ८ विदृल्हानिचिदद्रिवोजनानांशचीपते । बृहमायाअनानत १ तमुत्वासत्यसोमपाइन्द्रंवाजानांपते । अहूमहिश्रव-

स्यवः १० ॥२२॥ तमुत्वायःपुरासिधयोवानूनंहितेधनें । हव्यःसश्चुधीहवम् ११ धीभिरवँद्भिरवँतोवाजाँइन्द्रश्रवाय्यान् । त्वयाजेष्महितंधनम् १२ अभूरुवीरगिर्वणोमहाँइन्द्रधनेंहिते । भरेवितन्तुसाय्यः १३ यातऊतिरामित्रहन्मक्षूजवस्तमासति । तयानोहिनुहीरथम् १४ सरथेनरथीतमोऽस्माकेनाभियुग्वना । जेषंजिष्णोहितंधनम् १५ ॥२३॥ यएकइत्तमुष्टुहिकृष्टीनांविचर्षणिः । पतिंजज्ञेवृषक्रतुः १६ योगृणतामिदासिधापिरूतीशिवःसखा । सत्वंनइन्द्रमृळय १७धिष्ववज्रंगभस्त्योरक्षोहत्यायवज्रिवः । सासह्याष्टाअभिस्पृधः १८ प्रतरंरयीणांयुजंसखायंकीरिचोदनम् । ब्रह्मवाहस्तमंहुवे १९ सहिविश्वानिपार्थिवाँएकोवसूनिपत्यते । गिर्वणस्तमोअधिगुः २० ॥ २४ ॥ सनोनियुद्भिरापृणकामंवाजेभिरश्विभिः । गोमद्भिर्गोपतेधृषत् २१ तद्गोगायसुतेसचापुरुहूतायसत्वने । शंयद्गवेनशाकि-

नें २२ नघावसुर्नियंमतेदानंवाजस्यगोमंतः । यत्सीमुपश्रवद्गिरः २३ कुवित्सस्यप्रहिन्वजंगोमन्तंदस्युहागमत् । शचीभिरपनोवरत् २४ इमाउत्वाशतक्रतोऽभिप्रणोनुवुर्गिरः । इन्द्रवत्संनमातरः २५ ॥ २५ ॥ दूणाशंसुख्यंतवगौरसिवीरगव्यते । अश्वोअश्वायतेभव २६ समंन्दस्वाह्यन्धसोराधसेतन्वांमहे । नस्तोतारंनिदेकरः २७ इमाउत्वासुतेसुतेनक्षन्तेगिर्वणोगिरः । वत्संगावोनधेनवः २८ पुरूतमंपुरूणांस्तोतृणांविवाचि । वाजेभिर्वाजयताम् २९ अस्माकंमिन्द्रभूतुतेस्तोमोवाहिष्ठोअन्तमः । अस्मान्नायेमहेहिनु ३० अधिबृबुःपणीनांवार्यंष्ठे मूर्धन्नस्थात् । उरुःकक्षोनगाङ्ग्यः ३१ यस्यवायोरिवद्रवद्भद्राशतिःसहस्रिणी । सध्योदानायमंहते ३२ तत्सुनोविश्वेअर्यआसदागृणन्तिकारवः । बृबुंसहस्रदातमं सूरिंसहस्रसातमम् ३३ ॥ २६ ॥

॥२७२॥

४६ त्वामिद्धिहवामहेसातावाजस्यकारवः । त्वांवृत्रेष्विन्द्रसत्पतिंनरस्त्वां काष्ठास्वर्वतः १ सत्वंनश्चित्रवज्रहस्तधृष्णुयामुहःस्तवानोअद्रिवः । गामश्वंरथ्यमिन्द्रसंकिरसत्रावाजंनाजिग्युवें २ यःसत्राहाविचर्षणिरिन्द्रंतंहूमहेवयम् । सहस्रमुष्कतुविनृम्णसत्पतेभवासमत्सुनोवृधे ३ वाधंसेजनान्वृषभेवमन्युनाधृषौमाह्लक्रंचीषम । अस्माकंबोध्यविताममहाधनेतनूष्वप्ससूयैं ४ इन्द्रज्येष्ठंनआ भरँओजिष्ठंपपुरिश्रवः । येनेमेचित्रवज्रहस्तरोदसीओभेसुशिप्रप्राः ५ ॥ २७ ॥ त्वामुग्रमवसेचर्षणीसहंराजन्देवेषुहूमहे । विश्वासुनोविथुरापिंवद्वनावसोऽमित्रान्त्सुपहान्कृधि ६ यदिन्द्रनाहुषीष्वाँओजोनृम्णंचकृष्टिषु । यद्वापञ्चक्षितीनां युद्धमाभरसत्राविश्वानिपौंस्या ७ यद्वातृक्षौमघवन्द्रुह्यावाजनेयत्पुरोकृवृष्ण्य-

म् । अस्मभ्यंतद्रिरीहिसंनृवाह्येऽमित्रान्पृत्सुतुर्वणे ८ इन्द्रत्रिधातुशरणंत्रिवरूथं स्वस्तिमत् । छर्दिर्यच्छमघवद्भ्यश्चमह्यंचयावयादिद्युमेभ्यः ९ येगव्यतामनसा शत्रुमादभुस्तिग्मन्तिधृष्णुया । अधस्मानोमघवन्निन्द्रगिर्वणस्तनूपाअन्तमो भव १० ॥ २८ ॥ अधस्मानोवृधेभुवेन्द्रनायमवायुधि । यदन्तरिक्षेपतर्यन्ति पर्णिनोदिव्यवस्तिग्ममूर्धानः ११ यत्रशूरासस्तन्वोवितन्वतेप्रियाशर्मपितृणाम् । अधस्मायच्छतन्वे३तनेचछर्दिरचित्तयावयद्वेषः १२ यदिन्द्रसर्गेअर्वतश्चोदयासे महाधने । असमनेअध्वनिवृजिनेपथिन्येनाँइवश्रवस्यतः १३ सिधूँरिवप्रवणआशुयायतोयदिक्रोशमनुष्वणि । आयेवयोनवृतत्यामिषिगृभीतावाह्वोर्गवि १४ ॥ २९ ॥

स्वादुरेकत्रिंशद्वर्गस्त्रिष्टुप्। आद्यानां पञ्चानां सोमः। विंश्याः प्रथमार्धस्य लिङ्गोक्तदेवताः। द्वाविंश्यादीनां चतुर्णां प्रस्तोकस्य साञ्जयस्य दानस्तुतिः। ततस्तिसृणां रथः। ततो द्वयोरन्त्यायाः प्रथमार्धस्य च दुन्दुभिः। शिष्टानामिन्द्रः। एकोनविंशी बृहती। त्रयोविंश्यनुष्टुप्। चतुर्विंशी गायत्री। पञ्चविंशी द्विपदा। सप्तविंशी जगती।

४७ स्वादुष्किलायंमधुमाँउतायंतीव्रःकिलायंरसवाँउतायम्। उतोन्व१स्य पपिवांसमिन्द्रंनकश्चनसहतआहवेषु १ अयंस्वादुरिहमदिष्ठआसयस्येन्द्रोवृत्रह-त्यैममाद। पुरूणियश्चौत्राशम्बरस्यविनवतिंनवंचदेह्यो३हन् २ अयंमैपीत उदियर्तिवाचंमयंमनीषामुशतीमजीगः। अयंपळुर्वीरमिमीतधीरोनयाभ्योमु-वेनंकच्छनारे ३ अयंसयोवरिमाणंपृथिव्यावर्ष्माणंदिवोअकृणोदयंसः। अयं पीयूषंतिसृषुप्रवत्सुसोमोदाधारोर्व१न्तरिक्षम् ४ अयंविदच्चित्रहशीकुमणीःशुक्र-

संग्रनामुपसामनीके । अयंमहान्महतास्कम्भनेनोद्द्यामस्तभ्नाद्बृहभोमरुत्वान् ५ ॥ ३० ॥ धुपत्पिबकलशेसोमंमिन्द्रवृत्रहाशूरसमरेवसूनाम् । माध्यंदिनेसवनआवृषस्वरयिस्थानोरयिमस्मासुधेहि ६ इन्द्रप्रणःपुरएतेवपश्यप्रणोनयप्रतरंवस्योअच्छ । भवासुपारोअतिपारयोनोभवासुनीतिरुतवामनीतिः ७ उरुंनोलोकमनुनेपिविद्वान्स्वर्वज्ज्योतिरभयंस्वस्ति । ऋष्वातइन्द्रस्थविरस्य बाहूउपस्थेयामशरणावृहंन्ता ८ वरिष्ठेनइन्द्रवन्धुरेधावहिष्ठयोःशतावन्नश्वयोरा । इषमावक्षीपांवपिष्ठांमानंस्तारीन्मघवन्त्रायोअर्यः ९ इन्द्रंमुळमह्यंजीवातुमिच्छचोदयधियमयंसोनधाराम् । यत्किंचाहंत्वायुरिदंवदामितज्जुषस्वकृधिमादेववन्तम् १० ॥ ३१ ॥ त्रातारमिन्द्रंमवितारमिन्द्रंहवेहवेसुहवंशूरमिन्द्रम् । ह्वयामिशक्रंपुरुहूतमिन्द्रंस्वस्तिनोमघवांधात्विन्द्रः ११ इन्द्रःसुत्रामास्ववाँअ-

वोभिःसुमृळीकोभवतुविश्ववेदाः । बाधतांद्वेषोअभयंकृणोतुसुवीर्यस्यपतयः
स्याम १२ तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम । ससुत्रामास्ववाँ
इन्द्रोअस्मेआराच्चिद्द्वेषःसनुतर्युयोतु १३ अवत्वेइन्द्रप्रवतोनोमिमिर्गिरोब्रह्माणि
नियुतोववन्ते । उरूनरावःसवनापुरूण्युपोगावाजिन्युवसेसमिन्दून् १४ कदाँ
स्तवत्कःपृणात्कोयजातेयद्वुग्रमिन्मघवाविश्वहावेत् । पादाविवप्रहरन्नन्यमन्यं
कृणोतिपूर्वमपरंशचीभिः १५ ॥ ३२ ॥ शृण्वेवीरउग्रमुग्रंदमायन्नन्यमन्यम-
तिनेनीयमानः । एधमानाद्विळुभयंस्यराजाचोष्कूयतेविशइन्द्रोमनुष्यान् १६
परापूर्वेपांसख्यावृणक्तिवितुराणोअपरेभिरेति । अनानुभूतीरवधून्वानःपूर्वीरि-
न्द्रःशरदस्तर्तरीतिः १७ रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय । इन्द्रो
मायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादश १८ युजानोहरितारथेभूरित्वष्टे-

॥२७४॥

हरांजति । कोविश्वाहाद्विप्तःपक्षंआसतउतासींनेपुसूरिषु १९ अगन्यूतिक्षेत्र-
मागंन्मदेवाउर्वीसतीभूमिरंहूरणाभूत् । बृहस्पतेप्रचिकित्सागविष्टाविंत्थासते
जंरित्रइन्द्रपन्थांम् २० ॥ ३३ ॥ दिवेदिवेसदृशीरन्यमर्धंकृष्णाअंसेधंदपसद्म-
नोजाः । अहंन्दासावृषभोवंस्नयन्तोदव्रंजेवर्चिनंशम्बरंच २१ प्रस्तोकइन्नुराधं-
सस्तइन्द्रदशकोशंयोर्दशंवाजिनोंऽदात् । दिवोंदासादतिथिग्वस्यराधंःशाम्बरं
वसुप्रत्यग्रभीष्म २२ दशाश्वान्दशकोशान्दशवस्त्राधिंभोजना । दशोंहिरण्य-
पिण्डान्दिवोंदासादसानिषम् २३ दशरथान्प्रष्टिमतःशतंगाअथर्वभ्यः । अश्वथः
पायवेंऽदात् २४ महिराधोंविश्वजन्यंदधानान्भरद्वाजान्त्सार्ञ्जयोअम्बंयष्ट २५
॥३४॥वनंस्पतेवीड्वंङ्गोहिभूथाअस्मत्संखाप्रतरंणःसुवीरः । गोभिःसंनद्धोअसिवी

ळयंस्वास्थातातेंजयतुजेत्वांनि२६दिवस्पृथिव्याःपर्योजउद्भृतंवनस्पतिभ्यःपर्या-
भृतंसहः। अपामोज्मानंपरिगोभिरावृतमिन्द्रस्यवज्रंहविषारथंयज २७ इन्द्रस्य
वज्रोमरुतामनीकंमित्रस्यगर्भोवरुणस्यनाभिः। सेमांनोहव्यदातिंजुषाणोदेवर-
थप्रतिहव्यागृभाय २८ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतांविष्ठितंजगत्।
सदुन्दुभेसजूरिन्द्रेणदेवैर्दूराद्दवीयोअपसेधशत्रून्२९ आक्रन्दयबलमोजोनआधा
निःष्टनिहिदुरितावाधमानः। अपप्रोथदुन्दुभेदुच्छुनाइतइन्द्रस्यमुष्टिरसिवीळय-
स्व ३० आमूरजप्रत्यावर्तयेमाःकेतुमद्दुन्दुभिर्वावदीति। समश्वपर्णाश्चरन्तिनो
नरोऽस्माकमिन्द्ररथिनोजयन्तु ३१ ॥ ३५ ॥ इति शाकलर्क्संहितायां चतुर्थाष्टके
सप्तमोऽध्यायः ॥ ७ ॥

यज्ञायज्ञाद्यधिकाशंयुस्तृणपाणिकंपृश्निसूक्तंमगाथौबृहतीमहासतोबृहतीमहावार्हतवार्हतौमगाथावि-
स्राग्नेय्याःकाकुभःमगाथःपुरउष्णिग्बृहसातिजगतीतिमारुतोन्सास्तिस्रोवासांलिङ्गोक्तदेवताःकाकुभः
मगाथःपुरउष्णिग्बृहतीतिपौष्ण्योबृहतीमहाबृहतीयवमध्यान्त्यानुष्टुप्मारुतोन्साद्यावाभूम्योर्वापृश्नेर्वा-
स्तुपेपश्चोनऋजिष्वाहवैश्वदेवंहशक्वर्यन्तंहुवेवउदुत्यत्पोळशभ्युष्णिगनुष्टुवन्तंनतत्र्यूनासप्तम्याद्याःपङ्क्ता-
यश्चयश्चतुर्दशीजगतीग्नुहोत्रादयोनुक्तगोत्राभारद्वाजाःपौत्रावृहस्पतेर्दौष्पन्तेर्वाभरतस्यवयंदशपौष्णं
तद्वायत्रंवैयांपूषन्ननुष्टुप्संपूषन्नेहिवांपदयएनमन्त्यानुष्टुविन्द्रान्वैन्द्रंचशुक्रंचतुष्कंद्वितीयाजगतीमनुदशै-
न्द्राग्नंतुवार्हतंचतुरनुष्टुवन्तंश्नथत्पश्चोनागायत्रंतुत्रित्रिष्टुवादित्रिष्टुब्बृहत्यनुष्टुवन्तामियंपलूनासारस्वतं-
त्रिजगत्यादिजगतीत्रिष्टुवन्तम् ।

यज्ञायज्ञा द्वाविंशतिःशंयुर्बार्हस्पत्यस्तृणपाणिकं पृश्निसूक्तम् । आद्यानां दशानामग्निः
पयोदस्यादीनां तिसृणां मरुतो लिङ्गोक्तदेवता वा । ततश्चतसृणां पूषा । अन्त्याया
मरुतः पृश्निर्द्यौर्वाभूमी वा । द्वितीयाचतुर्थीदशमीद्वादशीसप्तदश्यः सतोबृहत्यः ।
षष्ठ्यष्टम्यौ । महासतोबृहत्यौ । सप्तमी महाबृहती । एकादशीषोडश्यौ ककुभौ ।

त्रयोदश्यष्टादश्यौ पुरउष्णिहौ । पञ्चदश्यतिजगती । उपान्त्या
यवमध्या महाबृहती । अन्त्यानुष्टुप् । शिष्टा बृहत्यः ।

१८ ओम् यज्ञायज्ञावोअग्नयेगिरागिराचदक्षसे । प्रप्रवयममृतंजातवेदसंप्रियं मित्रंनशंसिषम् १ ऊर्जोनपातंसहिनायमस्मयुर्दाशेमहव्यदातये । भुवद्वाजेष्वविताभुवद्रुध उतत्रातातनूनाम् २ वृषाह्यग्नेअजरोमहान्विभास्यर्चिषा । अजस्रेणशोचिषाशोशुचच्छुचेसुदीतिभिःसुदीदिहि ३ महोदेवान्यजसियक्ष्यानुषक्कवक्रत्वोतदंसना । अर्वाचःसीकृणुह्यग्नेवसेरास्वाजातवेस्व ४ यमापोअद्रयोवनागर्भमृतस्यपिप्रति । सहसायोमथितोजायतेनृभिःपृथिव्याअधिसानवि ५ ॥ १ ॥ आयःपप्रौक्षानुनारोदसीउभेधूमेनधावतेदिवि । तिरस्तमोददृशऊर्म्यास्वाश्यावास्वरुषोवृषाश्यावाअरुषोवृषा ६ बृहद्भिरग्नेअर्चिभिःशुक्रेणदेवशोचि-

र्वा । भरद्वाजेसमिधानोयविष्ठ्यरेवन्नःशुक्रदीदिहियुमत्पावकदीदिहि ७ विश्वा-
सांगृहपतिंविशामग्निंहवेमहेजनानाम् । शतंपूर्भियोविष्ठपाह्यंहसःसमेद्धारंश-
तंहिमाःस्तोतृभ्योयेचददंति ८ त्वंनश्चित्रऊत्यावसोराधांसिचोदय । अस्यराय-
स्त्वमग्नेरथीरंसिविदागाधंतुचेतुनः ९ पर्षितोकंतनयंपर्तृभिष्ट्वमदंव्धैरप्रयुत्वभिः ।
अग्नेहेळांसिदैव्यायुयोधिनोऽदेवानिह्वरांसिच १० ॥ २ ॥ आसंखायःसवर्दुघां
धेनुमंजध्वमुपनव्यंसावचंः । सृजध्वमनंपस्फुराम् ११ याशर्धायुमारुतायस्व-
भानवेश्रवोऽमृत्युधुक्षत । यामृळीकेमरुतांतुराणांयासुम्नैरेवयावरी १२ भर-
द्वाजायावधुक्षतद्विता । धेनुंचविश्वदोहसमिषंचविश्वभोजसम् १३ तंवइन्द्रंन
सुक्रतुंवरुणमिवमायिनंम् । अर्यमणंनमन्द्रंसुप्रभोजसंविष्णुंनस्तुपआदिशे १४
त्वेषंशर्धोनमारुतंतुविष्वण्यनर्वाणंपूषणंसंयथाशता । संसहस्राकारिषच्चर्षणि-

म्यऽआँआविर्गूह्यावसूंकरत्सुवेदांनोवसूंकरत् १५ आमांपूषन्नुपद्रवशांसिषंनुतैअ-
पिकर्णआघृणे । अघाअर्योअरातयः १६ ॥ ३ ॥ माकांकम्बीरमुद्वहोवनस्पति-
मशस्तीर्विहिनीनशः । मोतसूरोअह्एवाचनग्रीवाआदर्धतेवेः १७ हतेरिवतेऽ-
वृकमंस्तुसख्यम् । अच्छिद्रस्यदधन्वतःसुपूर्णस्यदधन्वतः १८ परोहिमर्त्यैरसि
समोदेवैरुतश्रिया । अभिख्यःपूषन्पृतनासुनस्त्वमवानूनंयथापुरा ११ वामी-
वामस्यधूतयःप्रणीतिरस्तुसूनृता । देवस्यवामरुतोमर्त्यस्यवेजानस्यप्रयज्य-
वः २० सद्यश्चिद्यस्यचर्कृतिःपरिद्यांदेवोनैतिसूर्यः । त्वेषंशवोदधिरेनामयज्ञियं
मरुतोवृत्रहंशवोज्येष्ठंवृत्रहंशवः २१ सकृद्द्यौरजायतसकृद्भूमिरजायत । पृ-
श्न्यादुग्धंसकृत्पयस्तदन्योनानुजायते २२ ॥ ४ ॥

स्तुपे पञ्चदश ऋजिश्वा विश्वे देवास्त्रिष्टुप्। अन्त्या शक्करी।

४१ स्तुपेजनेसुव्रतेनव्यसीभिर्गीभिर्मित्रावरुणासुम्नयन्ता। तआगमन्तुत इहश्रुवन्तुसुक्षत्रासोवरुणोमित्रोअग्निः १ विशोविशईड्यमध्वरेष्वहंतक्रतुमरतिं युवत्योः। दिवःशिशुंसहसःसूनुमग्निंयज्ञस्यकेतुमरुषंयजध्यै २ अरुषस्यदुहितराविरूपेस्तृभिरन्यापिपिशेसूरोअन्या। मिथस्तुरावि चरन्तीपावकेमन्मंश्रुतं नक्षतक्रुच्यमाने ३ प्रवायुमच्छाबृहतीमनीषाबृहद्रयिंविश्ववारंरथप्राम्। द्युतद्यामानियुतःपत्यमानःकविःकविमियक्षसिप्रयज्यो ४ समेवपुश्छदयद्दश्विनोर्योरथो विरुक्मान्मनसायुजानः। येननरानासत्येवयध्यैवर्तिर्याथस्तनयायन्मनेच ५ ॥ ५ ॥ पर्जन्यवातावृषभापृथिव्याःपुरीषाणिजिन्वतमप्यानि। सत्यश्रुतःकवयोयस्यगीर्भिर्जगतःस्थातुर्जगदाकृणुध्वम् ६ पावीरवीकन्याचित्रायुःसरस्वती

वीरपत्नीधियंधात् । ग्राभिरच्छिद्रंशरणंसजोषादुराधर्षंगृणतेशर्मयंसत् ७ पृथ-
स्पथःपरिपतिंवचस्याकामेनकृतोअभ्यानळर्कम् । सनोरासच्छुरुधश्चन्द्राग्राधि-
यंधियंसीषधातिप्रपूषा ८ प्रथमभाजंयशसंवयोधांसुपाणिंदेवंसुगभस्तिमृभ्वम् ।
होतारंयक्षद्यजतंपस्त्यानामग्निस्त्वष्टारंसुहवंविभावा ९ भुवनस्यपितरंगीर्भिराभी
रुद्रंदिवावर्धयारुद्रमक्तौ । बृहन्तमृष्वमजरंसुषुम्नमृधग्घुवेमकविनैषितासः १०
॥ ६ ॥ आयुवानःकवयोयज्ञियासोमरुतोगन्तगृणतोवरस्याम् । अचित्रंचिद्धि
जिन्वथावृधन्तइत्थानक्षन्तोनरोअङ्गिरस्वत् ११ प्रवीरायप्रतवसेतुरायाजायूथेव
पशुरक्षिरस्तम् । सर्पिस्पृशतितन्विश्रुतस्यस्तृभिर्ननाकंवचनस्यविप्रः १२ यो
रजांसिविममेपार्थिवानित्रिश्चिद्विष्णुर्मनवेवाधितायं । तस्यतेशर्मन्नुपदद्यमाने
रायामदेमतन्वाश्तनाच १३ तन्नोऽहिर्बुध्न्योअद्रिरर्कैस्तत्पर्वतस्तत्सविताचनो

धात् । तदोषधीभिरभिरातिषाचोभगःपुरन्धिर्जिन्वतुप्रराये १४ नूनोरयिंरथ्यं चर्षणिप्रांपुरुवीरंमहक्रतुस्यंगोपाम् । क्षयंदाताजरयेनृजनान्त्स्पृधोअदेवीरभिचक्रमांमविशआदेवीरभ्यं१भवांम १५ ॥ ७ ॥ इति शाकलसंहितायां षष्ठे मण्डले चतुर्थोऽनुवाकः ॥ ४ ॥

हुवे वः पञ्चदश ऋजिश्वा विश्वे देवास्त्रिष्टुप् ।

५० हुवेवोदेवीमदितिंनमोभिर्मृळीकायवरुणंमित्रमग्निम् । अभिक्षदामर्यमणंसुशेवंत्रातॄन्देवान्त्सवितारंभगंच १ सुज्योतिषःसूर्यदक्षपितॄननागास्त्वेसुमहोवोहिदेवान् । द्विजन्मानोयक्रतुसापःसत्याःस्वर्वन्तोयजताअग्निजिह्वाः २ उतद्यावापृथिवीक्षत्रमुरुवृहद्रोदसीशरणंसुषुम्ने । महस्करथोवरिवोयथानोऽस्मेक्षयायधिषणेअनेहः ३ आनोरुद्रस्यसूनवोनमन्तामद्याहूतासोवसवोऽधृष्टाः ।

यद्वीमर्भमहतिर्वाहितासोवाधेमरुतोअह्वामदेवान् ४ मिम्यक्षयेधुरोदसीनुदेवी
सिपक्तिपूषाअभ्यर्वयज्वा । श्रुत्वाहवंमरुतोयद्ध याथाभूमारेजन्तेअध्वनिप्रवि-
क्ते ५ ॥ ८ ॥ अभित्यंवीरंगिर्वणसमर्चेन्द्रंब्रह्माणाजरितर्नवेन । श्रवदिद्धवमुप
चस्तवानोरासद्वाजाँउपमद्भोगृणानः ६ ओमानंमापोमानुषीरमृक्तंधातंतोकाय
तनयायशंयोः । यूयंहिष्ठाभिषजोमातृतमाविश्वस्यस्थातुर्जगतोजनित्रीः ७
आनोदेवःसवितात्रायमाणोहिरण्यपाणिर्यजतोजगम्यात् । योदत्रवाँउपसोन
प्रतीकंव्यूर्णुतेदाशुषेवार्याणि ८ उतत्वंसूनोसहसोनोअद्यादेवाँअस्मिन्नध्वरेव-
वृत्याःस्यामहंतेसदमिद्रातौतवस्यामग्रेअवसासुवीरः ९ उतत्यामेहवमाजग्म्या-
तंनासत्याधीभिर्युवमङ्गविप्रा । अत्रिंनमहस्तमसोऽमुमुक्तंतूर्वतंनरादुरितादभी-
के १० ॥ ९ ॥ तेनोरायोद्युमतोवाजवतोदातारोभूतनुतंःपुरुक्षोः । दृशस्य-

न्तोदिव्याःपार्थिवासोगोजाताअप्यामूळताचदेवाः ११ तेनोरुद्रःसरस्वतीसजोषा मीळ्हुष्मन्तोविष्णुर्मृळन्तुवायुः । ऋभुक्षावाजोदैव्योविधातापर्जन्यावातापिप्यतामिषंनः १२ उतस्यदेवःसविताभगोनोऽपांनपादवतुदानूपप्रिः । त्वष्टादेवेभिर्जनिभिःसजोषाद्यौर्देवेभिःपृथिवीसमुद्रैः १३ उतनोऽहिर्बुध्न्यःशृणोत्वज एकपात्पृथिवीसमुद्रः । विश्वेदेवाऋतावृधोहुवानाःस्तुतामन्त्राःकविशस्ताअवन्तु १४ एवानपातोममतस्यधीभिर्भरद्वाजाअभ्यर्चन्त्यर्कैः । म्राहुतासोवसवोऽध्रृष्टाविश्वेस्तुतासोभूतायजत्राः १५ ॥ १० ॥

उदु त्यत्पोळश ऋजिश्वा विश्वे देवास्त्रिष्टुप् । उपान्त्यास्तिस्र उष्णिहः । अन्त्यानुष्टुप् ।

५१ उदुत्यच्चक्षुर्महिमित्रयोराँएतिंप्रियंवरुणयोरदब्धम् । ऋतस्यशुचिंदर्शतमर्नीकंरुक्मोनदिवउदितान्व्यद्यौत् १ वेदयस्त्रीणिविदथान्येषांदेवानांजन्मसं-

नुतराचविप्रः । ऋजुमतेपुवृजिनाचपश्यन्नभिचष्टेसूरौअर्यएवान् २ स्तुपउंवो
महऋतस्यगोपानदितिंमित्रंवरुणंसुजातान् । अर्यमणंभगमदब्धधीतीनच्छा
वोचेसधन्यःपावुकान् ३ रिशादसःसत्पतीँरदब्धान्महोराज्ञःसुवसनस्यदातॄ-
न् । यूनःसुक्षत्रान्क्षयतोदिवोनॄनादित्यान्याम्यदितिंदुवोयु ४ द्यौ३ष्पितःपृथि-
विमातरध्रुगग्नेभ्रातर्वसवोमृळतानः । विश्वंआदित्याअदितेसजोषाअस्मभ्यंशर्म
वहुलंवियन्त ५ ॥ ११ ॥ मानोवृकायवृक्येसमस्माअघायतेरीरधतायजत्राः ।
यूयंहिष्ठारय्योनस्तनूनांयूयंदक्षस्यवचसोबभूव ६ मावएनोअन्यकृतंभुजेममा
तत्कर्मवसवोयच्चयध्वे । विश्वस्यहिक्षयथविश्वदेवाःस्वयंरिपुस्तन्वंरीरिषीष्ट ७
नमइदुग्रंनमआविवासेनमोदाधारपृथिवीमुतद्याम् । नमोदेवेभ्योनमईशएषां
कृतंचिदेनोनमसाविवासे ८ ऋतस्यवोरय्यःपूतदक्षानृतस्यपस्त्यसदोअदब्धा-

न् । ताँआनमोभिरुरुचक्षसोनून्विश्वान्वआनमेमहोयजत्राः ९ तेहिश्रेष्ठवर्चस-स्तउनस्तिरोविश्वानिदुरितानयन्ति । सुक्षत्रासोवरुणोमित्रोअग्निर्ऋतधीतयोव-क्मराजसत्याः १० ॥ १२ ॥ तेनइन्द्रःपृथिवीक्षामंवर्धन्पूषाभगोअदितिःपञ्च जनाः । सुशर्माणःस्ववसःसुनीथाभवन्तुनःसुत्रात्रासःसुगोपाः ११ नूसद्मानं दिव्यंनंशिदेवाभारद्वाजःसुमतिंयातिहोता । आग्नानेभिर्यजमानोमियेधैर्देवानां जन्मंवसूयुर्ववन्द । १२ अपत्यंवृजिनंरिपुंस्तेनमंग्नेदुराध्यम् । दविष्ठमंस्यसत्प-तेकृधीसुगम् १३ ग्रावांणःसोमनोहिकंसखित्वनायंवावशुः । जहीन्यं१त्रिणं पणिंवृकोहिषः १४ यूयंहिष्ठासुदानवइन्द्रंज्येष्ठाअभिद्यवः । कर्तानोअध्वन्ना सुगंगोपाअमा १५ अपिपन्थांमगन्महिस्वस्तिगामनेहसम् । येनविश्वाःपरि-द्विषोवृणक्तिविन्दतेवसु १६ ॥ १३ ॥

न तत्सप्तदश ऋजिश्वा विश्वे देवास्त्रिष्टुप् । सप्तम्याद्याः पङ्क्त्यन्त्यः । चतुर्दशी जगती ।

५२ नतद्दिवानपृथिव्यानुमन्येनयज्ञेनोतशमीभिराभिः । उजन्तुतंसुम्वे१ः पर्वतासोनिहीयतामतियाजस्ययष्टा १ अतिवायोमरुतोमन्यतेनोब्रह्मवायः क्रियमाणंनिनित्सात् । तपूंषितस्मैवृजिनानिसन्तुब्रह्मद्विषमभितंशोचतुर्यौः २ किमङ्गत्वाब्रह्मणःसोमगोपांकिमङ्गत्वाहुरभिशस्तिपांनः । किमङ्गनःपश्यसि निद्यमानान्ब्रह्मद्विषेतपुंषिहेतिमस्य ३ अवन्तुमामुषसोजायमानाअवन्तुमासिन्ध्वःपिन्वमानाः । अवन्तुमापर्वतासोध्रुवासोऽवन्तुमापितरादेवहूतौ ४ विश्वदानींसुमनसःस्यामपश्येमनुसूर्यमुच्चरन्तम् । तथाकरद्वसुपतिर्वसूनांदेवाँओहानोवसागमिष्ठः ५ ॥ १४ ॥ इन्द्रोनोदिष्टमवसागमिष्ठःसरस्वतीसिन्धुभिःपिन्वमाना । पर्जन्योनओषधीभिर्मयोभुरग्निःसुशंसःसुहवःपितेव ६ विश्वेदेवासुआ

गंतशृणुतामेड्मंहवंम्। एदंबर्हिर्निषीदत ७ योवोदेवाघृतस्नुनाहव्येनप्रतिभूषति ।
तंविश्वउपगच्छथ ८ उपनःसूनवोगिरःशृण्वन्त्वमृतस्यये । सुमृळीकाभवन्तु
नः ९ विश्वेदेवाऋतावृधऋतुभिर्हवनश्रुतः । जुषन्तांयुज्यंपयः १० ॥ १५ ॥
स्तोत्रमिन्द्रोमरुद्गणस्त्वष्टृमान्मित्रोअर्यमा । इमाहव्याजुषन्तनः ११ इमंनोअ-
ग्नेअध्वरंहोतर्वयुनशोयज । चिकित्वान्दैव्यंजनम् १२ विश्वेदेवाःशृणुतेमंहवंमे
येअन्तरिक्षेयउपद्यविष्ठ । येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादय-
ध्वम् १३ विश्वेदेवाममंशृण्वन्तुयज्ञियाउभेरोदसीअपांनपाच्छुमन्मं । मावोव-
चांसिपरिचक्ष्याणिवोचंसुम्नेष्विद्वोअन्तमामदेम १४ येकेचज्मामहिनोअहि-
मायादिवोजाञ्जिरेअपांसुधस्थे । तेअस्मभ्यंमिषयेविश्वमायुःक्षपंउस्रावरिवस्य-
न्तुदेवाः १५ अग्नीपर्जन्याववंतंधियंमेऽस्मिन्हवेसुहवासुष्टुतिंनः । इळांमन्यो

जनयद्भर्मन्यःप्रजावतीरिषआधत्तमस्मे १६ स्तीर्णेबर्हिषिसमिधानेअग्नौसू-क्तेनमहानमसाविवासे । अस्मिन्नोअद्यविदथेयजत्राविश्वेदेवाहविषिमादय-ध्वम् १७ ॥ १६ ॥

वयं दश भरद्वाजो बार्हस्पत्यः पूषा गायत्री । अष्टम्यनुष्टुप् ।

५३ वयमुत्वापथस्पतेरथंनवाजसातये । धियेपूषन्नयुज्महि १ अभिनोनय-यावसुवीरंप्रयतदक्षिणम् । वामंगृहपतिंनय २ अदित्सन्तंचिदाघृणेपूषन्दानायचोदय । पणेश्चिद्वित्रंदामनः ३ विपथोवाजसातयेचिनुहिविमृधोजहि । साध-न्तामुग्रनोधियः ४ परितृन्धिपणीनामारयाहृदयाकवे । अथेमस्मभ्यंरन्धय ५ ॥ १७ ॥ विपूपन्नारयातुदपणेरिच्छहृदिप्रियम् । अथेमस्मभ्यंरन्धय ६ आरि-खकिकिराकणुपणीनांहृदयाकवेः । अथेमस्मभ्यंरन्धय ७ यांपूषन्ब्रह्मचोदनी-

मारांविभ॑र्ष्यघृणे:। तयांसमस्यहृदयमारिखकिकिराकृणु ८ यातेअघ्नागोओ-
पशाघृणेपशुसाधनी ।:तस्यास्तेसुम्नमीमहे १ उतनोगोपणिंधियमश्वसांवाज-
सामुत । नृवत्कृणुहिवीतयें १०॥ १८ ॥

सं पूषन्दश भरद्वाजो बार्हस्पत्यः पूषा गायत्री ।

५४ संपूषन्विदुषांनयोअञ्जसानुशासंति । यएवेदमितिब्रवत् १ समुंपूष्णा
गंमेमहियोगृहाँअभिशासंति । इमएवेतिंचब्रवत् २ पूष्णश्चक्रंनरिंप्यतिनको-
शोऽवपद्यते । नोअंस्यव्यथतेपविः ३ योअंस्मैहविषाविधन्नतंपूषार्पिमृष्यते ।
प्रथमोविन्दतेवसुं ४ पूषागाअन्वेतुनःपूषारक्षत्ववंतः । पूषावाजंसनोतुनः ५
॥ १९ ॥ पूषन्ननुप्रगाइहियजंमानस्यसुन्वतः । अस्माकंस्तुवतामुत ६ माकि-
र्नेशन्माकींरिषन्माकींसंशारिकेवटे । अथारिष्टाभिरागहि ७ शृण्वन्तंपूषणंवय-

मिर्पमनष्टवेदसम् । ईशानंरायईमहे ८ पूषन्तवव्रतेवयंनारिष्येमकदाचन । स्तोतारस्तइहस्मसि १ परिपूषापरस्ताद्धस्तंदधातुदक्षिणम् । पुनर्नोनष्टमाजंतु १० ॥ २० ॥

॥२८१॥

एहि वां पद भरद्वाजो बार्हस्पत्यः पूषा गायत्री ।

५५ एहिवांविमुचोनपादाघृणेतंसंचावहै । रथीर्ऋतस्यनोभव १ रथीतमं कपर्दिनमीशानंरायसोमहः । रायःसखायमीमहे २ रायोधारास्याघृणेवसोरा-शिरंजाश्व । धीवतोधीवतःसखा ३ पूषणंन्वं१जाश्वमुपस्तोषामवाजिनम् । ससुर्योजारउच्यते ४ मातुर्दिधिषुमब्रवंस्वसुर्जारःशृणोतुनः । भ्रातेन्द्रस्य सखामम ५ आजासःपूषणंरथेनिगृभ्नास्तेजनाश्रियम् । देवंवहन्तुविभ्रतः ६ ॥ २१ ॥

य एनं षड् भरद्वाजो बार्हस्पत्यः पूषा गायत्री। अन्त्यानुष्टुप्।

५६ यएनमादिदेशातिकरम्भादितिंपूषणम्। ततेनंदेवआदिशे १ उतघास रथीतमःसख्यासत्पतिर्युजा। इंद्रोवृत्राणिजिघ्नते २ उतादःपरुषेगवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः ३ यदद्यत्वापुरुष्टुतव्रवामदस्रमन्तुमः। तत्सुनो मन्मसाधय ४ इमंचनोगवेषणंसातयेसीषधोगणम्। आरात्पूषन्नसिश्रुतः ५ आतेस्वस्तिमीमहआरेअघामुपावसुम्। अद्याचसर्वतातयेश्वश्वसर्वतातये ६ ॥ २२ ॥

इन्द्रा नु षड् भरद्वाजो बार्हस्पत्य इन्द्रापूषणौ गायत्री।

५७ इन्द्रानुपूषणावयंसख्यायस्वस्तये। हुवेमवाजसातये १ सोममन्यउपासदत्पातवेचम्वोःसुतम्। करम्भमन्यइच्छति २ अजाअन्यस्यवह्नयोहरीअन्य-

स्यसंभृता । ताभ्यांवृत्राणिजिघ्नते ३ यदिन्द्रोअनयद्रितोमहीरपोवृषन्तमः । तत्रपूषाभुवत्सचा ४ तांपूष्णःसुमतिंवयंवृक्षस्यप्रवयामिव । इन्द्रस्यचारभामहे ५ उत्पूषणंयुवामहेऽभीशूँरिवसारथिः । मह्याइंद्रस्वस्तये ६ ॥ २३ ॥

शुक्रं चतुष्कं भरद्वाजो बार्हस्पत्यः पूषा त्रिष्टुप् । उषाद्या जगती ।

५८ शुक्रंतेअन्यद्यजतंतेअन्याद्विषुरूपेअहनीद्यौरिवासि । विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु १ अजाश्वःपशुपावाजपस्त्योधियंजिन्वोभुवनेविश्वेआर्पितः । अष्टापूषाशिथिरामुहूरीवृजत्संचक्षाणोभुवनादेवईयते २ यास्तेपूषन्नावोअन्तःसमुद्रेहिरण्ययीरन्तरिक्षेचरन्ति । ताभिर्यासिदूत्यांसूर्यस्यकामेनकृतश्रवइच्छमानः ३ पूषासुबन्धुर्दिवआपृथिव्याइळस्पतिर्मघवादस्मवर्चाः । यंदेवासोअददुःसूर्यायैकामेनकृतंतवसंस्वञ्चम् ४ ॥ २४ ॥

म नु दश भरद्वाजो बार्हस्पत्य इन्द्राग्नी बृहती । अन्त्याश्चतस्रोनुष्टुभः।

५१ प्रनुवोचासुतेषुवांवीर्या३यानिचक्रथुः । हतासोवांपितरोदेवशत्रवइन्द्राग्नीजीवथोयुवम् १ वळित्थामहिमावामिन्द्राग्नीपनिष्ठआ । समानोवांजनिताभ्रातरायुवंयमाविहेहमातरा २ ओकिवांसासुतेसचाँअश्वासश्चीड्वादने । इन्द्राग्नी३अवसेहवाज्रिणावयंदेवाहवामहे ३ यईन्द्राग्नीसुतेषुवांस्तवत्तेष्वृतावृधा । जोषवाकंवदतःपज्रहोषिणानदेवाभसथश्चन ४ इन्द्राग्नीकोअस्यवांदेवौमतीश्चिकेतति । विपूचोअश्वान्युयुजानईयतएकःसमानआरथे ५ ॥ २५ ॥ इन्द्राग्नी अपादियंपूर्वागात्पद्वतीभ्यः । हित्वीशिरोजिह्वयावावदच्चरत्त्रिंशत्पदान्यक्रमीत् ६ इन्द्राग्नीआहितंन्वतेनरोधन्वानिवाह्वोः । मानोअस्मिन्महाधनेपरावक्तंगविष्टिषु ७ इन्द्राग्नीतपन्तिमाघाअर्योअरातयः । अपद्वेषांस्याकृतंयुयुतंसूर्यादे-

धिं ८ इन्द्राग्नीयुवोरपिवसुंदिव्यानिपार्थिवा । आनंइहप्रयच्छतंरयिंविश्वायुपोषसम् १ इन्द्राग्नीउक्थवाहसास्तोमेभिर्हवनश्रुता । विश्वाभिर्गीर्भिरागंतमस्यसोमस्यपीतयें १० ॥ २६ ॥

क्षयत्पञ्चदश भरद्वाजो बार्हस्पत्य इन्द्राग्नी गायत्री । आद्यास्तिसृणां त्रयोदशी च त्रिष्टुभः उपान्त्या बृहती । अन्त्यानुष्टुप् ।

६० अर्थंहत्रमुतसंनोतिवाजमिन्द्रायोअग्नींसहुरीसपर्यात् । इरज्यन्तावसव्यस्यभूरेःसहस्तमासहसावाजयन्ता १ तायोधिष्टमभिगाइन्द्रनूनमपःस्वरुषसोअग्रुक्षाः । दिशःस्वरुपसइन्द्रचित्राअपोगाअग्नेयुवसेनियुत्वान् २ आवृत्रहणावृत्रहभिःशुष्मैरिन्द्रयातंनमोभिरग्नेअर्वाक् । युवंरायोभिरकवेभिरिन्द्राग्नेअस्मेभवतमुत्तमेभिः ३ ताहुवेययोरिदंपप्रेविश्वैपुराकृतम् । इन्द्राग्नीनमर्धतः ४

उग्राविंघनिनामृधइन्द्राग्नीहवामहे । तानोमृळातईदृशे ५ ॥२७॥ हतोवृत्राण्या-र्यीहतोदासान्सत्पती । हतोविश्वाअपद्विषः ६ इन्द्राग्नीयुवामिमेऽभिस्तोमा अनूषत । पिबतंशंभुवासुतम् ७ यावांसन्तिपुरुस्पृहोनियुतोदाशुषेनरा । इन्द्रा-ग्नीताभिरागतम् ८ ताभिरागच्छतंनरोपेदंसवनंसुतम् । इन्द्राग्नीसोमपीतये ९ तमींळिष्वयोअद्रिषावनाविश्वांपरिष्वजंत् । कृष्णाकृणोतिजिह्वया १०॥२८॥ यइन्द्रआविवासतिसुम्नमिन्द्रस्यमर्त्यः । द्युम्नायसुतराअपः ११ तानोवाजवतीरिषआशून्पिपृतमर्वतः । इन्द्रमग्निंचवोळ्हवे १२ उभावामिन्द्राग्नीआहुवध्याउ-भाराधसःसहमादयध्यै । उभादातारावसवारयीणामुभावाजस्यसातयेहुवेवाम् १३ आनोगव्येभिरश्व्यैर्वसव्यै३रुपगच्छतम् । सखायोदेवौसख्यायशंभुवे-

न्द्राग्नीताहवामहे १४ इन्द्राग्नीशृणुतंहवंयजमानस्यसुन्वतः । वीतंहव्यान्यागंतं पिबतंसोम्यंमधु १५ ॥ २१ ॥

इयं चतुर्दश भरद्वाजो बार्हस्पत्यः सरस्वती गायत्री । आद्यास्तिस्र उपान्त्या च जगत्यः। अन्त्या त्रिष्टुप्।

६१ इयमंददाद्भरसमृणच्युतंदिवोदासंवध्र्यश्वायदाशुषे । याशश्वन्तमाचखादावसंपणिंतातेदात्राणितविषासरस्वति १ इयंशुष्मैभिर्विसखाइवारुजत्सानुं गिरीणांतविषेभिरूर्मिभिः । पारावतघ्नीमवसेसुवृक्तिभिःसरस्वतीमाविवासेमधीतिभिः २ सरस्वतिदेवनिदोनिबर्हयप्रजांविश्वस्यबृसयस्यमायिनः । उताक्षितिभ्योऽवनीरविन्दोविषमेभ्योअस्रवोवाजिनीवति ३ प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ४ यस्त्वादेविसरस्वत्युपब्रूतेधनेहिते । इन्द्रं नवृत्रतूर्ये ५ ॥ ३० ॥ त्वंदेविसरस्वत्यवावाजेषुवाजिनि । रदापूषेवनःसनि- ॥२८६॥

म् ६ उतस्यानःसरस्वतीघोराहिरण्यवर्तनिः । वृत्रघ्नीवष्टिसुष्टुतिम् ७ यस्या अनन्तोअहुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरतिरोरुवत् ८ सानोविश्वाअतिद्विषः स्वसृरन्याऋतावरी । अतन्नहेवसूर्यः ९ उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा । सरस्वतीस्तोम्याभूत् १० ॥ ३१ ॥ आपप्रुषीपार्थिवान्युरुरजोअन्तरिक्षम् । सरस्वतीनिदस्पातु ११ त्रिषधस्थासप्तधातुःपञ्चजातावर्धयन्ती । वाजेवाजेहव्याभूत् १२ प्रयामंह्विम्रामहिनांसुचेकितेद्युभ्नेभिरन्याअपसामपस्तमा । रथइववृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती १३ सरस्वत्यभिनोनेषिवस्यो मापस्फरीःपयसामानआधक् । जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यरणानि गन्म १४ ॥ ३२ ॥ इति शाकलर्क्संहितायां चतुर्थाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥ इति चतुर्थाष्टकः समाप्तः ॥ ४ ॥

॥२८७॥

स्तुपएकादशाश्विनंतुकत्यैकपदान्तंत्रैष्टुभमाद्याविराळुदुश्रियेपळुपस्यंत्वेपास्यावपुन्वैकादशमारुतं विश्वेषांमैत्रावरुणंश्रुष्टीवामैन्द्रावरुणमुपान्त्येजगत्यौसंवामष्टावैन्द्रावैष्णवंघृतवतीपङ्क्त्यावापृथिवीयंजागतमुष्णिहाःसावित्रंत्रिष्टुबन्तमिन्द्रासोमापश्चैन्द्रासोमंयोअद्रिभित्तृचंवार्हस्पत्यंसोमारुद्राचतुष्कंसोमारौद्रंनीमूतस्येवैकोनापायुर्भारद्वाजःसंग्रामाङ्गान्यृक्शोभितुष्टाववर्मधनुर्ज्यामार्त्नीइषुधिंजगत्यर्धेसारथिमर्धेरश्मीनश्वानूरथंरथगोपांजगत्याद्यालिङ्गोक्तदेवताद्वाभ्यामिषून्मतोदंहस्तघ्नद्वाभ्यामिषून्पराःपङ्क्त्यादयोलिङ्गोक्तदेवताःसंग्रामाशिषोन्त्यानुष्टुवृजीतआलाक्तेतिचद्वेद्वेयोद्वयःसंभूतोवसतीवरीपुगृह्यमाणासुपुष्करेस्थितवान्त्सर्वतःपुष्करंतत्रविश्वेदेवाअधारयन्नुत्यायततोमहत्तपश्चकारादृष्टामिन्द्रमन्यैर्ऋषिभिर्योदृष्टावांस्तपसापूर्वस्तोमभागान्परितुष्टःशक्रःमन्नूतेयस्यसगुणतोनामजज्ञेवसतःश्रैष्ठ्यकर्मणःससप्तमंमण्डलंवसिष्ठोपश्यदग्निपञ्चाधिकाविराजोष्टादशाद्याः ।

स्तुप एकादश भरद्वाजो वार्हस्पत्योश्विनौ त्रिष्टुप् ।

६२ ॐम् स्तुषेनरादिवोअस्यप्रसन्तास्विनाहुवेजरमाणोअर्कैः । यासद्यउ ॥२८७॥

स्रान्युपिज्मोअन्तान्युर्वपतुःपर्युरूवराँसि १ तायज्ञमाशुचिंभिश्चक्रमाणारथंस्य भानुंरुरुचूरजोभिः । पुरूवरांस्यमितामिमानापोधन्वान्यतियाथोअज्रान् २ ताहत्यहर्तियदरंध्रमुग्रेत्थाधियऊहथुःशश्वदश्वैः । मनोजवेभिरिविरैःशयध्यैपरिज्यथिर्दाशुषोमर्त्यस्य ३ तानव्यसोजरमाणस्यमन्मोपंभूषतोयुयुजानसप्ती । शुभंपृक्षमिषमूर्जंवहन्ताहोतायक्षत्प्रत्नोअध्वरयुवांना ४ तावग्नूदस्रापूरुशाकंतमा प्रत्नानव्यसावचसाविवासे । याशंसंतेस्तुवतेशंभविष्ठाबभूवतुर्गृणतेचित्रराती ५ ॥ १ ॥ ताभुज्युंविभिरूद्यःसमुद्रात्रुग्रंस्यसूनुमूहथूरजोभिः । अरेणुभिर्योजनेभिर्भुजन्तापत्त्रिभिरर्णसोनिरुपस्थात् ६ विजयुर्वारथ्यायातमद्रेश्रुतंहवंवृषणावध्रिमत्याः । दशस्यन्तांशयवेपिप्यथुर्गामितिच्यवानासुमतिंभुरण्यू ७ यद्रोदसी प्रदिवोअस्तिभूमाहेळोदेवानामुतमर्त्यत्रा ।तदादित्यावसवोरुद्रियासोरक्षोयुजेत-

पुरंदंधात ८ यईराजानावृतुथाविदथ्रजसोमित्रोवरुणश्चिकेतत् । गम्भीराय रक्षसेहेतिमस्यद्रोघायाचित्तचसआनवाय ९ अन्तरैश्वक्रैस्तनयायवातिंद्युमतायांतं नुवतारथेन । सनुत्येनुत्यजसामर्त्यस्यवनुष्यतामपिशीर्षाववृक्तम् १० आपरमाभिरुतमध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् । दृळ्हस्यचिद्वोमतोविव्रजस्य दुरोवर्तंगृणतेचित्रराती ११ ॥ २ ॥

अ.५अ.१

॥२८८॥

कत्यैकादश भरद्वाजो बार्हस्पत्योऽग्निर्वा त्रिष्टुप्। अन्त्यैकपदा।

६३ कंत्यावलूपुरुहूताद्यदूतोनस्तोमोऽविदन्नमस्वान्। आयोअर्वाङ्मासत्या ववर्तप्रेष्ठाह्यसंथोअस्यमन्मन् १ अरंमेगन्तंहवनायास्मैगृणानायथापिवाथोअन्धः । परिहृत्यहरितंयाथोरिषोनयत्परोनान्तरस्तुतुर्यात् २ अकारियामन्धसोवरीमन्नस्तारिवाहःसुप्रायुणतंमम् । उत्तानहस्तोयुवयुर्वन्दावांनक्षन्तोअद्रयआजन-

॥२८८॥

न् ३ ऊर्ध्वोवामग्निरध्वरेष्वस्थात्प्रातिरैतिजूर्णिर्नीघृताची । प्रहोतागूर्तमनाउ-
राणोऽयुक्तयोनासत्याहवींमन् ४ अधिश्रियेदुहितासूर्यस्यरथंतस्थौपुरुभुजाशु-
तोतिम् । प्रमायाभिर्मायिनाभूतमत्रनरानृतूजनिमन्यज्ञियानाम् ५ ॥ ३ ॥
युवंश्रीभिर्दर्शताभिरात्मिःशुभेपुष्टिंमूहथुःसूर्यायाः । प्रवांवयोवपुषेऽनुपक्षन्न
द्वाणीसुष्टुताधिष्ण्यावाम् ६ आवांवयोऽश्वांसोवहिष्ठाअभिप्रयोनासत्यावहन्तु ।
प्रवांरथोमनोजवाअसर्जीपःपृक्षइषिरोअनुपूर्वीः ७ पुरुहिवांपुरुभुजादेष्णंधेनुं
नइयंपिन्वतमसंक्राम् । स्तुतश्चवांमाध्वीसुष्टुतिश्चरसाश्चयेवामनुरातिमग्मन् ८
उतमंकुज्जेपुरुयस्यरघ्वीसुंमिळेशतंपेरुकेचपक्वा । शाण्डोदांद्धिरणिनुःसमहिष्टी-
न्दशंवृशासोअभिपार्चकृण्वान् ९ संवांशतानासत्यासहस्राश्वानांपुरुपन्था

गिरेदात् । भरद्वाजायवीरनूगिरेदाद्धृतारक्षाँसिपुरुदंससास्युः १० आवाँसुम्नेवरिमन्त्सूरिभिःष्याम् ११ ॥ ४ ॥

उदु श्रिये पञ्चरद्वाजो बार्हस्पत्य उपास्तिष्टुप् ।

६४ उदुश्रियउपसोरोचमानाअस्थुरपानोर्मयोरुशन्तः । कृणोतिविश्वांसुपथांसुगान्यभूदुवस्वीदक्षिणामघोनी १ भद्रादद्दृक्षउविंयाविभास्युत्तेशोचिर्भानवोयामंपप्रन् । आविर्वक्षःकृणुषेशुम्भमानोषोदेविरोचमानामहोभिः २ वहन्तिसीमरुणासोरुशन्तोगावःसुभगांमुविंयाप्रथानाम् । अपैजतेशूरोअस्तेवशन्नूनवाधतेतमोअजिरोनवोळ्हा ३ सुगोततेसुपथापर्वतेष्ववातेअपस्तरांसिस्वभानो । सानआवहपृथुयामन्नृष्वेरायोदेवोदुहितरिषयध्यै ४ सावहयोक्षभिरुषातोषोवरंवहसिजोषमनु । त्वंदेवोदुहितर्याहदेवीपूर्वहूतौमंहनादर्शताभूः ५

उत्तेवयश्चिद्वसतेरपत्नन्नरश्चयेपितुभाजोव्युष्टौ । अमासतेवहसिभूरिवाममुषोदे-
विदाशुषेमर्त्याय ६ ॥ ५ ॥

एषा स्या पञ्चरद्वाजो बार्हस्पत्य उषास्त्रिष्टुप् ।

६५ एषास्यानोदुहितादिवोजाःक्षितीरुच्छन्तीमानुषीरजीगः । याभानुना
रुशतारुम्यास्वञ्चायितिरस्तमंसश्चिदक्तून् १ वितर्यपुररुणयुग्भिरश्वैश्चित्रंभा-
न्त्युपसश्चन्द्ररथाः । अग्रंयज्ञस्यवृहतोनयन्तीर्विताबाधन्तेतमऊर्म्याया २ श्रवो
वाजमिषमूर्जंवहन्तीर्निदाशुषंउषसोमर्त्याय । मघोनीर्वीरवत्पत्यमानाअवोधा-
तविधतेरत्नमद्य ३ इदाहिवोविधतेरत्नमस्तीदावीरायदाशुषंउषासः । इदावि-
प्रायजरतेयदुक्थानिष्ममावतेवहथापुराचित् ४ इदाहितंउषोअद्रिसानोगोत्रा
गवामङ्गिरसोगृणन्ति । व्यर्कैणविभिदुर्व्रह्मणाचसत्यानृणामभवद्देवहूतिः ५

उच्छादिदोदुहितःप्रत्नवन्नोभरद्वाजवद्धिषतेमघोनि । सुवीरंरयिंगृणतेरिरीह्युरु-
गायमधिधेहिश्रवोनः ६ ॥ ६ ॥

॥२९०॥

वपुर्नैकादश भरद्वाजो बार्हस्पत्यो मरुतस्त्रिष्टुप् ।

६६ वपुर्नतच्चिकितुपेचिदस्तुसमानंनामधेनुपत्यमानम् । मतींष्वन्यद्दोहसे
पीपायसकृच्छुक्रंदुदुहेपृश्निरूधः १ येअग्नयोनशोशुचन्निधानाद्धियात्रिमरुतोवा-
वृधन्त । अरेणवोहिरण्ययासएषांसाकंनृम्णैःपौंस्यैभिश्चभूवन् २ रुद्रस्ययेमीळ्हु-
षःसन्तिपुत्रायांश्चोनुदाधृविर्भरध्यै । विदेहिमाताम्होमहीषासेत्पृश्निंसुम्वे३ग-
र्भमाधात् ३ नयईपन्तेजनुषोऽयान्वे१न्तःसन्तोऽवद्यानिपुनानाः । निर्यद्वेहेशु-
चयोऽनुजोषमनुश्रियातन्वंमुक्षमाणाः ४ मक्षूनयेपुदोहसेचिदयाआनामधृष्णु
मारुतंदधानाः । नयेस्तौनाअयासोमह्नानूचित्सुदानुरवयासदुघ्रान् ५ ॥ ७ ॥

॥२९०॥

तइदुग्राःशर्वसाधुष्णुयेणाउभेयुंजन्तरोदसीसुमेकं । अधस्मैपुरोदासिस्वशोचि-
रामवत्सुतस्यौनरोकः ६ अनेनोवोमरुतोयामोअस्त्वनश्वश्चिद्यमजत्यरथीः ।
अनवसोअनभीशूरजस्तूर्विरोदसीपुष्यायातिसाधन् ७ नास्यवर्तानतरुतान्व-
स्तिमरुतोयमवथवाजसातौ । तोकेवागोषुतनयेयमप्सुसव्रजंदर्तापार्थेअध्व
योः ८ प्रचित्रमर्कंगृणतेतुरायमारुतायस्वतवसेभरध्वम् । येसहांसिसहसासहन्ते
रेजतेअग्नेपृथिवीमखेभ्यः ९ त्विषीमन्तोअध्वरस्येवदिद्युतृपुच्यवसोजुह्वो३ना-
मेः । अर्चत्रयोधुनयोनवीराभ्राजज्जन्मानोमरुतोअधृष्टाः १० तंवृधन्तंमारुतं
धाजदष्टिरुद्रस्यसूनुंहवसाविवासे । दिवःशर्धायशुचयोमनीषागिरयोनापर्वुग्रा
अस्पृधन्न ११ ॥ ८ ॥

६७ विश्वेषांवःसतांज्येष्ठतमागीर्भिर्मित्रावरुणावावृधध्यै । संयाररमेवयुमतूर्यमिष्ठाद्राजनाँअसमावाहाभिःस्वैः १ इयंमहीप्रस्तृणीतेमनीषोर्पप्रियानमसावहिरच्छ । यन्तंनोमित्रावरुणावधृष्टंछर्दिर्यद्दावरूथ्यंसुदानू २ आयातंमित्रावरुणासुशस्त्युपप्रियानमसाहूयमाना । संयावप्रःस्थोअपसेवजनाञ्छुचीयतश्चिद्यतथोमहित्वा ३ अश्वानयावाजिनापूतबन्धूनृतायद्रुभमादितिर्भरध्यै । प्रयामहिंमहान्ताजायमानाघोरामतींयरिपवेनिदीधः ४ विश्वेयद्वांमहनामन्दमानाः क्षत्रंदेवासोअदधुःसजोषाः । परियद्रथोरोदसीचिदुर्वीसन्तिस्पशोअदब्धासोअमूराः ५ ॥ १ ॥ ताहिक्षत्रंधारयथेअनुद्यून्द्वेयेसानुमुपमादिवोधोः । दृळ्होनक्षत्रउतविश्वदेवोभूमिमातान्द्यांधासिनाधोः ६ ताविश्वंधथेजठरंपृणध्याआयत्सद्म ॥२९१॥

॥२९१॥

सभृतयःपृणन्ति । नमृष्यन्तेयुवतयोऽवांताविषत्पयोविश्वजिन्वाभरन्ते ७ ता जिह्वयासदमेदंसुमेधाआयद्वांसत्योअरतिर्ऋतेभूत् । तद्वांमहित्वंघृताच्यावस्तुयुवं दाशुषेविचयिष्टमंहः ८ प्रयद्वांमित्रावरुणास्पूर्धन्प्रियाधामयुवधितामिनन्ति । नयेदेवासओहसानमर्ताअयज्ञसाचोअप्योनपुत्राः ९ विद्याचैकीस्तासोभरन्ते शंसन्तिकेचिन्निविदोमनानाः । आद्वांब्रवामसत्यान्युक्थानकिंदेवेभिर्यतथोमहित्वा १० अवोरित्यावांछर्दिषोअभिष्टौयुवोर्मित्रावरुणावस्कधेयु । अनुयद्वांवःस्फुरानृजिप्यंघृष्णुंयद्रणेवृषणंयुनजन्न ११ ॥ १० ॥

श्रुष्टी वामेकादश भरद्वाजो बार्हस्पत्य इन्द्रावरुणौ त्रिष्टुप् । उपान्त्ये जगती ।

६८ श्रुष्टीवांयज्ञउद्यतःसुजोषामनुष्वहूक्रुर्वहिषोयजध्यै । आयइन्द्रावरुणाविषेअयमहेसुम्नायमहआवृवर्तत् १ ताहिश्रेष्ठावृतातातुजाशूराणांशविष्ठाता

हिभूतम् । मघोनांमंहिष्ठातुविशुष्मंक्रतेनवृत्रतुरासवँसेना २ तागृणीहिनमस्यै-
भिःशूषैःसुम्नेभिरिन्द्रावरुणाचकाना । वज्रेणान्यःशवंसाहन्तिवृत्रंसिषक्त्यन्योवृ-
जनेषुविप्रः ३ प्राश्वयन्नरश्ववावृधन्तविश्वेदेवासोनरांस्वर्गूर्ताः । प्रेभ्यइन्द्रावरुणा
महित्वाद्यौश्चपृथिविभूतमुर्वी ४ सइत्सुदानुःस्ववाँऋतावेन्द्रायोवाँवरुणदाशांति
त्मन् । इषासहिपस्तरेहास्वान्वंसंद्रयिंरायिवतश्चजनान् ५ ॥ ११ ॥ यंयुवंदाश्वं-
ध्वरायदेवारयिंधत्थोवसुमन्तंपुरुक्षुम् । अस्मेसइन्द्रावरुणावपिष्यात्प्रयोभिनक्षि
वनुषामशस्तीः ६ उतनःसुत्रात्रोदेवगोपाःसरिभ्यइन्द्रावरुणारयिःष्यात् । ये-
पांगुष्मःपृतनासुसाह्वान्प्रसद्योद्युम्नातिरतेततुरिः ७ नूनंइन्द्रावरुणागृणानापृङ्क्षरायिं
सौश्रवसायदेवा । इत्थागृणन्तोमहिनस्यशर्धोऽपोननावार्दुरितातरेम ८ प्रस-
म्राजेवृहतेमन्मनुप्रियमग्नेदेवायवरुणायसप्रथः । अयंयउर्वीमहिनामहिव्रतःक्र-

त्वांविभात्युजरोनशोचिषा १ इन्द्रावरुणासुतपाविमंसुतंसोमंपिबतंमदायधृतव्र-
ता। युवोरथोअध्वरंदेववीतयेप्रतिस्वसारमुपयातिपीतये १० इन्द्रावरुणामधुमत्त-
मस्यवृष्णःसोमस्यवृषणावृषेथाम्। इदंवामन्धःपरिषिक्तमस्मेआसद्यास्मिन्ब-
र्हिषिमादयेथाम् ११ ॥ १२ ॥

सं वामष्टौ भरद्वाजो बार्हस्पत्य इन्द्राविष्णू त्रिष्टुप्।

६१ संवांकर्मणासमिषाहिनोमीन्द्राविष्णूअपसस्पारेअस्य। जुषेथांयज्ञंद्रवि-
णंचधत्तमरिष्टैर्नःपथिभिःपारयन्ता १ याविश्वांसांजनितारामतीनामिन्द्राविष्णू
कलशासोमधाना। प्रवांगिरःशस्यमानाअवन्तुप्रस्तोमासोगीयमानासोअर्कैः २
इन्द्राविष्णूमदपतीमदानामासोमंयातंद्रविणोदधाना। संवामञ्जन्त्वक्तुभिर्मतीनां
संस्तोमासःशस्यमानासउक्थैः ३ आवामश्वासोअभिमातिषाहइन्द्राविष्णूसध-

मादोवहन्तु । जुषेथांविश्वाहवंनामतीनामुपब्रह्माणिशृणुतंगिरोमे ४ इन्द्राविष्णू-
तत्पनयाय्यंवांसोमस्यमदंउरुक्रमाथे । अकृणुतमन्तरिक्षंवरीयोऽप्रथतंजीवसे
नोरजांसि५इन्द्राविष्णूहविषावावृधानाप्राद्यानामसारातहव्या। घृतासुतीद्रवि-
णंधत्तमस्मेसमुद्रःस्थःकुलशःसोमधानः ६ इन्द्राविष्णूपिबतंमध्वोअस्यसोम-
स्यदस्राजठरंपृणेथाम् । आवामन्धांसिमदिराण्यंग्मन्नुपब्रह्माणिशृणुतंहवंमे ७
उभाजिग्यथुर्नपराजयेथेनपराजिग्येकतरश्चनैनोः । इन्द्रश्चविष्णोयदपस्पृधेथां
त्रेधासहस्रंवितदैरयेथाम् ८ ॥ १३ ॥

घृतवती पङ्क्तिर्द्राजो बार्हस्पत्यो द्यावापृथिव्यौ जगती ।

७० घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा । द्यावापृथिवीव
रुणस्यधर्मणाविष्कभितेअजरेभूरिरेतसा १ असश्चन्तीभूरिधारेपयस्वतीघृतंदु-

हातेसुकृतेशुचिव्रते । राजन्तीअस्यभुवनस्यरोदसीअस्मेरेतःसिञ्चतंयन्मनुर्हितम् २ योवामृजवेक्रमणायरोदसीमर्तोदधाशेधिष्णेससाधति । प्रप्रजाभिर्जायतेधर्मणस्परिद्युवोःसिक्तावियुरूपाणिसव्रता ३ घृतेनद्यावापृथिवीअभीवृतेघृतश्रियाघृतपृचाघृतावृधा । उर्वीपृथ्वीहोतृवूर्येपुरोहितेतेइद्विप्राईळतेसुम्नमिष्टये ४ मधुनोद्यावापृथिवीमिमिक्षतांमधुश्चुतांमधुदुघेमधुव्रते । दधानेयज्ञंद्रविणंचदेवतामहिश्रवोवाजमस्मेसुवीर्यम् ५ ऊर्जनोद्यौश्चपृथिवीचपिन्वतांपितामाता विश्वविदासुदंससा । संरराणेरोदसीविश्वशंभुवासनिंवाजंरयिमस्मेसमिन्वताम् ६ ॥ १४ ॥

उदुप्य पङ्क्तिरङ्गिरसो बार्हस्पत्यः सविता । आद्यास्त्रिष्टुभो जगत्यः । शिष्टास्त्रिष्टुभः ।

७१ उदुप्यदेवःसविताहिरण्ययाबाहूअयंस्तसवनायसुक्रतुः । घृतेनपाणीअ-

भिप्रुंष्णुतेमखोयुवासुदक्षोरजसोविधर्मणि १ देवस्यवयंसवितुःसवीमानिश्रेष्ठे स्यामवसुनश्चदावने। योविश्वस्याद्विपदोयश्चतुष्पदोनिवेशनेप्रसवेचासिभूमनः२ अदब्धेभिःसवितःपायुभिष्ट्वंशिवेभिरद्यपरिपाहिनोगयम् । हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोअघशंसईशत ३ उदुष्यदेवःसवितादमूनाहिरण्यपाणिः प्रतिदोषमस्थात् । अयोहनुर्यजतोमन्द्रजिह्वआदाशुषेसुवतिभूरिवामम् ४ उदयाँउपवक्तेवबाहूहिरण्ययासवितासुप्रतीका। दिवोरोहाँस्यरुहत्पृथिव्याअरींरमत्पतयत्कञ्चिदभ्वम् ५ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यंसावीः। वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजःस्याम ६ ॥ १५ ॥

इन्द्रासोमा पश्च भरद्वाजो बार्हस्पत्य इन्द्रासोमौ त्रिष्टुप्।

७२ इन्द्रासोमामहितद्मामहित्वंयुवंमहानिप्रयुमानिचक्रथुः। युवंसूर्यंविवि-

दथुर्युवंसं १ विश्वातमांस्यहतंनिदश्वं १ इन्द्रांसोमावासयंथउपासमुत्सूर्यंनयथो ज्योतिंपासह । उपद्यांस्कुम्भथुःस्कम्भनेनाप्रथतंपृथिवींमातरंवि २ इन्द्रांसोमावहिंमपःपरिष्ठांहथोवृत्रमनुवांद्यौरमन्यत । प्राणींस्यैरयतंनदीनामासंमुद्राणिं पप्रथुःपुरूणिं ३ इन्द्रांसोमापक्कमामास्वन्तर्निगवामिहंधथुर्वक्षणांसु । जगृभथुरनांपिनद्धमासुरुशंञ्चित्रासुजगंतीष्वन्तः ४ इन्द्रांसोमायुवमङ्गतरुत्रमपत्यसाचंश्रुत्यैरराथे । युवंशुष्मंनर्यंचर्षणिभ्यःसंविव्यथुःपृतनाबाहंमुग्रा ५ ॥ १६ ॥

यो अद्रिभित्प्रथमजाऋतावाबृहस्पतिराङ्गिरसोहविष्मान् । द्विबर्हज्मा प्राघर्मसत्पितानुआरोदसीवृषभोरोरवीति १ जनांयचिद्यईवंतउलोकंबृहस्पतिर्देवहूतौचकार । घ्नन्वृत्राणिविपुरोदर्दरीतिजयञ्छत्रूरमित्रान्पृत्सुसाहन् २ बृहस्पतिःस-

मंजयद्वसूंनिमहोव्रजान्गोमंतोदेवएयः । अपःसिषासन्त्स्व१रप्रतीतोबृहस्पति-
र्हन्त्यमित्रंमर्कैः ३ ॥ १७ ॥

सोमरुद्रा चतुष्कं भरद्वाजो बार्हस्पत्यः सोमारुद्रौ त्रिष्टुप् ।

७४ सोमारुद्राधारयेथामसुर्यं१प्रवांमिष्टयोऽरमश्नुवन्तु । दमेदमेसप्तरत्नादधानाशंनोभूतंद्विपदेशंचतुष्पदे १ सोमारुद्राविवृहतंविषूचीममीवायानोगयमाविवेशं । आरेबाधेथांनिर्ऋतिंपराचैरस्मेभद्रासौश्रवसानिसन्तु २ सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभेषजानिधत्तम् । अवस्यतंमुञ्चतंयन्नोअस्तितनूषुवद्यंकृतमेनोअस्मत् ३ तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृळतंनः । प्रनोमुञ्चतंवरुणस्यपाशाद्रोपायतंनःसुमनस्यमाना ४ ॥ १८ ॥

जीमूतस्येवैकोनविंशतिः पायुर्भारद्वाजस्त्रिष्टुप्। आद्याया वर्म। उपाद्याया धनुः। तृतीयस्या ज्या। चतुर्थ्या आत्नि। पञ्चम्या इषुधिः। षष्ठ्याः प्रथमार्धस्य सारथिः। द्वितीयार्धस्य रश्मयः। सप्तम्या अश्वाः। अष्टम्या रथः। नवम्या रथगोपाः। दशम्या लिङ्गोक्तदेवताः। एकादशीद्वादशीपञ्चदशीषोळशीनाभिपवः। त्रयोदश्याः प्रतोदः। चतुर्दश्या हस्तघ्नः। अन्त्यानां तिसृणां लिङ्गोक्तदेवताः संग्रामाशिषः। सप्तदश्या युद्धभूमिर्ब्रह्मणस्पतिरदितिश्च। उपान्त्यायाः कवचसोमवरुणाः। अन्त्यायाः देवा ब्रह्म च। षष्ठीदशम्यौ जगत्यौ। द्वादशीत्रयोदशी पञ्चदशीषोळशयन्त्याअनुष्टुभः। सप्तदशी पङ्क्तिः।

७५ जीमूतस्येवभवतिप्रतीकंयद्वर्मीयान्तिसमदामुपस्थे। अनाविद्धयात्तन्वा जयत्वंसत्वावर्मणोमहिमार्पिपर्तु १ धन्वनागाधन्वनाजिंजयेमधन्वनातीव्राः समदोजयेम। धनुःशत्रोरपकामंकृणोतिधन्वनासर्वाःप्रदिशोजयेम २ वृक्ष्य-

न्तीविदाग॑नीगन्तिकर्णा॒प्रियं॑सखा॒यंपरिषस्वजा॒ना। यो॒षेवशि॑ङ्क्ते॒वित॒ताधि॒धन्व॒ञ्या
इ॒यंसमि॑नेपा॒रय॑न्ती ३ ते॒आच॑रन्तीसमि॑नेव॒योषा॑मा॒तेव॑पु॒त्रंबि॑भृतामु॒पस्थे॑। अप॒
शत्रू॑न्वि॒ध्यत॑संविदा॒नेआ॒रात्ता॑इ॒मेवि॑ष्फु॒रन्ती॒अमि॑त्रान् ४ ब॒ह्वी॑नांपि॒ताब॒हुर॑स्यप॒
त्रश्चि॒श्वाकृ॑णोति॒समि॑नाव॒गत्य॑। इ॒षुधि॑:सङ्का॒:पृत॑नाश्च॒सर्वा॑:पृ॒ष्ठेनि॑नद्धोजयति॒प्र॒
सू॒तः ५ ॥ ११ ॥ रथे॑तिष्ठ॒न्नय॑तिवा॒जिन॑:पु॒रोय॒त्रय॒त्रका॒मय॑तेसुपारथिः। अ॒
भीशू॑नांमहि॒मान॑पनायत॒मन॑:पश्चादनु॒यच्छ॑न्ति॒रश्म॑यः ६ तीव्रान्घो॒षान्कृ॑णवते
वृ॒षपा॑णयो॒श्वार॑थेभि॒:सहवा॒जय॑न्तः। अव॑क्रामन्त॒:प्रप॑दै॒रमि॑त्रा॒न्क्षि॑णन्ति॒शत्रू॒॑
रन॑पव्ययन्तः ७ रथ॒वाह॑नंह॒विर॑स्य॒नाम॒यत्रा॒युधं॑नि॒हि॑तमस्य॒वर्म॑। तत्रा॒रथ॒मुप॑
शग्मंस॑देमवि॒श्वहा॑व॒यंसु॒मन॒स्यमा॑नाः ८ स्वा॒दुप्स॑दः॒पि॒तरो॑वयो॒धाः॒कृ॒च्छ्रेश्रि॒तः
शक्ती॑वन्तोगभी॒राः। चि॒त्रसे॑ना॒इषु॑बला॒अमृ॑धा॒:स॒तोवी॒राउ॒रवो॒व्रातसा॒हाः ९

ब्राह्मणास॒ःपित॑र॒ःसोम्या॑स॒ःशि॒वेनो॒द्यावा॑पृथि॒वीअ॑ने॒हसा॑ । पू॒षान॑ःपातुदुरि॒ताद॑-
तावृ॒धोर॑क्षा॒माकि॑र्नो॒अघ॑शँसईशत १० ॥ २० ॥ सु॒प॒र्णव॑स्तेमृ॒गोअ॑स्या॒दन्तो॒-
गो॒भि॒ःसं॑नद्धापतति॒प्रसू॑ता । यत्रा॒नर॒ःसंच॒विच॒द्रव॑न्ति॒तत्रा॒स्मभ्य॒मिष॑व॒ःशर्म॑यं-
सन् ११ ऋ॒जी॒ते॒परि॑वृङ्धि॒नो॑ऽश्मा॑भवतुनस्त॒नूः । सोमो॒अधि॑ब्रवीतु॒नो॑ऽदि॑ति॒ः
शर्म॑यच्छतु १२ आज॑ङ्घन्ति॒सान्वे॑षां॒ज॒घना॒॑उपा॑जिघ्नते । अश्वा॑जानि॒प्रचे॑त॒सो॑ऽ-
श्वान्त्स॒मत्सु॑चोदय १३ अहि॑रिवभो॒गैः॒पर्ये॑ति॒बा॒हुं॒ज्याया॑हे॒तिं॒परि॑बाधमानः ।
ह॒स्त॒घ्नोविश्वा॑व॒युना॑नि॒वि॒द्वान्पु॒मान्पु॒मांस॒॑ंपरि॑पातु॒वि॒श्वतः॑ १४ आला॑क्षा॒यारु॑रु-
शी॒ष्ण्यथो॑यस्या॒अयो॒मुख॑म् । इ॒दंप॒र्जन्य॑रेतस॒इ॒ष्वै॒दे॒व्यै॒व॒हन्नमः॑ १५ ॥ २१ ॥
अव॑सृष्टापरा॑पत॒शर॑व्येब्रह्म॒संशिते । गच्छा॑मि॒त्रान्प्र॑प॒द्यस्व॒मामी॑षां॑कं॒च॒नोच्छि॑-
षः १६ यत्र॑बा॒णाः॒सं॒पत॑न्ति॒कुमा॒रावि॑शि॒खाइ॑व । तत्रा॑नो॒ब्रह्म॑ण॒स्पति॒रदि॑ति॒ःशर्म॑

यच्छतुविश्वाहाशमँयच्छतु १७ ममाँणितेवमँणाछादयामिसोमंस्त्वाराजामृते-
नानुवस्ताम् । उरोर्वरीयोवरुणस्तेकृणोतुजयन्तंत्वानुदेवामदन्तु १८ योनःस्वो
अरणोयश्चनिष्ट्योजिघाँसति । देवास्तंसर्वेधूर्वन्तुब्रह्मवर्मममान्तरम् ११ ॥ २२ ॥
इति शाकलर्क्संहितायां षष्ठे मण्डले षष्ठोनुवाकः ॥ ६ ॥

इति षष्ठं मण्डलं समाप्तम् ॥ ६ ॥

अग्निं पञ्चविंशतिर्वासिष्ठोग्निर्विराट् । अन्त्याः सप्त त्रिष्टुभः ।

१ अग्निंनरोदीधितिभिररण्योर्हस्तंच्युतीजनयन्तप्रशस्तम् । दूरेदृशंगृहप-
तिमथर्युम् १ तमग्निमस्तेवसवोन्यृण्वन्त्सुप्रतिचक्षमवंसेकुतश्चित् । दक्षाय्योयो
दमआसनित्यः २ प्रेद्धोअग्नेदीदिहिपुरोनोऽजस्रयासूर्म्यायविष्ठ । त्वांशश्वन्त

उपंयन्तिवाजाः ३ प्रतेअग्नयोऽग्निभ्योवरंनिःसुवीरासःशोशुचन्तद्युमन्तः । यत्रा नरःसमासंतेसुजाताः ४ दानोअग्नेधियारयिंसुवीरंस्वपत्यंसहस्यप्रशस्तम् । न यंयावातरंतियातुमावान् ५ ॥ २३ ॥ उपयमेतियुवतिःसुदक्षंदोषावस्तोर्हविष्मंतीघृताची । उपस्वैनमरमंतिर्वसूयुः ६ विश्वांअग्नेऽपंदहारातीर्यैभिस्तपोभिरदंहोजरूथम् । प्रनिंस्वरंचातयस्वामीवाम् ७ आयस्तेअग्नइधतेअनींकंवसिष्ठशुक्रदीदिवःपावक । उतोनंएभिःस्तवथैरिहस्याः ८ वियेतेअग्नेभेजिरेअनींकंमर्तानरःपित्र्यासःपुरुत्रा । उतोनंएभिःसुमनाइहस्याः ९ इमेनरोवृत्रहत्यंयुशूराविश्वाअदेवीरभिसन्तुमायाः । येमेधियंपनयन्तप्रशस्ताम् १० ॥ २४ ॥ माशूनेअग्नेनिपंदामनृणांमाशेपंसोऽवीरंतापरित्वा । प्रजावंतीयुदुर्यासुदुर्य ११ यमश्वीनित्यंमुपयातियज्ञंप्रजावन्तंस्वपत्यंक्षयंनः । स्वजंन्मनाशेपंसावावृधा-

यच्छतुविश्वाहाशमँयच्छतु १७ मर्माणितेवर्मणाच्छादयामिसोमस्त्वाराजामृते-
नानुवस्ताम् । उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु १८ योनःस्वो
अरणोयश्चनिष्ट्योजिघाँसति । देवास्तंसर्वेधूर्वन्तुब्रह्मवर्ममममान्तरम् ११ ॥ २२ ॥
इति शाकलर्क्संहितायां षष्ठे मण्डले षष्ठोनुवाकः ॥ ६ ॥

इति षष्ठं मण्डलं समाप्तम् ॥ ६ ॥

अग्निं पञ्चविंशतिर्वसिष्ठोग्निर्वैश्वरः । अन्त्याः सप्त त्रिष्टुभः ।

१ अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयन्तप्रशस्तम् । दूरेदृशंगृहप-
तिमथर्युम् १ तमग्निमस्तेवसवोन्यृण्वन्त्सुप्रतिचक्षमवसेकुतश्चित् । दक्षाय्योयो
दममआसनित्यः २ प्रेद्धोअग्नेदीदिहिपुरोनोऽजस्रयासूर्म्यायविष्ठ । त्वांशश्वन्त

उपयन्तिवाजाः ३ प्रतेअग्नयोऽग्निभ्योवरंनिःसुवीरासःशोशुचन्तद्युमन्तः । यत्रा नरःसमासंतेसुजाताः ४ दानोअग्नेधियारयिंसुवीरंस्वपत्यंसहस्यप्रशस्तम् । न यंयावातरंतियातुमार्वान् ५ ॥ २३ ॥ उपयमंतियुवतिःसुदक्षंदोषावस्तोर्हविष्मंतोघृताचीं । उपस्वैनंमरमंतिर्वसूयुः ६ विश्वांअग्नेऽपद्हारातीर्येभिस्तपोभिरदंह्लोजरूथम् । प्रनिस्वरंचांतयस्वामीवाम् ७ आयस्तेअग्नइधतेअनीकंवसिष्ठशुक्रदीदिवःपावक । उतोनएभिःस्तवथैरिहस्याः ८ वियेतेअग्नेभजिरेअनीकंमर्तानरःपित्र्यासःपुरुत्रा । उतोनएभिःसुमनाइहस्याः ९ इमेनरोवृत्रहत्येषुशूराविश्वाअदेवीरभिसन्तुमायाः । येमेधियंपनयन्तप्रशस्ताम् १० ॥ २४ ॥ माशूनेअग्नेनिषदामनृणांमाशेषसोऽवीरतापरित्वा । प्रजावतीपुदुर्यासुदुर्य ११ यमश्वीनित्यंमुपयातियज्ञंप्रजावन्तंस्वपत्यंक्षयंनः । स्वजन्मनाशेषसावावृधा-

नम् १२ पाहिनोऽअग्नेरक्षसोऽजुष्टात्पाहिधूर्तेररुषोऽघायोः । त्वायुजापृतना-
यूँरभिष्याम् १३ सेदग्निरग्नीँरत्यंस्त्वन्यान्यत्रवाजितनयोवीळुपाणिः । सहस्र-
पाथाऽअक्षरासमेति १४ सेदग्निर्योवनुष्यतोनिपातिसमेद्धारमंहसऽउरुष्यात् ।
सुजातासःपरिचरन्तिवीराः १५ ॥ २५ ॥ अयंसोऽअग्निराहुतःपुरुत्रायमीशानः
समिदिन्धेहविष्मान् । परियमेत्यध्वरेषुहोता १६ त्वेऽअग्नआहवनानिभूरीगा-
नासऽआजुहुयामनित्या । उभाकृण्वन्तावहतूमियेधे १७ इमोऽअग्नेवीततमानि
हव्याजस्रोवक्षिदेवतातिमच्छ । प्रतिनंईसुरभीणिव्यन्तु १८ मानोऽअग्नेऽवीरते
परादादुर्वाससेऽमतयेमानोऽअस्यै । मानःक्षुधेमारक्षसंऋतावोमानोदमेमावनुआ
जुहूर्थाः १९ नूमेब्रह्माण्यग्नऽउच्छशाधित्वंदेवमघवंद्यःसुपूदः । रातौस्यामोभ-

यासुआतेयूयंपातस्वस्तिभिःसदानः २० ॥ २६ ॥ त्वमग्नेसुहवोरण्वसंदृक्सुदी-
ती सूनोसहसोदिदीहि । मात्वेसचातनयेनित्यआधृजावीरोअस्मन्नर्योविदासीत् २१ मानोअग्नेदुर्भृतयेसचैषुदेवेह्यग्निप्रवोचः । मातेअस्मान्दुर्मतयोभुमाज्जिह्वेवस्यसूनोसहसोनशन्त २२ समतोअग्नेस्वनीकेरवानमर्त्यंयआजुहोतिहव्यम् । सदेवतावसुवनिंदधातियंसूरिरर्थीपृच्छमानएतिं २३ महोनोअग्नेसुवितस्यविद्वान्रयिंसूरिभ्यआवहावृहन्तम् । येनवयंसहसावन्मदेमाविंक्षितास्तआयुषासुवीराः २४ नूमेब्रह्माण्यग्नउच्छशाधित्वंदेवमघवंभ्यःसुपूदः । रातौस्यामोभयासुआतेयूयंपातस्वस्तिभिःसदानः २५ ॥ २७ ॥ इति शाकलर्कसंहितायां पञ्चमाष्टके प्रथमोध्यायः ॥ १ ॥

५८ प्रसाक॒मुक्षेअर्चतागृणायु॒योदैव्यंस्य॒धाम्नस्तुविं॑ष्मान् । उ॒तक्षोदन्ति॒रोद॑सीमहि॒त्वानर्क्षन्ते॒नाक॑निर्ऋ॒तेरव॑शात् १ ज॒नूश्चि॒द्धोमरुतस्त्वे॒ष्येण॒भीमा॑स॒स्तुवि॑मन्यवो॒ऽयासः । प्रये॑महो॒भिरोज॑सोत॒सन्ति॒विश्वो॒वोया॑मंन्भयते॒स्वर्दृक् २ बृह॒द्वयो॑म॒घव॑द्भ्योदधात॒जुजो॑प॒त्निर्म॒रुतः॑सु॒ष्टुति॑नः । गृ॒तोना॑ध्वा॒वितिरा॑ति॒जन्तुं॒प्रणः॑स्पा॒र्हाभि॑रू॒तिभि॑स्तिरेत ३ यु॒ष्मोतो॒विप्रो॑मरुतःश॒तस्वी॑यु॒ष्मोतो॒अर्वा॑स॒हुरिः॑सह॒स्री । यु॒ष्मोतः॑स॒म्राळु॒तहन्ति॑वृ॒त्रंप्रत॒द्दोअ॑स्तुधू॒तयो॑दे॒ष्णम् ४ ताँआ॑रु॒द्रस्य॑मी॒ळ्हुषो॑ विवासे॒कुवि॑त्संन्ते॒म॒रु॒तः॒पुन॑र्नः । यत्स॒स्वर्ता॑जिहीळि॒रेय॒दावि॑र॒वृत॑देनई॒महे॒तुरा॑णाम् ५ प्रसा॑वा॒चिसु॒ष्टुति॑र्म॒घोना॑मि॒दंसू॒क्तंम॒रुतो॑जुषन्त । आरा॒च्चि॒द्वेषो॑वृषणो॒युयो॑तयू॒यंपा॑तस्व॒स्ति॒भि॒॒सदा॑नः ६ ॥ २८ ॥

यं त्रायध्वे द्वादश वसिष्ठो मरुतः । अन्त्याया रुद्रः । प्रथमा तृतीया पञ्चमी च बृहतः । द्वितीया चतुर्थी षष्ठी च सतोबृहतः । सप्तम्यष्टम्यौ त्रिष्टुभौ । ततस्तिस्रो गायत्र्यः । अन्त्यानुष्टुप् ।

५१ यंत्रायध्वइदमिदंदेवासोयंचनयथ । तस्माअग्नेवरुणामित्रार्यमन्मरुतः शर्मयच्छत १ युष्माकंदेवाअवसाहनिप्रियेजानस्तरतिद्विषः । प्रसक्षयंतिरते विमहीरिषोयोवोवरायदाशति २ नहिवश्चरमंचनवसिष्ठःपरिमंसते । अस्माकंमयमरुतःसुतेसचाविश्वेपिवतकामिनः ३ नहिवऊतिःपृतनासुमर्धतियस्माअरांध्वंनरः । अभिवआवर्त्सुमतिर्नवीयसीतूयंयातापिपीषवः ४ ओषुवृष्विराधसो यातनान्धांसिपीतये । इमावोहव्यामरुतोरेहिकंमोप्वृन्यत्रगन्तन ५ आचनोवहिःसदंताविताचनःस्पार्हाणिदातवेवसु । अस्रेधन्तोमरुतःसोम्येमधौस्वाहेह मादयाध्वै ६ ॥ २१ ॥ सस्वश्चिद्धितन्वृःशुम्भमानाआहंसासोनीलपृष्ठाअप-

सन्। विश्वंशर्धोंअभितोमानिषेदुनरोनरण्वाःसर्वनेमदन्तः ७ योनोमरुतोअभि दुर्हणायुस्तिरश्चित्तानिवसवोजिघांसति। द्रुहःपाशान्प्रतिसमुंचीष्टतार्पिष्ठेनहन्मनाहन्तनातम् ८ सान्तपनाइदंहविर्मरुतस्तज्जुजुष्टन। युष्माकोतीरिंशादसः ९ गृहमेधासआगंतमरुतोमापभूतन। युष्माकोतीसुदानवः १० इहेहवःस्वतवसः कवयःसूर्यत्वचः। यज्ञंमरुतआवृणे ११ त्र्यम्बकंयजामहेसुगन्धिंपुष्टिवर्धनम्। उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् १२ ॥३०॥ इति शाकलर्क्संहितायां पञ्चमाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

यदद्यमैत्रावरुणंतुवैसौर्याघोद्गांसन्नोत्सूर्यःपळाद्यास्तिस्रःसौर्यउद्वेतीतिचार्धपञ्चमादिविपञ्चप्रतिवांमित्रयोरेकोनागायत्रंदशम्यादयस्त्रयःप्रगाथाःपुरउष्णिक्चतुर्थ्याद्यादशादित्यास्तिस्रःसौर्यःप्रतिवांदशाश्विनंतुतदाशुभ्रानवसन्नाद्याविराजआवांरथोष्टावाविश्वयारासन्नायस्त्रयुःपळागोमतांपञ्चातारिष्मेमाउत्वांपदमागाथंव्युषांअष्टाउपस्यंतुत्वाउदुसन्नोपोरुरुचेपदप्रतिपञ्चव्युषाःप्रतितृचम् ॥

यदद्य द्वादश वसिष्ठो मित्रावरुणौ त्रिष्टुप्। आद्याया सूर्यः।

६० ३०म् यदद्यसूर्यब्रवोऽनागाउद्यन्मित्रायवरुणायसत्यम्। वयंदेवत्रादितेस्यामतवप्रियासोअर्यमन्गृणन्तः १ एषस्यमित्रावरुणानृचक्षाउभेउदेतिसूर्यो अभिज्मन्। विश्वंस्यस्थातुर्जगतश्चगोपाऋजुमर्तेयुवृजिनाचपश्यन् २ अयुक्त सप्तहरितःसधस्थाद्याईवहन्तिसूर्यंघृताचीः। धामानिमित्रावरुणायुवाकुःसंयो यूथेवजनिमानिचष्टे ३ उद्वांपृक्षासोमधुमन्तोअस्थुरासूर्योअरुहच्छुक्रमर्णः। यस्माआदित्याअध्वनोरदन्तिमित्रोअर्यमावरुणःसजोषाः ४ इमेचेतारोअनृतस्यभूरेर्मित्रोअर्यमावरुणोहिसन्ति। इमऋतस्यवावृधुर्दुरोणेशग्मासःपुत्राअदितेरदब्धाः ५ इमेमित्रोवरुणोदूळभासोऽचेतसंचिच्चितयन्तिदक्षैः। अपिक्रतुंसुचेतसंवतन्तास्तिरश्चिदंहःसुपथानयन्ति ६ ॥ १ ॥ इमेदिवोअनिमिषापृथिव्या-

श्रिंकित्वांसोअचेतसंनयन्ति । प्रवाजेचित्रयोगाधमस्तिपारंनोअस्यविंप्पितस्य
पर्षन् ७यद्वोपावदादितिःशमंभद्रंमित्रोयच्छन्तिवरुणःसुदासे । तस्मिन्नातोकंतन-
यंदधानामाकर्मदेवहेळनंतुरासः ८ अववेदिंहोत्राभिर्यजेतरिपुःकाश्चिद्वरुणध्रुतः
सः । परिद्वेषोभिरर्यमावृणक्तुरुसुदासेवृषणाउलोकम् ९ सस्वश्चिद्धिसमृतिस्त्वे-
ष्यैषामपिष्ण्यैनसहसासहन्ते । युष्मद्रियावृषणोरेजमानादक्षस्यचिन्महिनामृळ-
तांनः१० योब्रह्मणेसुमतिमायजातेवाजस्यसातौपरमस्यरायः । सीक्षन्तमन्युं
मघवानोअर्यउरुक्षयायचक्रिरेसुधातु ११ इयंदेवपुरोहितिर्युवभ्यांयज्ञेपुंमित्रावरु-
णावकारि । विश्वानिदुर्गापिपृतंतिरोनोयूयंपातस्वस्तिभिःसदानः १२ ॥ २ ॥

उद्वां सप्त वसिष्ठो मित्रावरुणौ त्रिष्टुप् ।

६१ उद्वांचक्षुर्वरुणसुप्रतीकंदेवयोरेतिसूर्यस्ततन्वान् । अभियोविश्वाभुवना-

निचेट्रेसमन्युंमर्त्येष्वाचिकेत १ प्रवांसमित्रावरुणावृतावाविप्रोमन्मानिदीर्घश्रु-
दियर्ति । यस्यब्रह्माणिसुक्रतूअवाथआयत्क्रत्वानशरदःपृणैथे २ प्रोरोमित्रावरु-
णापृथिव्याःप्रदिवक्रुष्वाहृहतःसुदानू । स्पशोदधाथेओषधीषुविक्ष्वृधग्यतोअनि-
मिषंरक्षमाणा ३ शंसामित्रस्यवरुणस्यधामशुष्मोरोदसीबृहधेमाहित्वा । अय-
न्मासाअयंज्वनामवीराःप्रयज्ञमन्मावृजनंतिराते ४ अमूराविश्वावृषणाविमा
वांनयासुचित्रंदृहशेनयक्षम् । द्रुहःसचन्तेअनृताजनानांनवांनिण्यान्यचितेअभू-
वन् ५ समुवांयज्ञंमहयंनमोभिर्हुवेवांमित्रावरुणासवार्धः । प्रवांमन्मान्यृचसेन-
वांनिकृतानित्रह्मजुजुपन्निमानि ६ इयंदेवपुरोहितिर्युवभ्यांयज्ञेषुमित्रावरुणावव-
कारि । विश्वानिदुर्गापिपृतंतिरोनोयूयंपातस्वस्तिभिःसदानः ७ ॥ ३ ॥

उत्सूर्यः पङ्क्तिश्छन्दसिष्टुप्। आद्यानां तिसृणां सूर्यः। शिष्टानां मित्रावरुणौ।

६२ उत्सूर्योवृहंदर्चीष्यश्रेत्पुरुविश्वाजनिंममानुषाणाम्। समोदिवादंदृशेरोचंमानःक्रत्वाकृतःसुकृंतःकर्तृभिर्भूत् १ ससूर्यप्रतिपुरोनउद्गाएभिःस्तोमेभिरेतशेभिरर्वैः। प्रनोमित्रायवरुणायवोचोऽनागसोअर्यम्णेअग्नयेच २ विनःसहस्रंशुरुधोरदन्वृतावानोवरुणोमित्रोअग्निः। यच्छंन्तुचन्द्राउपमंनोअर्कमानःकामंपूपुरन्तुस्तवानाः ३ द्यावाभूमीअदितेत्रासीथांनोयेवांजज्ञुःसुजनिमानऋष्वे। माहेळेभूमवरुणस्यवायोर्मामित्रस्यप्रियतमस्यनृणाम् ४ प्रवाहवांसिसृतंजीवसेनुआनोगव्यूतिमुक्षतंघृतेनं। आनोजनेश्रवयतंयुवानाश्रुतंमेमित्रावरुणाहवेमा ५ नूमित्रोवरुणोअर्यमानस्तमनेतोकायुवरिवोदधन्तु। सुगानोविश्वासुपथानिसन्तुयूयंपातस्वस्तिभिःसदानः ६ ॥ ४ ॥

उद्वेति पञ्चसिष्टुः सूर्यस्त्रिष्टुप्। पञ्चम्या द्वितीयार्धस्य पङ्क्त्याश्च मित्रावरुणौ।

६३ उद्वेतिसुभगोविश्वचक्षाःसाधारणःसूर्योमानुषाणाम् । चक्षुर्मित्रस्यवरुणस्यदेवश्चर्मेववयःसमविव्युक्तमांसि १ उद्वेतिप्रसवीताजनानांमहान्केतुरर्णवःसूर्यस्य । समानंचक्रंपर्यावृत्सन्यदेतशोवहंतिधूर्षुयुक्तः २ विभ्राजमानउपसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः। एषमेदेवःसविताचच्छन्दयःसमानंनप्रमिनातिधाम ३ दिवोरुक्मउरुचक्षाउदेतिदूरेअर्थस्तरणिर्भ्राजमानः। ननंजनाःसूर्येणप्रसूताअयन्नर्थानिकृणवन्नपांसि ४ यत्राचक्रुरमृतांगातुमस्मैश्येनोनदीयन्नन्वेतिपाथः। प्रतिवांसूरउदितेविधेमनमोभिर्मित्रावरुणोतहव्यैः ५ नूमित्रोवरुणोअर्यमानस्त्मनेतोकायुवारिवोदधन्तु । सुगानोविश्वासुपथानिसन्तुयूयंपातस्वस्तिभिःसदानः ६ ॥ ५ ॥

दिवि पञ्च वसिष्ठो मित्रावरुणौ त्रिष्टुप् ।

६ दिविक्षयन्तारजसःपृथिव्यांप्रवांघृतस्यनिर्णिजोददीरन् । हव्यंनोमित्रो अर्यमासुजातोराजासुक्षत्रोवरुणोजुषन्त १ आराजानामहऋतस्यगोपासिन्धुप-तीक्षत्रियायातमर्वाक् । इळांनोमित्रावरुणोतवृष्टिमवंदिवइन्वतंजीरदानू २मित्र-स्तन्नोवरुणोदेवोअर्यःप्रसाधिष्ठेभिःपथिभिर्नयन्तु । व्रवद्यथान्नआदरिःसुदासंइषा मंदेमसहदेवगोपाः ३ योवांगर्तंमनसातक्षदेतमूर्ध्वांधीतिंकृणवद्धारयच्च । उक्षे-थांमित्रावरुणाघृतेनतारांजानासुक्षितीस्तर्पयेथाम् ४ एषःस्तोमोवरुणमित्रतु-भ्यंसोमःशुक्रोनवायवेऽयामि । अविष्टंधियोजिगृतंपुरन्धीर्यूयंपातस्वस्तिभिः सदानः ५ ॥ ६ ॥

प्रति वां पञ्च वसिष्ठो मित्रावरुणौ त्रिष्टुप् ।

६५ प्रतिवांसूरउदितेसूक्तैर्मित्रंहुवेवरुणंपूतदक्षम् । ययोरसुर्यं१ माक्षितंज्ये-ष्ठंविश्वस्ययामन्नाचितांजिगत्नु १ ताहिदेवानामसुरातावर्यातानःक्षितीःकरत-मूर्जयन्तीः । अश्यामंमित्रावरुणावयंवांद्यावोचयन्नपीपयन्नहांच २ ताभू-रिपाशावनृतस्यसेतूदुरत्येतूरिपवेमर्त्यायं । ऋतस्यमित्रावरुणापथावांमपोन नावादुरितातरेम ३ आनोमित्रावरुणाहव्यजुष्टिंघृतैर्गव्यूतिमुक्षतामिळाभिः । प्रतिवामत्रवरमाजनायपृणीतमुद्नोदिव्यस्यचारोः ४ एपःस्तोमोवरुणमित्रतुभ्यं सोमःशुक्रोनवायवेऽयामि । अविष्टंधियोजिगृतंपुरन्धीर्यूयंपातस्वस्तिभिःसदा नः ५ ॥ ७ ॥

प्र मित्रयोरेकोनविंशतिर्वासिष्ठः । आद्यानामन्त्यानां च तिसृणां मित्रावरुणौ । चतुर्दश्यादीनां तिसृणां सूर्यः । शिष्टानामादित्याः । दशमीद्वादशीचतुर्दश्यो बृहत्यः । एकादशीत्रयोदशीपञ्चदश्यः सतोबृहत्यः । षोडशी पुरउष्णिक् । शिष्टा गायत्र्यः ।

६६ प्रमित्रयोर्वरुणयोःस्तोमोनएतुशूष्यः । नमस्वान्तुविजातयोः ३ या धारयन्तदेवाःसुदक्षादक्षपितरा । असुर्याय्यप्रमंहसा २ तानःस्तिपातनूपावरुण जरित्रणाम् । मित्रंसाधयतंधियः ३ यद्द्यसूरउदितेऽनागामित्रोअर्यमा । सुवातिसविताभगः ४ सुप्रावीरस्तुसक्षयःप्रनुयामन्त्सुदानवः । येनोअंहोऽतिपिप्रति ५ ॥ ८ ॥ उतस्वराजोअदितिरदब्धस्यव्रतस्यये । महोराजानईशते ६ प्रतिवांसूरउदितेमित्रंगृणीषेवरुणम् । अर्यमणंरिशादसम् ७ रायाहिरण्ययामतिरियमवृकायशवसे । इयंविप्रामेधसातये ८ तेस्यामदेववरुणतेमित्रसूरिभिः

महं । इषंस्वश्चधीमहि १ बृहवःसूरचक्षसोऽग्निजिह्वाऋतावृधः । त्रीणियेयेमु-
र्विदथानिधीतिभिर्विश्वानिपरिभूतिभिः १० ॥ १ ॥ वियेदधुःशरदंमासमादहं-
र्यज्ञमकुंचाद्दचंम् । अनाप्यंवरुणोमित्रोअर्यमाक्षत्रंराजानआशत ११ तद्वोअ-
द्यमंनामहेसूक्तैःसूरउदिते । यदोहतेवरुणोमित्रोअर्यमायूयंमृतस्यरथ्यः १२
ऋतावानऋतजातार्तावृधोघोरासोअनृतद्विषः । तेषांवःसुम्नपुच्छर्दिष्टमेनरः
स्यामयेचंसूरयः १३ उदुत्यद्दर्शतंवपुर्दिवएतिप्रातिद्वरे । यदीमाशुर्वहंतिदेवएत-
शोविश्वस्मैचक्षसेअरंम् १४ शीर्ष्णःशीर्ष्णोजगंतस्तस्थुषस्पतिंसमयाविश्वमा
रजंः । सप्तस्वसारःसुविताय्सूर्यंवहंन्तिहरितोरथे १५ ॥१० ॥ तच्चक्षुर्देवहितंशु-
क्रमुच्चरत् । पश्येमशरदंःशतंजीवेमशरदंःशतम् १६ काव्यैभिरदाभ्यायातंव-
रुणयुमत् । मित्रश्चसोमंपीतये १७ दिवोधामंभिर्वरुणमित्रश्चायातमद्रुहा ।

पिबतंसोमंमातुजी १८ आयातंमित्रावरुणाजुषाणावाहुतिंनरा । पातंसो-
मंमृतावृधा १९ ॥ ११ ॥

प्रति वां दश वसिष्ठोश्विनौ त्रिष्टुप् ।

६७ प्रतिवांरथंनृपतीजरध्यैहविष्मंतामनंसायज्ञियेन । योवांदूतोनधिष्ण्या-
वजीगरच्छांसूनुर्नपितरांविवक्मि १ अशोंच्यग्निःसंमिधानोअस्मेउपोंअदृश्र-
न्तमंसश्चिदन्ताः । अचैतिकेतुरुषसःपुरस्ताच्छ्रियेदिवोदुहितुर्जायमानः २ अभि
वांनूनमंश्विनासुहोतास्तोमैःसिपक्तिनासत्याविवक्वान् । पूर्वीभिर्यातंपथ्याभि-
रर्वाक्स्वविंदावसुमतारथेन ३ अवोवींनूनमंश्विनायुवाकुहुवेयद्वांसुतेमांध्वीव-
सूयुः । आवांवहन्तुस्थविरासोअश्वाःपिबाथोअस्मेसुषुतामधूनि ४ प्राचींमुदे-
वाश्विनाधियंमेऽमृध्रांसातयेकृतंवसूयुम् । विश्वाअविष्टंवाजआपुरंधिस्तानंःश-

क्तंशचीपतीशचींभिः ५ ॥ १२ ॥ अविष्टंधीष्वश्विनाऽआसुप्रजावद्रेतोऽहंयं नोऽस्तु । आवांतोकेतनंयेतूतुजानाःसुरत्नासोदेववीतिंगमेम ६ एषस्यवांपूर्व्य-गत्वेवसख्येनिधिर्हितोमाध्वीरातोऽस्मे । अहेळतामनसायातमर्वागभन्तांहव्यं मानुषीषुविक्षु ७ एकस्मिन्योगेभुरणासमानेपरिवांसप्तस्रवतोरथोगात् । नवा-यन्तिसुभ्योदेवयुक्तायेवांधुर्पुतरणंयोवहन्ति ८ असश्चतांमघवद्भ्योहिभूतंयेराया मंघदेयंजुनन्ति । प्रयेवन्धुंसूनृताभिस्तिरन्तेगव्यांपश्चन्तोऽश्व्यांमघानि ९ नूमे हवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत् । धत्तंरत्नानिजरंतंचसूरीन्यूयं पांतस्वस्तिभिःसदानः १० ॥ १३ ॥

आ शुभ्रा नव वसिष्ठोश्विनौ विराट् । अन्त्ये त्रिष्टुभौ ।

६८ आशुंभ्रायातमश्विनास्वश्वागिरोदस्राजुजुषाणायुवाकोः । हव्यानिच

प्रतिभृतावीतंनः १ प्रवामन्धांसिमदायान्यस्थुररंगन्तंहविषावीतयेमे । तिरोअ-
र्योहवनानिश्रुतंनः २ प्रवांरथोमनोजवाइयर्तितिरोरजांस्यश्विनाशतोतिः ।
अस्मभ्यंसूर्यावसूइयानः ३ अयंहयद्वांदेवयाउअद्रिरूर्ध्वोविवक्तिसोमसुयुव-
भ्यांम् । आवत्गविप्रोवृतीतहव्यैः ४ चित्रंहयद्वांभोजनंन्वस्तिन्यत्रयेमहि-
प्वन्तंयुयोतम् । योवांमोमानंदधतेप्रियःसन् ५ ॥ १४ ॥ उतत्यद्वांजुरतेअ-
श्विनाभूद्यवानायप्रतीत्यंहविर्दे । अधियद्वांपैङ्गतऊतिधत्थः ६ उतत्यंभुज्युम
श्विनासखायोमध्येजहुर्दुरेवासःसमुद्रे । निरींपर्वदरावायोयुवाकुः ७ वृकाय
चिज्जसंमानायशक्तमुतश्रुतंशयवेहूयमाना । यावद्यामपिन्वतमपोनस्तयोंचि-
च्छक्त्यश्विनाशचीभिः ८ एवस्यकारुंजरतेसूक्तैरग्रेवुधानउषसांसुमन्मा । इषा
तंवर्धदध्यापयोभिर्यंयंपातस्वस्तिभिःसदानः ९ ॥ १५ ॥

आ वां रथः पङ्क्तिसिष्ठोश्विनौ त्रिष्टुप्।

६१ आवांरथोरोदसीवह्वधानोहिरण्ययोवृषभिर्युत्वभ्वैः । घृतवर्तनिःपविभीरुचानइषांवोळ्हानृपतिर्वाजिनीवान् १ सप्रप्रथानोअभिपञ्चभूमात्रिवन्धुरो मनसायातुयुक्तः । विशोयेनगच्छथोदेवयन्तीःकुत्राचिद्यामंमश्विनादधाना २ स्वश्वायशसायातमर्वाग्दस्रानिधिंमधुमन्तंपिबाथः । विवांरथोवध्वा३यादंमानोऽन्तान्दिवोवाघतेवर्तनिभ्याम् ३ युवोःश्रियंपरियोपावृणीतसूरोदुहितापरितक्म्यायाम् । यदैवयन्तमवथुःशचीभिःपरिघ्रंसमोमनावांवयोगात् ४ योह स्यवांरथिरावस्तउस्रारथोयुजानःपरियातिवर्तिः । तेननःशंयोरुषसोव्युष्टौन्यश्विनावहतंयज्ञेअस्मिन् ५ नरागौरेववित्युतंतृपाणास्माकंमध्यसवनोपयातम् । पुरुत्राहिवांमतिभिर्हवन्तेमावामुन्येनियमन्देवयन्तः ६ युवंभुज्युमवविद्धंसमुद्र

उदूहथुरर्णसोऽस्रिधानैः। पतत्त्रिभिरश्वमैरव्यथिभिर्दंसनाभिरश्विनापारयन्ता ७ नूमेहवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत्। धत्तंरत्नानिजरतंचसूरिन्यूयंपातस्वस्तिभिःसदानः ८ ॥ १६ ॥

आ विश्ववारा सप्त वासिष्ठोश्विनौ त्रिष्टुप्।

७० आविश्ववाराश्विनागतंनःप्रतत्स्थानंमवाचिवांपृथिव्याम्। अश्वोनवाजीशुनपृष्ठोअस्थादायत्सेदथुर्ध्रुवसेनयोनिम् १ सिषक्तिसावांसुमतिश्चनिष्ठातांपिघर्मोमनुषोदुरोणे। योवांसमुद्रान्त्सरितःपिपर्त्यैतंग्वाचिन्नसुयुजांयुजानः २ यानिस्थानान्यश्विनादधाथेदिवोयद्वीष्वोषधीषुविक्षु। निपर्वतस्यमूर्धनिसदन्तेषंजनायदाशुषेवहन्ता ३ चनिष्टंदेवाओषधीष्वप्सुयद्योग्याअभवंथेऋषीणाम्। पुरूणिरत्नादधतौन्यस्मेअनुपूर्वाणिचक्रथुर्युगानि ४ शुश्रुवांसांचिदश्विनापु-

रूण्यभिब्रह्माणिचक्षाथेऋषीणाम् । प्रतिप्रयातंवरमाजनायास्मेवांमस्तुसुमतिश्चनिष्ठा ५ योवांयज्ञोनासत्याहविष्मान्कृतब्रह्मासमर्योऽभवाप्ति । उपप्रयातं वरमावसिष्ठमिमाब्रह्माण्यृच्यन्तेयुवभ्याम् ६ इयंमनीषाइयमश्विनागीरिमांसुवृक्तिंवृषणाजुषेथाम् । इमाब्रह्माणियुवयून्यग्मन्यूयंपातस्वस्तिभिःसदानः ७ ॥ १७ ॥ इति शाकलर्क्संहितायां सप्तमे मण्डले चतुर्थोनुवाकः ॥ ४ ॥

अप स्वमुः पङ्क्तिसप्ताश्विनौ त्रिष्टुप् ।

७१ अपस्वसुरुषसोनग्निजहीतेरिणक्तिकृष्णीरुषायपन्थाम् । अश्वांमघागोमंघावांहुवेमदिवानक्तंशरुमस्मद्युयोतम् १ उपायातंदाशुषेमर्त्यायरथेनवाममश्विनाबृहन्ता । युयुतमस्मदनिराममीवांदिवानक्तंमाध्वीत्रासीथांनः २ आवांरथंमवमस्यांन्युष्टौसुघायवोवृषणोवर्तयन्तु । स्यूमगभस्तिमृतयुग्भिरश्वैराश्विनाव-

सुमन्तंवहेथाम् ३ योवारथोनृपतीअस्तिवोह्वात्रिबन्धुरोवसुमाँउस्रयामा। आनं
एनानासत्योपयातमभियद्वांविश्वप्स्न्योजिगाति ४ युवंच्यवानंजरसोऽमुमुक्तं
निपेदवंऊहथुराशुमश्वंम् । निरंहसस्तमंसःस्पर्तमत्रिंनिजाहुपांशिथिरधातमन्तः
५ इयंमनीषाइयमश्विनागीरिमांसुवृक्तिंवृषणाजुषेथाम् । इमाब्रह्माणियुवयून्य
ग्मन्यूयंपातस्वस्तिभिःसदानः ६ ॥ १८ ॥

आ गोमता पञ्च वासिष्ठोश्विनौ त्रिष्टुप् ।

७२ आगोमंतानासत्यारथेनाश्वांवतापुरुश्चन्द्रेणंयातम् । अभिवांविश्वांनियु-
तंःसचन्तेस्पार्हयांश्रियातन्वांशुभाना १ आनोंदेवेभिरुपंयातमर्वाक्सजोंषसाना-
सत्यारथेंन । युवोर्हिनंःसख्यापित्र्यांणिसमानोबन्धुरुततस्यंवित्तम् २ उदुस्तो-
मांसोअश्विनोरवुध्रजामिब्रह्माण्युपसश्चदेवीः । आविवांसन्नोदसीधिष्ण्येमेअच्छा

विप्रोनासत्याविवक्ति ३: विचेदुच्छन्त्यश्विनाउषासःप्रवाब्रह्माणिकारवोभरन्ते ।
ऊर्ध्वंभानुंसविताद्देवोअश्रेद्बृहद्दयंःसमिधाजरन्ते ४ आपश्चातांत्रासत्यापुरस्ता-
दाश्विनायातमधरादुदक्तात् । आविश्वतुःपाञ्चजन्येनरायायूयंपातस्वस्तिभिः
सदानः ५ ॥ ११ ॥

अतारिष्म पञ्च वसिष्ठोऽश्विनौ त्रिष्टुप् ।

७३ अतारिष्मतमसस्पारमस्यप्रतिस्तोमंदेवयन्तोदधानाःपुरुदंसापुरुतमा
पुराजामर्त्याहवतेअश्विनागीः १ न्युप्रियोमनुषःसादिहोतानासत्यायोयजतेवन्द-
तेच । अभूतंमध्वोअश्विनाउषाकआवांवोचेविदथेषुप्रयस्वान् २ अहेमयज्ञंप-
थामुराणाइमांसुवृक्तिंवृषणाजुषेथाम् । श्रुष्टीवेवप्रेषितोवामवोधिप्रतिस्तोमैर्ज-
रमाणोवसिष्ठः ३ उपत्यावह्नीगमतोविशंनोरक्षोहणासंभृतावीळुपाणी । सम-

न्धांस्यग्मतमत्सराणिमानोमर्धिष्टमागंतंशिवेन ४ आपश्चातान्नासत्यापुरस्ता-
दाश्विनायातमधरादुदक्तात् । आविश्वतःपार्श्वजन्येनरायायूयंपातस्वस्तिभिः
सदानः ५ ॥ २० ॥

इमा उवां पञ्चसिष्टोश्विनौ । प्रथमा तृतीया पञ्चमी च
बृहत्यः । शिष्टाः सतोबृहत्यः ।

७४ इमाउवांदिविष्टयउस्राहवन्तेअश्विना । अयंवांमह्वेऽवसेशचीवसूविशं-
विशंहिगच्छथः १ युवंचित्रंदंदथुर्भोजनंनराचोदेथांसूनृतावते । अर्वाग्रथंसम-
नसानियच्छतंपिबतंसोम्यंमधु २ आयातमुपभूषतंमध्वःपिबतमश्विना । दुग्धं
पयोवृषणाजेन्यावसूमानोमर्धिष्टमागंतम् ३ अश्वासोयेवामुपदाशुषोगृहंयुवां
दीयन्तिबिभ्रतः । मक्षूयुभिर्नराहयेभिरश्विनादेवायातमस्मयू ४ अधाह्वयन्तो

अश्विनापृक्षःसचन्तसूरयः । तायंसतोमघवद्भ्योधुवंयशश्छर्दिरस्मभ्यंनासत्या ५ प्रयेययुरंवृकासोरथाइवनृपातारोजनानाम् । उतस्वेनशवंसाशूशुवुर्नरउताक्षेयन्तिसुक्षितिम् ६ ॥ २१ ॥

व्युषा अष्टौ वसिष्ठ उषास्त्रिष्टुप् ।

७५ व्युं१षाआवोदिविजाऋतेनाविष्कृण्वानामहिमानमागात् । अपद्वह्रस्तमआवरजुष्टमङ्गिरस्तमापथ्यांअजीगः १ महेनोअद्यसुविताययोध्युषोमहेसौभगायप्रयन्धि । चित्ररायिंयशसंधेह्यस्मेदेविमर्तंयुमानुषिश्रवस्युम् २ एतेत्येभानवोदर्शतायाश्चित्राउषसोअमृतासआगुः । जनयन्तोदैव्यानिव्रतान्यापृणन्तोअन्तरिक्षाव्यस्थुः ३ एषास्यायुंजानापराकात्पञ्चक्षितीःपरिसद्योजिगाति । अभिपश्यन्तीवयुनाजनानांदिवोदुहितासुवनस्यपत्नी ४ वाजिनीवतीसूर्यस्य

योषाचित्रामघारायइंशेवसूनाम् । ऋविंघृताजरयंन्तीमघोन्युषाउच्छातिवह्नि-
भिर्गृणाना ५ प्रतिद्युतानामरुषासोअश्वाश्चित्राअद्दृश्रन्नुषसंवहन्तः । यातिशुभ्रा
विश्वपिशारथेनदधातिरत्नंविधतेजनाय ६ सत्यासत्येभिर्महतीमहद्भिर्देवीदेवेभि-
र्यजतायजत्रैः । रुजद्वृळ्हानिददद्गुस्रियाणांप्रतिगावउषसंवावशन्त ७ नूनोगोम-
द्वीरवद्वेहिरत्नमुषोअश्वावत्पुरुभोजोअस्मे । मानोवहिःपुरुपतांनिदेकर्यूयंपात
स्वस्तिभिःसदानः ८ ॥ २२ ॥

उदु मह्न वसिष्ठ उषास्त्रिष्टुप् ।

७६ उदुज्योतिरमृतंविश्वजन्यंविश्वानरःसवितादेवोअश्रेत् । ऋत्वादेवाना-
मजनिष्टचक्षुराविरकर्भुवनंविश्वमुषाः १ प्रमेपन्थादेवयानाअदृश्रन्नमर्धन्तोवसु-
भिरिष्कृतासः । अभूदुकेतुरुषसःपुरस्तात्प्रतीच्यागादधिहर्म्येभ्यः २ तानीदहा-

निवहुलान्यासन्याप्राचीनमुदितासूर्यस्य । यतःपरिजारइवाचरन्त्युषोदद्रक्षेनपुनर्यतीव ३ तइद्देवानांसधमादआसन्नृतावानःकवयःपूर्व्यासः । गूळ्हंज्योतिःपितरोअन्वविन्दन्त्सत्यमन्त्राअजनयन्नुषासम् ४ समानऊर्वेअधिसंगतासःसंजानतेनयंतन्तेमिथस्ते । तेदेवानांनमिनन्तिव्रतान्यमर्धन्तोवसुभिर्यादमानाः ५ प्रतित्वास्तोमैरीळतेवसिष्ठाउषर्बुधःसुभगेतुष्टुवांसः । गवांनेत्रीवाजपत्नीनउच्छोषंःसुजातेप्रथमाजरस्व ६ एषानेत्रीराधसःसूनृतानामुषाउच्छन्तीरिभ्यतेवसिष्ठैः । दीर्घश्रुतंरयिमस्मेदधानायूयंपातस्वस्तिभिःसदानः ७ ॥ २३ ॥

उषो रुरुचे पञ्चवसिष्ठ उषास्त्रिष्टुप् ।

७७ उषोरुरुचेयुवतिर्नयोषाविश्वंजीवंप्रसुवन्तीचरायै । अभूदग्निःसमिधेमानुषाणामकर्ज्योतिर्बाधमानातमांसि १ विश्वंप्रतीचीसुप्रथाउदस्थाद्रुशद्वासोवि-

भ्रंतीशुक्रमश्वैत् । हिरण्यवर्णासुदृशीकसंदृग्गवांमातानेत्र्यह्नामरोचि २ देवानांचक्षुःसुभगावहन्तीःश्वेतंनयन्तीसुदृशीकुमश्वंम् । उपाअदर्शिरश्मिभिर्व्यक्ता चित्रामघाविश्वमनुप्रभूता ३ अन्तिवामादूरेअमित्रंमुच्छोर्वींगव्यूतिमभयंकृधीनः । यावयद्वेषआभरावसूनिचोदयराधोगृणतेमघोनि ४ अस्मेश्रेष्ठाभिर्भानुभिर्विभाह्युषोदेविप्रतिरन्तीनआयुः । इषंचनोदधतीविश्ववारेगोमदश्वावद्रथवच्चराधः ५ यांत्वादिवोदुहितर्वर्धयन्त्युषःसुजातेमतिभिर्वसिष्ठाः । सास्मासुधारयिमुष्वंबृहन्तंयूयंपातस्वस्तिभिःसदानः ६ ॥ २४ ॥

प्रति पञ्च वसिष्ठ उषास्त्रिष्टुप् ।

७८ प्रतिकेतवःप्रथमाअदृश्रन्नूर्ध्वाअस्याअजयोविश्वयन्ते । उषोअर्वाचावृहतारथेनज्योतिष्मतावाममस्मभ्यंवक्षि १ प्रतिषोमग्निर्जरतेसमिद्धःप्रतिविप्रा

सोमतिभिर्गृणन्तः । उपायातिज्योतिषावाधमानाविश्वातमांसिदुरितापदेवी २ एताउत्याःप्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसोविभातीः । अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनंतमोअगादजुष्टम् ३ अचैतिदिवोदुहितामघोनीविश्वेपश्यन्त्युषसंविभातीम् । आस्थाद्रथंस्वधयायुज्यमानमायमश्वासःसुयुजोवहन्ति ४ प्रतित्वाद्यसुमनसोबुधन्तास्माकासोमघवानोवयंच । तिल्विलायध्वमुषसोविभातीर्यूयंपातस्वस्तिभिःसदानः ५ ॥ २५ ॥

व्युषः पञ्च वसिष्ठ उषोबृहती । मध्यमः स्वरः ।

७१ व्यु१षाआव:पथ्या२ जनानांपञ्चक्षितीर्मानुषीर्बोधयन्ती । सुसंदृग्भिरुक्षभिर्भानुमश्रेद्विसूर्योरोदसीचक्षसावः १ व्यञ्जतेदिवोअन्तेष्वक्तून्विशोनयुक्ताउषसोयतन्ते । संतेगावस्तमआवर्तयन्तिज्योतिर्यच्छन्तिसवितेवबाहू २ अभूदुषा

इन्द्रतमामघोन्यजीजनत्सुवितायश्रवांसि। विदिवोदेवीदुहितादधात्यङ्गिरस्तमा सुकृतेवसूनि ३ तावदुपोराधोअस्मभ्यंरास्वयावत्स्तोतृभ्योअरदोगृणाना । यांत्वाजजुर्वृषभस्यारवेणविदूळ्हस्यदुरोअद्रेरौर्णोः ४ देवंदेवंराधसेचोदयन्त्यस्मद्र्यक्सूनृताईरयन्ती । व्युच्छन्तीनःसनयेधियोधायूयंपातस्वस्तिभिःसदा नः ५ ॥ २६ ॥

प्रति तृचं वसिष्ठ उषास्त्रिष्टुप् ।

८० प्रतिस्तोमेभिरुपसंवसिष्ठागीर्भिर्विप्रासःप्रथमाअबुध्रन् । विवर्तयन्तीरजसीसमन्तेआविष्कृण्वतीभुवनानिविश्वा १ एषास्यानव्यमायुर्दधानागूढ्वीतमोज्योतिरोपाअबोधि । अग्रेएतियुवतिरह्नयाणाप्राचिकित्सूर्यंयज्ञमग्निम् २ अश्वावतीर्गोमतीर्नउषासोवीरवतीःसदमुच्छन्तुभद्राः। घृतंदुहानाविश्वतःप्रपीता

त्स्महि । यावहंसिपुरस्पाहंवनन्वतिरत्नंनदाशुषेमयंः ३ उच्छन्तीयाकृणोपिं मंहनांमहिप्रख्यैदेविस्वर्दृशे । तस्यास्तेरत्नभाजंईमहेवयंस्यामंमातुर्नसूनवंः ४ ताञ्चित्रंराधआभरोपोयद्दीर्घश्रुत्तमम् । यत्तेंदिवोदुहितर्मर्तभोजनंतद्रास्वभुनजामहै ५ श्रवंःसूरिभ्योअमृतंवसुत्वनंवाजाँअस्मभ्यंगोमंतः । चोदयित्रीमघोनंः सूनृतावत्युषाउच्छदपस्त्रिधंः ६ ॥ १ ॥

इन्द्रावरुणा दश वसिष्ठ इन्द्रावरुणौ जगती ।

८२ इन्द्रावरुणायुवमध्वरायनोविशेजनायमहिशर्मयच्छतम् । दीर्घप्रयज्युमतियोवनुष्यतिंवयंजयेमपृतनासुदूढ्यंः १ सम्राळन्यःस्वराळन्यउच्यतेवां महान्तावेन्द्रावरुणामहावसू । विश्वेदेवासःपरमेव्योमनिसंवामोजोवृषणासंवलंदधुः २ अन्वपांखान्यतृन्तमोजसासूर्यंमैरयतंदिविप्रभुम् । इन्द्रावरुणामदे

यूयंपातस्वस्तिभिःसदानः ३ ॥ २७ ॥ इति शाकलर्क्संहितायां पञ्चमाष्टके पञ्चमोऽध्यायः ॥ ५ ॥

मत्युपदमागायमिन्द्रावरुणादशैन्द्रावरुणंहजागतंतुयुवांनरावांपञ्चपुनीपोधीराष्टौवारुणंहरदत्सप्तमशुन्ध्युवमन्त्यापाशाविमोचनीमोपुपञ्चगायत्रंजगत्यन्तंमवीरयासप्तवायव्यंद्वैन्द्र्यश्चयादिवदुक्ताकुविदङ्गावायोपञ्चशुचिन्वष्टावैन्द्राग्नींत्वंयवांद्वादशगायत्रमन्त्यानुष्टुप्सप्तोदसापदसारस्वतंतुतृतीयासरस्वतेबृहदुमगायःप्रस्तारपङ्क्तिःपरास्तिस्रोगायत्र्यःसरस्वतेयज्ञेदशैन्द्र्यादिवार्हस्पत्यमन्त्यैन्द्रीचतृतीयानवम्यावैन्द्राग्नाह्मणस्पत्येअध्वर्यवःसप्तोक्तदेवतान्त्यापरोवैष्णवंतूरुमित्यैन्द्र्यश्चतिस्रोनूमर्तः ।

मत्यु पङ्क्तिसिष्ठ उषाः । मथमा तृतीया पञ्चमी च बृहतः । शिष्टाः सतो बृहतः ।

८१ ओम् प्रत्युअदर्श्यायत्युच्छन्तीदुहितादिवः । अपोमहिव्ययतिचक्षसेतमोज्योतिष्कृणोतिसूनरी १ उदुस्रियाःसृजतेसूर्यःसचाँउद्यन्नक्षत्रमर्चिवत् । तवेदुषोव्युषिसूर्यस्यचसंभक्तेनगमेमहि २ प्रतित्वादुहितर्दिवउषोजीराअबुध-

त्स्महि । यावहंसिपुरस्पाहंवनन्वतिरत्नंनदाशुषेमयः ३ उच्छन्तीयाकृणोपिं मंहनांमहिप्रख्यैदेविस्वर्दृशे । तस्यास्तेरत्नभाजंईमहेवयंस्यामंमातुर्नसूनवः ४ तञ्चित्रंराधआभरोपोयद्दीर्घश्रुत्तमम् । यत्तेदिवोदुहितर्मर्तभोजनंतद्रास्वभूनजा-महै ५ श्रवंःसूरिभ्योअमृतंवसुत्वनंवाजाँअस्मभ्यंगोमतः । चोदयित्रीमघोनः सूनृतावत्युषाउच्छदप्रस्त्रिधः ६ ॥ १ ॥

इन्द्रावरुणा दश वसिष्ठ इन्द्रावरुणौ जगती ।

८२ इन्द्रावरुणायुवमध्वरायनोविशेजनायुमहिशर्मयच्छतम् । दीर्घप्रय-ज्युमतियोवनुष्यतिवयंजयेमपृतनासुदूढ्यः १ सम्राळन्यःस्वराळन्यउच्यतेवां महान्ताविन्द्रावरुणामहावसू । विश्वेदेवासःपरमेव्योमनिसंवामोजोवृषणासं-वलेदधुः २ अन्वपांखान्यतृन्तमोजसासूर्यमैरयतंदिविप्रभुम् । इन्द्रावरुणामदे

अस्यमायिनोऽपिन्वतमपितःपिन्वतंधियः ३ युवामित्युत्सुपूतंनासुवृक्तंयोयुवां
क्षेमंस्यप्रसवेमितज्ञवः । ईशानावस्त्रउभयस्यकारवइन्द्रावरुणासुहवाहवाम-
हे ४ इन्द्रावरुणायदिमानिचक्रथुर्विश्वाजातानिभुवनस्यमज्मना । क्षेमेणामि-
त्रोवरुणंदुवस्यतिमरुद्भिरुग्रःशुभंमन्यईयते ५ ॥ २ ॥ महेशुल्कायवरुणस्य
नुत्विषओजोमिमातेध्रुवमस्ययत्स्वम् । अजामिमन्यःभयर्यन्तुमातिरद्भ्रेभि-
रन्यःप्रवृणोतिभूयसः ६ नतमंहोनदुरितानिमर्त्यमिन्द्रावरुणानतपःकुतश्चन ।
यस्यदेवागच्छथोवीथोअध्वरंनतंमर्तंस्यनशतेपरिह्वृतिः ७ अर्वाङ्राद्ध्यनावसा
गतंशृणुतंहवंयदिमेजुजोषथः । युवोर्हिसख्यमुतवायदाप्यंमार्डीकमिन्द्रावरुणा
नियच्छतम् ८ अस्माकमिन्द्रावरुणाभरेभरेपुरोयोधाभवतंकृष्टयोजसा । यहा
हवन्तउभयेअधस्पृधिनरस्तोकस्यतनयस्यसातिषु ९ अस्मेइन्द्रोवरुणोमित्रो

अर्यमायुम्नंयच्छन्तुमहिशर्मसप्रथः । अवघंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकं सवितुर्मनामहे १० ॥ ३ ॥

युवां नरा दश वसिष्ठ इन्द्रावरुणौ जगती ।

८३ युवांनरापश्यमानासआप्यंप्राचागव्यन्तःपृथुपशोयय्युः । दासांचवृत्रा हतमार्याणिचसुदासमिन्द्रावरुणावसावतम् १ यत्रानरःसमयन्तेकृतध्वजोयस्मिन्नाजाभवतिकिंचनप्रियम् । यत्राभयन्तेभुवनास्वर्दृशस्तत्रानइन्द्रावरुणाधिवोचतम् २ संभूम्याअन्तार्ध्वासिराअदृक्षतेन्द्रावरुणादिविघोषआरुहत् । अस्युर्जनानामुपमामरातयोऽर्वागवसाहवनश्रुतागतम् ३ इन्द्रावरुणावृधनाभिरूतिभेदंवन्वन्ताप्रसुदासमावतम् । ब्रह्माण्येषांशृणुतंहवीमनिसत्यातृत्सूनामभवत्पुरोहितिः ४ इन्द्रावरुणावभ्यातपन्तिमाघान्यर्योवनुषामरातयः । युवंहिवस्वउ-

भयंस्यराजथोऽधस्मानोऽवतंपायैंदिवि ५ ॥ ४ ॥ युवांहवन्तउभयासआजि-
ष्विन्द्रंचवस्वोवरुणंचसातयें । यत्रराजभिर्दशभिर्निबाधितंप्रसुदासमावतंतृत्सुं-
भिःसह ६ दशराजानःसमिताअयज्यवःसुदासमिन्द्रावरुणानयुयुधुः । सत्या
नृणामंह्मसदामुपस्तुतिर्दैवाएषामभवन्देवहूतिषु ७ दाशराज्ञेपरियत्तायविश्वतः
सुदासंइन्द्रावरुणावशिक्षतम् । त्यंश्वोयत्रनमंसाकपर्दिनोधियाधीवंतोअसं-
पन्ततृत्सवः ८ वृत्राण्यन्यःसमिथेषुजिघ्नतेव्रतान्यन्योअभिरक्षतेसदा । हवामहे
वांवृषणासुवृक्तिभिरस्मेइन्द्रावरुणाशमँयच्छतम् ९ अस्मेइन्द्रोवरुणोमित्रोअ-
र्यमादुम्नंयच्छन्तुमहिशमँसग्रथः । अवध्रंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकंस-
वितुर्मनामहे १० ॥ ५ ॥

आ वां पञ्च वासिष्ठ इन्द्रावरुणौ त्रिष्टुप् ।

८४ आवांराजानावध्वरेवृत्यांहव्येभिरिन्द्रावरुणानमोभिः । प्रवांघृताचीबाह्वोर्दधानापरित्मनाविषुरूपाजिगाति १ युवोराघृणेबृहदिन्वतिद्यौर्यौसेतृभिररज्जुभिःसिनीथः । पारंनोहेळोवरुणस्यवृज्याउरुंनइन्द्रःकृणवदुलोकम् २ कृतंनोयज्ञंविदथेषुचारुंकृतंब्रह्माणिसूरिषुप्रशस्ता । उपोरयिर्देवजूतोनएतुप्रणःस्पार्हाभिरूतिभिस्तिरेतम् ३ अस्मेइन्द्रावरुणाविश्ववारंरयिंधत्तंवसुमन्तंपुरुक्षुम् । प्रयआदित्योअनृतामिनात्यमिताशूरोदयतेवसूनि ४ इयमिन्द्रंवरुणमष्टमेगीःप्रावत्तोकेतनयेतूतुजाना । सुरत्नासोदेववीतिंगमेमयूयंपातस्वस्तिभिःसदानः ५ ॥ ६ ॥

भयंस्यराजथोऽधस्मानोऽवतंपायैंदिवि ५ ॥ ४ ॥ युवांहवन्तउभयासआजि-
ष्विन्द्रंचवस्वोवरुणंचसातयै । यत्रराजभिर्दशभिर्निबाधितंप्रसुदासमावतंतृत्सुं-
भिःसह ६ दशराजानःसमिताअयज्यवःसुदासमिन्द्रावरुणानयुयुधुः । सत्या
नृणामसदामुपस्तुतिर्दैवाएषामभवन्देवहूतिषु ७ दाशराज्ञेपरियत्तायविश्वतः
सुदासइन्द्रावरुणावशिक्षतम् । श्वित्यञ्चोयत्रनमसाकपर्दिनोधियाधीवंतोअस-
पन्ततृत्सवः ८ वृत्राण्यन्यःसमिथेषुजिघ्नतेव्रतान्यन्योअभिरक्षतेसदा । हवामहे
वांवृषणासुवृक्तिभिरस्मेइन्द्रावरुणाशमँयच्छतम् ९ अस्मेइन्द्रोवरुणोमित्रोअ-
र्यमाद्युम्नंयच्छन्तुमहिशमँसप्रथः । अवध्रंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकंस-
वितुर्मनामहे १० ॥ ५ ॥

आवां पञ्च वसिष्ठ इन्द्रावरुणौ त्रिष्टुप् ।

८४ आवांराजानावध्वरेवृत्यांहव्येभिरिन्द्रावरुणानमोभिः । प्रवांघृताचीं बाह्वोर्दधानापरित्मनाविषुरूपाजिगाति १ युवोराषूंबृहदिन्वतिद्यौर्यौसेतृभिरज्जुभिःसिनीथः । परिनोहेळोवरुणस्यवृज्याउरुंनइन्द्रःकृणवदुलोकम् २ कृतंनोयज्ञंविदथेषुचारुंकृतंब्रह्माणिसूरिषुप्रशस्ता । उपोरयिर्देवजूतोनएतुप्रणः स्पार्हाभिरूतिभिस्तिरेतम् ३ अस्मेइन्द्रावरुणाविश्ववारंरयिंधत्तंवसुमन्तंपुरुक्षुम् । प्रयआदित्योअनृतामिनात्यमिताशूरोदयतेवसूनि ४ इयमिन्द्रंवरुणमष्टमेगीःप्रावत्तोकेतनंयेतूतुजाना । सुरत्नासोदेववीतिंगमेमयूयंपातस्वस्तिभिः सदानः ५ ॥ ६ ॥

पुनीषे पञ्च वसिष्ठ इन्द्रावरुणौ त्रिष्टुप् ।

८५ पुनीषेवामरक्षसंमनीषांसोमामिन्द्रायवरुणायजुह्वत् । घृतप्रतीकामुषसं नदेवीतानोयामन्नुरुष्यताम्भीकं १ रुपर्धन्तेवाउदेवहूयेअत्रयेयुध्वजेपुंदिध्यवः पतन्ति । युवंताइन्द्रावरुणावमित्रान्हतंपराचःशर्वाविषूचः २ आपश्चिद्धिस्वयशसःसदंसुदेवीरिन्द्रंवरुणंदेवताधुः । कृष्टीरन्योधारयतिप्रविक्तावृत्राण्यन्योअप्रतीनिहन्ति ३ ससुक्रतुंकृतचिदस्तुहोतायआदित्यशवसावानमंस्वान् । आववर्तदवसेवांहविष्मानसादित्सुविताय्प्रयस्वान् ४ इयमिन्द्रंवरुणमष्टमेगीःप्रावत्तोकेतनयेतूतुजाना । सुरत्नासोदेववीतिंगमेमयूयंपातस्वस्तिभिःसदानः ५ ॥ ७ ॥

धीराष्टौ वसिष्ठो वरुणस्त्रिष्टुप् ।

८६ धीरात्वंस्यमहिनाजनूंषिवियस्तस्तम्भरोदसीचिदुर्वी । प्रनाकमृष्वंनु-

नुदेवृहन्तँद्दितानक्षंत्रंप्रप्रथंच्छभूमं १ उतस्वयांतन्वा३संवंदेतत्कदान्वं१न्तर्वरुणेभुवानि । किंमेहव्यमहणानोजुषेतकदामृळीकंसुमनाअभिख्यम् २ पृच्छेतदेनोवरुणद्दक्षूपोएमिचिकितुषोविपृच्छम् । समानमिन्मेकवयश्चिदाहुरयंहतुभ्यंवरुणोहणीते ३ किमागंआसवरुण्ज्येष्ठंयत्स्तोतारंजिघांसंसिसखायम् । प्रतन्मेवोचोदूळभस्वधावोऽवंत्वानेनानमसातुरंइयाम् ४ अवद्रुंग्धानिपित्र्यासृजानोऽवयायुयंचंकृमातनूभिः । अवंराजन्पशुतृपंनतायुंसृजावत्संनदाम्नोवसिष्ठम् ५ नस्त्वोदक्षोवरुणध्रुतिःसासुरांमन्युर्विभीदंकोअचीचिः । अस्तिज्यायान्कर्तीयस उपारेस्वप्नंश्चनेदनृतस्यप्रयोता ६ अरंदासोनमीळ्हुषेकराण्यंहेदवायभूर्णये ऽनांगाः। अचैतयदचितोदेवोअर्योगृत्संरायेकवितरोजुनाति ७ अयंसुतुभ्यंवरुणस्वधा-

वोहृदिस्तोमउपश्रितश्चिदस्तु । शंनःक्षेमेशमुयोगेनोअस्तुयूयंपातस्वस्तिभिः सदानः ८ ॥ ८ ॥

रदत्सप्त वासिष्ठो वरुणस्त्रिष्टुप् ।

८७ रदंत्पथोवरुणःसूर्यायप्राणींसिसमुद्रियानदीनाम् । सर्गोनसृष्टोअवतीर्ऋतायंचकारमहीरवनीरहंभ्यः १ आत्मातेवातोरजआनवीनोत्पशुर्नभूर्णिर्यवसेससवान् । अन्तर्महीबृहतीरोदसीमेविश्वातेधामवरुणप्रियाणि २ परिस्पशोवरुणस्यस्मदिष्टाउभेपश्यन्तिरोदसीसुमेके । ऋतावानःकवयोयज्ञधीराःप्रचेतसोयड्डयंन्तमन्म ३ उवाचमेवरुणोमेधिरायत्रिःसप्तनामाघ्न्याबिभर्ति । विद्वान्पदस्यगुह्यानवोचद्युगायविप्रउपरायशिक्षन् ४ तिस्रोद्यावोनिहिताअन्तरस्मिन्तिस्रोभूमीरुपराःषड्विधानाः । गृत्सोराजावरुणश्चक्रएतंदिविप्रेङ्खंहिरण्ययंशुभेकम्

५ अवसिन्धुंवरुणोद्यौरिवस्याद्रप्सोनश्वेतोमृगस्तुविष्मान् । गम्भीरशंसोरजसो विमानःसुपारक्षत्रःसतोअस्यराजा ६ योमृळयातिचक्रुषेचिदागोवयंस्यामवरुणेअनागाः । अनुव्रतान्यदितेर्रुधन्तोयूयंपातस्वस्तिभिःसदानः ७ ॥ १ ॥

म शुन्ध्युवं सप्त वसिष्ठो वरुणस्त्रिष्टुप् ।

८८ प्रशुन्ध्युवंवरुणायप्रेष्ठांमतिंवसिष्ठमीळ्हुषेभरस्व । यइंमवाश्रेंकरतेयजत्रंसहस्रांमघवृषणंवृहन्तम् १ अधान्वस्यसंदृशंजगन्वानग्नेरनींकंवरुणस्यमंसि। स्व१र्यदश्मन्नधिपाउअन्धोऽभिमावपुंदृशयेनिनीयात् २ आयद्रुहांवरुणश्चनावंप्रयत्समुद्रमीरयावमध्यम् । अधियदुपांसुभिश्चरावप्रेङ्खईंखयावहैशुभेकम् ३ वसिष्ठंहवरुणोनाव्याघाद्दर्पिचकारस्वपामहोभिः । स्तोतारंविप्रःसुदिनत्वेअह्नायान्नुद्यावस्ततनन्यादुपासः ४ क्व१त्यानिनौसख्यावभूवुःसचावहेयदवृकंपुरा

चित् । वृहन्तंमानंवरुणस्वधावःसहस्त्रद्वारंजगमागृहंतै ५ यआपिनित्योवरुण प्रियःसन्त्वामागांसिकृणवत्सखाते । मातएनंस्वन्तोयक्षिन्भुजेमयन्धिष्माविप्रः स्तुवतेवरूथम् ६ ध्रुवासुत्वासुक्षितिर्पक्षियन्तोऽयं१स्मत्पाशंवरुणोमुमोचत् । अवोवन्वानाअदितेरुपस्थाद्युयंपातस्वस्तिभिःसदानः ७ ॥ १० ॥

मो षु पञ्च वसिष्ठो वरुणो गायत्री । अन्त्या जगती ।

८१ मोषुवरुणमृन्मयंगृहंराजन्नहंगमम् । मृळासुक्षत्रमृळय १ यदेमिप्रस्फुरन्निवद्यौर्नध्मातोअद्रिवः । मृळासुक्षत्रमृळय २ कृत्वःसमहदीनतांप्रतीपं जगमाशुचे । मृळासुक्षत्रमृळय ३ अपांमध्येतस्थिवांसंतृष्णाविदज्जरितारम् । मृळासुक्षत्रमृळय ४ यत्किंचेदंवरुणदैव्येजनेऽभिद्रोहंमनुष्याश्चरामसि । अ-

चित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ५ ॥ ११ ॥ इति शाकलैकसंहितायां सप्तमे मण्डले पञ्चमोनुवाकः ॥ ५ ॥

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः । वहेवायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय १ ईशानाय प्रहुतिं यस्त आनट्शुचिं सोमं शुचिपास्तुभ्यं वायो । कृणोषि तं मर्त्यं यु प्रशस्तं जातो जातो जायते वाज्यस्य २ रायेनु यं जज्ञतू रोदसी मे रायेदेवी धिषणा धाति देवम् । अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ३ उच्छन्नुषसः सुदिना अरिप्रा उरुज्योतिर्विविदुर्दीध्यानाः । गव्यं चिदूर्वमुशिजो विवव्रुस्ते पामनु प्रदिवः सस्रुरापः ४ ते सत्येन मनसा दीध्यानाः स्वेन युक्ताससः क्रतुना वहन्ति । इन्द्रवायू वीरवाहं रथं वामीशानयोरभिपृक्षः सचन्ते ५

ईशानासोयेदधतेस्वर्णोगोभिरश्वेभिर्वसुभिर्हिरण्यैः।इन्द्रवायूसूरयोविश्वमायुरव्द्रिर्वीरैःपृतनासुसह्युः ६ अवन्तोनश्रवसोभिक्षमाणाइन्द्रवायूसुष्टुतिभिर्वसिष्ठाः। वाजयन्तःस्ववसेहुवेमयूयंपातस्वस्तिभिःसदानः ७ ॥ १२ ॥

कुविदङ्ग सप्त वसिष्ठ इन्द्रवायू त्रिष्टुप् । प्रथमातृतीययोर्वायुः ।

११ कुविदङ्गनमसायेवृधासःपुरादेवाअनवद्यासआसन्। तेवायवेमनवेवाघितायावासयन्नुपसंसूर्येण १ उशन्तादूतानदभायगोपामासश्चपाथःशरदश्चवर्वीः। इन्द्रवायूसुष्टुतिवोमियानामाडींकमीट्टेसुवितंचनव्यम् २ पीवोअन्नाव्रायिवृधःसुमेधाःश्वेतःसिषक्तिनियुतामभिश्रीः। तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्वपत्यानिचक्रुः ३ यावत्तरस्तन्वोइयावदोजोयावन्नरश्चक्षसादीध्यानाः। शुचिंसोमंशुचिपापातमस्मेइन्द्रवायूसदंतंवहिरेदम् ४ नियुवानानियुतःस्पार्हवीराइन्द्र-

वायूसरथंयातमर्वाक् । इदंहिवांप्रभृतंमध्वोअग्रमधंप्रीणानाविमुंमुक्तमस्मे ५
यावींशतंनियुतोयाःसहस्रमिन्द्रवायूविश्ववाराःसचंन्ते । आभिर्यातंसुविदत्राभि-
रर्वाक्पातंनरापतिंभृतस्यमध्वः ६ अवंन्तोनश्रवसोभिक्षंमाणाइन्द्रवायूसुष्टुति-
भिर्वसिष्ठाः । वाजयन्तःस्ववंसेहुवेमयूयंपांतस्वस्तिभिःसदांनः ७ ॥ १३ ॥

आ वायो पञ्च वसिष्ठो वायुस्त्रिष्टुप् । उपाद्याया इन्द्रवायू ।

१२ आवांयोभूपशुचिपाउपंनःसहस्रंतेनियुतोविश्ववार । उपोतेअन्धोमद्य-
मयामियस्यंदेवदधिषेपूर्वपेयम् १ प्रसोतांजीरोअध्वरेष्वस्थात्सोममिन्द्रायवा-
यवेपिबध्यै । प्रयह्वांमध्वोअग्रियंभरंन्त्यध्वर्यवोदेवयन्तःशचीभिः २ प्रयाभिर्या-
सिदाश्वांसमच्छानियुद्भिर्वायविष्टयेदुरोणे । निनोरयिंसुभोजसंयुवस्वनिवीरंग-
व्यमश्व्यंचराधः ३ येवायवंइन्द्रमादनासुआदेवासोनितोशंनासोअर्यः ।

घ्नन्तोवृत्राणिसूरिभिःस्यामसासह्वांसोयुधानृभिरमित्रान् ४ आनोनियुद्भिःशतिनीभिरध्वरंसहस्त्रिणीभिरुपयाहियज्ञम् । वायोअस्मिन्त्सवनेमादयस्वयूयं पातस्वस्तिभिःसदानः ५ ॥ १४ ॥

शुचिं न्वष्टौ वसिष्ठ इन्द्राग्नी त्रिष्टुप् ।

९३ शुचिंनुस्तोमंनवंजातमद्येन्द्राग्नीवृत्रहणाजुषेथाम् । उभाहिवांसुहवाजोहवीमितावाजंसद्यउशतेधेष्ठां १ तासान्नसीशावसानाहिभूतंसाकंवृधाशवसाशूशुवांसा । क्षयन्तौरायोयवंसस्यभूरेःपृङ्क्तंवाजस्यस्थविरस्यघृष्वेः २ उपो हयद्रिदधंवाजिनोगुर्धीभिर्विप्राःप्रमतिमिच्छमानाः । अवन्तोनकाष्ठांनक्षमाणा इन्द्राग्नीजोहुवतोनरस्ते ३ गीर्भिर्विप्रःप्रमतिमिच्छमानईट्टेरयिंयशसंपूर्वभाजम् । इन्द्राग्नीवृत्रहणासुवज्राप्रनोनव्यैभिस्तिरतंदेष्णैः ४ संयन्महीमिथतीस्पर्धमाने

तनूरुचाशूरसातायतैते ॥ अदेवयुंविदथेदेवयुभिःसत्राहतंसोमसुताजनेन ५ ॥ १५ ॥ इमामूपुसोमंसुतिमुपनएन्द्राग्नीसौमनसाययातम् । नूचिद्धिपरिमस्थेअस्मानावांशश्वद्विर्वृतीयवाजैः ६ सोअग्नएनानमंसासमिद्धोऽच्छामित्रं वरुणमिन्द्रंवोचेः । यत्सीमागश्चकृमातत्सुमृळतदर्यमादितिःशिश्रथन्तु ७ एता अग्नआशुपाणासइट्टीर्युवोःसचाभ्यश्यामवाजान् । मेन्द्रोनोविष्णुर्मरुतःपरिख्यन्न्यूयंपातस्वस्तिभिःसदानः ८ ॥ १६ ॥

इयं वां द्वादश वासिष्ठ इन्द्राग्नी गायत्री । अन्त्यानुष्टुप् ।

१४ इयंवांमस्यमन्मनइन्द्राग्नीपूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि १ शृणुतं जरितुर्हवमिन्द्राग्नीवनतंगिरः । ईशानापिप्यतंधियः २ मापापत्वायनोनरेन्द्रा-

ग्नीमाभिशंस्तये । मानोरीरघतंनिदे ३ इन्द्रेंअग्रानमोवृहत्सुवृक्तिमेरयामहे । धियाधेनांअवस्यवः ४ ताहिशश्वन्तइळंतइत्थाविप्रांसऊतये । सवाधोवाजंसातये ५ तावांगीर्भिर्विपन्यवःप्रयस्वन्तोहवामहे । मेधसांतासनिष्यवः ६ ॥१७॥ इन्द्राग्नीअवसागंतमस्मभ्यंचर्षणीसहा । मानोदुःशंसईशत ७ माकस्यंनोअरंरुषोधूर्तिःप्रणङ्मर्त्यस्य । इन्द्राग्नीशर्मयच्छतम् ८ गोमद्धिरण्यवद्वसुयद्वामश्वावदीमहे । इन्द्राग्नीतद्वनेमहि ९ यत्सोमआसुतेनरइन्द्राग्नीअजोहवुः । सत्तोवन्तासपर्यवः । १० उक्थेभिर्वृत्रहन्तंमायामंन्दानाचिदागिरा । आङ्गूषैराविवासतः ११ ताविदुःशंसमत्यंदुर्विद्वांसंरक्षस्विनम् । आभोगंहन्मनाहतमुदधिंहन्मनाहतम् १२ ॥ १८ ॥

१५ प्रक्षोदसाधायसास्रएषासरस्वतीधरुणमायसीपूः । प्रबाबधानारथ्येव याति विश्वाअपोमहिनासिन्धुरन्याः १ एकाचेतत्सरस्वतीनदीनांशुचिर्यतीगिरिभ्यआसमुद्रात् । रायश्चेतन्तीभुवनस्यभूरेर्घृतंपयोदुदुहेनाहुषाय २ सवावृधेनर्योयोषणासुवृषाशिशुर्वृषभोयज्ञियासु । सवाजिनंमघवद्भ्योदधातिविसातयेतन्वंमामृजीत ३ उतस्यानःसरस्वतीजुषाणोपश्रवत्सुभगायज्ञेअस्मिन् । मितज्ञुभिर्नमस्यैरियानाराया युजाचिदुत्तरासखिभ्यः ४ इमाजुह्वानायुष्मदानमोभिः प्रतिस्तोमंसरस्वतिजुषस्व । तवशर्मन्प्रियतमेदधानाउपस्थेयामशरणंनवक्षम् ५ अयमुतेसरस्वतिवासिष्ठोद्वारावृतस्यसुभगेव्यावः । वर्धशुभ्रेस्तुवतेराससि वाजान्यूयंपातस्वस्तिभिःसदानः ६ ॥ ११ ॥

बृहदु पद्वसिष्ठो गायत्री । आद्यानां तिसृणां सरस्वती । शिष्टानां सरस्वान् ।
आद्या बृहती । द्वितीया सतोबृहती । तृतीया मस्तारपाङ्क्तः ।

१६ बृहदुगायिपेवचोऽसुयानुदीनाम् । सरस्वतीमिन्महयासुवृक्तिभिःस्तो-
मैर्वसिष्ठुरोदसी १ उभेयत्तेमहिनाशुभ्रेअन्धसोअधिक्षियन्तिपूरवः । सानोवो-
ध्यवित्रीमरुत्सखाचोदराधोमघोनाम् २ भद्रमिद्भद्राकृणवत्सरस्वत्यकवारीचे-
ततिवाजिनीवती । गृणानाजमदग्निवत्स्तुवानाचवसिष्ठुवत् ३ जनीयन्तोन्व-
ग्रवःपुत्रीयन्तःसुदानवः । सरस्वन्तंहवामहे ४ येतेसरस्वऊर्मयोमधुमन्तोघृत-
श्चुतः । तेभिर्नोऽविताभव ५ पीपिवांसंसरस्वतःस्तनंयोविश्वदर्शतः । भक्षीम-
हिप्रजामिषम् ६ ॥ २० ॥

यज्ञे दश वसिष्ठो बृहस्पतिस्त्रिष्टुप्। आद्यापा इन्द्रः। तृतीयानवम्यो-
रिन्द्राब्रह्मणस्पती। अन्त्यापा इन्द्राबृहस्पती।

१७ यज्ञेदिवोनुपदंनेपृथिव्यानरोयत्रदेवयवोमदन्ति। इन्द्रायुयत्रसवनानि सुन्वेगमन्मदायप्रथमंवयश्च १ आदैव्यावृणीमहेऽवांसिबृहस्पतिर्नोमहआसंखायः। यथाभवेममीह्लपेअनागायोनोदातापरावतःपितेव २ तमुज्येष्ठंनमसाहविर्भिःराजेवब्रह्मणस्पतिंगृणीषे। इन्द्रंश्लोकोमहिदैव्यःसिषक्तुयोब्रह्मणोदेवकृतस्यराजा ३ सआनोयोनिंसदतुप्रेष्ठोबृहस्पतिर्विश्ववारोयोअस्ति। कामोरायःसुवीर्यस्यतंदात्पर्ष्णोअतिसश्चतोअरिष्टान् ४ तमानोअर्कमृभवायजुष्टमिमेधासुरमृतासःपुराजाः। शुचिंक्रन्दंयजतंपस्त्यानांबृहस्पतिमनुर्वाणंहुवेम ५ ॥ २१ ॥
तंशुभ्मासोअरुषासोअश्वाबृहस्पतिंसहवाहोवहन्ति। सहश्रियस्यनीलवत्सध-

स्थंनभोनरूपमरुपंवसानाः ६ साहिशुचिःशतपंत्रःसशुन्ध्युर्हिरण्यवाशीरिपिरः स्वर्पाः । बृहस्पतिःसःस्वावेशऋष्वःपुरूसखिभ्यआसुतिंकरिष्ठः ७ देवीदेवस्य रोदसीजनित्रीबृहस्पतिंवावृधतुर्महित्वा । दक्षाय्यायदक्षतासखायःकरन्ह्वांणे सुतरासुगाधा ८ इयंवांब्रह्मणस्पतेसुवृक्तिर्ब्रह्मेन्द्रायवाजिनेंअकारि । अविष्टं धियोंजिगृतंपुरंन्धीर्जजस्तमर्योवनुषामरातीः ९ बृहस्पतेयुवमिन्द्रश्चवस्योर्दिव्यस्येशाथेउतपार्थिवस्य । धत्तंरयिंस्तुवतेकीरयेंचिद्यूयंपातस्वस्तिभिःसदानः १० ॥ २२ ॥

अध्वर्यवः सप्त वसिष्ठ इन्द्रस्त्रिष्टुप् । अन्त्याया इन्द्राबृहस्पती ।

१८ अध्वर्यवोऽरुणंदुग्धमंशुंजुहोतनवृषभायक्षितीनाम् । गौराद्वेदीयाँअवपानमिन्द्रोविश्वाहेयातिसुतसोममिच्छन् १ यद्वाधिपेप्रदिविचार्वन्नेदिवेदिवेपी-

तिमिदस्यवक्षि । उतह्रदोतमनसाजुषाणउशन्निन्द्रप्रस्थितान्पाहिसोमान् २ जज्ञानःसोमंसहसेपपाथप्रतेमातामहिमानमुवाच । एन्द्रपप्राथोर्वँ१न्तरिक्षंयुधा देवेभ्योवरिवश्चकर्थ ३ यद्योधयामहतोमन्यमानान्त्साक्षामतान्बाहुभिःशाशदानान् । यद्वानृभिर्वृतइन्द्राभियुध्यास्तंत्वयाजिंसौश्रवसंजयेम ४ प्रेन्द्रस्यवोचंप्रथमाकृतानिप्रनूतनामघवायाचकार । यदेददैवीरसंहिष्टमायाअथाभवत्केवलःसोमोअस्य ५ तवेदंविश्वंमभितःपशव्यँ१यत्पश्यसिचक्षसासूर्यस्य । गवामसिगोपतिरेकइन्द्रभक्षीमहितेप्रयतस्यवस्वः ६ बृहस्पतेयुवमिन्द्रश्चवस्वोर्दिव्यस्येशाथेउतपार्थिवस्य । धत्तंरयिंस्तुवतेकीरयेचिद्यूयंपातस्वस्तिभिः सदानः ७ ॥ २३ ॥

परः सप्त वसिष्ठो विष्णुस्त्रिष्टुप् । उपान्त्यानां तिसृणामिन्द्राविष्णू ।

१ परोमात्रयातन्वावृधानन्नतेमहित्वमन्वश्नुवन्ति । उभेतेविद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्से १ नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमन्तमाप । उदस्तभ्नानाकंमृष्वंबृहन्तंदाधर्थप्राचींककुभंपृथिव्याः २ इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या । व्यस्तभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः ३ उरुंयज्ञायचक्रथुरुलोकंजनयन्तासूर्यमुषासमग्निम् । दासस्यचिद्वृषशिप्रस्यमायाजघ्नथुर्नरापृतनाज्येषु ४ इन्द्राविष्णूदंहिताःशम्बरस्यनवपुरोनवतिंचश्नथिष्टम् । शतंवर्चिनःसहस्रंचसाकंहथोअप्रत्यसुरस्यवीरान् ५ इयंमनीषाबृहतीबृहन्तोरुक्रमातवसावर्धयन्ती । ररेवांस्तोमैर्विदथेषुविष्णोपिन्व-

तामिषोवृजनेष्विन्द्र ६ वपट्टेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यम् । वर्धन्तुत्वासुष्टुतयोगिरोमेयूयंपातस्वस्तिभिःसदानः ७ ॥ २४ ॥

नूमर्तः सप्त वसिष्ठो विष्णुस्त्रिष्टुप् ।

१०० नूमर्तोदयतेसनिष्यन्योविष्णवउरुगायायदाशत् । प्रयःसत्राचामनसा यजातएतावन्तंनयंमाविवासात् १ त्वंविष्णोसुमतिंविश्वजन्यामप्रयुतामेवया-वोमतिंदाः । पचोयथानःसुवितस्यभूरेरश्वावतःपुरुश्चन्द्रस्यरायः २ त्रिर्देवःपृथि-वीमेषएतांविचक्रमेशतर्चसंमहित्वा । प्रविष्णुरस्तुतवसस्तवीयान्त्वेषंह्यस्यस्थ-विरस्यनाम ३ विचक्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् । ध्रुवासो अस्यकीरयोजनासउरुक्षितिंसुजनिमाचकार ४ प्रतत्तेअद्यशिपिविष्टनामार्यः शंसामिवयुनानिविद्वान् । तंत्वागृणामितवसमतंव्यान्क्षयन्तमस्यरजसःपराके

५ किमित्तेविष्णोपरिचक्ष्यंभूत्प्रयद्वंवक्षेशिपिविष्टोअस्मि । मावर्पोअस्मदपगूह एतद्यदन्यरूपःसमिथेबभूथ ६ वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्ट हव्यम् । वर्धन्तुत्वासुष्टुतयोगिरोमेयूयंपातस्वस्तिभिःसदानः ७ ॥ २५ ॥

इति शाकलर्क्संहितायां पञ्चमाष्टके षष्ठोऽध्यायः ॥ ६ ॥

तिस्रःपङ्क्तीर्जन्यंतुपर्जन्यायतृचंगायत्रंद्वितीयापादनिचृदेतेकुमारआग्नेयोपश्यद्वसिष्ठएववावृष्टिकामःसंवत्सरंदशपर्जन्यस्तुतिःसंहृष्टान्मण्डूकांस्तुष्टावाद्यानुष्टुविन्द्रासोमापश्चाधिकैन्द्रासोमंराक्षोघ्नंशापाभिशापमायंपङ्क्तिसप्तवाद्याजगत्यष्टाविंशीत्रयोविंश्यौचाष्टादशीमारुतीचदशमीचतुर्दश्यावाग्नेय्यौदैव्येकादशान्त्यानुष्टुम्नवमीद्वादशीत्रयोदशीसौम्यःसप्तदशीग्राव्ण्यष्टमीपौष्ण्यावैन्द्र्यौभवतीयेतिचतस्रऐन्द्र्योमानोरक्षइत्यृषेरात्मनआशीरुत्तरोर्धर्चःपृथिव्यन्तरिक्षंद्यौरितिदैवतःपरंगायत्रंभाग्वत्सप्रमेऋषिश्चानुक्तगोत्रःभाग्ववत्स्यात्काण्वोष्टमंमण्डलंमाचिचतुस्त्रिंशन्मेधातिथिमेध्यातिथीऐन्द्रंबार्हतंद्विमगाथादिद्वित्रिष्टुबन्तमाद्यंबृचंप्रगाथोपश्यत्सयौरःसन्भ्रातुःकण्वस्यपुत्रतामगात्प्रायोगिश्चासङ्गोयस्त्रीभूत्वापुमान्भूत्तमेध्यातिथयेदानंदत्त्वास्तुहिस्तुहीतिचतस्रोभिरात्मानंतुष्टावपत्नीचास्याङ्गिरसीशश्वतीपुंस्त्वमुपल-

भ्यैनंप्रीतान्त्ययातुष्टावेदंवसोद्विचत्वारिंशन्मेधातिथिराङ्गिरसश्चप्रियमेधःस्वादवोनुष्टुवन्त्याभ्यांमेधातिथिर्विभिन्दोर्दानंतुष्टावपिबचतुर्विंशतिर्मेध्यातिथिःप्रागाथंत्वनुष्टुब्गायत्र्यौबृहतीचान्त्याःकौरयाणस्यपाकस्थाम्नोदानस्तुतिर्यदिन्द्रसैकादेवातिथिस्तूचोन्त्यःपुरउष्णिगन्तःकुरुङ्गस्यदानस्तुतिस्तत्पूर्वाश्चतस्रःपौष्ण्यो वा ।

तिस्रः पङ्क्तिस्तृचः कुमारो वाग्नेयः पर्जन्यस्त्रिष्टुप् ।

३०१ ओम् तिस्रोवाचःप्रवदज्योतिरग्रायाएतद्ब्रह्मैमधुदोघमूर्धः । सवत्संकृष्वन्गर्भमोषधीनांसद्योजातोवृषभोरोरवीति १ योवर्धनओषधीनांयोअपांयोविश्वंस्यजगतोदेवईशे । सत्रिधातुशरणंशर्मयंसात्रिवर्तुज्योतिःस्वभिष्टयेस्मे २ स्तरीरसित्वद्भवतिसूतउत्वद्यथावशंतन्वैचक्रएषः । पितुःपयःप्रतिगृभ्णातिमातातेनं पितावर्धतेतेनंपुत्रः ३ यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः । त्रयःकोशासउपसेचनासोमध्वःश्चोतन्त्यभितोविरप्शम् ४ इदंवचःपर्जन्यायस्व-

राजेह्रदोअस्त्वन्तरंतज्जुजोषत् । मयोभुवोवृष्टयःसन्त्वस्मेसुपिप्पलाओषधीर्दे-
वगोपाः ५ सरेंतोधावृषभःशश्वतीनांतस्मिन्नात्माजगंतस्तस्थुषंश्च । तन्मंक्रुतं
पांतुशतशारदायुयूंयंपांतस्वस्तिभिःसदानः ६ ॥ १ ॥

पर्जन्याय ऋचं वसिष्ठः कुमारो वाग्नेयः पर्जन्यो गायत्री । द्वितीया पादनिचृत् ।

१०२ पर्जन्यायप्रगायतदिवस्पुत्रायमीळ्हुषे । सनोयवंसमिच्छतु १ योगर्भ-
मोषधीनांगवांकृणोत्यर्वतां । पर्जन्यःपुरुषीणाम् २ तस्माइदास्येहविर्जुहो-
तामधुमत्तमम् । इळानःसंयतंकरत् ३ ॥ २ ॥

संवत्सरं दश वसिष्ठो मण्डूकास्त्रिष्टुप् । आद्यानुष्टुप् ।

१०३ संवत्सरंशशयानाब्राह्मणाव्रतचारिणः । वाचंपर्जन्यजिन्वितांप्रमण्डू-
कांअवादिषुः १ दिव्याआपोअभियदेनमायन्हतिंनशुष्कंसरसीशयानम् ।

गवामह्नमायुर्वात्सिनीनांमण्डूकानांवस्रुरत्रासमेति २ यदीमेनाँउशतोअभ्यवं-
र्षीत्तृष्यावंतःप्रावृष्यागंतायाम्।अक्खलीकृत्यांपितरंनपुत्रोअन्योअन्यमुपवदन्त-
मेति ३ अन्योअन्यमनुगृभ्णात्येनोरपांप्रसर्गेयदमन्दिषाताम् । मण्डूकोयदभि-
वृष्टःकनिष्क्रन्पृश्निंःसंपृङ्क्तेहरितेनवाचंम् ४ यदेषामन्योअन्यस्यवाचंशाक्तस्येव
वदंतिशिक्षमाणः । सर्वंतदेषांसमृधेवपर्वयत्सुवाचोवदंथनाध्यप्सु ५ ॥ ३ ॥
गोमायुरेकोअजमायुरेकःपृश्निरेकोहरितएकंएषाम् । समानंनामबिभ्रतोविरू-
पाःपुरुत्रावाचंपिपिशुर्वदन्तः ६ ब्राह्मणासोअतिरात्रेनसोमेसरोनपूर्णमभितोव-
दन्तः । संवत्सरस्यतदहःपरिष्ठयन्मण्डूकाःप्रावृषीणंबभूव ७ ब्राह्मणासःसोमिनो
वाचंमक्रतब्रह्मकृण्वन्तःपरिवत्सरीणम् । अध्वर्यवोघर्मिणःसिष्विदानाआविर्भ-
वन्तिगुह्यानकेचित् ८ देवहितिंजुगुपुर्द्वादशस्यंऋतुंनरोनप्रमिनन्त्येते । संवत्सरे

प्रावृष्यागंतायांतप्राधर्माअश्नुवतेविसर्गम् १ गोमायुरदादजमायुरदात्पृश्निरदाद्धरितोनोवसूनि । गवांमण्डूकादर्दतःशतानिसहस्रसावेप्रतिरन्तआयुः १० ॥ ४ ॥

इन्द्रासोमा पञ्चविंशतिर्वसिष्ठः । आद्यानांसप्तानांपञ्चदशीपञ्चविंश्योश्चेन्द्रासोमौ रक्षोहणौ । नवमीद्वादशीत्रयोदशीनां सोमः । दशमीचतुर्दश्योरग्निः । एकादश्या देवाः । सप्तदश्या ग्रावाणः । अष्टादश्या मरुतः । त्रयोविंश्याः प्रथमार्धस्य वसिष्ठः । द्वितीयार्धस्य पृथिव्यन्तरिक्षे । आद्याः षडष्टादश्येकविंशीत्रयोविंश्यश्चजगत्यः । सप्तमी त्रिष्टुब्जगती वा । अन्त्यानुष्टुप् । शिष्टास्त्रिष्टुभः ।

१०४ इन्द्रासोमातपंतंरक्षंउब्जतंन्यर्पयतंवृषणातमोवृधः । परांशृणीतमचितोन्योपतंहतंनुदेथांनिशिशीतमत्रिणः १ इन्द्रासोमासमघशंसमभ्यघंतपुर्यस्तुचरुरग्निवाँइव । ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने २ इन्द्रासोमादुष्कृतौवज्रेअन्तरंनारम्भणेतमसिप्रविध्यतम् । यथानातःपुनरेकश्चनोदयत्तद्वामस्तुसहसेमन्युमच्छवः ३ इन्द्रासोमावर्तयंतंदिवोवधंसंपृथिव्याअघ-

देवैः १७ विरितिष्ठध्वंमरुतोविक्षिवश्चतगृभायतरक्षसःसंपिनष्टन । वयोयेभूत्वी
पतयन्तिनक्तभिर्येवारिपोदधिरेदेवेअध्वरे १८ प्रवर्तयदिवोअश्मानमिन्द्रसोम-
शितंमघवन्त्संशिशाधि । प्राक्तादपाक्तादधरादुदक्तादभिजहिरक्षसःपर्वतेन १९
एतउत्येपतयन्तिश्वयातवइन्द्रेदिप्सन्तिदिप्सवोऽदाभ्यम् । शिशीतेशक्रःपिशुं-
नेभ्योवधंनूनंसृजदशनिंयातुमद्भ्यः २० ॥ ८ ॥ इन्द्रोयातूनामभवत्पराशरो
हविर्मथीनामभ्याविवासताम् । अभीदुशक्रःपरशुर्यथावनंपात्रेवाभिन्दन्त्सत
एतिरक्षसः २१ उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतकोकयातुम् । सुपर्ण-
यातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षइन्द्र २२ मानोरक्षोअभिनंडयातुमावतामपो-
च्छतुमिथुनायाकिमीदिना । पृथिवीनःपार्थिवात्पात्वंहसोऽन्तरिक्षंदिव्यात्पात्व-
स्मान् २३ इन्द्रजहिपुमांसंयातुधानमुतस्त्रियंमाययाशार्दानाम् । विग्रीवासो

स्तुतन्वा३तनांचतिस्रःपृथिवीरधोअंस्तुविश्वाः। प्रतिशुष्यतुयशोंअस्यदेवायोनो दिवादिप्सतियश्चनक्तम् ११ सुविज्ञानंचिकितुषेजनायसच्चासच्चवचसीपस्पृधाते। तयोर्यत्सत्यंयतरदृजीयुस्तादित्सोमोऽवतिहन्त्यासत् १२ नवाउसोमो वृजिनंहिनोतिनक्षत्रियंमिथुयाधारयन्तम्। हन्तिरक्षोहन्त्यासद्वदन्तमुभाविन्द्रस्यप्रसितौशयाते १३ यदिवाहमनृतदेवआसमोघंवादेवाँअप्यूहेअग्ने। किमस्मभ्यंजातवेदोहणीयेद्रोघवाचंस्तेनिर्ऋथंसंचन्ताम् १४ अद्यामुरीयुयदियातुधानोअस्मियदिवायुंस्ततपूरुषस्य। अधासवीरैर्दशभिर्वियूयायोमामोघंयातुधानेत्याह १५ ॥ ७ ॥ योमायातुंयातुधानेत्याहयोवारक्षाःशुचिरस्मीत्याह। इन्द्रस्तंहन्तुमहतावधेनविश्वस्यजन्तोरधमस्पदीष्ट १६ प्रयाजिगातिखर्गलेव नक्तमपद्रुहातन्वै गूहमाना। वव्राँअनन्ताँअवसापदीष्टग्रावाणोघ्नन्तुरक्षसंउपु-

दैः १७ विति॑ष्ठध्वंमरुतोविक्षि॑व॒ श्च्छतंगृभा॒यतं॒रक्ष॑स॒ःसंपि॑नष्टन । व॒यो॒ये॒भूत्वी
प॒त॒यं॒न्ति॒न॒क्तभि॒र्ये वा॒रिपो॑दधि॒रेदे॒वेअ॑ध्व॒रे १८ प्रव॑र्तयदि॒वोअ॑श्मा॒नमि॑न्द्रसो॒म॑-
शि॑तं॒मघ॑व॒न्त्संशि॑शाधि । प्राक्षा॒दपा॑क्षादव॒रादु॑दक्षा॒दभि॑जंहिर॒क्षस॒ःपर्व॑तेन १९
ए॒त॒उ॒त्येप॑तयन्ति॒श्वया॑तव॒इन्द्रे॑दिप्सन्ति॒दिप्स॑वो॒ऽदा॑भ्यम् । शिशी॑ते॒शृक्ष॑ःपिशु॒-
नेभ्यो॒व॒धंन॑नंसृ॒जद॒शनि॑यातु॒मद्र्यः २० ॥ ८ ॥ इन्द्रो॑यातू॒नामं॑भवत्परा॒शरो
ह॑वि॒र्मथी॑नाम॒भ्या॒३॑विवा॑सताम् । अ॒भीदु॒शृक्ष॑ःपर॒शुर्य॒थाव॒नंपात्रे॑वभि॒न्दन्त्स॒त
ए॑ति॒र॒क्षस॑ः २१ उल्॑कयातुंशुशु॒लू॑कंयातुंजा॒हि॒श्वया॑तुमु॒तको॑कंयातुम् । सु॒पर्ण॑-
या॑तुमु॒तगृ॒ध्र॑या॒तुंदृ॒षदे॑व॒प्रमृ॑ण॒रक्ष॑इन्द्र २२ मानो॒रक्षो॑अ॒भिन॑ड्यातुमावं॒तामपो॑-
च्छतुमिथु॒नाया॑कि॑मी॒दिना । पृ॒थि॒वी॒न॒ःपार्थि॑वात्पा॒त्वंह॑सो॒ऽन्तरि॑क्षंदि॒व्यात्पा॑त्व॒-
स्मान् २३ इन्द्र॑जा॒हिपु॒मांसं॑यातुधा॒नमु॒तस्त्रिय॑मा॒यया॒शाश॑दानाम् । विग्री॑वासो॒

मूरदेवाऋदन्तुमातेहंशन्सूर्यंमुच्चरन्तम् २४प्रतिचक्ष्वविचक्ष्वेन्द्रश्वसोमजागृतम्।
रक्षोभ्योवधमस्यतमशनिंयातुमद्र्यः २५ ॥ १ ॥ इति शाकलर्कसंहितायां सप्तमे
मण्डले षष्ठोनुवाकः ॥ ६ ॥

॥ इति सप्तमं मण्डलं समाप्तम् ॥ ७ ॥

मा चिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथी काण्वाविन्द्रो बृहती। आद्ययोः प्रगाथो घौरः काण्वो वा। उपान्त्यानां चतसृणामासङ्गः प्रायोगिः। अन्त्यायाः शश्वत्याङ्गिरस्यासङ्गस्य पत्नी। उपान्त्यानां चतसृणामासङ्गस्य दानस्तुतिः। अन्त्याया आसङ्गः। द्वितीया चतुर्थी च सतोबृहत्यौ। अन्त्ये त्रिष्टुभौ।

१ माचिंदन्यद्विशंसतसखायोमारिंषण्यत। इन्द्रमित्स्तोतावृषणंसचासुते
मुहुरुक्थाचंशंसत १ अवक्रक्षिणंवृषभंयथाजुरंगांनचर्षणीसहम्। विद्वेषणंसं-
वनंनोभयंकरंमहिष्ठमुभयाविनम् २ यच्चिद्धित्वाजनांइमेनानाहवन्तऊतये।

अस्माकंब्रह्मेदमिन्द्रभूतुतेऽहाविश्वाचवर्धनम् ३ वितंतूर्यन्तेमघवन्विपश्चितोऽयो विपोजनानाम् । उपक्रमस्वपुरुरूपमाभरवाजंनेदिष्ठमूतये ४ महेचनत्वामद्रिवःपराशुल्कायदेयाम् । नसहस्रायनायुतायवज्रिवोनशतायशतामघ ५ ॥ १० ॥ वस्याँइन्द्रासिमेपितुरुतभ्रातुरभुञ्जतः । माताचमेछदयथःसमावंसोवसुत्वनायराधसे ६ कैतथैकदसिपुरुष्याचाहितेमनः । अलंपियुध्मखजकृत्पुरंदरप्रगायत्रा अंगासिषुः ७ प्रास्मैगायत्रमर्चतवावातुर्यः पुरंदरः । याभिःकाण्वस्योपबर्हिरासदंयासद्वज्रीभिनत्पुरः ८ येतेसन्तिदशाग्विनःशतिनोयेसहस्रिणः । अश्वांसोयेतेवृषणोरघुद्रुवस्तेभिर्नस्तूयमागहि ९ आत्वेद्यसवर्दुघाहुवेगायत्रवेपसम् । इन्द्रधेनुंसुदुघामन्यामिषमुरुधारामरंकृतम् १० ॥ ११ ॥ यत्तुदत्सूरएतशंवङ्कुवातस्यपर्णिना । वहत्कुत्समार्जुनेयंशतक्रतुःत्सरद्गन्धर्वमस्तृतम् ११ यक्रुते

चिंदभ्रिभ्रिपंःपुराजत्रुभ्यंआतृदंः । संधातासंधिंमघवांपुरूवसुरिष्कर्तांविह्रुतंपुनः १२ मार्भूमनिष्टयाइवेन्द्रत्वदरणाइव । वनांनिनप्रंजहितान्यद्रिवोदुरोषांसोअमन्महि १३ अमंन्महीदंनाशवोऽनुग्रासश्चवृत्रहन् । सकृत्सुतेमहताशूरराधसानुस्तोमैंमुदीमहि १४ यदिस्तोमंममश्रवंदस्माकमिन्द्रमिन्दवः । तिरःपवित्रैंससृवांसंआशवोमदन्तुतुग्र्यावृधः १५ ॥ १२ ॥ आत्वे१ष्यसधस्तुतिंवावातुःसख्युरागंहि । उपस्तुतिर्मघोनांप्रत्वांवत्वधांतवद्रिमसुष्टुतिम् १६ सोताहिसोममद्रिभिरेमेनमप्सुधावत । गव्यावस्त्रैववासयन्तइन्नरोनिधुंक्षन्वृक्षणाभ्यः १७ अधुज्मोअर्धवादिवोवृहतोरोचनादधि । अयावर्धस्वतन्वांगिराममाजातासुक्रतोपृण १८ इन्द्रायसुमदिन्तमंसोमंसोतावरेण्यम् । शक्रएणंपीपयद्विश्वयाधियाहिन्वानंनवाजयुम् १९ मात्वासोमस्यगल्दयासदायाचन्नहंगिरा । भूर्णिमृगं

नसर्वनेपुचुक्रुधंकईशानंनयांचियत् २० ॥ १३ ॥ मदेनेषितंमदमुग्रमुग्रेणशवसा । विश्वेषांतरुतारंमदच्युतंमदेहिष्माददातिनः २१ शेवारिवायोंपुरुदेवोमतोंयदाशुषे । ससुन्वतेचस्तुवतेचरासतेविश्वगूर्तोअरिष्टुतः २२ एन्द्रयाहिमत्स्वं चित्रेणदेवराधसा । सरोनप्रास्युदरंसपीतिभिरासोमेभिरुरुस्फिरम् २३ आत्वा सहस्रमाशतंयुक्तारथेहिरण्ययें । ब्रह्मयुजोहरयइन्द्रकेशिनोवहन्तुसोमपीतये २४ आत्वारथेहिरण्ययेहरीमयूरशेप्या । शितिपृष्ठावहतांमध्वोअन्धसोविवक्षणस्यपीतयें २५ ॥ १४ ॥ पिबात्वेस्यगिर्वणःसुतस्यपूर्वपाइव । परिष्कृतस्यरसिनइयमासुतिश्चारुर्मदायपत्यते २६ यएकोअस्तिदंसनामहाँउग्रोअभिव्रतैः । गमत्सशिप्रीनसयोपदागमद्भवंनपरिवर्जति २७ त्वंपुरंचरिष्ण्वेवधैःशु-

र्णस्यसंपिंणक् । त्वंभाअनुंचरोअर्धहितायदिन्द्रहव्योभुवः २८ ममत्वासूरउ-दितेममंमध्यंदिनेदिवः । ममप्रपित्वेअपिशर्वरेवसवास्तोमासोअवृत्सत २९ स्तुहिस्तुहीदेतेघातेमंहिष्ठासोमघोनाम् । निन्दिताश्वःप्रपथीपरमज्यामघस्यमेध्यातिथे ३० ॥ १५ ॥ आयदश्वान्वनंन्वतःश्रद्धयाहंरथैरुहम् । उतवामस्यवसुंनश्चिकेतति योअस्तियाहंःपशुः ३१ यक्रुज्राम्ह्यंमामहेसहत्वचाहिरण्यया । एपविश्वान्यभ्यस्तुसौभगासङ्गस्यस्वनद्रथः ३२ अधुक्षायोंगिरतिंदासदन्यानासङ्गेअग्नेदशभिःसहस्रैः । अधोक्षणोदशमह्यंरुशन्तोनळाइवसरसोनिरंतिष्ठन् ३३ अन्वस्यस्थूरंदृशेपुरस्तादनुस्थऊरुरंवरम्वमाणः । शश्वंतीनार्यभिचक्ष्याहसुभद्रमर्यभोजनंविभर्षि ३४ ॥ १६ ॥

इदं वसो द्विचत्वारिंशन्मेधातिथिः काण्वः प्रियमेधश्चाङ्गिरस इन्द्रो गायत्री । अन्त्ययोर्मेधातिथिः । तयोरेव विभिन्दोर्दानस्तुतिर्देवता । अष्टाविंश्यनुष्टुप् ।

२ इदं॑ वसो॒सुत॑मन्धः॒पिबा॒सुपू॑र्णमु॒दर॑म् । अना॑भयित्वरि॒मा॑ते १ नृभि॑र्धू॒तः सु॒तो॑अश्नै॒रव्यो॑वारैः॒परि॑पूतः । अश्वो॑ननि॒क्तो॒नदी॑षु २ तं॑ते॒यवं॑यथा॒गोभि॑ः॒स्वादु॑मकर्म श्री॒णन्तः॑ । इन्द्र॑त्वा॒स्मिन्त्स॑धमा॒दे ३ इन्द्र॒इत्सो॑म॒पाए॑क॒इन्द्रः॑सुत॒पावि॒श्वायुः॑ । अन्त॑र्दे॒वान्म॑र्त्यां॒श्च ४ नय॑शु॒क्रोन॑दुरा॒शिर्न॑तु॒प्राउ॑रुव्य॒चस॑म् । अप॒स्पृ॑ण्व॒तेसु॒हा॒दे॑म् ५ ॥ १७ ॥ गोभि॒र्यदी॑म॒न्येअ॒स्मन्मृ॒गंन॑व्रामृ॒गय॑न्ते । अ॒भि॒त्सर॑न्तिधे॒नुभिः॑ ६ त्रय॒इन्द्र॑स्य॒सोमाः॑सु॒तास॑ः॒सन्तु॑दे॒वस्य॑ । स्वे॒क्षये॑सुत॒पात्र॑ः ७ त्रय॑ः॒को॒शास॑ः॒श्चोत॑न्ति॒तिस्र॑श्च॒म्व॑१॒॑ः॒सुप॑र्णाः । स॒मा॒नेअधि॑भा॒मन् ८ शु॒चिर॑सि॒पुरु॑नि॒ष्ठाः॒क्षी॒रेम॑ध्य॒तआ॑शी॒तिः । द॒भ्रमि॑न्दि॒ष्ठः॒शूर॑स्य १ इ॒मेत॑इन्द्र॒सोमा॑स्ती॒व्राअ॒स्मे

सुतासः । शुक्राआशिरंयाचन्ते १० ॥ १८ ॥ ताँआशिरंपुरोळाशमिन्द्रमंसो-
मँश्रीणीहि । रेवन्तंहित्वांशृणोमि ११ हृत्सुपीतासोयुध्यन्तेदुर्मदांसोनसुरा-
याम् । ऊधर्ननुग्राजरन्ते १२ रेवाँइद्रेवतःस्तोतास्यात्त्वावतोमघोनः । प्रेदुहरिवः
सुतस्यं १३ उक्थंचनशस्यमानमगोरिरार्चिकेत । नगायत्रंगीयमानम् १४
मानइन्द्रपीयत्नवेमाशर्यतेपरादाः । शिक्षाशचीवःशचीभिः १५ ॥ ११ ॥ वयमु
त्वातदिदर्थाइन्द्रंत्वायन्तःसखायः । कण्वाउक्थेभिर्जरन्ते १६ नघेमन्यदापपन
वज्रिन्नपसोनविष्टौ । तवेदुस्तोमंचिकेत १७ इच्छन्तिदेवाःसुन्वन्तंनस्वप्नायस्पृ-
हयन्ति । यन्तिप्रमादमतन्द्राः १८ ओषुप्रयाहिवाजेभिर्मात्हूणीथाअभ्य१स्मा-
न् । महाँइवयुवजानिः १९ मोष्व१द्यदुर्हणावान्त्सायंकरदारेअस्मत् । अश्वीर-
इवजामाता २० ॥ २० ॥ विद्माह्यस्यवीरस्यभूरिदावरींसुमतिम् । त्रिवृजात

स्यमनाँसि २१ आतूपिंश्रुकण्वंवन्तंनघांविह्रशवसानात् । युशस्तंरंगृत-
मृतेः २२ प्येषेंनसोतरिन्द्रायसोमंवीरायंशक्रायं। भरापिवन्नर्याय २३ योवेदि-
ष्टोअव्यथिष्वश्वांवन्तंजरितृभ्यः । वाजैस्तोतृभ्योगोमन्तम् २४ पन्यंपन्यमि-
त्सोतारआधावतमद्याय । सोमंवीरायशूरांय २५ ॥ २१ ॥ पातांवृत्रहासुतमा
घांगमन्नारेअस्मत् । निर्यमतेशृतमूतिः २६ एहहरीब्रह्मयुजांशग्मावंक्षतःस-
खायम् । गीर्भिःश्रुतंगिर्वणसम् २७ स्वादवःसोमाआयाहिश्रीताःसोमाआ
याहि । शिप्रिन्नृवीवःशचींवोनायमच्छांसघमादंम् २८ स्तुतश्चयास्त्वावर्धन्ति
महेरार्धसेनृम्णार्य । इन्द्रंकारिणंवृधन्तः २९ गिरश्चयास्तेगिर्वाहउक्थाचतुभ्यं
तानिं । सत्रादधिरेशवांसि ३० ॥ २२ ॥ एवेदेषतुविकूर्मिर्वाजाँएकोवज्रंहस्तः ।
सनादमृक्तोदयते ३१ हन्तावृत्रंदक्षिणेनेन्द्रःपुरूपुरुहूतः । महान्महीभिःशचीं-

भिः ३२ यस्मिन्विश्वांश्चर्षणयउतच्यौत्राजयाँसिच । अनुघेन्मन्दीमघोनः ३३ एएतानिंचकारेन्द्रोविश्वायोऽतिशृण्वे । वाजदावांमघोनाम् ३४ प्रभर्तारथं गव्यन्तंमपाकाञ्चियमवंति । इनोवसुसहिवोह्वां ३५ ॥ २३ ॥ सनिंतावित्रो अर्वद्भिर्हन्तावृत्रंनृभिःशूरः । सत्योऽवितावियन्तम् ३६ यजंध्वैनंप्रियमेधाइन्द्रं सत्राचामनंसा । योभूत्सोमैःसत्यमंद्वा ३७ गाथश्रवसंसत्पतिंश्रवस्कामंपुरुत्मानंम् । कण्वासोगातवाजिनंम् ३८ यक्रुतेचिद्वास्पदेभ्योदात्सखानृभ्यः शचींवान् । येअस्मिन्कामंमश्रियन् ३९ इत्थाधीवंन्तमद्रिवःकाण्वंमेध्यांतिथिम् । मेधोभूतोऽभियन्नयः ४० शिक्षांविभिन्दोअस्मैचत्वार्ययुतादंदत् । अष्टापुरःसहस्रा ४१ उतसुत्येपयोवृधांमाकीरणंस्यनत्र्या । जनित्वनायमामहे ४२ ॥ २४ ॥

पिव चतुर्विंशतिर्मेधातिथिः काण्व इन्द्रः प्रगाथा । अन्त्यानां चतसृणां पाकस्थाम्नः कौरयाणस्य दानस्तुतिः । एकविंश्यनुष्टुप् । उपान्त्ये गायत्र्यौ । अन्त्या बृहती ।

३ पिवा सुतस्य रसिनो मत्स्वा नइन्द्र गोमतः । आ पिनो बोधि सधमाद्यो वृधे-३ स्माँ अवन्तु ते धियः १ भूया मते सुमतौ वाजिनो वयं मा नः स्तर भिमातये । अस्मा अश्वत्रा भरवताद भिष्टिभिरा नः सुम्ने पुयामय २ इमा उ त्वा पुरूवसो गिरो वर्धन्तु यामम । पावकवर्णाः शुचयो विपश्चितो ऽभि स्तोमैरनूषत ३ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे । सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ४ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ५ ॥ २५ ॥ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यं मरोचयत् । इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ६ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः । स-

मीचीनासंऋभवःसमंस्वरन्रुद्रागृणन्तपूर्व्यम् ७ अस्येदिन्द्रोवावृधेवृष्ण्यंशवोम-
देसुतस्यविष्णवि । अद्यातमंस्यमहिमानंमायवो ऽनुष्टुवन्तिपूर्वथा ८ तत्त्वायामि
सुवीर्यंतद्ब्रह्मपूर्वचित्तये । येनायतिभ्योभृगवेधनैहितेयेनप्रस्कण्वमाविंथ ९
येनांसमुद्रमसृजोमहीरपस्तदिन्द्रवृष्णेतेशवंः । सद्यःसोअस्यमहिमानसंनशे
यंक्षोणीरनुचक्रदे १० ॥ २६ ॥ शग्धीनइन्द्रयत्त्वारयिंयामिसुवीर्यम् । शग्धि
वाजायप्रथमंसिषासतेशग्धिस्तोमायपूर्व्य ११ शग्धीनोअस्ययद्धपौरमाविंथ
धियंइन्द्रसिषासतः । शग्धियथारुशंमंश्यावंकंकृपमिन्द्रप्रावःस्वर्णरं १२ कन्न-
व्योअतसीनांतुरोगृणीतमर्त्यः । नहीन्वस्यमहिमानंमिन्द्रियंस्वर्गृणन्तंआनशुः
१३ कदुस्तुवन्तंऋतयन्तदेवतऋषिःकोविप्रंओहते । कदाहवंमघवन्निन्द्रसुन्वतः
कदुस्तुवतआगमः १४ उदुत्यंमधुमत्तमागिरःस्तोमासईरते । सत्राजितोधन-

साअक्षितोतयोवाजयन्तोरथाइव १५ ॥ २७ ॥ कण्वाइवभृगवःसूर्याइवविश्व-
मिद्धीतमानशुः । इन्द्रंस्तोमेभिर्महयन्तआयवःप्रियमेधासोअस्वरन् १६ युक्ष्वा
हिवृत्रहन्तमहरीइन्द्रपरावतः । अर्वाचीनोमघवन्त्सोमपीतयउग्रऋष्वेभिरागहि
१७ इमेहितेकारवोवाशुधियाविप्रासोमेधसातये । सत्वंनोमघवन्निन्द्रगिर्वणो
वेनोनशृणुधीहवम् १८ निरिन्द्रवृहतीभ्योवृत्रंधनुभ्योअस्फुरः । निरबुंदस्यमृ-
गंयस्यमायिनोनिःपर्वतस्यगाआजः १९ निरग्नयोरुरुचुर्निरुसूर्योनिःसोमइन्द्रि-
योरसः । निरन्तरिक्षादधमोमहामहिंकृपेतदिन्द्रपौंस्यम् २० ॥ २८ ॥ यंमे
दुरिन्द्रोमरुतःपाकंस्थामाकौरयाणः । विश्वेषांत्मनाशोभिष्ठमुपेवदिविधावमा-
नम् २१ रोहितंमेपाकंस्थामासुधुरंकक्ष्यप्राम् । अदाद्रायोविबोधनम् २२
यस्माअन्येदशप्रतिधुरंवहन्तिवह्नयः । अस्तंवयोनतुग्र्यम् २३ आत्मापितुस्त-

नूर्वासंओजोदाअभ्यञ्जनम् । तुरीयुमिद्रोहितस्यपाकंस्थामानंभोजंदातारंम-
व्ववम् २४ ॥ २१ ॥

यदिन्द्रैकविंशतिर्देवातिथिः काण्व इन्द्रः प्रगाथा । पञ्चदश्यादीनां चतसृणां पूषा वा । अन्त्यानां तिसृणां कुरुङ्गस्य दानस्तुतिः । अन्त्या पुरउष्णिक् ।

४ यदिंन्द्रप्रागपागुदङ्न्यंग्वाहूयसेनृभिः । सिमांपुरूनृषूतोअस्यानवेऽसिप्र-
शर्धतुर्वशे १ यह्वारुमेरुशमेश्यावंकेकृपइन्द्रमादयंसेसचा । कण्वांसस्त्वाब्रह्म-
भिःस्तोमंवाहसइन्द्रायंच्छन्त्यागंहि २ यथांगौरोअपाकृतंतृष्यन्नेत्यवेरिणम् ।
आपित्वेनःप्रपित्वेतूयमागंहिकण्वेषुसुसचापिब ३ मन्दन्तुत्वामघवन्निन्द्रेन्दवो
राधोदेयायसुन्वते । आमुष्यासोमंमपिवश्चमूसुतंज्येष्ठंतद्धिषेसहः ४ प्रचंक्रे
सहसासहोबभञ्जमन्युमोजसा । विश्वेतइन्द्रपृतनायवोयहोनिवृक्षाइवयेमिरे ५

॥ ३० ॥ सहस्रेणेवसचतेयवीयुधायस्तआनळुपंस्तुतिम् । पुत्रंप्रावर्गंकृणुतेसु-
वीर्यंदाश्नोतिनमंउक्तिभिः ६ माभेमसाश्रंमिष्मोग्रस्यसख्येतवं । महत्तेवृष्णोंअभिचक्ष्यंकृतंपश्येमतुर्वशंयदुम् ७ सव्यामनुस्फुग्यंवावसेवृषानदानोअस्यरो-
पति । मध्वासंपृक्ताःसारघेणधेनवस्तूयमेहिद्रवापिवं ८ अश्वीरथीसुरूपइद्गोमाँ
इदिन्द्रतेसखा । श्वात्रभाजावयंसासचतेसदाचन्द्रोयांतिसभामुपं ९ ऋश्योन-
तृप्यन्नवपानमागंहिपिवासोमंवशाँअनु । निमेघमानोमघवन्दिवेदिवओजिष्ठं
दधिषेसहः १० ॥ ३१ ॥ अध्वर्योद्रावयात्वंसोममिन्द्रःपिपासति । उपंनूनंयु-
युजेवृषणाहरीआचंजगामवृत्रहा ११ स्वयंचित्समन्यतदाशुरिर्जनोयत्रासो-
मंस्यतृम्पसि । इदंतेअन्नंयुज्यंसमुक्षितंतस्येहिप्रद्रवापिवं १२ रथेष्ठायाध्वर्यवः
सोममिन्द्रायसोतन । अधिब्रध्नस्याद्रयोविचक्षतेसुन्वन्तोदाश्वध्वरम् १३ उपं

ब्रह्मवावातावृषणाहरीइन्द्रमपसुवक्षतः । अर्वाञ्चंत्वासप्तयोऽध्वरश्रियोवहन्तुसवनेदुप १४ प्रपूषणंवृणीमहेयुज्यायपुरूवसुम् । सशक्रशिक्षपुरुहूतनोधियातुजैरायेविमोचन १५ ॥ ३२ ॥ संनःशिशीहिभुरिजोरिवक्षुरंरास्वरायोविमोचन । त्वेतन्नःसुवेदमुस्रियंवसुयंत्वंहिनोविमत्यँम् १६ वेमित्वांपूषन्नृञ्जसेवेमिस्तोतवआघृणे । नतस्यवेम्यरणंहितद्वसोस्तुषेपुज्रायसान्ने १७ परागावोयवंसंकश्चिदाघृणेनित्यंरेक्णोअमर्त्य । अस्माकंपूषन्नविताशिवोभवमंहिष्ठोवाजसातये १८ स्थूरराधःशताश्वंकुरुङ्गस्यदिविष्टिषु । राज्ञस्त्वेपस्यसुभगस्यरातिषुतुर्वशेष्वमन्महि १९ धीभिःसातानिकाण्वस्यत्राजिनःप्रियमेधैरभिद्युभिः । षष्टिंसहस्रानुनिमज्जामजेनिर्यूथानिगवामृषिः २० वृक्षाश्चिन्मेअभिपित्वेअरारणुः । गांभजन्तमेहनाश्वंभजन्तमेहना २१ ॥ ३३ ॥ इति शाकलर्क्संहितायां पञ्चमाष्टके सप्तमोध्यायः ॥ ७ ॥

दूरादेकान्नचत्वारिंशद्ब्राह्मातिथिराश्विनंद्विबृहत्यनुष्टुबन्तमन्त्याःपञ्चार्धर्चाश्चैद्यस्यकशोर्दानस्तुतिर्महाँइन्द्रोष्टाचत्वारिंशद्वत्सस्तृचोन्त्यास्तिरिन्दिरस्यपार्श्व्यस्यदानस्तुतिःमयद्वःपट्त्रिंशत्पुनर्वत्सोमारुतमानस्त्र्यधिकासध्वंसआश्विनंश्यानुष्टुभंत्वानूनंसैकाशशकर्णोन्त्येगायत्र्याउपाद्येचाद्याचतुर्थीपष्ठीचतुर्दश्याद्येचबृहत्यःपञ्चमीककुब्दशम्याद्यास्त्रिष्टुब्भिराङ्गत्योयत्स्थःषट्मगाथोपश्यद्बृहतीमध्येज्योतिरनुष्टुवास्तारपङ्क्तिःमगाथस्त्वमग्नेदशवत्सआग्नेयेगायत्रेन्त्यात्रिष्टुवाद्यामतिष्ठोपाद्यावर्धमाना ।

दूरादेकान्नचत्वारिंशद्ब्राह्मातिथिः काण्वोश्विनौ गायत्री । सप्तत्रिंशत्तम्या द्वितीयार्धस्यान्त्ययोश्च चैद्यस्य कशोर्दानस्तुतिः । उपाद्ये बृहत्यौ । अन्त्यानुष्टुप् ।

५ ओम् दूरादिहेवयत्सत्यंरुणप्सुरशोश्वितत् । विभानुंविश्वधातनत् १ नृवद्वंस्त्रामनोयुजारथेनपृथुपाजसा । सचेथेअश्विनोषसम् २ युवाभ्यांवाजिनीवसू प्रतिस्तोमाअदक्षत । वाचंदूतोयथोहिषे ३ पुरुप्रियाणंऊतयेपुरुमन्द्रापुरूवसू । स्तुषेकण्वासोअश्विना ४ महिष्ठावाजसातमेपर्यन्ताशुभस्पती । गन्तारादाशु-

पोगृहम् ५ ॥ १ ॥ तासुदेवायदाशुषेसुमेधामविंतारिणीम् । घृतैर्गव्यूतिमुक्षतम् ६ आनःस्तोममुपद्रवत्तूयंश्येनेभिराशुभिः । यातमश्वेभिराश्विना ७ येभिस्तिस्रःपरावतोदिवोविश्वानिरोचना । त्रीरुँक्षून्पारिदीयथः ८ उतनोगोमंतीरिषंउतसातीरहर्विदा । विपथःसातयेसितम् ९ आनोगोमन्तमश्विनासुवीरंसुरथंरयिम् । वोळ्हमश्वावतीरिषः १० ॥ २ ॥ वावृधानाशुभस्पतीदस्राहिरण्यवर्तनी । पिबंतंसोम्यंमधु ११ अस्मभ्यंवाजिनीवसूमघवद्भ्यश्चसप्रथः । छर्दियंन्तमदाभ्यम् १२ निपुत्रब्रह्मजनानांयाविष्टंतूयमागतम् । मोष्वंन्याँउपारतम् १३ अस्यपिबतमश्विनायुवंमदस्यचारुणः । मध्वोरातस्यधिष्ण्या १४ अस्मेआवहतंरयिंशतवन्तंसहस्रिणम् । पुरुक्षुंविश्वधायसम् १५ ॥ ३ ॥ पुरुत्रा चिद्धिवोनराविह्वयन्तेमनीषिणः । वाघद्भिरश्विनागतम् १६ जनासोवृक्तबर्हिषः

पोहविष्मन्तोअरंकृतः । युवांहवन्तेअश्विना १७ अस्माकमद्यवांमयंस्तोमो वाहिष्ठोअन्तमः । युवाभ्यांभूत्वश्विना १८ योहवांमधुनोहतिराहेतोरथचर्षणे । ततःपिवतमश्विना १९ तेननोवाजिनीवसूपश्वेतोकायशंगवे । वहंतंपीवरीरिषः २० ॥ ४ ॥ उतनोदिव्याइषउतासिंधूरहर्विदा । अपद्वारेववर्षथः २१ कुदा वांतोग्र्योविधत्समुद्रजहितोनरा । यद्वांरथोविभिष्पतात् २२ युवंकण्वायनासत्यापिरिप्तायहर्म्ये । शश्वदूतीदेशस्यथः २३ ताभिरायातमूतिभिर्नव्यसीभिः सुशस्तिभिः । यद्वांवृषण्वसूहुवे २४ यथांचित्कण्वमावंतंप्रियमेधमुपस्तुतम् । अत्रिंगिंजारमश्विना २५ ॥ ५ ॥ यथोतकृत्व्येधनेशुंगोष्वगस्त्यम् । यथावाजेषुसोभरिम् २६ एतावद्वांवृषण्वसूअतोवाभूयोअश्विना । गृणन्तःसुम्नमीमहे २७ रथंहिरण्यवन्धुरंहिरण्याभीशुमश्विना । आहिस्थाथोदिविस्पृशं-

म् २८ हिरण्ययीवारभिरीषाअक्षौहिरण्ययः । उभाचक्राहिरण्ययाँ २९ तेनंनो वाजिनीवसूपरावतंश्चिदागंतम् । उपेमांसुष्टुतिंमम ३० ॥६॥ आवंहेथेपराकात्पू-र्वीरभन्तावश्विना । इषोदासीरमर्त्या ३१ आनोंयुम्नैराश्रवोंभिरारायांतमश्वि-ना । पुरुश्चन्द्रानासत्या ३२ एहवांप्रुषितप्सवोवयोंवहन्तुपर्णिनः । अच्छांस्व-ध्वरंजनम् ३३ रथंवामनुंगायसंयइषावतेंतेसह । नचक्रमभिबाधते ३४ हिर-ण्ययेनरथेनद्रवत्पाणिभिरश्वैः । धीजवनानासत्या ३५ ॥ ७ ॥ युवंमृगंजागृ-वांसंस्वदंथोवावृषण्वसू । तानःपृङ्क्तमिषारयिम् ३६ तामेअश्विनासनीनांवि-द्यातंनवानाम् । यथांचिच्चैद्यःकशुःशतमुष्ट्रानांददत्सहस्रादशगोनाम् ३७ यो-मेहिरण्यसंदृशोदशराज्ञोअमंहत । अधस्पदाइच्चैद्यस्यकृष्टयश्चर्मम्नाअभितो-

जनाः३८माकिरेनापथागाद्येनेमेयन्तिचेदयः। अन्योनेत्सूरिरोहतेभूरिदावत्तरो-
जनः ३९ ॥ ८ ॥ इत्यष्टमे मण्डले प्रथमोनुवाकः ॥ १ ॥

अथाँ इन्द्रोष्टाचत्वारिंशद्वृत्तस्यः काण्व इन्द्रो गायत्री । अन्त्यानां
तिसृणां तिरिंदिरस्य पारशव्यस्य दानस्तुतिः ।

६ महाँइन्द्रोयओजसापर्जन्योवृष्टिमाँइव। स्तोमैर्वत्सस्यवावृधे १ प्रजा-
मृतस्यपिप्रतःप्रयद्भरन्तवह्नयः । विप्राऋतस्यवाहसा २ कण्वाइन्द्रंयदक्रत
स्तोमैर्यज्ञस्यसाधनम् । जामिब्रुवतुआयुधम् ३ समस्यमन्यवेविशोविश्वा
नमन्तकृष्टयः । समुद्रायेवसिन्धवः ४ ओजस्तदस्यतित्विषउभेयत्समवर्त-
यत् । इन्द्रश्चर्मेवरोदसी ५ ॥ १ ॥ विचिद्वृत्रस्यदोधतोवज्रेणशतपर्वणा ।
शिरोविभेदवृष्णिना ६ इमाअभिष्णोनुमोविषामग्नेषुधीतयः । अग्नेःशो-

चिर्नदियुतः ७ गुहासतीरुप्तमनाप्रयच्छोचन्तधीतयः । कण्वाऋतस्यधारया ८ प्रतमिन्द्रनशीमहिरयिंगोमन्तमश्विनम् । प्रब्रह्मपूर्वचित्तये ९ अहमिद्धिपितुष्परिमेधामृतस्यजग्रभं । अहंसूर्यइवाजनि १० ॥ १० ॥ अहं प्रत्नेनमन्मनागिरःशुम्भामिकण्ववत् । येनेन्द्रःशुष्ममिद्धये ११ येत्वामिन्द्रन तुष्टुवुर्ऋषयोयेचतुष्टुवुः । ममेदूर्धस्वसुष्टुतः १२ यदस्यमन्युरध्वनीहिवृत्रंपर्वशो रुजन् । अपःसमुद्रमैरयत् १३ निशुष्णंइन्द्रधर्णसिंवज्रंजघन्थदस्यवे । वृषा ह्युग्रशृण्विषे १४ नद्यावइन्द्रमोजसानान्तरिक्षाणिवज्रिणम् । नविंव्यचन्तभूमयः १५ ॥ ११ ॥ यस्तंइन्द्रमहीरपःस्तंभूयमानआशयत् । नितंपद्यासुशिश्रथः १६ यइमेरोदसीमहीसमीचीसमजग्रभीत् । तमोभिरिन्द्रतंगुहः १७ य इन्द्रयतंयस्त्वाभृगवोयेचतुष्टुवुः । ममेदुग्रश्रुधीहवम् १८ इमास्तंइन्द्रपृश्नयोघृ-

तंदुहतआशिरम् । एनामृतस्यपिप्युषीः १९ याइन्द्रप्रस्वस्त्वासागर्भमचक्रिरन् । परिधमँवसूयँम् २० ॥ १२ ॥ त्वामिच्छवसस्पतेकण्वाउक्थेनवावृधुः । त्वांसुतासइन्दवः २१ तवेदिन्द्रप्रणीतिषूतप्रशस्तिरद्रिवः । यज्ञोवितन्तसाय्यः २२ आनइन्द्रमहीमिषंपुरंनदर्षिगोमतीम् । उतप्रजांसुवीयँम् २३ उत त्यदाश्वश्व्यंयदिन्द्रनाहुंपीष्वा । अग्रेविक्षुप्रदीदयत् २४ अभिव्रजंनतन्निषेसूरंउपाकचक्षसम् । यदिन्द्रमृळयासिनः २५ ॥ १३ ॥ यदङ्गतविषीयसइन्द्रप्रराजंसिक्षितीः । महाँअपारओजसा २६ तंत्वाहविष्मतीर्विशउपब्रुवतऊतये । उरुज्रयसमिन्दुभिः २७ उपह्वरेगिरीणांसंगथेचनदीनाम् । धियाविप्रोअजायत २८ अतःसमुद्रमुदतश्चिकित्वाँअवपश्यति । यतोविपानएजति २९ आदित्प्रत्नस्यरेतसोज्योतिष्पश्यन्तिवासरम् । परोयदिध्यतेदिवा ३० ॥ १४ ॥

कण्वासइन्द्रतेमतिंविश्वेवर्धन्तिपौंस्यम् । उतोशंविष्ठवृष्ण्यम् ३१ इमांमइन्द्र सुष्टुतिंजुषस्वप्रसुमामंव । उतप्रवंधयामतिम् ३२ उतब्रह्मण्यावयंतुभ्यंप्रवृद्धव-ज्रिवः । विप्रांअतक्ष्मजीवसे ३३ अभिकण्वांअनूषतापोनप्रवतांयतीः । इन्द्रं वर्नन्वतीमतिः ३४ इन्द्रंमुक्थानिवावृधुःसमुद्रमिवसिन्धवः । अनुत्तमन्युमज-रम् ३५ ॥ १५ ॥ आनोयाहिपरावतोहरिभ्यांहर्यताभ्यांम् । इममिन्द्रसुतं पिव ३६ त्वामिद्वृत्रहन्तमजनासोवृक्तबर्हिषः । हवन्तेवाजसातये ३७ अनु त्वारोदसीउभेचक्रंनवर्त्येतशम् । अनुसुवानसइन्दवः ३८ मन्दस्वासुस्वर्णर उतेन्द्रशर्यणावति । मत्स्वाविवस्वतोमती ३९ वावृधानउपद्यविवृषाववज्रयरोर-वीत् । वृत्रहासोमपातमः ४० ॥ १६ ॥ ऋषिर्हिपूर्वजाअस्येकईशानओजसा । इन्द्रंचोष्कूयसेवसु ४१ अस्माकंत्वासुताँउपवीतपृष्ठाअभिप्रयः । शतंव-

हन्तुहरयः ४२ इमांसुपूव्यांधियंमधोर्घृतस्यपिप्युषीम् । कण्वाउक्थेनवावृधुः ४३ इन्द्रमिद्धिमहीनांमेधेवृणीतमर्त्यः । इन्द्रंसनिष्युरूतये ४४ अर्वाञ्चंत्वा पुरुष्टुतप्रियमेधस्तुताहरी । सोमपेयायवक्षतः ४५ शतमहंतिरिंदिरेसहस्रंपशावादंदे । राधांसियाद्वांनाम् ४६ त्रीणिशतान्यर्वतांसहस्रादशगोनाम् । ददुष्पज्रायसाम्ने ४७ उंदानट्ककुहोदिवमुष्ट्राश्वतुर्युजोददत् । श्रवसायाद्वंजनंम् ४८ ॥ १७ ॥

म यद्वः पदत्रिंशत्पुनर्वत्सः काण्वो मरुतो गायत्री ।

७ प्रयद्वस्त्रिष्टुभमिषंमरुतोविप्रोअक्षरत् । विपर्वतेपुराजथ १ यदङ्गतंविपीयवोयामंशुभ्राअचिध्वम् । निपर्वताअहासत २ उदीरयन्तवायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्तंपिप्युषीमिषंम् ३ वर्पन्तिमरुतोमिहंम्रवेपयन्तिपर्वतान् ।

यद्याम॑पान्ति॒वायु॑भिः ४ नियद्याम॑यवो॒गिरि॑र्नि॒सिन्ध॑वो॒विधर्म॑णे । म॒हेशु॒ष्मा-
यये॒मि॒रे ५ ॥ १८ ॥ यु॒ष्माँउ॒नक्तू॑मू॒तयेयु॒ष्मान्दि॒वाहवामहे । यु॒ष्मान्प्रयु॒त्यध्व॒रे
६ उदु॒त्येअ॑रु॒णप्स॑वश्चि॒त्रायामे॑ञ्जिरीरते । वा॒श्राअधि॒ष्णु॑नादि॒वः ७ सृ॒ज-
न्ति॒र॒श्मिमो॑जसा॒पन्था॑सू॒र्या॑य॒यात॑वे । तेभा॒नुभि॒र्वित॑स्थिरे ८ इ॒मांमे॑मरु-
तो॒गिर॑मि॒मंस्तोम॑मृभुक्षणः । इ॒मंमे॑वनता॒हव॑म् ९ त्रीणि॒सरां॑सि॒पृश्न॑यो
दु॒दुह्रे॒वजि॑णेम॒धु । उत्सं॑कव॒न्धमु॒द्रिण॑म् १० ॥ ११ ॥ मरु॑तो॒यद्ध॑वो
दि॒वःसु॑म्ना॒यन्तो॒हवा॑महे । आतू॒नउ॑प॒गन्तन ११ यू॒यंहिष्ठा॑सु॒दान॑वो॒रुद्रा॑ऋभुक्ष-
णो॒दमे॑ ।उ॒तप्रचे॑तसो॒मदे॑ १२ आनो॒र॒यिंम॑द्र्यु॒तंपु॑रुक्षु॒विश्व॑धा॒यस॑म्।इ॒यं॑ता॒मरु॑तो
दि॒वः १३ अधी॒व॒यद्वि॒रो॑णा॒यामे॑शु॒भ्रा॒अचि॑ध्वम्। सु॒वा॒नैमं॑न्दध्व॒इन्दु॑भिः १४ ए-
तावं॑तश्चि॒देवां॑सु॒म्नंभि॑क्षेत॒मर्त्यः॑। अदा॑भ्यस्यु॒मन्म॑भिः १५॥ २० ॥ येद्र॒प्साइ॑व

रोदसीधमन्त्यनुवृष्टिभिः । उत्सं दुहन्तोअक्षितम् १६ उदुस्वानेभिरीरतउद्रथै-
रुदुवायुभिः । उत्स्तोमैःपृश्निमातरः १७ येनावतुर्वशंयदुंयेनकण्वंधनस्पृतम् ।
रायेसुतस्यधीमहि १८ इमाउवःसुदानवोघृतंनपिप्युषीरिषः । वर्धान्काण्वस्यम-
न्मभिः १९ कंनूनंसुदानवोमदंथावृक्तबर्हिषः । ब्रह्माकोवःसपर्यति २० ॥२१॥
नहिष्मयद्धवःपुरास्तोमेभिर्वृक्तबर्हिषः । शर्धाँऋतस्यजिन्वथ २१ समुत्येमहा-
तीरपःसंक्षोणीसमुसूर्यम् । संवज्रंपर्वशोदधुः २२ विवृत्रंपर्वशोययुर्विपर्वताँअरा-
जिनः । चक्राणावृष्णिपौंस्यम् २३ अनुत्रितस्ययुध्यतःशुष्ममावन्नुतक्रतुम् ।
अन्विन्द्रंवृत्रतूर्ये २४ विद्युद्धस्ताअभिद्यवःशिप्राःशीर्षन्हिरण्ययीः । शुभ्राव्य-
ञ्जतश्रिये २५ ॥ २२ ॥ उशनायत्परावतउक्षणोरन्धृमयातन । द्यौर्नचक्रद-

द्रिया २६ आनोमुखस्यदावनेऽश्वैर्हिरण्यपाणिभिः । देवासउपगन्तन २७ यदेपांपृषतीरयेप्रष्टिर्वहंतिरोहितः । यान्तिशुभ्राऋिणन्नपः २८ सुषोमेशर्यणावत्यार्जीकेपस्त्यावति । ययुर्निचक्रयानरः २९ कदागच्छातमरुतइत्याविप्रंहवमानम् । माडीकेभिर्नाधमानम् ३० ॥ २३ ॥ कद्धनूनंकधप्रियोयादिन्द्रमजोहातन । कोवःसखित्वओहते ३१ सहोषुणोवज्रंहस्तैःकण्वासोअग्निंमरुद्भिः । स्तुषेहिरण्यवाशीभिः ३२ ओषुवृष्णःप्रयज्यूनानव्यसेसुवितायं । ववृत्यांचित्रवाजान् ३३ गिरयश्चिन्निजिंहतेपशूनासोमन्यमानाः । पर्वताश्चिन्नियेमिरे ३४ आक्षण्यावानोवहन्त्युन्तरिक्षेणपतंतः । धातारःस्तुवतेवयः ३५ अग्निर्हिजानिंपूर्व्यश्छन्दोनसूरोअर्चिषा । तेभानुभिर्वितंस्थिरे ३६ ॥ २४ ॥

८ आनोविश्वाभिरूतिभिरश्विनागच्छतंयुवम् । दस्राहिरण्यवर्तनीपिबतंसोम्यंमधु १ आनूनंयातमश्विनारथेनसूर्यत्वचा । भुजीहिरण्यपेशसाकवीगम्भीरचेतसा २ आयातंनहुपस्पर्यान्तरिक्षात्सुवृक्तिभिः । पिबाथोआश्विनामधुकण्वानांसवनेसुतम् ३ आनोयातंदिवस्पर्यान्तरिक्षादधप्रिया । पुत्रःकण्वस्यवामिहसुषावसोम्यंमधु ४ आनोयातमुपश्रुत्यश्विनासोमपीतये । स्वाहास्तोमस्यवर्धनाप्रकवीधीतिभिर्नरा ५ ॥ २५ ॥ यञ्चिद्धिवांपुरुरूपयोजुहूरेऽवसेनरा । आयातमश्विनागतमुपेमांसुष्टुतिंमम ६ दिवश्चिद्रोचनादध्यानोगन्तंस्वर्विदा । धीभिर्वत्सप्रचेतसास्तोमेभिर्हवनश्रुता ७ किमन्येपर्यासतेऽस्मत्स्तोमेभिरश्विना ।

पुत्रःकण्वस्यवामृषिर्गोभिर्वत्सोअवीवृधत् ८ आवांविप्रइहावसेऽह्वत्स्तोमेभिरश्विना । अरिंप्रावृत्रहन्तमातानोभूतंमयोभुवा ९ आयह्वांयोपणारथमतिष्ठद्वाजिनीवसू । विश्वान्यश्विनायुवंप्रधीतान्यंगच्छतम् १० ॥ २६ ॥ अतःसहस्रंनिर्णिजारथेनायातमश्विना । वत्सोवांमधुमद्वचोऽशंसीत्काव्यःकविः ११ पुरुमन्द्रापुरूवसूमनोतरारयीणाम् । स्तोमंमेअश्विनाविममभिवह्नीं अनूपाताम् १२ आनोविश्वान्यश्विनाधत्तंराधांस्यह्रया । कृतंनऋत्वियावतो मानोरिरथतंनिदे १३ यन्नासत्यापरावतियह्वास्थोअध्यम्बरे । अतःसहस्रंनिर्णिजारथेनायातमश्विना १४ योवांनासत्यावृषिर्गोभिर्वत्सोअवीवृधत् । तस्मैसहस्रंनिर्णिजमिषंयन्तंघृतश्चुतम् १५ ॥ २७ ॥ प्रास्माऊँघृतश्चुतमश्विनाय-

च्छंतंयुवम् । योवांसुम्नायंतुष्टवद्वसूयाद्वांनुनस्पती १६ आनोंगन्तंरिशादसेमं
स्तोमंपुरुभुजा । कृतंनःसुश्रियोनरेमादातमभिष्टये १७ आवांविश्वाभिरूतिभिः
प्रियमेधाअहूषत । राजन्तावध्वराणामश्विनायामंहूतिषु १८ आनोंगन्तंम-
योभुवाश्विनाशंभुवायुवम् । योवांविपन्यूधीतिभिर्गीर्भिर्वत्सोअवीवृधत् १९
याभिःकण्वंमेधातिथिंयाभिर्वशंदशव्रजम् । याभिर्गोशर्यमावंतंताभिर्नोऽवतं
नरा २० ॥ २८ ॥ याभिर्नरात्रसदस्युमावंतंकृत्व्येधनें । ताभिःष्वं१स्माँअ-
श्विनाप्रावंतंवाजसातये २१ प्रवांस्तोमाःसुवृक्तयोगिरोवर्धन्त्वश्विना । पुरुत्रा
वृत्रहन्तमातानोभूतंपुरुस्पृहा २२ त्रीणिपदान्यश्विनोराविःसान्तिगुहापरः । कवी
ऋतस्यपत्मभिरर्वाग्जीवेभ्यस्परि २३ ॥ २९ ॥

आ नूनमेकविंशतिः शशकर्णः काण्वोश्विनौ । आद्या चतुर्थी षष्ठी चतुर्दशी पञ्चदशी च बृहतः । द्वितीया तृतीया विंश्येकविंशी च गायत्र्यः । पञ्चमी ककुप् । दशमी त्रिष्टुप् । एकादशी विराट् । द्वादशी जगती । शिष्टा अनुष्टुभः ।

१ आनूनमश्विनायुवं वत्सस्य गन्तमवसे । प्रास्मै यच्छतमवृकं पृथुच्छर्दिर्युयुतं याअरातयः १ यदन्तरिक्षेयद्दिवियत्पञ्चमानुषाँअनु । नुम्णंतदश्विना २ येवांदंसांस्यश्विनाविप्रासःपरिमामृशुः । एवेत्काण्वस्यबोधतम् ३ अयंवांघर्मो अश्विनास्तोमेनुपरिषिच्यते । अयंसोमोमधुमान्वाजिनीवसूयेनवृत्रंचिकेतथः ४ यदप्सुयद्वनस्पतौयदोषधीषुपुरुदंससाकृतम् । तेनमाविष्टमश्विना ५ ॥ ३० ॥ यन्नासत्याभुरण्यथोयद्वादेवभिपुज्यथः । अयंवांवत्सोमतिभिर्नविन्धते हविष्मन्तंहिगच्छथः ६ आनूनमश्विनोर्ऋषिःस्तोमंचिकेतवामया । आसोमं ॥३७९॥

मधुमत्तमंघर्मंसिञ्चादथर्वणि ७ आनूनंरघुवर्तनिंरथंतिष्ठाथोअश्विना । आवां
स्तोमांइमेममनभोनचुच्यवीरत ८ यद्द्यवांनासत्योकथैरांचुच्युवीमहि । यद्वा
वाणीभिरश्विनेवेत्काण्वस्यबोधतम् ९ यद्वांकक्षीवाँउतयद्व्यश्वऋषिर्यद्वांदीर्घतमा
जुहाव । पृथीयद्वांवैन्यःसादनेष्वेवेदतोअश्विनाचेतयेथाम् १० ॥ ३१ ॥ यातं
छर्दिष्पाउतनःपरस्पाभूतंजगत्पाउतनस्तनूपा । वर्तिस्तोकायतनयाययातम् ११
यदिन्द्रेणसरथंयाथोअश्विनायद्वावायुनाभवथःसमोकसा । यदादित्येभिर्ऋभुभिः
सजोषसायद्वाविष्णोविक्रमणेषुतिष्ठथः १२ यद्द्याश्विनावहंहुवेयवाजसातये ।
यत्पृत्सुतुर्वणेसहस्तच्छ्रेष्ठंमश्विनोरवः १३ आनूनंयातमश्विनेमाहव्यानिवांहि-
ता । इमेसोमासोअधितुर्वशेयदाविमेकण्वेषुवामथ १४ यन्नासत्यापराकेअर्वा-
केअस्तिभेषजम् । तेननूनंविमदायप्रचेतसाछर्दिर्वत्सायंयच्छतम् १५ ॥ ३२ ॥

अभुत्स्युप्रदेव्यासाकंवाचाहमश्विनोः । व्यावर्दैव्यामतिंविरातिंमत्यैंभ्यः १६
प्रवोवयोपोअश्विनाप्रदैविसूनृतेमहि । प्रयज्ञहोतरानुषक्प्रमदायश्रवोबृहत् १७
यदुपोयासिंभानुनासंसूर्यैणरोचसे । आहायमश्विनोरथोवर्तियाँतिनृपाय्यम् १८
यदापीतासोअंशवोगावोनदुहऊधंभिः । यद्वावाणीरनूषतप्रदैवयन्तोअश्विना १९
प्रयुम्नायप्रशवंसेप्रनृपाह्यायशमँणे । प्रदक्षायप्रचेतसा २० यन्नूनंधीभिरश्विना
पितुर्योनानिपीदथः । यद्वासुम्नेभिरुक्थ्या २१ ॥ ३३ ॥

यत्स्थ षट् मगाथः कण्वोश्विनौ । आद्योपान्त्ये बृहत्यौ । द्वितीया मध्येज्योतिः ।
तृतीयानुष्टुप् । चतुर्थ्यास्तारपङ्क्तिः । अन्त्या सतोबृहती ।

१० यत्स्थोदीर्घप्रसद्मनियद्वादोरोचनेदिवः । यद्वासमुद्रेअध्याकृतेगृहेऽतआ
यातमश्विना १ यद्वायज्ञंमनवेसंमिमिक्षथुरेवेत्काण्वस्यबोधतम् । बृहस्पतिंवि- ॥३८०॥

श्वान्देवाँअहंहुवइन्द्राविष्णूअश्विनावाशुहेषसा २ त्यान्व१श्विनाहुवेसुदंससागृभे कृता। ययोरस्तिप्रणःसख्यंदेवेष्वध्याप्यम् ३ ययोरधिप्रयज्ञाअंसूरेसन्तिसूर्यः। तायज्ञस्याध्वरस्यप्रचेतसास्वधाभिर्यापिबतःसोम्यंमधु ४ यद्याश्विनावपाग्य-त्प्राक्स्थोवाजिनीवसू। यद्वह्व्यनंवितुर्वशेयदौहुवेवामथुमागंतम् ५ यदन्तरि-क्षेपतंथःपुरुभुजायद्वेमेरोदसीअनु । यद्वास्वधाभिरधितिष्ठथोरथमतआयातम-श्विना ६ ॥ ३४ ॥

त्वमग्ने दश वत्सः काण्वोग्निर्गायत्री । आद्या प्रतिष्ठा । उपाया
वर्धमाना । अन्त्या त्रिष्टुप् ।

११ त्वमग्नेव्रतपाअंसिदेवआमर्त्येष्वा । त्वंयज्ञेष्वीड्यः १ त्वमंसिप्रशस्यो विदथेषुसहन्त्य । अग्नेरथीरध्वराणाम् २ सत्वमस्मदपहिपोंयुयोधिजातवेदः ।

अदेवीरग्नेअरातीः ३ अन्तिचित्सन्तमहयज्ञंमतींस्यरिपोः । नोपवेविजातवे-
दः ४ मर्ताअमर्त्यस्यतेभूरिनाममनामहे । विप्रासोजातवेदसः ५ ॥ ३५ ॥
विप्रंविप्रासोऽवसेदेवंमतींसऊतये । अग्निंगीर्भिर्हवामहे ६ आतेवत्सोमनोयम-
त्परमाच्चित्सधस्थात् । अग्नेत्वांकामयागिरा ७ पुरुत्राहिसदृङ्ङसिविशोविश्वा
अनुप्रभुः । समत्सुत्वाहवामहे ८ समत्स्वग्निमवसेवाजयन्तोहवामहे । वाजेषु
चित्रराधसम् ९ प्रत्नोहिकमीड्योअध्वरेषुसनाच्चहोतानव्यश्चसत्सि । स्वांचाग्ने
तन्वंपिप्रयस्वास्मभ्यंचसौभगमायजस्व १० ॥ ३६ ॥ इति शाकलर्क्संहितायां
पञ्चमाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

इति पञ्चमाष्टकः समाप्तः ।

यइन्द्रत्रयस्त्रिंशत्पर्वतऔष्णहंत्विन्द्रःसुतेपुनारदोयदिन्द्रपश्चेनागोपूक्तस्वसूक्तिनौकाण्वायनौतम्त्रभिसप्तोनौष्णहंमसम्राजंद्वादशैरिविडिरायाहिपश्चेनामगाथान्तमिदंहद्व्यधिकादिसमौष्णहमष्टम्यश्चिभ्यांपराग्निस्तूर्याणिळानांतगूर्धयसप्तत्रिंशत्सोभरिराग्नेयंकाकुभंमागाथंहापितुर्नद्विपदान्येककुप्पङ्क्तीत्रसदस्योर्दानस्तुतिस्तत्पूर्वेउष्णिक्सतोबृहसावादित्येभ्यआगन्तपङ्क्तिशतिर्मारुतम् ।

१२ ॐम् यइंन्द्रसोमुपार्तमोमर्दःशविष्ठचेर्तति । येनाहंसिन्यं १ त्रिणंतमींमहे १ येनादशंग्वमध्रिंगुवेपयन्तंस्वर्णरम् । येनांसमुद्रमार्विथातमींमहे २ येनुस्सिन्धुंमहीरपोरथाँइवप्रचोदयंः । पन्थांमृतस्ययातवेतमींमहे ३ इमंस्तोमंमभिष्टयेघृतंनपूतमंद्रिवः । येनानुसद्यओजंसाववक्षिंथ ४ इमंजुंषस्वगिर्वणःसमुद्रइंवपिन्वते । इद्रविश्वांभिरूतिभिर्ववक्षिंथ ५ ॥ १ ॥ योनोंदेवःपरावतंःसखित्वनायंमामहे । दिवोनवृष्टिंप्रथयन्ववक्षिंथ ६ ववक्षुरंस्यकेतवंउतवज्रोगभंस्त्योः ।

यत्सूर्योनरोदसीअवर्धयत् ७ यदिंप्रवृद्धसत्पतेसहस्रंमहिषाँअघः।आदित्तेइन्द्रियं
महिप्रवावृधे ८ इन्द्रःसूर्यस्यरश्मिभिन्यँर्शसानमोपति । अग्निर्वनेवसास्रहिःप्र
बावृधे ९ इयंतेऽकृत्वियावतीधीतिरतिनवीयसी । सपर्यन्तीपुरुप्रियाभिमीतइत्
१० ॥ २ ॥ गर्भोयज्ञस्यदेवयुःऋतुंपुनीतआनुषक् । स्तोमैरिन्द्रस्यवावृधेमि-
मीतइत् ११ सनिमित्रस्यपप्रथइन्द्रःसोमस्यपीतये । प्राचीवाशीवसुन्वतेमि-
मीतइत् १२ यंविप्रांउक्थवाहसोऽभिप्रमन्दुरायवः । घृतंनपिप्यआसन्यृतस्य
यत् १३ उतस्वराजेअदितिःस्तोममिन्द्रायजीजनत् । पुरुप्रशस्तमूतयेऽकृतस्य
यत् १४ अभिवह्नयऊतयेऽनूषतप्रशस्तयेनदेवविव्रताहरीऋतस्ययत् १५ ॥ ३ ॥
यत्सोमेमिन्द्रविष्णवियद्वाघत्रितआह्ये । यद्वामरुत्सुमन्दसेसमिन्दुभिः १६
यद्वाशक्रपरावतिसमुद्रेअधिमन्दसे । अस्माकमित्सुतरेणासमिन्दुभिः १७

यद्वासिसुन्वतोवृधोयजमानस्यसत्पते । उक्थेवायस्यरण्यंसिसमिन्दुभिः १८
देवंदेवंवोऽवसइन्द्रमिन्द्रंगृणीषणि । अधायज्ञायतुर्वणेव्यानशुः १९ यज्ञेभिर्य-
ज्ञवाहसंसोमेभिःसोमपातमम् । होत्राभिरिन्द्रंवावृधुव्यानशुः २० ॥ ४ ॥
महीरस्यप्रणीतयःपूर्वीरुतप्रशस्तयः । विश्वावसूनिदाशुषेव्यानशुः २१ इन्द्रंवृ-
त्रायहन्तवेदेवासोदधिरेपुरः । इन्द्रंवाणीरनूषतासमोजसे २२ महान्तंमहिनावयं
स्तोमेभिर्हवनश्रुतम् । अर्कैरभिप्रणोनुमःसमोजसे २३ नयंवंवित्क्रोरोदसी
नान्तरिक्षाणिवज्रिणम् । अमादिदस्यतित्विषेसमोजसः २४ यदिन्द्रपृतनाज्ये
देवास्त्वादधिरेपुरः । आदित्तेहर्यताहरीववक्षतुः २५ ॥ ५ ॥ यदावृत्रंनदीवृतं
शवंसावज्रिन्वधीः । आदित्तेहर्यताहरीववक्षतुः २६ यदातेविष्णुरोजसात्रीणि
पदाविचक्रमे । आदित्तेहर्यताहरीववक्षतुः २७ यदातेहर्यताहरीवावृधातेदिवे-

दिवे । आदित्तेविश्वाभुवनानियेमिरे २८ यदातेमारुतीर्विशस्तुभ्यमिन्द्रनिये-
मिरे । आदित्तेविश्वाभुवनानियेमिरे २९ यदासूर्यममुंदिविशुक्रंज्योतिरधारयः।
आदित्तेविश्वाभुवनानियेमिरे ३० इमांतइन्द्रसुष्टुतिंविप्रइयर्तिधीतिभिः । जा-
मिंपदेवपिप्रतींप्राध्वरे ३१ यदस्यधामंनिप्रियेसमीचीनासोअस्वरन् । नाभा
यज्ञस्यदोहनाप्राध्वरे ३२ सुवीर्यंस्वश्व्यंसुगव्यमिन्द्रदाशिनः । होतेवपूर्वचित्तये
प्राध्वरे ३३ ॥ ६ ॥ इत्यष्टमे मण्डले द्वितीयोनुवाकः ॥ २ ॥

इन्द्रः सुतेषु त्रयस्त्रिंशन्नारदः काण्व इन्द्र उष्णिक् ।

१३ इन्द्रःसुतेषुसोमेषुक्रतुंपुनीतउक्थ्यम् । विदेवृधस्यदक्षसोमहान्हिषः १
सप्रथमेव्योमनिदेवानांसदनेवृधः । सुपारःसुश्रवस्तमःसमप्सुजित् २ तमह्वेवा-
जसातयइन्द्रंभरायशुष्मिणम् । भवानःसुम्नेअन्तमःसखावृधे३ इयंतइन्द्रगिर्वणो ॥३८३॥

रातिःक्षरतिसुन्वतः । मन्दानोअस्यबर्हिषोविराजसि ४ नूनंतदिन्द्रदद्भिनोयत्त्वा सुन्वन्तईमहे । रयिंनश्चित्रमाभरास्वर्विदम् ५ ॥ ७ ॥ स्तोतायत्तेविचर्षणिरति-प्रशर्धयद्गिरः । वयाइवानुरोहतेजुषन्तयत् ६ प्रत्नवज्जनयागिरःशृणुधीजरितुर्हवम् । मदेमदेवक्षियासुकृत्वने ७ क्रीळन्त्यस्यसूनृताआपोनप्रवतायतीः । अयाधियायउच्यतेपतिर्दिवः ८ उतोपतिर्यउच्यतेकृष्टीनाममेकइद्वशी । नमोवृधै-रवस्युभिःसुतेरण १ स्तुहिश्रुतंविपश्चितंहरीयस्यंप्रसक्षिणा । गन्तारादाशुषोगृ-हंनमस्विनः १० ॥ ८ ॥ तूतुजानोमहेमतेऽश्वैभिःप्रुषितप्सुभिः । आयाहियज्ञमाशुभिःशमिद्धितै ११ इन्द्रंशविष्ठसत्पतेरयिंगृणत्सुधारय । श्रवःसूरिभ्यो अमृतंवसुत्वनम् १२ हवेत्वासूरउदितेहवेमध्यंदिनेदिवः । जुषाणइन्द्रसतिभि-र्नआगहि १३ आतूगहिप्रतुद्रवमत्स्वासुतस्यगोमतः । तन्तुंतनुष्वपूर्व्यंयथा

विदे १४ यच्छक्रासिपरावतियदर्वावतिवृत्रहन् । यद्वासमुद्रेअन्धसोऽवितेदसि १५ ॥ १ ॥ इन्द्रैवर्धन्तुनोगिरइन्द्रैसुतासइन्दवः । इन्द्रेहविष्मतीर्विशोअराणिपुः १६ तमिद्विप्राअवस्यवःप्रवत्वतीभिरूतीभिः । इन्द्रंक्षोणीरवर्धयन्वयाइव १७ त्रिकद्रुकेषुचेतनंदेवासोयज्ञमाशत । तमिद्वर्धन्तुनोगिरःसदावृधम् १८ स्तोतायत्तेअनुव्रतउक्थान्यृतुथादधे । शुचिंःपावकउच्यतेसोअद्भुतः १९ तदिद्रुद्रस्यचेततियद्वंप्रत्नेषुधामसु । मनोयत्राविताधुर्विचेतसः २० ॥ १० ॥ यदिंमेसख्यमावरंइमस्यपाह्यन्धसः । येनाविश्वाअतिद्विषोअतारिम २१ कदातइन्द्रगिर्वणःस्तोताभवातिशंतमः । कदानोगव्येअश्व्येवसौदधः २२ उततेसुष्टुताहरीवृषंणावहतोरथम् । अजुर्यस्यमदिंतमंयमीमहे २३ तमींमहेपुरुष्टुतंयद्वंप्रत्नाभिरूतिभिः । निवहिंषिंप्रियेसदंदर्वद्विता २४ वधैंस्वासुपुरुष्टुतऋषिंष्टुताभिरू- ॥३८४॥

तिभिः । धुक्षस्वपिप्युषीमिषमवाचनः २५ ॥ ११ ॥ इन्द्रत्वमवितेदसीत्थास्तुवतोअद्रिवः। ऋतादियमितेधियंमनोयुजम् २६ इहत्यासवुमाद्यायुजानःसोमपीतये । हरीइन्द्रप्रतद्वसूअभिस्वर २७ अभिस्वरन्तुयेतवरुद्रासःसक्षतश्रियम् । उतोमरुत्वतीविशोअभिप्रयः २८ इमाअस्यप्रतूर्तयःपदंजुषन्तयद्दिवि । नाभायज्ञस्यसंदधुर्यथाविदे २९ अयंदीर्घायचक्षसेप्राचिप्रयत्यध्वरे । मिमीतेयज्ञमानुषग्विचक्ष्यं ३० ॥ १२ ॥ वृषायमिन्द्रतेरथउतोतेवृषणाहरी । वृषात्वंशतक्रतोवृषाहवः ३१ वृषाग्रावावृषामदोवृषासोमोअयंसुतः । वृषायज्ञोयमिन्वसिवृषाहवः ३२ वृषात्वावृषणंहुवेवज्रिञ्चित्राभिरूतिभिः । वावन्यहिप्रतिष्टुतिंवृषाहवः ३३ ॥ १३ ॥

१४. यदिन्द्राहंयथात्वमीशीयवस्वएकइत् । स्तोतामेगोषखास्यात् १ शिक्षेयमस्मैदित्सेयंशचीपतेमनीषिणे । यदहंगोपतिःस्याम् २ धेनुष्टइन्द्रसूनृता यजमानायसुन्वते । गामश्वंपिप्युषीदुहे ३ नतेवर्तास्तिराधसइन्द्रदेवोनमर्त्यः । यद्दित्संसिस्तुतोमघम् ४ यज्ञइन्द्रमवर्धयद्यद्भूमिंव्यवर्तयत् । चक्राणओपशंदिवि ५ ॥ १४ ॥ वावृधानस्यतेवयंविश्वाधनानिजिग्युषः । ऊतिमिन्द्रावृणीमहे ६ व्यं१न्तरिक्षमतिरन्मदेसोमस्यरोचना । इन्द्रोयदभिनद्बलम् ७ उद्गाआजदङ्गिरोभ्यआविष्कृण्वन्गुहासतीः । अर्वाञ्चंनुनुदेवलम् ८ इन्द्रेणरोचनादिवो दृळ्हानिदृंहितानिच । स्थिराणिनपराणुदे ९ अपामूर्मिंमदन्निवस्तोमंइन्द्राजिरायते । वितेमदाअराजिषुः १० ॥ १५ ॥ त्वंहिस्तोमवर्धनइन्द्रास्युक्थवर्धनः ।

स्तोतृणामुतभद्रकृत् ११ इन्द्रमित्केशिनाहरीसोमपेयायवक्षतः । उपयज्ञं सुराधसम् १२ अपांफेनेननमुचेःशिरइन्द्रोदवर्तयः । विश्वायदजयःस्पृधः १३ मायाभिरुत्सिसृप्सतइन्द्रद्यामारुरुक्षतः । अवदस्यूरधूनुथाः १४ असुन्वामिन्द्र संसदंविषूचीन्यनाशयः । सोमपाउत्तरोभवन् १५ ॥ १६ ॥

तम्वभि त्रयोदश गोपूक्तस्यसूक्तस्यौ काण्वायनाविन्द्र ऊष्णिक् ।

१५ तम्वभिप्रगायतपुरुहूतंपुरुष्टुतम् । इन्द्रंगीर्भिस्तविषमाविवासत १ यस्यद्विबर्हसोबृहत्सहोदाधाररोदसी । गिरिँरज्राँअपःस्वर्वृषत्वना २ सराजसिपुरुष्टुतँएकोवृत्राणिजिघ्नसे । इन्द्रजैत्राश्रवस्याचयन्तवे ३ ततेमदंगृणीमसिवृषंणंपत्नुसासहिम् । उलोककृत्तुमद्रिवोहरिश्रियंम् ४ येनज्योतीँष्यायवेमनवेचविवेदिथ । मन्दानोअस्यबर्हिषोविराजसि ५ ॥ १७ ॥ तदद्याचित्तउक्थिय-

नोऽनुष्टुवन्तिपूर्वथा । वृषपत्नीरपोजयादिवेदिवे ६ तवत्यदिन्द्रियंबृहत्तवशुष्ममुतक्रतुम् । वज्रंशिशातिधिषणावरेण्यम् ७ तवद्योरिन्द्रपौंस्यंपृथिवीवर्धतिश्रवः । त्वामापःपर्वतासश्चहिन्विरे ८ त्वांविष्णुर्बृहन्क्षयोमित्रोगृणातिवरुणः । त्वांशर्धोमदत्यनुमारुतम् ९ त्ववृषाजनानांमंहिष्ठइन्द्रजज्ञिषे । सत्राविश्वास्वपत्यानिदधिषे १० ॥ १८ ॥ सत्रात्वंपुरुष्टुतैकोवृत्राणितोशसे । नान्यइन्द्रात्करणंभूयइन्वति ११ यदिन्द्रमन्मशस्त्वानानाहवन्तऊतये । अस्माकेभिर्नृभिरत्रास्वर्जय १२ अरंक्षयायनोमहेविश्वारूपाण्याविशन् । इन्द्रंजैत्रायहर्षयाशचीपतिम् १३ ॥ १९ ॥

म सम्राजं द्वादशोरिर्विठः काण्व इन्द्रो गायत्री ।

१६ प्रसम्राजेचर्षणीनामिन्द्रेस्तोतानव्यैर्गीर्भिः । नरंनृषाहंमंहिष्ठम् १ य-

स्मिन्नुक्थानिरण्यन्तिविश्वानिचश्रवस्या । अपामवोनसमुद्रे २ तंसुष्टुत्याविवासेज्येष्ठराजंभरेकृतुम् । महोवाजिनंसनिभ्यः ३ यस्यानूनागभीरामदाउरवस्तरुत्राः । हर्षुमन्तःशूरसातौ ४ तमिद्धनेषुहितेष्वधिवाकायंहवन्ते । येपारमिन्द्रस्तेजयन्ति ५ तमिद्भयौत्नैरायंन्तितंकृतेभिश्चर्षणयः । एषइन्द्रोवरिवस्कृत् ६ ॥ २० ॥ इन्द्रोब्रह्मेन्द्रऋषिरिन्द्रःपुरूपुरुहूतः । महान्महीभिःशचीभिः ७ सस्तोम्यःसहव्यःसत्यःसत्वातुविकूर्मिः । एकश्चित्सन्नभिभूतिः ८ तमर्कैभिस्तं सामभिस्तंगायत्रैश्चर्षणयः । इन्द्रंवर्धन्तिक्षितयः ९ प्रणेतारंवस्योअच्छाकर्तारं ज्योतिःसमत्सु । सासह्वांसंयुधामित्रान् १० सनःपर्षत्पारयातिस्वस्तिनावापुरुहूतः । इन्द्रोविश्वाअतिद्विषः ११ सत्वंनइन्द्रवाजेभिर्दशस्याचगातुयाचं । अच्छाचनःसुम्नंनेषि १२ ॥ २१ ॥

आ यादि पञ्चदशर्चस्यादिः काण्व इन्द्रो गायत्री । उपान्त्या बृहती । अन्त्या सतोबृहती ।

१७ आयांहिसुषुमाहितइन्द्रसोमंपिबाडमम् । एदंबर्हिःसदोममं १ आत्वा ब्रह्मयुजाहरीवहंतामिन्द्रकेशिना । उपब्रह्माणिनःशृणु २ ब्रह्माणस्त्वावयंयुजासोमपामिन्द्रसोमिनः । सुतावन्तोहवामहे ३ आनोयाहिसुतावतोऽस्माकंसुष्टुतीरुपं । पिबासुशिप्रिन्नन्धसः ४ आतेसिञ्चामिकुक्ष्योरनुगात्राविधावतु । गृभायजिह्वयामधु ५ ॥ २२ ॥ स्वादुष्टेअस्तुसंसुदेमधुमान्तन्वेतव । सोमः शमस्तुतेहृदे ६ अयमुत्वाविचर्षणेजनीरिवाभिसंवृतः । प्रसोमइन्द्रसर्पतु ७ तुविग्रीवोवपोदरःसुबाहुरन्धसोमदे । इन्द्रोवृत्राणिजिघ्नते ८ इन्द्रप्रेहिपुरस्त्वं विश्वस्येशानओजसा । वृत्राणिवृत्रहञ्जहि ९ दीर्घस्तेअस्त्वङ्कुशोयेनावसुप्रयच्छसि । यजमानायसुन्वते १० ॥ २३ ॥ अयंतइन्द्रसोमोनिपूतोअधिबर्हिषि । ॥२८७॥

एहीमस्यद्रवापिबं ११ शाचिंगोशाचिंपूजनायंरणायतेसुतः। आखंण्डलप्रहूय-से १२ यस्तेशृङ्गवृषोनपात्प्रणंपात्कुण्डपाय्यः। न्यस्मिन्दध्रआमनः १३ वास्तो-स्पतेध्रुवास्थूणांसत्रंसोम्यानाम् । द्रप्सोभेत्तापुरांशश्वतीनामिन्द्रोमुनीनांसखा १४ पृदाकुसानुर्यजतोगवेषणएकःसन्नभिभूयसः । भूर्णिमश्वंनयत्तुजापुरोगुभे-न्द्रंसोमस्यपीतये १५ ॥ २४ ॥

इदं ह द्वाविंशतिरिरिविठिः काण्व आदित्या उष्णिक् । अष्टम्या अश्विनौ ।
नवम्या अग्निसूर्यानिलाः ।

१८ इदंहनूनमेषांसुम्नंमिक्षेतमर्त्यः। आदित्यानामपूव्यंसवीमनि १ अनर्वाणो ह्येषांपन्थआदित्यानाम् । अदब्धाःसन्तिपायवःसुगेवृधः २ तत्सुनःसविताभ-गोवरुणोमित्रोअर्यमा । शर्मयच्छन्तुसप्रथोयदीमहे ३ देवेभिर्देव्यदिते ऽरिष्टभ-

मन्नागंहि । स्मत्सूरिभिःपुरुप्रियेसुशर्मभिः ४ तेहिपुत्रासोअदितेर्विदुर्द्वेषांसि
योतवे । अंहोश्चिदुरुचक्रयोऽनेहसः ५ ॥ २५ ॥ अदितिर्नोदिवांपशुमदितिर्न-
क्तमद्वयाः । अदितिःपात्वंहसःसदावृधा ६ उतस्यानोदिवामतिरदितिरूत्यागं-
मत् । साशन्तातिमयस्करदपस्रिधः ७ उतत्यादैव्याभिषजाशंनःकरतोअश्वि-
ना । युयुयातामितोरपोअपस्रिधः ८ शमग्निरग्निभिःकरच्छंनस्तपतुसूर्यः ।
शंवातोवात्वरपाअपस्रिधः ९ अपामीवामपस्रिधमपसेधतदुर्मतिम् । आदि-
त्यासोयुयोतनानोअंहसः १० ॥ २६ ॥ युयोताशरुमस्मदाँआदित्यासउतामं-
तिम् । ऋधग्द्वेषःकृणुतविश्ववेदसः ११ तत्सुनःशर्मयच्छतादित्यायन्मुमोच-
ति । एनस्वन्तंचिदेनसःसुदानवः १२ योनःकश्चिद्रिरक्षतिरक्षस्त्वेनमत्यँः ।

:पएवैरिरिपीष्टयुर्जनः १३ समित्तमघमंश्रवद्दुःशंसंमर्त्यंरिपुम् । योअंस्मत्रा णांवाँउपद्दयुः १४ पाकत्रास्थनदेवाह्रत्सुजानीथमर्त्यम् । उपद्दयुंचाद्दयुंच सवः १५ ॥ २७ ॥ आशर्मपर्वतानामोतापांवृणीमहे । द्यावांक्षामारेअस्मद्रः स्कृतम् १६ तेनोभद्रेणशर्मणायुष्माकंनावावंसवः । अतिविश्वानिदुरितापिं-र्तन १७ तुचेतनायुतत्सुनोद्राघीयआयुर्जीवसे । आदित्यासःसुमहसःकृणो-न १८ यज्ञोहीळोवोअन्तरआदित्याअस्तिमृळत । युष्मेइद्वोअपिष्मासिसजा-ः ११ वृहद्वरूथंमरुतोदेवंत्रातारमश्विना । मित्रमीमहेवरुणंस्वस्तये २० यनेहोमित्रार्यमन्नृवद्वरुणशंस्यम् । त्रिवरूथंमरुतोयन्तनश्छर्दिः २१ येचिद्धि त्युवन्धवआदित्यामनवःस्मसि । प्रसूनआयुर्जीवसेतिरेतन २२ ॥ २८ ॥

तं गूर्धय सप्तविंशत्सौभरिः काण्वोऽग्निः प्रगाथा ककुप् । अन्त्ययोस्त्रसदस्योर्दानस्तुतिः ।
उपान्त्ययोरादित्याः । सप्तविंशी द्विपदा । चतुस्त्रिंशत्तम्युष्णिक् । पञ्च-
त्रिंशत्तमी सतोबृहती । उपान्त्या ककुप् । अन्त्या पङ्क्तिः ।

१ तं गूर्धयास्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्राहव्यमोहिरे १ विभूत-
रातिं विप्रचित्रशोचिषमग्निमीळिष्वयन्तुरम् । अस्यमेधस्यसोम्यस्यसोभरेऽग्नेम-
ध्वरायपूर्व्यम् २ यजिष्ठंत्वाववृमहेदेवंदेवत्राहोतारममर्त्यम् । अस्ययज्ञस्यसुक्र-
तुम् ३ ऊर्जोनपातंसुभगंसुदीदितिमग्निंश्रेष्ठशोचिषम् । सनोमित्रस्ययरुणस्य
सोअपामासुम्नंयक्षतेदिवि ४ यःसमिधायआहुतीयोवेदनदाशुषेतोअग्नये ।
योनमंसास्वध्वरः ५ ॥ २१ ॥ तस्येदवन्तोरंहयन्तआशवस्तस्यद्युम्नितमंयशः ।
नतमंहोदेवकृतंकुतश्चननमर्त्यकृतंनशत् ६ स्वग्नयोवोअग्निभिःस्यामसूनोसहस

ऊर्जांपते । सुवीरस्त्वमस्मयुः ७ प्रशंसमानोअतिथिर्नमित्रियोऽग्नीरथोनवेद्यः । त्वेक्षेमासोआपसन्तिसाधवस्त्वंराजाऽरयीणाम् ८ सोअद्भादाश्वध्वरोऽग्नेमतीःसुभगसप्रशंस्यः । सधीभिरस्तुसनिता १ यस्यत्वमूर्ध्वोअध्वरायतिष्ठसिक्षयद्वीरः ससाधते । सोअवद्भिःसनितासविप्न्युभिःसशूरैःसनिताकृतम् १० ॥ ३० ॥ यस्याग्निर्वपुर्गृहेस्तोमंचनोदधीतविश्ववार्यः । हव्यावावेविषद्विषः ११ विप्रस्य वास्तुवतःसहसोयहोमक्षूतमस्यरातिषु । अवोदेवमुपरिमर्त्यंकृधिवसोविविदुषो वचः १२ योअग्निंहव्यदातिभिर्नमोभिर्वासुदक्षमाविवासति । गिरावाजिरशोचिषम् १३ समिधायोनिशितीदाशददितिंधामभिरस्यमर्त्यः । विश्वेत्सधीचिःसुभगोजनाँअतिद्युम्नैरुद्नइवतारिषत् १४ तदग्नेद्युम्नमाभरयत्सासह्त्सदनेकं चिदत्रिणम् । मन्युंजनस्यदूढ्यः १५ ॥ ३१ ॥ येनचष्टेवरुणोमित्रोअर्यमायेः

नानासत्याभगः । वयंतत्तेशवसागातुवित्तमाइन्द्रत्वोतावि॒धेमहि १६ तेघेदग्ने स्वाध्यो३ येत्वांविप्रानिदधिरेनृचक्षसम् । विप्रासोदेवसुक्रतुम् १७तइद्वेदिंसुभगत आहुतिंतेसोतुंचक्रिरेदिवि । तइद्वाजेभिर्जिग्युर्महद्धनंयेत्वेकामन्येरिरे १८ भद्रोनोअग्निराहुतोभद्रारातिःसुभगभद्रोअध्वरः । भद्राउतप्रशस्तयः १९ भद्रंमनः कृणुष्ववृत्रतूर्येयेनासमत्सुसासहः । अवस्थिरातनुहिभूरिशर्धतांवनेमातेअभिष्टिभिः २० ॥ ३२ ॥ ईळेगिरामनुहितंयदेवादूतमरतिंन्येरिरे । यजिष्ठंहव्यवाहनम् २१ तिग्मजम्भायतरुणायराजतेप्रयोगायस्यन्यवे । यःपिशंतेसूनृताभिः सुवीर्यमाग्निर्घृतेभिराहुतः २२ यदीघृतेभिराहुतोवाशीमिग्निर्भरतउच्चावच । असुरइवनिर्णिजम् २३ योहव्यान्यैरयतामनुहितोदेवआसासुगन्धिना । विवासते वार्याणिस्वध्वरोहोतादेवोअमर्त्यः २४ यदग्नेमर्त्यस्त्वंस्यामहंमित्रमहोअमर्त्यः ।

सहंसःसूनवाहुत २५ ॥ ३३ ॥ नत्वारासीयाभिर्शस्तयेवसोनपापत्वार्यसन्त्य ।
नमेस्तोतामंतीवानदुर्हितःस्यादग्नेनपापया २६ पितुर्नपुत्रःसुभृतोदुरोणआदेवाँ
एंतुप्रणोहविः २७ तवाहमंग्नऊतिभिर्नेदिष्ठाभिःसचेयजोषमावंसो । सदादेव-
स्यमर्त्यः २८ तवक्रत्वासनेयंतवरातिभिरग्नेतवप्रशस्तिभिः । त्वामिदाहुःप्रम-
तिंवसोममाग्नेहपँस्वदातवे २९ प्रसोअंग्नेतवोतिभिःसुवीराभिस्तिरतेवाजंभर्म-
भिः । यस्यत्वंसख्यमावरः ३० ॥ ३४ ॥ तवद्रप्सोनीलंवान्वाशऋत्वियइन्धा-
नःसिष्णवादंदे । त्वंमहीनामुषसांमसिप्रियःक्षपोवस्तुराजसि ३१ तमागंन्म
सोभरयःसहस्रंमुप्कंस्वभिष्टिमवंसे । सम्राजंत्रासदस्यवम् ३२ यस्यतेअग्नेअ-
न्येअग्नयउपक्षितोवयाइव । विपोनद्युम्नायुवेजनानांतवक्षत्राणिवर्धयन् ३३
यमादित्यासोअद्रुहःपारंनयथमर्त्यम् । मघोनांविश्वेषांसुदानवः ३४ यूयंराजा

नः कंचिच्चर्षणीसहः क्षयन्तंमानुषाँअनु । वयंतेवोवरुणमित्रार्यमन्त्स्यामेद्दृतस्य रथ्यः ३५ अदान्मेपौरुकुत्स्यःपञ्चाशतंत्रसदस्युर्वधूनाम् । मंहिष्ठोअर्यःसत्पतिः ३६ उतमेप्रायियोर्वायियोःसुवास्त्वाअधितुग्वनि । तिसृणांसप्ततीनांश्यावः प्रणेताभुवद्वसुर्दियानांपतिः ३७ ॥ ३५ ॥

आ गन्त पड्विंशतिः सौभरिः काण्वो मरुतः भगाथा ककुप् ।

२० आगन्तामारिषण्यतप्रस्थावानोमापस्थातासमन्यवः । स्थिराचिन्नमयिष्णवः १ वीळुपविभिर्मरुतऋभुक्षणआरुद्रासःसुदीतिभिः । इषानोअद्यागंता पुरुस्पृहोयज्ञमासोभरीयवः २ विद्माहिरुद्रियाणांशुष्ममुग्रंमरुतांशिमीवताम् । विष्णोरेषस्यमीळ्हुषाम् ३ विद्वीपानिपापतन्तिष्ठद्दुच्छुनोभेयुंजन्तरोदसी । प्रधन्वान्यैरतशुभ्रखादयोयदेजथस्वभानवः ४ अर्च्युताचिद्वोअज्मन्नानर्दातिपर्वी- ॥३९१

तासोवनस्पतिः । भूमिर्यामैपुरेजते ५ ॥ ३६ ॥ अमायवोमरुतोयातवेद्यौजिहीतउत्तरावृहत् । यत्रानरोदेदिशतेतनूष्वात्वक्षाँसिवाह्योजसः ६ स्वधामनुश्रियनरोमहित्वेषाअमवन्तोवृषप्सवः । वहन्तेअहुतप्सवः ७ गोभिर्वाणोअज्यतेसोभरिणारथेकोशेहिरण्ययै । गोबन्धवःसुजातासइषेभुजेमहान्तोनःस्परसेनु ८ प्रतिवोवृषदञ्जयोवृष्णेशर्धायमारुतायभरध्वम् । हव्यावृषप्रयाव्णे ९ वृषणश्वैनमरुतोवृषप्सुनारथैनवृषनाभिना । आश्वेनासोनपक्षिणोवृथानरोहव्यानोवीतयेगत १० ॥ ३७ ॥ समानमञ्ज्यैपांविभ्राजन्तेरुक्मासोअधिबाहुषु । दविद्युतत्यृष्टयः ११ तउग्रासोवृषणउग्रबाहवोनकिष्टनूषुयेतिरे । स्थिराधन्वान्यायुधारथेषुवोऽनीकेष्वधिश्रियः १२ येषामर्णोनसप्रथोनामत्वेषंशश्वतामेकमिद्भुजे । वयोनपिप्र्यंसहः १३ तान्वन्दस्वमरुतस्ताँउपस्तुहितेषांहिधुनीनाम् । अराणां

नचरमस्तदेषांदानामह्वातदेषाम् १४ सुभगःसवऊतिष्वासुपूवाँसुमरुतोव्युष्टिषु । योवोनूनमुतासंति १५ ॥ ३८ ॥ यस्यंवायूयंप्रातिवाजिनोनरआह्व्यावीतये गथ । अभिपद्युन्नैरुतवाजसातिभिःसुम्नावोधूतयोनशत् १६ यथारुद्रस्यसूनवोदिवोवशन्त्यसुरस्यवेधसः । युवानस्तथेदसत् १७ येचाहोन्तिमरुतःसुदानवःस्मन्मीह्वुपश्चरन्तिये । अतश्चिदानउपवस्यसाह्दायुवानआववृध्वम् १८ यूनऊषुनविष्टयावृष्णःपावकाँअभिसौभरेगिरा । गायुगाइवचकृषत् १९ साहाये सन्तिमुष्टिहेवहव्योविश्वासुपृत्सुहोतृषु । वृष्णश्चन्द्रान्नसुश्रवस्तमाङ्गिरावन्दस्वमरुतोअह २० ॥ ३९ ॥ गावश्चिद्घासमन्यवःसजात्येनमरुतःसबन्धवः । रिहतेककुभोमिथः २१ मतीश्चिद्योनृतवोरुक्मवक्षसउपभ्रातृत्वमायति । आधिनोगातमरुतःसदाहिवेआपित्वमस्तिनिध्युवि २२ मरुतोमारुतस्यनआभेषजस्य

वहतासुदानवः। यूयंसखायःसप्तयः २३ याभिःसिन्धुमवथुयाभिस्तूर्वथुयाभिः
दंशस्यथाक्रिविम्। मयोनोभूतोतिभिर्मयोभुवःशिवाभिरसचद्विषः २४ यात्सि-
न्धौयदसिक्न्यांयत्समुद्रेपुमरुतःसुव्रहिंपः। यत्पर्वतेषुभेषजम् २५ विश्वंपश्यन्तो
विभृथातनूष्वातेनानोअधिवोचत। क्षमारपोमरुतआतुरस्यनइष्कर्तांविह्रुतं
पुनः २६॥ ४०॥ इति शाकलर्क्संहितायां षष्ठाष्टके प्रथमोध्यायः॥ १॥ इति
शाकलर्क्संहितायामष्टमे मण्डले तृतीयोनुवाकः॥ ३॥

वयमुग्नान्त्येट्टचेचित्रस्यदानस्तुतिरोसमाश्विनंत्रिमगाथादिवृहत्यनुष्टुवेकादश्याद्येककुम्मध्येज्यो-
तिषीईळिष्वात्रिंशद्विश्वमनावैयश्वआग्नेयमौष्णिहसखायस्तृचोन्त्यःसौपाम्णस्यवरोदानस्तुतिरन्त्यानु-
ष्टुप्तावांचतुर्विंशतिर्मैत्रावरुणंदशम्याद्यास्तिस्रोवैश्वदेव्यउपान्त्योष्णिग्गर्भायुवोःपञ्चाधिकाव्यश्वोवा-
ङ्गिरसआश्विनंविंश्याद्यात्रायव्यास्तत्पूर्वाश्चतस्रोगायत्र्योन्त्यैकाविंश्यौचाविंश्यनुष्टुबाग्नेरुक्थेज्यधिकाम-

नुर्वैवस्वतोवैश्वदेवंहप्रगाथंयेत्रिंशतिपञ्चोपान्त्यापुरउष्णिग्वभ्रुर्दशकश्यपोवामारीचोद्वैपदंनहिवश्चतु-
ष्कंपुरउष्णिग्वृहत्सनुष्टुबन्तंयोयजातिब्रूनात्रेज्यास्तवोयजमानप्रशंसाचयेसादिपञ्चदम्पत्योःशिष्टा-
स्तदाशिषोनुष्टुप्तुप्पङ्क्त्यन्तंनवम्यनुष्टुब्दशमीपादनिचृत् ।

वयम्वष्टादश सौभरिः काण्व इन्द्रः प्रगाथा ककुप्। अन्त्ययोश्चित्रस्य दानस्तुतिः ।

२१ ओम् वयमुत्वामपूर्व्यस्थूरंनकाचिद्भरन्तोऽवस्यवः।वाजेचित्रंहवामहे १ उपत्वाकर्मन्नूतयेसनोयुवोग्रश्चक्राम्योधृषत् । त्वामिद्धयवितारंववृमहेसखाय इन्द्रसानसिम् २ आयाहीमइन्दवोऽश्वपतेगोपतउर्वरापते । सोमंसोमपतेपिव ३ वयंहित्वाबन्धुमन्तमबन्धवोविप्रासइन्द्रयेमिम । यातेधामानिवृषभतेभिरागहि विश्वेभिःसोमपीतये ४ सीदन्तस्तेवयोयथागोश्रीतेमधौमदिरेविवक्षणे। अभि त्वामिन्द्रनोनुमः ५ ॥ १ ॥ अच्छाचत्वैनानमसावदामसिकिंमुहुश्चिद्दिधयः ।

सन्तिकामासोहरिवोददिर्ह्मस्मोवयंसन्तिनोधियः ६ नूत्नाइदिन्द्रतेवयमूती
अंभूमनहिनूतेअद्रिवः। विद्मापुरापरीणसः ७ विद्मासंखित्वमुतशूरभोज्यं१मा
तेतावज्रिन्नीमहे। उतोसमस्मिन्नाशिशीहिनोवसोवाजेसुशिप्रगोमति ८ योन
इदमिंदंपुराप्रवस्यंआनिनायतमुवःस्तुषे। सखायइन्द्रंमूतये ९ हयैश्वंसत्पतिंच-
र्षणीसहंसहिष्मायोअमन्दत। आतुनःसवंयतिगव्यमश्व्यंस्तोतृभ्योमघवांश-
तम् १० ॥ २ ॥ त्वयाहस्विद्युजावयंप्रतिश्वसन्तंवृषभंवुवीमहि। संस्थेजनस्य
गोमतः ११ जयेमकारेपुरुहूतकारिणोऽभितिष्ठेमदृढ्यः। नृभिर्वृत्रंहन्यामशूशु-
यामचावोरिन्द्रप्रणोधियः १२ अभ्रातृव्योअनात्वमनापिरिन्द्रजनुषांसनादसि।
युधेदापित्वमिच्छसे १३ नकीरेवन्तंसख्यायविन्दसेपीयन्तितेसुराश्वः। यदा
कृणोषिनदनुंसमूहस्यादित्पितेवंहूयसे १४ मातेअमाजुरोयथामूरासंइन्द्रसख्ये

त्वावतः । निपदामसचासुते १५ ॥ ३ ॥ मातेगोदत्रनिरराम्राधसइन्द्रमातै
गृहामहि । दृळ्हाचिदर्यःप्रमृशाभ्याभरनतेदामानआदभै १६ इन्द्रोवाघेदियं-
न्मघंसरस्वतीवासुभगादिदर्वसुं । त्वंवाचित्रदाशुषै १७ चित्रइद्राजाराजकाइ-
दन्यकेयकेसरस्वतीमनुं । पर्जन्यइवततनद्धिवृष्ट्यासहस्रमयुतादंदत् १८ ॥ ४ ॥

ओत्यमष्टादश सौभरिः काण्वोऽग्निर्वा । आद्याः पद् प्रगाथाः । सप्तमी बृहती । अष्टम्यनुष्टुप् ।
एकादशी ककुप् । द्वादशी मध्येज्योतिः । शिष्टाः प्रगाथाः ककुभः ।

२२ ओत्यमंहुआरथंमद्यादंसिष्ठमूतयें । यमंश्विनासुहवारुद्रवर्तनीआसूर्या-
यैतस्थथुः १ पूर्वापुषंसुहवंपुरुस्पृहंभुज्युंवाजेषुपूर्व्यम् । सचनावन्तंसुमतिभिः
सोभरेर्विद्वेषसमनेहसम् २ इहत्यापुरुभूतमादेवानमोभिरश्विना । अर्वाचीना
स्ववंसेकरामहेगन्तारादाशुषोगृहम् ३ युवोरथस्यपरिचक्रमीयतईर्मान्यद्वामिव-

ण्यति । अस्माँअच्छासुमतिर्वाँशुभस्पतीआधेनुरिवधावतु ४ रथोयोवांत्रिवन्धु-
रोहिरण्याभीशुरश्विना । परिद्यावांपृथिवीभूपतिश्रुतस्तेनंनासत्यागतम् ५॥५॥
दशस्यन्तामनंवेपूर्व्यंदिवियवंवृकेणकर्षथः । तावांमद्यसुमतिभिःशुभस्पतीअ-
श्विनाप्रस्तुवीमहि ६ उपनोवाजिनीवसूयातमृतस्यपथिभिः । येभिस्तृक्षिंवृप-
णात्रासदस्यवंमहेक्षत्रायजिन्वथः ७ अयंवामद्रिभिःसुतःसोमोनरावृपण्वसू ।
आयातंसोमंपीतयेपिबंतंदाशुषोगृहे ८ आहिरुहतंमाश्विनारथेकोशेहिरण्ययेवृ-
पण्वसू । युञ्जाथांपीवरीरिषः ९ याभिःपक्थमवथोयाभिरध्रिगुंयाभिर्वभ्रुंविजो-
षसम् । ताभिर्नोमक्षूतूयमश्विनागंतंभिषज्यतंयदातुरम् १० ॥ ६ ॥ यदध्रिगा-
वोअध्रिगूइदाचिदहोअश्विनाहवामहे । वयंगोभिर्विपन्यवः ११ ताभिरायातंवृ-
षणोपमेहवंविश्वप्सुंविश्ववार्यम् । इषामंहिष्ठापुरुभूतमानरायाभिःक्रिविंवावृधु-

स्ताभिरागंतम् १२ ताविदाच्चिदहानांतावश्विनावन्दमानउपंब्रुवे । ताऊनमो-भिरीमहे १३ ताविद्दोषाताउषसिशुभस्पतीतायामंन्रुद्रवर्तनी । मानोमर्तायरि-पवेवाजिनीवसूपरोरुद्रावतिख्यतम् १४ आसुगम्यायसुगम्यंप्रातारथेनाश्विनावा सक्षणी । हुवेपितेवसोभरी १५ ॥ ७ ॥ मनोजवसावृषणामदच्युतामक्षुङ्गमा-भिरूतिभिः । आराच्चाच्छिद्भूतमस्मेअवसेपूर्वीभिःपुरुभोजसा १६ आनोअश्वा-वदश्विनावर्तियांसिष्टंमधुपातमानरा । गोमद्दस्राहिरण्यवत् १७ सुप्रावर्गंसुवी-यंसुष्ठुवार्यमनाधृष्टंरक्षस्विना । अस्मिन्नावामायानेवाजिनीवसूविश्वावामानि धीमहि १८ ॥ ८ ॥

ईळिष्व त्रिशद्विश्वमना वैयश्वोऽग्निरुष्णिक् ।

२३ ईळिंष्वाहिप्रंतीव्यं१ यजंस्वजातवेदसम् । चरिष्णुधूमंमगृभीतशो-

चिषम् १ दामानंविभ्वर्चपणेऽग्निंविश्वमनोगिरा । उतस्तुपेविष्पर्धसोरथानाम् २ येषांमावाधक्रुग्मियंइषःपक्षश्चनिग्रभे । उपविदाव्हिंविन्दतेवसुं ३ उदस्य शोचिरस्थाद्दीदियुपोर्व्यं१ जरम् । तपुर्जम्भस्यसुद्युतोगणश्रियः ४ उदुतिष्ठस्वध्वरस्तवानोदेव्याकृपा । अभिख्याभासाबृहताशुशुक्वनिः ५ ॥ १ ॥ अग्नेयाहिसुशस्तिभिर्हव्याजुह्वानआनुषक् । यथादूतोविभूथहव्यवाहनः ६ अग्निंवःपूर्व्यंहुवेहोतारंचर्षणीनाम् । तमुयावाचागृणेतमुवःस्तुपे ७ यज्ञेभिरद्भुतक्रतुंयंकृपासूदयन्तइत् । मित्रंनजनेसुधितमृतावनि ८ ऋतावानमृतायवोयज्ञस्य साधनंगिरा । उपोएनंजुजुपुर्नमंसस्पदे १ अच्छानोअङ्गिरस्तमंयज्ञासोयन्तु संयतः । होतायोअस्तिविक्ष्वायुशस्तमः १० ॥ १० ॥ अग्नेतवत्येअजुरेन्वानासोबृहद्भाः । अश्वाइववृषणस्तविषीयवः ११ सत्वंनऊर्जापतेरयिंरास्वसुवीर्यम् ।

प्रावनस्तोकेतनयेसमत्स्वा १२ यद्वाउविशपतिःशितःसुप्रीतोमनुषोविशि । विश्वे-
दग्निःप्रतिरक्षांसिसेधति १३ श्रुष्ट्यग्नेनवस्यमेस्तोमस्यवीरविशपते । निमा-
यिनस्तपुपारक्षसोदह १४ नतस्यमाययाचनरिपुरीशीतमर्त्यः । योअग्नये
ददाशहव्यदातिभिः १५ ॥ ११ ॥ व्यश्वस्त्वावसुविदमुक्षण्युरप्रीणाद्वसिः । महो
रायेतमुत्वासमिधीमहि १६ उशनाकाव्यस्त्वानिहोतारमसादयत् । आयुजिं
त्वामनवेजातवेदसम् १७ विश्वेहित्वासजोषसोदेवासोदूतमक्रत । श्रुष्टीदेवप्र-
थमोयज्ञियोभुवः १८ इमंधावीरोअमृतंदूतंकृण्वीतमर्त्यः । पावकंकृष्णवर्तनिं
विहायसम् १९ तंहुवेमयतस्रुचःसुभासंशुक्रशोचिषम् । विशामग्निमजरंप्रत्न-
मीड्यम् २० ॥ १२ ॥ योअस्मैहव्यदातिभिराहुतिमतोऽविधत् । भूरिपोषंसधं-

नेवीरवद्यशः २१ प्रथमंजातवेदसमग्निंयज्ञेषुपूर्व्यम् । प्रतिस्तुगेतिनमंसाहविष्मंती-२२ आभिर्विधेमाग्नयेज्येष्ठाभिर्व्यश्ववत् । महिष्ठाभिर्मतिभिःशुक्रशोचिषे २३ नूनमर्चविहायसेस्तोमेभिःस्थूरयूपवत् । ऋषेवैयश्वदम्यायाग्नये २४ अतिथिंमानुषाणांसूनुंवनस्पतीनाम् । विप्राअग्निमवसेग्रहमीळते २५ ॥ १३ ॥ महोविश्वाँअभिषतोऽभिहव्यानिमानुषा । अग्नेनिर्पत्सिनमसाधिबर्हिषे २६ वंस्वानोवार्यापुरुवंस्वरायःपुरुस्पृहः । सुवीर्यस्यप्रजावतोयशस्वतः २७ त्वंवरो सुषाम्णेऽग्नेजनायचोदय । सदावसोरातिंयविष्ठशश्वते २८ त्वंहिसुप्रतूरसित्वं नोगोमतीरिषः । महोरायःसातिमग्नेअपावृधि २९ अग्नेत्वंयशाअस्यामित्रावरुणावह । ऋतावानासम्राजापूतदक्षसा ३० ॥ १४ ॥

सखायस्त्रिंशद्विश्वमना वैयश्व इन्द्र उष्णिक् । अन्त्यस्य तृचस्य वरोः सौपाम्णस्य दानस्तुतिः । अन्त्यानुष्टुप् ।

२४ सखायआशिंषामहिव्रह्मेन्द्रायवज्रिणेंऽस्तुपऊपुवोनृतंमायधृष्णवे १ शवं-साह्यसिंशुतोवृत्रहत्येनवृत्रहा । मघैर्मघोनोअतिंशूरदाशसि २ सनःस्तवांनआभं-ररियंचित्रश्रवस्तमम् । निरेकोचिद्योहरिवोवसुर्ददिः ३ आनिरेकमुतप्रियमिन्द्रद-र्पिजनानाम् । धृषतोधृष्णोस्तवमानआभर ४ नतेसव्यंनदक्षिणंहस्तंवरन्तआ-मुरः । नपरिवाधोहरिवोगविंष्टिषु ५ ॥ १५ ॥ आत्वागोभिरिवव्रजंगोभिरृ-णोम्यद्रिवः । आस्माकामंजरितुरामनःपृण ६ विश्वानिविश्वमनसोधियानो वृत्रहन्तम । उग्रंप्रणेतरधिपूर्वसोगहि ७ वयंतेअस्यवृत्रहन्विद्यामशूरनव्यसः । वसोःस्पार्हस्यपुरुहूतराधसः ८ इन्द्रयथाह्यस्तितेऽपरीतंनृतोशवः । अमृक्तारा- ॥३९७॥

तिःपुरुहूतदाशुषे १ आवृषस्वमहामहमहेनृतमराधसे । दृळ्हश्चिद्दृह्यमघवन्मघत्तये १० ॥ १६ ॥ नूअन्यत्रांचिदद्रिवस्त्वन्नोजग्मुराशसः । मघवञ्छग्धितव तन्नऊतिभिः ११ नह्यङ्गनृतोत्वदन्यंविन्दामिराधसे । रायेद्युम्नायशवसेचगिर्वणः १२ एन्दुमिन्द्रायसिञ्चतापिबातिसोम्यंमधु । प्रराधसाचोदयातेमहित्वना १३ उपोहरीणांपतिंदक्षंपृञ्चन्तमब्रवम् । नूनंश्रुधिस्तुवतोअश्व्यस्य १४ नह्यङ्गपुराचनजज्ञेवीरतरस्त्वत् । नकीरायानैवथानभन्दना १५ ॥ १७ ॥ एदुमध्वोमदिन्तरंसिञ्चवाध्वर्योअन्धसः । एवाहिवीरःस्तवतेसदावृधः १६ इन्द्रस्थातर्हरीणांनकिष्टेपूर्व्यस्तुतिम् । उदानंशशवसानभन्दना १७ तंवोवाजानांपतिमहूमहिश्रवस्यवः । अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् १८ एतोन्विन्द्रंस्तवामसखायःस्तोम्यंनरम् । कृष्टीर्योविश्वाअभ्यस्त्येकइत् १९ अगोरुधायगविषे

पेंद्युक्षायुदस्म्यंवर्चः । घृतात्स्वादींयोमधुनश्चवोचत २० ॥ १८ ॥ यस्या-
मितानिवीर्या३नराधःपर्येतवे । ज्योतिर्नविश्वंमभ्यस्तिदक्षिणा २१ स्तुहीन्द्रंन्यश्वदर्नूमिंवाजिनंयमम् । अर्योगयंमंहमानंविदाशुषे २२ एवानूनमुपंस्तुहिवैयंश्वदशमंनवम् । सुविद्वांसंचर्कृत्यंचरणींनाम् २३ वेत्थाहिनिक्रृतींनांवज्रंहस्तपरिवृजंम् । अहंरहःशुन्ध्युःपरिपदांमिव २४ तदिन्द्रावआभंरयेनादंसिष्ठकृत्वंने । हिताकुत्सायशिश्नथोनिचोदय २५ ॥ १९ ॥ तमुंत्वानूनमींमहेनव्यंदंसिष्ठसंन्यसे । सत्वंनोविश्वांअभिमातीःसक्षणिः २६ यक्रक्षादंहसोमुचद्योवार्यांत्सप्तसिन्धुषु । वधंदासस्यंतुविनृम्णनीनमः २७ यथांवरोसुषाम्णेसंनिभ्युआवंहोरयिम् । व्यंश्वेभ्यःसुभगेवाजिनीवति २८ आनार्यस्यदक्षिणाव्यंश्वाँ

एतुसोमिनः । स्थूरंचराधःशतवंत्सहस्रवत् २९ यत्त्वापृच्छादीजानःकुहयाकुहयाकृते । एषोअपश्रितोवुलोगोमतीमवतिष्ठति ३० ॥ २० ॥

ता वां चतुर्विंशतिर्वैश्वमना वैयश्वो मित्रावरुणावुष्णिक् ।
चतुर्थर्चस्य विश्वे देवाः । उपान्त्योष्णिगगर्भा ।

२५ तावांविश्वस्यगोपादेवादेवेषुयज्ञिया । ऋतावानायजसेपूतदक्षसा १ मित्रातनानरथ्या३वरुणोयश्चसुक्रतुः । सनात्सुजातातनयाधृतव्रता २ तामाता विश्ववेदसासुयोयग्रमहसा । महीजजानादितिर्ऋतावरी ३ महान्तामित्रावरुणा सम्राजादेवावसुरा । ऋतावानावृतमाघोषतोबृहत् ४ नपाताशवसोमहःसूनू दक्षस्यसुक्रतू । सुप्रदानूइषोवास्त्वधिक्षितः ५ ॥ २१ ॥ संयादानूनियेमथुर्दि-

व्याःपार्थिवीरिषः । नभंस्वतीरावाँचरन्तुवृष्टयः ६ अधियावृहतोदिवोऽभियू- अ.६अ.२
थेवपश्यतः । ऋतावानासघाजानमंसेहिता ७ ऋतावानानिषेदतुःसाम्राज्याय
सुक्रतू । धृतव्रताक्षत्रियाक्षत्रमाशतुः ८ अक्ष्णश्चिद्वातुवित्तरानुल्वणेनचक्षसा ।
निचिन्मिषन्तानिचिरानिचिक्यतुः ९ उतनोदेव्यदितिरुरुष्यतानासत्या । उरु-
ष्यन्तुमरुतोदृढशवसः १० ॥ २२ ॥ तेनौनावमुरुष्यतादिवानक्तंसुदानवः ।
अरिष्यन्तोनिपायुभिःसचेमहि ११ अघ्नतेविष्णवेवयमरिष्यन्तःसुदानवे ।
शुधिस्वयावन्तिसन्धोपूर्वचित्तये १२ तद्वायँवृणीमहेवरिष्ठंगोपयत्यम् । मित्रो
यत्पान्तिवरुणोयदर्यमा १३ उतनःसिन्धुरपांतन्मरुतस्तदश्विना । इन्द्रोविष्णु-
र्मौद्गलासःसजोषसः १४ तेहिष्मावनुपोनरोऽभिमातिंकयस्यचित् । तिग्मंनक्षो- ॥३९९॥

वः प्रति घ्नन्ति भूर्णयः १५ ॥ २३ ॥ अयमेक इत्था पुरूरुचद्दैवविशपतिः । तस्य व्रता-
न्यनुवश्चरामसि १६ अनुपूर्वाण्योक्या साघ्न्यस्य सश्चिम । मित्रस्य व्रतावरु-
णस्य दीर्घश्रुत् १७ परि योरिमना दिवो ऽन्तान्मम पृथिव्याः । उभे आप्रा रोद-
सी महित्वा १८ उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान
आहुतः १९ वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि पित्वो ऽविषस्य दाव-
ने २० ॥ २४ ॥ तत्सू यौरोदसी उभे दोषावस्तोरुप ब्रुवे । भोजेष्वस्माँ अस्युच्चरा
सदा २१ ऋज्रमुक्षण्यायने रजतं हरयाणे । रथं युक्तमसनाम सुपाम णि २२ ता
मे अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाहसा २३ स्मद्भीशूक-
शावन्ता विप्रा नविष्ठया मती । मह्वा जिना वव्रन्ता सचासनम् २४ ॥ २५ ॥

युवोः पञ्चविंशतिर्विश्वमना वैयश्वो व्यश्वो वाङ्गिरसोश्विनावुष्णिक् । विंशत्यादीनां
पण्णां वायुः । षोडश्यादिचतस्र एकविंशीपञ्चविंश्यौ च गायत्र्यः । विंश्यनुष्टुप् ।

२६ युवोरुषूरथंहुवेसधस्तुत्यायसूरिषुं । अतूर्तदक्षावृषणावृषण्वसू १ युवं
वरोसुषाम्णेमहेतनेनासत्या । अवोभिर्याथोवृषणावृषण्वसू २ तावांमद्यहंवा-
महेहव्येभिर्वाजिनीवसू । पूर्वीरिषइयन्तावतिक्षपः ३ आवांवाहिष्ठोअश्विनारथो-
यातुश्रुतोनरा । उपस्तोमान्तुरस्यदर्शथःश्रिये ४ जुहुराणाचिदश्विनामन्येथां
वृषण्वसू । युवंहिरुद्रापपिथोअतिद्विषः ५ ॥ २६ ॥ दस्राहिविश्वमानुषक्षूभिः
परिदीयथः । धियंजिन्वामधुवर्णाशुभस्पती ६ उपनोयातमश्विनारायाविश्व-
पुषांसह । मघवानासुवीरावनंपच्युता ७ आमेअस्यप्रतीव्यं१मिन्द्रेनासत्या
गतम् । देवादेवेभिरद्यसचनंस्तमा ८ वयंहिवांहवामहउक्षण्यन्तोव्यश्ववत् ।

सुमतिभिरुपविप्राविहागतम् १ अश्विनास्वृषेस्तुहिकुवित्तेश्रवंतोहवम् । नेदीयसःकूळयातःपणीँरुत १० ॥ २७ ॥ वैयश्वस्यश्रुतंनरोतोमेअस्यवेदथः । सजोषसावरुणोमित्रोअर्यमा ११ युवादत्तस्यधिष्ण्यायुवानीतस्यसूरिभिः । अहंरहर्वृषणामह्यँशिक्षतम् १२ योवांयज्ञेभिरावृतोऽधिवस्त्रावधूरिव । सपर्यन्तांशुभेचक्रातेअश्विना १३ योवांमुरुण्यचंस्तमंचिकेंततिनृपाय्यम् । वर्तिरश्विनापरियातमस्मयू १४ अस्मभ्यंसुवृषण्वसूयातंवर्तिर्नृपाय्यम् । विषुद्रुहेवयुज्ञमूहथुर्गिरा १५ ॥ २८ ॥ वाहिष्ठोवांहवानांस्तोमोदूतोहुवन्नरा । युवाभ्यांभूत्वश्विना १६ यददोदिवोअर्णवइषोवामदंथोगृहे । श्रुतमिन्मेअमर्त्या १७ उत स्याश्वेतयावरीवाहिष्ठावांनदीनाम् । सिन्धुर्हिरण्यवर्तनिः १८ स्मदेतयासुकीर्त्याश्विनाश्वेतयाधिया । वहेथेशुभ्रयावाना १९ युक्ष्वाहित्वंरथासहायुवस्वपो-

प्यांवसो । आन्नोंवायोमधुंपिवास्माकुंसवनागंहि २० ॥ २९ ॥ तवंवायवृत-स्पतेत्वष्टुंर्जामातरद्भुत । अवांस्यावृणीमहे २१ त्वष्टुर्जामांतरंवयमीशांनंराय ईमहे । सुतावंन्तोवायुंयुन्नाजनांसः २२ वायोंयाहिशिवादिवोवहंस्वासुस्व-रव्यंम् । वहंस्वमहःपृथुपक्षंसारथें २३ त्वांहिसुप्सरंस्तमंनृषदंनेपुहूमहे । ग्रा-वांणंनाश्वंपृष्ठंमंहना २४ सत्वंनोदेवमनंसावायोमन्दानोअंग्रियः । कृधिवाजाँ अपोधियंः २५ ॥ ३० ॥

अग्निरुक्थे द्वाविंशतिर्मनुर्वैवस्वतो विश्वे देवाः प्रगाथा ।

२७ अग्निरुक्थेपुरोहितोग्रावांणोबर्हिरंध्वरे । ऋचायांमिमरुतोब्रह्मंणस्पतिं देवाँअवोवरेंण्यम् १ आपशुंगांसिपृथिवींवनस्पतींनुपासानक्तमोषधीः । विश्वे चनोवसवोविश्ववेदसोधीनांभूतप्रावितारंः २ प्रसूनंएत्वध्वरोइंन्द्रादेवेंपुपूर्व्यः । ॥४०१॥

आदित्येषुप्रवरुणेधृतव्रतेमरुत्सुविश्वभानुषु ३ विश्वेहिष्मामनवेविश्ववेदसोभुवन्वृधेरिशादसः । अरिष्टेभिःपायुभिर्विश्ववेदसोयन्तानोऽवृकंछर्दिः ४ आनोअद्यसमनसोगन्ताविश्वेसजोयसः । ऋचागिरामरुतोदेव्यदितुसदनेपस्त्येमहि ५ ॥ ३१ ॥ अभिप्रियामरुतोयावोअश्व्याहव्यामित्रप्रयाथन । आवर्हिरिन्द्रोवरुणस्तुरानरआदित्यासःसदन्तुनः ६ वयंवोवृक्तबर्हिषोहितप्रयसआनुषक् । सुतसोमासोवरुणहवामहेमनुष्वदिद्धाग्नयः ७ आप्रयातुमरुतोविष्णोअश्विनापूषन्माकीनयाधिया । इन्द्रआयातुप्रथमःसनिष्युभिर्वृपायोवृत्रहागुणे ८ विनोदेवासोअद्रुहोऽच्छिद्रंशर्मयच्छत । नयद्वराद्वसवोनूचिदन्तितोवरूथमादधर्षति ९ अस्तिहिवःसजात्यंरिशादसोदेवासोअस्त्याप्यम् । प्रणःपूर्वस्मैसुवितायवोचत मक्षूसुम्नायनव्यसे १० ॥ ३२ ॥ इदाहिवउपस्तुतिमिदावामस्यभक्तये । उप

वोविश्ववेदसोनमस्युराँअसृक्षयन्यामिव ११ उदुष्यवंःसवितासुप्रणीतयोऽस्था-
दूर्ध्वोवरेण्यः । निद्विपादश्चतुष्पादोअर्थिनोऽविश्रन्पतयिष्णवः १२ देवंदेवंवोऽ-
वसेदेवंदेवमभिष्टये । देवंदेवंहुवेमवाजसातयेगृणन्तोदेव्याधिया १३ देवासोहि
ष्मामनवेसमन्यवोविश्वेसाकंसरातयः । तेनोअद्यतेअपरंतुचेतुनोभवन्तुवरिवो-
विदः १४ प्रवःशंसाम्यद्रुहःसंस्थउपस्तुतीनाम् । नतंधूर्तिर्वरुणमित्रमर्त्ययोवो
धामभ्योऽविधत् १५ प्रसक्षयंतिरतेविमहीरिषोयोवोवरायदाशति । प्रप्रजाभि-
र्जायतेधर्मणस्पर्यरिष्टःसर्वएधते १६ ॥ ३३ ॥ ऋतेसविन्दतेयुधःसुगेभिर्यत्य-
ध्वनः । अर्यमामित्रोवरुणःसरातयोयंत्रायन्तेसजोषसः १७ अजैचिदस्मैकृणु-
थान्यश्वनंदुर्गेचिदासुसरणम्।एषाचिदस्मादशनिःपरोनुसास्रेधन्तीविनश्यतु १८ ॥४०२॥

यद्यसूर्यउद्यतिमित्रयक्षत्राक्रुतंदध । यन्निम्रुचिंप्रबुधिविश्ववेदसोयद्वामध्यंदिनेदि-
वः १ यद्वाभिपित्वेअसुराक्रुतंयुतेछर्दिर्येमविदाशुषे । वयंतद्वोवसवोविश्ववेदस
उपस्थेयाममध्यआ २० यद्यसूरुदितेयन्मध्यंदिनआतुचिं । वामंधृत्थमनवे
विश्ववेदसोजुह्वानायप्रचेतसे २१ वयंतद्वःसम्राजआवृणीमहेपुत्रोनवंहुपार्य्यम्।
अश्यामतदादित्याजुह्वंतोहविर्येनव्यो ऽनशामहै २२ ॥ ३४ ॥

ये त्रिंशति पञ्च मनुर्वैवस्वतो विश्वे देवा गायत्री । उपान्त्या पुरउष्णिक् ।

२८ येत्रिंशतित्रयंस्परोदेवासोबर्हिरासदन् । विदन्नहंद्वितासनन् १ वरुणो
मित्रोअर्यमास्याद्रांतिपाचोअग्नयः । पत्नीवन्तोवषट्कृताः २ तेनोगोपाअपा
च्यास्तउदक्षइत्थान्यक् । पुरस्तात्सवैयाविशा ३ यथावशान्तिदेवास्तथेदसत्तदे-

पांनकिरामिनत् । अरावाचनमर्त्यः ४ सप्तानांसप्तऋष्टयःसप्तद्युम्न्यंषाम् । स-
प्तोअधिश्रियोधिरे ५ ॥ २५ ॥

वभ्रुर्दश मनुर्वैवस्वतः कश्यपो वा मारीचो विश्वे देवा द्विपदा ।

२१ वभ्रुरेकोविषुणःसूनरोयुवाऽज्यंक्तोहिरण्ययम् १ योनिमेकआसंसादद्यो-
तंनोऽन्तर्देवेषुमेधिरः २ वाशीमेकोविभर्तिहस्तंआयसीमन्तर्देवेषुनिध्रुविः ३
वज्रमेकोबिभर्तिहस्तआहितंतेनवृत्राणिजिघ्नते ४ तिग्ममेकोविभर्तिहस्तआयु-
धंगुचिरुग्रोजलाषभेषजः ५ पथएकःपीपायतस्करोयथाँएषवेदानिधीनाम् ६
त्रीण्येकउरुगायोविचक्रमेयत्रदेवासोमदन्ति ७विभिर्द्वाचरतएकयासहप्रप्रवासे-
वंवसतः ८ सदोद्वाचक्रातेउषमादिविसम्राजांसर्पिरासुती १ अचँन्तएकेमहि
सामंमन्वतेतेनसूर्यंमरोचयन् १० ॥ ३६ ॥

नहि वश्चतुष्कं मनुर्वैवस्वतो विश्वे देवाः । आद्या गायत्री ।
उपाद्या पुरउष्णिक् । उपान्त्या बृहती । अन्त्यानुष्टुप् ।

३० नहिवोअस्त्यर्भकोदेवासोनकुमारकः । विश्वेसतोमहान्तइत् १ इति स्तुतासौअसथारिशादसोयेस्थत्रयश्चत्रिंशच्च । मनोर्देवायज्ञियासः २ तेनस्वाध्वंतैवतउनोअधिवोचत । मानःपथःपित्र्यान्मानवादधिदूरंनैष्टपरावतः ३ येदेवासइहस्थनाविश्वेवैश्वानराउत । अस्मभ्यंशर्मसप्रथोगवेऽश्वायच्छत ४ ॥ ३७ ॥ इति शाकलसंहितायामष्टमे मण्डले चतुर्थोनुवाकः ॥ ४ ॥

यो यजात्पष्टादश मनुर्वैवस्वतो गायत्री । आद्यचतुष्कस्येज्यास्तयो यजमानप्रशंसा च ।
ततः पञ्चानां दंपती । शिष्टानां दंपत्योराशिषः । नवमीचतुर्दश्यावनुष्टुभौ ।
दशमी पादनिचृत् । अन्त्याश्चतस्रः पङ्क्तयः ।

३१ योयजात्तियजातइत्सुनवच्चपचातिच । ब्रह्मेदिन्द्रस्यचाकनत् १ पुरो-

ळाग्नयोऽस्मैसोमंररंतआशिरम् । पादित्तंशक्रोअंहसः २ तस्यद्युमाँअंसद्रथो
देवजूतःसशूशुवत् । विश्वांवन्वन्नमित्रिया ३ अस्यप्रजावंतीगृहेऽसंश्वन्तीदिवे-
दिवे । इळांधेनुमतींदुहे ४ यादंपतीसमंनसासुनुतआचधावंतः । देवासोनित्य-
याशिरा ५ ॥ ३८ ॥ प्रतिंप्राशव्याँइतःसम्यञ्चांबर्हिरांशाते । नतावाजेंपुवाय-
तः ६ नदेवानामपिह्वृतःसुमतिंनजुगुक्षतः । श्रवोंवृहद्दिवासतः ७ पुत्रिणाता
कुमारिणाविश्वमायुव्यँश्नुतः । उभाहिरण्यपेशसा ८ वीतिहोत्राकृतद्वसूदश-
स्यन्तामृतायकम् । समूधोरोमशंहतोदेवंयुकृणुतोदुवः ९ आशर्मपर्वतानांवृ-
णीमहेनदीनाम् । आविष्णोःसचाभुवः १० ॥ ३९ ॥ ऐतुपूषारयिर्भगःस्वस्ति
सर्वधातमः । उरुरध्वांस्वस्तयें ११ अरमंतिरनर्वणोविश्वोदेवस्यमनसा ।
आदित्यानांमनेहइत् १२ यथानोमित्रोअर्यमावरुणःसन्तिगोपाः । सुगाकृत-

स्यपन्थाः १३ अग्निर्वःपूर्व्यगिरादेवमीळेवसूनाम् । सपर्यन्तःपुरुप्रियंमित्रंन क्षेत्रसाधसम् १४ मक्षूदेववतोरथःशूरोवापृत्सुकासुचित् । देवानांयइन्मनोय-जमानइयक्षत्यभीदयज्वनोभुवत् १५ नयजमानरिष्यसिनसुन्वानननदेवयो। देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत् १६ नकिष्टंकर्मणानशन्नप्र योपन्नयोपति । देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत् १७ अस-दत्रंसुवीर्यंमुतत्यदाश्वश्व्यम् । देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुव-त् १८ ॥ ४० ॥ इति शाकलर्क्संहितायां षष्ठाष्टके द्वितीयोऽध्यायः ॥ २ ॥

मरुतानित्रिंशन्मेधातिथिर्वयंघैकोनामेध्यातिथिर्वाहंतंत्रिगायज्यनुष्टुवन्तमेन्द्रयाहिध्रुनानीपातिथि-रानुष्टुभंवृचोन्त्योगायत्र्यस्तंसहस्रंवसुरोचिषोङ्गिरसोपश्यन्नग्निनाचतुर्विंशतिःश्यावाश्वआग्निमारुतमुपरि-ष्टाज्ज्योतिषंपङ्क्तिमहाबृहतीपङ्क्त्यन्तमवितासिसप्तशाकरंमहापङ्क्त्यन्तंमेदंमहापाङ्क्तमाद्यातिजगतीयज्ञ-

स्यदशैन्द्राग्नमग्निमस्तोपिनाभाकआग्नेयंमहापाङ्क्तंहीन्द्राग्नीद्वादशैन्द्राग्नमन्त्यात्रिष्टुब्द्वितीयाशक्वर्यस्माऊ-
पुदशत्वारुणंत्वस्तभ्नात्पलर्चनानावात्रैष्टुभमन्त्यंवातृचमाश्विनमानुष्टुभमपश्यदिमेत्रयस्त्रिंशद्विरूपआङ्गि-
रसआग्नेयंतुसमिधाग्निंत्रिंशदाद्यद्विचत्वारिंशत्त्रिंशोकआद्येन्द्राग्नी ।

प्रकृतानि त्रिंशन्मेधातिथिः काण्व इंद्रो गायत्री ।

३२ ओम् प्रकृतान्यृजीषिणःकण्वाइन्द्रस्यगाथया । मदेसोमस्यवोचत १ यःसृविन्द्रमनर्शनिंपिप्रुंदासमहीशुवम् । वधींदुग्रोरिणन्नपः २ न्यर्बुदस्यविष्टपं वृष्माणंबृहतस्तिर । कृपेतदिन्द्रपौंस्यम् ३ प्रतिश्रुतायवोधृषत्नूनांशंतनगिरेरधि । हुवेसुशिप्रमूतये ४ सगोरश्वस्यविव्रजंमन्दानःसोम्येभ्यः । पुरंनशूरदर्षसि ५ ॥ १ ॥ यदिंमेरारणःसुतउक्थेवादधंसेचनः । आरादुपस्वधागहि ६ वयंघात्वाप्यंमसिस्तोतारइन्द्रगिर्वणः । त्वंनोजिन्वसोमपाः ७ उतनःपितुमा ॥४०८॥

भरसंरराणोअविक्षितम् । मघवन्भूरितेवसु ८ उतनोगोमतस्कृधिहिरण्यवतोअश्विनः । इळाभिःसंरभेमहि ९ बृबदुक्थंहवामहेसृप्रकरस्नमूतये । साधुकृण्वन्तमवसे १० ॥ २ ॥ यःसंस्थेचिच्छतक्रतुरादींकृणोतिवृत्रहा । जरितृभ्यःपुरूवसुः ११ सनःशक्रश्चिदाशकदानवाँअन्तराभरः । इन्द्रोविश्वाभिरूतिभिः १२ योरायोऽवनिर्महान्त्सुपारःसुन्वतःसखा । तमिन्द्रमभिगायत १३ आयन्तारं महिस्थिरंपृतनासुश्रवोजितम् । भूरेरीशानमोजसा १४ नकिरस्यशचीनांनियन्तासूनृतानाम् । नकिर्वक्तानदादिति १५ ॥ ३ ॥ ननूनंब्रह्मणामृणंप्राशूनामस्तिसुन्वताम् । नसोमोअप्रतापपे १६ पन्युइदुपगायतपन्युउक्थानिंशंसत । ब्रह्माकृणोतपन्युइत् १७ पन्युआदर्दिरच्छतासहस्रावाज्यवृतः । इन्द्रोयो यज्वनोवृधः १८ विपूचरस्वधाअनुकृष्टीनामन्वाहुवः । इन्द्रपिबसुतानाम् १९

पिवस्वधैनवानामुतयस्तुग्र्येसचा । उतायमिन्द्रयस्तव २० ॥ ४ ॥ अतीहि मन्युपाविणंसुषुवांसमुपारणे । इमंरातंसुतंपिव २१ इहितिस्रःपरावतइहिपञ्च जनाँअति । धेनाइन्द्रावचाकशत् २२ सूयोरश्मिंयथासृजात्वायच्छन्तुमेगिरः । निम्नमापोनसध्यंक् २३ अध्वर्यवातुहिष्मिश्रसोमंवीरायशिप्रिणे । भरासुतस्यपीतयें २४ यउग्रःफलिगंभिनन्त्यंकिसन्धूरवासृजत् । योगोषुपक्वंधारयंत् २५ ॥ ५ ॥ अहंन्वत्रमृचीषमऔर्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् २६ प्रवउग्रायनिष्टुरेऽर्चाक्षायप्रसक्षिणे । देवत्तंब्रह्मगायत २७ योविश्वान्यभिव्रतासोमस्यमदेअन्धसः । इन्द्रोदेवेषुचेतति २८ इहत्यासंधमाद्याहरीहिरण्यकेश्या । वोळ्हामभिप्रयोहितम् २९ अर्वाञ्चंत्वापुरुष्टुतप्रियमेधस्तुताहरी । सोमपेयायतक्षतः ३० ॥ ६ ॥

वयं घैकोनविंशतिर्मेधातिथिः काण्व इन्द्रो बृहती । षोडश्याद्यास्तिस्रो गायत्र्यः । अन्त्यानुष्टुप्

३३ वयंघत्वासुतावन्तआपोनवृक्तबर्हिषः । पवित्रस्यप्रस्रवणेषुवृत्रहन्पारि स्तोतारंआसते १ स्वरन्तित्वासुतेनरोवसोनिरेकउक्थिनः । कदासुतंतृषाण ओकुआगमइन्द्रस्वर्दीवंसंगः २ कण्वेभिर्धृष्णवाधृषद्वाजंदर्षिसहस्रिणम् । पिशङ्गरूपंमघवन्विचर्षणेमक्षूगोमन्तमीमहे ३ पाहिगायान्धसोमदइन्द्रायमेध्यातिथे । यःसोमेशलोहर्योर्यःसुतेसचावज्रीरथोहिरण्ययः ४ यःसुपव्यःसुदक्षिणइनोयःसुक्रतुर्गृणे । यआकरःसहस्रायःशतामघइन्द्रोयःपूर्भिदारितः ५ ॥ ७ ॥ योधृषितोयोऽवृतोयोअस्तिशमश्नुपुश्रितः । विभूतद्युम्नऋयवनःपुरुष्टुतः क्रत्वागौरिवशाकिनः ६ कईंवेदसुतेसचापिबन्तंकद्वयोदधे । अयंयःपुरोविभिज-

स्योजसामन्दानःशिप्रिन्धंसः ७ दानामृगोनवारणःपुरुत्राचरथंदधे । नकिष्ट्वा नियंमदासुतेगंमोमहांश्चरस्योजसा ८ यउग्रःसन्ननिंष्टृतःस्थिरोरणायुसंस्कृतः । यदिंस्तोतुर्मघवांशृणवद्वंनेन्द्रोयोपत्यागंमत् ९ सत्यमित्थावृषेदंसिवृषंजूतिर्नोऽवृतः । वृषाह्युग्रशृण्विषेपरावतिवृषोअर्वावतिश्रुतः १० ॥ ८ ॥ वृषंणस्ते अभीशवोवृषाकशाहिरण्ययी । वृषारथोमघवन्वृषणाहरीवृषात्वंशतक्रतो ११ वृषासोतासुनोतुतेवृषन्नृजीषिन्नाभंर । वृषादधन्वेवृषणंनदीष्वातुभ्यंस्थातर्हरीणाम् १२ एन्द्रयाहिपीतयेमधुंशविष्ठसोम्यम् । नायमच्छामघवांशृणवद्धिरो ब्रह्मोक्थाचंसुक्रतुः १३ वहंन्तुत्वारथेष्ठामाहरंयोरथयुजंः । तिरश्चिद्यंसवंनानिवृत्रहन्न्यंपांयाशंतक्रतो १४ अस्माकंमुद्यान्तमंस्तोमंधिष्वमहामह । अस्माकंतेसवंनासन्तुशंतमामदायवुक्षसोमपाः १५ ॥ ९ ॥ नहिवस्तवनोममं

शास्त्रेअन्यस्यरण्यंति । योअस्मान्वीरआनयत् १६ इन्द्रश्चिद्घातदब्रवीत्स्त्रि-याअंशास्यंमनः । उतोअहक्रतुंरघुम् १७ सत्रींचिद्घामद्रुच्युतांमिथुनावंहतोर-थम् । एवेद्वृष्णउत्तरा १८ अधःपश्यस्वमोपरिसंतरांपादकौहर । मातेंकश-लुकौद्दशन्स्त्रीहिब्रह्मावभूविथ १९ ॥ १० ॥

एन्द्र याह्यष्टादश नीपातिथिः काण्व इन्द्रोनुष्टुप् । अन्त्यस्य वृचस्य सहस्रं वसुरोचि-ष्पोङ्गिरसः । अन्त्यास्तिस्रो गायत्र्यः ।

२४ एन्द्रयाह्युपंकण्वस्यसुष्टुतिम् । दिवोअमुष्यशासंतोदिवंययदि-वावसो १ आत्वाग्मावावदन्निहसोमीघोषेणयच्छतु । दिवोअमुष्यशासंतोदिवं ययदिवावसो २ अत्राविनेमिरेषामुरांनधूनुतेवृकः । दिवोअमुष्यशासंतोदिवंय-यदिवावसो ३ आत्वाकण्वाइहावसेहवन्तेवाजसातये । दिवोअमुष्यशासंतो

दिवैयुयदिवावसो ४ दधामितेसुतानांवृष्णेनपूर्वपाय्यम् । दिवोअमुष्यशासंतो दिवैयुयदिवावसो ५॥११॥ स्मत्पुरन्धिर्नआगंहिविश्वतोधीर्नऊतये । दिवोअमुष्यशासंतोदिवैयुयदिवावसो ६ आनोयाहिमहेमतेसहस्रोतेशतामघ । दिवो अमुष्यशासंतोदिवैयुयदिवावसो ७ आत्वाहोतामनुर्हितोदेवत्रावक्षदीड्यः । दिवोअमुष्यशासंतोदिवैयुयदिवावसो ८ आत्वामदच्युताहरीश्येनंपक्षेवंवक्षतः । दिवोअमुष्यशासंतोदिवैयुयदिवावसो ९ आयाह्यर्यआपरिस्वाहासोमस्यपीतये। दिवोअमुष्यशासंतोदिवैयुयदिवावसो १०॥१२॥ आनोयाह्युपश्रुत्युक्थेषुरण-याइह । दिवोअमुष्यशासंतोदिवैयुयदिवावसो ११ सरूपैरासुनोगहिसंभृतैःसं-भृताश्वः। दिवोअमुष्यशासंतोदिवैयुयदिवावसो १२ आयाहिपर्वतेभ्यःसमुद्रस्या-

धिविष्टपः। दिवोअमुष्यशासंतोदिवंयंयदिंवावसो १३ आनोगव्यान्यश्व्यांसहस्रा
शूरदर्दहि। दिवोअमुष्यशासंतोदिवंयंयदिंवावसो १४ आनंःसहस्रशोभरायुता-
निशतानिंच। दिवोअमुष्यशासंतोदिवंयंयदिंवावसो १५ आयदिन्द्रंश्चदद्वंहेस-
हस्रंवसुरोचिषः। ओजिंष्ठमश्व्यंपशुम् १६ यक्रुञ्जावातंरंहसोऽरुषासोंरघुष्य-
दंः। भ्राजन्तेसूर्याइव १७ पारावतस्यरातिपुंद्रवच्चक्रेष्वाशुपुं। तिष्ठंवनस्यमध्य
आ १८ ॥ १३ ॥

अग्निना चतुर्विंशतिः श्यावाश्वोश्विनावुपरिष्टाज्ज्योतिः। द्वाविंशत्यन्त्ये
पङ्क्तौ। उपान्त्या महाबृहती।

३५ अग्निनेन्द्रेणवरुणेनविष्णुनादित्यैरुद्रैर्वसुभिःसचाभुवा। सजोषसाउ
पसासूर्येणचसोमंपिबतमश्विना १. विश्वाभिर्धीभिर्भुवनेनवाजिनादिवापृथि-

व्याद्रिभिःसचाभुवा । सजोषसाउषसासूर्येणचसोमंपिवतमश्विना २ विश्वैर्दे-
वैस्त्रिभिरेकादशैरिहाद्रिभरुद्रिभिर्मृगुभिःसचाभुवा । सजोषसाउषसासूर्येणचसो-
मंपिवतमश्विना ३ जुषेथांयज्ञंबोधतंहवस्यमेविश्वेहदेवौसवनावंगच्छतम् । स-
जोषसाउषसासूर्येणचेषंनोवोढ्वमश्विना ४ स्तोमंजुषेथांयुवशेवकन्यनांविश्वेह
देवौसवनावंगच्छतम् । सजोषसाउषसासूर्येणचेषंनोवोढ्वमश्विना ५ गिरोंजुषे-
थामध्वरंजुषेथांविश्वेहदेवौसवनावंगच्छतम् । सजोषसाउषसासूर्येणचेषंनोवो-
ढ्वमश्विना ६ ॥ १४ ॥ हारिद्रवेवपतथोवनेदुपसोमंसुतंमंहिषेवावंगच्छथः ।
सजोषसाउषसासूर्येणचत्रिर्वर्तियातमश्विना ७ हंसाविवपतथोअध्वगाविवसो-
मंसुतंमंहिषेवावंगच्छथः।सजोषसाउषसासूर्येणचत्रिर्वर्तियातमश्विना ८ श्येना-
विवपतथोहव्यदातयेसोमंसुतंमंहिषेवावंगच्छथः।सजोषसाउषसासूर्येणचत्रिर्व-

र्तियाँतमश्विना ९ पिबतंचतृप्णुतंचाचंगच्छतंप्रजांचंधत्तंद्रविंणंचधत्तम् । सजोषं साउपसासूयँणचोजँनोधत्तमश्विना १० जयंतंचप्रस्तुतंचप्रचावंतंप्रजांचंधत्तंद्रविं-णंचधत्तम् । सजोषंसाउपसासूयँणचोजँनोधत्तमश्विना ११ हतंचशत्रून्यतंतंचमि-त्रिणःप्रजांचंधत्तंद्रविंणंचधत्तम् । सजोषंसाउपसासूयँणचोजँनोधत्तमश्विना १२ ॥ १५ ॥ मित्रावरुणवन्ताउतधमँवन्तामरुत्वन्ताजरितुगँच्छथोहवंम् । सजोषं-साउपसासूयँणचादित्यैर्यांतमश्विना १३ अङ्गिरस्वन्ताउतविष्णुवन्तामरुत्वन्ता-जरितुगँच्छथोहवंम् । सजोषंसाउपसासूयँणचादित्यैर्यांतमश्विना १४ ऋभुमन्ता वृषणावाजंवन्तामरुत्वन्ताजरितुगँच्छथोहवंम् । सजोषंसाउपसासूयँणचा-दित्यैर्यांतमश्विना १५ ब्रह्मंजिन्वतमुतजिन्वतंधियोहतंरक्षांसिसेधंतममींवाः । सजोषंसाउपसासूयँणचसोमंसुन्वतोअश्विना १६ क्षत्रंजिन्वतमुतजिन्वतंनृन्ह-

तंरक्षाँसिसेधंतममीवाः । सजोषसाउषसासूर्येणचसोमंसुन्वतोअश्विना १७
धेनूजिंन्वतमुतजिन्दतंविशोंहतंरक्षाँसिसेधंतममीवाः । सजोषसाउषसासूर्येण
चसोमंसुन्वतोअश्विना १८ ॥ १६ ॥ अत्रेरिवशृणुतंपूर्व्यस्तुतिंश्यावाश्वस्यसु-
न्वतोमदच्युता । सजोषसाउषसासूर्येणचाश्विनातिरोअह्न्यम् १९ सगाँइव
सृजतंसुष्टुतिरुपंश्यावाश्वस्यसुन्वतोमदच्युता । सजोषसाउषसासूर्येणचाश्विना
तिरोअह्न्यम् २० रश्मींरिवयच्छतमध्वराँउपंश्यावाश्वस्यसुन्वतोमदच्युता ।
सजोषसाउषसासूर्येणचाश्विनातिरोअह्न्यम् २१ अर्वाग्रथंनियच्छतंपिबतंसो-
म्यंमधु । आयातमश्विनागंतमवस्युर्वांमहंहुवेधत्तंरत्नानिदाशुषे २२ नमोवाके
प्रस्थितेअध्वरेनराविवक्षणस्यपीतये । आयातमश्विनागंतमवस्युर्वांमहंहुवेधत्तं

रत्नानिदाशुषे २३ स्वाहाकृतस्यतृम्पतंसुतस्यदेवावन्धसः। आयातमश्विनागत-मवस्युवांमहंहुवेधत्तंरत्नानिदाशुषे २४ ॥ १७ ॥

अवितासि सप्त ऋचावाश्व इन्द्रः शक्करी । अन्त्या महापङ्क्तिः ।

२६ अवितासिसुन्वतोवृक्तबर्हिषःपिबासोमंमदायकंशतक्रतो । यंतेभाग-मधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते १ प्रावः स्तोतारंमघवन्नवत्वांपिबासोमंमदायकंशतक्रतो। यंतेभागमधारयन्विश्वाःसेहा-नःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते २ ऊर्जादेवाँअवस्योजसात्वां पिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयः समप्सुजिन्मरुत्वाँइन्द्रसत्पते ३ जनिताद्दिवोजनितापृथिव्याःपिबासोमंमदाय

कंशंतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँ इन्द्रसत्पते ४ जनिताश्वानांजनितागवांमसिपिवासोमंमदायुकंशंतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ५ अत्रीणांस्तोममद्रिवोमहस्कृधिपिवासोमंमदायुकंशंतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ६ श्यावाश्वस्यसुन्वतस्तथाशृणुयथाशृणोरत्रेःकर्माणिकृण्वतः । प्रत्रसदस्युमाविथुत्वमेकइन्नृपाह्युइन्द्रब्रह्माणिवर्धयन् ७ ॥ १९ ॥

भेदं सप्त श्यावाश्व इन्द्रो महापङ्क्तिः । आद्यातिजगती ।

३७ प्रेदंब्रह्मवृत्रतूर्येष्वाविथप्रसुन्वतःशचीपतइन्द्रविश्वाभिरूतिभिः । माध्यंदिनस्यसवनस्यवृत्रहन्नेद्यपिवासोमस्यवज्रिवः १ सेहानउग्रपृतनाअभि

द्रुहंःशचीपतइन्द्रविश्वाभिरूतिभिः । माध्यंदिनस्यसवनस्यवृत्रहन्नेनद्यापिबासो-
मस्यवज्रिवः २ एकराळस्यभुवनस्यराजसिशचीपतइन्द्रविश्वाभिरूतिभिः ।
माध्यंदिनस्यसवनस्यवृत्रहन्नेनद्यपिबासोमस्यवज्रिवः ३ मस्थावानायवयसि
त्वमेकइच्छंचीपतइन्द्रविश्वाभिरूतिभिः । माध्यंदिनस्यसवनस्यवृत्रहन्नेनद्य
पिबासोमस्यवज्रिवः ४ क्षेमस्यचप्रयुजश्चत्वमींशिषेशचीपतइन्द्रविश्वाभिरू-
तिभिः । माध्यंदिनस्यसवनस्यवृत्रहन्नेनद्यपिबासोमस्यवज्रिवः ५ क्षत्रायत्व-
मवंसिनत्वमाविथशचीपतइन्द्रविश्वाभिरूतिभिः । माध्यंदिनस्यसवनस्यवृत्र-
हन्नेनद्यपिबासोमस्यवज्रिवः ६ श्यावाश्वस्यरेभतस्तथाशृणुयथाशृणोरत्रेःक-
र्माणिकृण्वतः । प्रत्रसदस्युमाविथत्वमेकइन्नृषाह्यइन्द्रक्षत्राणिवर्धयन् ७ ॥ ११ ॥

३८ यज्ञस्यहिस्थऋत्विजासस्रीवाजेषुकर्मसु । इन्द्राग्नीतस्यबोधतम् १ तोशासारथयावानावृत्रहणापराजिता । इन्द्राग्नीतस्यबोधतम् २ इदंवामदिरं मध्वधुक्षन्द्रिभिर्नरः । इन्द्राग्नीतस्यबोधतम् ३ जुषेथांयज्ञमिष्टयेसुतंसोमंसधस्तुती । इन्द्राग्नीआगतंनरा ४ इमाजुषेथांसवनायेभिर्हव्यान्यूहथुः । इन्द्राग्नी आगतंनरा ५ इमांगायत्रवर्तनिंजुषेथांसुष्टुतिंमम । इन्द्राग्नीआगतंनरा ६ ॥ २० ॥ प्रातर्यावभिरागतंदेवेभिर्जेन्यावसू । इन्द्राग्नीसोमंपीतये ७ श्यावाश्वस्यसुन्वतोऽत्रीणांशृणुतंहवम् । इन्द्राग्नीसोमंपीतये ८ एवावांमद्भऊतयेयथाहुवन्तमेधिराः । इन्द्राग्नीसोमंपीतये ९ आहंसरस्वतीवतोरिन्द्राग्न्योरवोवृणे । पाम्योगायत्रमृच्यते १० ॥ २१ ॥

३१ अग्निमस्तोष्यृग्मियमग्निमीळायजध्यै । अग्निर्देवाँअनक्तुनउभेहिविदथे
कविरन्तश्चरतिदूत्यं१ नभन्तामन्यकेसमे १ न्यग्नेनव्यसावचस्तनूपुशंसमेषाम् ।
न्यरातीररांण्णांविश्वाअर्योअरातीरितोयुच्छन्त्वामुरोनभन्तामन्यकेसमे २ अग्ने
मन्मानितुभ्यंकंघृतंनजुह्वआसनि । सदेवेषुप्रचिकिद्धित्वंह्यसिपूर्व्यःशिवोदूतो
विवस्वतोनभन्तामन्यकेसमे ३ तत्तदग्निर्वयोदधेयथायथाकृपण्यति । ऊर्जाहु-
तिर्वसूनांशंचयोश्चमयोदधेविश्वस्यैदेवहूत्यैनभन्तामन्यकेसमे ४ सचिकेतसहो-
यसाग्निश्चित्रेणकर्मणा । सहोताशश्वतीनांदक्षिणाभिरभीवृतइनोतिचप्रतीव्यं१
नभन्तामन्यकेसमे ५ ॥ २२ ॥ अग्निर्जातादेवानामग्निर्वेदमतीनामपीच्यम् ।
अग्निःसद्मविणोदाअग्निर्द्वाराव्यूर्णुतेस्वाहुतोनवीयसानभन्तामन्यकेसमे ६ अग्नि-

देवेषुसंवसुःसविक्षुयज्ञियास्वा । समुदाकाव्यापुरुविश्वंभूमेवपुष्यतिदेवोदेवेषु
यज्ञियोनभन्तामन्यकेसंमे ७ योअग्निःसप्तमानुषःश्रितोविश्वेषुसिन्धुषु । तमा-
गन्मत्रिपस्त्यंमन्यातुंदस्युहन्तंमग्निंयज्ञेषुपूर्व्यंनभन्तामन्यकेसंमे ८ अग्निस्त्री-
णित्रिधातून्याक्षैतिविदथाकविः । सत्रीरेकादशाँइहयक्षच्चिप्रयच्चनोविप्रोदूतः
परिष्कृतोनभन्तामन्यकेसंमे ९ त्वंनोअग्नआयुषुत्वंदेवेषुपूर्व्यवस्वएकइरज्यसि।
त्वामापःपरिस्रुतःपरियन्तिस्वसेतवोनभन्तामन्यकेसंमे १० ॥ २३ ॥

इन्द्राग्नी द्वादश नाभाकः काण्व इन्द्राग्नी महापङ्क्तिः । उपाद्या शक्करी । अन्त्या त्रिष्टुप् ।

४० इन्द्राग्नीयुवंसुनःसहन्तादासथोरयिम् । येनंदृळ्हासमत्स्वावीळुंचित्साहिषीमह्यग्निर्वनेवुवातइन्नभन्तामन्यकेसंमे १ नहिवांवय्रयामहेऽथेन्द्रमिद्यजाम-
हेशविष्ठंनृणांनरम् । सनःकदाचिदर्वतागमदावाजंसातयेगमदामेधसातयेनभं- ॥४१.१

न्तामन्युकेसंमे २ ताहिमध्यंभराणामिन्द्राग्नीअधिक्षितः । ताउंकवित्वनाकवीपृच्छ्यमानासखीयतेसंधीतमंश्रुतंनरानभन्तामन्युकेसंमे ३ अभ्यर्चनभाकवदिन्द्राग्नीयजसागिरा । ययोर्विश्वमिदंजगदियंद्यौःपृथिवीमह्युपस्थेबिभृतोवसूनभन्तामन्युकेसंमे ४ प्रब्रह्माणिनभाकवदिन्द्राग्निभ्यांमिरज्यत । यासप्तबुध्नमर्णवंजिह्मबारमपोर्णुतइन्द्रईशानओजसानभन्तामन्युकेसंमे ५ अपिंवृश्चपुराणवद्रततैरिवगुप्तिमोजोदासस्यदम्भय । वयंतदस्यसंभृतंवस्विन्द्रेणविभंजेमहिनभन्तामन्युकेसंमे ६ ॥ २४ ॥ यदिंन्द्राग्नीजनाइमेविह्वयन्तेतनागिरा । अस्माकेभिर्नृभिर्वयंसासह्यामंपृतन्यतोवनुयामंवनुष्यतोनभन्तामन्युकेसंमे ७ यानुश्वेतावहोदिवउच्चरांतुउपद्युभिः । इन्द्राग्न्योरनुव्रतमुहानायन्तिसिन्धवोयान्तसींवन्धादमुञ्चतांनभन्तामन्युकेसंमे ८ पूर्वीष्टइन्द्रोपमातयःपूर्वीरुतप्रशस्तयः

सूनोहिन्वस्यहरिवः । वस्वोवीरस्यापृचोयानुसाधन्तनोधियोनभन्तामन्यकेसं-
मे १ तंशिंशीतासुवृक्तिभिस्त्वेषंसत्वानमूग्मियम् । उतोनुचिद्यओजसाशुष्ण-
स्याण्डानिभेदतिजेपत्स्वर्वतीरपोनभन्तामन्यकेसंमे १० तंशिंशीतास्वध्वरंसत्यं
सत्वानमुत्वियम् । उतोनुचिद्यओहतआण्डाशुष्णंस्यभेदत्यजैःस्वर्वतीरपोनभं-
न्तामन्यकेसंमे ११ एवेन्द्राग्निभ्यांपितुवन्नवीयोमन्धातुवदंङ्गिरस्वदंवाचि । त्रि-
धातुनाशमँणापातमस्मान्वयंस्यांनपतयोरयीणाम् १२ ॥ २५ ॥

अस्मा ऊ षु दश नाभाकः काण्वो वरुणो महापङ्क्तिः ।

४१ अस्माऊषुप्रभूतयेवरुणायमरुद्भयोऽर्चाविदुष्टरेभ्यः । योधीतामानुषाणां
पश्वोगाईवरक्षतिनभन्तामन्यकेसंमे १ तमूषुसमनागिरापितॄणांचमन्मभिः ।
नाभाकस्यप्रशस्तिभिर्यःसिन्धूनामुपोदयेसप्तस्वसासमंध्यमोनभन्तामन्यकेसंमे ॥४२॥

२ सक्षपुःपरिषस्वजेन्यु१स्त्रोमाययादधेसविश्वंपरिदर्शतः । तस्यवेनीरनुव्रतमु-
पस्तिस्त्रोअवर्धयन्नभन्तामन्यकेसंमे ३ यःककुभोनिधारयःपृथिव्यामधिदर्शतः ।
समातापूर्व्यंपदंतद्वरुणस्यसत्यंसहिगोपाइवेर्योनभन्तामन्यकेसंमे ४ योधर्तोभु-
वनानांयउस्त्राणामपीच्या३वेदनामानिगुह्या । सकविःकाव्यापुरुरूपंद्यौरिव
पुष्यतिनभन्तामन्यकेसंमे ५ ॥ २६ ॥ यस्मिन्विश्वानिकाव्याचक्रेनाभिरिव
श्रिता । त्रितंजूतीसपर्यतव्रजेगावोनसंयुजेयुजेअश्वाँअयुक्षतनभन्तामन्यकेसं-
मे ६ यआस्वर्कआशयेविश्वाजातान्येषाम् । परिधामानिमर्मृशद्वरुणस्यपुरो
गयेविश्वेदेवाअनुव्रतंनभन्तामन्यकेसंमे ७ ससंमुद्रोअपीच्यस्तुरोयामिवरोहति
नियदासुयजुर्दधे । समायाअर्चिनापदास्तृणान्नाकुमारुहन्नभन्तामन्यकेसंमे
८ यस्यश्वेताविचक्षणातिस्त्रोभूमीरधिक्षितः । त्रिरुत्तराणिपप्रतुर्वरुणस्यध्रुवं

सदःससंत्तानामिरज्यतिनभन्तामन्युकेसंमे १ यःश्वेताँअधिनिर्णिजश्चक्रेकृष्णाँ अ.६ अ.३
अनुव्रता । सधामंपूर्व्यंमेयःस्कम्भेनविरोदसीअजोनद्यामधारयन्नभन्ताम-
न्युकेसंमे १० ॥ २७ ॥

अस्तभ्नात्पट् नाभाकः काण्वः । प्रथमतृचस्यार्चनानावा । आद्यतृचस्य वरुणः ।
अन्त्यस्याश्विनौ । आद्यास्तिस्रस्त्रिष्टुभः । शिष्टा अनुष्टुभः ।

४२ अस्तंभ्नाद्यामसुरोविश्ववेदाअमिंमीतवरिमाणंपृथिव्याः । आसींदुद्वि-
श्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि १ एवावंन्दस्ववरुणंबृहन्तंनमस्या-
धीरंममृतस्यगोपाम् । सनःशर्मत्रिवरूथंवियंसत्पातंनोद्यावापृथिवीउपस्थे २
इमांधियंशिक्षमाणस्यदेवक्रतुंदक्षंवरुणसंशिशाधि । ययातिविश्वांदुरितातरेम
सुतर्मीणमधिनावंरुहेम ३ आवांप्रावाणोअश्विनाधीभिर्विप्रांअचुच्यवुः । ना- ॥४१८॥

सत्यासोमपीतयेनभन्तामन्युकेसमे ४ यथावामत्रिरश्वनागोभिर्विप्रोअजोह-
वीत् । नासत्यासोमपीतयेनभन्तामन्युकेसमे ५ एवावामह्वऊतयेयथाहुवन्त
मेधिराः । नासत्यासोमपीतयेनभन्तामन्युकेसमे ६ ॥ २८ ॥ इति शाकलकृ-
संहितायामष्टमे मण्डले पञ्चमोनुवाकः ॥ ५ ॥

इमे त्रयस्त्रिंशद्ऋच आङ्गिरसोग्निर्गायत्री ।

४३ इमेविप्रस्यवेधसोऽग्नेरस्तृतयज्वनः । गिरःस्तोमासईरते १ अस्मैतेप्र-
तिहर्यतेजातवेदोविचर्षणे । अग्नेजनामिसुष्टुतिम् २ आरोकाइवघेदहत्ति-
ग्मा अग्नेतवत्विषः । दद्भिर्वनानिवप्सति ३ हरयोधूमकेतवोवातजूताउपद्यवि । यत-
न्तेवृथगस्रयः ४ एतेत्येवृथगस्रयइन्द्रायसःसमव्दक्षत । उषसामिवकेतवः ५ ॥२९॥
कृष्णारजांसिपत्सुतःप्रयाणेजातवेदसः । अग्निर्यज्ञेधतिक्षमि ६ धासिंकृ-

ण्वानओषधीर्वप्सदग्निर्नवायति । पुनर्यन्तरुणीरपि ७ जिह्वाभिरहनंनम-
दर्चिषाजञ्जणाभवन् । अग्निर्वनेषुरोचते ८ अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे ।
गर्भेसंजायसेपुनः ९ उदग्नेतवतद्घृतादर्चीरोचतआहुतम् । निंसानंजुह्वो३-
मुखे १० ॥ ३० ॥ उक्षान्नायवशान्नायसोमपृष्ठायवेधसे । स्तोमै-
र्विधेमाग्नये ११ उतत्वानमंसावयंहोतुर्वरेण्यक्रतो । अग्नेसमिद्भिरीमहे १२
उतत्वाभृगुवच्छुचेमनुष्वदंग्नआहुत । अङ्गिरस्वद्धवामहे १३ त्वंह्यग्ने
अग्निनाविप्रोविप्रेणसन्त्सता । सखासख्यासमिध्यसे १४ सत्वंविप्रायदाशुषे
रयिंदेहिसहस्रिणम् । अग्नेवीरवतीमिषम् १५ ॥ ३१ ॥ अग्नेघ्रातःसहस्कृत
रोहिदश्वगुचिव्रत । इमंस्तोमंजुषस्वमे १६ उतत्वाग्नेममस्तुतोवाश्रायंप्रतिह-
र्यते । गोष्टंगावइवाशत १७ तुभ्यंताअङ्गिरस्तमविश्वाःसुक्षितयःपृथक् । अग्ने

कामायये मिरे १८ अग्निंधीभिर्मनीषिणोमेधिरासोविपश्चितः।अग्नसद्यायहिन्वि-
रे १९ तंत्वामज्मेपुवाजिनंतन्वानाअंग्नेअध्वरम्। वह्निंहोतारमीळते २० ॥ ३२ ॥
पुरुत्राहिसदृङ्ङसिविशोविश्वाअनुप्रभुः । समत्सुत्वाहवामहे २१ तमींळिष्वय
आहुतोऽग्निर्विभ्राजतेघृतैः । इमंनःशृणवद्धवम् २२ तंत्वावयंहवामहेशृण्वन्तं
जातवेदसम्। अग्नेघ्नन्तमपद्विषः २३ विशांराजानमद्भुतमध्यक्षंधर्मणामिमम्।
अग्निमींळेसउंश्रवत् २४ अग्निंविश्वायुवेपसंमर्यंनवाजिनंहितम्। सान्निनवांज-
यामसि २५ ॥ ३३ ॥ घ्नन्मृधाण्यपद्विषोदहन्रक्षांसिविश्वहा । अग्नेतिग्मेन
दीदिहि २६ यंत्वाजनासइन्धतेमनुष्वदङ्गिरस्तम । अग्नेसवोधिमेवचः २७
पदंनेदिदिविजाअस्यप्सुजावासहस्कृत । तंत्वागीर्भिर्हवामहे २८ तुभ्यंधेत्तेजना
इमेविश्वाःसुक्षितयःपृथक् । धासिंहिन्वन्त्यत्तवे २९ तेघेदंग्नेस्वाध्योऽहाविश्वा

नृचक्षसः । तरन्तःस्यामदुर्गहा ३० ॥ ३४ ॥ अग्निमन्द्रंपुरुप्रियंशीरंपावकशोचिषम् । हृद्भिर्मन्द्रेभिरीमहे ३१ सत्वमंग्नेविभावसुःसृजन्त्सूर्योनरश्मिभिः । शर्धन्तमांसिजिघ्नसे ३२ तंत्वंसहस्वईमहेदात्रंयन्नोपदस्यति । त्वदंग्नेवार्यं वसु ३३ ॥ ३५ ॥

समिधाग्नि त्रिशद्विरूप आङ्गिरसोग्निर्गायत्री ।

४४ समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिम् । आस्मिन्हव्याजुहोतन १ अग्नेस्तोमंजुषस्वमेवधैस्वानेनमन्मना । प्रतिसूक्तानिहर्यनः २ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे । देवाँआसादयादिह ३ उत्तेवृहन्तोअर्चयःसमिधानस्यदीदिवः । अग्नेशुक्रासईरते ४ उपत्वाजुहोमममघृताचीर्यन्तुहर्यत । अग्नेहव्याजुषस्वनः ५ ॥ ३६ ॥ मन्द्रंहोतारमृत्विजंचित्रभानुंविभावसुम् । अग्निमीळेस

उंश्रवत् ६ प्रत्नंहोतारमीडयंजुष्टमग्निंकविक्रंतुम् । अध्वराणांमभिश्रियंम् ७ जुषाणोअङ्गिरस्तमेमाहव्यान्यानुषक् । अग्नेयज्ञंनयक्रतुथा ८ समिधानउंसन्त्य शुक्रंशोचइहावह । चिकित्वान्दैव्यंजनंम् ९ विप्रंहोतारमद्रुहंधूमकेतुंविभावं-सुम् । यज्ञानांकेतुमींमहे १० ॥ ३७ ॥ अग्नेनिपाहिनस्त्वंप्रतिष्मदेवरीषतः । भिन्धिद्वेषःसहस्कृत ११ अग्निःप्रत्नेनमन्मंनाशुम्भानस्तुन्वं१स्वाम् । कविर्विप्रेण-वावृधे १२ ऊर्जोनपातमाहुवेग्निंपावकशोचिषम् । अस्मिन्यज्ञेस्वंध्वरे १३ स नोंमित्रमहस्त्वमग्नेशुक्रेणशोचिषा । देवैरासत्सिबर्हिषि १४ योअग्निंतन्वोंउ दमैदेवंमर्तःसपर्यति । तस्माइद्दीदयद्वसुं १५ ॥ ३८ ॥ अग्निर्मूर्धादिवःककुत्पतिः पृथिव्याअयम् । अपांरेतांसिजिन्वति १६ उदग्नेशुचयस्तवशुक्राभ्राजन्तईरते । तवज्योतींष्यर्चयः १७ ईशिषेवार्यस्यहिदात्रस्याग्नेस्वर्पतिः । स्तोतास्यांतवशर्म-

णि १८ त्वामग्नेमनीषिणस्त्वांहिन्वन्तिचित्तिभिः । त्वांवर्धन्तुनोगिरः १९ अद-
ब्धस्यस्वधावंतोदूतस्यरेभतःसदा । अग्नेःसख्यंवृणीमहे २० ॥ ३१ ॥ अग्निःशु-
चिंव्रततमःशुचिर्विप्रःशुचिंःकविः । शुचींरोचतआहुतः २१ उतत्वांधीतयोमम
गिरोवर्धन्तुविश्वहा।अग्नेसख्यस्यबोधिनः २२ यदग्नेस्यामहंत्वंत्वंवाघास्याअहम्।
स्युष्टेसत्याइहाशिषः २३ वसुर्वसुपतिर्हिकमस्यग्नेविभावसुः । स्यामतेसुमता-
वपि २४ अग्नेधृतव्रतायतेसमुद्रायेवसिन्धवः । गिरोवाश्रासईरते २५ ॥ ४० ॥
युवानंविश्पतिंकविंविश्वादंपुरुवेपसम् । अग्निंशुम्भामिमन्मभिः २६ यज्ञानां
रथ्यंवयंतिग्मजंम्भायवीळवे । स्तोमैरिषेमाग्नये २७ अयमग्नेत्वेअपिंजरि-
ताभूतुसन्त्य । तस्मैपावकमृळय २८ धीरोह्यस्यद्यसद्विप्रोनजागृविःसदा ।

अग्नेदीदयंसिद्यवि २१ पुराग्नेदुरितेभ्यंःपुरामृधेभ्यंःकवे । प्रणआयुर्वसो तिर ३० ॥ ४१ ॥

आ घ द्विचत्वारिंशद्विंशोकः काण्व इन्द्रो गायत्री । आद्याया इन्द्राग्नी ।

४५ आघायेअग्निमिंन्धतेस्तृणन्तिबर्हिरानुषक् । येषामिन्द्रोयुवासखा १ बृहन्निदिध्मएंषांभूरिशस्तंपृथुःस्वरुः । येषामिन्द्रोयुवासखा २ अयुंह्वइद्युधावृतं शूरआजतिसत्वभिः । येषामिन्द्रोयुवासखा ३ आबुन्दंवृत्रहादंदेजातःपृच्छदि मातरम् । कउग्राःकेहशृण्विरे ४ प्रतित्वाशवसीवंदद्गिरावप्सोनयोधिपत् । यस्तेशत्रुत्वमाचके ५ ॥ ४२ ॥ उतत्वंमघवञ्छृणुयस्तेवष्टिवक्षितत् । यहीळयांसिवीळुतत् ६ यदाजिंयात्याजिकृदिन्द्रंःस्वश्वयुरुपं । रथीतमोरथीनाम् ७ विपुविश्वांअभियुजोवज्रिन्विष्वग्यथावृह । भवानःसुश्रवस्तमः ८ अस्माकं

सुरथंपुरइन्द्रंःकृणोतुसातयें । नयंधूवंन्तिधूर्तयंः १ वृज्यामंतेपरिद्विषो ऽरंतेशक्रदा-
वनें । गमेमेदिन्द्रगोमंतः १० ॥४३॥ शनैश्चिद्यन्तोअद्रिवो ऽश्वावन्तःशतग्विनंः ।
विवक्षंणाअनेहसंः ११ ऊर्ध्वाहितैदिवेदिवेसहस्रासूनृतांगता । जरितृभ्योविं-
मंहते १२ विश्राहित्वांधनंजयमिन्द्रेहवाचिदारुजम् । आदारिणंयथागं-
यम् १३ ककुहांचित्त्वाकवेमंदन्तुधृष्णविन्दवः । आत्वांपणिंयदीमंहे १४ यस्तें
रेवाँअदांशुरिःप्रममंपंमघत्तंये । तस्यंनोवेदआभंर १५॥ ४४ ॥इमउंत्वाविचंक्षते
सखांयंइन्द्रसोमिनंः । पुष्टावंन्तोयथांपशुम् १६ उतत्वाबंधिरंवयंश्रुत्कर्णंसन्त-
मूतयें । दूरादिहहवामहे १७ यच्छ्रुंश्रूयाइमंहवंदुर्मंपंचक्रियाउत । भवेरापिनों
अन्तमः १८ यच्चिद्धितेअपिव्यथिंर्जगन्वांसोअमंन्महि । गोदाइदिन्द्रवोधि नः १९
त्वांरम्भंनजिव्रंयोररम्माशंवसस्पते । उश्मसित्वासधस्थआ २० ॥ ४५ ॥

स्तोत्रमिन्द्रायगायतपुरुनृम्णायुसत्वने । नकिर्यंवृण्वतेयुधि २१ अभित्वा-
वृषभासुतेसुतंसृजामिपीतये । तृम्पाऽयंभुह्रीमदम् २२ मात्वामूराअविष्यवो-
मोपहस्वानआदभन् । मार्कीब्रह्मद्विषोवनः २३ इहत्वागोपरीणसामहेमन्द-
न्तुराधसे । सरोगौरोयथापिव २४ यावृत्रहापरावतिसनावाचचुच्युवे । तास-
त्सुप्रवोचत २५ ॥ ४६ ॥ अपिवत्कद्रुवःसुतमिन्द्रःसहस्रवाह्वे । अत्रादे-
दिष्टपौंस्यम् २६ सत्यंतत्तुर्वशेयदौविदानोअह्नवाय्यम् । व्यानट्तुर्वणेशमि २७
तरणिंवोजनानांत्रदंवाजंस्यगोमतः । समानमुप्रशंसिषम् २८ ऋभुक्षणंनवतं-
वउक्थेपुतुद्यावृधम् । इन्द्रंसोमेसचासुते २९ यःकृन्तदिद्वियोन्यंत्रिशोकाय
गिरिंपृथुम् । गोभ्योगातुंनिरैतवे ३० ॥४७॥ यद्वाधिषेमनस्यसिमन्दानःप्रेदियक्ष-
सि । मातत्कारिन्द्रमूळय ३१ दभ्रंचिद्धित्वावतःकृतंशृण्वेअधिक्षमि । जिगात्विन्द्र

तेमनः ३२ तवेदुताःसुकीर्तयोऽसन्नुतप्रशस्तयः । यदिन्द्रमूळयासिनः ३३ मा नएकस्मिन्नागसिमाद्वयोरुतत्रिषु । वधीर्माञ्शूरभूरिषु ३४ विभयाहित्वावतउग्रादभिप्रभङ्गिणः । दस्मादहमृतीषहः ३५ ॥ ४८ ॥ मासक्युःशूनुमाविदेमा पुत्रस्यप्रभूवसो । आवृत्वद्भूतुतेमनः ३६ कोनुमर्याअमिथितःसखासखायमब्रवीत् । जहाकोअस्मदीषते ३७ एवारेवृषभासुतेऽसिन्वन्भूयाँवयः । श्वघ्नीवनिवताचरन् ३८ आतएतावचोयुजाहरीगृभ्णेसुमद्रथा । यदीब्रह्मभ्युइद्दः ३९ भिन्धिविश्वाअपद्विषःपरिबाधोजहीमृधः । वसुस्पार्हंतदाभर ४० यद्वीळाविन्द्रयत्स्थिरेयत्पशौनेपराभृतम् । वसुस्पार्हंतदाभर ४१ यस्यतेविश्वमानुषोभूरेर्दत्तस्यवेदति । वसुस्पार्हंतदाभर ४२ ॥ ४९ ॥ इति शाकलर्कसंहितायां षष्ठाष्टके तृतीयोध्यायः ॥ ३ ॥

त्वावतस्त्रयस्त्रिंशद्वशोऽन्त्यआसआदिकानीतस्यपृथुश्रवसोदानस्तुतिराद्यापादनिचृत्पञ्चम्यादिक-
कुब्गायत्रीबृहत्यनुष्टुप्सतोबृहतीगायत्रीविपरीतोत्तरःमगाथोद्विपदाचतुर्विंशिकाबृहतीपिपीलिकम-
ध्याककुप्यङ्कुशिराविराड्गत्युपरिष्टाद्बृहतीबृहत्योविषमपदोत्तरापङ्क्तिःसंस्तारपङ्क्तिर्गायत्रीपङ्क्तिमगा
थौचवायव्यौगायत्रीद्विपदोष्णिक्पङ्क्तिर्वायव्यागायत्रीमहिवाद्यूनात्रितआप्तआदिसेभ्योन्त्याःपञ्चो-
पसेपिमहापाङ्क्तंदुःस्वप्नघ्नंस्वादोःपञ्चोनामगाथःसौम्यंत्रैष्टुभंपञ्चमीजगत्यभिप्रदशमस्कण्वःमगाथंतत्म-
सुश्रुतंपुष्टिगुर्यथामनौश्रुष्टिगुर्यथामनावायुरुपमन्त्वाष्टौमेध्यएतत्तेमातरिश्वानोविश्वहातिवैश्वदेवःमगा-
थोभूरीत्पञ्चकृशःमस्कण्वस्यदानस्तुतिर्गायत्रंतुतृतीयान्त्येअनुष्टुभौप्रतितेपूषन्नोन्त्याग्निसौरीपङ्क्तिर्युवंदे-
वाचतुष्कंमेध्यआश्विनंत्रैष्टुभंपप्रुत्विजस्तृचंवैश्वदेव्यमाद्यर्त्विक्स्तुतिर्वेमानिवांसप्तसुपर्णऐन्द्रावरुणंजा-
गतमग्नआविंशतिर्भर्गःमागाथआग्नेयंमागाथंतूभयंभ्रूनामोअस्मैद्वादशमगाथःपाङ्क्तंसप्तम्याद्यास्तिस्रोबृ-
हत्यःसपूर्व्योगायत्रमाद्याचतुर्थ्यादिद्वेसप्तमीचानुष्टुभौगायत्रेन्त्यादैवीत्रिष्टुबुत्वायदिन्द्रतरोभिःपञ्चोना-
कलिःमागाथःमागाथमन्त्यानुष्टुभ्यांनुसैकामत्स्यःसांमदोमैत्रावरुणिर्मान्योवावहवोवामत्स्याजालन-
द्धाआदित्यानस्तुवन्दशम्याद्यास्तिस्रोप्यदितेः ।

त्रावतस्त्रयस्त्रिंशद्वशोऽन्य इन्द्रः । षष्ठंचतुष्कस्य पृथुश्रवसः कानीतस्य दानस्तुतिः । सप्तम-
चतुष्कस्योपान्त्यायाश्च वायुः । आद्या पादनिचृत् । द्वितीयादिचतस्रः षष्ठीदशमी-
त्रयोविंश्येकोनत्रिंशत्तम्यन्त्याश्च गायत्र्यः । पञ्चमी ककुप् । सप्तम्येकादश्येको-
नविंशीपञ्चविंशीसप्तविंश्यो बृहत्यः । अष्टम्यनुष्टुप् । नवमीपर्ङ्क्त्यष्टा-
विंश्यः सतोबृहत्यः । द्वादशी विपरीता । त्रयोदशी द्विपदा । चतु-
र्दशी बृहती पिपीलिकमध्या । पञ्चदशी ककुम्न्यङ्कुशिरा ।
षोडशी विराट् । सप्तदशी जगती । अष्टादश्युपरिष्टाद्बृ-
हती । विंशी विषमपदा । एकविंशीद्वाविंशी-
चतुर्विंश्युपान्त्याः पंक्तयः । त्रिंशी द्विपदा
विराट् । एकत्रिंश्युष्णिक् ।

४६ ॐत्वावंतःपुरूवसोवयमिंद्रप्रणेतः । स्मसिंस्थातर्हरीणाम् १ त्वांहिस्त्यमद्रिवोविभ्रदातारंमिषाम् । विभ्रदातारंरयीणाम् २ आयस्यंतेमहिमानंश- ॥४२१॥

तंमूतेशतक्रतो । गीभिर्गृणन्तिकारवः ३ सुनीथोघासमत्योंयंमरुतोयमर्यमा । मित्रःपान्त्यद्रुहः ४ दधानोगोमदश्ववत्सुवीर्यमादित्यजूतएधते । सदाराया पुरुस्पृहा ५ ॥ १ ॥ तमिन्द्रंदानमीमहेशवसानमभीर्वम् । ईशानंरायईमहे ६ तस्मिन्हिसन्त्यूतयोविश्वाअभीरवःसचा । तमावहन्तुसप्तयःपुरूवसुंमदायहरयः सुतम् ७ यस्तेमदोवरेण्योयइन्द्रवृत्रहन्तमः । यआददिःस्व१र्नृभिर्यःपृतनासु दुष्टरः ८ योदुष्टरोविश्ववारश्रवाय्योवाजेष्वस्तितरुता । सनःशविष्ठसवनावसो गहिगमेमगोमतिव्रजे ९ गव्योपुणोयथापुराश्वयोतरथया । वरिवस्यमहामह १० ॥ २ ॥ नहितेशूरराधसोऽन्तंविन्दामिसत्रा । दशस्यानोमघवन्नूचिदद्रिवोधियोवाजेभिरावित्थ ११ यक्रुष्वःश्रावयत्सखाविश्वेत्सवेदजनिमापुरुष्टुतः । तंविश्वेमानुषायुगेन्द्रंहवन्तेतविषंयतस्तुचः १२ सनोवाजेष्वावितापुरूवसुःपुरःस्था-

तामुपर्वावृत्रहाभुवत् १३ अभिवोवीरमन्धसोमदेपुगायगिरामहाविचेतसम् ।
इन्द्रंनामश्रुत्यंशाकिनंवचोयथा १४ ददीरेकर्णस्तुन्वेदादिर्वसुंदादिर्वाजेषुपुरुहूत
वाजिनम् । नूनमर्थ १५ ॥ ३ ॥ विश्वेषामिरज्यन्तंवसूनांसासह्वांसंचिदस्यवर्पः
सः । कृपयतोनूनमत्यर्थं १६ महःसुवोअरमिपेस्तवामहेमीळ्हुषेअरङ्गमायजग्मये । यज्ञेभिर्गीभिर्विश्वमनुषांमरुतांमियक्षसिगायेत्वानमंसागिरा १७ ये
पातयन्तेअज्मभिर्गिरीणांस्नुभिरेषाम् । यज्ञंमंहिष्वणीनांसुम्नंतुविष्वणीनांप्राध्वरे १८ प्रभङ्गंदुर्मतीनामिन्द्रंशविष्ठाभर । रयिमस्मभ्युंयुज्यंचोदयन्मतेज्येष्ठं
चोदयन्मते १९ सनितःसुसनितरुग्रचित्रचेतिष्ठसूनृत । प्रासहासमाट्सहुरिंसहन्तंभुज्युंवाजेषुपूर्व्यम् २० ॥ ४ ॥ आसएतुयईवदाँअदेवःपूर्तमादद्दे । यथा
चिद्वशोअरण्यःपृथुश्रवसिकानीते३स्याव्युष्यादद्दे २१ पृथिंसहस्राश्व्यस्यायुता-

सनमुष्ट्रानांविंशतिंशता । दशश्यावीनांशतादशञ्यंरुपीणांदशगवांसहस्रा २२
दशश्यावाक्रुधद्र्योवीतवारासआशवः । मथानेमिंनिवावृतुः २३ दानासः
पृथुश्रवसःकानीतस्यसुराधसः । रथंहिरण्ययंददन्मंहिष्ठःसूरिरभूद्वर्पिष्ठमकृत्रु-
वः २४ आनोवायोमहेतनेयाहिमखायुपाजसे । वयंहितेचकृमाभूरिदावनेस-
द्यश्चिन्महिदावने २५ ॥ ५ ॥ योअश्वेभिर्वहतेवस्तउस्राःत्रिःसप्तसप्ततीनाम् ।
एभिःसोमेभिःसोमसुद्भिःसोमपादानायशुक्रपूतपाः २६ योमंडमंचिदुत्मनाम-
न्दञ्चित्रंदावने । अरट्वेअक्षेनहुषेसुकृत्वनिसुकृत्तरायसुक्रतुः २७ उच्चथ्येइवपुषि-
यःस्वराळुतवायोघृतस्नाः । अश्वेषितंरजेषितंशुनेषितंप्राज्मतादिदंनुतत् २८ अ-
र्धप्रियमिषिरायवृष्टिंसहस्रासनम् । अश्वानामिन्नवृष्णाम् २९ गावोनयूथमुप
यन्तिवध्रयउपमायन्तिवध्रयः ३० अधयच्चारथेगुणेशतमुष्ट्राँअचिक्रदत् । अध

श्चित्तेषुविंशतिंशता ३१ शतंदासेवल्बूथेविप्रस्तरुक्षआदंदे । तेतेंवायविमेजना
मदन्तीन्द्रंगोपामदंन्तिदेवगोंपाः ३२ अधुस्यायोषणामहीप्रंतीचीवशंमश्व्यम् ।
अधिंरुक्माविनींयते ३३ ॥ ६ ॥

महि वोष्टादश त्रित आह्य आदित्या महापङ्क्तिः । अन्यानां पञ्चानामुपाश्च ।

४७ महिंवोमहतामवोवरुणमित्रंदाशुषें । यमांदित्याअभिद्रुहोरक्षंथानेमघं
नंशदनेहसोवऊतयंःसुऊतयोवऊतयंः १ विदादेवाअघानामादित्यासोअपाकं-
तिम् । पक्षावयोयथोपरिव्यं१स्मेशर्मयच्छतानेहसोवऊतयंःसुऊतयोवऊतयंः२
व्यं१स्मेअधिशर्मतत्पक्षावयोनयंन्तनाविश्वांनिविश्ववेदसोवरूथ्यांमनामहेऽनेह-
सोवऊतयंःसुऊतयोवऊतयंः ३ यस्माअरांसतक्षयंजीवातुंचप्रचेतसः । मनोर्वि-
श्वस्यघेदिमआदित्यारायईंशतेऽनेहसोवऊतयंःसुऊतयोवऊतयंः ४ परिणोवृण-

जन्नघादुर्गाणिरथ्योयथा । स्यामेदिन्द्रस्यशर्मण्यादित्यानामुतावस्यनेहसोवऊ-
तयःसुऊतयोवऊतयः ५ ॥ ७ ॥ परिह्वृतेदनाजनोयुष्मादत्तस्यवायति । देवा
अदब्भ्रमाशवोयमादित्याअहेतनानेहसोवऊतयःसुऊतयोवऊतयः ६ नतंतिग्मं
चनत्यजोनद्रासदभितंगुरु । यस्मांउशर्मसप्रथआदित्यासोअराध्वमनेहसोवऊ-
तयःसुऊतयोवऊतयः ७ युष्मेदेवाअपिष्मस्तियुध्यन्तइववर्मसु । यूयंमहोन
एनसोयूयमभींदुरुष्यतानेहसोवऊतयःसुऊतयोवऊतयः ८ अदितिर्नउरुष्यत्व-
दितिःशर्मयच्छतु । मातामित्रस्यरेवतोऽर्यम्णोवरुणस्यचानेहसोवऊतयःसुऊ-
तयोवऊतयः ९ यद्देवाःशर्मशरणंयद्भद्रंयदनातुरम् । त्रिधातुयद्वरूथ्यं१तदस्मा-
सुवियन्तनानेहसोवऊतयःसुऊतयोवऊतयः १० ॥ ८ ॥ आदित्याअवहिख्य-
ताधिकूलादिवस्पशः । सुतीर्थमवैतोयथानोनेषथासुगमनेहसोवऊतयःसुऊ-

तयोवऊतयः ११ नेहभद्रंरक्षस्विनेनावयैनोपयाउत । गवेचभद्रंघनवेवीरायंच
श्रवस्यतेऽनेहसोवऊतयःसुऊतयोवऊतयः १२ यदाविर्यदपीच्यं१देवांसोअस्ति
दुष्कृतम् । त्रितेतद्विश्वमाह्यअारेअस्मद्धातनानेहसोवऊतयःसुऊतयोवऊत-
यः १३ यच्चुगोपुदुःष्वप्न्यंयच्चास्मेदुहितर्दिवः । त्रितायतद्विभावर्याह्यायुपरावह-
नेहसोवऊतयःसुऊतयोवऊतयः १४ निष्कंवाघाकृणवंतेत्रजंवादुहितर्दिवः ।
त्रितेदुःष्वप्न्यंसर्वमाह्येपरिदद्मस्यनेहसोवऊतयःसुऊतयोवऊतयः १५ ॥ १ ॥
तदंनायतदपसेतंभागमुपसेदुषे । त्रितायंचद्वितायचोपोदुःष्वप्न्यंवहानेहसोवऊत-
यःसुऊतयोवऊतयः १६ यथांकुलांयथाशफंयथर्णंसंनयामसि । एवादुःष्व-
प्न्यंसर्वमाह्येसंनयामस्यनेहसोवऊतयःसुऊतयोवऊतयः १७ अजैष्माद्यास्त-

नामचाभूमानांगसोवयम् । उपोयस्मादुःष्वप्न्यादभैष्मापतदुच्छत्वनेहसोवऊ-
तयःसुऊतयोवऊतयः १८ ॥ १० ॥

स्वादोः पञ्चदश मगाथः काण्वः सोमस्त्रिष्टुप् । पञ्चमी जगती ।

४८ स्वादोरक्षिवयसःसुमेधाःस्वाध्योवरिवोवित्तरस्य । विश्वेयंदेवाउतम-
र्त्यासोमधुब्रुवन्तोअभिसंचरन्ति १ अन्तश्चप्रागाअदितिर्भवास्यवयाताहरसो
दैव्यस्य । इन्द्रविन्द्रस्यसख्यंजुषाणःश्रौष्टींवधुरमनुरायजध्याः २ अपामसो-
मममृताअभूमागन्मज्योतिरविदामदेवान् । किंनूनमस्मान्कृणवदरातिःकिमु
धूर्तिरमृतमर्त्यस्य ३ शंनोभवहृदआपीतइन्दोपितेवसोमसूनवेसुशेवः । सखे-
वसख्यउरुशंसधीरःप्रणआयुर्जीवसेसोमतारीः ४ इमेमापीतायशसउरुष्यवो
रथंनगावःसमनाहपर्वसु । तेमारक्षन्तुविस्रसश्चरित्रादुतमास्रामाद्यवयन्तिवन्द-

वः ५ ॥ ११ ॥ अग्निंनमांमथितंसंदिदीपःप्रचक्षयकृणुहिवस्यंसोनः । अथाहि तेमदआसोंमंमन्येरेवाँइवप्रचरापुष्टिमच्छं ६ इषिरेणतेमनसासुतस्यंभक्षीमहि पितृयंस्येवरायः । सोमराजन्प्रणआयूँषितारीरहांनोवसूयोँवासराणि७सोमराजन्मृळयांनःस्वस्तितवस्मसिव्रत्या३स्तस्यांविद्धि । अलांतिदक्षंउतमन्युरिन्द्रोमानोँअर्योअनुकामंपरादाः ८ त्वंहिनस्तन्वःसोमगोपागात्रेगात्रेनिषसत्थांनृचक्षाः । यत्तेवयंप्रमिनामव्रतानिसनोमृळसुपखादेववस्यः ९ ऋददरेणसख्यांसचेययो मानरिष्येद्वर्यश्वपीतः । अयंयःसोमोन्यधाय्यस्मेतस्माइन्द्रंप्रतिरंमेम्यायुः १० ॥ १२ ॥ अपत्याअस्थुरनिराअमीवानिरत्रसन्तमिंपीचीरभैषुः । आसोमोँअस्माँअरुहद्विहायाअगन्मयत्रप्रतिरन्तआयुः ११ योनइन्दुःपितरोहृत्सुपीतोऽमर्त्योमर्त्याँआविवेश । तस्मैसोमायहविषाविधेममृळीकेअस्यसुमतौस्याम १२ ॥४२६॥

त्वंसोमपितृभिःसंविदानोऽनुद्यावापृथिवीआततन्थ । तस्मैतइन्दोहविषाविधेमवयंस्यामपतयोरयीणाम् ३३ त्रातारोदेवाअधिवोचतानोमानोनिद्राईशतमोतजल्पिः । वयंसोमस्यविश्वहप्रियासःसुवीरासोविदथमावदेम १४ त्वंनःसोमविश्वतोवयोधास्त्वंस्वर्विदाविशानृचक्षाः । त्वंनइन्दऊतिभिःसजोषाःपाहिपश्चातादुतवापुरस्तात् १५ ॥ १३ ॥ इति शाकलर्क्संहितायामष्टमे मण्डले षष्ठोनुवाकः ॥ ६ ॥

॥ अथ वालखिल्यम् ॥

अभि म दश मस्कण्वः काण्व इन्द्रः प्रगाथः ।

४१ अभिप्रवःसुराधसमिन्द्रमर्चयथाविदे । योजरितृभ्योमघवापुरूवसुःसहस्रेणेवशिक्षति १ शतानीकेवप्रजिगातिधृष्णुयाहन्तिवृत्राणिदाशुषे । गिरे-

रिवप्ररसाअस्यपिन्विरेदत्राणिपुरुभोजसः २ आत्वासुतासइन्दवोमदायइन्द्रगि-
र्वणः। आपोनवज्रिन्नव्योक्यं१सरःपृणन्तिशूरराधसे ३ अनेहसंप्रतरणंविवक्षणं
मध्वःस्वादिष्ठमीपिव। आयथामन्दसानःकिरासिनःप्रक्षुद्रेवत्मनाधृषत् ४ आनः
स्तोममुपद्रवद्धियानोअश्वोनसोतृभिः। यंतेसधावन्त्स्वदयन्तिधेनवइन्द्रकण्वेषु
रातयः ५ ॥ १४ ॥ उग्रंनवीरंनमसोपसेदिमविभूतिमक्षितावसुम्। उद्रीववज्रि-
न्नवतोनसिञ्चतेक्षरन्तीन्द्रधीतयः ६ यद्ध्नूनंयद्वायज्ञेयद्वापृथिव्यामधि। अतोनो
यज्ञमाशुभिर्महेमतउग्रउग्रेभिरागहि ७ अजिरासोहरयोयेतआशवोवातांइवप्र-
सक्षिणः। येभिरपत्यंमनुषःपरीयसेयेभिर्विश्वंस्वर्दृशे ८ एतावंतस्तईमहइन्द्रं
सुम्नस्यगोमंतः। यथाप्रावोमघवन्मेध्यातिथिंयथानीपातिथिंधनें ९ यथाक-

ण्वेमघवन्त्रसदस्यवियथापक्थेदशव्रजे । यथागोशर्येअसनोर्क्रजिश्वनीन्द्रगोम-द्धिरण्यवत् १० ॥ १५ ॥

म सु श्रुतं दश पुष्टिगुः काण्व इन्द्रः मगाथः ।

५० प्रसुश्रुतंसुराधसमर्चाशक्रमभिष्टये । यःसुन्वतेस्तुवतेकाम्यंवसुसहस्रेणेवमंहते १ शतानीकाहेतयोअस्यदुष्टराइन्द्रस्यसमिषोमहीः । गिरिर्नभुज्मा मघवत्सुपिन्वतेयदींसुताअमन्दिषुः २ यदींसुतासइन्दवोऽभिप्रियममन्दिषुः । आपोनधायिसवनंमआवसोदुघाइवापदाशुषे ३ अनेहसंवोहवमानमूतयेमध्वः क्षरन्तिधीतयः । आत्वावसोहवमानासइन्दवउपस्तोत्रेपुदधिरे ४ आनःसोमे स्वध्वरइयानोअत्योनतोशते । यंतेस्वदावन्त्स्वदन्तिगूर्तयःपौरेछन्दयसेहवम् ५ ॥ १६ ॥ प्रवीरमुग्रंविविचिंधनस्पृतंविभूतिंराधसोमहः । उद्रीववज्रिन्नवतोवन-

सुत्वनासदांपीपेथदाशुषे ६ यद्वंनूनंपरावतियद्वांपृथिव्यांदिवि । युजानइन्द्रहरिभिर्महेमतक्रुप्वक्रुप्वेभिरागंहि ७ रथिरासोहरयोयेतेअस्रिधओजोवातस्यपिप्रति । येभिर्निदस्युमनुषोनिघोषयोयेभिःस्वःपरीयसे ८ एतावंतस्तेवसोविद्यामशूरनव्यसः । यथाप्रावएतंशंकृत्व्येधनेयथावशंदशंव्रजे ९ यथाकण्वेमघवन्मेधेअध्वरेदीर्घनीथेदमूनसि । यथागोशर्येअसिषासोअद्रिवोमयिगोत्रंहरिश्रियम् १० ॥ १७ ॥

यथा मनौ दक्ष श्रुष्टिगुः काण्व इन्द्रः प्रगाथः ।

५१ यथामनौसांवरणौसोमंमिन्द्रापिबःसुतम् । नीपातिथौमघवन्मेध्यातिथौपुष्टिगौश्रुष्टिगौसचा १ पार्षद्वाणःप्रस्कण्वंसमंसादयच्छयानंजिव्रिमुद्धितम् । सहस्राण्यसिषासद्वामृषिस्त्वोतोदस्यवेवृकः २ यउक्थेभिर्नविन्धतेचिकिद्य

ऋंपिचोदनः । इन्द्रंतमच्छावदनव्यंस्यामत्यंरिष्यन्तंनभोजसे ३ यस्मांअर्कंस-
तशींपाणमानृचुस्त्रिधातुमुत्तमेपदे । सत्विंमाविश्वाभुवंनानिचिक्रदादिज्जं-
निष्टपौंस्यम् ४ योनौंदातावसूंनामिन्द्रंतंहूमहेवयम् । विद्माह्यस्यसुमतिंनवीं-
यसींगमेमगोमंतिव्रजे ५ ॥ १८ ॥ यस्मैत्वंवंसोदानायशिक्षंसिसरायस्पोंव-
मश्नुते । तंत्वांवयंमघवन्निन्द्रगिर्वणःसुतावंन्तोहवामहे ६ कदाचनस्तरीरंसिने-
न्द्रंसश्चसिदाशुषे । उपोपेन्नुमंघवन्भूयइन्नुतेदानींदेवस्यंपृच्यते ७ प्रयोनंनक्षेअ-
भ्योजंसाक्रिविंवधैःशुष्णंनिघोषयंन् । यदेदस्तंभीत्प्रथयंन्नमूंदिवमादिज्जंनि-
ष्टपार्थिवः ८ यस्यायंविश्वआर्योदासंःशेवधिपाअरिः । तिरश्चिद्यंरुशंमेपवीं-
वितुम्येत्सोअंज्यतेरयिः १ तुरण्यवोमधुमन्तंघृतश्चुतंविप्रासोअर्कमानृचुः ।
अस्मेरयिःपप्रथेवृष्ण्यंशवोऽस्मेसुवानासइन्दवः १० ॥ १९ ॥

५२ यथामनौविवस्वतिसोमंशक्रापिंवःसुतम् । यथांत्रितेछन्दइन्द्रजुजोषस्यायौमादयसेसचा १ पृषंध्रेमेध्यैमातरिश्वनिन्द्रंसुवानेअमन्दथाः । यथासोमं दशांशिप्रेदशोण्येस्यूमरश्मावृजूनसि २ यउक्थाकेवलादधेयःसोमंधृषितापिंवत् । यस्मैविष्णुस्त्रीणिपदाविचक्रमउपांमित्रस्यधर्मभिः ३ यस्यत्वामिंन्द्र स्तोमेंपुचाकनोवाजेवाजिञ्छतक्रतो । तंत्वावयंसुदुघांमिवगोदुहोजुहूमसिंश्रवस्यवः ४ योनोंदातास्तनःपितामहाँउग्रईशानकृत् । अयांमन्नुग्रोमघवांपुरूवसुर्गोरश्वस्यप्रदातुनः ५ ॥ २० ॥ यस्मैत्वंवसोदानायमंहसेसरायस्पोषांमिन्वति । वसूयवोवसुपतिंशतक्रतुंस्तोमैरिन्द्रंहवामहे ६ कदाचनप्रयुच्छस्युभेनिपांसिजन्मनी । तुरीयादित्यहवनंतइन्द्रियमातस्थावमृतंदिवि ७ यस्मैत्वंमघवन्निन्द्र ॥४२८॥

गिर्वणःशिक्षोशिक्षसिदाशुषे । अस्माकंगिरंउतसुष्टुतिंवसोकण्ववच्छृणुधीहवम् ८ अस्तावि मन्मपूर्व्यब्रह्मेन्द्रायवोचत । पूर्वीर्कृतस्यबृहतीरनूषतस्तोतुर्मेधाअसृक्षत १ समिन्द्रोरायोबृहतीरधूनुतसंक्षोणीसमुसूर्यम् । संशुक्रासःशुचयःसंगवाशिरःसोमाइन्द्रंममन्दिपुः १० ॥ २१ ॥

उपमं त्वाष्टौ मेध्यः काण्व इन्द्रः प्रगाथा ।

५३ उपमंत्वामघोनांज्येष्ठंचवृष्णाम् । पूर्भित्तंमंमघवन्निन्द्रगोविदमीशानंरायईमहे १ यआयुंकुत्समतिथिग्वमदाँयोवावृधानोदिवेदिवे । तंत्वावयंहर्यश्वंशतक्रतुंवाजयन्तोहवामहे २ आनोविश्वेषांरसंमध्वःसिञ्चन्त्वद्रयः । येपरावतिंसुन्विरेजनेष्वायेअर्वावतीन्दवः ३ विश्वाहेषांसिजहिचावचाकृधिविश्वेसन्वन्त्वावसु । शीष्टेषुचित्तेमदिरासोंअंशवोयत्रासोमस्यतृम्पसि ४ ॥ २२ ॥ इ

न्द्रनेदीयएदिहिमितमेधाभिरूतिभिः। आशंतमशंतमाभिरभिष्टिभिरास्वापेस्वापिभिः ५ आजितुरंसत्पतिंविश्वचर्षणिंकृधिप्रजास्वाभगम्। प्रसूतिराशचीभिर्येतंउक्थिनःक्रतुंपुनतआनुषक् ६ यस्तेसाधिष्ठोऽवसेतेस्यामभरेकुते। वयंहोत्राभिरुतदेवहूतिभिःससवांसोमनामहे ७ अहंहितेहरिवोब्रह्मवाजयुराजिंयामिसदोतिभिः। त्वामिदेवतममेसमंश्वयुर्गव्युरग्रेमथीनाम् ८ ॥ २३ ॥

एतच्चेष्टौ मातरिश्वा काण्व इन्द्रः प्रगाथा। तृतीयाचतुर्थ्योर्विश्वे देवाः।

५४ एतत्तइन्द्रवीर्यंगीर्भिर्गृणन्तिकारवः। तेस्तोभन्तऊर्जमावन्घृतश्चुतंपौरासोनक्षन्यीतिभिः १ नक्षन्तइन्द्रमवसेसुकृत्ययायेषांसुतेषुमन्दसे। यथासंवर्तेअमदोयथाकृशएवास्मेइन्द्रमत्स्व २ आनोविश्वेसजोषसोदेवासोगन्तनोपनः। वसवोरुद्राअवसेनआगमञ्छृण्वन्तुमरुतोहवम् ३ पूषाविष्णुर्हवनंमेसरस्वत्यवं-

न्तुसप्तसिन्धवः । आपोवातःपर्वतासोवनस्पतिःशृणोतुपृथिवीहवम् ४ ॥ २४ ॥
यदिन्द्राहोअस्तितेमाघोनंमघवत्तम । तेनंनोबोधिसधमाद्योवृधेभगोदानायवृ-
त्रहन् ५ आजिंपतेनृपतेत्वमिद्धिनोवाजआवक्षिसुक्रतो । वीतीहोत्राभिरुतदे-
ववीतिभिःससवांसोविशृण्विरे ६ सन्तिह्यर्यआशिषइन्द्रआयुर्जनानाम् । अ-
स्मान्नक्षस्वमघवन्नुपावसेधुक्षस्वपिप्युषीमिषम् ७ वयंतइन्द्रस्तोमेभिर्विधेमत्व-
मस्माकंशतक्रतो । महिस्थूरंशशयंराधोअह्रयंप्रस्कण्वायनितोशय ८ ॥ २५ ॥

भूरीत्यष्च कृशः काण्वः प्रस्कण्वस्य दानस्तुतिर्गायत्री । तृतीयान्त्ये अनुष्टुभौ ।

५५ भूरीदिन्द्रस्यवीर्यंव्यख्यंमभ्यायति । राधस्तेदस्यवेवृक १ शतंश्वेतासउक्षणोदिविताराेनरोचन्ते । महादिवंनतंस्तभुः २ शतंवर्णूञ्छतंशुनःशतंचर्मा-
णिम्लातानि । शतंमेवल्वजस्तुकाअरुषीणांचतुःशतम् ३ सुदेवःस्थकाण्वा-

यनावयोवयोविचरन्तः । अश्वांसोनचंङ्कमत ४ आदित्सात्रस्यंचाकिरन्नानूनस्य महिश्रवः । श्यावीरतिध्वसन्पथश्चक्षुषाचनसंनशे ५ ॥ २६ ॥

प्रति ते पृषध्रः काण्वः प्रस्कण्वस्य दानस्तुतिर्गायत्री । अन्त्यायाः सूर्याग्नी । सैत्र पङ्क्तिः ।

५६ प्रतितेदस्यवेवृकराधोंअदर्शयद्गयम् । द्यौर्नप्रथिनाशवः १ दशमह्यौं पौतक्रतःसहस्रादस्यवेवृकः । नित्यांद्रायोअमंहत २ शतंमेगर्दभानांशतमूर्णावतीनाम् । शतंदासाँअतिस्रजः ३ तत्रोअपिप्राणीयतपूतक्रतायै व्यक्ता । अश्वांनामिन्नयूथ्यांम् ४ अचेत्यग्निर्धिष्ण्यःक्रतुर्हव्यवाट्सुमद्रथः । अग्निःशुक्रेणशोचिषावृहत्सूरोअरोचतदिविसूर्योअरोचत ५ ॥ २७ ॥

युवं देवा चतुष्कं मेध्यः काण्वोश्विनौ त्रिष्टुप् ।

५७ युवंदेवाक्रतुनापूर्व्येणयुक्तारथेनतविषंयेजत्रा । आगेच्छतंनासत्याशचीभि- ॥४३०

नाकृतवावृभादुवारजसःपृथिव्याः । सहस्रंशंसाउतयेगविष्टौसर्वाँइत्ताँउप-यातापिवध्यै ३ अयंवांभागोनिहितोयजत्रेमागिरोनासत्योपयातम् । पिबतंसो-मंमधुमन्तमस्मेप्रदाश्वांसंमवतंशचीभिः ४ ॥ २८ ॥

यमृत्विजस्तृचो मेध्यः काण्वो विश्वे देवास्त्रिष्टुप् । आद्याया ऋत्विजो वा ।

५८ यमृत्विजोबहुधाकल्पयन्तःसचैतसोयज्ञमिमंवहन्ति । योअनूचानो ब्राह्मणोयुक्तआसीत्कास्वित्तत्रयजमानस्यसंवित् १ एकएवाग्निर्बहुधासमिद्ध एकःसूर्योविश्वमनुप्रभूतः । एकैवोषाःसर्वमिदंविभात्येकंवाइदंविबभूवसर्वम् २

ज्योतिष्मन्तंकेतुमन्तंत्रिचक्रंसुखंरथंसुपदंभूरिवारम् । चित्रामंघायस्ययोगेऽधि-
जज्ञेतंवांहुवेअतिरिक्तंपिबंध्यै ३ ॥ २९ ॥

इमानि वां सप्त सुपर्णः काण्व इन्द्रावरुणौ जगती ।

५९ इमानिंवांभागधेयानिसिस्रतइन्द्रांवरुणाप्रमहेसुतेषुवाम् । यज्ञेयज्ञेह
सवंनाभुरण्यथोयत्सुन्वतेयजंमानायशिक्षंथः १ निःपिर्ध्वरीरोषंधीराषंआस्ता-
मिन्द्रांवरुणामहिमानंमाशत । यासिस्रंतूरजंसःपारेअध्वनोययोःशत्रुर्नाकिरादेव
ओहंते २ सत्यंतदिन्द्रावरुणाकृशस्यवांमध्वऊर्मिंदुहतेसप्तवाणीः । ताभिर्दा-
श्वांसंमवतंशुभस्पतीयोवामदंब्धोअभिपातिचित्तिभिः ३ घृतप्रुषःसौम्यजीर-
दानवःसप्तस्वसारःसदनकृतस्यं । याहंवामिन्द्रावरुणाघृतश्चुतस्ताभिर्धत्तंयजं-
मानायशिक्षतम् ४ ॥ ३० ॥ अवोचाममहतेसौभगायसत्यंत्वेषाभ्यांमहिमा-

नमिन्द्रियम् । अस्मान्त्सिवेन्द्रावरुणाघृतश्चुतास्त्रिभिःसप्तेभिरवतंशुभस्पती ५ इन्द्रावरुणायद्दपिभ्योमनीषांवाचोमतिंश्रुतमदत्तमग्नै । यानिस्थानान्यसृजन्त धीरायज्ञंतन्वानास्तपसाभ्यपश्यम् ६ इन्द्रावरुणासौमनसमद्दतंरायस्पोषंयजमानेषुधत्तम् । प्रजांपुष्टिंभूतिमस्मासुधत्तंदीर्घायुत्वायप्रतिरतंनआयुः ७॥ ३१॥

॥ इति वालखिल्यं समाप्तम् ॥

अग्न आ विंशतिर्भर्गः मागाथोग्निः प्रगाथा ।

६० अग्नआयाह्यग्निभिर्होतारंत्वावृणीमहे । आत्वामनक्तुप्रयताहविष्मतीयजिष्ठंबर्हिरासदे १ अच्छाहित्वासहसःसूनोअङ्गिरःसुचश्चरन्त्यध्वरे । ऊर्जोनपातंघृतकेशमीमहेऽग्नियज्ञेषुपूर्व्यम् २ अग्नेकविर्वेधाअसिहोतापावकयक्ष्यः । मन्द्रोयजिष्ठोअध्वरेष्वीड्योविभूभिःशुक्रमन्मभिः ३ अद्रोघमावहोशतोयविष्ठ्यदेवाँ

अंजस्त्वीतये । अभिप्रयांसिसुधितावसोगहिमन्दंस्वधीतिभिर्हितः ४ त्वमित्सप्रथाअस्यग्नेत्रातर्ऋतस्कविः । त्वांविप्रासःसमिधानदीदिवआविर्वासन्ति वेधसः ५ ॥ ३२ ॥ शोचाशोचिष्टदीदिहिविशेमयोरास्वंस्तोत्रेमहाँअसि । देवानांशर्मन्मंसन्तुसूरयःशत्रूपाहंःस्वग्नयः ६ यथाचिद्वृद्धमंतसमग्नेसंजूर्वसिक्षमिं । एवादंहमित्रमहोयोअस्मध्रुग्दुर्मन्माकश्चवेनति ७ मानोमर्ताँयरिपवेरक्षस्विनेमाघशंसायरीरधः । अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिःपाहिपायुभिः ८ पाहिनोअग्नएकयापाह्यु१ताद्वितीयया । पाहिगीभिस्तिसृभिरूर्जापतेपाहिचतसृभिर्वसो ९ पाहिविश्वस्माद्रक्षसोअरांव्णःप्रस्मवाजेपुनोऽव । त्वामिद्धिनेदिष्ठंदेवतातयआपिंनक्षांमहेवृधे १० ॥ ३३ ॥ आनोअग्नेवयोवृधंरयिंपावकशंस्यम् । रास्वाचनउपमातेपुरुस्पृहंसुनीतिस्वयंश-

स्तरम् ११ येनवंसामपृतनासुशर्धंतस्तरन्तोअर्यआदिशः । सत्वंनोवर्धप्रयसा शचीवसोजिन्वाधियोवसुविदः १२ शिशानोवृषभोयथाग्निःशृङ्गेदविध्वत् । तिग्माअस्यहनवोनप्रतिधृषेसुजम्भःसहसोयहुः १३ नाहितेअग्नेवृषभप्रतिधृषे जम्भासोयद्वितिष्ठसे । सत्वंनोहोतःसुहुतंहविष्कृधिवंस्वानोवार्यापुरु १४ शेपे वनेपुमात्रोःसंत्वामतासइन्धते । अतन्द्रोहव्यावहसिहविष्कृतआदिद्देवेषुराजसि १५ ॥ ३४ ॥ सप्तहोतारस्तमिदीळतेत्वाग्नेसुत्यजमह्यम् । भिनत्स्यद्रितपसाविशोचिषाग्नेतिष्ठजनाँअति १६ अग्निमग्निंवोअधिगुंहुवेमवृक्तबर्हिषः । अग्निंहितप्रयसःशश्वतीष्वाहोतारंचर्षणीनाम् १७ केतेनशर्मन्त्सचतेसुपामण्यग्नेतुभ्यंचिकित्वना । इषण्यन्नःपुरुरूपमाभरवाजंनेदिष्ठमूतये १८ अग्नेजरितर्विश्पतिस्तेपानोदेवरक्षसः । अग्नेपिवान्गृहपतिर्महाँअसिदिवस्पायुर्दुरोणः

युः ११ मानोरक्षआवेशीदाघृणीवसोमायातुर्यातुमावताम् । परोगव्यूत्यनिरा- अ.६अ.४
मपक्षुधमग्नेसेधरक्षस्विनः २० ॥ ३५ ॥

उभयमष्टादश भर्गः भागाथ इन्द्रः भगाथा ।

६१ उभयंशृणवच्चनइन्द्रोअर्वागिदंवचः । सत्राच्यामघवासोमपीतयेधिया शविष्ठआगमत् १ तंहिस्वराजंवृषभंतमोजसेधिषणेनिष्टतक्षतुः । उतोपमानां प्रथमोनिषीदसिसोमकामंहितेमनः २ आवृषस्वपुरूवसोसुतस्येन्द्रान्धसः । विद्माहित्वाहरिवःपृत्सुसांसहिमधृष्टंचिद्धृष्वणिम् ३ अप्रामिसत्यमघवन्तथेदसदिन्द्रक्रत्वायथावशः । सनेमवाजंतवंशिप्रिन्नवंसामक्षूचिद्यन्तोअद्रिवः ४ शग्ध्यूषुशचीपतइन्द्रविश्वाभिरूतिभिः । भगंनहित्वायशसंवसुविदमनुशूरचरामसि ५ ॥ ३६ ॥ पौरोअश्वस्यपुरुकृद्गवामस्युत्सोदेवहिरण्ययः । नाकिर्हि

दानंपरिमर्धिपत्त्वेयद्याभितदाभंर ६ त्वंह्येहिचेरवेविदाभगंवसुंत्तये । उद्वावृ-
पस्वमघवन्गविष्टयउदिन्द्राश्वमिष्टये ७ त्वंपुरूसहस्राणिशतानिचयूथादानायं
मंहसे । आपुरंदरंचकृमविप्रंवचसइन्द्रंगायन्तोऽवसे ८ अविप्रोवायदविधद्विप्रो
वेन्द्रतेवचः । सप्रमंमन्दत्वायाशंतक्रतोप्राचामन्योअहंसन ९ उग्रबाहुर्म्रक्षकृत्वा
पुरंदरोयदिमेगृणद्वचम् । वसूयवोवसुंपतिंशतक्रतुंस्तोमैरिन्द्रंहवामहे १०
॥ ३७॥ नपापासोमनामहेनारायासोनजह्नवः । यदिन्विन्द्रंवृषणंसचासुतेसखा-
यंकृणवामहै ११ उग्रंयुयुज्मपृतनासुसासहिमृणकांतिमदाभ्यम् । वेदाभृमं
चित्सनितारथीतमोवाजिनंयमिदूनशत् १२ यतइन्द्रभयामहेततोनोअभयंकृ-
धि । मघवञ्छग्धितवतन्नऊतिभिर्विद्विषोविमृधोजहि १३ त्वंहिरांधस्पतेराध-
सोमहःक्षयस्यासिविधतः । तंत्वांवयंमघवन्निन्द्रगिर्वणःसुतावन्तोहवामहे १४

इन्द्रःस्पळुतवृत्रहापरस्पानोवरेण्यः । सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनः पुरः १५ ॥ ३८ ॥ त्वंनःपश्चादधरादुत्तरात्पुरइन्द्रनिपाहिविश्वतः । आरेअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः १६ अद्याद्याश्वःश्वइन्द्रत्रास्वंपरेचनः । विश्वाचनोजरितॄन्त्संत्पतेअहादिवानक्तंचरक्षिपः १७ प्रभङ्गीशूरोमघवांतुवीमघः संमिश्लोवीर्यायकम् । उभातेवाहूवृषणाशतक्रतोनियावज्रंमिमिक्षतुः १८॥३९॥

मो अस्मै द्वादश मागायः काण्व इन्द्रः पङ्क्तिः । सप्तम्याद्यास्तिस्रो बृहत्यः ।

६२ प्रोअंस्माउपस्तुतिंभरतायज्जुजोपति । उक्थैरिन्द्रंस्यमाहिनंवयोवर्धन्तिसोमिनोभद्राइन्द्रंस्यरातयः १ अयुजोअसंमोनृभिरेकःकृष्टीरयास्यः । पूर्वीरतिप्रवावृधेविश्वांजातान्योजसाभद्राइन्द्रंस्यरातयः २ अहितेनचिदवंताजीरदानुःसिषासति । प्रवाच्यमिन्द्रतत्तवंवीर्याणिकरिष्यतोभद्राइन्द्रंस्यरातयः ३ आ

यांहिकृणवांमतइन्द्रब्रह्मांणिवर्धना । येभिःशविष्ठचाकनोभद्रमिहश्रवस्यतेभद्रा इन्द्रस्यरातयः ४ धृषतश्चिद्धृषन्मनःकृणोषीन्द्रयत्त्वम् । तीव्रैःसोमैःसपर्यतोन-मोभिःप्रतिभूषतोभद्राइन्द्रस्यरातयः ५ अवचष्टऋचीषमोऽवताँइवमानुषः । जुष्टीदक्षस्यसोमिनःसखायंकृणुतेयुजंभद्राइन्द्रस्यरातयः ६ ॥ ४० ॥ विश्वेत इन्द्रवीर्यंदेवाअनुक्रतुंददुः । भुवोविश्वस्यगोपतिःपुरुष्टुतभद्राइन्द्रस्यरातयः ७ गृणे तदिन्द्रतेशवउपमंदेवतातये । यद्धंसिवृत्रमोजसाशचीपतेभद्राइन्द्रस्यरातयः ८ समंनेववपुष्यतःकृणवन्मानुषायुगा । विदेतदिन्द्रश्चेतनमधश्रुतोभद्राइन्द्रस्यरा-तयः ९ उज्जातमिन्द्रतेशवउत्त्वामुत्तवक्रतुम् । भूरिंगोभूरिंवावृधुर्मघवन्तवश-मिणभद्राइन्द्रस्यरातयः १० अहंचत्वंचवृत्रहन्त्संयुज्यावसनिभ्यआ । अरातीवाचिदद्रिवोऽनुनौशूरमंसतेभद्राइन्द्रस्यरातयः ११ सत्यमिद्धाउतंवयमिन्द्रं

स्तवामनानृतम् । महाँअसुन्वतोवधोभूरिज्योतींषिसुन्वतोभद्राइन्द्रस्यरा-
तयः १२ ॥ ४१ ॥

स पूर्व्यो द्वादश मागाथःकाण्व इन्द्रो गायत्री । अन्त्याया देवाः ।
आद्याचतुर्थीपञ्चमीसप्तम्योनुष्टुभः । अन्त्या त्रिष्टुप् ।

६३ सपूर्व्योमहानाँविनःक्रतुभिरानजे । यस्यद्वारामनुष्पितादेवुधिर्यआनु-
जे १ दिवोमानंनोत्सदन्तसोमपृष्ठासोअद्रयः । उक्थाब्रह्मंचशंस्या २ सविद्वाँ
अङ्गिरोभ्यइन्द्रोगाअंवृणोदपं । स्तुषेतदस्यपौंस्यम् ३ समन्नथांकविवृधइन्द्रो
वाकस्यंवक्षणिंः । शिवोअर्कस्यहोमंन्यस्मन्नागन्त्ववंसे ४ आदूनुतेअनुक्रतुंस्वा-
हावरस्ययज्यवः । श्वात्रमर्काअनूषतेन्द्रंगोत्रस्यदावनें ५ इन्द्रेविश्वांनिवीर्याँकृ-
तानिकर्त्वानिच । यमर्काअध्वरंविदुः ६ ॥४२॥ यत्पाश्वंजन्ययाविशेन्द्रेघोषुअसृ-

क्षत । अस्तृणाद्बृहणाविवेषोऽयामानंस्यसक्षयः ७ इयमुतेअनुष्टुतिश्चकृपेतानि-
षौंस्या । प्रावश्चक्रस्यवर्तनिम् ८ अस्यवृष्णोव्योदनउरुक्रमिष्टजीवसे । यवंन
पश्वआददे ९ तद्धनाअवस्यवोयुष्माभिर्दक्षपितरः । स्यामंमरुत्वंतोवृधे १०
वळृत्विर्यायुधान्नक्रंभिःशूरनोनुमः । जेषांमेन्द्रत्वयायुजा ११ अस्मेरुद्रामेह-
नापवेतासोवृत्रहत्येभरहूतौसजोषाः । यःशंसंतेस्तुवतेधायिपज्रइन्द्रज्येष्ठाअस्माँ
अवन्तुदेवाः १२ ॥ ४३ ॥

उत्त्वा द्वादश मागाथः काण्व इन्द्रो गायत्री ।

६४ उत्त्वांमन्दन्तुस्तोमाःकृणुष्वराधोअद्रिवः । अवब्रह्मद्विषोजहि १ पदा
पणींरराधसोनिबाधस्वमहाँअसि । नहित्वाकश्चनप्रति २ त्वमीशिषेसुतानाम-
िन्द्रत्वमसुतानाम् । त्वंराजाजनानाम् ३ एहिप्रेहिक्षयोदिव्याऽघोषश्चर्षणी-

नाम् । ओभेपृणासिरोदसी ४ त्यंचित्पर्वतंगिरिंशतवन्तंसहस्रिणम् । विस्तोतृभ्योरुरोजिथ ५ वयमुत्वादिवासुतेवयंनक्तंहवामहे । अस्माकंकामुमापृण ६ ॥ ४४ ॥ कं१स्यवृषभोयुवांतुविग्रीवोअनानतः । ब्रह्माकस्तंसपर्यति ७ कस्य स्वित्सवनंवृषाजुजुष्वाँअवगच्छति । इन्द्रंकउस्विदाचंके ८ कंतेदानाअंसक्षत वृत्रंहन्कंसुवीर्यां । उक्थेकउस्विदन्तमः ९ अयंतेमानुषेजनेसोमःपुरुषुसूयते । तस्येहिप्रद्रवापिवं १० अयंतेशर्यणावतिसुषोमायामधिंप्रियः । आर्जीकीयेमदिंतमः ११ तमद्यराधसेमहेचारुमदायघृष्वये । एहींमिन्द्रद्रवापिवं १२ ॥४५॥

यदिन्द्र द्वादश मागाथः काण्व इन्द्रो गायत्री ।

६५ यदिंन्द्रप्रागपागुदङ्न्यंग्वाहूयसेनृभिः । आयांहितूयमाशुभिः १ यद्वां प्रस्रवंणेदिवोमादयांसेस्वर्णरे । यद्वांसमुद्रेअन्धसः २ आत्वांगीर्भिर्महामुरुहुवे

गामिंवभोजंसे । इन्द्रसोमंस्यपीतयें ३ आतंइन्द्रमहिमानंहरयोदेवतेमहेः । रथेंवहन्तुविभ्रतः ४ इन्द्रंगृणीपउंस्तुपेमहाँउग्रईशानंकृत् । एहिंनःसुतंपिवं ५ सुतावंन्तस्त्वावयंप्रयंस्वन्तोहवामहे । इदंनोंबर्हिरासदें ६ ॥ ४६ ॥ यच्छिद्धिश-श्वंताममीन्द्रसाधारणस्त्वम् । तंत्वांवयंहवामहे ७ इदंतेसोम्यंमध्वधुक्षन्नद्रिंभिर्न-रंः । जुषाणइन्द्रतत्पिंव ८ विश्वाँअर्योविंपश्चितोऽतिख्यस्तूयमागंहि । अस्मे धेंहिश्रवोबृहत् ९ दातामेपृपंतीनांराजाहिरण्यवीनाम् । मादेवामघवांरिषत्१० सहस्रेपृपंतीनामधिंश्चन्द्रंवहत्पृथु । शुक्रंहिरण्यमादंदे ११ नपांतोदुर्गहंस्यमेसह-स्रेणसुराधंसः । श्रवोंदेवेष्वंक्रत १२ ॥ ४७ ॥

तरोभिः पञ्चदश कलिः प्रागाथ इन्द्रः प्रगाथा । अन्त्यानुष्टुप् ।

६६ तरोंभिर्वोविदद्वसुमिन्द्रंसवाधंऊतयें । बृहद्गायन्तःसुतसोमेअध्वरेहुवे

भरंनकारिणम् १ नयंदुध्रावरंन्तेनस्थिरामुरोमदेसुशिप्रमन्धसः । यआदृत्या शशमानायसुन्वतेदातांजरित्रउक्थ्यम् २ यःशक्रोमृक्षोअभ्योयोवाकीजो हिरण्ययः । सऋर्वस्यरेजयत्यपावृतिमिन्द्रोगव्यस्यवृत्रहा ३ निखातंचिद्यःपुरुसंभृतंवसूदिद्वपंतिदाशुषे । वज्रीसुशिप्रोहरिश्मश्रुदित्करदिन्द्रःकृत्वायथावशत् ४ यद्वावन्थपुरुष्टुतपुराचिच्छूरनृणाम् । वयंतत्तइन्द्रसंभरामसियज्ञमुक्थंतुरंवचः ५ ॥ ४८ ॥ सचासोमेपुपुरुहूतवज्रिवोमदायद्युक्षसोमपाः । त्वमिद्धिब्रह्मकृतेकाम्यंवसुदेष्ठःसुन्वतेभुवः ६ वयमेनमिदाह्योऽपीपेमेहवज्रिणम् । तस्माउअद्यसंमनासुतंभरानूनंभूपतश्रुते ७ वृकश्चिदस्यवारणउरामथिरावयुनेपुभूषति । सेमंनःस्तोमंजुजुषाणआगहीन्द्रप्रचित्रयाधिया ८ कदून्व१स्याकृतमिन्द्रस्यास्तिपौंस्यम् । केनोनुकंश्रोमतेनूनशुश्रुवेजनुषःपरिवृत्रहा ९ कदूंमहीरधृष्टाअस्यतविषीःक-

दुवृत्रघ्नोअस्तृतम्। इन्द्रोविश्वान्वेकनाटाँअहर्दृशउतक्रत्वापणीरभि १०॥४९॥व-
यंघात्वेअपूर्व्येन्द्रब्रह्माणिवृत्रहन्। पुरूतमासःपुरुहूतवज्रिवोभूतिंनप्रभरामसि ११
पूर्वीश्चिद्धित्वेतुविकूमिन्नाशसोहवन्तइन्द्रोतयः। तिरश्चिद्दर्यःसवनावसोगहिश-
विष्ठश्रुधिमेहवम् १२ वयंघात्वेइद्धिन्द्रविप्राअपिष्मसि। नाहित्वदन्यःपुरुहूत
कश्चनमघवन्नस्तिमर्डिता १३ त्वंनोअस्याअमतेरुतक्षुधोऽभिशस्तेरवस्पृधि।
त्वंनऊतीतवचित्रयाधियाशिक्षाशचिष्ठगातुवित् १४ सोमइद्वःसुतोअस्तुकल-
योमाविभीतन। अपेदेवध्वरमायतिस्वयंधैर्योअपायति १५॥ ५०॥

त्याञ्चेकविंशतिर्मत्स्यः सामदो मान्यो वा मैत्रावरुणिर्बर्हवो वा मत्स्या
जालनद्धा आदित्या गायत्री।

६७ त्यानुक्षत्रियाँअवआदित्यान्यांचिपामहे। सुमृळीकाँअभिष्टये १ मि-

त्रोनोअत्यँहतिंवरुणःपर्षदर्यमा । आदित्यासोयथाविदुः २ तेषांहिचित्रमुक्थ्यँ-
१वरूथमस्तिदाशुषे । आदित्यानांमरंकृते ३ महिंवोमहतामवोवरुणामित्रार्यँ-
मन् । अवांस्यावृणीमहे ४ जीवान्नोअभिधेतनादित्यासःपुराहथात् । कद्धस्थ
हवनश्रुतः ५ ॥ ५१ ॥ यद्धःश्रान्तायसुन्वतेवरूथमस्तियच्छर्दिः । तेनानोअ-
धिवोचत ६ अस्तिदेवाअंहोरुर्वस्तिरन्तमनागसः । आदित्याअद्रुतैनसः ७ मा
नःसेतुंःसिषेदयंमहेवृणक्तुनस्परिं । इन्द्रइद्धिश्रुतोवशी ८ मानोमृचारिषूणां
वृजिनानांमविष्यवः । देवाअभिप्रमृक्षत ९ उतत्वामंदितेमत्यहंदेव्युपब्रुवे ।
सुमृळीकामभिष्टये १० ॥ ५२ ॥ पाँपंदीनेगंभीरआँउग्रंपुत्रेजिघाँसतः । मा-
किंस्तोकस्यनोरिषत् ११ अनेहोनंउरुव्रजउरूचीविप्रसर्तवे । कृधितोकायं
जीवसे १२ येमूर्धानःक्षितीनामदब्धासःस्वयंशसः । व्रतारक्षन्तेअद्रुहः १३

तेनआत्मोवृक्काणामादित्यासोमुमोचत । स्तेनंवहमिवादिते १४ अपोपुणंइयं शरुरादित्याअर्पदुर्मतिः । अस्मदेत्वजंघपी १५ ॥ ५३ ॥ शश्वद्धिर्वःसुदानव आदित्याऊतिभिर्वयम् । पुरानूनंवुभुज्महे १६ शश्वन्तंहिप्रचेतसःप्रतियन्तंचिदेनसः । देवाःकृणुथजीवसे १७ तत्सुनोनव्यंसन्यंसआदित्यायन्मुमोचति । वन्याहवहमिवाद्रिते १८ नास्माकंमस्तितत्तरआदित्यासोअतिष्कदे । यूयमस्मभ्यंमृळत १९ मानोहेतिर्विवस्वतआदित्याःकृत्रिमाशरुः । पुरानुजरसोवधीत् २० विपुद्वेपोव्यंहतिमादित्यासोविसंहितम् । विष्वग्विवृहतारपः २१ ॥ ५४ ॥ इति शाकलर्क्संहितायां षष्ठाष्टके चतुर्थोध्यायः ॥ ४ ॥

आत्वेकोनात्रिंशेऽध आदावनुष्टुप्मुखास्तृचाश्चत्वारोन्त्याःपङ्क्त्यश्वमेधयोर्दानस्तुतिःमध्यानानुष्टुभं द्विवृदन्तंद्वितीयोऽष्टर्चश्चतुर्थ्यादयस्तिस्रोगायत्र्यःषोडश्येकादश्यौपङ्क्त्यौअपाद्वैश्वदेवोर्धर्चस्त्रयोवारुणा

योराजापश्चोनापुरुहुन्मावार्हतंत्रिप्रगाथाद्युष्णिगनुष्टुप्पुरउष्णिगन्तंत्वंनःसुदीतिपुरुमीढ्यौतयोर्वान्यत-
रआग्नेयंतुत्रिप्रगाथान्तंहविर्ब्यूनाहर्यतःप्रागाथोहविषांस्तुतिर्वोदीराथांगोपवनआत्रेयः सप्तवध्रिर्वाश्विनं
विशोविशोवःपञ्चोनाग्नेयंत्वनुष्टुम्मुखास्तृचाश्चत्वारोन्त्यास्तिस्रोनुष्टुभआर्क्षस्यश्रुतर्वणोदानस्तुतिर्युङ्क्ष्वा
हिपोळशविरूपइमंनुद्वादशकुरुश्रुतिःकाण्वोजज्ञानएकादशप्रगाथान्तंपुरोळाशंदबृहत्यन्तमयंकृत्नुर्नव-
कृत्नुर्भार्गवःसौम्यमन्त्यानुष्टुम्नह्यन्यंदशकद्यूर्नोदशगायत्रेन्त्यादैवीत्रिष्टुबानूनोनवकुसीदीकाण्वः ।

अत्वेकोनविंशतिः प्रियमेध इन्द्रो गायत्री । अन्यानां पण्णामृक्षाश्वमेधयोर्दानस्तुतिः ।
प्रथमाचतुर्थीसप्तमीदशम्योनुष्टुभः ।

६८ आत्वारथंयथोतयेसुम्नायंवर्तयामसि । तुविकूर्मिमृतीषहमिन्द्रशविष्ठ
सत्पते १ तुविशुष्मतुविक्रतोशचीवोविश्वयामते । आपप्राथमहित्वना २
यस्यतेमहिनामहःपरिज्मायन्तमीयतुः । हस्तावज्रंहिरण्ययम् ३ विश्वानरस्य
वस्पतिमनानतस्यशवसः । एवैश्चर्षणीनामूतीहुवेरथानाम् ४ अभिष्टयेस-

दावृधंस्वमीळ्हेपुयंनरः । नानाहवन्तऊतये ५ ॥ १ ॥ परोमात्रमृचीषमिन्द्रं-
मुग्रंसुराधसम् । ईशानंचिद्वसूनाम् ६ तन्तमिद्राधसेमहइन्द्रंचोदामिपीतये ।
यःपूर्व्यामनुष्टुतिमीशेकृष्टीनांनृतुः ७ नयस्यतेशवसानसख्यमानंशमत्यैः ।
नकिःशवांसितेनशत् ८ त्वोतासस्त्वायुजाप्सुसूर्येमहद्धनम् । जयेमपृत्सुवज्रि-
वः ९ तंत्वायज्ञेभिरीमहेतंगीर्भिर्गिर्वणस्तम । इन्द्रयथाचिदाविंथवाजेषुपुरुमा-
य्यम् १० ॥ २ ॥ यस्यतेस्वादुसख्यंस्वाद्वीप्रणीतिरद्रिवः । यज्ञोवितन्तसाय्यः
११ उरुणस्तन्वेतनंउरुक्षयायनस्कृधि । उरुणोयन्धिजीवसे १२ उरुंनृभ्यउ-
रुंगवउरुरथायपन्थाम् । देववीतिंमनामहे १३ उपमाषड्ढाढानरःसोमस्यहर्व्या ।
तिष्ठन्तिस्वादुरातयः १४ ऋज्राविन्द्रोतआददेहरीऋक्षस्यसूनवि । आ-
श्वमेधस्यरोहिता १५ ॥ ३ ॥ सुरथाँआतिथिग्वेस्वभीशूराक्षे । आश्वमेधेसुपेशं-

सः १६ पळश्वाँआतिथिग्वइंन्द्रोतेवधूमंतः । सचांपूतक्रतौसनम् १७ ऐषुंचेत-
हूर्पण्वत्यन्तर्क्रजेष्वरुषी । स्वभीशुःकशांवती १८ नयुष्मेवांजबन्धवोनिनि-
त्सुश्चनमर्त्यः । अवद्यमधिंदीधरत् १९ ॥ ४ ॥

मभाष्टादश मियमेध इन्द्रोनुष्टुप् । एकादश्याः पूर्वार्धस्य विश्वेदेवाः । तस्या
उत्तरार्धस्य द्वादश्याश्च वरुणः । उपाद्योष्णिक् । चतुर्थ्याद्यास्तिस्रो
गायत्र्यः । एकादशीषोडश्यौ पङ्क्ती । अन्त्ये बृहत्यौ ।

६१ प्रप्रंवस्त्रिष्टुभमिषंमन्दद्वीरायेन्दवे । धियावोमेधसांतयेपुरन्ध्याविंवासति १ नदंवओदंतीनांनदंयोयुवतीनाम् । पतिंवोअघ्यानांधेनूनामिषुध्यसि २ ता अंस्यसूदंदोहसःसोमंश्रीणन्तिपृश्नयः । जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ३ अभिप्रगोपतिंगिरेन्द्रमर्चयथाविदे । सूनुंसत्यस्यसत्पतिम् ४ आहरंयःससृज्जिरे-

ऽरुपीरधंवाहिंषे । यत्राभिसंनवामहे ५ ॥ ५ ॥ इन्द्रायुगावंआशिरंदुदुह्रेवज्रि-
णेमधु । यत्सींमुपह्वरेविदत् ६ उयद्ब्रह्मस्यंविष्टपंगृहमिन्द्रश्चगन्वहि । मध्वःपी-
त्वासंचेवहित्रिःसप्तसख्युःपदे ७अचँतप्राचँतप्रियमेधासोअचँत । अंचँन्तुपुत्रका
उतपुरंनधृष्णवंचत ८ अवस्वरातिगँरोगोधापरिंसनिष्वणत् । पिङ्गापरिंचनि-
ष्कदिन्द्रायब्रह्मोद्यतम् ९ आयत्पतंन्त्येर्न्यःसुदुघाअनंपस्फुरः । अपस्फुरंगृ-
भायत्सोमंमिन्द्रायपातवे १० ॥ ६ ॥ अपादिन्द्रोअपादग्निर्विश्वेदेवाअमत्सत।
वरुणइद्दिहक्षंयत्तमापोअभ्यनूषतवत्संसंशिश्वरीरिव ११सुदेवोअसिवरुणयस्यंते
सप्तसिन्धवः । अनुक्षरंन्तिकाकुदंसूम्यंसुषिरामिव १२ योव्यतीरफाणयत्सुयु-
क्ताँउपंदाशुषे । तक्रोनेतातदिद्वपुंरुपमायोअमुच्यत १३ अतीदुशक्रओहतइन्द्रो
विश्वाअतिद्विषः । भिनत्कनीनंओदनंपच्यमानंपरोगिरा १४ अर्भकोनकुमार-

कोऽधितिष्ठन्नवरथम् । सपक्षन्माहिपंमृगंपित्रेमात्रेविभुक्रतुम् १५ आतूसुशिप्र दम्पतेरथंतिष्ठाहिरण्ययम्। अधद्युक्षंसचेवहिसहस्रपादमरुषंस्वस्तिगामनेहसम् १६ तंघेमित्थानंमस्विन्नउपस्वराजमासते। अर्थंचिदस्यसुधितंयदेतवआवर्तयन्तिदावने १७ अनुप्रत्नस्यौकसःप्रियमेधासएषाम्। पूर्वामनुप्रयतिंवृक्तबर्हिषोहितप्रयसआशत १८॥ ७॥ इति शाकलर्क्संहितायामष्टमे मण्डले सप्तमोनुवाकः॥७॥

यो राजा पञ्चदश पुरुहन्मेन्द्रः। आद्यातृतीयापञ्चम्यः सप्तम्याद्याः षट्च बृहत्यः। द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः। त्रयोदश्युष्णिक्। उपाद्यानुष्टुप्। अन्त्या पुरउष्णिक्।

७० योराजाचर्षणीनांयातारथेभिरध्रिगुः। विश्वासांतरुतापृतनानांज्येष्ठोयोवृत्रहागृणे १ इन्द्रंतंशुम्भपुरुहन्मन्नवसेयस्यहितावियर्तीरे। हस्तायवज्रःप्रतिधायिदर्शतोमहोदिवेनसूर्यः २ नकिष्टंकर्मणानशद्यश्वकारसदावृधम्। ॥४४१॥

इन्द्रंनयज्ञैर्विश्वगूर्तमृभ्वंसमधृष्टंधृष्णवोजसम् ३ अपाह्लमुग्रंपृतनासुसासहिंय-स्मिन्महीरुरुज्रयः । संधेनवोजायमानेअनोनवुर्द्यावःक्षामोअनोनवुः ४ यद्द्या-वइन्द्रतेशतंशतंभूमीरुतस्युः । नत्वावज्रिन्त्सहस्रंसूर्याअनुनजातमष्टरोदसी ५ ॥ ८ ॥ आपप्राथमहिनावृष्ण्यांवृषन्विश्वांशविष्ठशवसा । अस्माँअवमघव-न्गोमतिव्रजेवज्रिंश्चित्राभिरूतिभिः ६ नसीमदेवआपदिषेदीर्घायोमर्त्यैः । एत-ग्वाचिद्यएतशायुयोजतेहरीइन्द्रोयुयोजते ७ तंवोमहोमहाय्यमिन्द्रंदानायसक्ष-णिम् । योगाधेपुरुयआरणेपुहूव्योवाजेष्वस्तिहव्यः ८ उदूषुणोवसोमहेमृशस्व शूरराधसे । उदूषुमह्यौमघवन्मघत्तयउदिन्द्रश्रवसेमहे ९ त्वंनइन्द्रऋतयुस्त्वा-निदोनितृम्पसि । मध्येवसिष्वतुविनृम्णोर्वोर्निदासंशिश्नथोहथैः १० ॥ ९ ॥ अन्यव्रतममानुषमयज्वानमदेवयुम् । अवस्वःसखादुधुवीतपर्वतःसुम्नायुदस्युं

पर्वतः ११ त्वंनइन्द्रासांहस्तेशविष्ठदावने । धानानांनसंगृभायास्मयुर्द्धिःसंगृ-
भायास्मयुः १२ सखायःक्रतुमिच्छतक्रथारांधामशरस्य । उपस्तुतिंभोजः
सूरियोअद्रयः १३ भूरिभिःसमहृक्रपिभिर्वहिष्मद्भिःस्तविष्यसे । यदित्थमेक-
मेकमिच्छरवत्सान्पराददः १४ कर्णगृह्यांमघवांशौरदेव्योवत्सनंस्त्रिभ्यआनय-
त् । अजांसूरिर्नधार्तवे १५ ॥ १० ॥

त्वं नो नव पञ्चदश सुदीतिपुरुमीळ्हौ तयोर्वान्यतरोग्निर्गायत्री । अन्त्यपङ्क्तं प्रागाथम् ।

७१ त्वंनोअग्नेमहोभिःपाहिविश्वस्याअरातेः । उतद्विषोमर्त्यस्य १ नहिम-
न्युःपौरुषेयईशेहिवःप्रियजात । त्वमिद्सिक्षपावान् २ सनोविश्वेभिर्देवेभिरू-
जोनपाद्रद्रशोचे । रयिंदेहिविश्ववारम् ३ नतमग्नेअरातयोमर्तंयुवन्तरायः ।
यंत्रायसेदाश्वांसम् ४ यंत्वंविप्रमेधसातावग्नेहिनोषिधनाय । सतवोतीगोषुग-

न्ता ५ ॥ ११ ॥ त्वंरयिंपुरुवीरमग्नेदाशुषेमर्ताय । प्रणोनयवस्योअच्छ ६ उरुष्याणोमापरादाअघायतेजातवेदः । दुराध्येऽमर्ताय ७ अग्नेमाकिष्टेदेवस्य रातिमदेवोयुयोत । त्वमींशिषेवसूनाम् ८ सनोवस्वुपमास्यूजोनपान्माहिंनस्य । सखेवसोजरितृभ्यः ९ अच्छानःशीरशोचिषंगिरोयन्तुदर्शतम् । अच्छायज्ञासोनमसापुरूवसुंपुरुप्रशस्तमूतये १० ॥ १२ ॥ अग्निंसूनुंसहसोजातवेदसं दानायवार्याणाम् । द्वितायोभूदमृतोमर्त्येष्वाहोतामन्द्रतमोविशि ११ अग्निंवोदेवयज्ययाग्निंप्रयत्यध्वरे । अग्निंधीपुप्रथममग्निमर्वत्यग्निंक्षैत्रायसाधसे १२ अग्निरिषांसख्येदंदातुनईशेयोवार्याणाम् । अग्निंतोकेतनयेशश्वदीमहेवसुंसन्तंतनूपाम् १३ अग्निमींळिष्वावसेगाथाभिःशीरशोचिषम् । अग्निंरायेपुरुमीळ्हश्रुतं

नरोऽग्निंसुदीतयेछर्दिः १४ अग्निंद्रपोयोतवैनोगृणीमस्यग्निंशंयोश्रुदातवे । विश्वांसुविक्ष्वंवितेवहन्योभुवद्वस्तुर्ऋणूणाम् १५ ॥ १३ ॥

हविरष्टादश हर्यतः प्रागाथोग्निर्हवींषि वा गायत्री ।

७२ हविष्कृणुध्वमागंमदध्वर्युवंनतेपुनः । विद्वाँअंस्यप्रशासनम् १ नितिग्रममभ्यं१शुंसीदहोतांमनावधिं । जुपाणोअंस्यसख्यम् २ अन्तरिच्छन्तितंजनेरुद्रंपरोमंनीषया । गृभ्णन्तिंजिह्वयासंसम् ३ जाम्यंतीतपेधनुर्वयोधाअंरुहद्वनम् । हृपदंजिह्वयावंधीत् ४ चरंन्वत्सोरुशन्निहनिंदातारंनविंन्दते । वेतिस्तोतवअम्व्यम् ५ ॥ १४ ॥ उतोन्वंस्ययन्महदश्वांवयोजनंबृहत् । दामारथंस्युदट्टंशे ६ दुहन्तिंसप्तैकामुपद्रापश्चंसृजतः । तीर्थेसिन्धोरधिंस्वरे ७ आदृशाभिंविवस्वंतइन्द्रःकोशंमचुच्यवीत् । खेदयात्रिवृतांदिवः ८ परिंत्रिधातुरध्वरंजूर्णिरें-

त्तिनर्वीयसी । मध्वाहोतारोअञ्जते ९ सिञ्चन्तिनमसावृतमुच्चाचक्रंपरिज्मानम् । नीचीनंबारमक्षितम् १० ॥ १५ ॥ अभ्यारमिदद्रयोनिषिक्तंपुष्करेमधु । अवृतस्यविसर्जने ११ गावउपावतावतंमहीयज्ञस्यरप्सुदा । उभाकर्णाहिरण्ययी १२ आसुतेसिञ्चतश्रियंरोदस्योरभिश्रियम् । रसादधीतवृषभम् १३ तेजानंतस्वमोक्यं १ संवत्सासोनमातृभिः । मिथोनसन्तजामिभिः १४ उपस्रकेषुवप्सतःकृण्वतेधरुणंदिवि । इन्द्रेअग्नानमःस्वः १५ ॥ १६ ॥ अधुक्षत्पिप्युषीमिषमूर्जंसप्तपदीमरिः । सूयस्यसप्तरश्मिभिः १६ सोमस्यमित्रावरुणोदितासूरआददे । तदातुरस्यभेषजम् १७ उतोन्वस्ययत्पुदंहर्यतस्यनिधान्यम् । परिद्यांजिह्वयातनत् १८ ॥ १७ ॥

उदीराथामष्टादश गोपवन आत्रेयः सप्तवध्रिर्वाश्विनौ गायत्री ।

७३ उदीराथामृतायतेयुञ्जाथामश्विनारथम् । अन्तिषद्भूतुवामवः १ निमिषंश्विज्जवीयसारथेनायातमश्विना । अन्तिषद्भूतुवामवः २ उपस्तृणीतमन्त्रयेहिमेनघर्ममश्विना । अन्तिषद्भूतुवामवः ३ कुहस्थःकुहजग्मथुःकुहश्येनेवपेतथुः । अन्तिषद्भूतुवामवः ४ यदद्यकर्हिकर्हिचिच्छुभ्रयातमिमंहवम् । अन्तिषद्भूतुवामवः ५ ॥ १८ ॥ अश्विनायामहूतमानेदिष्ठंयाम्याप्यम् । अन्तिषद्भूतुवामवः ६ अवन्तमन्त्रयेगृहंकृणुतंयुवमश्विना । अन्तिषद्भूतुवामवः ७ वरेथेअग्निमातपोवदतेवल्गवत्रये । अन्तिषद्भूतुवामवः ८ प्रसप्तवध्रिराशसाधारामग्नेरशायत । अन्तिषद्भूतुवामवः ९ इहागतंवृषण्वसूशृणुतंमइमंहवम् । अन्तिषद्भूतुवामवः १० ॥ ११ ॥ किमिदंवांपुराणवज्जरंतोरिवशस्यते । अन्तिषद्भूतुवा- ॥४४४॥

मवः ११ समानंवांसजात्यंसमानोबन्धुरश्विना । अन्तिषद्भूतुवामवः १२ योवांरजांस्यश्विनारथोंवियातिरोदसी । अन्तिषद्भूतुवामवः १३ आनोगव्यैभिरश्व्यैःसहस्रैरुपंगच्छतम् । अन्तिषद्भूतुवामवः १४ मानोगव्यैभिरश्व्यैःसहस्रैभिरतिख्यतम् । अन्तिषद्भूतुवामवः १५ अरुणप्सुरुषाअभूदकज्योतिरकृतावरी । अन्तिषद्भूतुवामवः १६ अश्विनासुविचाकशद्वृक्षंपरशुमाँइव । अन्तिषद्भूतुवामवः १७ पुरंनधृष्णवारुजकृष्णयाबाधितोविशा । अन्तिषद्भूतुवामवः १८ ॥ २० ॥

विशोविशो वः पञ्चदश गोपवन आत्रेयोग्निः अन्सानां तिसृणां श्रुतर्वण आर्क्षस्य दानस्तुतिः । मथमाचतुर्थीसप्तमीदशम्योन्त्यास्तिस्रश्चानुष्टुभः । शिष्टा गायत्र्यः ।

७४ विशोविशोवोअतिथिंवाजयन्तःपुरुप्रियम् । अग्निंवोदुर्यंवचःस्तुषेशूष-

स्यमन्मभिः १ यंजनासोहविष्मन्तोमित्रंनसर्पिरासुतिम् । प्रशंसन्तिप्रशस्ति-
भिः २ पन्यांसंजातवेदसंयोदेवतात्युद्यता । हव्यान्यैरयद्दिवि ३ आगन्मवृत्रह-
न्तमंज्येष्ठमग्निमानवम् । यस्यश्रुतवीबृहन्नाक्षोअनीकएधते ४ अमृतंजातवेदसं
तिरस्तमांसिदर्शतम् । घृताहवनमीड्यम् ५ ॥ २१ ॥ सवाधोयंजनाइमेऽग्निं
हव्येभिरीळते । जुह्वानासोयतस्रुचः ६ इयंतेनव्यसीमतिरग्नेअधाय्यस्मदा ।
मन्द्रसुजातसुक्रतोऽमूरदस्मार्तिथे ७ सातेअग्नेशन्तमाचनिष्ठाभवतुप्रिया ।
तयावर्धस्वसुष्टुतः ८ साघुम्नैर्याह्यग्निनींबृहदुपोपश्रवसिश्रवः । दधीतवृत्रतूर्ये १
अश्वमिद्वारथप्रांत्वेषमिन्द्रंनसत्पतिम् । यस्यश्रवांसितूर्थपन्थांपन्थंचकृण्वतः १०
॥ २२ ॥ यंत्वागोपवनोगिराचानिष्ठदग्नेअङ्गिरः । सपावकश्रुधीहवम् ११ यं
त्वाजनासईळतेसवाधोवाजसातये । सवोधिवृत्रतूर्ये १२ अहंहुवानआर्क्षेश्रुत

वँणिमदच्युतिं। शर्धांसीवस्तुकाविनांमृक्षाशीर्पार्चतुर्णाम् १३ मांचत्वारंआशु-
वःशर्विष्ठस्यद्रविन्नवः। सुरथांसोअभिप्रयोवक्षन्वयोनतुर्य्यम् १४ सत्यामित्वां
महेनदिपरुष्ण्यवंदेदिशम्। नेमांपोअश्वदातरःशर्विष्ठादस्तिमत्यँः १५॥ २३॥

पुक्षा हि षोडश विरूपोऽग्निर्गायत्री।

७५ पुक्षवाहिदेवहूतमाँअश्वाँअग्नेरथीरिव। निहोतांपूर्व्यःसदः १ उतनोदेव
देवाँअच्छावोचोविदुष्टरः। श्राद्विश्वावार्याँकृधि २ त्वंहयग्नेविष्ठयसहंसःसूनवा-
हुत। ऋतावायज्ञियोभुवः ३ अयमग्निःसहस्त्रिणोवाजस्यशतिनस्पतिः। मू-
र्धाकवीरयीणाम् ४ तंनेमिमृभवोयथानमस्वसहूतिभिः। नेदीयोयज्ञमङ्गिरः ५
॥ २४॥ तस्मैनूनमभिद्यवेवाचाविरूपनित्यया। वृष्णेचोदस्वसुष्टुतिम् ६ कमु
ष्विदस्यसेनयाग्नेरपाकचक्षसः। पणिंगोषुस्तरामहे ७ मानोदेवानांविशःप्र-

स्रातीरिवोत्राः । कृशंनहांसुरद्र्यः ८ मानंःसमस्यदूढ्यं१ःपरिद्वेषसोअंहतिः । ऊर्मिर्ननावमावधीत् ९ नमस्तेअग्रओजसेगृणन्तिदेवकृष्टयः । अमैरमित्रंसर्दय १० ॥ २५ ॥ कुवित्सुनोगविष्टयेऽग्नेसंवेषपोरयिम् । उरुकृदुरुणस्कृधि ११ मानोअस्मिन्महाधनेपरावग्भारभृद्यथा । संवर्गंसंरायिंजय १२ अन्यमस्मद्रियाइयमग्नेसिषक्तुदुच्छुना । वर्धानोअमवच्छवः १३ यस्याजुषन्नमस्विनःशमीमर्दुमखस्यवा । तंघेदग्निर्वधावति १४ परस्याअधिसंवतोऽवराँअभ्यातर । यत्राहमस्मिताँअव १५ विश्राहितैपुराव्ययमग्नेपितुर्यथावसः । अधातेसुम्नमीमहे १६ ॥ २६ ॥

इमं नु द्वादश कुरुसुतिः काण्व इन्द्रो गायत्री ।

७६ इमंनुमायिनंहुवइन्द्रमीशानमोजसा । मरुत्वन्तंनवृञ्जसे १ अयमि- ॥४४६॥

न्द्रोमरुत्सखाविवृत्रस्यांभिनच्छिरः । वज्रेणशतपर्वणा २ वावृधानोमरुत्सखे-
न्द्रोविवृत्रमैरयत् । सृजन्त्समुद्रियांअपः ३ अयंहयेनवाइदंस्वर्मरुत्वंताजितम् ।
इन्द्रेणसोमंपीतये ४ मरुत्वन्तमृजीषिणमोजस्वन्तंविरप्शिनम् । इन्द्रंगीर्भिर्हवा-
महे ५ इन्द्रंप्रत्नेनमन्मनामरुत्वन्तंहवामहे । अस्यसोमस्यपीतये ६ ॥ २७ ॥
मरुत्वाँइन्द्रमाह्वःपिबासोमंशतक्रतो । अस्मिन्यज्ञेपुरुष्टुत ७ तुभ्येदिन्द्रमरुत्वते
सुताःसोमासोअद्रिवः । हृदाहूयन्तउक्थिनः ८ पिबेदिन्द्रमरुत्सखासुतंसोमंदि-
विष्टिषु । वज्रंशिशानओजसा ९ उत्तिष्ठन्नोजसास्रहपीत्वीशिप्रेअवेपयः । सो-
मंमिन्द्रचमूसुतम् १० अनुत्वारोदसीउभेक्रक्षमाणमकृपेताम् । इन्द्रयद्ह्यस्युहा-
वंः ११ वाचंमष्टापदीमहंनवंस्रक्तिमृतस्पृशम् । इन्द्रात्परितन्वंममे १२ ॥ २८ ॥

जज्ञान एकादश कुरुसुतिः काण्व इन्द्रो गायत्री । उपान्त्या बृहती । अन्त्या सतोबृहती ।

७७ जज्ञानोनुशतक्रतुर्विपृच्छदितिंमातरम् । कउग्राःकेहशृण्विरे १ आदींशवस्यब्रवदौर्णवाभमहीशुवम् । तेपुत्रसन्तुनिष्टुरः २ सामित्तान्वृत्रहाखिंदत्खेअराँइवखेदया । प्रवृद्धोदस्युहाभवत् ३ एकयाप्रतिधापिंवत्साकंसरांसित्रिंशतम् । इन्द्रःसोमस्यकाणुका ४ अभिगन्धर्वमतृणदवुभ्रेपुरजःस्वा । इन्द्रो ब्रह्मभ्यइद्दृधे ५ ॥ २१ ॥ निरांविध्यद्गिरिभ्यआधारयत्पक्वमोदनम् । इन्द्रो वुन्दंस्वांततम् ६ शतब्रध्नइषुस्तवंसहस्रंपर्णएकइत् । यमिन्द्रचकृषेयुजम् ७ तेनंस्तोतृभ्यआभरन्यो नारिंभ्योअत्तवे । सद्योजातक्रभुष्ठिर ८ एताच्यौत्नानितेकृतावपिंष्टानिपरीणसा । हृदाविडुधारयः ९ विश्वेत्ताविष्णुराभरदुरुक्रमस्त्वेषितः । शतंमहिपान्क्षीरपाकमोदनंवराहमिन्द्रएमुषम् १० तुविक्षंतेसु-

कंतंसुमयंधनुंःसाधुवुंन्दोहिंरण्ययंः । उभातेंबाहूरण्यासुसंस्कृतऋदूपेचिंदूदू-
वृधां ११ ॥ ३० ॥

पुरोळाशं दश कुरुसुतिः काण्व इन्द्रो गायत्री । अन्सा बृहती ।

७८ पुरोळाशंनोअन्धंसइन्द्रंसहस्त्रमाभंर । शताचंशूरगोनांम् १ आनोंभर-
व्यजंनंगामश्वंमभ्यजंनम् । सचांमनाहिंरण्ययां २ उतनंःकर्णशोभंनापुरूणि-
धृष्णवाभंर । त्वंहिशृण्विंपेवंसो ३ नकींवृधीकइंन्द्रतेंनसुंपानसुदाउत । नान्य-
स्त्वच्छूरवाघतंः ४ नकींमिन्द्रोनिकंर्तवेंनशक्रःपरिंशक्तवे । विश्वंशृणोतिंपश्यं-
ति ५ ॥ ३१ ॥ समन्युंमत्यींनामदंब्धोनिचिंकीषते । पुरांनिदश्चिंकीषते ६
ऋत्वइत्पूर्णमुदरंतुरस्यांस्तिविधतः । वृत्रघ्नःसोंमपार्वः ७ त्वेवसूंनिसंगंताविश्वां
चसोमसौंभगा । सुदात्वपंरिह्रता ८ त्वामिद्यवयुर्मंमकामोंगव्युंहिरण्ययुः ।

त्वामंश्वयुरेपते १ ततेदिंन्द्राहमाशसाहस्तेदावँचनादंदे । दिनस्यंवामघवन्त्संभृंतस्यवापूर्धियवंस्यकाशिनां १० ॥ ३२ ॥

अयं कृत्नुर्नव कृत्नुर्भार्गवः सोमो गायत्री । अन्त्यानुष्टुप् ।

७१ अयंकृत्नुरगृंभीतोविश्वजिदुद्भिदित्सोमंः । ऋषिर्विप्रःकाव्येंन १ अभ्यूंणोंतियन्नग्नंभिपक्तिविश्वंयत्तुरम् । प्रेमन्धःखयन्निःश्रोणोभूंत् २ त्वंसोंमतनूकृद्योद्वेषोंभ्योऽन्यकृंतेभ्यः । उरुयन्तासिवरूंथम् ३ त्वंचित्तीतवदक्षैदिंवआपृथिव्याऋंजीषिन् । यावींरघस्यंचिद्वेषंः ४ अर्थिनोयन्तिचेदर्थं गच्छानिद्दुषोंरातिम् । ववृज्युस्तृप्यंतःकामंम् ५ ॥ ३३ ॥ विदद्यत्पूर्व्यं नष्टमुदींमृतायुमीरयत् । प्रेमायुंस्तारीदतीर्णम् ६ सुशेवोंनोमृळयाकुरद्दंसक्रतुरवातः । भवांनः सोमशंहृदे ७ मानंःसोमसंवींविजोमाविवीं- ॥४४८॥

पिपथाराजन् । मानोहार्दित्विषावधीः ८ अवयत्स्वेसधस्थेदेवानांदुर्मतीरीक्षे ।
राजन्नपद्विषःसेधमीद्वोअपस्त्रिधःसेध ९ ॥ ३४ ॥

नह्यन्यं दशैकधूनोंपस इन्द्रो गायत्री । अन्साया देवाः । सैव त्रिष्टुप् ।

८० नह्यं१न्यंवळाकंरंमडितारंशतक्रतो । त्वंनंइन्द्रमृळय १ योनःशश्वंत्पुरावियामंधोवाजंसातये । सत्वंनंइन्द्रमृळय २ किमङ्गंरध्रचोदनःसुन्वानस्यादितेदंसि । कुवित्स्विन्द्रणःशकंः ३ इन्द्रप्रणोरथंमवपश्चाच्चित्सन्तंमद्रिवः । पुरस्तांदेनंमेकधि ४ हन्तोनुकिमांससेप्रथमंनोरथंकधि । उपमंवांजयुश्रवः ५ ॥ ३५ ॥ अवांनोवाजयुंरथंसुकरंतेकिमित्परिं । अस्मान्त्सुजिग्युपंस्कधि ६ इन्द्रदह्यंस्वपूरंसिभद्रातंएतिनिष्कृतम् । इयंधीर्ऋत्वियावती ७ मासींमवद्यआभागुर्वीकाष्ठांहितंधनम् । अपावृक्ताअरत्नयः ८ तुरीयंनामयज्ञियंयदाकरस्तदुं-

२मसि । आदित्पतिर्नओहसे १ अवीवृधद्वोअमृताअमन्दीदेक्यूदैवाउतयार्श्वदे-
वीः । तस्माउराधःकृणुतप्रशस्तंप्रातर्मक्षूधियावसुर्जगम्यात् १० ॥ ३६ ॥
इति शाकलर्क्संहितायामष्टमे मण्डलेऽष्टमोनुवाकः ॥ ८ ॥

आ तू नो नव कुसीदी काण्व इन्द्रो गायत्री ।

८१ आतूनइन्द्रक्षुमन्तंचित्रंग्राभंसंगृभाय । महाहस्तीदक्षिणेन १ विआहि
त्वांतुविकूर्मिंतुविदेष्णंतुवीमघम् । तुविमात्रमवोभिः २ नहित्वाशूरदेवानम-
तांसोदित्सन्तम् । भीमंनगांवारयन्ते ३ एतोन्विन्द्रंस्तवामेशानंवस्वःस्वराज-
म् । नराधंसामधिषन्नः ४ प्रस्तोपदुपगासिषच्छवत्सामगीयमानम् । अभिरा-
धंसाजुगुरत् ५ ॥ ३७ ॥ आनोभरदक्षिणेनाभिसव्येनप्रमृश । इन्द्रमानोव-
सोर्निभाक् ६ उपक्रमस्वाभरधृषतार्धृष्णोजनानाम् । अदाशूष्टरस्यवेदः ७ इन्द्र

यउनुतेअस्तिवाजोविप्रेभिःसनित्वः । अस्माभिःसुतंसंनुहि ८ सयोजुवस्तेवा-
जाअस्मभ्यंविश्वश्चन्द्राः । वशैश्चमक्षूजरन्ते १ ॥ ३८ ॥ इति शाकलकसंहितायां
षष्ठाष्टके पञ्चमोध्यायः ॥ ५ ॥

आप्रदेवानांवैश्वदेवंमैष्टमुशनाकाव्यआग्नेयमामेकृष्णआश्विनंशुभाहिपञ्चविंशकोवाकारुर्पणर्जागतं
द्युम्नीपट्वासिष्ठोवाद्युम्नीकःमियमेधोवामागाथंहतंवोदस्मंनोधावृहदिन्द्रायसप्तनूमेधपुरुमेधौद्व्यनुष्टुब्वृ-
हत्यन्तमानोविश्वासुपद्कन्यावांःसप्तात्रेय्यापालेतिहासऐन्द्रआनुष्टुभंद्विपङ्क्त्यादिपान्तंत्रयस्त्रिंशच्छुतक-
क्षः सुकक्षोवाद्यानुष्टुबुद्धचतुस्त्रिंशत्सुकक्षोन्त्सैन्द्रार्भवीगौर्धयतिद्वादशविन्दुःपूतदक्षोवामारुतमात्वानव-
तिरश्वीराङ्गिरसआनुष्टुभमस्मैसैकाद्युतानोवामारुतस्त्रैष्टुभंचतुर्थीविराळिष्यामीतिमारुतःपादःपरैन्द्रा-
बार्हस्पत्यायाइन्द्रपञ्चोनारेभःकाश्यपोबार्हतमतिजगत्युपरिष्टाद्बृहत्यावतिजगतीत्रिष्टुब्जगतीत्यन्ततः ।

आ म नव कुसीदी काण्व इन्द्रो गायत्री ।

८२ अम् आप्रद्रवपरावतोऽर्वावतश्चवृत्रहन् । मघवःप्रतिप्रभर्मणि १ तो-

व्राःसोमांसआगंहिसुतासोंमादयिष्णवः । पिबांदधृग्यथोंचिपे २ इषामंन्दस्वा-दुतेऽरंवरायमन्यवें । भुवंत्तइन्द्रशंहृदे ३ आत्वंशत्रवागंहिन्युं1क्थानिंचहूयसे । उपमेरोंचनेदिवः ४ तुभ्यायमद्रिभिःसुतोगोभिःश्रीतोमदायकम् । प्रसोमंइन्द्रहू-यते ५ ॥ १ ॥ इन्द्रेश्रुधिसुमेहवंमस्मेसुतस्यगोमतः । विपीतिंतृप्तिमंश्नुहि ६ यइंन्द्रचमसेष्वासोमंश्चमूषुतेसुतः । पिबेदंस्यत्वमींशिषे ७ योअप्सुचन्द्रमांइव सोमंश्चमूषुदृदृंशे । पिबेदंस्यत्वमींशिषे ८ यंतेश्येनःपदाभंरत्तिरोरजांस्यस्पृत-म् । पिबेदंस्यत्वमींशिषे ९ ॥ २ ॥

देवानां नव कुसीदी काण्वो विश्वे देवा गायत्री ।

८३ देवानामिदवोंमहत्तदावृणीमहेवयम् । वृष्णांमस्मभ्यंमूतयें १ तेनंः सन्तुयुजःसदावरुणोमित्रोअर्यमा । वृधासंश्चप्रचेतसः २ अतिंनोविष्पितापुरु ॥४५०॥

नाभरपानपथ । यूयमृतस्यरथ्यः ३ [illegible] । वामंह्यावृणीमहे ४ वामस्यहिप्रचेतसइशानासोरिशादसः । नेमादित्याअघस्य यत् ५ ॥ ३ ॥ वयमिद्धःसुदानवःक्षियन्तोयान्तोअध्वन्ना । देवांवृधायहूमहे ६ अधिनइन्द्रैयांविष्णोसजात्यानाम् । इतामरुतोअश्विना ७ प्रभ्रातृत्वंसुदानवो-ऽधिहितासमान्या । मातुर्गर्भौभरामहे ८ यूयंहिष्ठासुदानवइन्द्रंज्येष्ठाअभिष्यवः । अधाचिद्वउतब्रुवे १ ॥ ४ ॥

मेधं नवोशना काव्योऽग्निर्गायत्री ।

८४ प्रेष्ठंवोअतिथिंस्तुषेमित्रमिवप्रियम् । अग्निंरथंनवेद्यम् १ कविमिवप्रचेतसंयंदेवासोअधाहिता । निमर्त्यैष्वादधुः २ त्वंयविष्ठदाशुषोनॄंःपाहिगृणुधीगिरः । रक्षातोकमुतत्मना ३ कयातेअग्नेअङ्गिरऊर्जोनपादुपस्तुतिम् । वरायं

देवमन्यवे ४ दाशेमकस्यमनसायज्ञस्यसहसोयहो । कदुवोचइदंनमः ५ ॥ ५ ॥ अधात्वंहिनस्करोविश्वाअस्मभ्यंसुक्षितीः । वाजंद्रविणसोगिरः ६ कस्य नूनंपरीणसोधियोजिन्वसिदम्पते । गोपातायस्यतेगिरः ७ तंमंजयन्तसुक्रतुंपुरोयावानमाजिषु । स्वेयुक्षयेपुवाजिनम् ८ क्षेतिक्षेमेभिःसाधुभिर्नकिर्यंघ्नन्तिहन्तियः । अग्नेसुवीरएधते ९ ॥ ६ ॥

आ मे कृष्णोश्विनौ गायत्री ।

८५ आमेहवंनासत्याश्विनागच्छतंयुवम् । मध्वःसोमस्यपीतयें १ इमंमे स्तोमंमश्विनेमंमेशृणुतंहवम् । मध्वःसोमस्यपीतयें २ अयंवांकृष्णोअश्विनाहवंतेवाजिनीवसू । मध्वःसोमस्यपीतयें ३ शृणुतंजरितुर्हवंकृष्णंस्यस्तुवतोनरा । मध्वःसोमस्यपीतयें ४ छर्दिर्यन्तमदाभ्यंविप्रायस्तुवतेनरा । मध्वःसोमस्यपीतयें

५ ॥ ७ ॥ गच्छंतंदाशुषोंगृहमित्थास्तुवतोअश्विना । मध्वःसोमस्यपीतयें ६ युञ्जाथांरासभंरथेवीडुङ्गेवृषण्वसू । मध्वःसोमस्यपीतयें ७ त्रिवन्धुरेणत्रिवृतारथे नायातमश्विना । मध्वःसोमस्यपीतयें ८ नूमेगिरोनासत्याश्विनाप्रावतंयुवम् । मध्वःसोमस्यपीतयें ९ ॥ ८ ॥

उभा हि पञ्च कृष्णो विश्वको वा काण्वराश्विनौ जगती ।

८६ उभाहिदस्राभिषजांमयोभुवोभादक्षंस्यवचंसोवभूवथुः । तावांविश्वंको हवतेतनूकृथेमानोवियौष्टंसख्यामुमोचंतम् १ कथानूनंवांविमनाउपस्तवद्युवं धियंददथुर्वस्यइष्टये । तावांविश्वंकोहवतेतनूकृथेमानोवियौष्टंसख्यामुमोचंतम् २ युवंहिष्मापुरुभुजेममेधतुंविष्णाप्वेददथुर्वस्यइष्टये । तावांविश्वंकोहवतेतनूकृथे मानोवियौष्टंसख्यामुमोचंतम् ३ उतत्यंवीरंधनसामृजीषिणंदूरेचित्सन्तमवसे

हवामहे । यस्यस्वादिष्ठासुमतिःपितुर्यथामानोवियौष्टंसख्यामुमोचतम् ४ ऋतेनदेवःसविताशंमायतऋतस्यगूर्ध्नमुविंयाविपप्रथे । ऋतंसांसाह्वमहिंचित्पृतन्यतोमानोवियौष्टंसख्यामुमोचतम् ५ ॥ १ ॥

द्युम्नी पङ्क्तिश्छो वा द्युम्नीकः प्रियमेधो वाश्विनौ प्रगाथा ।

८७ द्युम्नीवांस्तोमोअश्विनाक्रिविर्नसेकआगतम् । मध्वःसुतस्यसदिविप्रियो नरापातंगौराविवेरिणे १ पिबतंघर्ममधुमन्तमश्विनाबर्हिःसीदतंनरा । तामन्दसानामनुपोदुरोणआनिपातंवेदसावयः २ आवांविश्वाभिरूतिभिःप्रियमेधा अहूषत । तावर्तियातमुपवृक्तबर्हिषोजुष्टंयज्ञंदिविष्टिषु ३ पिबतंसोमंमधुमन्तमश्विनाबर्हिःसीदतंसुमत् । तावांवृधानाउपसुष्टुतिंदिवोगन्तंगौराविवेरिणम् ४ आनूनंयातमश्विनाश्वेभिःप्रुषितप्सुभिः । दस्राहिरण्यवर्तनीशुभस्पतीपातंसो-

मंमृतावृधा ५ वयंहिवांहवामहेविपन्यवोविप्रासोवाजसातये । तावल्गूदस्त्रापुरुदंससाधियाश्विनाश्रुष्टयागतम् ६ ॥ १० ॥

तं वो दस्मं पण्योधा इन्द्रः प्रगाथा ।

८८ तंवोदस्ममृतीषहंवसोर्मन्दानमन्धसः । अभिवत्संनस्वसरेषुधेनवइन्द्रं गीर्भिर्नवामहे १ द्युक्षंसुदानुंतविंषीभिरावृतंगिरिंनपुरुभोजसम् । क्षुमन्तंवाजं शतिनंसहस्रिणंमक्षूगोमन्तमीमहे २ नत्वावृहन्तोअद्रयोवरन्तइन्द्रवीळवः । यद्दित्ससिस्तुवतेमावतेवसुनकिष्टदामिनातिते ३ योह्यसिक्त्वाशवसोतदंसना विश्वाजाताभिमज्मना । आत्वायमर्कऊतयेववर्ततियंगोतमाअजीजनन् ४ महिरिरिक्षओजसादिवोअन्तेभ्यस्परि । नत्वांविव्याचरजंइन्द्रपार्थिवमनुस्वधां

वंवक्षिथ ५ नकिःपरिष्टिर्मघवन्मघस्यतेयद्दाशुषेदशस्यासि । अस्माकंबोध्युच-
थंस्यचोदितामंहिष्ठोवाजसातये ६ ॥ ११ ॥

वृहदिन्द्राय सप्त नृमेधपुरुमेधाविन्द्रः प्रगाथा । उपान्त्ये अनुष्टुभौ । अन्त्या वृहती ।

८१ वृहदिन्द्रायगायतमरुतोवृत्रहन्तमम् । येनज्योतिरजनयन्नृताावृधोदेवं
देवायुजागृवि १ अपांधमदभिशस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत् । देवास्तइ-
न्द्रसख्यायमेमिरेवृहद्भानोमरुद्गण २ प्रवइन्द्रायवृहतेमरुतोब्रह्मार्चत । वृत्रंहन-
तिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ३ अभिप्रभंरधृषतार्धृषन्मनःश्रवश्चित्तेअस-
द्वृहत् । अर्वन्त्वापोजवसाविमातरोहनोवृत्रंजयास्वः ४ यज्ञायथाअपूर्व्यमघं-
वन्वृत्रहत्याय । तत्पृथिवीमप्रथयुस्तदस्तभ्नाउतद्याम् ५ तत्तेयज्ञोअजायततद्-

र्कउतहस्कृतिः । तद्विश्वंमभिभूरसियज्जातंयज्जन्त्वम् ६ आमासुपक्वमैरय आसूर्यरोहयोदिवि । घर्मंनसामन्तपतासुवृक्तिभिर्जुष्टंगिर्वणसेबृहत् ७ ॥ १२ ॥

आनो विश्वासु पण्वृमेधपुरुमेधाविन्द्रः प्रगाथा ।

१० आनोविश्वांसुहव्यइन्द्रःसमत्सुभूषतु । उपब्रह्माणिसवनानिवृत्रहापरमज्याऋचीषमः १ त्वंदाताप्रथमोराधसामस्यसिसत्यईशानकृत् । तुविद्युम्नस्ययुज्यावृणीमहेपुत्रस्यशवसोमहः २ ब्रह्मातइन्द्रगिर्वणःक्रियन्तेअनंतिद्रुता । इमाजुषस्वहर्यश्वयोजनेन्द्रयातेअमंन्महि ३ त्वंहिसत्योमघवन्नानतोवृत्राभूरिन्यृञ्जसे । सत्वंशविष्ठवज्रहस्तदाशुषेऽर्वाञ्चंरयिमाकृधि ४ त्वमिन्द्रयशाअंस्यृजीषीशावसस्पते । त्वंवत्राणिहंस्यप्रतीन्येकइदनुत्ताचर्षणीधृता ५ तमुत्वानून-

मंसुरप्रचेंतसंराधोंभागमिंवेमहे । महीवक्रत्तिंःशरणांतइन्द्रप्रतेंसुम्नानोंअश्ववन् ६ ॥ १३ ॥

कन्यावाः सप्तापालात्रेयीन्द्रोनुष्टुप् । आद्ये पङ्क्ती ।

११ कन्याउंवारंवायंतीसोममपिंस्नुताविंदत् । अस्तंभरंन्त्यब्रवीदिन्द्रांयसुनवैत्वाशक्रायंसुनवैत्वा १ असौयएपिंवीरकोगृहंगृंहंविचाकंशत् । इमंजम्भंसुतंपिवधानावंन्तंकरम्भिणंमपूपवन्तमुक्थिनंम् २ आचनत्वांचिकित्सामोऽधिंचनत्वानेमंसि । शनैरिवशनकैरिवेन्द्रायेन्दोपरिस्रव ३ कुविच्छकंत्कुवित्करंत्कुविन्नोवस्यंसस्करंत् । कुवित्पंतिद्विपोयतीरिन्द्रेणसंगमामहै ४ इमानित्रीणिंविष्टपातानींन्द्रविरोंहय । शिरंस्ततस्योर्वरामादिदंमउपोदरें ५ असौचयानंउ- ॥४५४॥

र्वराद्रिमांतन्वे१ मम । अथोतस्ययच्छिरःसर्वातारोमशार्कधि ६ खेरथस्यखे-ऽनसःखेयुगस्यशतक्रतो । अपालामिन्द्रत्रिष्पूत्व्यक्रणोःसूर्यत्वचम् ७ ॥ १४ ॥

पान्तं त्रयस्त्रिंशच्छुतकक्षः सुकक्षो वेन्द्रो गायत्री । आद्यानुष्टुप् ।

१२ पान्तमावोअन्धसइन्द्रमभिप्रगायत । विश्वासाहंशतक्रतुंमंहिष्ठंचर्षणी-नाम् १ पुरुहूतंपुरुष्टुतंगाथान्यं१सनश्रुतम् । इन्द्रइतिब्रवीतन २ इन्द्रइन्नोम-हानांदातावाजानांनृतुः । महाँअभिष्टिवायमत् ३ अपादुशिप्यन्धसःसुद-क्षस्यप्रहोषिणः । इन्दोरिन्द्रोयवाँशिरः ४ तम्वभिप्रार्चतेन्द्रंसोमंस्यपीतये । त-दिद्धयंस्यवर्धनम् ५ ॥ १५ ॥ अस्यपीत्वामदानांदेवोदेवस्यौजसा । विश्वाभि-भुवनाभुवत् ६ त्यमुवःसत्रासाहंविश्वासुगीर्ष्वायंतम् । आच्यावयस्यूतये ७ युध्मंसन्तंमनर्वाणंसोमपामनपच्युतम् । नरंमवार्यक्रतुम् ८ शिक्षाणइन्द्रायआ

पुरुविद्वाँऋचीषम । अवांनःपार्येधनै १ अतश्चिदिन्द्रणउपायाहिशतवाजया । इषास्तहस्रवाजया १० ॥ १६ ॥ आयामधीवतोधियोऽवीद्रिःशक्रगोदरे । जयेमपृत्सुवज्रिवः ११ वयमुत्वाशतक्रतोगावोनयवसेष्वा । उक्थेपुरणयामसि १२ विश्वाहिमर्त्यत्वनानुकामाशतक्रतो । अगन्मवज्रिन्नाशसः १३ त्वेसुपुत्रशवसोऽवृत्रन्कामंकातयः । नत्वामिन्द्रातिरिच्यते १४ सनोवृषन्त्सनिष्यासंघोरयाद्रिवित्वा । धियाविंड्विपुरन्ध्या १५ ॥ १७ ॥ यस्तेनूनंशतक्रतविन्द्रद्युम्नितमोमदः । तेननूनंमदेमदे १६ यस्तेचित्रश्रवस्तमोयइन्द्रवृत्रहन्तमः । यओजोदातमोमदः १७ विद्माहियस्तेअद्रिवस्त्वादत्तःसत्यसोमपाः । विश्वासुदस्मकृष्टिषु १८ इन्द्रायमद्वनेसुतंपरिष्टोभन्तुनोगिरः । अर्कमर्चन्तुकारवः १९ यस्मिन्विश्वाअधिश्रियोरणन्तिसप्तसंसदः । इन्द्रंसुतेहवामहे २० ॥ १८ ॥ त्रिकद्रुके-

पुचेतनंदेवासोयज्ञमंत्रत। तमिद्वर्धन्तुनोगिरः२३ आत्वाविशन्त्विन्दवःसमुद्रमि-
वसिन्धवः। नत्वामिन्द्रातिरिच्यते २२ विव्यक्थंमहिनावृषन्भक्षंसोमस्यजागृ-
वे। यईन्द्रजठरेपुते २३ अरंतइन्द्रकुक्षयेसोमोभवतुवृत्रहन्। अरंधामंभ्यइन्द-
वः २४ अरमश्वायगायतिश्रुतकक्षोअरंगवे। अरमिन्द्रस्यधाम्ने २५ अरंहिष्मा-
सुतेपुणःसोमेष्विन्द्रभूषसि। अरंतेशक्रदावने २६ ॥ १९ ॥ पराकात्त्वाच्छिदद्रि-
वस्त्वानक्षन्तनोगिरः। अरंगमामतेवयम् २७ एवाह्यसिवीरयुरेवाशूरउतस्थि-
रः। एवातेराध्यंमनः २८ एवारातिस्तुवीमघविश्वेभिर्धायिधातृभिः। अधाचि-
दिन्द्रमेसचा २९ मोपुब्रह्मेवतन्द्रयुर्भुवोवाजानांपते। मत्स्वासुतस्यगोमतः ३०
मानइन्द्राभ्याशदिशःसूरोअक्तुष्वायमन्। त्वायुजावनेमतत् ३१ त्वयेदिन्द्रयु-

जावयंप्रतिब्रुवीमहिस्पृधः । त्वमस्माकंतवस्मसि ३२ त्वामिद्धित्वायवोऽनुनो-
नुवत्श्वरान् । सखायइन्द्रकारवः ३३ ॥ २० ॥

उ चतुस्त्रिंशत्सुकक्ष इन्द्रो गायत्री । अन्त्याया ऋभवश्च ।

१३ उद्वेदभिश्रुतामघंवृषभंनर्याऽपसम् । अस्तारमेषिसूर्य १ न-
यन्नवतिंपुरोविभेदबाह्वोजसा । अहिंचवृत्रहावधीत् २ सनइन्द्रःशिवः
सखाश्वावद्गोमद्यवंमत् । उरुधारेवदोहते ३ यदद्यकच्चवृत्रहन्नुदगाअभिसूर्य ।
सर्वंतदिन्द्रतेवशे ४ यद्वाप्रवृद्धसत्पतेनमराइतिमन्यसे । उतोतत्सत्यमित्तव ५
॥ २१ ॥ येसोमासःपरावतियेअर्वावतिसुन्विरे । सर्वांस्ताँइन्द्रगच्छसि ६ त-
मिन्द्रंवाजयामसिमहेवृत्रायहन्तवे । सवृषावृषभोभुवत् ७ इन्द्रःसदामनेकृत
ओजिष्ठःसमदेहितः । द्युम्नीश्लोकीससोम्यः ८ गिरावज्रोनसंभृतःसवलोअनं-

पच्युतः । वव॒क्षऋ॒ष्वोअस्तृ॑तः १ दुर्गे॑चिन्नःसु॒गंकृ॑धि॒गृणा॒नइ॑न्द्रगिर्वणः । त्वंच॑ मघव॒न्वशः॑ १० ॥ २२ ॥ यस्य॑ते॒नूचि॑दा॒दिश॑न्मि॒नन्ति॑स्व॒राज्य॑म् । नदे॒वो नाध्रि॑गुर्जनः ११ अधा॑ते॒अप्र॑तिष्कुतं॒देवी॑शुष्मं॒सप॑र्यतः । उ॒भेसु॒शिप्र॑रोद॑सी १२ त्वमे॒तदधारयःकृ॒ष्णासु॒रोहि॑णीषु॒च । परु॑ष्णीषुरु॒शत्पयः॑ १३ वियद॒हेर्ध॑त्वि॒पो विश्वे॑दे॒वासो॒अक्र॑मुः । वि॒दन्म॒गस्य॒ताँअम॑ः १४ आदु॑मे॒निव॒रोभु॑वद्वृ॒त्रहा॒दिष्ट॒ पौंस्य॑म् । अजा॑तशत्रु॒रस्तृ॑तः १५ ॥ २३ ॥ श्रु॒तंवो॑वृ॒त्रह॒न्त॑मं॒प्रश॑र्धं॒चर्ष॑णी-नाम् । आशु॑षे॒राध॑से॒म॒हे १६ अ॒याधि॒याचं॑गव्य॒यापु॑रु॒णाम॒न्पुरु॑ष्टुत । यत्सोमे॑-सोम॒आभ॑वः १७ बो॒धि॒न्म॑ना॒इद॑स्तु॒नोवृ॒त्रहा॑भू॒याँसु॑तिः । शृ॒णोतु॑शु॒क्रआ॒शि-षं॑म् १८ कया॒त्वंन॑ऊ॒त्याभि॒प्रम॑न्द॒सेवृ॑धन् । कया॑स्तो॒तृभ्य॒आभ॑र १९ कस्य॒ वृषा॑सु॒तेसचा॑नि॒युत्वा॑न्वृष॒भोर॑णत् । वृ॒त्रहासोम॑पीतये २० ॥ २४ ॥ अ॒भीषु

णस्त्वंरायिंमन्दसानःसंहस्रिणंम् । प्रयन्तावोंधिदाशुषे २१ पत्नीवन्तःसुताइम उशन्तोयन्तिवीतये । अपांजग्मिंनिचुम्पुणः २२ इष्टाहोत्रांअसृक्षतेन्द्रंवृधासोंअध्वरे । अच्छांवभृथमोजसा २३ इहत्यासंधमाद्याहरीहिरंण्यकेश्या । वोळ्हा-मभिप्रयोंहितम् २४ तुभ्यंसोमाःसुताइमेस्तीर्णंबर्हिर्वंभावसो । स्तोतृभ्यइ-न्द्रमावह २५ ॥ २५ ॥ आतेदक्षंविरोंचनादधद्रत्नाविदाशुषे । स्तोतृभ्यइन्द्रम-र्चत २६ आतंदधामीन्द्रियमुक्थाविश्वांशतक्रतो । स्तोतृभ्यंइन्द्रमूळय २७ भद्रंभद्रंनआभरेषमूर्जंशतक्रतो । यदिंन्द्रमूळयांसिनः २८ सनोविश्वान्याभंर सुवितानिंशतक्रतो । यदिंन्द्रमूळयांसिनः २९ त्वामिद्धित्रहन्तमसुतावंन्तोहवा-महे । यदिंन्द्रमूळयांसिनः ३० ॥ २६ ॥ उपंनोहरिंभिःसुतंयाहिमंदानांपते । उपंनोहरिंभिःसुतम् ३१ हितायोवृत्रहन्तंमोविदइन्द्रंःशतक्रतुः । उपंनोहरिंभिः

सुतम् ३२ त्वंहिवृत्रहन्नेषांपातासोमांनामसि । उपंनोहरिभिःसुतम् ३३ इन्द्र इषंदंदातुनऋभुक्षणंमृभुंरयिम् । वाजीदंदातुवाजिनंम् ३४ ॥ २७ ॥ इति शाकलर्क्संहितायामष्टमे मण्डले नवमोनुवाकः ॥ ९ ॥

गौर्धयति द्वादश विन्दुः पूतदक्षो वा मरुतो गायत्री ।

१४ गौर्धयतिमरुतांश्रवस्युर्माताम्घोनाम् । युक्तावह्नीरथानाम् १ यस्यां देवाउपस्थेव्रताविश्वेधारयन्ते । सूर्यामासाद्दशेकम् २ तत्सुनोविश्वेअर्यआस दांगृणन्तिकारवः । मरुतःसोमपीतये ३ अस्तिसोमोंअयंसुतःपिबन्त्यस्यमरुतः । उतस्वराजोंअश्विना ४ पिबन्तिमित्रोअर्यमातनापूतस्यवरुणः । त्रिषधस्थस्यजावतः ५ उतोन्वस्यजोषमाँइन्द्रःसुतस्यगोमतः । प्रातर्होतेवमत्सति ६ ॥ २८ ॥ कदंत्विषन्तसूरयस्तिरआपंइवास्रिधः । अपंन्तिपूतदक्षसः ७

कद्वोऽअयमहानादेवानामवोवृणे । त्मनाचदस्मवर्चसाम् ८ आयेविश्वापार्थि-
वानिप्रप्रथन्नोचनादिवः । मरुतःसोमपीतये ९ त्यान्नुपूतदक्षसोदिवोवोमरुतो
हुवे । अस्यसोमस्यपीतये १० त्यान्नुयेविरोदसीतस्तभुर्मरुतोहुवे । अस्यसो-
मस्यपीतये ११ त्यंनुमारुतंगणंगिरिष्ठांवृषणंहुवे । अस्यसोमस्यपीतये १२॥२१॥

आ त्वा नवाङ्गिरसास्तिरश्चीरिन्द्रोनुष्टुप् ।

१५ आत्वागिरोरथीरिवास्थुःसुतेषुगिर्वणः । अभित्वासमनूषतेन्द्रवत्संन
मातरः १ आत्वाशुक्राअचुच्यवुःसुतासइन्द्रगिर्वणः । पिबात्वेस्यान्धसइन्द्र
विश्वासुतेहितम् २ पिबासोमंमदायकमिन्द्रश्येनाभृतंसुतम् । त्वंहिशश्वतीनां
पतीराजाविशामसि ३ श्रुधीहवंतिरश्याइन्द्रयस्त्वासपर्यति । सुवीर्यस्यगोम-
तोरायस्पूर्धिमहाँअसि ४ इन्द्रयस्तेनवीयसीगिरंमन्द्रामजीजनत् । चिकित्वि-

न्मनसंधियैंप्रत्नामृतस्यपिप्युषीम् ५ ॥ ३० ॥ तमुष्टवामयंगिरइन्द्रंमुकथानिं वावृधुः । पुरूण्यस्यपौंस्यासिषासन्तोवनामहे ६ एतोन्विन्द्रंस्तवामशुद्धंशुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ७ इन्द्रंशुद्धोनआगहिशुद्धः शुद्धाभिरूतिभिः । शुद्धोरयिंनिधारयशुद्धोमंमाद्भिसोम्यः ८ इन्द्रंशुद्धोहिनो रयिंशुद्धोरत्नानिदाशुषे । शुद्धोवृत्राणिंजिघ्नसेशुद्धोवाजंसिषाससि ९ ॥ ३१ ॥

अस्मा एकविंशतिस्तिरश्चीर्द्युतानो वा मारुत इन्द्रस्त्रिष्टुप् । चतुर्दश्या अन्त्य-
पादस्य पञ्चदश्याश्चेन्द्रावृहस्पती । चतुर्थी विराट् ।

१६ अस्माउपासुआतिरन्तयामंमिन्द्रायनक्तमूर्म्याःसुवाचः । अस्माआपौं मातरःसप्ततस्थुर्नृभ्यस्तरायसिन्धवःसुपाराः १ अतिविद्धाविथुरेणाचिदस्त्रात्रिः सप्तसानुसंहिंतागिरीणाम् । नतद्देवोनमर्त्यस्तुतुर्याद्यानिप्रवृद्धोवृषभश्चकार २

इन्द्रस्यवज्रंआयसोनिमिश्रुइन्द्रस्यवाह्वोर्भूयिष्ठमोजः । शीर्षन्निन्द्रस्यक्रतवोनि-
रेकआसन्नेपन्तश्रुत्याउपाके ३ मन्येत्वायज्ञियंयज्ञियानांमन्येत्वाच्यवनमच्यु-
तानाम् । मन्येत्वासत्वनामिन्द्रकेतुंमन्येत्वावृषभंचर्षणीनाम् ४ आयद्वज्रंबा-
ह्वोरिन्द्रधत्सेमदच्युतमहयेहन्तवाउ । प्रपर्वताअनवन्तप्रगावःप्रब्रह्माणोअभिन-
क्षन्तइन्द्रम् ५ ॥ ३२ ॥ तमुष्टवामयइमाजजानविश्वाजातान्यवराण्यस्मात् ।
इन्द्रेणमित्रंदिधिषेमगीर्भिरुपोनमोभिर्वृषभंविशेम ६ वृत्रस्यत्वाश्वसथादीष-
माणाविश्वेदेवाअजहुर्येसखायः । मरुद्भिरिन्द्रसख्यंतेअस्त्वथेमाविश्वाःपृतनाज-
यासि ७ त्रिःपृष्टिस्त्वामरुतोवावृधानाउस्राइवराशयोयज्ञियासः । उपत्वेमः
कृधिनोभागधेयंशुष्मन्तएनाहविषाविधेम ८ तिग्ममायुधंमरुतामनीकंकस्त
इन्द्रप्रतिवज्रंदधर्ष । अनायुधासोअसुराअदेवाश्वक्रेणताँअपवपक्रजीषिन् ९

महउग्रायतवसेसुवृक्तिंप्रेरयशिवतंमायपश्वः । गिर्वाहसेगिरइन्द्रायपूर्वीर्घेहित-
न्वेकुविदङ्गवेदत् १० ॥ ३३ ॥ उक्थवाहसेविभ्वेमनीषांद्रुणानपारमीरयानदी-
नाम् । निस्पृशधियातन्विंश्रुतस्युजुष्टतरस्यकुविदङ्गवेदत् ११ तद्विविड्ढियत्त
इन्द्रोजुजोषत्स्तुहिसुष्टुतिंनमसाविवास । उपभूषजरितर्मरुंवण्यःश्रावयावाचं
कुविदङ्गवेदत् १२ अवद्रप्सोअंशुमतीमतिष्ठदियानःकृष्णोदशभिःसहस्रैः । आ-
वत्तमिन्द्रःशच्याधमन्तमपस्नेहितीर्नृमणाअधत्त १३ द्रप्समपश्यंविषुणेचरन्त-
मुपह्वरेनद्योअंशुमत्याः । नभोनकृष्णमवतस्थिवांसमिष्यामिवोवृषणायुध्यता-
जौ १४ अधद्रप्सोअंशुमत्यांउपस्थेऽधारयत्तन्वंतित्विषाणः । विशोअदेवीर-
भ्याचरन्तीर्बृहस्पतिनायुजेन्द्रःससाहे १५ ॥ ३४ ॥ त्वंहत्यत्सप्तभ्योजाय-
मानोऽशत्रुभ्योअभवःशत्रुरिन्द्र । गूळ्हेद्यावापृथिवीअन्वविन्दोविभुमद्भ्योभुवने-

भ्योरणँधाः १६ त्वंहत्यदप्रतिमानमोजोवज्रेणवज्रिन्धृषितोजघन्थ । त्वंशुष्ण-
स्यावांतिरोवधंत्रैस्त्वंगाइंन्द्रशच्येदविन्दः १७ त्वंहत्यद्वृषभचर्षणीनांघनोवृत्रा-
णांतविषोवंभूथ । त्वंसिन्धूँरसृजस्तस्तभानान्त्वमपोअंजयोदासपत्नीः १८
ससुक्रतूरणितायःसुतेष्वनुत्तमन्युर्योअहेवरेवान् । यएकइन्नर्यपाँसिकर्तासवृत्रहा
प्रतीदन्यमाहुः १९ सवृत्रहेन्द्रश्चर्षणीधृत्संसुष्टुत्याहव्यँहुवेम । सप्रावितामघ-
वानोऽधिवक्तासवाजस्यश्रवस्यस्यदाता २० सवृत्रहेन्द्रऋभुक्षाःसद्योजज्ञानोह-
व्योबभूव । कृण्वन्नपाँसिनर्याँपुरूणिसोमोनपीतोहव्यःसखिभ्यः २१ ॥ ३५ ॥

सा इन्द्र पञ्चदश रेभः काश्यप इन्द्रो बृहती । दशमीत्रयोदश्यावतिजगत्यौ । एकादशी-
द्वादश्यावुपरिष्टाद्बृहत्यौ । उपान्त्या त्रिष्टुप् । अन्त्या जगती ।

१७ याइंन्द्रभुजआभरःस्वर्वाँअसुरेभ्यः । स्तोतारमिन्मंघवन्नस्यवर्धयुयेचत्वे

वृक्तबर्हिषः १ यमिन्द्रदधिषेत्वमश्वंगांभागमव्ययम् । यजमानेसुन्वतिदक्षिणा
वतितस्मिन्तंधेहिमापणौ २ यइन्द्रसस्त्यव्रतोऽनुष्वापमदेवयुः । स्वैःपएवैर्मुमु-
रत्पोष्यैरयिंसंनुतधेहितंततः ३ यच्छुक्रासिपरावतियदर्वावतिवृत्रहन् । अत-
स्त्वागीर्भिर्गृणदिन्द्रकेशिभिःसुतावाँआविवासति ४ यद्वासिरोचनेदिवःसमुद्र-
स्याधिविष्टपि । यत्पार्थिवेसदनेवृत्रहन्तमयदन्तरिक्षआगहि ५ ॥ ३६ ॥ सनः
सोमेपुसोमपाःसुतेषुशवसस्पते । मादयस्वराधसासूनृतावतेन्द्ररायापरीणसा ६
मानइन्द्रपरावृणग्भवानःसधमाद्यः । त्वंनऊतीत्वामिन्नआप्यंमानइन्द्रपरावृण-
क् ७ अस्मेइन्द्रसचासुतेनिषदापीतयेमधु । कृधीजरित्रेमघवन्नवोमहदस्मेइन्द्र
सचासुते ८ नत्वादेवासआशतनमत्यासोअद्रिवः । विश्वाजातानिशवसाभि-
भूरसिनत्वादेवासआशत ९ विश्वाःपृतनाअभिभूतरंनरंसजूस्तक्षुरिन्द्रंजजनु-

श्वराजसे । कृत्वावरिष्ठंवरंआमुरिंमृतोग्रमोजिष्ठंतवसंतरस्विनम् १० ॥ ३७ ॥ समीरिभासोअस्वरन्निन्द्रंसोमस्यपीतये । स्वर्पतिंयदींवृधेधृतव्रतोह्योजसासमूतिभिः ११ नेमिंनमन्तिचक्षसामेपांविप्राअभिस्वरा । सुदीतयोवोअद्रुहोऽपिकर्णेतरस्विनःसमृक्वभिः १२ तमिन्द्रंजोहवीमिमघवानमुग्रंसत्रादधानमप्रतिष्कुतंशवांसि । मंहिष्ठोगीर्भिराचयज्ञियोवृवर्तद्रायेनोविश्वांसुपथाकृणोतुवज्री १३ त्वंपुरइन्द्रचिकिदेनाव्योजसाशविष्ठशक्रनाशयध्यै । त्वहिश्वानिभुवनानिवज्रिन्यावारिजेतेपृथिवीचभीषा १४ तन्मंक्रुतमिन्द्रशूरचित्रपात्वपोनवज्रिन्दुरितातिंपर्षिभूरिं । कदानइन्द्रराय आदंशस्येविश्वप्स्न्यस्यस्पृहयाय्यस्यराजन् १५ ॥ ३८ ॥ इति शाकलर्क्संहितायां षष्ठाष्टके षष्ठोध्यायः ॥ ६ ॥

इन्द्रायद्वादशनृमेधऔष्णिहंसप्तम्युपान्त्येचककुभोन्त्यानवम्यौपुरऔष्णिहौत्वामिदाष्टौमागाथमयं तेद्वादशनेमोभार्गवस्त्रैष्टुभंपङ्क्तीजगतीपरास्तिस्रोनुष्टुभोयमितिहूचेनेन्द्रआत्मानमस्तौदुपान्त्येवाच्यावृधवपोळशजमदग्निर्भार्गवोमैत्रावरुणंभागाथंत्रित्रिष्टुवन्तंतृतीयादिगायत्रीपरासतोबृहतीस्तोत्रंराजस्वृक्सपादादिसाश्विन्यौवायव्येसौर्यौबृहत्युपस्यासूर्यप्रभास्तुतिर्वापावमानीगव्येत्वमग्नेऽधिकाभार्गवःप्रयोगोबार्हस्पत्योवाग्निःपावकःसहस्रस्तुतयोर्वाग्न्योर्गृहपतिर्यविष्ठयोर्वान्यतरआग्नेयंत्वदर्शिपळूनासोभरिर्वाईतंपञ्चमीविराड्रूपासप्तम्याद्ययुजःसतोबृहत्योष्टम्यादियुजःककुब्भ्रसीयसीककुबनुष्टुवन्त्याग्निमारुतीनवमंमण्डलंपावमानंसौम्यंस्त्रादिष्टयादशमधुच्छन्दाःपवस्वमेधातिथिरेपशुनःशेषःसनाहिरण्यस्तूपःसमिद्धएकादशकाश्यपोसितोदेवलोवाविंशतिःसूक्तान्याद्यमाग्नियश्चतुरनुष्टुवन्तंमन्द्रयानवाग्रमेतेसोमाःपरिप्रियामस्वानासउपास्मैसोमाअग्रम् ॥

इन्द्राय द्वादश नृमेध इन्द्रः । आद्याःषडष्टमी चौष्णिहः । नवमी-
द्वादश्यौ पुरऔष्णिहौ । शिष्टाः ककुभः ।

१८ ॐम् इन्द्रायुसामंगायतुविप्रायवृहतेवृहत् । धुर्मुकृतेविपुश्चितेपनुस्य-

वें १ त्वमिन्द्राभिभूरसित्वंसूर्यमरोचयः । विश्वकर्माविश्वदेवोमहाँअसि २ विभ्राजञ्ज्योतिषास्वं१रगच्छोरोचनंदिवः । देवास्तइन्द्रसख्यायमेमिरे ३ एन्द्र नोगधिप्रियःसत्राजिदगोह्यः । गिरिर्नविश्वतस्पृथुःपतिर्दिवः ४ अभिहिसत्यसोमपाउभेवभूथरोदसी । इन्द्रासिसुन्वतोवृधःपतिर्दिवः ५ त्वंहिशश्वतीनामिन्द्र दर्तापुरामसि । हन्तादस्योर्मनोवृधःपतिर्दिवः ६ ॥ १ ॥ अधाहीन्द्रगिर्वणउपं त्वाकामान्महःसंसृज्महे । उदेवयन्तउदभिः ७ वार्णत्वाय्याभिर्वर्धन्तिशूर ब्रह्माणि । वावृध्वांसंचिदद्रिवोदिवेदिवे ८ युञ्जन्तिहरीइषिरस्यगाधयोरौरथंउरुयुगे । इन्द्रवाहावचोयुजा १ त्वंनइन्द्राभरौजोनृम्णंशतक्रतोविचर्षणे । आवीरंपृतनासहम् १० त्वंहिनःपितावसोत्वंमाताशतक्रतोबभूविथ । अधातेसुम्न-

मीमहे ११ त्वांशुष्मिन्पुरुहूतवाजयन्तमुपब्रुवेशतक्रतो । सनोरास्वसुवीर्यम् १२ ॥ २ ॥

त्वामिदाप्टौ नृमेध इन्द्रः प्रगाथा ।

१ त्वामिदाह्योनरोऽपीप्यन्वज्रिन्भूर्णयः । सइन्द्रस्तोमंवाहसामिहश्रुध्युप स्वसरमागंहि १ मत्स्वासुशिप्रहरिवस्तदीमहेत्वेआभूषन्तिवेधसः । तवश्रवांस्युपमान्युक्थ्यासुतेष्विन्द्रगिर्वणः २ श्रायंन्तइवसूर्यंविश्वेदिन्द्रस्यभक्षत । वसूनिजातेजनमानओजसाप्रतिभागंनदीधिम ३ अनर्शरातिंवसुदामुपस्तुहिभद्रा इन्द्रस्यरातयः । सोअंस्यकामंविधतोनरोपतिमनोदानायंचोदयन् ४ त्वमिन्द्र प्रतूर्तिष्वभिविश्वाअसिस्पृधः । अशस्तिहाजनितारिश्वतूरसित्वंतूर्यतरुष्यतः ५ अनुतेशुष्मंतुरयन्तमीयतुःक्षोणीशिशुंनमातरा । विश्वास्तेस्पृधःश्नथयन्तमन्यवे

वृत्रयदिन्द्रतूर्वसि ६ इतऊतीवोऽजरंप्रहेतारमप्रहितम् । आशुंजेतारंहेतारंर-
धीतमममतूर्तंतुग्र्यावृधम् ७ डुप्कर्तारमनिष्कृतंसहस्कृतंशतमूतिंशतक्रतुम् ।
समानमिन्द्रमवसेहवामहेवसवानंवसूजुवम् ८ ॥ ३ ॥

अयं ते द्वादश नेमो भार्गव इन्द्रस्त्रिष्टुप् । चतुर्थीपञ्चम्योरिन्द्रऋषिः । दशम्ये-
कादश्योर्वाग्देवता । षष्ठी जगती । सप्तम्याद्यास्तिस्रोऽनुष्टुभः ।

१०० अयंतएमितन्वापुरस्ताद्विश्वेदेवाअभिमांयन्तिपश्चात् । यदामह्यंदी-
धरोभागमिन्द्रादिन्मयाकृणवोवीर्याणि १ दधामितेमधुनोभक्षमग्रेहितस्तेभागः
सुतोअस्तुसोमः । असंश्चत्वंदक्षिणतःसखामेधावृत्राणिजङ्घनावभूरि २ प्रसु
स्तोमंभरतवाजयन्तइन्द्रायसत्यंयदिसत्यमास्ते । नेन्द्रोअस्तीतिनेमउत्वआहक
ईंददर्शकमभिष्टवाम ३ अयमस्मिजरितःपश्यमेहविश्वाजातान्यभ्यस्मि

मुद्गा । ऋतस्यमाप्रदिशोवर्धयन्त्यादर्दिरोभुवनादर्दरीमि ४ आयन्मावेनाअरुह-न्नृतस्यैएकमासीनंहर्यतस्यपृष्ठे । मनश्चिन्मेहृदआप्रत्यवोचदचिक्रदद्इच्छशुम-न्तःसखायः ५ विश्वेत्तातेसवनेषुप्रवाच्यायाचकथंमघवन्निन्द्रसुन्वते । पारा-वतंयत्पुरुसंभृतंवस्वपावृणोःशरभायऋषिबन्धवे ६ ॥ ४ ॥ प्रनूनंधावतापृथुद्रुह योवोअवावरीत् । निपींवृत्रस्यममर्णिवज्रमिन्द्रोअपीपतत् ७ मनोजवाअय-मानआयसीमतरत्पुरम् । दिवंसुपर्णोगत्वायसोमंवज्रिणआभरत् ८ समुद्रे अन्तःशयतउद्नावज्रोअभीवृतः । भरन्त्यस्मैसंयतःपुरःप्रस्रवणावलिम् ९ य-दाग्वदन्त्यविचेतनानिराष्ट्रीदेवानांनिषसादमन्द्रा । चतस्रऊर्जंदुदुहेपयांसिक्व-स्विदस्याःपरमंजगाम १० देवींवाचंमजनयन्तदेवास्तांविश्वरूपाःपशवोवद-न्ति । सानोमन्द्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ११ सखेविष्णोवितरंवि

क्रमस्वद्यौर्दृहिलोकंवज्रायविष्कभे । हनावृत्रंरिणचावंसिन्धूनिन्द्रस्ययन्तुप्रसवेविसृष्टाः १२ ॥ ५ ॥

ऋधक्षोडश जमदग्निर्भार्गवः । आद्यानां चतसृणां पञ्चम्याद्यपादत्रयस्य च मित्रावरुणौ । पञ्चम्यन्त्यपादस्य षष्ठ्याश्चादितिः । ततो द्वयोरश्विनौ ततो द्वयोर्वायुः । ततो द्वयोः सूर्यः । त्रयोदश्या उषाः सूर्यप्रभा वा । चतुर्दश्याः पवमानः । अन्त्ययोर्गौः । प्रथमापञ्चमीसप्तमीनवम्येकादशीत्रयोदश्यो बृहत्यः । तृतीया गायत्री । अन्त्यास्तिस्त्रिष्टुभः । शिष्टाः सतोबृहत्यः ।

१०१. ऋधगित्थासमर्त्यःशशमेदेवतातये । योनूनंमित्रावरुणावभिष्टयआचक्रेहव्यदातये १ वसिष्ठक्षत्राउरुचक्षसानरारजानादीर्घश्रुत्तमा । तावाहुतान- ॥४६४॥

दंसनारथर्यतःसाकंसूर्यस्यरश्मिभिः २ प्रयोवांमित्रावरुणोःजिरोदूतोअद्रवत् ।
अयंःशीर्ष्णामदैरघुः ३ नयःसंपृच्छेनपुनर्हवीतवेनसंवादायरमंते । तस्मान्नोअ-
द्यसमृतेरुरुष्यतंबाहुभ्यांनउरुष्यतम् ४ प्रमित्रायप्रार्यम्णेसचथ्यमृतावसो । व-
रूथ्यं१वरुणेछन्त्स्यंवचःस्तोत्रंराजसुगायत ५ ॥ ६ ॥ तेहिन्विरेअरुणंजेन्यंवस्वे-
कंपुत्रंतिसृणाम् । तेधामान्यमृतामत्यानामदब्धाअभिचक्षते ६ आमेवचांस्यु-
चंताद्युमत्तंमानिकत्वा । उभायांतंनासत्यासजोषसाप्रतिहव्यानिवीतयें ७ रा-
तिंयद्वांमरक्षसंहवांमहेयुवाभ्यांवाजिनीवसू । प्राचींहोत्रांप्रतिरन्तावितंनरागृ-
णानाजमदग्निना ८ आनोयज्ञंदिविस्पृशंवायोयाहिसुमन्मभिः । अन्तःपवित्र
उपरिश्रीणानोइयंशुक्रोअयामिते ९ वेत्यध्वर्युःपथिभिरजिष्ठैःप्रतिहव्यानिवीत-

ये । अधानियुत्वउभयंस्यनःपिबशुचिंसोमंगवाशिरम् १० ॥ ७ ॥ वण्महाँ असिसूर्यबळादित्यमहाँअसि । महस्तेसतोमंहिमापनस्यतेऽद्धादेवमहाँअसि ११ वट्सूर्यश्रवसामहाँअसिसत्रादेवमहाँअसि । मह्नादेवानांमसुर्यःपुरोहितोविभु ज्योतिरदाभ्यम् १२ इयंयानीच्यर्किणीरूपारोहिण्याकृता । चित्रेवप्रत्यदर्श्या-यत्यं१तर्दशसुवाहुपु १३ प्रजाहंतिस्रोअत्यायमीयुन्यं१न्याअर्कमभितोविविश्रे । वृहद्धंतस्थौभुवनेष्वन्तःपवमानोहरितआविवेश १४ मातारुद्राणांदुहितावसूनां स्वसांदित्यानांममृतस्यनाभिः । प्रनुवोचंचिकितुषेजनायमागामनांगामदितिं वधिष्ट १५ वचोविदंवाचमुदीरयन्तींविश्वाभिर्धीभिरुपतिष्ठमानाम् । देवींदेवेभ्युःपर्येयुषींगामामावृक्तमर्त्यादभ्रचेताः १६ ॥ ८ ॥

त्वमग्ने द्वाविंशतिः मयोगो भार्गवोग्निः पावको वा बार्हस्पत्यः सहसः सुतयो-
र्वाग्न्योर्गृहपतिर्यविष्ठयोर्वान्यतरोग्निर्गायत्री ।

१०२ त्वमग्नेवृहद्वयोदधासिदेवदाशुषे । कविर्गृहपतिर्युवा १ सनर्ईळानया सहदेवाँअग्नेदुवस्युवा । चिकिद्विभानवावह २ त्वग्नाहस्विद्युजावयंचोदिष्ठेनय-विष्ठय । अभिष्मोवाजंसातये ३ और्वभृगुवच्छुचिंमग्नवानुवदाहुवे । अग्निंस-मुद्रवाससम् ४हुवेवातंस्वनंकविंपर्जन्यंक्रन्द्यंसहः।अग्निंसमुद्रवाससम् ५ ॥ १ ॥ आसवंसवितुर्यथाभगस्येवभुजिंहुवे । अग्निंसमुद्रवाससम् ६ अग्निंवोवृधन्तम-ध्वराणांपुरूतमम् । अच्छानप्त्रेसहस्वते ७ अयंयथानआभुवत्त्वष्टारूपेवृतक्ष्या । अस्यक्रत्वायशस्वतः ८ अयंविश्वाअभिश्रियोऽग्निर्देवेषुपत्यते । आवाजैरुपनो गमत् ९ विश्वेषामिहस्तुहिहोतृणांयशस्तमम् । अग्निंयज्ञेषुपूर्व्यम् १० ॥ १० ॥

शोरंपावकशोचिर्यज्येष्ठोयोदमेष्वा । दीदायदीर्घश्रुत्तमः ११ तमवन्तूनसानसिंगृ-
णीहिविप्रशुष्मिणम् । मित्रंनयातयज्जनम् १२ उपत्वाजामयोगिरोदेदिशतीर्ह-
विष्कृतः । वायोरनीकेअस्थिरन् १३ यस्यत्रिधात्ववृतंबर्हिस्तस्थावसदिनम् ।
आपश्चिन्निदंधापदम् १४ पदंदेवस्यमीळ्हुषोऽनाधृष्टाभिरूतिभिः । भद्रासूयइवो-
पदक् १५ ॥ ११ ॥ अग्नेघृतस्यधीतिभिस्तेपानोदेवशोचिषा । आदेवान्व-
क्षियक्षिच १६ तंत्वाजनन्तमातरःकविंदेवासोअङ्गिरः । हव्यवाहममर्त्यम् १७
प्रचेतसंत्वाकवेऽग्नेदूतंवरेण्यम् । हव्यवाहंनिषेदिरे १८ नहिमेअस्त्यद्रयानस्व-
धितिर्वनन्वति । अथैतादृग्भरामिते १९ यदग्नेकानिकानिचिदातेदारूणिदध्म-
सि । ताजुषस्वयविष्ठय २० यदत्युपजिह्विकायद्वस्रोअतिसर्पति । सर्वतदस्तुते
घृतम् २१ अग्निमिन्धानोमनसाधियंसचेतमर्त्यः । अग्निमीधेविवस्वभिः २२ ॥ १२ ॥

अ.६अ.

॥४६६॥

अदर्शि चतुर्दश सौभरिः काण्वोग्निः । अन्त्याया मरुतश्च । आद्याश्चतस्रः पङ्क्ती च बृहत्यः । पञ्चमी विराड्रूपा । अष्टमीद्वादश्यौ ककुभौ । दशमी क्रकुभौ । अन्त्यानुष्टुप् । शिष्टाः सतोबृहतः ।

१०३ अदर्शिगातुरुवित्तमोयस्मिन्व्रतान्यादधुः । उपोपुजातमार्यस्यवर्धनमग्निंनक्षन्तनोगिरः १ प्रदेवोदासोअग्निर्देवाँअच्छानमज्मना । अनुमातरंपृथिवीं विवावृतेतस्थौनाकंस्यसानवि २ यस्माद्रेजन्तकृष्टयश्चर्कृत्यानिकृण्वतः । सहस्रसामेधसांताविवृत्मनाग्निंधीभिःसपर्यत ३ प्रयंरायेनिनीषसिमर्तोयस्तेवसो दाशत् । सवीरंधत्तेअग्नउक्थशंसिनंत्मनासहस्रपोषिणम् ४ सद्यश्चिद्दाभितृणत्तिवाजमर्वतासधत्तेअक्षितिश्रवः । त्वेदेवत्रासदापुरूवसोविश्वावामानिधीमहि ५ ॥ १३ ॥ योविश्वादयतेवसुहोतामन्द्रोजनानाम् । मधोर्नपात्रांप्रथमान्यस्मैप्रस्तोमायन्त्यग्नये ६ अश्वंनगीर्भीरथ्यंसुदानवोममृज्यन्तेदेवयवः । उभे

तोकेतनयेदस्मविश्पतेपविराधोमघोनाम् ७ प्रमंहिष्ठायगायतऋतान्नेबृहतेशुक्रशोचिषे । उपस्तुतासोअग्नयै ८ आवंसतेमघवांवीरवद्यशःसमिद्धोद्युम्न्याहुतः । कविन्नोअस्यसुमतिर्नवीयस्यच्छावाजेभिरागमत् ९ प्रेष्ठमुप्रियाणांस्तुह्यांसावातिथिम् । अग्निरथानांयमम् १० ॥१४॥ उदितायोनिदितावेदितावस्यायज्ञियोवर्वर्तति । दुष्टरायस्यंप्रवणेनोर्मयोधियावाजंसिषासतः ११ मानोहणीतामतिंथिर्वसुरग्निःपुरुप्रशस्तएपः । यःसुहोतास्वध्वरः १२ मोतेरिवन्येअच्छोक्तिभिर्वसोऽग्नेकाभिश्चिदेवैः । कीरिश्चिद्धित्वामीट्टेदूत्यायरातहव्यःस्वध्वरः १३ आग्ने याहिमरुत्सखारुद्रेभिःसोमपीतये । सोभर्याउपसुष्टुतिंमादयंस्वस्वर्णरे १४ ॥ १५ ॥ इति शाकलर्कसंहितायामष्टमे मण्डले दशमोनुवाकः ॥ १० ॥

॥ इत्यष्टमं मण्डलं समाप्तम् ॥

स्वादिष्ठया दश मधुच्छन्दाः पवमानः सोमो गायत्री ।

१ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया । इन्द्रायपातवेसुतः १ रक्षोहाविश्वचर्षणिरभियोनिमयोहतम् । द्रुणासधस्थमासदत् २ वरिवोधातमोभवमंहिष्ठोवृत्रहन्तमः । पर्षिराधोमघोनाम् ३ अभ्यर्षमहानादेवानांवीतिमन्धसा । अभिवाजमुतश्रवः ४ त्वामच्छाचरामसितदिदर्थेदिवेदिवे । इन्दोत्वेनआशसः ५ ॥ १६ ॥ पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता । वारेणशश्वतातना ६ तमीमण्वीःसमर्यआगृभ्णन्तियोषणोदशं । स्वसारःपार्येदिवि ७ तमींहिन्वन्त्यग्रुवोधमंन्तिवाकुरंदतिम् । त्रिधातुवारणंमधु ८ अभी३ममद्र्याउतश्रीणन्तिधेनवःशिशुम् । सोममिन्द्रायपातवे ९ अस्येदिन्द्रोमदेष्वाविश्वावृत्राणिजिघ्नते । शूरोमघाचमंहते १० ॥ १७ ॥

पवस्व दश मेधातिथिः पवमानः सोमो गायत्री ।

२ पवस्वदेववीरतिंपवित्रंसोमरह्यां । इन्द्रमिन्दोवृषाविश १ आवच्यस्वमहिष्टरोवृषेन्दोद्युम्नवत्तमः । आयोनिंधर्णसिःसदः २ अधुक्षतप्रियंमधुधारांसुतस्यवेधसः । अपोवसिष्टसुक्रतुः ३ महान्तंत्वामहीरन्वापोअर्षन्तिसिन्धवः । यद्गोभिर्वासयिष्यसे ४ समुद्रोअप्सुमामृजेविष्टम्भोधरुणोदिवः । सोमःपवित्रेअस्मयुः ५ ॥ १८ ॥ अचिक्रदद्वृषाहरिर्महान्मित्रोनदर्शतः । संसूर्येणरोचते ६ गिरस्तइन्दओजसाममृज्यन्तेअपस्युवः । याभिर्मदायशुम्भसे ७ तंत्वामदायघृष्वयउलोककृत्नुमीमहे । तवप्रशस्तयोमहीः ८ अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्वधारया । पर्जन्योवृष्टिमाँइव ९ गोषाइन्दोनृषाअस्यश्वसावाजसाउत । आत्मायज्ञस्यपूर्व्यः १० ॥ १९ ॥

एष दश शुनःशेपः पवमानः सोमो गायत्री ।

३ एषदेवोअमर्त्यःपर्णवीरिवदीयति । अभिद्रोणान्यासदम् १ एषदेवोविपाकृतोऽतिह्वरांसिधावति । पवमानोअदाभ्यः २ एषदेवोविपन्युभिःपवमान ऋतायुभिः । हरिर्वाजायमृज्यते ३ एषविश्वानिवार्याशूरोयन्निवसत्वभिः । पवमानःसिषासति ४ एषदेवोरथर्यतिपवमानोदशस्यति । आविष्कृणोतिवग्वनुम् ५ ॥ २० ॥ एषविप्रैरभिष्टुतोऽपोदेवोविगाहते । दधद्रत्नानिदाशुषे ६ एषदिवंविधावतितिरोरजांसिधारया । पवमानःकनिक्रदत् । ७ एषदिवंव्यासरत्तिरोरजांस्यस्पृतः । पवमानःस्वध्वरः ८ एषप्रतेनजन्मनादेवोदेवेभ्यःसुतः । हरिःपवित्रेअर्षति ९ एषउस्यपुरुव्रतोजजानोजनयन्निषः । धारयापवतेसुतः १० ॥ २१ ॥

४ सनाचसोमजेषिंचपवमानमहिश्रवः । अथानोवस्यसस्कृधि १ सना ज्योतिःसनास्वं१र्विश्वाचसोमसौभगा । अथानोवस्यसस्कृधि २ सनादक्षंमुत क्रतुमपंसोममृधोजहि । अथानोवस्यसस्कृधि ३ पवीतारःपुनीतनसोममिन्द्रा-यपातवे । अथानोवस्यसस्कृधि ४ त्वंसूर्यंनआभजतवक्त्वातवोतिभिः । अथानोवस्यसस्कृधि ५ ॥ २२ ॥ तवक्त्वातवोतिभिर्ज्योकपश्येमसूर्यम् । अथानोवस्यसस्कृधि ६ अभ्यर्षस्वायुधसोमद्विबर्हसंरयिम् । अथानोवस्यसस्कृधि ७ अभ्यं१र्षानंपच्युतोरायिंसमत्सुसासहिः । अथानोवस्यसस्कृधि ८ त्वां यज्ञैरवीवृधन्पवमानविधर्मणि । अथानोवस्यसस्कृधि ९ रयिंनश्चित्रमश्विन-मिन्दोविश्वायुमाभर । अथानोवस्यसस्कृधि १० ॥ २३ ॥

समिद्ध एकादशासितः काश्यपो देवलो वाभियो गायत्री । अन्त्याश्चतस्रोनुष्टुभः ।

५ समिंद्धोविश्वतस्पतिःपवमानोविराजति । प्रीणन्वृषाकनिंक्रदत् १ तनूनपात्पवमानःशृङ्गेशिशानोअर्षति । अन्तरिक्षेणरारजत् २ ईळेन्यःपवमानोरयिर्विराजतिद्युमान् । मधोर्धारांभिरोजसा ३ बर्हिःप्राचीनमोजसापवमानःस्तृणन्हरिः । देवेषुदेवईयते ४ उदातैंजिहतेबृहद्वारोंदेवीर्हिरण्ययीः । पवमानेनसुष्टुताः ५॥ २४ ॥ सुशिल्पेबृहतीमहीपवमानोवृषण्यति । नक्तोषासानदर्शतें ६ उभादेवानृचक्षसाहोतारादैव्याहुवे । पवमानइन्द्रोवृषा ७ भारतीपवमानस्यसरस्वतीळांमही । इमंनोयज्ञमागमन्तिस्रोदेवीःसुपेशसः ८ त्वष्टारमग्रजांगोपांपुरोयावानमाहुवे । इन्दुरिन्द्रोवृषाहरिःपवमानःप्रजापतिः ९ वनस्प-

तिंपवमानमध्वासमङ्गिधारया । सहस्रवल्शंहरितंभ्राजमानंहिरण्ययम् १०
विश्वेदेवाःस्वाहाकृतिंपवमानस्यागत । वायुर्बृहस्पतिःसूर्योऽग्निरिन्द्रःसुजोषसः ११ ॥ २५ ॥

मन्द्रया नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

६ मन्द्रयासोमधारयावृषापवस्वदेवयुः । अव्योवारेष्वस्मयुः १ अभित्यंमद्यंमदमिन्दविन्द्रइतिक्षर । अभिवाजिनोअर्वतः २ अभित्यंपूर्व्यंमदंसुवानो अर्षपवित्रआ । अभिवाजंमुतश्रवः ३ अनुद्रप्सासइन्दवआपोनप्रवतासरन् । पुनानाइन्द्रमाशत ४ यमत्यमिववाजिनंमृजन्तियोषणोदशं । वनेक्रीळन्तमत्यविम् ५ ॥ २६ ॥ तंगोभिर्वृषणंरसंमदायदेववीतये । सुतंभरायसंसृज ६ देवोदेवायुधार्येन्द्रायपवतेसुतः । पयोयदस्यपीपयत् ७ आत्मायज्ञस्यरंह्यासु-

प्वाणःपवतेसुतः। प्रत्नंनिपातिकाव्यम् ८ एवापुनानइन्द्रयुर्मदंमदिष्ठवीतये । गुहाचिद्दधिरेगिरः ९ ॥ २७ ॥

अष्टमं नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

७ असृग्रमिन्दवःपथाधर्मन्नृतस्यसुश्रियः । विदानाअस्ययोजनम् १ प्रधारामध्वोअग्रियोमहीरपोविगाहते । हविर्हविष्पुवन्द्यः २ प्रयुजोवाचोअग्रियो वृषावंचक्रदद्वनें । सद्माभिसत्योअंध्वरः ३ परियत्काव्याकविर्नम्णावसानोअर्षति । स्वंर्वाजीसिषासति ४ पवमानोअभिस्पृधोविशोराजेवसीदति । यदीमृण्वन्तिवेधसः ५ ॥ २८ ॥ अन्योवारेपरिप्रियोहरिर्वनेषुसीदति । रेभोवनुष्यतेमती ६ सवायुमिन्द्रमश्विनासाकंमदेनगच्छति । रणायोअस्यधर्मभिः ७

आमित्रावरुणाभगंमध्वःपवन्तऊर्मयः । विदानाअस्यशक्मभिः ८ अस्मभ्यं रोदसीरयिंमध्वोवाजंस्यसातये । श्रवोवसूनिसंजितम् १ ॥ २१ ॥

एते सोमा नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

८ एतेसोमाअभिप्रियमिन्द्रस्यकामंमक्षरन् । वर्धन्तोअस्यवीर्यम् १ पुनानासश्चमूषदोगच्छन्तोवायुमश्विना । तेनोधान्तुसुवीर्यम् २ इन्द्रस्यसोमराधसे पुनानोहार्दिचोदय । ऋतस्ययोनिमासदम् ३ मृजन्तित्वादशक्षिपोहिन्वन्तिसप्तधीतयः । अनुविप्राअमादिषुः ४ देवेभ्यस्त्वामदायकंसृजानमतिमेप्यः । संगोभिर्वासयामसि ५ ॥ ३० ॥ पुनानःकलशेष्वावस्त्राण्यरुषोहरिः । परि गव्यान्यव्यत ६ मघोनआपवस्वनोजहिविश्वाअपद्विषः । इन्दोसखायुमाविं-

श ७ वृष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याअधि । सहोनःसोमपृत्सुधाः ८ नृचक्षसं त्वाद्यमिन्द्रपीतंस्वर्विदम् । भक्षीमहिप्रजामिषम् ९ ॥ ३१ ॥

परि प्रिया नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१ परिप्रियादिवःकविर्वयांसिनह्योहितः । सुवानोयातिकविक्रतुः १ प्रप्रक्षयांयुपन्यसेजनायुजुष्टोअद्रुहे । वीत्यर्षचनिष्ठया २ समनुर्मातराशुचिर्जातोजातेअरोचयत् । महान्महीऋतावृधा ३ ससप्तधीतिभिर्हितोनद्योअजिन्वदद्रुहः । याएकमक्षिवावृधुः ४ ताअभिसन्तमस्तृतंमहेयुवानमादधुः । इन्दुमिन्द्रतवव्रते ५ ॥ ३२ ॥ अभिवह्निरमर्त्यःसप्तपश्यतिवावहिः । क्रिविर्देवीरतर्पयत् ६ अवाकल्पेपुनःपुमस्तमांसिसोमयोध्या । तानिपुनानजङ्घनः ७ नूनव्यसेनवी-

यसेसूक्तायसाधयापथः । प्रत्नवद्रोचयारुचः ८ पवमानमहिश्रवोगामश्वंरासि वीरवत् । सनामेधांसनास्वः ९ ॥ ३३ ॥

म स्वानासो नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१० प्रस्वानासोरथाइवावन्तोनश्रवस्यवः । सोमासोरायेअक्रमुः १ हिन्वानासोरथाइवदधन्विरेगभस्त्योः । भरासःकारिणामिव २ राजानोन प्रशस्तिभिःसोमासोगोभिरञ्जते । यज्ञोनसप्तधातृभिः ३ परिसुवानासइन्दवो मदायबर्हणागिरा । सुताअर्षन्तिधारया ४ आपानासोविवस्वतोजनन्तउषसोभगम् । सूराअण्वंवितन्वते ५ ॥ ३४ ॥ अपद्वारामतीनांप्रत्नाऋण्वन्तिकारवः । वृष्णोहरसआयवः ६ समीचीनासआसतेहोतारःसप्तजामयः । पदमे- ॥४७२॥

कंस्यपिप्रंतः ७ नाभानाभिंनुआदंदेचक्षुश्चित्सूर्यंसचा । कुवेरपंत्युमार्दुहे ८ अभिप्रियादिवस्पदमंध्वर्युभिर्गुहांहितम् । सूरंःपश्यतिचक्षंसा १ ॥ ३५ ॥

उपास्मै नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

११ उपांस्मैगायतानरःपवंमानायेन्दंवे । अभिदेवाँइयंक्षते १ अभित्येम-धुनापयोऽधंर्वाणोअशिश्रयुः । देवंदेवायदेवयु २ सनंःपवस्वशंगवेशंजनायशमंवते । शंराजन्नोपधीभ्यः ३ वभ्रवेनुस्वतंवसेऽरुणायदिविस्पृशे । सोमायगाथमंर्चत ४ हस्तंच्युतेभिरद्रिंभिःसुतंसोमंपुनीतन । मधावाधावतामधु ५ ॥ ३६ ॥ नमसेदुपसीदतदग्नेदभिश्रीणीतन । इन्दुमिन्द्रेदधातन ६ अमित्रहा विचर्षणिःपवस्वसोमशंगवे । देवेभ्योअनुकामकृत् ७ इन्द्रायसोमपातवेमदा-

यपरिषिच्यसे । मनश्चिन्मनसस्पतिः ८ पवमानसुवीर्यꣳरयिꣳसोमरिरीहिनः । इन्दविन्द्रेणनोयुजा १ ॥ ३७ ॥

सोमा अग्रꣳ नवासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१२ सोमाअसृग्रमिन्दवःसुताऋतस्यसादने । इन्द्रायमधुमत्तमाः १ अभि विप्राअनूषतगावोवत्संनमातरः । इन्द्रꣳसोमस्यपीतये २ मदच्युत्क्षेतिसादनेसिन्धोरूर्माविपश्चित् । सोमोगौरीअधिश्रितः ३ दिवोनाभाविचक्षणोऽव्योवारे महीयते । सोमोयःसुऋतुःकविः ४ यःसोमःकलशेष्वाँअन्तःपवित्रआहितः । तमिन्दुःपरिषस्वजे ५ ॥ ३८ ॥ प्रवाचमिन्दुरिष्यतिसमुद्रस्याधिविष्टपि । जिन्वन्कोशंमधुश्चुतम् ६ नित्यस्तोत्रोवनस्पतिर्धीनामन्तःसबर्दुघः । हिन्वानो मानुषायुगा ७ अभिप्रियादिवस्पदासोमोहिन्वानोअर्षति । विप्रस्यधारयाकृ-

विः ८ आपवमानधारयरयिंसहस्रवर्चसम् । अस्मेइन्दोस्वाभुवम् १ ॥ ३९ ॥
इति शाकलर्क्संहितायां षष्ठाष्टके सप्तमोध्यायः ॥ ७ ॥

सोमःपरिस्राष्टावेपधियामतेग्रनिम्नेनेवपरिसुवानःसप्तयत्सोमग्रकविरेतेधावन्त्येतेसोमासःसोमाअ-
स्मग्रंसोमासःपवस्वषट्हृच्युतआगस्स्तस्तमपृक्षंतेध्मवाहोदार्ढच्युतएषकविर्नृमेधएषवाजीग्रियमेधः
मास्यनृमेधःमधारावेन्दुःमसोमासोगोतमःमसोमासःश्यावाश्वःमसोमासस्त्रितःमसुवानआनःपवस्व
मभूवसुरसर्जिसस्रुतोराहूगणएषउस्यआशुर्षवृहन्मतिःपुनानःमयेगावोमेध्यातिथिर्जनयन्योअत्यइव ॥

सोमो नवाऽसितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१२ ॐम् सोमंःपुनानोअर्षतिसहस्रधारोअत्यविः । वायोरिन्द्रस्यनिष्कृत-
म् १ पवमानमवस्यवोविप्रमभिप्रगायत । सुष्वाणंदेववीतये २ पवन्तेवाज-
सातयेसोमाःसहस्रपाजसः । गृणानादेववीतये ३ उतनोवाजसातयेपवस्ववृह-

तीरिषः । द्युमदिन्दोसुवीर्यम् ४ तेनःसहस्रिणंरयिंपवन्तामासुवीर्यम् । सुवा-
नादेवासइन्दवः ५ ॥ १ ॥ अत्याहियानानहेतृभिरसृग्रंवाजंसातये । विवार-
व्यमाशवः ६ वाश्राअर्षन्तीन्दवोऽभिवत्संनधेनवः । दधन्विरेगभस्त्योः ७ जु-
ष्टइन्द्रायमत्सरःपवमानकनिक्रदत् । विश्वाअपद्विषोजहि ८ अपघ्नन्तोअराव्णः
पवमानाःस्वर्दृशः । योनावृतस्यसीदत ९ ॥ २ ॥

परि माष्टासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१४ परिप्रासिष्यदत्कविःसिन्धोरूर्माविधिश्रितः । कारंबिभ्रत्पुरुस्पृहम् १
गिरायदीसवन्धवःपञ्चव्रातोअप्स्यवः । परिष्कृण्वन्तिधर्णसिम् २ आदस्यशु-
ष्मिणोरसेविश्वेदेवाअमत्सत । यदीगोभिर्वसायते ३ निरिणानोविधावति जह-
च्छर्याणितान्वा । अत्रासंजिघ्नतेयुजा ४ नसीभिर्योविवस्वतःशुभ्रोनमामृजेयु-

वां । गाःकृण्वानोनर्णिजम् ५ ॥ ३ ॥ अतिश्रितीतिरश्वतागव्याजिंगात्य-ण्व्या । वसुमियतियंविदे ६ अभिक्षिपुःसमंगमतमर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णतवाजिनः ७ परिदिव्यानिममृंशद्विश्वानिसोमपार्थिवा । वसूनियाह्य-स्मयुः ८ ॥ ४ ॥

एष धियाष्टासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१५ एषधियायात्यण्व्याशूरोरथेभिराशुभिः । गच्छन्निन्द्रस्यनिष्कृतम् १ एषपुरूधियायतेवृहतेदेवतातये । यत्रामृतासआसते २ एषहितोविनीयतेऽन्तः शुभ्रावतापथा । यदीतुञ्जन्तिभूर्णयः ३ एषशृङ्गाणिदोधुवच्छिशीतेयूथ्यो३वृ-षा । नृम्णादधानओजसा ४ एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः । पतिः सिन्धूनांभवन् ५ एषवसूनिपिप्रदनापरुषायण्यावाँअति । अवशादेषुगच्छति ६

एतंमृजन्तिमर्ज्यमुपद्रोणेष्वायवः । प्रचक्राणंमहीरिषः ७ एतमुत्यंदशक्षिपो मृजन्तिसप्तधीतयः । स्वायुधंमदिंतमम् ८ ॥ ५ ॥

म तेष्टासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१६ प्रतेसोतारओण्यो३रसंमदायघृष्वये । सर्गोनतक्त्येतशः १ क्रत्वादक्षस्यरथ्यंमपोवसानमन्धसा । गोपामण्वैपुसश्चिम २ अनंतमप्सुदुष्टुरंसोमंपवित्रआसृज । पुनीहीन्द्रायपातवे ३ प्रपुनानस्यचेतसासोमःपवित्रेअर्षति । क्रत्वासधस्थमासदत् ४ प्रत्वानमोभिरिन्दवइन्द्रसोमाअसृक्षत । महेभरायकारिणः ५ पुनानोरूपेअव्ययेविश्वाअर्षन्नभिश्रियः । शूरोनगोषुतिष्ठति ६ दिवोन सानुपिप्युषीधारासुतस्यवेधसः । वृथापवित्रेअर्षति ७ त्वंसोमविपश्चितंतनापुनानआयुषु । अव्योवारंविधावसि ८ ॥ ६ ॥

प्र निम्नेष्टासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१७ प्रनिम्नेनेवसिन्धवोघ्नन्तोवृत्राणिभूर्णयः । सोमाअसृग्रमाशवः १ अभिसुवानासइन्दवोवृष्टयःपृथिवीमिव । इन्द्रंसोमासोअक्षरन् २ अत्यूर्मिर्मत्सरोमदः सोमःपवित्रेअर्षति । विघ्नन्रक्षांसिदेवयुः ३ आकलशेषुधावतिपवित्रेपरिषिच्यते । उक्थैर्यज्ञेषुवर्धते ४ अतित्रीसोमरोचनारोहन्नभ्राजसेदिवम् । इष्णन्त्सूर्यं नचोदयः ५ अभिविप्राअनूषतमूर्ध्वयज्ञस्यकारवः । दधानाश्चक्षसिप्रियम् ६ तमुत्वावाजिनंनरोधीभिर्विप्राअवस्यवः । मृजन्तिदेवतातये ७ मधोर्धारामनुक्षरतीव्रःसधस्थमासदः । चारुर्ऋतायपीतये ८ ॥ ७ ॥

परि सुवानः सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

१८ परिसुवानोगिरिष्ठाःपवित्रेसोमोअक्षाः । मदेपुसर्वधाअसि १ त्वंविप्र-

स्त्वंकविर्मधुप्रजातमन्धसः । मदेपुसर्वधाअंसि २ तवविश्वेसजोषसोदेवासः पीतिमाशत । मदेपुसर्वधाअंसि ३ आयोविश्वानिवार्यावसूनिहस्तयोर्दधे । मदेपुसर्वधाअंसि ४ यइमेरोदसीमहीसंमातरेवदोहते । मदेपुसर्वधाअंसि ५ परियोरोदसीउभेसद्योवाजेभिरर्षति । मदेपुसर्वधाअंसि ६ सशुष्मीकलशेष्वा पुनानोअंचिक्रदत् । मदेपुसर्वधाअंसि ७ ॥ ८ ॥

यत्सोम सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

११ यत्सोमचित्रमुक्थ्यंदिव्यंपार्थिवंवसु । तन्नःपुनानआभर १ युवंहि स्थःस्वर्पतीइन्द्रश्चसोमगोपती । ईशानापिप्यतंधियः २ वृषापुनानआयुषुस्तन-यन्नधिवाहिषि । हरिःसन्योनिमासदत् ३ अवावशन्तधीतयोवृषभस्याधिरेतसि । सूनोर्वत्सस्यमातरः ४ कविंहृण्यन्तीभ्यःपुनानोगर्भमादधत् । याः शुक्रंदुहते

पर्यः ५ उपांशिक्षापतस्थुषोंभियसमार्धेहिशत्रुंषु । पवमानविदारयिम् ६ निशत्रोंःसोमवृष्ण्यंनिशुष्मंनिवर्यस्तिर । दूरेवांसतोअन्तिंवा ७ ॥ ९ ॥

प्रकविः सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

२० प्रकविर्देववीतयेऽव्योवारेभिरर्षति । साह्वान्विश्वांअभिस्पृधः १ सहि ष्मांजरितृभ्यआवाजंगोमन्तमिन्वति । पवमानःसहस्रिणम् २ परिविश्वानि चेतसामृशसेपवसेमती । सनःसोमश्रवोविदः ३ अभ्यर्षबृहद्यशोमघवद्भ्यो ध्रुवंरयिम् । इषस्तोतृभ्यआभर ४ त्वंराजेवसुव्रतोगिरःसोमाविवेशिथ । पुनानोवह्नेअद्भुत ५ सवह्निरप्सुदुष्टरोमृज्यमानोगभस्त्योः । सोमश्चमूषुसीदति ६ कीळुर्मखोनमंहयुःपवित्रंसोमगच्छसि । दधत्स्तोत्रेसुवीर्यम् ७ ॥ १० ॥

एते धावन्ति सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

२१ एतेधावन्तीन्दवःसोमाइन्द्रायघृष्वयः । मत्सरासःस्वर्विदः १ प्रवृण्वन्तोअभियुजःसुष्वयेवरिवोविदः । स्वयंस्तोत्रेवयस्कृतः २ वृथाक्रीळन्त इन्दवःसधस्थमभ्येकमित् । सिन्धोरूर्माव्यक्षरन् ३ एतेविश्वानिवार्यापवमानासआशत । हितानसप्तयोरधे ४ आस्मिन्पिशङ्गमिन्दवोदधातावेनमादिशे । योअस्मभ्यमरावा ५ क्रुभुर्नरथ्यनवंदधातातकेतमादिशे । शुक्राःपवध्वमर्णसा ६ एतउत्येअवीवशन्काष्ठांवाजिनोअक्रत । सतःप्रासाविषुर्मतिम् ७ ॥ ११ ॥

एते सोमासः सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

२२ एतेसोमासआशवोरथाइवप्रवाजिनः । सर्गाःसृष्टाअहेषत १ एते-

वातांइवोरवःपर्जन्यस्येववृष्टयः । अग्नेरिवभ्रमावृथा २ एतेपूताविपश्चितः सोमासोदध्याशिरः । विपाव्यानशुर्धियः ३ एतेमृष्टाअमर्त्याःससृवांसोनशश्रमुः । इयक्षन्तःपथोरजः ४ एतेपृष्ठानिरोदसोर्विप्रयन्तोव्यानशुः । उतेदमुत्तमंरजः ५ तन्तुंतन्वानमुत्तममनुप्रवतंआशत । उतेदमुत्तमाय्यम् ६ त्वंसोमपणिभ्यआवसुगव्यानिधारयः । ततंतन्तुमचिक्रदः ७ ॥ १२ ॥

सोमा असृग्रं सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

२३ सोमाअसृग्रंमाशवोमधोर्मदंस्यधारया । अभिविश्वानिकाव्या १ अनुप्रत्नासंआयवःपदंनवीयोअक्रमुः । रुचेजनन्तसूर्यम् २ आपवमाननोभरायो अदाभ्योगयम् । कृधिप्रजावतीरिषः ३ अभिसोमासआयवःपवन्तेमद्यंमदम् । अभिकोशंमधुश्चुतम् ४ सोमोअर्षतिधर्णसिर्दधानइन्द्रियंरसम् । सुवीरोअभि-

शस्तिपाः ५ इन्द्रायसोमपवसेदेवेभ्यःसधमाद्यः । इन्दोवाजंसिषाससि ६ अ-
स्यपीत्वामदानामिन्द्रोवृत्राण्यप्रति । जघानजघनच्चनु ७ ॥ १३ ॥

म सोमासः सप्तासितः काश्यपो देवलो वा पवमानः सोमो गायत्री ।

२४ प्रसोमासोअधन्विषुःपवमानासइन्दवः । श्रीणानाअप्सुमृंजत १ अ-
भिगावोअधन्वियुरापोनप्रवतायतीः । पुनानाइन्द्रमाशत २ प्रपवमानधन्वसि
सोमेन्द्रायपातवे । नृभिर्यतोविनीयसे ३ त्वंसोमनृमादनःपवस्वचर्षणीसहे । स-
स्निर्योअनुमाद्यः ४ इन्दोयदद्रिभिःसुतःपवित्रेपरिधावसि । अरमिन्द्रस्यधाम्ने ५
पवस्ववृत्रहन्तमोकथेभिरनुमाद्यः । शुचिःपावकोअद्भुतः ६ शुचिःपावकउच्य-
तेसोमःसुतस्यमध्वः । देवावीरघशंसहा ७ ॥ १४ ॥ इति शाकलर्क्संहितायां
नवमे मण्डले प्रथमोनुवाकः ॥ १ ॥

पवस्व पर्द्दच्युत आगस्त्यः पवमानः सोमो गायत्री ।

२५ पवस्वदक्षसाधनोदेवेभ्यःपीतयेहरे । मरुद्भ्योवायवेमदः १ पवमानधियाहितोऽभियोनिंकनिक्रदत् । धर्मणावायुमाविश २ संदेवैःशोभतेवृषाकविर्योनावधिप्रियः । वृत्रहादेववीतमः ३ विश्वारूपाण्याविशन्पुनानोयातिहर्यतः। यत्रामृतासआसते ४ अरुषोजनयन्गिरःसोमःपवतआयुषक् । इन्द्रंगच्छन्कविक्रतुः ५ आपवस्वमदिन्तमपवित्रंधारयाकवे । अर्कस्ययोनिमासदम् ६॥१५॥

तममृक्षन्त पडिध्मवाहो दार्ढच्युतः पवमानः सोमो गायत्री ।

२६ तममृक्षन्तवाजिनंमुपस्थेअदितेरधि । विप्रासोअण्व्याधिया १ तंगावोअभ्यनूषतसहस्रधारमक्षितम् । इन्दुंधर्तारमादिवः २ तंवेधांमेधयाद्यन्पवमानमधिष्यवि । धर्णसिंभूरिधायसम् ३ तमह्यन्भूरिजोधियासुवसानंविवस्वतः ।

पतिंवाचोअदाभ्यम् ४ तंसानावधिजामयोहरिंहिन्वन्त्यद्रिभिः। हर्यतंभूरिंचक्ष-
सम् ५ तंत्वाहिन्वन्तिवेधसःपवमानगिरावृधम्। इन्दविन्द्रायमत्सरम् ६॥१६॥

एष कविः षण्णृमेधः पवमानः सोमो गायत्री।

२७ एषकविरभिष्टुतःपवित्रेअधितोऽहते। पुनानोघ्नन्नपस्त्रिधः १ एषइन्द्राय
वायवेस्वर्जित्परिषिच्यते। पवित्रेदक्षसाधनः २ एषनृभिर्विनीयतेदिवोमूर्धावृ-
षासुतः। सोमोवनेषुविश्ववित् ३ एषगव्युरचिक्रदत्पवमानोहिरण्ययुः। इन्दुः
सत्राजिदस्तृतः ४ एषसूर्येणहासतेपवमानोअधिद्यवि। पवित्रेमत्सरोमदः ५
एषशुष्म्यसिष्यददन्तरिक्षेवृषाहरिः। पुनानइन्दुरिन्द्रमा ६॥१७॥

एष वाजी षट् भियमेधः पवमानः सोमो गायत्री।

२८ एषवाजीहितोनृभिर्विश्वविन्मनसस्पतिः। अव्योवारंविधावति १ एष ॥४७९॥

पवित्रेअक्षरत्सोमोदेवेभ्यःसुतः । विश्वाधामान्याविशन् २ एषदेवःशुंभायते-ऽधियोनावमर्त्यः । वृत्रहादेववीतमः ३ एषवृषाकनिक्रदद्दशभिर्जामिभिर्यतः । अभिद्रोणानिधावति ४ एषसूर्यमरोचयत्पवमानोविचर्षणिः । विश्वाधा-मानिविश्ववित् ५ एषशुष्म्यदाभ्यःसोमःपुनानोअर्षति । देवावीरघशंसहा ६ ॥ १८ ॥

प्रास्य पण्णूमेधः पवमानः सोमो गायत्री ।

२१ प्रास्यधारांअक्षरन्वृष्णःसुतस्यौजसा । देवाँअनुप्रभूषतः १ सप्तिंमृज-न्तिवेधसोगृणन्तःकारवोगिरा । ज्योतिर्जज्ञानमुक्थ्यम् २ सुपर्णःसोमतानितेपुनानायंप्रभूवसो । वर्धांसमुद्रमुक्थ्यम् ३ विश्वावसूनिसंजयन्पवस्वसोमधार-या । इनुद्वेषांसिसेध्यक् ४ रक्षासुनोअरंरुपःस्वनात्समस्यकस्यचित् । निदो

यन्नमुमुग्महे ५ एन्दोपार्थिवरयिंदिव्यंपवस्वधारया । द्युमन्तंशुष्मुमा
भंर ६ ॥ १९ ॥

म धारा पङ्क्तिन्दुः पवमानः सोमो गायत्री ।

३० प्रधारांअस्यशुष्मिणोवृथांपवित्रेअक्षरन् । पुनानोवाचंमिष्यति १
इन्दुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत् । इयर्तिवग्नुमिन्द्रियम् २ आनःशु-
ष्मंनृषाह्यंवीरवन्तंपुरुस्पृहम् । पवस्वसोमधारया ३ प्रसोमोअतिधारयापवमा-
नोअसिष्यदत् । अभिद्रोणान्यासदम् ४ अप्सुत्वामधुमत्तमंहरिंहिन्वन्त्यद्रि-
भिः । इन्दविन्द्रायपीतये ५ सुनोतामधुमत्तमंसोममिन्द्रायवज्रिणे । चारुं
शर्धायमत्सरम् ६ ॥ २० ॥

म सोमासः पञ्चोतमः पवमानः सोमो गायत्री ।

३१ प्रसोमासःस्वाध्य१ःपवमानासोअक्रमुः । रयिंकृण्वन्तिचेतनम् १ दिवस्पृथिव्याअधिभवेन्दोद्युम्नवर्धनः । भवावाजानांपतिः २ तुभ्यंवातांअभिप्रियस्तुभ्यमर्षन्तिसिन्धवः । सोमवर्धन्तितेमहः ३ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् । भवावाजस्यसंगथे ४ तुभ्यंगावोघृतंपयोवभ्रोदुदुह्रेअक्षितम् । वर्पिष्ठेअधिसानवि ५ स्वायुधस्यतेसतोभुवनस्यपतेवयम् । इन्दोसाख्यत्वमुश्मसि ६ ॥ २१ ॥

म सोमासः पद् श्यावाश्वः पवमानः सोमो गायत्री ।

३२ प्रसोमासोमदच्युतःश्रवसेनोमघोनः । सुताविदथेअक्रमुः १ आदींत्रितस्ययोपणोहरिंहिन्वन्त्यद्रिभिः । इन्दुमिन्द्रायपीतये २ आदींहंसोयथागणंवि-

यन्नमुमुग्महे ५ एन्दोपार्थिवरायेदिव्यंपवस्वधारया । द्युमन्तंशुष्मुमा
भंर ६ ॥ १९ ॥

प्र धारा पञ्चेन्दुः पवमानः सोमो गायत्री ।

३० प्रधारांअस्यशुष्मिणोवृथापवित्रेअक्षरन् । पुनानोवाचमिष्यति १
इन्दुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत् । इयर्तिवग्नुमिन्द्रियम् २ आनःशु-
ष्मैनृषाह्यंवीरवन्तंपुरुस्पृहम् । पवस्वसोमधारया ३ प्रसोमोअतिधारयापवमा-
नोअसिष्यदत् । अभिद्रोणान्यासदम् ४ अप्सुत्वामधुमत्तमंहरिंहिन्वन्त्यद्रि-
भिः । इन्दविन्द्रायपीतये ५ सुनोतामधुमत्तमंसोममिन्द्रायवज्रिणे । चारुं
शर्धायमत्सरम् ६ ॥ २० ॥

म सोमासः पङ्क्तिः पवमानः सोमो गायत्री ।

२१ प्रसोमासःस्वाध्यः१ःपवमानासोअक्रमुः । रयिंकृण्वन्तिचेतनम् १ दिवस्पृथिव्याअधिभवेन्दोद्युम्नवर्धनः । भवावाजानांपतिः २ तुभ्यंवातांअभिप्रियस्तुभ्यमर्षन्तिसिन्धवः । सोमवर्धन्तितेमहः ३ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् । भवावाजस्यसंगथे ४ तुभ्यंगावोघृतंपयोवभ्रोदुदुह्रेअक्षितम् । वर्पिष्ठेअधिसानवि ५ स्वायुधस्यतेसतोभुवनस्यपतेवयम् । इन्दोसाख्यत्वमुश्मसि ६ ॥ २१ ॥

म सोमासः पद् श्यावाश्वः पवमानः सोमो गायत्री ।

२२ प्रसोमासोमदुच्युतःश्रवसेनोमघोनः । सुताविदथेअक्रमुः १ आदींत्रिस्यर्योपणोहरींहिन्वन्त्यद्रिभिः । इन्दुमिन्द्रायपीतये २ आदींहंसोयथागणंवि-

श्वंस्यावीवशन्मतिम् । अत्योनगोभिरज्यते ३ उभेसोमावचाकशन्मृगोनतक्तो अर्षसि । सीदन्नृतस्ययोनिमा ४ अभिगावोअनूषतयोषाजारमिवप्रियम् । अगंन्नाजिंयथाहितम् ५ अस्मेधेहियुमद्यशोमघवंद्यश्वमद्यंच । सनिंमेधामुत श्रवः ६ ॥ २२ ॥

म सोमासः पङ्क्तिः पवमानः सोमो गायत्री ।

३३ प्रसोमांसोविपश्चितोऽपांनयंन्त्यूर्मयः । वनांनिमह्निपाइव १ अभिद्रोणांनिवभ्रवः शुक्राऋतस्यधारया । वाजंगोमंन्तमक्षरन् २ सुताइन्द्रायवायवे वरुणायमरुद्भ्यः । सोमाअर्षन्तिविष्णवे ३ तिस्रोवाचउदीरतेगावोमिमन्ति धेनवः । हरिरेतिकनिक्रदत् ४ अभिब्रह्मीरनूषतयुह्वीर्ऋतस्यमातरः । मर्मृज्य- ॥४८१॥

न्तेदिवःशिशुम् ५ रायःसमुद्रांश्चतुरोऽस्मभ्यंसोमविश्वतः । आपवस्वस-
हस्त्रिणः ६ ॥ २३ ॥

प्र सुवानः पट् त्रितः पवमानः सोमो गायत्री ।

३४ प्रसुवानोधारयातनेन्दुर्हिन्वानोअर्षति । रुजद्बृहच्छाव्योजसा १ सुतइ-
न्द्रायवायवेवरुणायमरुद्भ्यः । सोमोअर्षतिविष्णवे २ वृषाणंवृषभिर्युतंसुन्वन्ति
सोममद्रिभिः । दुहन्तिशक्मनापयः ३ भुवच्चितस्यमज्मोभुवदिन्द्रायमत्सरः ।
संरूपैरज्यतेहरिः ४ अभीमृतस्यविष्टपंदुहतेधेनुमातरः । चारुप्रियतमंहविः ५
समेनमहुताइमागिरोअर्षन्तिसस्रुतः । धेनूर्वाश्रोअवीवशत् ६ ॥ २४ ॥

आ नः पवस्व षट् प्रभूवसुः पवमानः सोमो गायत्री ।

३५ आनःपवस्वधारयापवमानरयिंपृथुम् । ययाज्योतिर्विदासिनः १ इ-

न्दोसमुद्रमीङ्खयपवस्वविश्वमेजय । रायोधर्तानओजसा २ त्वयावीरेणवीरवो-
ऽभिष्यामपृतन्यतः । क्षराणोअभिवार्यम् ३ प्रवाजमिन्दुरिष्यतिसिषासन्वा-
जसाऋषिः । व्रतावित्दानआयुधा ४ तंगीभिर्वाचमीङ्खयंपुनानंवासयामसि ।
सोमंजनस्यगोपतिम् ५ विश्वोयस्यव्रतेजनोदाधारधर्मणस्पतेः । पुनानस्यप्र-
भूवसोः ६ ॥ २५ ॥

असर्जि षट् प्रभूवसुः पवमानः सोमो गायत्री ।

२६ असर्जिरथ्योयथापवित्रेचम्वोःसुतः । काष्मन्वाजीन्यंक्रमीत् १ सव-
र्हिःसोमजागृविःपवस्वदेववीरति । अभिकोशंमधुश्चुतम् २ सनोज्योतीपिपू-
र्व्यपवमानविरोचय । ऋत्वेदक्षायनोहिनु ३ शुम्भमानऋतायुभिर्मृज्यमानोग-
भस्त्योः । पवतेवारेअव्ययै ४ सविश्वादाशुषेवसुसोमोदिव्यानिपार्थिवा । प-

वंतामान्तरिक्ष्या ५ आदिवस्पृष्ठमंश्वयुर्गव्युःसोमरोहसि । वीरयुःशंवसस्पते ६ ॥ २६ ॥

स सुतः पड्गृहगणः पवमानः सोमो गायत्री ।

३७ ससुतःपीतयेवृषासोमःपवित्रेअर्षति । विघ्नन्रक्षाँसिदेवयुः १ सपवित्रे विचक्षणोहरिरर्षतिधर्णसिः । अभियोनिंकनिक्रदत् २ सवाजीरोचनादिवः पवमानोविधावति । रक्षोहावारमव्ययम् ३ सत्रितस्याधिसानवि पवमानोअरोचयत् । जामिभिःसूर्यंसह ४ सवृत्रहावृषासुतोवरिवोविददाभ्यः । सोमो वाजमिवासरत् ५ सदेवःकविनेषितोऽभिद्रोणानिधावति । इन्दुरिन्द्राय मंहना ६ ॥ २७ ॥

म ये गावः पण्मेध्यातिथिः पवमानः सोमो गायत्री ।

४१ म्रयेगावोनभूर्णयस्त्वेषाअयासोअक्रमुः । घ्रन्तःकृष्णामपत्वचम् १ सुवितस्यमनामहेऽतिसेतुंदुरास्यम् । साह्वांसोदस्युमव्रतम् २ शृण्वेवृष्टेरिवस्वनःपवमानस्यशुष्मिणः । चरन्तिविद्युतोदिवि ३ आपवस्वमहीमिषंगोमदिन्दोहिरण्यवत् । अश्वावद्याजवत्सुतः ४ सपवस्वविचर्षणआमहीरोदसीपृण । उषासूर्योनरश्मिभिः ५ परिणःशर्मयन्त्याधारयासोमविश्वतः । सरारसेवविष्टपम् ६ ॥ ३१ ॥

जनयन्पण्मेध्यातिथिः पवमानः सोमो गायत्री ।

४२ जनयन्नोचनादिवोजनयन्नप्सुसूर्यम् । वसानोगाअपोहरिः १ एषप्रत्ने- ॥४८४॥

नमन्मनादेवोदेवेभ्यस्परि । धारयापवतेसुतः २ वावृधानायतूर्वयेपवन्तेवाज-
सातये । सोमाःसहस्रपाजसः ३ दुहानःप्रत्नमित्पयःपवित्रेपरिषिच्यते । क्र-
न्दन्देवाँअजीजनत् ४ अभिविश्वानिवार्याभिदेवाँऋतावृधः । सोमःपुनानो
अर्षति ५ गोमन्नःसोमवीरवदश्वावद्राजवत्सुतः । पवस्वबृहतीरिषः ६॥३२॥

यो अत्यः पञ्चमेध्यातिथिः पवमानः सोमो गायत्री ।

४३ योअत्यइवमृज्यतेगोभिर्मदायहर्यतः । तंगीर्भिर्वासयामसि १ तंनो-
विश्वाअवस्युवोगिरःशुम्भन्तिपूर्वथा । इन्दुमिन्द्रायपीतये २ पुनानोयातिहर्य-
तःसोमोगीर्भिःपरिष्कृतः । विप्रस्यमेध्यातिथेः ३ पवमानविदारयिमस्म-
भ्यंसोमसुश्रियम् । इन्दोसहस्रवर्चसम् ४ इन्दुरत्योनवाजसृत्कर्निक्रन्तिप

वित्रआ । यदक्षारतिंदेवयुः ५ पवंस्ववाजंसातयेविप्रंस्यगृणतोवृधे । सोमरास्वं सुवीर्यम् ६ ॥ ३३ ॥ इति शाकलर्क्संहितायां षष्ठाष्टकेष्टमोध्यायः ॥ ८ ॥

॥ इति षष्ठाष्टकः समाप्तः ॥ ६ ॥

मणोपास्यःसपवस्वाष्टग्रन्नपासोमःपञ्चकविर्भार्गवस्तंत्वापवस्वोत्तेशुष्मासउच्चध्वोध्वयोंपरिष्टुक्षउ-त्तेचतुष्कमवत्सारोस्यमत्नांयवंपवंपरिसोःप्रतेधारास्तरत्सपवस्वमगायन्नेणोपान्त्यापुरउष्णिगयावी-तीत्रिंशदमहीयुरेतेअष्टग्रंजमदग्निरापवस्वनिधुविःकाश्यपोवृषासोमकश्यपः ।

म णः पञ्चास्यः पवमानः सोमो गायत्री ।

४१ ॐम् प्रणइन्दोमहेतनऊर्मिंनविध्रंदर्पसि । अभिदेवाँअयास्यः १ मतीजुष्टोधियाहितःसोमोहिन्वेपरावति । विप्रस्यधारयाकविः २ अयंदेवेषुजागृविःसुतएतिपवित्रआ । सोमोयातिविचर्षणिः ३ सनःपवस्ववाजयुश्वंक्राणश्चारुमध्वरम् । वर्हिष्मॉआविवासति ४ सनोभगायवायवेविप्रवीरःसदावृधः । सोमोदेवेष्वायमत् ५ सनोअद्यवसुत्तयेकतुविद्गातुवित्तमः । वाजंजेषिश्रवोवृहत् ६ ॥ १ ॥

स पवस्व षडयास्यः पवमानः सोमो गायत्री ।

४५ सपंवस्वमदांयकंनुचक्षांदेववींतये । इन्दविन्द्रांयपीतयें १ सनोंअर्वा-
भिदूत्यें१त्वामिन्द्रांयतोशसे । देवान्त्सखिंभ्यआवरंम् २ उतत्वामरुणंवयंगो-
भिरैंऊमोमदांयुकम् । विनोरायेदुरोंवृधि ३ अत्यूंपवित्रंमक्रमीद्वाजीधुरंनया-
मंनि । इन्दुर्देवेषुपत्यते ४ समीसखांयोअस्वरन्वनेक्रीळंन्तमत्यंविम् । इन्दुंना-
वाअनूषत ५ तयांपवस्वधारंयाययांपीतोविचक्षंसे । इन्द्रोंस्तोत्रेसुवी-
र्यम् ॥ ६ ॥ २ ॥

असृग्रन्पडयास्यः पवमानः सोमो गायत्री ।

४६ असृंग्रन्देववींतयेऽत्यांसुःकृत्व्याइव । क्षरंन्तःपर्वतावृधः १ परिंष्कृता-
सइन्दवोयोपेवपित्र्यावती । वायुंसोमांअसृक्षत २ एतेसोमांसइन्दवःप्रयंस्वन्त-

श्वमूसुताः । इन्द्रेवर्धन्तिकर्मभिः ३ आधावतासुहस्त्यःशुक्रागृभ्णीतमन्थिना । गोभिःश्रीणीतमत्सरम् ४ सपवस्वधनंजयप्रयन्तारार्धसोमहः । अस्मभ्यं सोमगातुवित् ५ एतंमृजन्तिमर्ज्यंपवमानंदशक्षिपः । इन्द्रायमत्सरं मदम् ६ ॥ ३ ॥

अया सोमः पञ्च कविर्भार्गवः पवमानः सोमो गायत्री ।

४७ अयासोमःसुकृत्ययामहश्चिदभ्यवर्धत । मन्दानउद्वयायते १ कृतानीदस्यकर्त्वाचेतन्तेदस्युतर्हणा । ऋणाचधृष्णुश्चयते २ आत्सोमइन्द्रियोरसोवज्रः सहस्रसाभुवत् । उक्थंयदस्यजायते ३ स्वर्यंकविर्विधर्तरिविप्रायरत्नमिच्छति । यदीमर्मृज्यतेधियः ४ सिषासन्तूरयीणांवाजेष्ववैतामिव । भरेषुजिग्युषांमसि ५ ॥ ४ ॥

तं त्वा पञ्च कविर्भार्गवः पवमानः सोमो गायत्री ।

४८ तंत्वानृम्णानिबिभ्रतंसधस्थेषुमहोदिवः । चारुंसुकृत्ययेमहे १ संवृक्तधृष्णुमुक्थ्यंमहामहिव्रतंमदम् । शतंपुरोरुरुक्षणिम् २ अतस्त्वारायिमभिरा-जानंसुक्रतोदिवः । सुपर्णोअव्यथिर्भरत् ३ विश्वस्माइत्स्वर्दृशेसाधारणंरजस्तुरम् । गोपामृतस्यविर्भरत् ४ अधाहिन्वानइन्द्रियंज्यायोमहित्वमानशे । अभिष्टिकृद्विचर्षणिः ५ ॥ ५ ॥

पवस्व पञ्च कविर्भार्गवः पवमानः सोमो गायत्री ।

४९ पवस्ववृष्टिमासुनोऽपामूर्मिंदिवस्परि । अयक्ष्मावृहतीरिषः १ तयापवस्वधारयाययागावंइहागमन् । जन्यासउपनोगृहम् २ घृतंपवस्वधारयायज्ञेषुदेववीतमः । अस्मभ्यंवृष्टिमापव ३ सनंऊर्जंव्यं१व्ययंपवित्रेधावधारया । ॥४८७॥

देवासः शृणवन्हिकम् ४ पवमानोअसिष्यदद्रक्षांस्यपजङ्घनत् । प्रत्नवद्रोचयन्रुचः ५ ॥ ६ ॥

उत्ते शुष्मासः पञ्चोचध्यः पवमानः सोमो गायत्री ।

५० उत्तेशुष्मासईरतेसिन्धोरूर्मेरिवस्वनः । वाणस्यचोदयापविम् १ प्रस्वेतउदीरतेतिस्रोवाचोमखस्युवः । यदव्यएषिसानवि २ अव्योवारेपरिप्रियंहरिं हिन्वन्त्यद्रिभिः । पवमानंमधुश्चुतम् ३ आपवस्वमदिंतमपवित्रंधारयाकवे । अर्कस्ययोनिंमासदम् ४ सपवस्वमदिंतमगोभिरञ्जानोअक्तुभिः । इन्दविन्द्रायपीतये ५ ॥ ७ ॥

अध्वर्यो पञ्चोचध्यः पवमानः सोमो गायत्री ।

५१ अध्वर्योअद्रिभिःसुतंसोमंपवित्रआसृज । पुनीहीन्द्रायपातवे १ दिवः

पीयूषमुत्तमंसोमामिन्द्रायवज्रिणे । सुनोतामधुमत्तमम् २ तवत्यइन्दोअन्धसो
देवामधोर्व्यश्नते।पवमानस्यमरुतः ३ त्वंहिसोमवर्धयन्त्सुतोमदायभूर्णये । वृष-
न्त्स्तोतारमूतये४अभ्यर्षविचक्षणपवित्रंधारयासुतः। अभिवाजंमुतश्रवः ५॥८॥

परि द्युक्षः पञ्चोचथ्यः पवमानः सोमो गायत्री ।

५२ परिद्युक्षःसनद्रयिर्भरद्वाजैनोअन्धसा । सुवानोअर्षपवित्रआ १ तवप्र-
तेभिरध्वभिरव्योवारेपरिप्रियः।सहस्रधारोयात्तनां २ चरुर्नयस्तमीङ्खयेन्दोनदा-
नमीङ्खय। वधैर्वधस्नवीङ्खय ३ निशुष्मंमिन्दवेपांपुरुहूतजनानाम् । योअस्माँआ-
दिदेशति ४ शतंनइन्दऊतिभिःसहस्रंवाशुचीनाम्। पवस्वमंहयद्रयिः ५ ॥ ९ ॥

उचे चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५३ उच्चेशुष्मांसोअस्थुरक्षोभिन्दन्तोअद्रिवः । नुदस्वयाःपरिस्पृधः १ अया-

निंजघ्निरोजसारथसङ्क्रेधनेंहिते । स्तवाअविंभ्युपाहृदा २ अस्यंव्रतानिनाधृषे पवंमानस्यदूढ्या । रुजयस्त्वांपृतन्यतिं ३ तंहिन्वन्तिमदच्युतंहरिंनदीपुंवाजिनंम् । इन्दुमिन्द्रायमत्सरम् ४ ॥ १० ॥

अस्य प्रत्नां चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५४ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्र्यः । पयःसहस्रसामृषिंम् १ अयंसूयँइवोपदृगयंसरांसिधावति । सप्तप्रवतआदिवंम् २ अयंविश्वानितिष्ठतिपुनानोभुवनोपरिं । सोमोंदेवोनसूयँः ३ परिंणोदेववीतयेवाजाँअर्षसिगोमंतः । पुनान इंन्दविन्द्रयुः ४ ॥ ११ ॥

यवं यवं चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५५ यवंयवंनोअन्धसापुष्टंपुष्टंपरिस्रव । सोमविश्वांचसौभगा १ इन्दोयथा

तवस्तवोयथातेजातमन्धसः । निबर्हिषिप्रियेसदः २ उतनोगोविदश्ववित्पवस्व सोमान्धसा । मक्षूतमेभिरहभिः ३ योजिनातिनजीयतेहन्तिशत्रुमभीत्य । सपवस्वसहस्रजित् ४ ॥ १२ ॥

परि सोमश्चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५६ परिसोमऋतंबृहदाशुःपवित्रेअर्षति । विघ्नन्रक्षांसिदेवयुः १ यत्सोमो वाजमर्षतिशतंधारांअपस्युवः । इन्द्रस्यसख्यमाविशन् २ अभित्वायोषणोदशंजारंनकन्यानूषत । मृज्यसेसोमसातये ३ त्वमिन्द्रायविष्णवेस्वादुरिन्दोपरि स्रव । नृन्त्स्तोतॄन्पाह्यंहसः ४ ॥ १३ ॥

म ते धाराश्चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५७ मतेधारांअसश्चतोदिवोनयन्तिवृष्टयः । अच्छावाजंसहस्रिणम् १ अभि-

प्रियाणिकाव्याविश्वाचक्षाणोअर्षति। हरिंस्तुञ्जानआयुधा २ समर्मृजानआयु-भिरिभोराजेवसुव्रतः । इयेनोनवंसुपीदति ३ सनोविश्वांदिवोवसूतोपृथिव्या अधि । पुनानइन्दवाभर ४ ॥ १४ ॥

तरत्स चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५८ तरत्समन्दीधावतिधारासुतस्यान्धसः । तरत्समन्दीधावति १ उस्रावे-दवसूनांमतैस्यदेव्यवसः । तरत्समन्दीधावति २ ध्वस्त्रयोःपुरुषन्त्योरासहस्राणि दक्षहे । तरत्समन्दीधावति ३ आययोस्त्रिंशतंतनासहस्राणिचदक्षहे । तरत्स मन्दीधावति ४ ॥ १५ ॥

पवस्व चतुष्कमवत्सारः पवमानः सोमो गायत्री ।

५९ पवस्वगोजिदश्वजिद्धनंजित्सोमरण्यजित् । प्रजावद्रत्नमाभर १

पवस्वाद्योऽअदाभ्यःपवस्वौषधीभ्यः । पवस्वधिषणाभ्यः २ त्वंसोमपवमानो विश्वानिदुरितातर । कविःसीदनिबर्हिषि ३ पवमानस्वविदोजायमानोऽभवो महान् । इन्दोविश्वाँअभीदसि ४ ॥ १६ ॥

प्रगायत्रेण चतुष्कमवत्सारः पवमानः सोमो गायत्री । उपान्त्या पुरउष्णिक् ।

६० प्रगायत्रेणगायतपवमानंविचर्षणिम् । इन्दुंसहस्रचक्षसम् १ तंत्वांसहस्रचक्षसमर्षीसहस्रभर्णसम् । अतिवारंमपाविषुः २ अतिवारान्पवमानोअसिष्यदत्कलशाँअभिधावति । इन्द्रस्यहार्द्यांविशन् ३ इन्द्रस्यसोमराधसेशंपवस्वविचर्षणे । प्रजावद्रेतआभर ४ ॥ १७ ॥ इति शाकलर्कसंहितायां नवमे मण्डले द्वितीयोनुवाकः ॥ २ ॥

अया वीती त्रिंशदर्हीयुः पवमानः सोमो गायत्री ।

६१ अयावीतीपरिस्रवयस्तइन्दोमदेष्वा । अवाहन्नवतीर्नव १ पुरःसद्यइत्थाधियेदिवोदासायशम्बरम् । अधत्यंतुर्वशंयदुम् २ परिणोअश्वंमश्वविद्गोमदिन्दोहिरण्यवत् । क्षरासहस्रिणीरिषः ३ पवमानस्यतेवयंपवित्रमभ्युन्दतः । सखित्वमावृणीमहे ४ येतेपवित्रमूर्मयोऽभिक्षरन्तिधारया । तेभिर्नःसोममृळय ५ ॥ १८ ॥ सनःपुनानआभरररयिंवीरवतीमिषम् । ईशानःसोमविश्वतः ६ एतमुत्यंदशक्षिपोमृजन्तिसिन्धुमातरम् । समादित्येभिरख्यत ७ समिन्द्रेणोत वायुनासुतएतिपवित्रआ । संसूर्यस्यरश्मिभिः ८ सनोभगायवायवेपूष्णेपवस्वमधुमान् । चारुर्मित्रेवरुणेच ९ उच्चातेजातमन्धसोदिविषद्भम्यार्ददे । उग्रं शर्ममहिश्रवः १० ॥ ११ ॥ एनाविश्वान्यर्यआद्युम्नानिमानुषाणाम् । सिषा-

सन्तोवनामहे ११ सनइन्द्रायय॰ज्यवेवरुणायमरुद्भ्यः । वरिवोवित्परिस्रव १२ अ.७अ.१
उपोपुजातमतुरंगोभिर्भङ्गंपरिष्कृतम् । इन्दुंदेवाअयासिषुः १३ तमिद्वर्धन्तुनो
गिरोवत्संसंशिश्वरीरिव । यइन्द्रस्यहृदंसनिः १४ अपाणःसोमशंगवेधुक्षस्व
पिप्युषीमिषम् । वधाँसमुद्रमुक्थ्यम् १५ ॥ २० ॥ पवमानोअजीजनद्दिव-
श्चित्रंनतन्यतुम् । ज्योतिर्वैश्वानरंबृहत् १६ पवमानस्यतेरसोमदोराजन्नदुच्छु-
नः । विवारमव्यमर्षति १७ पवमानरसस्तवदक्षोविराजतिद्युमान् । ज्योति-
र्विश्वंस्वर्दृशे १८ यस्तेमदोवरेण्यस्तेनापवस्वान्धसा । देवावीरघशंसहा १९
जन्निवृत्रमभित्रियंसस्निर्वाजंदिवेदिवे । गोषाउंअश्वसाअसि २० ॥ २१ ॥ सं-
मिश्लोअरुषोभवसूपस्थाभिर्नधेनुभिः । सीदंच्छ्येनोनयोनिमा २१ सपवस्व
यआविथेन्द्रंवृत्रायहन्तवे । वन्वन्वांसंमहीरपः २२ सुवीरासोवयंधनाजयेम ॥४९१॥

सोममीङ्खः । पुनानोवर्धनोगिरः २३ त्वोतासस्तवावसास्यामवन्वन्तआमुरः । सोमंव्रतेपुंजागृहि २४ अपघ्नन्पवतेमृधोऽपसोमोअराव्णः । गच्छन्निन्द्रस्यनिष्कृतम् २५ ॥ २२ ॥ महोनोरायआभरपवमानजहीमृधः । रास्वेन्दोवीरवद्यशः २६ नत्वाशतंचनहुतोराधोदित्सन्तमामिनन् । यत्पुनानोमखस्यसे २७ पवस्वेन्दोवृषासुतःकृधीनोयुशसोजने । विश्वाअपद्विषोजहि २८ अस्यंतेसख्ये वयंतवेन्दोयुम्नउत्तमे । सासह्यामंपृतन्यतः २९ यातेभीमान्यायुधातिग्मानि सन्तिधूर्वणे । रक्षासमस्यनोनिदः ३० ॥ २३ ॥

एते अष्टप्रं त्रिशज्जमदग्निः पवमानः सोमो गायत्री ।

६२ एतेअसृग्रमिन्दवस्तिरःपवित्रमाशवः । विघ्नन्तोदुरितापुरुसुगातोकायवाजिनः । तनाकृण्वन्तोअवते २ कृण्वन्तोवरिवोग-

वेऽभ्यर्षन्तिसुष्टुतिम् । इळामस्मभ्यंसंयतम् ३ असाव्यंशुर्मदायाप्सुदक्षोगिरिष्ठाः । श्येनोनयोनिमासदत् ४ शुभ्रमन्धोदेववातमप्लुधूतोनृभिःसुतः । स्वदन्तिगावःपयोभिः ५ ॥ २४ ॥ आदीमश्वंनहेतारोऽशूंशुभन्नमृताय । मध्वोरसंसधमादे ६ यास्तेधारांमधुश्चुतोऽसृग्रमिन्दऊतये । ताभिःपवित्रमासदः ७ सोअर्षेन्द्रायपीतयेतिरोरोमाण्यव्यया । सीदन्योनावनेष्वा ८ त्वामिन्दोपरिस्रवस्वादिष्टोअङ्गिरोभ्यः । वरिवोविद्धृतंपयः ९ अयंविचर्षणिर्हितःपवमानःसचेतति । हिन्वानआप्यंबृहत् १० ॥ २५ ॥ एषवृषावृषव्रतःपवमानोअशस्तिहा । करद्वसूनिदाशुषे ११ आपवस्वसहस्रिणंरयिंगोमन्तमश्विनम् । पुरुश्चन्द्रंपुरुस्पृहम् १२ एषस्यपरिषिच्यतेमर्मृज्यमानआयुभिः । उरुगायःकविक्रतुः १३ सहस्रौतिःशतामघोविमानोरजसःकविः । इन्द्रायपवतेमदः १४ गिराजात

इहस्तुतइन्दुरिन्द्रायधीयते । विर्योनावसुतावेव १५ ॥ २६ ॥ पवमानःसुतो नृभिःसोमोवाजमिवासरत् । चमूषुशकमनासदम् १६ तंत्रिपृष्ठेत्रिवन्धुरेरथेयुञ्जन्तियातवे । ऋषीणांसप्तधीतिभिः १७ तंसोतारोधनस्पृतंमाशुंवाजायुयातवे । हरिंहिनोतवाजिनम् १८ आविशन्कलशंसुतोविश्वाअर्षन्नभिश्रियः । शूरोनगोपुतिष्ठति १९ आतइन्दोमदायकंपयोदुहन्त्यायवः । देवादेवेभ्योमधु २० ॥ २७ ॥ आनःसोमंपवित्रआसृजतामधुमत्तमम् । देवेभ्योदेवश्चुत्तमम् २१ एतेसोमाअसृक्षतगृणानाःश्रवसेमहे । मदिंतमस्यधारया २२ अभिगव्यानिवीतयेनृम्णापुनानोअर्षसि । सनद्वाजःपरिस्रव २३ उतनोगोमतीरिषोविश्वा अर्षपरिष्टुभः । गृणानोजमदग्निना २४ पवस्ववाचोअग्रियःसोमचित्राभिरूतिभिः । अभिविश्वानिकाव्या २५ ॥ २८ ॥ त्वंसमुद्रियाअपोऽग्रियोवाचईङ्-

रयन् । पवस्वविश्वमेजय २६ तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे । तुभ्यं-
मर्षन्तिसिन्धवः २७ प्रतेदिवोनवृष्टयोधारायन्त्यसश्चतः । अभिशुक्रामुपस्ति-
रम् २८ इन्द्रायेन्दुंपुनीतनोग्रंदक्षायसाधनम् । ईशानंवीतिरांधसम् २९ पव-
मानऋतःकविःसोमःपवित्रमासदत् । दधत्स्तोत्रेसुवीर्यम् ३० ॥ २९ ॥

आ पवस्व त्रिंशन्निभुविः काश्यपः पवमानः सोमो गायत्री ।

६३ आपवस्वसहस्रिणंरयिंसोमसुवीर्यम् । अस्मेश्रवांसिधारय १ इषमूर्जं
चपिन्वसइन्द्रायमत्सरिंतमः । चमूष्वानिषींदसि २ सुतइन्द्रायविष्णवेसोमः
कलशेअक्षरत् । मधुमाँअस्तुवायवे ३ एतेअंसृग्रमाशवोऽतिह्वरांसिबभ्रवः ।
सोमाऋतस्यधारया ४ इन्द्रंवर्धन्तोअसुरंःकृण्वन्तोविश्वमार्यम् । अपघ्नन्तोअ-
राव्णः ५ ॥ ३० ॥ सुताअनुस्वमारजोऽभ्यर्षन्तिबभ्रवः । इन्द्रंगच्छन्तइन्दवः ६

अयापवस्वधारयायासूर्यमरोचयः । हिन्वानोमानुषीरपः ७ अयुक्तसूरएतशं पवमानोमनावधि । अन्तरिक्षेणयातवे ८ उतत्याहरितोदशसूरोअयुक्तयातवे । इन्दुरिन्द्रइतिब्रुवन् ९ परीतोवायवेसुतंगिरइन्द्रायमत्सरम् । अव्योवारेषुसिञ्चत १० ॥ ३१ ॥ पवमानविदारयिमस्मभ्यंसोमदुष्टरम् । योदूणाशोवनुष्यता ११ अभ्यर्षसहस्रिणंरयिंगोमन्तमश्विनम् । अभिवाजमुतश्रवः १२ सोमोदेवोन सूर्योऽद्रिभिःपवतेसुतः । दधानःकलशेरसम् १३ एतेधामान्यार्याशुकाक्रतस्य धारया । वाजंगोमन्तमक्षरन् १४ सुताइन्द्रायवज्रिणेसोमासोदध्याशिरः । पवित्रमत्यक्षरन् १५ ॥ ३२ ॥ प्रसोममधुमत्तमोरायेअर्षपवित्रआ । मदोयो देववीतमः १६ तमींमृजन्त्यायवोहरिंनदीषुवाजिनम् । इन्दुमिन्द्रायमत्सरम् १७ आपवस्वहिरण्यवदश्वावत्सोमवीरवत् । वाजंगोमन्तमाभर १८ परिवाजे

रयन् । पवस्वविश्वमेजय २६ तुभ्येमाभुवनाकवेमह्निन्नेसोमतस्थिरे । तुभ्यं-
मर्पन्तिसिन्धवः २७ प्रतेदिवोनवृष्टयोधारायन्त्यसश्चतः । अभिशुक्रामुपस्ति-
रम् २८ इन्द्रायेन्दुंपुनीतनोग्रंदक्षायसाधनम् । ईशानंवीतिराधसम् २९ पव-
मानऋतःकविःसोमःपवित्रमासदत् । दधत्स्तोत्रेसुवीर्यम् ३० ॥ २९ ॥

आ पवस्व त्रिंशन्मन्त्रस्य कविः काश्यपः पवमानः सोमो गायत्री ।

६३ आपवस्वसहस्रिणंरयिंसोमसुवीर्यम् । अस्मेश्रवांसिधारय १ इषमूर्जं
चपिन्वसइन्द्रायमत्सरिंतमः । चमूष्वानिषीदसि २ सुतइन्द्रायविष्णवेसोमः
कलशेअक्षरत् । मधुमाँअस्तुवायवे ३ एतेअंसृग्रमाशवोऽतिह्वरांसिबभ्रवः ।
सोमाऋतस्यधारया ४ इन्द्रंवर्धन्तोअसुरंःकृण्वन्तोविश्वमार्यम् । अपघ्नन्तोअ-
राव्णः ५ ॥ ३० ॥ सुताअनुस्वमारजोऽभ्यर्षन्तिबभ्रवः । इन्द्रंगच्छन्तइन्दवः ६

अयापवस्वधारयायायासूर्यमरोचयः । हिन्वानोमानुषीरपः ७ अयुक्तसूरएतशं पवमानोमनावधि । अन्तरिक्षेणयातवे ८ उतत्याहरितोदशसूरोअयुक्तयातवे । इन्दुरिन्द्रइतिब्रुवन् ९ परीतोवायवेसुतंगिरइन्द्रायमत्सरम् । अव्योवारेषुसिञ्चत १० ॥ ३१ ॥ पवमानविदारयिमस्मभ्यंसोमदुष्टरम् । योदूणाशोवनुष्यता ११ अभ्यर्षसहस्रिणंरयिंगोमन्तमश्विनम् । अभिवाजमुतश्रवः १२ सोमोदेवोन सूर्योऽद्रिभिःपवतेसुतः । दधानःकलशेरसम् १३ एतेधामान्यार्याशुक्राऋतस्य धारया । वाजंगोमन्तमक्षरन् १४ सुताइन्द्रायवज्रिणेसोमासोदध्याशिरः । पवित्रमत्यक्षरन् १५ ॥ ३२ ॥ प्रसोममधुमत्तमोरायेअर्षपवित्रआ । मदोयो देववीतमः १६ तमींमृजन्त्यायवोहरिंनदीषुवाजिनम् । इन्दुमिन्द्रायमत्सरम् १७ आपवस्वहिरण्यवदश्वावत्सोमवीरवत् । वाजंगोमन्तमाभर १८ परिवाजे

नवाजुयुमग्नोवारेपुसिञ्चत । इन्द्रायमधुमत्तमम् १९ कविंमृजन्तिमज्यैधीभि- अ.७अ.१
विप्राअवस्यवः । वृषाकनिक्रदर्षति २० ॥ ३३ ॥ वृषणंधीभिरपुरंसोमंमृतस्य
धारया । मतीविप्राःसमस्वरन् २१ पवस्वदेवायुपगिन्द्रंगच्छतुतेमदः । वायुमा
रोहधर्मणा २२ पवमानानितोशसेरयिंसोमश्रवाय्यम् । प्रियःसमुद्रमाविश२३
अपघ्नन्पवसेमृधःक्रतुवित्सोममत्सरः । नुदस्वादेवयुंजनम् २४ पवमानाअसृ-
क्षतसोमाःशुक्रासइन्दवः । अभिविश्वानिकाव्या २५ ॥ ३४ ॥ पवमानास
आशवःशुभ्राअसृग्रमिन्दवः । घ्नन्तोविश्वाअपद्विषः २६ पवमानादिवस्पर्यन्त-
रिक्षादसृक्षत । पृथिव्याअधिसानवि २७ पुनानःसोमधारयेन्दोविश्वाअपस्रिधः ।
जहिरक्षोसिसुक्रतो २८ अपघ्नन्सोमरक्षसोऽभ्यर्षकनिक्रदत् । द्युमन्तंशुष्ममु- ॥४९४॥

त्तमम् २१ अस्मेवसूनिधारयसोमदिव्यानिपार्थिवा । इन्दोविश्वानिवार्या ३० ॥ ३५ ॥

वृषा सोम ऋषिस्त्रिंशत्कश्यपः पवमानः सोमो गायत्री ।

६४ वृषासोमद्युमाँअसिवृषादेववृषव्रतः । वृषाधर्माणिदधिषे १ वृष्णस्ते वृष्ण्यंशवोवृषावनंवृषामदः । सत्यंवृषन्वृषेदसि २ अश्वोनक्रदोवृषासंगा इन्दोसमर्वतः । विनोरायेदुरोवृधि ३ असृक्षतप्रवाजिनोगव्यासोमासोअश्वया । शुक्रासोवीरयाशवः ४ शुम्भमानाऋतायुभिर्मृज्यमानागभस्त्योः । पवन्तेवारेअव्ययै ५ ॥ ३६ ॥ तेविश्वादाशुषेवसुसोमादिव्यानिपार्थिवा । पवन्तामान्तरिक्ष्या ६ पवमानस्यविश्ववित्प्रतेसर्गाअसृक्षत । सूर्यस्येवनरश्मयः ७ केतुंकृण्वन्दिवस्परिविश्वारूपाभ्यर्षसि । समुद्रःसोमपिन्वसे ८ हिन्वानोवाचमिष्यसिपवं-

मानुविधर्मणि । अर्कान्देवोनसूर्यः १ इन्दुःपविष्टचेतनःप्रियःकवीनांमती । सृज-
दश्वंरथीरिव १० ॥ ३७ ॥ ऊर्मिर्यस्तेपवित्रआदेवावीःपर्यक्षरत् । सीदन्नृतस्य
योनिमा ११ सनोअर्षपवित्रआमदोयोदेववीतमः । इन्दविन्द्रायपीतये १२
इषेपवस्वधारयामृज्यमानोमनीषिभिः । इन्दोरुचाभिगाइहि १३ पुनानोवरि-
वस्कृध्यूर्जंजनायगिर्वणः । हरेसृजानआशिरम् १४ पुनानोदेववीतयइन्द्रस्य
याहिनिष्कृतम् । धुतानोवाजिभिर्यतः १५ ॥ ३८ ॥ प्रहिन्वानासइन्दवोऽच्छा
समुद्रमाशवः । धियाजूताअसृक्षत १६ मर्मृजानासआयवोवृथासमुद्रमिन्दवः ।
अग्मन्नृतस्ययोनिमा १७ परिणोयाह्यस्मयुर्विश्वावसून्योजसा । पाहिनःशर्मवी-
रवत् १८ मिमातिवह्निरेतशःपदंयुजानऋक्वभिः । प्रयत्समुद्रआहितः १९
आयद्योनिंहिरण्ययंमाशुर्ऋतस्यसीदति । जहात्यप्रचेतसः २० ॥ ३९ ॥

अभिवेनाअनूषतेयक्षन्तिप्रचेतसः । मज्जन्त्यविचेतसः २१ इन्द्रायेन्दोमरुत्वं-
तेपवस्वमधुमत्तमः । ऋतस्ययोनिमासदम् २२ तंत्वाविप्रावचोविदःपरिष्कृ-
ण्वन्तिवेधसः । संत्वामृजन्त्यायवः २३ रसंतेमित्रोअर्यमापिबन्तिवरुणःकवे ।
पवमानस्यमरुतः २४ त्वंसोमविपश्चितंपुनानोवाचमिष्यसि ॥ इन्दोसहस्रभ-
र्णसम् २५ ॥ ४० ॥ उतोसहस्रभर्णसंवाचंसोममखस्युवम् । पुनानइन्दवाभ-
र २६ पुनानइन्दवेपांपुरुहूतजनानाम् । प्रियःसमुद्रमाविश २७ दविद्युतत्या
रुचापरिष्टोभन्त्याकृपा । सोमाःशुक्रागवाशिरः २८ हिन्वानोहेतृभिर्युतआ
वाजंवाज्यक्रमीत् । सीदन्तोवनुषोयथा २९ ऋधक्सोमस्वस्तयेसंजग्मानोदि-
वःकविः । पवस्वसूयोहृशे ३० ॥ ४१ ॥ इति शाकलर्क्संहितायां सप्तमाष्टके
प्रथमोध्यायः ॥ १ ॥

हिन्वन्तिभृगुर्वारुणिर्जमदग्निर्वापवस्वशतंवैखानसाअष्टादश्यनुष्टुप्परास्तिसृआग्नेय्यस्त्वंसोमासिद्वा-
त्रिंशद्भरद्वाजःकश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वासिष्ठइतीहतृचाःसप्तऋषयःशेपेपवित्रोवासिष्ठोवो-
भौवापवस्वसोमतिस्रोनिषद्विपदागायत्र्योवितानास्तिस्रःपौष्ण्योवायत्तेपवित्रंपञ्चाग्नेय्यःसाविर्यग्निसा-
वित्रीवैश्वदेवीवासामन्त्यास्त्रिंशीपुरउष्णिक्सप्तविंश्यनुष्टुबन्त्येचतेपावमान्यध्येतृस्तुतीजागतमूर्ध्वमागु-
शनसःमदेवंदशवत्सभिर्भालंदनास्त्रिष्टुबन्तंहेपुर्नहिरण्यस्तूपोन्त्येत्रिष्टुभौत्रिरस्मैरेणुरादक्षिणानवऋषभ-
स्तौवैश्वामित्रौहरिरहरिमन्तःसप्तकेपवित्रःशिशुर्नकक्षीवांस्त्रिष्टुबष्टम्यभिप्रियाणिपञ्चकविः ।

हिन्वन्ति त्रिंशद्भृगुर्वारुणिर्जमदग्निर्वा पवमानः सोमो गायत्री ।

६५ ओम् हिन्वन्तिसूरमुस्रंयःस्वसारोजामयस्पतिम् । महामिन्दुंमहीयुवः १ पवमानरुचारुचादेवोदेवेभ्यस्परि । विश्वावसून्याविंश २ आपवमान-
सुष्टुतिंवृष्टिंदेवेभ्योदुवः । इषेपवस्वसंयतम् ३ वृषाह्यसिभानुनाद्युमन्तंत्वाहवा-
महे । पवमानस्वाध्यः ४ आपवस्वसुवीर्यंमन्दमानःस्वायुध । इहोष्विन्दवा- ॥४९६॥

गंहि ५ ॥ १ ॥ यद्द्रिःपरिषिच्यसेमृज्यमानोगभस्त्योः । द्रुणासघस्थंमश्नु-
वे ६ प्रसोमायव्यश्ववत्पवमानायगायत । महेसहस्रंचक्षसे ७ यस्यवर्णंमधु-
श्चुतंहरिंहिन्वन्त्यद्रिभिः । इन्दुमिन्द्रायपीतयें ८ तस्यतेवाजिनोवयंविश्वाधना-
निजिग्युषः । सखित्वमावृणीमहे ९ वृषापवस्वधारयामरुत्वतेचमत्सरः ।
विश्वादधानओजसा १० ॥ २ ॥ तंत्वाधर्तारमोण्योः३ःपवमानस्वर्दृशम् ।
हिन्वेवाजेषुवाजिनम् ११ अयाचित्तोविपानयाहरिःपवस्वधारया । युजंवाजे-
षुचोदय १२ आनइन्दोमहीमिषंपवस्वविश्वदर्शतः । अस्मभ्यंसोमगातुवि-
त् १३ आकलशाअनूषतेन्दोधारााभिरोजसा । एन्द्रस्यपीतयेविश १४ यस्य
तेमधुरंसंतीमंदुहन्त्यद्रिभिः । सपवस्वाभिमातिहा १५ ॥ ३ ॥ राजामेधाभिं-
रीयतेपवमानोमनावधिं । अन्तरिक्षेणयातवे १६ आनइन्दोशतग्विनंगवांपोषं

स्वइव्यम् । वहाभगत्तिमूतये १७ आनःसोमसहोजुवोरूपंनवर्चसेभर । सुष्वा-
णोदेववीतये १८ अर्षासोमद्युमत्तमोऽभिद्रोणानिरोरुवत् । सीदंश्छ्येनोनयो-
निमा १९ अप्साइन्द्रायवायवेवरुणायमरुद्भ्यः । सोमोअर्षतिविष्णवे २०
॥ ४ ॥ इषंतोकायनोदधदस्मभ्यंसोमविश्वतः । आपवस्वसहस्रिणम् २१ येसो-
मासःपरावतियेअर्वावतिसुन्विरे । येवादःशर्यणावति २२ यआर्जीकेषुकृत्वसु
येमध्येपस्त्यानाम् । येवाजनेषुपञ्चसु २३ तेनोवृष्टिंदिवस्परिपवन्तामासुवीर्यम् । सुवानादेवासइन्दवः २४ पवंतेहर्यतोहरिर्गृणानोजमदग्निना । हिन्वा-
नोगोरधिंत्वचि २५ ॥ ५ ॥ प्रशुक्रासोवयोजुवोहिन्वानासोनसप्तयः । श्रीणाना
अप्सुमृञ्जत २६ तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये । सपवस्वानयारुचा २७
आतेदक्षंमयोभुवंवाजंमयावृणीमहे । पान्तमापुरुस्पृहम् २८ आमन्द्रमावरे-

प्युमाविप्रमामंनीषिणम् । पान्तुमापुरुस्पृहम् २१ आरायिमासुचेतुनमासुक्रतोतुनूष्वा । पान्तुमापुरुस्पृहम् ३० ॥ ६ ॥

पवस्व त्रिंशच्छतं वैखानसाः पवमानः सोमो गायत्री । सप्तमतृचस्याग्निः । अष्टादश्यनुष्टुप् ।

६६ पवंस्वविश्वचर्षणेऽभिविश्वानिकाव्या । सखासखिभ्यईड्यः १ ताभ्यांविश्वंस्यराजसियेपवमानधामंनी । प्रतीचीसोमतस्थतुः २ परिधामानियानितेत्वंसोमासिविश्वतः । पवमानऋतुभिःकवे ३ पवस्वजनयन्निषोऽभिविश्वानिवार्या । सखासखिभ्यऊतये ४ तवंशुक्रासोअर्चयोदिवस्पृष्ठेवितन्वते । पवित्रंसोमधामंभिः ५ ॥७॥ तवेमेसप्तसिन्धंवःप्रशिषंसोमसिस्रते । तुभ्यंधावन्तिधेनवः ६ प्रसोमयाहिधारयासुतइन्द्रायमत्सरः । दधानोअक्षितिश्रवः ७ समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः । विप्रंमाजाविवस्वतः ८ मृजन्तित्वा

समग्रुवोऽर्येजीरावधिष्वणि । रेभोयदज्यसेवनें १ पवमानस्यतेकवेवाजिन्त्सगाँअसृक्षत । अवैन्तोनश्चर्वस्यवः १० ॥ ८ ॥ अच्छाकोशंमधुश्चुतमसृग्रंवारेअव्ययें । अवावशन्तधीतयः ११ अच्छासमुद्रमिन्दवोऽस्तंगावोनधेनवः । अग्मन्नृतस्ययोनिमा १२ प्रणइन्दोमहेरणआपोअर्षन्तिसिन्धवः । यद्गोभिर्वासयिष्यसें १३ अस्यतेसख्येवयमिर्यक्षन्तस्त्वोतयः । इन्दोसखित्वमुश्मसि १४ आपवस्वगविष्टयेमहेसोमनृचक्षसे । एन्द्रस्यजठरेविश १५ ॥ ९ ॥ महाँअसिसोमज्येष्ठउग्राणामिन्दओजिष्ठः । युध्वासञ्छश्वज्जिगेथ १६ यउग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्यश्चिन्महीयान् १७ त्वंसोमसूरएषस्तोकस्यसातातनूनाम् । वृणीमहेसख्यायवृणीमहेयुज्याय १८ अग्मआर्यूंषिपवसुआसुवोर्जामिषंचनः । आरेबाधस्वदुच्छुनाम् १९ अग्निर्ऋषिःपवमानःपाञ्चजन्यः ॥ १० ॥

न्यःपुरोहितः । तमीमहेमहागयम् २० ॥ १० ॥ अग्नेपवस्वस्वपाअस्मेवर्चः सुवीर्यम् । दधद्रयिंमयिपोषम् २१ पवमानोअतिस्रिधोऽभ्यर्षतिसुष्टुतिम् । सूरोनविश्वदर्शतः २२ समर्मृजानआयुभिःप्रयस्वान्प्रयसेहितः । इन्दुरत्योविचक्षणः २३ पवमानऋतंबृहच्छुक्रंज्योतिरजीजनत् । कृष्णातमांस्यजुनत् २४ पवमानस्यजङ्घ्नतोहरेश्चन्द्राअसृक्षत । जीराअजिरशोचिषः २५ ॥ ११ ॥ पवमानोरथीतमःशुभ्रेभिःशुभ्रशस्तमः । हरिश्चन्द्रोमरुद्गणः २६ पवमानोव्यश्नवद्रश्मिभिर्वाजसातमः । दधत्स्तोत्रेसुवीर्यम् २७ प्रसुवानइन्दुरक्षाःपवित्रमत्यव्ययम् । पुनानइन्दुरिन्द्रमा २८ एषसोमोअधित्वचिगवांक्रीळत्यद्रिभिः । इन्द्रंमदायजोहुवत् २९ यस्यतेद्युम्नवत्पयःपवमानाभृतंदिवः । तेनानोमृळजीवसे ३० ॥ १२ ॥

त्वं सोमासि द्वात्रिंशत्पवमानः सोमो गायत्री । आद्यसप्तर्चानां क्रमेण भरद्वाजकश्यपगोतमात्रिविश्वामित्रजमदग्निवसिष्ठा ऋषयः । शिष्टानां पवित्रो वसिष्ठो वोभौ वा । चतुर्थर्चस्य पूषा वा देवता । त्रयोविंशीचतुर्विंश्योरग्निः । पञ्चविंश्या अग्निः सविता वा । षड्विंश्या अग्निरग्निर्वा सविता च । सप्तविंश्या अग्निर्विश्वे देवा वा । अन्त्ययोः पावमान्यध्येतृस्तुतिः । षोडश्याद्यास्तिस्रो द्विपदा गायत्र्यः । सप्तविंश्यन्त्ये चानुष्टुभः । त्रिंशत्तमी पुरउष्णिक् ।

६७ त्वंसोमासिधारयुर्मन्द्रओजिष्ठोअध्वरे । पवस्वमंहयद्रयिः १ त्वंसुतो नृमादनोदध्न्वान्मत्सरिंतमः । इन्द्रायसूरिरन्धसा २ त्वंसुष्वाणोअद्रिभिरभ्यर्षकनिक्रदत् । द्युमन्तंशुष्ममुत्तमम् ३ इन्दुर्हिन्वानोअर्षतितिरोवाराण्यव्यया । हरिर्वाजमचिक्रदत् ४ इन्दोव्यव्यमर्षसिविश्रवांसिविसौभगा । विवाजान्त्सोमगोमतः ५ ॥ १३ ॥ आनंइन्दोशतग्विनंरयिंगोमन्तमश्विनम् । भरांसोमसहस्रिणम् ६ पवमानासइन्दवस्तिरःपवित्रमाशवः इन्द्रंयामेभिराशत ७ ककुहः

सोम्योरसइन्दुरिन्द्रायपूर्व्यः । आयुःपवतआयवे ८ हिन्वन्तिसूरमुस्रयःपवमानंमधुश्चुतम् । अभिगिरासमस्वरन् ९ अवितानोअजाश्वःपूषायामनियामनि । आभंक्षत्कन्यासुनः १०॥१४॥ अयंसोमःकपर्दिनेघृतंनपवतेमधु । आभंक्षत्कन्यासुनः ११ अयंतआघृणेसुतोघृतंनपवतेशुचिं । आभंक्षत्कन्यासुनः १२ वाचोजन्तुःकवीनांपवस्वसोमधारया । देवेषुरत्नधाअसि १३ आकलशेषुधावति श्येनोवर्मविगाहते । अभिद्रोणाकनिक्रदत् १४ परिप्रसोमतेरसोऽसर्जिकलशेसुतः । श्येनोनतक्तोअर्षति १५ ॥ १५ ॥ पवस्वसोममन्दयन्निन्द्रायमधुमत्तमः १६ असृग्रन्देववीतयेवाजयन्तोरथाइव १७ तसुतासोमदिन्तमाःशुक्रा वायुमसृक्षत १८ ग्राव्णांतुन्नोअभिष्टुतःपवित्रंसोमगच्छसि । दधत्स्तोत्रेसुवीर्यम् ॥ १९ एषतुन्नोअभिष्टुतःपवित्रमतिगाहते । रक्षोहावारमव्ययम् २०॥१६॥

यदन्तियच्चदूरकेभ्यंविन्दतिमामिह । पवंमानवितज्जहि २१ पवंमानःसोअ-
द्यनःपवित्रेणविचर्षणिः । यःपोतासपुनातुनः २२ यत्तेपवित्रमर्चिष्यग्रेवितंत-
मन्तरा । ब्रह्मतेनपुनीहिनः २३ यत्तेपवित्रमर्चिषदग्नेतेनपुनीहिनः । ब्रह्मसवैः
पुनीहिनः २४ उभाभ्यांदेवसवितःपवित्रेणसवेनच । मांपुनीहिविश्वतः २५
॥ १७ ॥ त्रिभिष्टंदेवसवितुर्वषिष्ठैःसोमधामभिः । अग्नेदक्षैःपुनीहिनः २६
पुनन्तुमांदेवजनाःपुनन्तुवसवोधिया।विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमां २७
प्रप्यायस्वप्रास्यन्दस्वसोमविश्वेभिरंशुभिः । देवेभ्यउत्तमंहविः २८ उपंप्रियंप-
निप्रतंयुवानमाहुतीवृधम् । अगन्मबिभ्रतोनमः २९ अलाय्यस्यपरशुर्ननाश
तमापवस्वदेवसोम । आखुंचिदेवदेवसोम ३० यःपावमानीरध्येत्यृषिभिःसंभृ-
तंरसम् । सर्वंसपूतमश्नातिस्वदितंमातरिश्वना ३१ पावमानीर्योअध्येत्यृषिभिः

संभृतंरसम् । तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकम् ३२ ॥ १८ ॥ इति शाकलर्क्संहितायां नवमे मण्डले तृतीयोनुवाकः ॥ ३ ॥

म देवं दश वत्सामिर्भालंदनः पवमानः सोमो जगती । अन्त्या त्रिष्टुप् ।

६८ प्रदेवमच्छामधुमन्तइन्दवोऽसिष्यदन्तगावआनधेनवः । वह्निषदोवचनावन्तऊर्धाभिःपरिस्रुतमुस्रियानिर्णिजंधिरे १ सरोरुवदभिपूर्वीअचिक्रददुपारुहःश्रथयन्त्स्वादतेहरिः । तिरःपवित्रंपरियन्त्युरुव्रयोनिशयाणिदधतेदेवआवरम् २ वियोममेयुर्म्यासंयतीमदःसाकंवृधापयसापिन्वदक्षिता । महीअपारेरजसीविवेविंददभिव्रजन्नक्षितंपाजआददे ३ समातरांविचरन्वाजयन्वपःप्रमेधिरःस्वधयापिन्वतेपदम् । अंशुर्यवेनपिपिशेयतोनृभिःसंजामिभिर्नसतेरक्षतेशिरः ४ संदक्षेणमनसाजायतेकविर्ऋतस्यगर्भोनिहितोयुमापुरः ।

यूनाहसन्तांप्रथमंविजज्ञतुर्गुहांहितंजनिमनेममुध्यतम् ५ ॥ ११ ॥ मन्द्रस्यरूपं विविदुर्मनीषिणःश्येनोयदन्धोअभरत्परावतः । तंमर्जयन्तसुवृधंनदीष्वाँउशन्तंमपरियन्तमृग्मियम् ६ त्वांमृजन्तिदशयोषणःसुतंसोमक्रपिभिर्मतिभिर्धीतिभिर्हितम् । अव्योवारेभिरुतदेवहूतिभिर्नृभिर्यतोवाजमादर्विसातये ७ परिप्रयन्तंवय्यंसुषंसदंसोममनीषाअभ्यनूषतस्तुभः । योधारयामधुमाँऊर्मिणादिवइयर्तिवाचंरयिपाळमर्त्यः ८ अयंदिवइयर्तिविश्वमारजःसोमःपुनानःकलशेषुसीदति । अद्भिर्गोभिर्मृज्यतेअद्रिभिःसुतःपुनानइन्दुर्वरिवोविदत्प्रियं ९ एवानःसोमपरिषिच्यमानोवयोदधच्चित्रतमंपवस्व । अथेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरम् १० ॥ २० ॥

इष्टुर्न दश हिरण्यस्तूपः पवमानः सोमो जगती । अन्त्ये त्रिष्टुभौ ।

६१ इषुर्नवन्वन्प्रतिधायतेमतिर्वत्सोनमातुरुपसर्ज्यूधनि । उरुधारेवदुहेअग्रेआयत्यस्यव्रतेष्वपिसोमइष्यते १ उपोमतिःपृच्यतेसिच्यतेमधुमन्द्राजनीचोदतेअन्तरासनिं । पवमानःसन्तनिःप्रघ्नतामिवमधुमान्द्रप्सःपरिवारमर्षति २ अव्येवधूयुःपवतेपरित्वचिश्रथ्नीतेनप्तीरादेतेऋतंयते । हरिरक्रान्यजतःसंयतोमदोनृम्णाशिशानोमहिषोनशोभते ३ उक्षामिमातिप्रतियन्तिधेनवोदेवस्यदेवीरुषयन्तिनिष्कृतम् । अत्यंक्रमीदजुनंवारमव्ययमत्कंननिक्तंपरिसोमोअव्यत ४ अमृक्तेनरुशतावासंसाहरिरमर्त्योनिर्णिजानःपरिव्यत । दिवस्पृष्ठंबर्हणानिर्णिजेकृतोपस्तरणंचम्वोर्नभस्मयम् ५ ॥ २१ ॥ सूयस्येवरश्मयोद्रावयित्नवोमत्सरासंःप्रसुपःसाकमीरते । तन्तुंततंपरिसर्गासआशवोनेन्द्रादृतेपवतेधामकिंचन ६

सिन्धोरिवप्रवणेनिम्नआशवोवृषच्युतामदांसोगातुमाशत । शंनोनिवेशेद्विपदे चतुष्पदेऽस्मेवाजाःसोमन्तिष्ठन्तुकृष्टयः ७ आनःपवस्ववसुमद्धिरण्यवदश्वावद्गो-मद्यवमत्सुवीर्यम् । यूयंहिसोमपितरोममस्थनंदिवोमूर्धानःप्रस्थितावयस्कृतः ८ एतेसोमाःपवमानासइन्द्ररथाइवप्रययुःसातिमच्छं । सुताःपवित्रमतियन्त्यव्यं हित्वीवविंहरितोवृष्टिमच्छं ९ इन्दविन्द्रायबृहतेपवस्वसमृळीकोअनवद्योरि-शादाः । भराचन्द्राणिंगृणतेवसूनिदेवैद्यौवापृथिवीप्रावतंनः १० ॥ २२ ॥

त्रिरस्मै दश रेणुर्वैश्वामित्रः पवमानः सोमो जगती । अन्त्या त्रिष्टुप् ।

७० त्रिरस्मैसप्तधेनवोदुदुह्रेसत्यामाशिरंपूर्व्येव्योमनि । चत्वार्यन्याभुवना-निनिर्णिजेचारूणिचक्रेयद्गवैरवर्धत १ साभिक्षमाणोअमृतस्यचारुणउभेद्यावा काव्येनाविशश्रथे । तेजिष्ठाअपोमंहनापरिव्यतयदीदेवस्यश्रवसासदोविदुः २

तेअस्यसन्तुकेतवोऽमृत्यवोऽदाभ्यासोजनुषींउभेअनु । येभिर्नृम्णाचंदेव्यांचपु-
नतआदिद्राजानंमननाअगृभ्णत ३ समृज्यमानोदशभिःसुकर्मभिःप्रमध्यमासु
मातृषुप्रमेसचा । व्रतानिपानोअमृतस्यचारुणउभेनृचक्षाअनुपश्यतेविशौ ४
समंर्मृजानइंन्द्रियायुधार्यसओभेअन्तारोदसीहर्षतेहितः । वृषाशुष्मेणबाधतेवि-
दुर्मतीरादेदिशानःशर्यहेवशुरुधः ५ ॥ २३ ॥ समातरानदहशानउस्रियो
नानंददेतिमरुतामिवस्वनः । जानन्नृतंप्रथमंयत्स्वर्णरंप्रशस्तयेकमंवृणीतसु-
क्रतुः ६ रुवतिभीमोवृषभस्तविष्ययाशृङ्गेशिशानोहरिणीविचक्षणः । आयो-
निसोमःसुकृतंनिषीदतिगव्ययीत्वग्भवतिनिर्णिग्व्ययी ७ शुचिंःपुनानस्तन्व-
मरेपसमव्येहरिन्यधाविष्टसानवि । जुष्टोमित्रायवरुणायवायवेत्रिधातुमधुक्रि-
यतेसुकर्मभिः ८ पवस्वसोमदेववीतयेवृषेन्द्रस्यहार्दिसोमधानमाविश । पुरानो

वाधाद्दुरितातिपारयक्षेत्राविद्धिदिशआहाविपृच्छते १ हितोनसिन्धुरभिवाजमर्-
पेन्द्रस्येन्दोजठरमापवस्व । नावानासिन्धुमतिपर्पिविद्वाञ्छूरोनयुध्यन्नवनो-
निदःस्पः १० ॥ २४ ॥

आ दक्षिणा नव ऋषभो वैश्वामित्रः पवमानः सोमो जगती । अन्त्या त्रिष्टुप् ।

७१ आदक्षिणासृज्यतेशुष्म्या३सदंवेतिरक्षसंःपातिजागृविः । हरिंरोपशं
कृणुतेनभस्पयंउपास्तिरेचम्वो३र्ब्रह्मानिर्णिजे १ प्रकृष्टेहवंशूषएतिरोरुवदसुर्यं-
१वर्णोनिरिणीतेअस्यतम् । जहातिवव्रिंपितुरेतिनिष्कृतमुपप्रुतंकृणुतेनिर्णिजंत-
नां २ अद्रिंभिःसुतःपवतेगभस्त्योर्वृषायतेनभसावेपतेमती । समोदतेनसंतेसा-
धतेगिरानेनिक्तेअप्सुयजतेपरीमणि ३ परिद्युक्षंसहसःपर्वतावृधंमध्वःसिञ्चन्ति
हर्म्यस्यसक्षणिम् । आयस्मिन्गावःसुहुतादृऊधंनिमूर्धञ्छ्रीणन्त्यग्रियंवरीम-

भिः ४ समीरयंनभुरिजोरहेषतदशस्वसारोअदितेरुपस्थआ । जिगादुपंज्जय-
तिगोरपीच्यंपदंयदस्यमतुथाअजींजनन् ५ ॥ २५ ॥ श्येनोनयोनिंसदंनंधिया
कृतंहिरण्ययंमासदंद्देवएषति । एरिणन्तिबर्हिषिप्रियंगिराश्वोनदेवाँअप्येतियज्ञि-
यंः ६ पराव्यक्तोअरुषोदिवःकविर्वृषात्रिपृष्ठोअनविष्टगाअभि । सहस्रणीतिर्य-
तिंःपरायतीरेभोनपूर्वीरुषसोविराजति ७ त्वेषंरूपंकृणुतेवर्णोंअस्यसयत्राशय-
त्समृतासेधंतिस्त्रिधः । अप्सायांतिस्वधयादैव्यंजनंसंसुष्टुतीनसंतेसङ्गेअंग्रया ८
उक्षेवंयूथापरियन्नरावीदधित्विषीरधितसूर्यस्य । दिव्यःसुपर्णोऽवचक्षतक्षांसोमः
परिक्रतुनापश्यतेजाः ९ ॥ २६ ॥

हरिं नव हरिमन्तः पवमान सोमो गायत्री ।

७२ हरिंमृजन्त्यरुषोनयुज्यतेसंधेनुभिःकलशेसोमोअज्यते । उद्वाचंमीरय-

तिहिन्वतेमतीपुरुष्टुतस्यकातींचित्परिप्रियः १ साकंवदन्तिवहवोमनीषिणइन्द्रं-
स्यसोमंजठरेयदादुहुः । यदीमृजन्तिसुगंभस्तयोनरःसनीळाभिर्दशभिःकाम्यं
मधु २ अरंममाणोअत्येतिगाअभिसूयस्यप्रियंदुहितुस्तिरोरवम् । अन्वस्मैजो-
पंमभरद्विनंगृसःसंद्रयीभिःस्वसृभिःक्षेतिजामिभिः ३ नृधूतोअद्रिंषुतोबर्हिषिं
प्रियःपतिर्गवांप्रदिवइन्दुरृत्वियः । पुरंन्धिवान्मनुषोयज्ञसाधनःशुचिर्धियापवते
सोमइन्द्रते ४ नृबाहुभ्यांचोदितोधारयासुतोऽनुष्वधंपवतेसोमइन्द्रते । आप्राः
क्रतून्त्समंजैरध्वरेमतीर्वेर्नद्रुषद्वम्वो३रासदद्धरिः ५ ॥ २७ ॥ अंशुंदुहन्तिस्तन-
यन्तमक्षितंक्रविंकवयोऽपसोमनीषिणः । समीगावोमतयोयन्तिसंयतंऋतस्ययो-
नासदंनेपुनर्भुवः ६ नाभांपृथिव्याधरुणोमहोदिवो३ऽपामूर्मौसिन्धुष्वन्तरुक्षि-
तः । इन्द्रस्यवज्रोवृषभोविभूवसुःसोमोहृदेपवतेचारुमत्सरः ७ सतूपवस्वपरि

पार्थिवंरजंःस्तोत्रेशिक्षन्नाधून्वतेचंसुक्रतो । मानोनिर्भाग्वसुंनःसादनस्पृशोरायिं पिशङ्गंवहुलंवसीमहि ८ आतूनंइन्दोशतदात्वश्व्यंसहस्रंदातुपशुमद्धिरण्यवत् । उपंमास्ववृहतीरेवतीरिषोऽधिस्तोत्रस्यंपवमाननोगहि ९ ॥ २८ ॥

सूक्ते नव पवित्रः पवमानः सोमो जगती ।

७३ सूर्कैद्रप्सस्यधमंतःसमंस्वरन्नृतस्ययोनासमंरन्तनाभयः । त्रीन्त्समूर्ध्नो असुरश्चक्रआरभेसत्यस्यनावःसुकृतंमपीपरन् १ सम्यक्सम्यञ्चोमहिषाअहेषत सिन्धोरूर्माविधिवेनाअवीविपन् । मधोर्धारांभिर्जनयंन्तोअर्कमित्प्रियामिन्द्रस्य तन्वंमवीवृधन् २ पवित्रंवन्तःपरिवाचंमासतेपितैषांप्रत्नोअभिरक्षतिव्रतम् । महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकुर्धरुणेष्वारभम् ३ सहस्रधारेऽवतेसमंस्वरन्दिवोनाकेमधुजिह्वाअसश्चतः । अस्यस्पशोननिमिषन्तिभूर्णयःपदेपदेपाशिनंः

सन्तिसेतवः ४ पितुर्मातुरध्यायेसमस्वरन्नृचाशोचन्तःसंदहन्तोअव्रतान् । इन्द्रद्विष्टामपधमन्तिमाययात्वचमसिक्रींभूमनोदिवस्परि ५ ॥ २१ ॥ प्रत्नान्मानादध्यायेसमस्वरञ्छोकयन्त्रासोरभसस्यमन्तवः । अपानक्षासोवधिराअहासत ऋतस्यपन्थांनतरन्तिदुष्कृतः ६ सहस्रधारेवितंतेपवित्रआवाचंपुनन्तिकवयोमनीषिणः । रुद्रासएषामिषिरासोअद्रुहःस्पशःस्वञ्चःसुदृशोनूचक्षसः ७ ऋतस्यगोपानदभायसुक्रतुरत्नीषपवित्राहृद्यन्तरादधे । विद्वान्त्सविश्वाभुवनाभिपश्यत्यवाजुष्टान्विध्यतिकर्तेअव्रतान् ८ ऋतस्यतन्तुर्वितंतःपवित्रआजिह्वायाअग्रेवरुणस्यमायया । धीरास्थित्वत्सामिनक्षन्तआशतात्रांकर्तमवपदात्यप्रभुः९॥३०॥

शिशुर्न नव कक्षीवान्पवमानः सोमो जगती । उपान्त्या त्रिष्टुप् ।

७१ शिशुर्नजातोऽवचक्रदद्वनेस्वर्यद्वाज्यरुषःसिषासति । दिवोरेतसास-

चतेपयोवृधातमींमहेसुमतीशमँसप्रथः १ दिवोयःस्कम्भोधरुणःस्वातत आपूर्णो अंशुःपर्यैतिविश्वतः । सेमेमहीरोदसीयक्षदावृतासमीचीनेदाधारसमिषःकविः २ महिप्सरःसुकृतंसोम्यंमधूर्वीगव्यूतिरदितेर्ऋतंयते । ईशेयोवृष्टेरितउस्त्रियोवृपापां नेतायइतऊतिर्ऋंग्मियः ३ आत्मन्वन्नभोदुह्यतेघृतंपयःऋतस्यनाभिरमृतंविजा-यते । समीचीनाःसुदानवःप्रीणन्तितंनरोहितमर्वमेहन्तिपेरवः ४ अराबीदंशुः सचमानऊर्मिणादेवाव्यं१मनुषेपिन्वतित्वचम् । दधातिगर्भमदितेरुपस्थआयेन तोकंचतनयंचधामहे ५ ॥ २१ ॥ सहस्रधारेऽवताअसश्चतस्तृतीयेसन्तुरजोसि प्रजावतीः । चतस्रोनाभोनिहिताअवोदिवोहविर्भिरत्यमृतँघृतश्चुतः ६ श्वेतंरूपं कृणुतेयत्सिषासतिसोमोमीढ्वाँअसुरोवेदभूमनः । धियाशमींसचतेसमभिप्रव-द्दिवस्कवन्धुमर्वदर्षदुद्रिणम् ७अर्वश्वेतंकलशंगोभिरक्तंकार्ष्मन्वाज्यक्रमीत्ससन्-

वान् । आहिंन्विरेमनसादेवयन्तःक्षीवंतेशतहिमायुगोनाम् ८ अद्भिःसोमप-
पृचानस्यतेरसोऽव्योवारंविपवमानधावति । समृज्यमानःकविभिर्मदिंतमस्व-
दस्वेन्द्रायपवमानपीतये १ ॥ ३२ ॥

अभि प्रियाणि पञ्च कविः पवमानः सोमो जगती ।

७५ अभिप्रियाणिपवतेचनोहितोनामानियह्वोअधियेषुवर्धते । आसूयस्यवृ-
हतोवृहन्नधिरथंविष्वञ्चमरुहद्विचक्षणः १ ऋतस्यजिह्वापवतेमधुप्रियंवक्तापति-
र्धियोअस्याअदाभ्यः । दधातिपुत्रःपित्रोरपीच्यं३ नामतृतीयमधिरोचनेदिवः २
अवंद्युतानःकलशाँअचिक्रदन्नभिर्यमानःकोशआहिरण्ययें । अभीमृतस्यदोह-
नाअनूषतधित्रिपृष्ठाउपसोविरांजति ३ अद्रिभिःसुतोमतिभिश्चनोहितःप्ररोच-
यन्रोदसीमातराशुचिः । रोमाण्यव्यासमयाविधावतिमधोर्धाराषिन्वमानादिवे-

दिवे ४ परिसोमप्रधन्वास्वस्तयेनृभिःपुनानोअभिवासयाशिरम् । येतेमदाआ-
हनसोविहायसस्तेभिरिन्द्रंचोदयदातवेमघम् ५ ॥ ३३ ॥ इति शाकलर्क्संहितायां
सप्तमाष्टके द्वितीयोध्यायः ॥ ७ ॥ २ ॥

धर्तेपमराजाचोदसःसोमस्यवसुर्भारद्वाजःप्रसोमस्यासावीतित्रिष्टुबन्तेपंतित्रंतेपवित्रःपवस्ववाच्यः
प्रजापतिरिन्द्रायद्वादशवेनोभार्गवोद्विपात्त्रिष्टुबन्तंप्रतेष्टाचत्वारिंशदृषिगणादशर्चाअकृष्टामापाःप्रथमेसि-
कतानिवावरीद्वितीयेपृश्निर्योजास्तृतीयेत्रयश्चतुर्थेत्रिःपञ्चान्त्यागृत्समदःप्रतुनवोशनायंसोमोष्टौप्रोस्य
सप्तमहिन्वानःपङ्क्तिसिष्टुः ।

धर्ता पञ्च कविः पवमानः सोमो जगती ।

७६ ॐम् धर्तादिवःपवतेकृत्व्योरसोदक्षोदेवानामनुमाद्योनृभिः । हरिःसृ-
जानोअत्योनसत्वभिर्वृथापाजांसिकृणुतेनदीष्वा १ शूरोनधत्तआयुधागभस्त्योः

स्व१ःसिषासन्नथिरोगविंष्टिषु। इन्द्रंस्यशुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानोअज्यतेमनीषिभिः २ इन्द्रंस्यसोमपवंमानऊर्मिणांतविष्यमांणोजठरेष्वाविंश । प्रणःपिन्वविद्युदभ्रेवरोदंसीधियानवाजाँउपमासिशश्वतः ३ विश्वंस्यराजांपवते स्वर्दृशंऋतस्यधीतिमृषिपाळंवीवशत् । यःसूर्यस्यासिरेणमृज्यतेंपितामतीनामसंमष्टकाव्यः ४ वृषेवयूथापरिकोशंमर्षस्यपामुपस्थेवृषभःकनिक्रदत् । सइन्द्रायपवसेमत्सरिन्तमोयथाजेषांमसामिथेत्वोतंयः ५ ॥ १ ॥

एष म पञ्च कविः पवमानः सोमो जगती।

७७ एषप्रकोशेमधुमाँअचिक्रददिन्द्रंस्यवज्रोवपुंषोवपुष्टरः । अभीमृतस्यसुदुघांघृतश्चुतोवाश्राअर्षन्तिपयसेवधेनवः १ सपूर्व्यःपवतेयंदिवस्परिश्येनोमथायदिंपितास्तिरोरजः । समध्वआयुवतेवेविजानइत्कृशानोरस्तुर्मनसाहविष्युः

पां २ तेनःपूर्वांसउपरासइन्दवोमहेवाजायधन्वन्तुगोमते । ईक्षेण्यासोअह्यो३ नचारवोब्रह्मब्रह्मयेजुंजुपुर्हविर्हविः ३ अयंनोविद्वान्वेनवद्वनुष्यतइन्दुःसत्राचामनंसापुरुष्टुतः। इनस्पथःसदनेगभीमादधेगवांमुरुव्रजमभ्यर्षतिव्रजम् ४ चक्रिर्दिवःपवतेकृत्व्योरसोमहाँअदब्धोवरुणोहुरुग्यते । असाविभिर्मित्रोवृजनेषुयज्ञियोऽत्यो नयूथेवृषभुःकनिक्रदत् ५ ॥ २ ॥

म राजा पञ्च कविः पवमानः सोमो जगती ।

७८ प्रराजावांचेजनयन्नसिष्यददपोवसानोअभिगाइयक्षति । गृभ्णातिरिप्रमविरस्यतान्वांशुर्देवानामुपयातिनिष्कृतम् १ इन्द्रायसोमपरिषिच्यसेनृभिर्नृचक्षाऊर्मिःकविरंज्यसेवने । पूर्वीर्हितस्तुतयःसन्तियात्वेसहस्रमश्वाहरयश्चमूषदः २ समुद्रियाअप्सरसोमनीषिणमासीनाअन्तरभिसोममक्षरन् । ताइं

हिन्वन्तिहर्म्यस्यसक्षणिंयाचन्तेसुम्नंपवमानमक्षितम् ३ गोजिन्नःसोमोरथजि-
द्धिरण्यजित्स्वर्जिदब्जित्पवतेसहस्रजित् । यंदेवासश्चक्रिरेपीतयेमदंस्वादिष्ठंद्रु-
प्समरुणंमयोभुवम् ४ एतानिसोमपवमानोअस्मयुःसत्यानिकृण्वन्द्रविणान्य-
र्षसि । जहिशत्रुमन्तिकेदूरकेचयउर्वीगव्यूतिमभयंचनस्कृधि ५ ॥ ३ ॥

अचोदसः पञ्च कविः पवमानः सोमो जगती ।

७१ अचोदसोनोधन्वन्त्विन्दवःप्रसुवानासोबृहद्दिवेषुहरयः । विचनशंन्नइ-
पोअरातयोऽर्योनंशन्तसनिषन्तनोधियः १ प्रणोधन्वन्त्विन्दवोमदच्युतोधनां-
वायेभिरवंतोजुनीमसिं । तिरोमतंस्युकस्यंचित्परिह्वृतिंवयंधनानिविश्वधाभरे-
महि २ उतस्वस्याअरात्याअरिर्हिपउतान्यस्याअरात्यावृंकोहिपः । धन्वन्नतृ-
ष्णासमरीतृताँअभिसोमजहिपवमानदुराध्यः ३ दिविते नाभांपरमोयआदंदे

पृथिव्यास्तेरुरुहुःसानविक्षिपः । अद्रयस्त्वावप्सतिगोरधित्वक्यं १ प्सुत्वाहस्तैर्दुदुहुर्मनीषिणः ४ एवातइन्दोसुभ्वंसुपेशंसंरसंतुजन्तिप्रथमाअभिश्रियः । निदानिदंपवमाननितारिपआविस्तेशुष्मोभवतुप्रियोमदः ५ ॥ ४ ॥

सोमस्य पञ्च वसुर्भारद्वाजः पवमानः सोमो जगती ।.

८० सोमस्यधारापवतेनृचक्षसऋतेनदेवान्हवतेदिवस्परि । बृहस्पतेरवथेनाविदिद्युतेसमुद्रासोनसवनानिविव्यचुः १ यंत्वावाजिन्नृभ्याअभ्यनूषतायोहंतंयोनिमारोहसियुमान् । मघोनामायुःप्रतिरन्महिश्रवइन्द्रायसोमपवसेवृषामदः २ एन्द्रस्यकुक्षापवतेमदिंतमऊर्जंवसानःश्रवसेसुमङ्गलः । प्रत्यङ्सविश्वाभुवनाभिपप्रथेक्रीळन्हरिरत्यःस्यन्दतेवृषा ३ तंत्वादेवेभ्योमधुमत्तमंनरःसहस्रधारंदुहतेदशक्षिपः । नृभिःसोमप्रच्युतोग्रावभिःसुतोविश्वान्देवाँआपवस्वास-

हस्त्रजित् ४ तंत्वाहस्तिनोमधुमन्तमद्रिभिर्दुहन्त्यप्सुवृषभंदशक्षिपः । इन्द्रंसोम-मादयन्दैव्यंजनंसिन्धोरिवोर्मिःपवमनोअर्षसि ५ ॥ ५ ॥

म सोमस्य पञ्च वसुर्भारद्वाजः पवमानः सोमो जगती । अन्त्या त्रिष्टुप् ।

८१ प्रसोमंस्यपवमानस्योर्मयइन्द्रस्ययन्तिजठरंसुपेशसः । दध्नायदीमुक्षी-तायशसागवांदानायशूरमुदमन्दिषुःसुताः १ अच्छाहिसोमंःकलशाँअसिष्य-दत्योनवोह्यारघुर्वर्तनिर्वृषा । अथादेवानामुभयस्यजन्मनोविहाँअश्नोत्यमृत-इतश्चयत् २ आनंःसोमपवमानःकिरावस्विन्दोभवमघवाराधसोमहः । शि-क्षाणयोधोवसवेसुचेतुनामानोगयमारेअस्मत्परासिचः ३ आनंःपूषापवमानः सुरातयोमित्रोगच्छन्तुवरुणःसजोषसः । बृहस्पतिर्मरुतोवायुरश्विनात्वष्टासः

वितासुयमासरस्वती ४ उभेद्यावापृथिवीविश्वमिन्वेअर्यमादेवोअदितिर्विधाता ।
भगोनृशंसउर्वन्तरिक्षंविश्वेदेवाःपवमानंजुषन्त ५ ॥ ६ ॥

असावि पञ्च वसुर्भारद्वाजः पवमानः सोमो जगती । अन्त्या त्रिष्टुप् ।

८२ असाविसोमोअरुषोवृषाहरीराजेवदस्मोअभिगाअचिक्रदत् । पुनानो
वारंपर्येत्यव्ययंश्येनोनयोनिंघृतवन्तमासदम् १ कविर्वेधस्यापयेषिमाहिनम
त्योनमृष्टोअभिवाजमर्षसि । अपसेधन्दुरितासोममृळयघृतंवसानःपरियासि
निर्णिजम् २ पर्जन्यःपितामहिपस्यपर्णिनोनाभापृथिव्यागिरिषुक्षयंदधे ।
स्वसारआपोअभिगाउतासरन्त्संग्रावभिर्नसतेवीतेअध्वरे ३ जायेवपत्या
वधिशेवंमहसेपज्रायागर्भंगृणुहिब्रवीमिते । अन्तर्वाणीषुप्रचरासुजीवसेऽनिन्द्यो

वृजनेसोमजागृहि ४ यथापूर्वेभ्यःशतसाअमृध्रःसहस्रसाःपर्यावाजमिन्दो ।
एवापवस्वसुवितायनव्यसेतवव्रतमन्वापःसचन्ते ५ ॥ ७ ॥

पवित्रं ते पञ्च पवित्रः पवमानः सोमो जगती ।

८३ पवित्रंतेवितततंब्रह्मणस्पतेप्रभुर्गात्राण्यप्येषिविश्वतः । अतप्ततनूर्नतदा-
मोअश्नुतेशृतासइद्वहन्तस्तत्समाशत १ तपोष्पवित्रंवितततंदिवस्पदेशोचन्तो
अस्यतन्तवोव्यस्थिरन् । अवन्त्यस्यपवीतारमाशवोदिवस्पृष्ठमधितिष्ठन्तिचे-
तसा २ अरूरुचदुषसःपृश्निरग्रियउक्षाबिभर्तिभुवनानिवाजयुः । मायाविनोम-
मिरेअस्यमायया नृचक्षसःपितरोगर्भमादधुः ३ गन्धर्वइत्थापदमस्यरक्षतिपाति
देवानांजनिमान्यद्भुतः । गृभ्णातेरिपुंनिधयानिधायतिःसुकृत्तमामधुनोभक्षमा-

शत ४ हविर्हविष्मोमहिसम्रदैव्यंनभोवसानःपरियास्यध्वरम् । राजापवित्र-
रथोपाजमारुहःसहस्रभृष्टिर्जयसिश्रवोबृहत् ५ ॥ ८ ॥

पवस्व पञ्च प्रजापतिर्वाच्यः पवमानः सोमो जगती ।

८४ पवस्वदेवमादनोविचर्षणिरप्साइन्द्रायवरुणायवायवे । कृधीनोअद्यव-
रिवःस्वस्तिमदुरुक्षितौगृणीहिदैव्यंजनम् १ आयस्तस्थौभुवनान्यमर्त्योविश्वा-
निसोमःपरितान्यर्षति। कृण्वन्त्संचृतंविचृतमभिष्टयइन्दुःसिषक्त्युषसंनसूर्यः २
आयोगोभिःसृज्यतओषधीष्वादेवानांसुम्नइषयन्नुपावसुः । आविद्युतापवतेधार-
यासुतइन्द्रंसोमोमादयन्दैव्यंजनम् ३ एषस्यसोमःपवतेसहस्रजिद्विन्वानोवा-
चंमिषिरामुषर्बुधम् । इन्दुःसमुद्रमुदियर्तिवायुभिरेन्द्रस्यहार्दिकलशेषुसीदति ४

अभित्यंगावः पयसापयोवृधंसोमंश्रीणन्तिमतिभिःस्वर्विदम् । धनंजयःपवते कृत्व्योरसोविप्रःकविःकाव्येनास्वर्चनाः ५ ॥ १ ॥

इन्द्राय द्वादश वेनो भार्गवः पवमानः सोमो जगती । अन्त्ये त्रिष्टुभौ ।

८५ इन्द्रायसोमसुपुतःपरिस्रवापामींवाभवतुरक्षसासह । मातेरसंस्यमत्स-तद्वयाविनोद्रविणस्वन्तइहसन्त्विन्दवः १ अस्मान्त्संमर्यंपवमानचोदयदक्षो देवानामसिहिप्रियोमदः । जहिशत्रूँरभ्याभन्दनायतःपिवेन्द्रसोमसवनोमृधो जहि २ अदब्धइन्दोपवसेमदिंतमआत्मेन्द्रस्यभवसिधासिरुत्तमः । अभि स्वरन्तिवहवोमनीषिणोराजानमस्यभुवनस्यनिंसते ३ सहस्रंणीथःशतधारो अद्भुतइन्द्रायेन्दुःपवतेकाम्यंमधु । जयन्क्षेत्रमभ्यर्षाजयन्नपउरुनोगातुंकृणुसो ममीढ्वः ४ कनिक्रदत्कलशेगोभिरज्यसेव्यं१व्ययंसमयावारंमर्षसि । मर्मृज्य-

मानोअत्योनसानसिरिन्द्रस्यसोमजठरेसमक्षरः ५ स्वादुःपवस्वदिव्यायजन्म-
नेस्वादुरिन्द्रायसुहवीतुनाम्ने । स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँअ-
दाभ्यः ६ ॥ १० ॥ अत्यंमृजन्तिकलशेदशक्षिपःप्रविप्राणांमतयोवाचंईरते ।
पवमानाअभ्यर्षन्तिसुष्टुतिमेन्द्रंविशन्तिमदिरासइन्दवः ७ पवमानोअभ्यर्षा
सुवीर्यमुवींगव्यूतिंमहिशर्मसप्रथः । माकिर्नोअस्यपरिषूतिरीशतेन्दोजयेमत्व-
याधनंधनम् ८ अधिद्यामस्थाद्वृषभोविचक्षणोऽरूरुचद्विदिवोरोचनाकविः ।
राजापवित्रमत्यैतिरोरुवद्विश्वःपीयूषंदुहतेनृचक्षसः ९ दिवोनाकेमधुजिह्वाअस-
श्चतोवेनादुहन्त्युक्षणंगिरिष्ठाम् । अप्सुद्रप्संवावृधानंसमुद्रआसिन्धोरूर्मामधु-
मन्तंपवित्रआ १० नाकेसुपर्णमुपपप्तिवांसंगिरोवेनानामकृपन्तपूर्वीः । शिशुं
रिहन्तिमतयःपनिप्नतंहिरण्ययंशकुनंक्षामणिस्थाम् ११ ऊर्ध्वोगन्धर्वोअधिना-

केअस्याद्दिश्वारूपाप्रतिचक्षाणोअस्य । भानुःशुक्रेणशोचिषाव्यद्यौत्प्रारूरुचद्रोदसीमातराशुचिः १२॥१॥ इति शा॰सं॰नवमे मण्डले चतुर्थोनुवाकः॥ ९ ॥ ४॥

म तेष्टाचत्वारिंशत्पवमानः सोमो जगती । आद्यानां दशानामाकृष्टा मापाः । ततो दशानां सिकता निवावरी । ततो दशानां पृश्नयोऽजाः । ततो दशानां त्रय ऋषिगणाः । ततः पञ्चानामग्निः । अन्त्यानां तिसृणां गृत्समदः ।

८६ प्रतेआशवंःपवमानधीजवोमदाअर्षन्तिरघुजाइवत्मना । दिव्याःसुपर्णामधुमन्तइन्दवोमदिन्तमासःपरिकोशमासते १ प्रतेमदासोमदिरासंआशवोऽसृक्षतरथ्यासोयथापृथक् । धेनुर्नवत्संपयसाभिवज्रिणमिन्द्रमिन्दवोमधुमन्तऊर्मयः २ अत्योनहियानोअभिवाजमर्षस्वर्वित्कोशंदिवोअद्रिमातरम् । वृषापवित्रेअधिसानोअव्ययेसोमःपुनानइन्द्रियायुधायसे ३ प्रतआश्विनीःपव-

मानधीजुवोदिव्याअंसृग्रन्पयंसाधरीमणि । प्रान्तर्क्रपंयुःस्थाविरीरसृक्षतुयेत्वा मृजन्त्यृषिपाणवेधसः ४ विश्वाधामानिविश्वचक्षऋभ्वसःप्रभोस्तैसतःपरियन्ति केतवः । व्यानशिःपवसेसोमधर्मभिःपतिर्विश्वस्यभुवनस्यराजसि ५ ॥ १२ ॥ उभयतःपवमानस्यरश्मयोध्रुवस्यसतःपरियन्तिकेतवः । यदीपवित्रेअधिमृज्यतेहरिःसत्तानियोनाकलशेषुसीदति ६ यज्ञस्यकेतुःपवतेस्वध्वरःसोमोदेवानामुपयातिनिष्कृतम् । सहस्रधारःपरिकोशमर्षतिवृषापवित्रमत्येतिरोरुवत् ७ राजासमुद्रंनद्योऽविगाहतेऽपामूर्मिंसचतेसिन्धुषुश्रितः । अध्यस्थात्सानुपवमानोअव्ययंनाभापृथिव्याधरुणोमहोदिवः ८ दिवोनसानुंस्तनयन्नचिक्रदद्दयौश्चयस्यपृथिवीचधर्मभिः । इन्द्रस्यसख्यंपवतेविवेविदत्सोमःपुनानःकलशेषुसीदति ९ ज्योतिर्यज्ञस्यपवतेमधुप्रियंपितादेवानांजनिताविभूवसुः । दधातिरत्नंस्वधयोर-

पीत्वेमदिन्तमोमत्सरइन्द्रियोरसः १० ॥ १३ ॥ अभिक्रन्दन्कलशंवाज्यंपतिपतिर्दिवःशतधारोविचक्षणः । हरिर्मित्रस्यसदनेषुसीदतिमर्मृजानोऽविभिः सिन्धुभिर्वृषा ११ अग्रेसिन्धूनांपवमानोअर्षत्यग्रेवाचोअग्रियोगोषुगच्छति । अग्रेवाजस्यभजतेमहाधनंस्वायुधःसोतृभिःपूयतेवृषा १२ अयंमतवाञ्छकुनोयथाहितोऽव्येससारपवमनऊर्मिणा । तवक्रत्वारोदसीअन्तराकवेशुचिंधियापवतेसोमइन्द्रते १३ द्रापिंवसानोयजतोदिविस्पृशंमन्तरिक्षप्राभुवनेष्वर्पितः । स्वंजंजानोनभसाभ्यक्रमीत्प्रत्नमस्यपितरमाविवासति १४ सोअस्यविशेमहिशर्मयच्छतियोस्यधामप्रथमंव्यानशे । पदंयदस्यपरमेव्योमन्यतोविश्वाअभिसंयातिसंयतः १५॥ १४॥ प्रोअयासीदिन्दुरिन्द्रस्यनिष्कृतंसखासख्युर्नप्रमिनातिसंगिरम् । मर्यइवयुवतिभिःसमर्षतिसोमःकलशेशतयामनापथा १६ प्रवोधियोमन्द्र-

युवोविपन्युवःपनस्युवःसंवसनेष्वक्रमुः। सोमंमनीषाअभ्यनूषतस्तुभोऽभिधेनवः
पयसेमशिश्रयुः १७ आनःसोमसंयतंपिप्युषीमिषमिन्दोपवस्वपवमानोअस्रिधम्। यानोदोहतेत्रिरह्नस्संध्युषीक्षुमद्राजंवन्मधुमत्सुवीर्यम् १८ वृषामतीनांपवते
विचक्षणःसोमोअहंःप्रतरीतोषसोदिवः। क्राणासिन्धूनांकलशाँअवीवशादिन्द्रस्य
हार्याविशन्मनीषिभिः १९ मनीषिभिःपवतेपूर्व्यःकविर्नृभिर्यतःपरिकोशाँअचिक्रदत्। ऋतस्यनामंजनयन्मधुक्षरदिन्द्रस्यवायोःसख्यायकर्तवे २० ॥१५॥
अयंपुनानउषसोविरोचयदयंसिन्धुभ्योअभवदुलोककृत्। अयंत्रिःसप्तदुदुहान-
आशिरंसोमोहृदेपवनेचारुमत्सरः २१ पवस्वसोमदिव्येषुधामसुसृजानइन्दो
कलशेपवित्रआ। सीदन्निन्दंस्यजठरेकनिक्रदन्नृभिर्यतःसूर्यमारोहयोदिवि २२
अद्रिभिःसुतःपयसेपवित्रआँइन्दविन्द्रस्यजठरेष्वाविशन्। त्वंनृचक्षाअभवोवि-

चक्षणसोमगोत्रमङ्गिरोभ्योऽवृणोरप २३ त्वांसोमपवमानंस्वाध्योऽनुविप्रासो अमदन्नवस्यवः । त्वांसुपर्णआभरदिवस्परीन्दोविश्वाभिर्मतिभिःपरिष्कृतम् २४ अन्येपुनानंपरिवारऊर्मिणाहरिंनवन्तेअभिसत्रधेनवः । अपामुपस्थेअध्यायवः कविमृतस्ययोनांमहिषाअहेषत २५ ॥ १६ ॥ इन्दुःपुनानोअतिगाहतेमृधोविश्वानिकृण्वन्त्सुपथानियज्यवे । गाःकृण्वानोनिर्णिजंहर्यतःकविरत्योनक्रीळन्परिवारमर्षति २६ असश्चतःशतधाराअभिश्रियोहरिंनवन्तेऽवताउदन्युवः । क्षिपोमृजान्तिपरिगोभिरावृतंतृतीयेपृष्ठेअधिरोचनेदिवः २७ तवेमाःप्रजादिव्यस्य रेतसस्त्वंविश्वस्यभुवनस्यराजसि । अधेदंविश्वंपवमानतेवशेत्वमिन्दोप्रथमोधामधाअसि २८ त्वंसमुद्रोअसिविश्ववित्कवेतवेमाःपञ्चप्रदिशोविधर्मणि । त्वंद्यांचपृथिवींचातिजभ्रिषेतवज्योतींषिपवमानसूर्यः २९ त्वंपवित्रेरजसोविधर्मणि-

दिवेभ्यःसोमपवमानपूयसे। त्वामुशिजःप्रथमाअगृभ्णततुभ्येमाविश्वाभुवनानि येमिरे ३० ॥ १७ ॥ प्रेरेभएत्पतिवारमव्ययंवृषावनेष्वनचक्रदद्धरिः । संधीतयोवावशानाअनूषतशिशुंरिहन्तिमतयःपनिप्नतम् ३१ ससूर्यस्यरश्मिभिःपरिव्यततन्तुंतन्वानस्त्रिवृतंयथाविदे । नयन्नृतस्यप्रशिषोनवीयसीःपतिर्जनीनामुपयातिनिष्कृतम् ३२ राजासिन्धूनांपवतेपतिर्दिवःकृतस्ययातिपथिभिःकनिक्रदत् । सहस्रधारःपरिषिच्यतेहरिःपुनानोवाचंजनयन्नुपावसुः ३३ पवमानमह्यर्णोविधावसिसूरोनचित्रोअव्ययानिपव्यया । गभस्तिपूतोनृभिरद्रिभिःसुतोमहेवाजायधन्यायगन्वसि ३४ इषमूर्जंपवमानाभ्यर्षसिश्येनोनवंसुकलशेषुसीदसि । इन्द्रायमद्वामद्योमदःसुतोदिवोविष्टम्भउपमोविचक्षणः ३५ ॥ १८ ॥ सप्तस्वसारोअभिमातरःशिशुंनवैजज्ञानंजेन्यंविपश्चितम् । अपांगन्धर्वंदिव्यंनृचक्षस-

सं॒सोमं॒विश्वं॑स्य॒भुव॑नस्यरा॒जसे॑ ३६ ई॒शा॒न॒इ॒माभुव॑नानि॒वीय॑सेयु॒जा॒नइ॑न्दो
ह॒रितः॑सु॒प॒र्ण्यः॑ । तास्ते॑क्षरन्तु॒मधु॑म॒द्घृत॑पय॒स्तव॑व्र॒तेसो॑मति॒ष्ठन्तु॑कृ॒ष्टयः॑ ३७ त्वं
नृ॒चक्षा॑असिसोमवि॒श्वत॒ः॑पव॑मानवृ॒षभ॒ताविधा॑वसि । सन॑ः॑पवस्व॒वसु॑म॒द्धिर॑ण्य-
व॒द्यं॑स्या॑म॒भुव॑नेयु॒जी॒वसे॑ ३८ गो॒वित्प॑वस्व॒वसु॒विद्धि॑रण्य॒विद्रे॑तो॒धाइ॑न्दो॒भुव॑ने-
ष्वर्पि॑तः । त्वंसु॒वीरो॑असिसोमविश्व॒वित्त॑त्वा॒विप्रा॒उप॑गिरेमआसते ३९ उन्मध्व
ऊ॒र्मिर्व॒ननाअ॑तिष्ठिपद॒पोवसा॑नोम॒हि॒वो॒विगा॑हते । राजा॑प॒वित्र॑रथो॒वाज॒मारु॑ह-
त्स॒हस्र॑भृष्टिर्जयति॒श्रवो॑बृ॒हत् ४० ॥ ११ ॥ स॒भ॒न्दना॒उदि॑यर्ति॒प्र॒जाव॑तीर्वि॒श्वायु॒-
र्विश्वा॑:सु॒भरा॒अह॑र्दिवि । ब्रह्म॑प्र॒जाव॑द्र॒यिम॑श्व॒पस्त्यं॑पी॒तइ॑न्दा॒विन्द्र॑म॒स्मभ्यं॑याचता-
त्॒ ४१ सोअ॒ग्रेअह्ना॑हरि॒र्हि॒र्यते॒मद॒:प्रचे॑तसाचेतय॒तेअनु॒द्युभि॑: । द्वाजना॑या॒तय॑न्नन्त-
रि॑यते॒नरा॑च॒शंस॒दैव्यं॑चय॒र्तरि॑ ४२ अ॒ञ्जते॒व्यं॑ञ्जते॒सम॑ञ्जते॒क्रतु॑रिहन्ति॒मधु॑ना॒भ्यं॑ञ्ज-

ते। सिन्धोरुच्छ्वासेपतयन्तमुक्षणंहिरण्यपावाःपशुमासुगृभ्णते ४३ विपश्चितेपवं-
मानायगायतमहीनधारात्यन्धोअर्षति। अहिर्नजूर्णामतिंसर्पतित्वचमत्योनक्री-
ळन्नसरद्वृषाहरिः ४४ अग्रेगोराजाप्यंस्तविष्यतेविमानोअक्तांभुवनेष्वर्पितः ।
हरिर्घृतस्नुःसुदृशीकोअर्णवोज्योतीरथःपवतेरायओक्यः ४५ ॥ २० ॥ असर्जि
स्कम्भोदिवउद्यतोमदःपरित्रिधातुर्भुवनान्यर्पति । अंशुंरिहन्तिमतयःपनिप्नतं
गिरायदिनिर्णिजमृग्मिणोयुयुः ४६ प्रतेधाराअत्यण्वानिमेष्यःपुनानस्यसंयतो
यन्तिरंहयः। यद्गोभिरिन्दोचम्वोःसमज्यसआसुवानःसोमकलशेपुसीदसि ४७
पवस्वसोमक्रतुविन्नउक्थ्योऽव्योवारेपरिधावमधुप्रियम्। जहिविश्वान्रक्षसइन्दो
अत्रिणोबृहद्वदेमविदथेसुवीराः ४८ ॥ २१ ॥

८७ प्रतुद्रवपरिकोशंनिषींदन्नृभिःपुनानोअभिवाजमर्ष । अश्वंनत्वावाजिनं मर्जयन्तोऽच्छावर्हींरशनाभिर्नयन्ति १ स्वायुधःपवतेदेवइन्दुरशस्तिहावृजनं रक्षमाणः । पितादेवानांजनितासुदक्षोविष्टम्भोदिवोधरुणःपृथिव्याःऋषिर्विप्रः पुरएताजनानामृभुर्धीरुशनाकाव्येन । सर्चिद्विवेदनिहितंयदासामपीच्यं गुह्यंनामगोनाम् २ एषस्यतेमधुमाँइन्द्रसोमोवृषावृष्णेपरिपवित्रेअक्षाः । सहस्रसाःशतसाभूरिदावाशश्वत्तमंबर्हिरावाज्यंस्थात् ४ एतेसोमाअभिगव्यासहस्रामहेवाजायामृतायुश्रवांसि । पवित्रेभिःपवमानाअसृग्रञ्छ्रवस्यवोनपृतनाजोअत्याः ५ ॥ २२ ॥ परिहिष्मांपुरुहूतोजनानांविश्वासंरद्रोजसापूयमानः । अथाभरत्श्येनभृतप्रयांसिरयिंतुञ्जानोअभिवाजमर्ष ६ एषस्तुवानःपरिसोमःप-

वित्रेसर्गोनसृष्टोअदधावदर्वाँ । तिग्मेशिशानोमहिषोनशृङ्गेगाग॒व्यन्नभिशूरोन सत्वा ७ एषायंयौपरमादुन्तरद्रेःकूचित्सतीरूर्वेगाविवेद । दिवोनविद्युत्स्तनय॑न्त्यश्नैःसोमस्यतेपवतइन्द्रधारा ८ उतस्मराशिंपरियासिगोनामिन्द्रेणसोमसर॑थंपुनानः । पूर्वीरिषोबृहतीर्जीरदानोशिक्षाशचीवस्तवताउंपष्टुत् १ ॥ २३ ॥

अयं सोमोष्टावुशना पवमानः सोमस्त्रिष्टुप् ।

८८ अयंसोमइन्द्रतुभ्यंसुन्वेतुभ्यंपवतेत्वमस्यपाहित्वंहयंचकृषेत्ववंवृधइन्दुं॑मदायय॒ज्यवेसोमंम् १ सईरयोनभुरिषाळयोजिम॒हःपुरूणिसा॒तयेवसू॑नि । आदीविश्वांनहुष्या॑णिजा॒तास्वर्षा॒तावनंऊर्ध्वानंवन्त २ वा॒युर्नयोनि॒युत्वाँइ॒ष्टयांमा॒नासत्येवहवआशंभविष्टःविश्ववारोद्रविणोदाइवत्मन्पूषेवधीजवनोऽसिसोम ३ इन्द्रोनयोम॒हाकर्मा॑णिचक्रिंहन्तावृत्राणांमसिसोमपूर्भित् । पैद्वोनहित्वमहिंना-

स्रांह्रन्ताविश्वंस्यासिसोमदस्योः ४ अग्निर्नयोवनआसृज्यमानोवृथापाजांसिकृ-
णुतेनदीषु । जनोनयुध्वांमहतउपब्दिरियर्तिसोमःपवमानऊर्मिम् ५ एतेसो-
माअतिवाराण्यव्यांदिव्यानकोशांसोअभ्रवर्षाः । वृथांसमुद्रंसिन्धवोननीचीः
सुतासोअभिकलशाँअसृग्रन् ६ शुष्मीशर्धोनमारुतंपवस्वानभिशस्तादिव्याय-
थाविट् । आपोनमक्षूसुमतिर्भवानःसहस्रांप्साःपृतनापाण्यग्नः ७ राज्ञोनुते
वरुणस्यव्रतानिवृहद्भांरंतवसोमधामं । शुचिष्ट्वमसिप्रियोनामित्रोदक्षाय्योअर्य-
मेवांसिसोम ८ ॥ २४ ॥

मोस्य सप्तोशना पवमानः सोमस्त्रिष्टुप् ।

८१ प्रोस्यवाह्निःपथ्यांभिरस्यान्दिवोनवृष्टिःपवमानोअक्षाः ।सहस्रधारोअस-
दत्र्यं१स्मेमातुरुपस्थेवनआचसोमः १ राजासिन्धूनामवसिष्टवासंकृतस्यनाव- ॥५१७॥

मारुहद्रजिष्ठाम्। अप्सुद्रप्सोवावृधेश्येनजूतोदुहईंपितादुहईंपितुर्जाम् २ सिंहंनसन्तमध्वोअयासंहरिंमरुषंदिवोअस्यपतिम् । शूरोयुत्सुप्रथमःपृच्छतेगाअस्यचक्षसापरिपात्युक्षा३मधुपृष्ठंघोरमयासमश्वंरथेयुञ्जन्त्युरुचक्रुष्वम्।स्वसारईंजामयोमर्जयन्तिसनाभयोवाजिनंमूर्जयन्ति ४ चतस्रईंघृतदुहःसचन्तेसमानेअन्तर्धरुणेनिषत्ताः । ताईंमर्पन्तिनमसापुनानास्ताईंविश्वतःपरिषन्तिपूर्वीः ५ विष्टम्भोदिवोधरुणःपृथिव्याविश्वाउतक्षितयोहस्तेअस्य । असक्तउत्सोगृणतेनियुत्वान्मध्वोअंशुःपवतइन्द्रियायं ६ वन्वन्नवातोअभिदेववीतिमिन्द्रायसोमवृत्रहापवस्व । शग्धिमहःपुरुश्चन्द्रस्यरायःसुवीर्यस्यपतयःस्याम ७ ॥ २५ ॥

म हिन्वानः पङ्क्तिसिष्ठः पवमानस्त्रिष्टुप् ।

१० प्रहिन्वानोजनितारोदस्योरथोनवाजसनिष्यन्नयासीत् । इन्द्रंगच्छन्वा-

युंधासंशिशानोविश्वावसुहस्तयोरादधानः १ अभित्रिंपृष्ठंवृषणंवयोधामाङ्कूपाणा-
मवावशन्तवाणीः। वनावसानोवरुणोनसिन्धून्विरत्नधादयतेवार्याणि २ शूरंग्रा-
मःसर्ववीरःसहावाजेतापवस्वसनितादनानि। तिग्मायुधःक्षिप्रधन्वासमत्स्वषा-
ळ्साह्वान्पृतनासुशत्रून् ३ उरुगव्यूतिरभयानिकृण्वन्त्समीचीनेआपवस्वापुरं-
ध्री। अपःसिषासन्नुषसःस्व१र्गाःसंचिक्रदोमहोअस्मभ्यंवाजान् ४ मत्सिसोम
वरुणंमत्सिमित्रंमत्सीन्द्रमिन्दोपवमानविष्णुम् । मत्सिशर्धोमारुतंमत्सिदे
वान्मत्सिमहामिन्द्रमिन्दोमदाय ५ एवाराजेवुक्तुमाँअमैनविश्वाघनिघ्नद्दुरिता
पवस्व। इन्दोसूक्तायवचसेवयोधायूयंपातस्वस्तिभिःसदानः ६ ॥ २६ ॥ इति
शाकलर्क्संहितायां सप्तमाष्टके तृतीयोध्यायः ॥ ७ ॥ ३ ॥

असर्जिकश्यपःपरिस्रुवानःसाकमुक्षपञ्चनोधाअधियत्कण्वःकनिक्रन्तिप्रस्कण्वःप्रसेनानीश्चतुर्विंश-तिर्देवोदासिःप्रतर्दनोस्यमेपाष्टापञ्चाशदाघृचंवसिष्ठोपश्यदुत्तराम्रवपृथग्वासिष्ठाइन्द्रप्रमतिर्वैपगणोम-न्युरुपमन्युर्व्याघ्रपाच्छक्तिःकर्णश्रुन्मृळीकोवसुक्रइतिचतुर्दशपराशरोन्त्याःकुत्सोभिनोद्वादशाम्बरीष-ऋजिश्चाचानुष्टुभंहबृहत्युपान्त्याहर्यतायाष्टौरिभसूनुकाश्यपौबृहत्याद्याभीनवंतेनव ।

असर्जि पङ्क्त्यश्यपः पवमानः सोमस्त्रिष्टुप् ।

११ ॐम् असर्जिवकारथ्येयथाजौधियामनोतांप्रथमोमनीषी । दशस्वसारोअधिसानोअव्येऽजन्तिवह्निंसदनान्यच्छ १ वीतीजनंस्यदिव्यस्यकव्यैरधिसुत्रानोनंहुत्यैभिरिन्दुः । प्रयोनृभिरमृतोमर्त्यैभिर्मर्मृजानोऽविभिर्गोभिरद्रिः २ वृषावृष्णेरोरुवद्दंशुरस्मेपवमानोरुशदीतेपयोगोः । सहस्रमृकांपथिभिर्वचोविद-ध्वस्मभिःसूरोअण्वंवियांति ३ रुजाद्रुक्षाचिद्रक्षसःसदांसिपुनानइन्दऊर्णोहिवि

वाजान् । वृश्चोपरिष्टात्तुजतावधेनयेअन्तिदूरादुपनायमेषाम् ४ सप्रत्नवन्नव्यसे विश्ववारसूक्तायपथःकृणुहिप्राचः । येदुःषहांसोवनुषांवृहन्तस्तांस्तेअश्यामपुरुकृत्पुरुक्षो ५ एवापुनानोअपःस्व१र्गाअस्मभ्यंतोकातनयानिभूरि । शंनःक्षेत्रमुरुज्योतींषिसोमज्योङ्नःसूर्यंदृशयेरिरीहि ६ ॥ १ ॥

परि सुवानः पद् कश्यपः पवमानः सोमस्तुष्टुप् ।

१२ परिसुवानोहरिरंशुःपवित्रेरथोनसाजिसनयेहियानः । आपच्छ्लोकंमिन्द्रियंपूयमानःप्रतिदेवाँअंजुषतप्रयोभिः १ अच्छानृचक्षाअसरत्पवित्रेनामदधानःकविरस्ययोनौ । सीदन्होतेवसदनेचमूषूपेमग्मन्नृषयःसप्तविप्राः २ प्रसुमेधागातुविद्युम्नदेवःसोमःपुनानःसदएतिनित्यम् । भुवद्विश्वेषुकाव्येषुरन्तानुजनान्यततेपश्रुधीरः ३ तवत्येसोमपवमाननिण्येविश्वेदेवास्त्रयएकादशासः । ॥५१९॥

दशंस्वधाभिरधिसानोअव्येमृजन्तित्वानद्यःसप्तयह्वीः ४ तन्नुसत्यंपवमानस्यास्तुयत्रविश्वेकारवःसंनसन्त । ज्योतिर्यदह्नेअकृणोदुलोकंप्रावन्मनुंदस्यवेकरभीकंम् ५ परिसद्मेवपशुमान्तिहोतारांजानसत्यःसमितीरियानः । सोमंः पुनानःकलशाँअयासीत्सीदन्मृगोनमहिषोवनेषु ६ ॥ २ ॥

साकमुक्ष पञ्च नोधाः पवमानः सोमास्त्रिष्टुप् ।

१३ साकमुक्षोमर्जयन्तस्वसारोदशधीरस्यधीतयोधनुत्रीः । हरिःपर्यद्रवज्जाःसूर्यस्यद्रोणंननक्षेअत्योनवाजी १ संमातृभिर्नशिशुर्वावशानोवृषांदधन्वे पुरुवारोअद्रिः । मर्योनयोषामभिनिष्कृतंयन्त्संगच्छतेकलशंउस्रियाभिः २ उतप्रपिप्युरूधरस्यायाइन्दुर्धाराभिःसचतेसुमेधाः । मूर्धानंगावःपयसाचमूष्वभिश्रीणन्तिवसुभिर्ननिक्तैः ३ सनोदेवेभिःपवमानरदेन्दोरयिमश्विनेवावशा-

नः । रथिरायतामुशतीपुरन्धिरस्मध्यं१गादावनेवसूनाम् ४ नूनोरयिमुपमास्वनुवन्तंपुनानोवाताप्यंविश्वश्चन्द्रम् । प्रवन्दितुरिन्दोतार्यायःप्रातर्मक्षूधियावसुर्जगम्यात् ५ ॥ ३ ॥ अ.७अ.४

अधियत्पञ्च कण्वः पवमानः सोमस्त्रिष्टुप् ।

१४ अधियदस्मिन्वाजिनीवशुभःस्पर्धन्तेधियःसूर्येनविशः । अपोवृणानःपवतेकवीयन्व्रजन्नपशुवर्धनायमन्म १ हिताव्यूर्ण्वन्नमृतस्यधामस्वर्विदेभुवनानिप्रथन्त । धियःपिन्वानाःस्वसरेनगावःऋतायन्तीरभिवावश्रइन्दुम् २ परियत्कविःकाव्याभरतेशूरोनरथोभुवनानिविश्वा । देवेषुयशोमतीयभूषन्दक्षायराय:पुरुभूषुनव्यः ३ श्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति । श्रियंवसानाअमृतत्वमायन्भवन्तिसत्यासमिथामितद्रौ ४ इषमूर्जमभ्यर्षा- ॥५२०॥

श्वंगामुरुज्योतिःकृणुहिमत्सिदेवान् । विश्वानिहिसुषहातानितुभ्यंपवमानवाघसेसोमशत्रून् ५ ॥ ४ ॥

कनिक्रन्त पञ्च मस्कण्वः पवमानः सोमोऽनुष्टुप् ।

१५ कनिक्रन्तिहरिरासृज्यमानःसीदन्वनस्यजठरेपुनानः । नृभिर्यतःकृणुतेनिर्णिजंगाअतोमतीर्जनयतस्वधाभिः १ हरिःसृजानःपथ्यामृतस्येयर्तिवाचंमरितेवनावम् । देवोदेवानांगुह्यानिनामाविष्कृणोतिबर्हिषेप्रवाचे २ अपामिवेदूर्मयस्ततुराणाःप्रमनीषाईरतेसोममच्छं । नमस्यन्तीरुपचयन्तिसंचाचंविशन्त्युशतीरुशन्तम् ३ तंमर्मृजानंमहिषंनसानावंगुंदुहन्त्युक्षणंगिरिष्ठाम् । तंवावशानंमतयःसचन्तेत्रितोबिभर्तिवरुणंसमुद्रे ४ इष्यन्वाचमुपवक्तेवहोतुःपुनान ईन्दोविष्यामनीषाम् । इन्द्रश्चयत्क्षयथुःसौभगायसुवीर्यस्यपतयःस्याम ५ ॥ ५ ॥

म सेनानीश्चतुर्विंशतिः प्रतर्दनो दैवोदासिः पवमानस्त्रिष्टुप् ।

१६ प्रसेनानीःशूरोअग्रेरथानांगव्यन्नेतिहर्षतेअस्यसेना । भद्रान्कृण्वन्निन्द्र-हवान्त्सखिभ्यआसोमोवस्त्रारभसानिदत्ते १ समस्यहरिंहरयोमृजन्त्यश्वहयैर-निशितंनमोभिः । आतिष्ठतिरथमिन्द्रस्यसखाविद्वाँएनासुमतिंयात्यच्छे २ स नोदेवदेवतातेपवस्वमहेसोमप्सरंसइन्द्रपानः । कृण्वन्नपोवर्षयन्द्यामुतेमामुरोरा नोवरिवस्यापुनानः ३ अजीतयेऽहतयेपवस्वस्वस्तयेसर्वतातयेवृहते ।तदुशन्ति विश्वेऽमेसख्यस्तदहंवश्मिपवमानसोम ४ सोमःपवतेजनितामतीनांजनिता दिवोजनितापृथिव्याः । जनिताग्नेर्जनितासूर्यस्यजनितेन्द्रस्यजनितोतविष्णोः ५ ॥ ६ ॥ ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणाम् । श्येनोगृध्राणांस्वधितिर्वनानांसोमःपवित्रमत्येतिरेभन् ६ प्रावीविपद्वाचऊर्मिंन ॥५२१॥

सिन्धुर्गिरः सोमः पवमानो मनीषाः । अन्तः पश्यन्वृजनेमावराण्यातिष्ठति वृषभो गोषुजानन् ७ समत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभिवाजमर्ष । इन्द्रायेन्दो पवमानो मनीष्यं शोरूर्मिर्मीरयगाइषण्यन् ८ परिप्रियः कलशे देववातइन्द्राय सोमो रण्योमदाय । सहस्रधारः शतवाजइन्दुर्वाजीनसाप्तिः समनाजिगाति ९ सपूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ । अभिशस्तिपा भुवनस्य राजाविदद्गातुं ब्रह्मणे पूयमानः १० ॥ ७ ॥ त्वया हिनः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवानः ११ यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्भविष्मान् । एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनया युधानि १२ पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो

अन्यें । अवद्रोणांनिघृतवांन्तिसीदमदिन्तमोमत्सरइंन्द्रपानंः १३ वृष्टिंदिवःशा-
तधारःपवस्वसहस्रसावांजयुर्दैववींतौ । संसिन्धुभिःकलशेंवावशानःसमुस्रि-
यांभिःप्रतिरन्नआयुंः १४ एषस्यसोमोंमतिभिःपुनानोऽत्योनवाजीतरतीदरा-
तीः । पयोनदुग्धमदितेरिरिप्रमुर्विवगातुःसुयमोनवोळ्हा १५ ॥ ८ ॥ स्वायुधः
सोतृभिःपूयमानोऽभ्यर्षगुह्यंचारुनामं । अभिवाजंसप्तिरिवश्रवस्याभिवायुम-
भिगादेवसोम १६ शिशुंजज्ञानंहर्यतंमृजन्तिशुम्भन्तिवह्निंमरुतोगणेनं । क्रवि-
र्गीभिःकाव्येनाकविःसन्त्सोमःपवित्रमत्येतिरेभंन् १७ ऋषिंमनायऋंषिकृत्स्व-
र्षाःसहस्रंणीथःपदवीःकवीनाम् । तृतीयंधामंमहिषःसिषासन्त्सोमोंविराजम-
नुराजतिष्टुप् १८ चमूषच्छ्येनःशकुनोविभृत्वांगोविन्दुर्द्रप्सआयुधानिबिभ्रत् ।

अपामूर्मिंसचमानःसमुद्रंतुरीयंधामंमहिषोविवक्ति ११ मर्योनशुभ्रस्तन्वंमृ-
जानोऽत्योनसृत्वांसनयेधनानाम् । वृषेवयूथापरिकोशमर्षन्कनिक्रदच्चम्वो३रा
विवेश २० ॥ १ ॥ पवस्वेन्दोपवमानोमहोभिःकनिक्रदत्परिवाराण्यर्षा । क्री-
ळंश्चम्वो३राविशपूयमानइन्द्रंतेरसोमदिरोममत्तु २१ प्रास्यधारावृहतीरसृग्र-
क्तोगोभिःकलशाँआविवेश । सामकृण्वन्त्सामन्योविपश्चित्क्रन्दन्नेत्यभिसख्युर्न
जामिम् २२ अपघ्नन्नेषिपवमानशत्रूंन्मृयंनजारोअभिगींतइन्दुः । सीदन्वनेपु
शकुनोनपत्वासोमःपुनानःकलशेषुसत्ता २३ आतेरुचःपवमानस्यसोमयो-
पेवयन्तिसुदुघाःसुधाराः । हरिरानीतःपुरुवारोअप्स्वचिक्रदत्कलशेदेवयू-
नाम् २४ ॥१०॥ इति शाकलर्क्संहितायां नवमे मण्डले पञ्चमोनुवाकः ॥ ९ ॥ ५ ॥

अस्य प्रेषाष्टापञ्चाशत्पवमानः सोमोऽनुष्टुप् । आद्यर्चस्य वसिष्ठः । द्वितीयस्येन्द्रप्रमतिर्वासिष्ठः । तृतीयस्य वृषगणो वासिष्ठः । चतुर्थस्य मन्युर्वासिष्ठः । पञ्चमस्योपमन्युर्वासिष्ठः । षष्ठस्य व्याघ्रपाद्वासिष्ठः । सप्तमस्य शक्तिर्वासिष्ठः । अष्टमस्य कर्णश्रुद्वासिष्ठः । नवमस्य मृळीको वासिष्ठः । दशमस्य वसुक्रो वासिष्ठः । अन्त्यानां चतुर्दशानामृचां कुत्सः । शिष्टानां पराशरः ।

१७ अस्यप्रेषाहेमनापूयमानोदेवोदेवेभिःसमपृक्तरसम् । सुतःपवित्रंपर्येतिरेभन्मितेवसद्मंपशुमान्तिहोता १ भद्रावस्त्रांसमुन्या३वसानोमहान्कविर्निवचनानिशंसन् । आवच्यस्वचम्वोःपूयमानोविचक्षणोजागृविर्देववीतौ २ समुप्रियो मृज्यतेसानोअव्येयशस्तरोयशसांक्षैतोअस्मे । अभिस्वरधन्वापूययमानोयूयंपातस्वस्तिभिःसदानः ३ प्रगायताभ्यर्चामदेवान्त्सोमंहिनोतमहतेधनाय । स्वादुःपवातेअतिवारमव्युमार्शादातिकलशंदेवयुनः ४ इन्दुर्देवानामुपसख्यमायन्त्स-

हस्त॑धारःपवते॒मदा॑य । नृभि॒:स्तवा॑नो॒अनु॒धाम॒पूर्व॑मग॒न्निन्द्रं॑म॒हतेसौभ॑गाय ५ ॥ ११ ॥ स्तो॒त्रेरा॒येहरि॑रर्षापुना॒नइन्द्रं॑मदो॒गच्छ॑तु॒तेभरा॑य । दे॒वैर्यो॑हिस॒रथं॒राधो॒ अच्छा॑यू॒यंपा॑तस्व॒तिभि॒:सदा॑नः ६ प्रकाव्य॑मु॒शनै॑वब्रु॒वा॒णोदे॒वोदे॒वानां॒जनि॑मा विवक्ति । महिं॑व्र॒तःशुचि॑बन्धु॒:पाव॑क:प॒दाव॑रा॒होअ॒भ्ये॑ति॒रेभ॑न् ७ ग्रहं॑सासंस्तृप॒लेम॒न्युमच्छा॒मादस्तं॑वृ॒षगणाअया॑सुः । आङ्कू॑ष्यं॒१॒॑पव॑मानं॒सखा॑योदु॒र्मंष॑॑साकंप्र॒ वं॑दन्तिवा॒णम् ८ सरं॑हतउरुगा॒यस्य॑जू॒तिंवृथा॒क्रीळ॑न्तंमिमते॒नगा॑वः । परि॑ण॒सं कृ॑णुते॒तिग्मशृ॑ङ्गो॒दिवा॒हरि॑र्दद॒॑शे॒नक्त॑मृ॒ज्रः १ इन्दु॑र्वा॒जीप॑वते॒गोन्यो॑घा॒इन्द्रे॑सो॒मः सह॒इन्व॒न्मदा॑य । ह॒न्ति॒रक्षो॒बाध॑ते॒पर्य॑रा॒तीर्वरि॑वः कृ॒ण्वन्वृ॒जन॑स्य॒राजा॑ १० ॥१२॥ अधु॑क्षरन्या॒मध्वा॑पृ॒चा॒नस्ति॒रोरोम॑पवते॒अद्रि॑दुग्धः । इन्दु॒रिन्द्र॑स्यस॒ख्यं जु॒॑षा॒णोदे॒वोदे॒वस्य॑मत्स॒रोमदा॑य ११ अ॒भिप्रि॒याणि॑पवतेपुना॒नोदे॒वोदे॒वान्त्स्वे॒न

रसेनपृश्चन् । इन्दुर्धर्मोण्यृतुथावसानोदशाक्षिपोअव्यतसानोअव्ये १२ वृषा
शोणोअभिकनिक्रदद्वानदयन्नेतिपृथिवीमुतद्याम् । इन्द्रस्येववग्नुराशृण्वआजौ
प्रचेतयन्नर्षतिवाचमेमाम् १३ रसाय्यःपयसापिन्वमानईरयन्नेपिमधुमन्तमंशु-
म् । पवमानःसन्तनिमेपिकृण्वन्निन्द्रायसोमपरिपिच्यमानः १४ एवापवस्वम-
दिरोमदायोदग्राभस्यनमयन्वधस्नैः । परिवर्णभरमाणोरुशन्तंगव्युनोअर्षपरि
सोमसिक्तः १५॥१३॥ जुष्टीनइन्दोसुपथासुगान्युरौपवस्ववरिवांसिकृण्वन् । घ-
नेवविष्वंग्दुरितानिविघ्नन्नधिष्णुनाधन्वसानोअव्ये १६ वृष्टिंनोअर्षदिव्यांजिगत्नु-
मिळावतीशन्त्यींजीरदानुम् । स्तुकेववीताधन्वाविचिन्वन्वन्धूरिमाँअवराँइन्दो
वायून् १७ ग्रन्थिनविष्यंग्राथितंपुनानऋजुंचंगातुंवृजिनंचसोम । अत्योनक्रदो
हरिरासृजानोमर्योदेवधन्वपस्त्यावान् १८ जुष्टोमदायदेवतातइन्दोपरिष्णुना-

न्वसानोअव्ये । सहस्रधारःसुरभिरदब्धःपरिस्रवद्वाजसातौनृषह्ये १९ अरश्मा-
नोयेऽरथाअयुक्ताअत्यासोनसंसृजानासंआजौ । एतेशुक्रासोधन्वन्तिसोमादेवा-
सस्ताँउपयातापिबध्यै २० ॥ १४ ॥ एवानइन्दोअभिदेववीतिंपरिस्रवनभोअर्ण-
श्वमूर्मुं । सोमोअस्मभ्यंकाम्यंबृहन्तंरयिंददातुवीरवन्तमुग्रम् २१ तक्षद्यदीमन
सोवेनतोवाग्ज्येष्ठस्यवाधमाणिक्षोरनीके । आदीमायन्वरमावावशानाजुष्टं
पतिंकलशेगावइन्दुम् २२ प्रदानुदोदिव्योदानुपिन्वऋतमृतायपवतेसुमेधाः ।
धर्माभुवद्वृजन्यस्यराजाप्ररश्मिभिर्दशभिर्भारिभूमं २३ पवित्रेभिःपवमानोन-
चक्षाराजादेवानामुतमर्त्यानाम् । द्विताभुवद्रयिपतीरयीणामृतंभरत्सुभृतंचाचिं-
न्दुः २४ अवाँइवश्रवसेसातिमच्छेन्द्रस्यवायोरभिवीतिमर्षासनःसहस्रावृहतीरि-
षोदाभवासोमद्रविणोवित्पुनानः २५ ॥ १५ ॥ देवाव्योनःपरिषिच्यमानाःक्ष-

यँसूर्यीरँधन्वन्तुसोमाः । आयुज्यवःसुमतिंविश्ववारा होतारोनदिंवियजोमन्द्रतं-
माः२६एवांदेवतातेपवस्वमहेसोमप्तरंसेदेवपानः। महश्चिद्धिष्मासंहिताःसं-
मयंकृधिसुष्ठानेरोदसीपुनानः २७ अश्वोनक्रदोवृषभिर्युजानःसिंहोनभीमोमनं-
सोजवीयान्। अर्वाचीनैःपथिभिर्येरजिष्ठाआपवस्वसौमनसंनइन्दो २८ शतंधा-
रादिवजातासहस्रंमेनाःकवयोमृजन्ति । इन्दोसनित्रंदिवआपवस्वपुरए-
तासिमहतोधनस्य २९ दिवोनसर्गाअससृग्रमक्षाराजानमित्रंप्रमिनातिधीरः ।
पितुर्नपुत्रःक्रतुभिर्यतानआपवस्वविशेअस्याअजीतिम् ३० ॥ १६ ॥ प्रतेधारा
मधुमतीरसृग्रन्वाराण्यप्तोअत्येष्यव्यान्। पवमानपवसेधामगोनाजज्ञानःसू-
र्यमपिन्वोअर्कैः ३१ कनिक्रददनुपन्यामृतस्यशुक्रोविभास्यमृतस्यधाम। सइ-
न्द्रायपवसेमत्सरवान्हिन्वानोवाचंमतिभिःकवीनाम् ३२ दिव्यःसुपर्णोऽवचक्षि

सोमपिन्वन्धाराःकर्मणादेववीतौ । एन्दोविशकलशंसोमधानंक्रन्दन्निहिसूर्य-
स्योपरिमम् ३३ तिस्रोवाचईरयतिप्रवह्निरृतस्यधीतिंब्रह्मणोमनीषाम् । गा-
वोयन्तिगोपतिंपृच्छमानाःसोमंयन्तिमतयोवावशानाः ३४ सोमंगावोधेन-
वावावशानाःसोमंविप्रामतिभिःपृच्छमानाः । सोमःसुतःपूयतेअज्यमानःसोमे
अर्कास्त्रिष्टुभःसंनवन्ते ३५ ॥ १७ ॥ एवानःसोमपरिषिच्यमानआपवस्वपूय-
मानःस्वस्ति । इन्द्रमाविशबृहतारवेणवर्धयावाचंजनयापुरंन्धिम् ३६ आजा-
गृविर्विप्रऋतामतीनांसोमःपुनानोअसदच्चमूषु । सपन्तियंमिथुनासोनिकामा
अध्वर्यवोरथिरासःसुहस्ताः ३७ सपुनानउपसूरेनधातोभेअप्रारोदसीविषआवः ।
प्रियाचिद्यस्यप्रियसासंऊतीसतूधनेकारिणेनप्रयंसत् ३८ सवर्धितावधनःपूय-
मानःसोमोमीढ्वाँअभिनोज्योतिषावीत् । येनानःपूर्वेपितरःपदज्ञाःस्वर्विदोअभि

गाअद्रिंमुष्णन् ३९ अक्रान्त्समुद्रःप्रथमेविधर्मञ्जनयन्प्रजाभुवनस्यराजा । वृषा
पवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइन्दुः ४० ॥ १८ ॥ महत्तत्सो-
मोमहिषश्चकारापांयद्गर्भोऽवृणीतदेवान् । अदधादिन्द्रेपवमानओजोऽजनय-
त्सूर्येज्योतिरिन्दुः ४१ मत्सिवायुमिष्टयेराधसेचमत्सिमित्रावरुणापूयमा-
नः । मत्सिशर्धोमारुतंमत्सिदेवान्मत्सिद्यावापृथिवीदेवसोम ४२ ऋजुः
पवस्ववृजिनस्यहन्तापामीवांबाधमानोमृधश्च । अभिश्रीणन्पयःपयसाभि
गोनामिन्द्रस्यत्वंतववयंसखायः ४३ मध्वःसूदंपवस्ववस्वउत्संवीरंचनआपव-
स्वाभगंच । स्वदस्वेन्द्रायपवमानइन्दोरयिंचनआपवस्वासमुद्रात् ४४ सोमः
सुतोधारयात्योनहित्वासिन्धुर्ननिम्नमभिवाज्यक्षाः । आयोनिंवन्यमसदत्पुनानः
समिन्दुर्गोभिरसरत्समद्रिः ४५ ॥ ३१ ॥ एषस्यतेपवतइन्द्रसोमश्चमूषुधीरंउ-

शतेतवस्वान् । स्वर्चक्षारथिरःसत्यशुष्मःकामोनयोदैवयतामसंजि ४६ एषब्र-
ह्मनुवयंसापुनानस्तिरोवपाँसिदुहितुर्दधानः । वसानःशर्मत्रिवरूथमप्सुहोतेव
यात्तिसमनेषुरेभन् ४७ नूनस्त्वंरथिरोदेवसोमपरिस्रवचम्वोःपूयमानः । अप्सु
स्वादिष्ठोमधुमाँऋतावादेवोनयःसवितासत्यमन्मा ४८ अभिवायुंवीत्यर्षागृणा-
नोऽभिमित्रावरुणापूयमानः । अभीनरंधीजवनंरथेष्ठामभीन्द्रंवृषणंवज्रबाहु-
म् ४९ अभिवस्त्रासुवसुनान्यर्षाभिधेनूःसुदुघाःपूयमानः । अभिचन्द्राभर्तवेनो
हिरण्याभ्यश्वान्राथिनोदेवसोम ५० ॥ २० ॥ अभीनोअर्षदिव्यावसून्यभिवि-
श्वापार्थिवापूयमानः । अभियेनद्रविणमश्नवामाभ्यर्षेयंजमदग्निवन्नः ५१ अ-
यापवापवस्वैनावसूनिमांश्चत्वईन्दोसरांसिप्रधन्व । ब्रह्मश्रिदत्रवातोनजूतःपुरुमे
धश्चित्तकवेनरंदात् ५२ उतनएनांपवयापवस्वाश्रुतेश्रवाय्यस्यतीर्थे । षष्टिंस-

भ्वासहम् १ परिष्यसुवानोअव्ययंरथेनवमाँव्यत । इन्दुराभिद्रुणाहितोहियानो धाराभिरक्षाः २ परिष्यसुवानोअंक्षाइन्दुरव्येमदच्युतः । धारायऊर्ध्वोअध्वरे भ्राजानैतिगव्ययुः ३ सहित्वंदेवशश्वतेवसुमतायवाशुवे । इन्दोसहस्रिणंरयिं शतात्मानंविवाससि ४ वयंतेअस्यवृत्रहन्वसोवस्वःपुरुस्पृहः । निनेदिष्ठतमा इषःस्यामसुम्नस्याध्रिगो ५ द्विर्यपञ्चस्वयंशसंस्वसारोअद्रिसंहतम् । प्रियमिन्द्रस्यकाम्यंप्रस्नापयन्त्यूर्मिणम् ६ ॥ २३ ॥ परित्यंहर्यतंहरिंवभ्रुंपुनन्तिवारेण । योदेवान्विश्वाँइत्परिमदैनसहगच्छति ७ अस्यवोह्यवसापान्तोवक्षसाधनम् । यःसूरिपुश्रवोबृहद्वधेस्तृर्णहर्यतः ८ सवायज्ञेपुमानवीइन्दुर्जनिष्टरोदसी । देवोदेवीगिरिष्ठाअस्त्रेधन्तंतुविष्वणि ९ इन्द्रायसोमपातवेवृत्रघ्नेपरिषिच्यसे । नरेचदक्षिणावतेदेवायसदनासदे १० तेप्रत्नासोव्युष्टिषुसोमाःपवित्रेअक्षरन् ।

अपप्रोथन्तःसनुतर्हुरश्चितःप्रातस्ताँअप्रचेतसः ११ तंसखायःपुरोरुचंयूयंवयंचसूरयः। अश्यामवाजंगन्ध्यंसनेमवाजंपस्त्यम् १२ ॥ २४ ॥

आहर्यतायाष्टौ रेभसूनू काश्यपौ पवमानः सोमोनुष्टुप्। आद्या बृहती।

११ आहर्यतायंधृष्णवेधनुस्तन्वन्तिपौंस्यम् । शुक्रांवयन्त्यसुरायनिर्णिजंविपामग्रेमहीयुवः १ अधक्षपापरिष्कृतोवाजाँअभिप्रगाहते। यदीविवस्वतोधियोहरिंहिन्वन्तियातवे २ तमस्यमर्जयामसिमदोयइन्द्रपातमः। यंगावआसभिर्दधुःपुरानूनंचसूरयः ३ तंगाथयापुराण्यापुनानमभ्यनूषत। उतोकृपन्तधीतयोदेवानांनामबिभ्रतीः ४ तमुक्षमाणमव्ययेवारेपुनन्तिधर्णसिम् । दूतंनपूर्वचित्तयआशासतेमनीषिणः ५ ॥ २५ ॥ सपुनानोमदिन्तमःसोमश्चमूषुसीदति। पशौनरेतआदधत्पतिर्वचस्यतेधियः ६ समृज्यतेसुकर्मभिर्देवोदेवेभ्यःसु-

तः । विदेयदांसुसंदृदिर्महीरपोविगाहते ७ सुतइन्दोपवित्रआनृभिर्यतोविनीय-से । इन्द्रायमत्सरिन्तमश्चमूष्वानिषीदसि ८ ॥ २६ ॥

अभी नव रेभसूनू काश्यपौ पवमानः सोमोनुष्टुप् ।

१०० अभीनवन्तेअद्रुहःप्रियमिन्द्रस्यकाम्यम् । वत्संनपूर्वआयुनिजातंरिहन्तिमातरः १ पुनानइन्दवाभरसोमंहिवंहसंरयिम् । त्वंवसूनिपुष्यसिविश्वानि दाशुषोगृहे २ त्वंधियंमनोयुजंसृजावृष्टिंनतन्यतुः । त्वंवसूनिपार्थिवादिव्याच सोमपुष्यसि ३ परितेजिग्युषोयथाधारासुतस्यधावति । रंहमाणाव्यय्यंवारंवाजीवंसानसिः ४ क्रत्वेदक्षायनःकवेपवस्वसोमधारया । इन्द्रायपातवेसुतोमित्रायवरुणायच ५ ॥ २७ ॥ पवस्ववाजसातमःपवित्रेधारयासुतः । इन्द्राय सोमविष्णवेदेवेभ्योमधुमत्तमः ६ त्वांरिहन्तिमातरोहरिंपवित्रेअद्रुहः । वत्सं

जातंनधेनवःपवमानविधर्मणि ७ पवमानमहिश्रवश्चित्रेभिर्यासिरश्मिभिः । शर्धन्तमांसिजिघ्नसेविश्वानिदाशुषोगृहे ८ त्वंद्यांचमहिव्रतपृथिवींचातिजभ्रिषे । प्रतिद्रापिमंमुञ्चथाःपवमानमहित्वना १ ॥ २८ ॥ इति शाकलर्क्संहितायां सप्तमाष्टके चतुर्थोध्यायः ॥ ७ ॥ ४ ॥

पुरोजितीपोळशान्यीगुःश्यावाश्चिर्यातिर्नाहुषोनहुषोमानवोमनुःसांवरणइतिर्चाःशेषेप्रजापतिरुपांयेगायञ्योष्णाष्टौत्रितऔष्णिहंवैमपुनानायपट्द्वितआप्यःसखायःपर्वतनारदौकाश्यपौद्वेशिखण्डिन्यौवाप्सरसौतंवइन्द्रमच्छपलूनाग्निश्चाक्षुषश्चक्षुर्मानवोमनुराप्सवइतिर्चाःपञ्चाग्निःपरीतःपाङ्क्तिशतिः सप्तऋषयःभागायंतृतीयापोळश्यौद्विपदेअष्टम्याद्येचबृहत्यौपवस्वपोळशगौरिवीतिर्हृचंशक्तिरेकामूरुर्ऋजिश्वोर्ध्वसप्ताकृतयशाऋणंचयइत्यृषयोद्वर्चास्तिस्रःशक्तिःकाकुभाःभागायाःसुसुन्वेगायत्रीयवमध्या परासतोबृहतीपरिमध्यधिकाग्नयोधिष्ण्याऐश्वरयोद्वैपदंपर्यूषुद्वादशऽरुणत्रसदस्यूराजानौतिस्रोनुष्टुभःपिपीलिकमध्याःपलूर्ध्वबृहत्यस्तिस्रश्चविराजोयारुचात्वचमनानतःपारुच्छेपिरासप्तैनानानंचतुष्कं शिशुःपाङ्क्तिरशर्पणावत्येकादशकश्यपोयइन्दोश्चतुष्कंदशमंमण्डलमग्रेसप्तत्रितःपिमीहिनःमतएकः ॥

पुरोजिती षोळश पवमानः सोमोनुष्टुप् । उपाद्ये गायत्र्यौ । प्रथमतृचस्थान्धीगुः श्यावाश्विः । द्वितीयस्य ययातिर्नाहुषः । तृतीयस्य नहुषो मानवः । चतुर्थस्य मनुः सांवरणः । अन्त्यचतुष्कस्य प्रजायतिः ।

१०१ ओम् पुरोजितीवोअन्धसःसुतायमादयित्नवे । अपश्वानंश्रथिष्टनुस-खायोदीर्घजिह्वयम् १ योधार्यापावकयापरिप्रस्यन्दतेसुतः । इन्दुरश्वोनकृ-त्व्यः २ तंदुरोषमभीनरःसोमंविश्वाच्याधिया । यज्ञंहिन्वन्त्यद्रिभिः ३ सुतासो मधुमत्तमाःसोमाइन्द्रायमन्दिनः । पवित्रवन्तोअक्षरन्देवान्गच्छन्तुवोमदाः ४ इन्दुरिन्द्रायपवतइतिदेवासोअब्रुवन् । वाचस्पतिर्मखस्यतेविश्वस्येशानओज-सा ५ ॥ १ ॥ सहस्रधारःपवतेसमुद्रोवाचमीखयः । सोमःपतीरयीणांसखेन्द्र-स्यदिवेदिवे ६ अयंपूषारयिर्भगःसोमःपुनानोअर्षति । पतिर्विश्वस्यभूमनोव्य-ख्यद्रोदसीउभे ७ समुप्रियाअनूषतगावोमदायघृष्वयः । सोमासःकृण्वतेपथः

पवमानासइन्दवः ८ यओजिष्ठस्तमाभरपवमानश्रवाय्यम् । यःपञ्चचर्षणीराभि
रयियेनवनामहे १ सोमाःपवन्तइन्दवोऽस्मभ्यंगातुवित्तमाः । मित्राःसुवाना
अरेपसःस्वाध्यःस्वर्विदः १० ॥ २ ॥ सुष्वाणासोव्यद्रिभिश्चितानागोरधित्व-
चि । इषंमस्मभ्यमभितःसमस्वरन्वसुविदः ११ एतेपूतासविपश्चितःसोमासोदध्याशिरः । सूर्यासोनदर्शतासोजिगत्नवोध्रुवाघृते १२ प्रसुन्वानस्यान्धसोमतीनवृतत्तद्वचः । अपश्वानंमराधसंहतामखंनभृगवः १३ आजामिरत्कैअव्यतभुजेनपुत्रओण्योः । सरंज्जारोनयोषणांवरोनयोनिंमासदम् १४ नवीरोदक्षसाधनोविश्वस्तुस्तम्भरोदसी । हरिंःपवित्रेअव्यतवेधानयोनिंमासदम् १५ अव्यो वारेभिःपवतेसोमोगव्येअधित्वचि । कनिक्रदद्वृषाहरिरिन्द्रस्याभ्येतिनिष्कृतम् १६ ॥ ३ ॥

१०२ क्राणाशिशुर्महीनांहिन्वन्नृतस्यदीधितिम् । विश्वापरिप्रियाभुवदधद्वि-
ता १ उपत्रितस्यपाष्योऽरभक्रयद्धरिपदम् । यज्ञस्यसप्तधामभिरधप्रियम् २
त्रीणित्रितस्यधारयापृष्ठेष्वेरयारयिम् । मिमीतेअस्ययोजनाविसुक्रतुः ३ ज-
ज्ञानंसप्तमातरोवेधामशासतश्रिये । अयंध्रुवोरयीणांचिकेतयत् ४ अस्यव्रतेस-
जोषसोविश्वेदेवासोअद्रुहः । स्पार्हाभवन्तिरन्तयोजुषन्तयत् ५ ॥ ४ ॥ यमी
गर्भमृतावृधोदृशेचारुमजीजनन् । कविंमंहिष्ठमध्वरेपुरुस्पृहम् ६ समीचीने
अभित्मनायद्धविष्कृतस्यमातरा । तन्वानायज्ञमानुषन्यदञ्जते ७ कृत्वाशुक्रेभिर-
क्षभिर्ऋणोरपव्रजंदिवः । हिन्वन्नृतस्यदीधितिंप्राध्वरे ८ ॥ ५ ॥

प्र पुनानाय पद् द्वित आह्यः पवमानः सोम उष्णिक् ।

१०३ प्रपुनानायवेधसेसोमायवचउद्यतम् । भृतिंनभरामतिभिर्जुजोषते १ परिवारण्यव्ययागोभिरञ्जानोअर्षति । त्रीषधस्थापुनानःकृणुतेहरिः २ परि कोशंमधुश्चुतमव्ययेवारेअर्षति । अभिवाणीरृषीणांसप्तनूषत ३ परिणेतामंतीनांविश्वदेवोअदाभ्यः । सोमःपुनानश्चम्वोर्विशद्धरिः ४ परिदेवीरनुस्वधाइन्द्रेणयाहिसरथम् । पुनानोवाघद्भाघद्भिरमर्त्यः ५ परिसप्तिर्नवाजयुर्देवोदेवेभ्यः सुतः । व्यानशिःपवमानोविधावति ६ ॥ ६ ॥ इति शाकलर्क्संहितायां नवमे मण्डले षष्ठोनुवाकः ॥ ९ ॥ ६ ॥

सखायः पद् पर्वतनारदौ काश्यपौ द्वे शिखण्डिन्यावप्सरसौ पवमानः सोम उष्णिक् ।

१०४ सखायआनिषीदतपुनानायप्रगायत । शिशुंनयज्ञैःपरिभूषतश्रिये १ ॥८३१

समीवत्सनमातृभिःसृजतागयसाधनम् । देवाव्यं१मदमभिद्विशावसम् २ पुनातादक्षसाधनंयथाशर्धायवीतये । यथामित्रायवरुणायशंतमः ३ अस्मभ्यं त्वावसुविदंमभिवाणीरनूषत । गोभिष्टेवर्णमभिवासयामसि ४ सनोमदानांपतइन्दोदिवप्सराआसि । सखेवसख्येगातुवित्तमोभव ५ सनेमिकृध्य१स्मदारक्षसंकंचिदृत्रिणम् । अपादेवंह्वयुमंहोयुयोधिनः ६ ॥ ७ ॥

तं वः पद् पर्वतनारदौ पवमानः सोम उष्णिक् ।

१०५तंवःसखायोमदायपुनानमभिगायत । शिशुंनयज्ञैःस्वदयन्तगूर्तिभिः१ संवत्सइवमातृभिरिन्दुर्हिन्वानोअज्यते । देवावीर्मदोमतिभिःपरिष्कृतः २ अयं दक्षायसाधनोऽयंशर्धायवीतये । अयंदेवेभ्योमधुमत्तमःसुतः ३ गोमन्नइन्दोअश्ववत्सुतःसुदक्षधन्व । शुचिंतेवर्णमधिगोषुदीधरम् ४ सनोहरीणांपतइन्दोदेव-

वित्तमोदेवेभ्योमधुमत्तमः । सहस्रंयाहिपथिभिःकनिक्रदत् ६ पवस्वदेववीतय इन्दोधाराभिरोजसा । आकलशंमधुमान्त्सोमनःसदः ७ तवद्रप्साउदप्रुतइन्द्रं मदायवावृधुः । त्वांदेवासोअमृतायुकंपपुः ८ आनःसुतासइन्दवःपुनानाधावतारयिम् । वृष्टिद्यावोरीत्यापःस्वर्विदः ९ सोमःपुनानऊर्मिणाव्योवारंविधावति । अग्रेवाचःपवमानःकनिक्रदत् १० ॥ १० ॥ धीभिर्हिन्वन्तिवाजिनंवने क्रीळन्तमत्यविम् । अभित्रिपृष्ठंमतयःसमस्वरन् ११ असर्जिकलशाँआभिमीळ्हेसप्तिर्नवाजयुः । पुनानोवाचंजनयन्नसिष्यदत् १२ पवतेहर्यतोहरिरतिह्वरांसिरंह्या । अभ्यर्षन्त्स्तोतृभ्योवीरवद्यशः १३ अयापवस्वदेवयुर्मधोर्धाराअसृक्षत । रेभन्पवित्रंपर्येषिविश्वतः १४ ॥ ११ ॥

परीतः षड्विंशतः पवमानः सोमः । द्वितीयापञ्चमीसप्तम्येकादशीत्रयोदशीपञ्चदश्यष्टादशी-
विंशीद्वाविंशीचतुर्विंशीषड्विंश्यः सतोबृहत्यः । तृतीयापोडश्यौ द्विपदे । शिष्टा बृहत्यः ।

१०७ परीतोषिंञ्चतासुतंसोमोयउत्तमंहविः । दधन्वाँयोनर्योअप्स्व१न्तरा
सुपावसोमुमद्रिभिः १ नूनंपुनानोऽविभिःपरिस्रवादब्धःसुरभितरः । सुतेचि-
त्त्वाप्सुमदामोअन्धसाश्रीणन्तोगोभिरुत्तरम् २ परिसुवानश्चक्षसेदेवमादनः
ऋतुरिन्दुर्विचक्षणः ३ पुनानःसोमधारयापोवसानोअर्षसि । आरत्नधायोनिमृ-
तस्यसीदस्युत्सोदेवहिरण्ययः ४ दुहानऊधर्दिव्यंमधुप्रियंप्रत्नंसधस्थमासदत् ।
आपृण्छ्यँधरुणंवाज्यर्षतिनृभिर्धूतोविचक्षणः ५ ॥ १२ ॥ पुनानःसोमजागृवि-
रव्योवारेपरिप्रियः । त्वंविप्रोअभवोऽङ्गिरस्तमोमध्वायज्ञंमिमिक्षनः ६ सोमो
मीढ्वान्पवतेगातुवित्तमऋषिर्विप्रोविचक्षणः । त्वंकविरभवोदेववीतमआसूर्यंरोह-

योदिवि ७ सोमंउयुवाणःसोतृभिरधिष्णुभिरवीनाम् । अश्वयेवहरितायातिधा-
रयामन्द्रयायातिधारया ८ अनूपेगोमान्गोभिरक्षाःसोमोदुग्धाभिरक्षाः । समुद्रं
नसंवरणान्यग्मन्मन्दीमदायतोशते ९ आसोमसुवानोअद्रिभिस्तिरोवाराण्य-
व्यया । जनोनपुरिचम्वोर्विशद्धरिःसदोवनेषुदधिषे १० ॥ १३ ॥ समामृजे
तिरोअण्वानिमेष्योमीळ्हेसप्तिर्नवाजयुः । अनुमाद्यःपवमानोमनीषिभिःसोमो
विप्रेभिर्ऋकंभिः ११ प्रसोमदेववीतयेसिन्धुर्नपिप्येअर्णसा । अंशोःपयसामदि-
रोनजागृविरच्छाकोशंमधुश्चुतम् १२ आहर्यतोअर्जुनेअत्केअव्यतप्रियःसूनुर्न
मर्ज्यःतमींहिन्वन्त्यपसोयथारथंनदीष्वागभस्त्योः १३ अभिसोमासआयवःप-
वन्तेमद्यंमदम् । समुद्रस्याधिविष्टपिमनीषिणोमत्सरासःस्वर्विदः १४ तरत्समु-
द्रंपवमानऊर्मिणाराजादेवऋतंबृहत् । अर्षन्मित्रस्यवरुणस्यधर्मणाप्रहिन्वान

ऋतंवृहत् १५ ॥ १४ ॥ नृभिर्येमानोहर्यतोविचक्षणोराजादेवःसमुद्रियः १६ इन्द्रायपवतेमदःसोमोमरुत्वतेसुतः । सहस्रधारोअत्यव्यमर्षतितमीमृजन्त्यायवः १७ पुनानश्चमूजनयन्मतिंकविःसोमोदेवेषुरण्यति । अपोवसानःपरिगोभिरुत्तरःसीदन्वनेष्वव्यत १८ तवाहंसोमरारणसख्यइन्दोदिवेदिवे । पुरूणिबभ्रो निचरन्तिमामवपरिधीरतिताँइहि १९ उताहंनक्तमुतसोमतेदिवासख्यायबभ्र ऊधनि । घृणातपन्तमतिसूर्यंपरःशकुनाइवपप्तिम २० ॥ १५ ॥ मृज्यमानः सुहस्त्यसमुद्रेवाचमिन्वसि । रयिंपिशङ्गंबहुलंपुरुस्पृहंपवमानाभ्यर्षसि २१ मृजानोवारेपवमानोअव्ययेवृषावचक्रदोवने । देवानांसोमपवमाननिष्कृतंगोभिरञ्जानोअर्षसि २२ पवस्ववाजसातयेऽभिविश्वानिकाव्या । त्वंसमुद्रंप्रथमोविधारयोदेवेभ्यःसोममत्सरः २३ सतूपवस्वपरिपार्थिवंरजोदिव्याचंसोमधर्मभिः॥

त्वांविप्रासोमतिभिर्विचक्षणशुभ्रंहिन्वन्तिधीतिभिः २४ पवमानाअसृक्षतपवित्रमतिधारया । मरुत्वन्तोमत्सराइन्द्रियाहयांमेधाम्राभिप्रयांसिच २५ अपोवसानःपरिकोशंमर्षतीन्दुर्हियानःसोतृभिः । जनयन्ज्योतिर्मन्दनांअवीवशद्गाः कृण्वानोननिर्णिजम् २६ ॥ १६ ॥

पवस्व षोडश पवमानः सोमः । आद्ययोर्गौरिवीतिः । तृतीयायाश्चतुर्दश्यादितिस्तृणां च शक्तिः । चतुर्थीपञ्चम्योरुरुः । शिष्टानां ऋचानां क्रमेण ऋजिश्वोर्ध्वसद्मकृतयशऋणंचयाः । द्वितीयादिसर्वाः समर्चैः सतो बृहत्यः । त्रयोदशी गायत्री यवमध्या । शिष्टाः ककुभः ।

१०८ पवस्वमधुमत्तमइन्द्रायसोमक्रतुवित्तमोमदः । महिद्युक्षतमोमदः १ यस्यंतेपित्वावृषभोवृषायतेऽस्यपीतास्वर्विदः । ससुप्रकेतोअभ्यक्रमीदिवोऽच्छा

वाजंनैतंशः २ त्वंह्यं१ङ्गदैव्यापवंमानजनिंमानिद्युमत्तंमः । अमृतत्वायंघोषयंः ३ येनानवंग्वोदध्यङ्ङपोर्णुतेयेनाविंम्नासआपिरे । देवानांसुम्नेअमृतंस्यचारुणोयेनश्रवांस्यानशुः ४ एषस्यधारयासुतोऽव्योवारेंभिःपवतेमदिंतमः । क्रीळंन्नूर्मिरुपामिव ५ ॥ १७ ॥ यउस्रियाअप्यांअन्तरश्मनोनिर्गाअकृन्तदोजंसा । अभिव्रजंन्तत्सिषेगव्यमश्व्यंवर्मीवधृष्णवारुज ६ आसोतापरिंषिञ्चताश्वंनस्तोमंमक्षुरंरजस्तुरंम् । वनक्रक्षमुदप्रुतम् ७ सहस्रंधारंवृषभंपयोवृधंप्रियंदेवायुजन्मंने । ऋतेनयऋतजांतोविवावृधेराजादेवऋतंबृहत् ८ अभिद्युम्नंबृहद्यशइषस्पतेदिदीहिदैवदेवयुः । विकोशंमध्यमंयुव १ आवंच्यस्वसुदक्षचम्वोःसुतोविशांवह्निर्नविश्पतिः । वृष्टिंदिवःपवस्वरीतिमपांजिन्वागविंष्टयेधियंः १० ॥ १८ ॥ एतमुत्यंमदच्युतंसहस्रंधारंवृषभंदिवोदुहुः । विश्वावसूंनिविभ्रंतम् ११ वृषाविजज्ञे

जनयन्नमर्त्यःप्रतपञ्योतिषातमः । ससुष्टुतःकविभिर्निर्णिजंदधेत्रिधात्वंस्यदंसंसा १२ ससुन्वेयोवसूनांयोरायामानेतायइळानाम्। सोमोयःसुक्षितीनाम् १३ यस्यंनइन्द्रःपिबाद्यस्यंमरुतोयस्यंवार्यमणाभगः । आयेनंमित्रावरुणाकरामहएन्द्रमवसेमहे १४ इन्द्रायसोमपातवेनृभिर्यतःस्वायुधोमदिंतमः। पवस्वमधुमत्तमः १५ इन्द्रस्यहार्दिसोमधानमाविशसमुद्रमिवसिन्धवः । जुष्टोमित्रायवरुणायवायवेदिवोविष्टम्भउत्तमः १६ ॥ ११ ॥

परि म द्वाविंशतिरग्नयो विष्ण्या ऐश्वराः पवमानः सोमो द्विपदा ।

१०१ परिप्रधन्वेन्द्रायसोमस्वादुर्मित्रायंपूष्णेभगायं १ इन्द्रस्तेसोमसुतस्यंपेयाःक्रत्वेदक्षायविश्वेचदेवाः २ एवामृतायमहेक्षयायसशुक्रोअर्षदिव्यःपीयूषः ३ पवस्वसोममहान्त्समुद्रःपितादेवानांविश्वाभिधामं ४ शुक्रःपवस्वदेवेभ्यःसोम-

दिवेपृथिव्यैशंचप्रजायै ५ दिवोधर्तासिशुक्रःपीयूषःसत्येविधर्मन्वाजीपवस्व ६ पवस्वसोमद्युम्नीसुधारोमहामवीनामनुपूर्व्यः ७ नृभिर्येमानोजज्ञानःपूतःक्षरद्विश्वानिमन्द्रःस्वर्वित् ८ इन्दुःपुनानःप्रजामुराणःकरद्विश्वानिद्रविणानिनः ९ पवस्वसोमक्रत्वेदक्षायाश्वोननिक्तोवाजीधनाय १० ॥ २० ॥ तंतेसोतारोरसंमदायपुनन्तिसोमंमहेद्युम्नाय ११ शिशुंजज्ञानंहरिंमृजन्तिपवित्रेसोमंदेवेभ्यइन्दुम् १२ इन्दुःपविष्टचारुर्मदायापामुपस्थेकविर्भगाय १३ विभर्तिचाविन्द्रस्यनाम्येनाविश्वानिवृत्राजघान १४पिवन्त्यस्यविश्वेदेवासोगोभिःश्रीतस्यनृभिःसुतस्य १५ प्रसुवानोअक्षाःसहस्रधारस्तिरःपवित्रंविवारमव्यम् १६ सवाज्यक्षाःसहस्ररेताअद्रिमृजानोगोभिःश्रीणानः १७ प्रसोमयाहीन्द्रस्यकुक्षानृभिर्येमानोअद्रिभिःसुतः १८ असर्जिवाजीतिरःपवित्रमिन्द्रायसोमःसहस्रधारः १९

अञ्जन्त्येनंमध्वोरसेनेन्द्रायवृष्णइन्दुंमदाय २० देवेभ्यस्त्वावृधापाजसेऽपोवसा-
नंहरिंमृजन्ति२१इन्दुरिन्द्रायतोशतेनितोंशतेश्रीणन्नुग्रोरिणन्नपः २२ ॥ २१ ॥

पर्यू षु द्वादश ज्यरुणत्रसदस्यू पवमानः सोमः । आद्यास्तिस्रोनुष्टुभः
पिपीलिकमध्याः । अन्त्यास्तिस्रो विराजः । शिष्ट उर्ध्वबृहतः ।

११० पर्यूषुप्रधन्वावाजसातयेपरिवृत्राणिसक्षणिः । द्विषस्तरध्याऋणयानईय-
से १ अनुहित्वासुतंसोममदामसिमहेसंमर्यराज्ये । वाजाँअभिपवमानप्रगाहसे २ अजीजनोहिपवमानसूर्यंविधारेशक्मनापयः । गोजीरयारंहमाणःपुरन्ध्या ३ अजीजनोअमृतमर्त्येष्वाँऋतस्यधर्मन्नमृतस्यचारुणः । सदासरोवाजमच्छासनिष्यदत् ४ अभ्यभिहिश्रवसाततर्दिथोत्सनकंचिज्जनपानमाक्षितम् । शयाभिर्नभरमाणोगभस्त्योः ५ आदीकेचित्पश्यमानासआप्यंवसुरुचोदिव्या

अभ्यनूषत । वारंनदेवःसंविताव्यूर्णुते ६ ॥ २२ ॥ त्वेसोमप्रथमावृक्तबर्हिषो महेवाजायुश्रवसेधियंदधुः । सत्वंनोवीरवीर्यायचोदय ७ दिवःपीयूषंपव्यंयदुक्थ्यंमहोगाहाद्दिवआनिरंधुक्षत । इन्द्रंमभिजायमानंसमंस्वरन् ८ अधुयादिमे पवमानरोदसीइमाचविश्वाभुवनाभिमज्मना । यूथेनानिःष्ठावृषभोवितिष्ठसे ९ सोमःपुनानोअव्ययेवारेशिशुर्नक्रीळन्पवमानोअक्षाः । सहस्रधारःशतवाजइन्दुः १० एषपुनानोमधुमाँऋतावेन्द्रायेन्दुःपवतेस्वादुरूर्मिः । वाजसनिर्वरिवोविदत्पयोधाः ११ सपवस्वसहमानःपृतन्यून्त्सेधन्रक्षांस्यपदुर्गहाणि । स्वायुधःसासह्वान्त्सोमशत्रून् १२ ॥ २३ ॥

अया रुचा हरिण्यापुनानोविश्वाद्वेषांसितरतिस्वयुग्वभिःसूरोनन्वयुग्वं- ॥९३७॥

अया रुचा हरिण्यापुनानोविश्वाद्वेषांसितरतिस्वयुग्वभिः । सूरोनन्वयुग्वं-

भिः । धारासुतस्यरोचतेपुनानोअरुषोहरिः । विश्वायद्रूपापरियात्यृक्वभिःसप्तास्येभिर्ऋक्वभिः ।१ त्वंत्यत्पणीनांविदोवसुसंमातृभिर्मर्जयसिस्वआदमऋतस्यधीतिभिर्दमे । परावतोनसामतद्यत्रारण्न्तिधीतयः । त्रिधातुभिररुषीभिर्वयोदधेरोचमानोवयोदधे २ पूर्वामनुप्रदिशंयात्तिचेकितत्संरश्मिभिर्यततेदर्शतोरथोदैव्योदर्शतोरथः । अग्मन्नृक्थानिपौंस्येन्द्रंजैत्रायहर्षयन् । वज्रंश्चयद्भवथोअनपच्युतासमत्स्वनपच्युता ३ ॥ २४ ॥

नानानं चतुष्कं शिशुः पवमानः सोमः पङ्क्तिः ।

११२ नानानंवाउनोधियोविव्रतानिजनानाम् । तक्षारिष्टंरुतंभिषग्ब्रह्मासुन्वन्तमिच्छतीन्द्रायेन्दोपरिस्रव १ जरंतीभिरोषधीभिःपर्णेभिःशकुनानाम् । कामंरोअश्मभिर्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दोपरिस्रव २ कारुरहंततोभि-

पगुंपलप्रक्षिणींनना । नानांधियोवसूयवोऽनुगाइंवतस्थिमेन्द्रायेन्दोपरिस्रव २
अश्वोवोह्वांसुखंरथंहसनामुंपमन्त्रिणः । शेपोरोमंण्वन्तौभेदौवारिन्मण्डूकइच्छ-
तान्द्रायेन्दोपरिस्रव ४ ॥ २५ ॥

शर्यणावत्येकादश कश्यपः पवमानः सोमः पङ्क्तिः ।

११३ शर्यणावंतिसोमंमिन्द्रःपिवतुवृत्रहा । वलंदधानआत्मनिंकरिष्य-
न्वीर्यंमहदिन्द्रायेन्दोपरिस्रव १ आपंवस्वदिशांपतआर्जीकात्सोममीद्वः । ऋ-
तवाकेनसत्येनश्रद्धयातपसासुतइन्द्रायेन्दोपरिस्रव २ पर्जन्यंवृद्धंमहिपंतंसूयस्य
दुहिताभंरत् । तंगन्धर्वाःप्रत्यगृभ्णन्तंसोमेरसमादंधुरिन्द्रायेन्दोपरिस्रव ३
ऋतंवदन्नृतयुन्नसत्यंवदन्त्सत्यकर्मन् । श्रद्धांवदन्त्सोमराजन्धात्रासोमपरिष्कृत
इन्द्रायेन्दोपरिस्रव ४ सत्यमुग्रस्यवृहतःसंस्त्रंवन्तिसंस्त्रवाः । संयन्तिरसिनोर-

सांःपुनानोब्रह्मणाहरइन्द्रायेन्दोपरिस्रव ५ ॥ २६ ॥ यत्रब्रह्मापवमानछन्दस्यां३वाचंवदन् । ग्राव्णासोमेमहीयतेसोमेनानन्दंजनयन्निन्द्रायेन्दोपरिस्रव ६ यत्रज्योतिरजस्रंयस्मिंल्लोँकेस्वर्हितम् । तस्मिन्मांधेहिपवमानामृतेलोकेअक्षितइन्द्रायेन्दोपरिस्रव ७ यत्रराजावैवस्वतोयत्रावरोधनंदिवः । यत्रामूर्यृह्तीरापस्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ८ यत्रानुकामंचरणंत्रिनाकेत्रिंदिवेदिवः । लोकायत्रज्योतिष्मन्तस्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ९ यत्रकामांनिकामाश्चयत्रब्रध्नस्यविष्टपम् । स्वधाचयत्रतृप्तिश्चतत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव १० यत्रानन्दाश्चमोदाश्चमुदःप्रमुदआसते । कामस्ययत्रातृप्ताःकामास्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ११ ॥ २७ ॥

य इन्दोश्चतुष्कं कश्यपः पवमानः सोमः पङ्क्तिः ।

११४ यइन्दोःपवमानस्यानुधामान्यक्रमीत् । तमाहुःसुप्रजाइतियस्तेसोमाविधन्मनइन्द्रायेन्दोपरिस्रव १ ऋषेमन्त्रकृतांस्तोमैःकश्यपोदुर्धयन्गिरः । सोमेनमस्यराजानंयोजज्ञेवीरुधांपतिरिन्द्रायेन्दोपरिस्रव २ सप्तदिशोनानासूर्याःसप्तहोतारऋत्विजः । देवाआदित्यायेसप्ततेभिःसोमाभिरक्षनइन्द्रायेन्दो परिस्रव ३ यत्तेराजञ्छृतंहविस्तेनसोमाभिरक्षनः । अरातीवामानंस्तारीन्मो चनःकिंचनाममदिन्द्रायेन्दोपरिस्रव ४ ॥ २८ ॥ इति शाकलर्क्संहितायां नवमे मण्डले सप्तमोनुवाकः ॥ ९ ॥ ७ ॥

॥ इति शाकलर्क्संहितायां नवमं मण्डलं समाप्तम् ॥ ९ ॥

अग्ने सप्त त्रितोऽग्निस्त्रिष्टुप् ।

१ अग्नेबृहन्नुपसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात् । अग्निर्भानु-
नारुशतास्वङ्गुआजातोविश्वासद्मान्यप्राः १ सजातोगर्भोअसिरोदस्योरग्नेचारु-
र्विभृतओषधीषु । चित्रःशिशुःपरितमांस्यक्तून्ममातृभ्योअधिकनिक्रदद्गाः २
विष्णोरित्थापरमंमस्यविद्वाञ्जातोबृहन्नभिपातितृतीयम् । आसायदस्यपयोअक्रे-
तुस्वंसचैतसोअभ्यर्चन्त्यत्र ३ अतउत्वापितुभृतोजनित्रीरन्नावृधंप्रतिचरन्त्यन्नैः ।
ताईप्रत्यैपिपुनर्न्यरूपाअसित्वंविक्षुमानुषीषुहोता ४ होतारंचित्ररथमध्वरस्य
यज्ञस्ययज्ञस्यकेतुंरुशन्तम् । प्रत्यर्धिंदेवस्यदेवस्यमह्नाश्रियात्वं१ग्निमतिथिंजन-
नानाम् ५ सतुवस्त्राण्यधुपेशनानिवसानोअग्निर्नाभापृथिव्याः । अरुषोजातः

य इन्दोश्चतुष्कं कश्यपः पवमानः सोमः पङ्क्तिः ।

११४ यइन्दोःपवमानस्यानुधामान्यक्रमीत् । तमाहुःसुप्रजाइतियस्तैसोमाविधन्मनइन्द्रायेन्दोपरिस्रव १ ऋषेमन्त्रकृतांस्तोमैःकश्यपोहुर्धयन्गिरः । सोमेनमस्यराजानंयोजज्ञेवीरुधांपतिरिन्द्रायेन्दोपरिस्रव २ सप्तदिशोनानासूर्याःसप्तहोतारऋत्विजः । देवाआदित्यायेसप्ततेभिःसोमाभिरक्षनइन्द्रायेन्दोपरिस्रव ३ यत्तेराजञ्छृतंहविस्तेनंसोमाभिरक्षनः । अरातीवामानंस्तारीन्मोचनःकिंचनाममदिन्द्रायेन्दोपरिस्रव ४ ॥ २८ ॥ इति शाकलर्क्संहितायां नवमे मण्डले सप्तमोनुवाकः ॥ ९ ॥ ७ ॥

॥ इति शाकलर्क्संहितायां नवमं मण्डलं समाप्तम् ॥ ९ ॥

अग्ने सप्त त्रितोऽग्निस्त्रिष्टुप् ।

१ अग्नेबृहन्नुषसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात् । अग्निर्भानु-
नारुशतास्वङ्गआजातोविश्वासद्मान्यप्राः १ सजातोगर्भोअसिरोदस्योरग्नेचारु-
र्विभृतओषधीषु । चित्रःशिशुःपरितमांस्यक्तून्प्रमातृभ्योअधिकनिक्रदद्गाः २
विष्णोरित्थापरमंमस्यविद्वाजातोबृहन्नभिपातितृतीयम् । आसायदस्यपयोअक्र-
तस्वंसचैतसोअभ्यर्चन्त्यत्र ३ अतउत्वापितुभृतोजनित्रीरन्नावृधंप्रतिचरन्त्यन्नैः ।
ताङ्प्रत्येषिपुनरन्यरूपाअसित्वंविक्षुमानुषीषुहोता ४ होतारंचित्ररथमध्वरस्य
यज्ञस्ययज्ञस्यकेतुंरुशन्तम् । प्रत्यर्धिंदेवस्यदेवस्यमह्नाश्रियात्वं ५ अग्निमतिथिंज-
नानाम् ५ सतुवस्त्राण्यधुपेशनानिवसानोअग्निर्नाभापृथिव्याः । अरुषोजातः

पदइळायाःपुरोहितोराजन्यक्षीहदेवान् ६ आहियावांपृथिवीअंग्नउभेसदांपुत्रो-
नमातरांततन्थं । प्रयाह्यच्छोंशतोयंविष्ठाथावंहसहस्येहदेवान् ७ ॥ २९ ॥

पिप्रीहि सप्त त्रितोऽग्निस्त्रिष्टुप् ।

२ पिप्रीहिदेवाँउंशतोयंविष्ठविद्वाँऋतूँऋँतुपतेयजेह । येदैव्याऋत्विजस्तेभि-
रग्नेत्वंहोतृणामस्यार्यजिष्ठः १ वेपिंहोत्रमुतपोत्रंजनानांमन्धातासिंद्रविणोदाऋ-
तावा । स्वाहांवयंकृणवांमाहवींपिंदेवोदेवान्यंजत्वग्निरहँन् २ आदेवानामपिप-
न्थांमगन्मयच्छक्वांमतदनुप्रवोळ्हुम् । अग्निर्विद्वान्त्सयंजात्सेदुहोतासोअंध्वरा
न्त्सऋतून्कल्पयाति ३ यद्वोवयंप्रमिनामव्रतानिंविदुषांदेवाअविंदुष्टरासः।अग्निष्ट-
द्विश्वमापृणातिविद्वान्येभिंर्देवाँऋतुभिंःकल्पयांति ४ यत्पाकत्रामनसादीनदक्षा
नयज्ञस्यमन्वतेमर्त्यासः । अग्निष्टद्धोताक्रतुविद्विजानन्यजिंष्ठोदेवाँऋतुशोयंजा-

शिवस्यं । ईड्यंस्यवृष्णोंवृहतःस्वासोभामांसोयामन्नक्तवांश्चिकित्रे ४ स्वनानय-
स्यभामांसःपवन्तेरोचमानस्यवृहतःसुदिवः । ज्येष्ठेभिर्यस्तेजिष्ठैःक्रीळुमद्भिर्वपं-
ष्ठेभिर्भानुभिर्नक्षतिद्याम् ५ अस्यशुष्मासोदद्दशानपवेर्जेहमानस्यस्वनयन्नियु-
द्भिः । प्रत्नेभिर्योरुशद्भिर्देवतमोविरेभद्भिररतिर्भातिविभ्वा ६ सआवक्षिमहिनआ
चसत्सिदिवस्पृथिव्योररतियुवत्योः । अग्निःसुतुकःसुतुकेभिरश्वैरभस्वद्भिरभस्वाँ-
एहगम्याः ७ ॥ ३१ ॥

म ते सप्त त्रितोऽग्निस्त्रिष्टुप् ।

४ प्रतेयक्षिप्रतइयर्मिमन्मभुवोयथावन्योनोहवेषु । धन्वन्निवप्रपाअसित्व-
मग्नइयक्षवेपूरवेप्रत्नराजन् १ यन्त्वाजनासोअभिसंचरन्तिगावउष्णमिंवव्रजं
यविष्ठ । दूतोदेवानामसिमर्त्यानामन्तर्महाँश्चरसिरोचनेन २ शिशुंनत्वाजेन्यं

वर्धयन्तीमातादिभर्तिसचनस्यमाना। धनोरधिप्रवतायासिहर्यञ्जिगीषसेपशुरि-
वावसृष्टः ३ मूराअमूरनवयंचिकित्वोमहित्वमग्नेत्वमङ्गविंत्से । शयेवव्रिश्चर-
तिजिह्वयादवेरिह्वतेयुवतिंविश्पतिःसन् ४ कूचिज्जायतेसनयासुनव्योवनेत-
स्थौपलितोधूमकेतुः । अस्नातापोवृषभोनप्रवेतिसचैतसोयंप्रणयन्तमताँः ५ त-
नूत्यजेवतस्करावनर्गूरशनाभिर्दशभिरभ्यधीताम् । इयंतेअग्नेनव्यसीमनीषा-
युक्ष्वारथंनशुचयद्भिरङ्गैः ६ ब्रह्मचतेजातवेदोनमश्चेयंचगीःसदमिद्धधीनीभूत् ।
रक्षाणोअग्नेतनयानितोकारक्षोतनस्तन्वोऽअप्रयुच्छन् ७ ॥ ३२ ॥

एकः सप्त चितोग्निस्त्रिष्टुप् ।

५ एकःसमुद्रोधरुणोरयीणामस्मद्धृदोभूरिजन्माविचष्टे । सिषक्त्यूधर्निण्यो-
रुपस्थउत्संस्यमध्येनिहितंपदंवेः १ समानंनीळंवृषणोवसानाःसंजग्मिरेमहिषा

अवँतीभिः । ऋतस्यपदंकवयोनिपान्तिगुह्यानामानिदधिरेपराणि २ ऋतायिनीं मायिनीसंदधातेमित्वाशिशुंजज्ञतुर्वर्धयन्ती । विश्वस्यनाभिंचरतोध्रुवस्यकवेश्चित्तन्तुंमनसावियन्तः ३ ऋतस्यहिवर्तनयःसुजातमिपोवाजायप्रदिवःसचन्ते । अधीवासंरोदसीवावसानेघृतैरन्नैर्वावृधातेमधूनाम् ४ सप्तस्वसूररुषीर्वावशानो विद्वान्मध्वउज्जभाराट्टशेकम् । अन्तर्यमेअन्तरिक्षेपुराजाइच्छन्वव्रिमांविदत्पूपणस्यं ५ सप्तमर्यादाःकवयस्ततक्षुस्तासामेकामिदभ्यंहुरोगात् । आयोहँस्कुम्भउंपमस्यंनीळेपथांविंसर्गेधरुणेंपुतस्थौ ६ असंच्चसच्चंपरमेव्योंमन्दक्षस्यजन्मन्नदितेरुपस्थें । अग्निहँनःप्रथमजाऋतस्यपूर्वआयुंनिवृभश्चंधेनुः ७ ॥ ३३ ॥

इति शाकलर्क्संहितायां सप्तमाष्टके पञ्चमोध्यायः ॥ ७ ॥ ५ ॥

अयंस्वस्तिमकेतुनानवमिशिरास्त्वाष्ट्रस्तृचोन्सऐन्द्रआपोहिसिन्धुद्वीपोवाम्बरीषआपंगावत्रंह्यनुष्टुवन्तंपञ्चमीवर्धमानासप्तमीमतिष्ठौचित्पळूनावैवस्वतयोर्यमयम्योःसंवादःपष्ठ्यनुष्टुभिर्यमीमिथुनार्थंयमंमोवाचसतांनवमीयुष्मिरनिच्छन्मसाचष्टेवृषानवाङ्गिर्हविर्धानआग्नेयंतुत्रित्रिष्टुवन्तंद्यावायुजेपञ्चविवस्वान्यादित्योहाविधीनंजगत्यन्तंपरेयिवांसंपोळशयमोयामंपष्ठीलिङ्गोक्तदेवतापराश्चतिस्रःपित्र्यावातिस्रःश्वभ्यांपराअनुष्टुभोबृहत्युपान्त्यायामायनाःपरेपञ्चोदीरतांपळूनाशंखःपित्र्यंजगत्येकादशीमैनंदमनआग्नेयंचतुरनुष्टुवन्तंत्वष्टादेवश्रवाद्वेसरण्यूदेवतेपौष्ण्यश्चतस्रःसारस्वत्यस्तिस्रःपञ्चाप्योद्रप्सास्तिस्रःसौम्योवान्त्येअनुष्टुभाउपान्त्यापुरस्ताद्बृहतीवापरंमृत्योसंकुसुकश्चतस्रोमृत्युदेवताःपराधात्रीपरात्वाष्ट्रीपराःपितृमेधाएकादशीमस्तारपङ्क्तिर्जगत्युपान्त्यान्त्यानुष्टुप्माजापत्यावासानिरुक्ता ।

अयं सप्त त्रितोग्निस्त्रिष्टुप् ।

६ ॐम् अयंसयस्यशर्मन्नवोभिरग्नेरधंतेजरिताभिष्टौ। ज्येष्ठेभिर्योभानुभिर्ऋषूणांपूर्येतिपरिवीतोविभावा १ योभानुभिर्विभावाविभात्यग्निर्देवेभिर्ऋतावाजस्रः।

आयोद्यिवायंसख्यासखिभ्योऽपरिह्वृनोअत्योनसप्तिः २ ईशेयोविश्वस्यादेववीतेरीशेविश्वायुरुपसोव्युष्टौ । आयस्मिन्मनाहवींष्युग्नावरिष्टरथःस्कृन्नातिशूषैः ३ शूषेभिर्वृधोजुषाणोअर्कैर्देवाँअच्छारघुपत्वाजिगाति।मन्द्रोहोतासजुह्वा३यर्जिष्ठः संमिंश्लोअग्निराजिघर्तिदेवान् ४ तमुस्त्रामिन्द्रंनरोजमानमग्निंगीर्भिर्नमोभिरा कृणुध्वम् । आयंविप्रासोमतिभिर्गृणन्तिंजातवेदसंजुह्वंसहानाम् ५ संयस्मिन्विश्वावसूनिजग्मुर्वाजेनाश्वाःसप्तीवन्तएवैः । अस्मेऊतीरिन्द्रवाततमाअर्वाचीनाअग्रआकृणुष्व ६ अधाह्यग्नेमहानिपद्यासद्योजज्ञानोहव्योबभूथ । तंतेदेवासोअनुकेतमायन्नधावर्धन्तप्रथमासऊमाः ७ ॥ १ ॥

स्वस्ति सप्त त्रितोऽग्निस्त्रिष्टुप् ।

७ स्वस्तिनोदिवोअग्नेपृथिव्याविश्वायुर्धेहियजथायदेव । सचेमहितवदस्म

प्रकेतैरुरुप्याणंउरुभिर्देवशंसैः १ इमाअग्नेमतयस्तुभ्यंजातागोभिरश्वैरभिगृणन्तिराधः। यदातेमर्तोअनुभोगमानड्सोदधान्नोमतिभिःसुजात २ अग्निंमन्ये पितरमग्निमापिमाग्निंभ्रातरंसदमित्सखायम्। अग्नेरनीकंबृहतः संपर्यन्दिविशुक्रं यंजतंसूर्यस्य ३ सिध्राअग्नेधियोअस्मेसनुत्रीर्यंत्रायसेदमआनित्यंहोता। ऋतावासरोहिदंश्वःपुरुक्षुद्युभिरस्माआहाभिर्वाममस्तु ४ द्युभिर्हितंमित्रमिवप्रयोगं प्रत्नमृत्विजंमध्वरस्यजारम्। बाहुभ्यांमग्निमायवोऽजनन्तविक्षुहोतारंन्यसादयन्त ५ स्वयंयजस्वदिविदेवदेवान्किंनेपाकःकृणवदप्रचेताः। यथाऽयजऋतुभिर्देवदेवान्नेवायंजस्वतन्वंसुजात ६ भवानोअग्नेऽवितोतगोपाभवावयस्कृदुतनोवयोधाः। रास्वाचनःसुमहोहव्यदातिंत्रास्वोतनस्तन्वोऽअप्रयुच्छन् ७ ॥ २ ॥

म केतुना नव त्रिशिरास्त्वाष्ट्रोग्निस्त्रिष्टुप् । अन्यतृचस्येन्द्रः ।

८ प्रकेतुनाबृहतायात्यग्निरारोदंसीवृषभोरोरवीति । दिवश्चिदन्ताँउपमाँउदानळपामुपस्थेमहिषोववर्ध १ मुमोदगर्भोवृषभःककुद्मानस्रेमावत्सःशिमीवाँअरावीत् । सदेवतात्युद्यतानिकृण्वन्त्सेधुक्षयेपुरुधमोजिगाति २ आयोमूर्धानंपित्रोररब्धन्यध्वरेदधिरेसूरोअर्णः । अस्यपत्मन्नरुषीरश्वबुध्नाऋतस्ययोनौतन्वोजुषन्त ३ उपउपोहिवसोअग्रमेषित्वंयमयोरभवोविभावा । ऋतायसप्तदधिषेपदानिजनयन्मित्रंतन्वे३स्वायै ४ भुवश्चक्षुर्महऋतस्यगोपाभुवोवरुणोयहृतायवेषिं । भुवोअपांनपाज्जातवेदोभुवोदूतोयस्यहव्यंजुजोषः ५ ॥ ३ ॥ भुवोयज्ञस्यरजसश्चनेतायत्रांनियुद्भिःसचसेशिवाभिः । दिविमूर्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहम् ६ अस्यत्रितःक्रतुनावव्रेअन्तरिच्छन्धीतिंपितुरेवैः ॥८४४

परस्य । सचस्यमानःपित्रोरुपस्थेजामिब्रुवाणआयुधानिवेति ७ सपित्र्याण्या-युधानिविद्वानिन्द्रेषितआप्त्योअभ्ययुध्यत् । त्रिशीर्षाणंसप्तरश्मिंजघन्वान्त्वाष्ट्र-स्यचिन्निःससृजेत्रितोगाः ८ भूरीदिन्द्रउदिनक्षन्तमोजोऽवाभिनत्सत्पतिर्मन्य-मानम् । त्वाष्ट्रस्यचिद्विश्वरूपस्यगोनांमाचक्राणस्त्रीणिशीर्षापरावर्क् ९ ॥ ४ ॥

आपो हि त्रिशिरास्त्वाष्ट्रः सिन्धुद्वीपो वाम्बरीष आपो गायत्री ।
पञ्चमी वर्धमाना । सप्तमी प्रतिष्ठा । अन्त्ये अनुष्टुभौ ।

१ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन । महेरणायचक्षसे १ योवःशिव-तमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः २ तस्माअरंगमामवोयस्यक्ष-यायजिन्वथ । आपोजनयथाचनः ३ शंनोदेवीरभिष्टयआपोभवन्तुपीतये । शंयोरभिस्रवन्तुनः ४ ईशानावार्याणांक्षयन्तीश्चर्षणीनाम् । अपोयाचामिभे-

प्रजम् ५ अप्सुमेसोमोअब्रवीदन्तर्विश्वानिभेषजा । अग्निंचविश्वशंभुवम् ६ आपःपृणीतभेषजंवरूथंतन्वेमम । ज्योक्चसूर्यंदृशे ७ इदमापःप्रवहतयत्किं चदुरितंमयि । यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम् ८ आपोअद्यान्वचारिषंरसेनसमगस्महि । पयस्वानग्रआगहितंमासंसृजवर्चसा ९ ॥ ५ ॥

ओ चित्चतुर्दश त्रिष्टुप् । प्रथमातृतीयापञ्चमीषष्ठीसप्तम्येकादशीत्रयोदशीनामृषिर्यमी वैवस्वती । देवता तु यमो वैवस्वतः । यमो वैवस्वत ऋषिर्यमी वैवस्वती देवता ।

१० ओचित्सखायंसख्यावृत्यांतिरःपुरूचिदर्णवंजगन्वान् । पितुर्नपात्रमादधीतवेधाअधिक्षमिप्रतरंदीध्यानः १ नतेसखासख्यंवष्ट्येतत्सलक्ष्मायद्विषुरूपा भवाति । महस्पुत्रासोअसुरस्यवीरादिवोधर्तारंउर्वियापरिख्यन् २ उशन्तिघा-

तेअमृतासएतदेकंस्यचित्यजसंमर्त्यस्य । नितेमनोमनसिधाय्यस्मेजन्युःपतिं-
स्तन्वं१मार्विविश्याः ३ नयत्पुराचकृमाकद्धनूनमृतावदन्तोअनृतंरपेम । गन्ध-
र्वोअप्स्वप्याचयोषासानोनाभिःपरमंजामितन्नौ ४ गर्भेनुनौजनितादम्पतीकर्दे-
वस्त्वष्टासविताविश्वरूपः । नकिरस्यप्रमिनन्तिव्रतानिवेदनावस्यपृथिवीउत
द्यौः ५ ॥ ६ ॥ कोअस्यवेदप्रथमस्याह्नःकईंददर्शकइहप्रवोचत् । बृहन्मित्रस्य-
वरुणस्यधामकदुब्रवआहनोवीच्यानॄन् ६ यमस्यमायम्यं१कामआगन्त्समाने
योनौसहशेय्याय । जायेवपत्यैतन्वंरिरिच्यांविचिद्वृहेवरथ्येवचक्रा ७ नातिष्ठन्ति
ननिमिषन्त्येतेदेवानांस्पशइहयेचरन्ति । अन्येनमदाहनोयाह्यूयंतेनाविवृहर-
थ्येवचक्रा ८ रात्रीभिरस्माअहभिर्दशस्येत्सूर्यस्यचक्षुर्मुहुरुन्मिमीयात् । दिवा
पृथिव्यामिथुनासबभ्रूयमीर्यमस्यविभृयादजामि ९ आघातागच्छानुत्तरायुगा-

नियत्रंजामयंःकृणवन्नजामि । उपबर्बृहिवृषभायबाहुमन्यमिच्छस्वसुभगेपतिं
मत् १० ॥ ७ ॥ किंभ्रातासद्यदनाथंभवातिकिमुस्वसायन्निर्ऋतिर्निगच्छात् ।
कामंमूताववृह ऽउतद्रपामितन्वामेतन्वं१ संपिपृग्धि ११ नवाऽउतेतन्वातन्वं१ संपपृ-
च्यांपापमाहुर्यःस्वसारंनिगच्छात् । अन्येनमत्प्रमुदःकल्पयस्वनतेभ्रातासुभग
वष्ट्येतत् १२ वतोवंतासियमनैवतेमनोहृदयंचाविदाम । अन्याकिलत्वांकक्ष्ये-
वयुक्तंपरिष्वजातेलिबुंजेववृक्षम् १३ अन्यमूषुत्वंयम्यन्यउत्वांपरिष्वजातेलिबु-
जेववृक्षम् । तस्यंवात्वंमनंइच्छासवातवाधांकृणुष्वसंविदंसुभद्राम् १४ ॥ ८ ॥

वृषा नव हविर्धान आङ्गिरसमिर्जगती । अन्त्यास्तिस्रस्त्रिष्टुप् ।

११ वृषावृष्णेदुदुहेदोहसादिवःपयांसियह्वोअदितेरदाभ्यः । विश्वंसवेदवरुणो
यथाधियासयज्ञियोंयजतुयज्ञियाँऋतून् १रपंन्धर्वीरप्यांचयोषणानदस्यंनादेप-

रिपातुमेमनः । इष्टस्यमध्येअदितिर्निधातुनोभ्रातानोज्येष्ठःप्रथमोविवोचति २ सोचिन्नुभद्राक्षुमतीयशस्वत्युपाउंवासमनंवेस्वर्वती । यदीमुशन्तमुशतामनुक्रतुंमग्निंहोतारंविदथायजीजनन् ३ अधत्यंद्रप्संविभ्वंविचक्षणंविराभरदिप्रितः श्येनोअध्वरे । यदीविशोवृणतेदस्ममार्याअग्निंहोतारमधृषीरजायत ४ सदांसि रण्वोयवसेवपुष्यतेहोत्राभिरग्नेमनुषःस्वध्वरः । विप्रंस्यवायच्छंशमानउक्थ्यं३ वाजंससवाँउपयासिभूरिभिः ५ ॥ १ ॥ उदीरयपितरांजारआभगमियक्षतिहर्यतोहुत्इप्यति । विवक्तिवह्निःस्वपस्यतेमखस्तविष्यतेअसुरोवेपतेमती ६ यस्तेअग्नेसुमतिंमर्तोअक्षत्सहसःसूनोअतिस्पशंण्वे । इषंदधानोवहमानोअश्वैरासद्युमाँअमवान्भूषतिद्यून् ७ यदग्नएषासमितिर्भवातिदेवीदेवेषुयजतायजत्र । रत्नाधयद्भिभजासिस्वधावोभागंनोअत्रवसुमन्तंवीतात् ८ श्रुधीनोअग्नेसदनेसुधस्थे-

युक्ष्वारथंममृतंस्यद्रविद्युम् । आनोवहरोदसीदेवपुत्रेमाक्रिंदेवानामपभूरिहस्याः १ ॥ १० ॥ अ.७अ.

द्यावा नव हविर्धान आङ्गिरसमिस्त्रिष्टुप् ।

१२ द्यावाहक्षामाप्रथमेऋतेनाभिश्रावेभवतःसत्यवाचा । देवोयन्मर्तान्यजथायकृण्वन्त्सीदद्धोतापत्यङ्स्वमसुंयन् १ देवोदेवान्परिभूर्ऋतेनवहानोहव्यंप्रथमश्चिकित्वान् । धूमकेतुःसमिधाभाऋंजीकोमन्द्रोहोतानित्योवाचायजीयान् २ स्वावृग्देवस्यामृतंयदीगोरतौजातासौधारयन्तउर्वी । विश्वेदेवाअनुतत्तेयजुर्गुर्दुहेयदेनींदिव्यंघृतंवाः ३ अचींमिवांवर्धायापोघृतस्नूद्यावाभूमीगृणुतंरोदसीमे । अहायद्द्यावोऽसुनीतिमयन्मध्वानोअत्रपितरांशिशीताम् ४ किंस्विन्नोराजाजगृहेकदस्यातिव्रतंचकृमाकोविवेद । मित्रश्चिद्धिष्माजुहुराणोदेवाञ्छो- ॥५४७

कोनयातामपिवाजोअस्ति ५॥११॥ दुर्मन्त्वत्रामृतस्यनाम सलक्ष्मायद्विषुरूपा भवाति । यमस्ययोमनवतेसुमन्त्वग्नेतमृष्वपाह्यप्रयुच्छन् ६ यस्मिन्देवाविदथे मादयन्तेविवस्वतःसदनेधारयन्ते । सूर्येज्योतिरदधुर्मास्य१क्तून्परिद्योतानिचरतोअजस्रा ७ यस्मिन्देवामन्मनिसंचरन्त्यपीच्ये३नवयमस्यविद्म । मित्रोनो अत्रादितिरनागान्त्सवितादेवोवरुणायवोचत् ८ श्रुधीनोअग्नेसदनेसधस्थे युक्ष्वारथंममृतस्यद्रविणम् । आनोवहरोदसीदेवपुत्रेमाकिर्देवानामपभूरिहस्थाः १ ॥ १२ ॥

युजे पञ्च विवस्वानादिसो हविर्धाने त्रिष्टुप् । अन्त्या जगती ।

१३ युजेवांब्रह्मपूर्व्यंनमोभिर्विश्लोकएतुपथ्येवसूरेः । शृण्वन्तुविश्वेअमृतस्य पुत्राआयेधामानिदिव्यानितस्थुः १ यमेइवयतमानेयदैतंप्रवाभरन्मानुषादेवयः-

न्तः । आसींदतुस्वमुलोकंविदानेस्वासस्थेभवतामिन्दवेनः २ पञ्चंपदानिरुपो अन्वरोहंचतुष्पदीमन्वेमित्रतेन । अक्षरेणप्रतिमिमएतामृतस्यनाभावधिसंपुनामि ३ देवेभ्यःकमवृणीतमृत्युंप्रजायैकममृतंनावृणीत । बृहस्पतिंयज्ञमकृण्वत ऋषिंप्रियंयमस्तन्वं३ प्रारिरेचीत् ४ सप्तक्षरन्तिशिशवेमरुत्वतेपित्रेपुत्रासोअप्यंवीवतन्नृतम् । उभेइदस्योभयस्यराजतउभेयतेतेउभयस्यपुष्यतः ५॥ १३ ॥

परेयिवासं पोडश यमो यमस्त्रिष्टुप् । पञ्चया लिङ्गोक्तदेवताः । तृतीयतृचस्य लिङ्गोक्तदेवताः पितरो वा । चतुर्थतृचस्य श्वानौ । उपान्त्या बृहती । त्रयोदशीचतुर्दश्यन्त्या अनुष्टुभः ।

१४ परेयिवांसंप्रवतोमहीरनुबहुभ्यःपन्थामनुस्पशानम् । वैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्य १ यमोनोगातुंप्रथमोविवेदनैषागव्यूतिरपभर्तवाउ । यत्रानःपूर्वेपितरःपरेयुरेनाजज्ञानाःपथ्या३अनुस्वाः २ मातलीक्र- ॥९४

उदीरतां चतुर्दश शङ्खो यामायनः पितरस्त्रिष्टुप्। एकादशी जगती।

१५ उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः । असुंयईयुरवृका ऋतज्ञास्तेनोऽवन्तुपितरोहवेषु १ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरास ईयुः । येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु २ आहंपितून्त्सुविदत्राँ अवित्सिनपातंचविक्रमणंचविष्णोः । बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्त इहागमिष्ठाः ३ बर्हिषदःपितरऊत्य१र्वागिमावोह्व्याचकृमाजुषध्वम् । तआ गतावसाशंतमेनाथानःशंयोररपोदधात ४ उपहूताःपितरःसोम्यासोबर्हिष्येषु निधिषुप्रियेषु । तआगमन्तुतइहश्रुवन्त्वधिब्रुवन्तुतेऽवन्त्वस्मान् ५ ॥ १७ ॥ आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे । माहिंसिष्टपितरःकेनचिन्नोयदआगःपुरुषतांकराम ६ आसीनासोअरुणीनामुपस्थेरयिंधत्तदाशुषेमर्त्याय।

तंजुपस्व १३ येअग्निदग्धायेअनग्निदग्धामध्येदिवःस्वधयामादयन्ते । तेभिः स्वराळसुनीतिमेतांयथावशंतन्वंकल्पयस्व ३४ ॥ ११ ॥

मैनं चतुर्दश दमनो यामायनस्त्रिष्टुप् । अन्याश्चतस्रोनुष्टुभः ।

१६ मैनंमग्नेविदहोमाभिशोचोमास्यत्वचंचिक्षिपोमाशरीरम् । यदाशृतंकृणवोजातवेदोऽथेमेनंप्रहिणुतात्पितृभ्यः १ शृतंयदाकरसिजातवेदोऽथेमेनंपरिदत्तात्पितृभ्यः । यदागच्छात्यसुनीतिमेतामथादेवानांवशनीर्भवाति २ सूर्यंचक्षुर्गच्छतुवातमात्मादयांचगच्छपृथिवींचधर्मणा । अपोवागच्छयदितत्रतेहितमोषधीषुप्रतितिष्ठाशरीरैः ३ अजोभागस्तपसातंतेशोचिस्तपतुतंतेअर्चिः । यास्तेशिवास्तन्वोजातवेदस्ताभिर्वहैनंसुकृतामुलोकम् ४ अवसृजपुनरग्नेपितृभ्योयस्तआहुतश्चरतिस्वधाभिः । आयुर्वसानउपवेतुशेषुःसंगच्छतांतन्वाजातवेदः ५

पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत तत इहोर्जं दधात ७ येनः पूर्वे पितरः सोम्यासोऽनू-
हिरे सोमपीथं वसिष्ठाः । तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ८ ये
तातृषुर्देवत्रा जेहमानाहोत्राविदः स्तोमतष्टासोअर्कैः । आग्नेयाहि सुविदत्रेभिरर्वा-
ङ्सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ९ येसत्यासोहविरदोहविष्पाइन्द्रेणदेवैः सरथं
दधानाः । आग्नेयाहि सहस्रंदेववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः १० ॥ १८ ॥
अग्निष्वात्ताः पितर एहगच्छत सदःसदः सदत सुप्रणीतयः । अत्ताहवींषि प्रयतानि
बर्हिष्यथारयिंसर्ववीरंदधातन ११ त्वमग्नईळितोजातवेदोऽवाड्ढव्यानि सुरभीणि
कृत्वी । प्रादाः पितृभ्यः स्वधयाते अक्षन्नद्धित्वंदेव प्रयताहवींषि १२ येचेह पि-
तरोयेचनेहयांश्चविद्मयाँउचनप्रविद्म । त्वंवेत्थ यतितेजातवेदः स्वधाभिर्यज्ञंसुकृ-

तंजुपस्व १३ येअग्निदग्धायेअनग्निदग्धामध्येदिवःस्वधयामादयन्ते । तेभिः स्वराळसुनीतिमेतांयथावशंतन्वंकल्पयस्व १४ ॥ ११ ॥

मैनं चतुर्दश दमनो यामायनस्त्रिष्टुप् । अन्याश्चतस्रोनुष्टुभः ।

१६ मैनंमग्नेविदहोमाभिशोचोमास्यत्वचंचिक्षिपोमाशरीरम् । यदाशृतंकृणवोजातवेदोऽथेमेनंप्रहिणुतात्पितृभ्यः १ शृतंयदाकरसिजातवेदोऽथेमेनंपरिदत्तात्पितृभ्यः । यदागच्छात्यसुनीतिमेतामथादेवानांवशनीर्भवाति २ सूर्यंचक्षुर्गच्छतुवातमात्माद्यांचगच्छपृथिवींचधर्मणा । अपोवागच्छयदितत्रतेहितमोषधीषुप्रतितिष्ठाशरीरैः ३ अजोभागस्तपसातंतेशोचिस्तंपतुतंतेअर्चिः । यास्तेशिवास्तन्वोजातवेदस्ताभिर्वहैनंसुकृतामुलोकम् ४ अवसृजपुनरग्नेपितृभ्योयस्तआहुतश्चरातिस्वधाभिः । आयुर्वसानउपवेतुशेषुःसंगच्छतांतन्वाजातवेदः ५

॥ २० ॥ यत्तेकृष्णःशकुनआतुतोदपिपीलःसर्पउतवाश्वापदः । अग्निष्टद्विश्वादं-
गदंकृणोतुसोमश्चयोब्राह्मणाँआविवेश ६ अग्नेर्वर्मपरिगोभिर्व्ययस्वसंप्रोर्णुष्व
पीवसामेदसाच । नेत्त्वाधृष्णुर्हरसाजहँषाणोदधृग्विधक्ष्यन्पर्यङ्खयाते ७ इमम-
ग्नेचमसंमाविजिह्वरःप्रियोदेवानामुतसोम्यानाम् । एषयश्चमसोदेवपानस्तस्मि-
न्देवाअमृतामादयन्ते ८ क्रव्यादमग्निंप्रहिणोमिदूरंयमराज्ञोगच्छतुरिप्रवाहः ।
इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन् ९ योअग्निःक्रव्यात्प्रविवेश
वोगृहमिमंपश्यन्नितरंजातवेदसम् । तंहरामिपितृयज्ञायदेवंसधर्मिन्वात्परमे
सधस्थे १० ॥ २१ ॥ योअग्निःक्रव्यवाहनःपितृन्यक्षदृतावृधः । प्रेदुहव्यानि-
वोचतिदेवेभ्यश्चपितृभ्याआ ११ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि । उ-
शन्नुशतआवहपितॄन्हविषेअत्तवे १२ यंत्वमग्नेसमदहस्तमुनिर्वापयापुनः । कि-

याम्व॒त्रंरोहतुपाकदू॒र्वाण्यं॑लकशा १३ शीति॑केशीति॑कावति॒ह्लादि॑केह्लादिकाव-
ति । म॒ण्डू॒क्या३॑सुसंगंमइमंस्यं१॒॑म्रिंहंर्पय १४ ॥ २२ ॥ इति शाकलर्कसंहितायां
दशमे मण्डले प्रथमोनुवाकः ॥ १० ॥ १ ॥

त्वष्टा चतुर्दश देवश्रवा यामायनस्त्रिष्टुप् । आद्ययोः सरण्यूः । ततश्चतसृणां पूषा ।
ततस्तिसृणां सरस्वती । दशम्यन्तयोरापः । शिष्टानामेकादश्यादितिसृणामापः
सोमोवा । उपान्त्यानुष्टुप्पुरस्ताद्बृहतीवा । अन्त्यानुष्टुप् ।

१७ त्वष्टा॑दुहि॒त्रेव॑ह॒तुंकृ॑णो॒तीती॒दंविश्वं॑भुवनंसमेति । य॒मस्य॑मा॒तापर्यु॑ह्यमा-
नाम॒होजा॒याविव॑स्वतोननाश १ अपा॑गूहन्न॒मृता॑मर्त्ये॑भ्यःकृ॒त्वीसव॑र्णामददुर्वि-
व॑स्वते । उ॒ताश्विना॑वभर॒द्यत्तदासी॑दजहादु॒द्वामि॑थु॒नास॑र॒ण्यूः २ पू॒षात्वे॒तश्चया-
वयतु॒प्रविद्वान॑न॒ष्टपशु॒र्भुव॑नस्यगो॒पाः । स॒त्वै॒तेभ्यः॒परि॑ददत्पि॒तृभ्यो॑ऽग्निर्दे॒वेभ्य॑ः

सुविदत्रियेभ्यः ३ आयुर्विश्वायुःपरिपासतित्वापूषात्वापातुप्रपथेपुरस्तात् ।
यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवःसवितादधातु ४ पूषेमाआशाअनुवेदसर्वाः
सोअस्माँअभयतमेननेषत् । स्वस्तिदाआघृणिःसर्ववीरोऽप्रयुच्छन्पुरएतुप्रजानन्
न् ५ ॥ २३ ॥ प्रपथेपथामजनिष्टपूषाप्रपथेदिवःप्रपथेपृथिव्याः । उभेअभि
प्रियतमेसधस्थेआचपरांचचरतिप्रजानन् ६ सरस्वतींदेवयन्तोहवन्तेसरस्वती
मध्वरेतायमाने । सरस्वतींसुकृतोअह्वयन्तसरस्वतीदाशुषेवार्यंदात् ७ सरस्व-
तियासरथंययाथंस्वधाभिर्देवपितृभिर्मदन्ती । आसद्यास्मिन्बर्हिषिमादयस्वा
नमीवाइप्रआधेह्यस्मे ८ सरस्वतींयांपितरोहवन्तेदक्षिणायज्ञमभिनक्षमाणाः ।
सहस्रार्घमिळोअत्रभागंरायस्पोषंयजमानेषुधेहि ९ आपोअस्मान्मातरःशुन्ध-
यन्तुघृतेननोघृतप्वःपुनन्तु । विश्वंहिरिप्रंप्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतएं-

मि १० ॥ २४ ॥ द्रप्सश्चस्कन्दप्रथमाँअनुद्यूनिमंचयोनिमनुयश्चपूर्वः । समा-
नंयोनिमनुसंचरन्तंद्रप्संजुहोम्यनुसप्तहोत्राः ११ यस्तेद्रप्सःस्कन्दतियस्तेअंशु-
र्वाहुच्युतोधिषणायाउपस्थात् । अध्वर्योर्वापरिवायःपवित्रात्तंतेजुहोमिमनसा
वषट्कृतम् १२ यस्तेद्रप्सःस्कुन्नोयस्तेअंशुरवश्चयःपरःस्रुचा । अयंदेवोवृहस्प-
तिःसंतंसिंचतुराधसे १३ पयस्ततीरोषधयःपयस्वन्मामकंवचः । अपांपयस्व-
दित्पयस्तेनमासहशुन्धत १४ ॥ २५ ॥

परं मृत्यो चतुर्दश संकुसुको यामायनस्त्रिष्टुप् । आद्यचतुष्शस्य मृत्युः पञ्चम्या धाता
षष्ट्यास्त्वष्टा । सप्तम्यादिसप्तानां पितृमेधः । अन्त्यायाः पितृमेधः
प्रजापतिर्वा । एकादशी प्रस्तारपङ्क्तिः । उपान्त्या
जगती । अन्त्यानुष्टुप् ।

१८ परंमृत्योअनुपरेहिपन्थांयस्तेस्वइतरोदेवयानात् । चक्षुष्मतेशृण्वतेते

ब्रवीमिमानःप्रजांरीरिषोमोतवीरान् १ मृत्योःपदंयोपयन्तोयदैतद्राघीयुआयुः
प्रतरंदधानाः । आप्यायमानाः प्रजयाधनेनशुद्धाःपूताभवतयज्ञियासः २ इमे
जीवाविमृतैरावंवृत्रन्नभूद्भद्रादेवहूतिर्नोअद्य । प्राञ्चोंअगामनृतयेहसांघद्राघीय
आयुःप्रतरंदधानाः ३ इमंजीवेभ्यःपरिधिंदधामिमैषांनुगादपरोअर्थमेतम् ।
शतंजीवन्तुशरदःपुरूचीरन्तर्मृत्युंदधतांपर्वतेन ४ यथाहान्यनुपूर्वंभवन्तियथर्तु-
तवंऋतुभिर्यन्तिसाधु । यथानपूर्वमपरोजहात्येवाधांतरायूँषिकल्पयैषाम् ५
॥ २६ ॥ आरोहतायुर्जरसंवृणानाअनुपूर्वंयतमानायतिष्ठ। इहत्वष्टासुजनिमास-
जोषादीर्घमायुःकरतिजीवसेवः ६ इमानारीरविधवाःसुपत्नीराञ्जनेनसर्पिषासं-
विशन्तु । अनश्रवोऽनमीवाःसुरत्नाआरोहन्तुजनयोयोनिमग्रे ७ उदीर्ष्वनार्य-
भिजीवलोकंगतासुमेतमुपशेषएहि । हस्तग्राभस्यदिधिषोस्तवेदंपत्युर्जनित्व-

मभिसंवभूथ ८ धनुर्हस्तादाददानोमृतस्यास्मेक्षत्रायवर्चसेबलाय । अत्रैवत्व-मिहवयंसुवीराविश्वाःस्पृधोअभिमातीर्जयेम ९ उपसर्पमातरंभूमिमेतामुरुव्य-चंसंपृथिवींसुशेवाम् । ऊर्णम्रदायुवतिर्दक्षिणावतएषात्वांपातुनिर्ऋतेरुपस्था-त् १० ॥ २७ ॥ उच्छ्वञ्चस्वपृथिविमानिवाधाःसूपायनास्मैभवसूपवञ्चना । मातापुत्रंयथासिचाभ्येनंभूमऊर्णुहि ११ उच्छ्वञ्चमानापृथिवीसुतिष्ठतुसहस्रंमित-उपहिश्रयन्ताम् । तेगृहासोघृतश्चुतोभवन्तुविश्वाहास्मैशरणाःसन्त्वत्र १२ उत्ते स्तभ्नामिपृथिवीत्वत्परीमंलोगंनिदधन्मोअहंरिषम् । एतांस्थूणांपितरोधारयन्तु तेऽत्रायमःसादनातेमिनोतु १३ प्रतीचीनेमामहनीष्वाःपर्णमिवादधुः । प्रतीचींजग्रभावाचमश्वैरगनयायथा १४ ॥ २८ ॥ इति शाकलर्क्संहितायां सप्तमाष्टके षष्ठोध्यायः ॥ ७ ॥ ६ ॥

निवर्तध्वमष्टौमथितोभृगुर्वारुणिर्भार्गवश्च्यवनोवापंगव्यंवानुष्टुभमग्नीषोमीयोद्वितीयोर्धर्चःषष्ठीगायत्र्यैसप्तोत्तराण्यैन्द्रोविमदःमाजापत्योवावसुक्रोवसुकृद्वाभद्रंदशाग्नेयंतुगायत्रमाद्यैकपदापादएववाशान्त्यर्थःपरानुष्टुवन्त्येविराड्विष्टुभावाग्निनाष्टावास्तारपाङ्क्तंकुहूपञ्चोनापुरस्ताद्बार्हतंत्रिष्टुवन्तंत्वंसाचिदानस्त्वंनोनुष्टुभोयजामहेसप्ताद्यान्त्योत्रिष्टुभौपञ्चम्याभिसारिणीन्द्रसोमंपळास्तारपाङ्क्तंत्वाश्विन्योन्त्यास्तिस्रोनुष्टुभोभद्रमेकादशसौम्यंमाहेनवपौष्णमानुष्टुभमद्याचतुर्थ्याऽप्तिंहावसत्सचतुर्विंशतिरैन्द्रोवसुक्रोविश्वोहिद्वादशेन्द्रवसुक्रयोःसंवादऐन्द्रःसूक्तस्यप्रथमयेन्द्रस्यस्तुपापरोक्षवादिन्द्रमाहेन्द्रस्ययुजःशेषाक्रुपेधतुर्थीचवनेनाष्टौमदेवत्रापञ्चोनाकवपऐळूपआपमपोनप्त्रीयंवानएकादशवैश्वदेवंमसुग्मन्तांनवपञ्चाद्याजगत्यः ॥

निवर्तध्वमष्टौ मथितो यागायनो भृगुर्वा वारुणिश्च्यवनो वा भार्गवोनुष्टुप् । षष्ठी गायत्री ।
आपो गावो वा देवता । प्रथमाया द्वितीयार्धस्याग्नीषोमौ ।

११ ओम् निर्वर्तध्वंमानुगातास्मान्त्सपक्करेवतीः । अग्नीषोमापुनर्वसूअस्मे धारयतंरयिम् १ पुनरेनानिवर्तयपुनरेनान्याकुरु । इन्द्रेणानियच्छत्वग्निरेना

उपाजंतु २ पुनरेतानिवर्तन्तामस्मिन्पुष्यन्तुगोपतौ । इहैवाग्निधारयेहतिष्ठतुया
रयिः ३ यन्नियानंन्ययंनंसंज्ञानंयत्परायंणम् । आवर्तनंनिवर्तनंयोगोपाआपितं
हुवे ४ यउदानड्व्ययंनंयउदानट्परायंणम् । आवर्तनंनिवर्तनमपिगोपानिवं-
र्तताम् ५ आनिवर्तनिवर्तयपुनर्नइन्द्रगादेहि । जीवाभिर्भुनजामहै ६ परिवो
विश्वतोदधऊर्जाघृतेनपयसा । येदेवाःकेचयज्ञियास्तेरय्यासंसृजन्तुनः ७ आ
निवर्तनिवर्तयानिनिवर्तनिवर्तय । भूम्याश्चतस्रःप्रदिशस्ताभ्यंएनानिवर्तय ८ ॥१॥

भद्रं दश विमद ऐन्द्रः माजापत्योवा वसुरुद्रा वास्तुकोग्निर्गायित्री । आद्यैकपदा ।
पाद एव वा शान्त्यर्थः । उपाद्यानुष्टुप् । उपान्त्या विराट् । अन्त्या त्रिष्टुप् ।

२० भद्रंनोअपिवातयमनंः १ अग्निर्मीळेभुजांयविष्ठंशासामित्रंदुर्धरीतुम् ।
यस्यधर्मन्त्स्वं१रेनींःसपर्यन्तिमातुरूधंः २ यमासाकृपनींळंभासाकेतुंवर्धयन्ति।

भ्राजंतेश्रेणिंदन् २ अर्योविशांगातुरेतिप्रयदानंद्विषोअन्तान् । कविरभंदीद्यां-
नः ४ जुषद्धव्यामानुषस्योर्ध्वस्तस्थावृभ्वोयज्ञे । मिन्वन्त्सद्मपुरएंति ५ सहि
क्षेमोहविर्यज्ञःश्रुष्टीदस्यगातुरेति । अग्निंदेवावाशींमन्तम् ६ ॥ २ ॥ यज्ञासा-
हंदुवंइषेऽग्निंपूर्वस्यशेवस्य । अद्रेःसूनुमायुमाहुः ७ नरोयेकेचास्मदाविश्वेत्तेवा-
मआस्युः । अग्निंहविष्मावधैन्तः ८ कृष्णःश्वेतोऽरुषोयामोअस्यवभ्रुरुज्जुत
शोणोयशस्वान् । हिरण्यरूपंजनिताजजान ९ एवातेअग्नेविमदोमनीषामूर्जो-
नपादमृतेभिःसजोषाः । गिरआवक्षत्सुमतीरियानइषमूर्जंसुक्षितिंविश्व-
माभाः १० ॥ ३ ॥

आग्निं नाष्टौ विमद ऐन्द्रः माजापत्यो वा वसुकृद्वा वासुक्रोग्निरास्तारपङ्क्तिः ।

२१ आग्निंनस्ववृक्तिभिर्होतारंत्वावृणीमहे। यज्ञायंस्तीर्णबर्हिषेविवोमदेशा-

रंपावकशोचिषंविवक्षसे १ त्वामुतेस्वाभुवःशुम्भन्त्यश्वंराधसः । वेतित्वामुप-सेचनीविवोमदऋजींतिरग्रआहुंतिंविवक्षसे २ त्वेधर्माणंआसतेजुहूभिःसिञ्चतीरिव । कृष्णारूपाण्यर्जुनाविवोमदेविश्वाअधिश्रियोधिषेविवक्षसे ३ यमंग्नेमन्यसेरयिंसहंसावन्नमर्त्य । तमानोवाजंसातयेविवोमदेयज्ञेषुचित्रमाभंराविवक्षसे ४ अग्निर्जातोअथर्वणाविदद्विश्वानिकाव्या । भुवद्दूतोविवस्वतोविवोमदेग्निप्रियोयमस्यकाम्योविवक्षसे ५ ॥ ४ ॥ त्वांयज्ञेष्वीळतेग्नेप्रयत्यध्वरे । त्वंवसूनिकाम्याविवोमदेविश्वादधासिदाशुषेविवक्षसे ६ त्वांयज्ञेष्वृत्विजंचारुमग्नेनिषेदिरे । घृतप्रतीकंमनुषोविवोमदेशुक्रंचेतिष्ठमक्षभिर्विवक्षसे ७ अग्नेशुकेणशोचिषोरुप्रथयसेबृहत् । अभिक्रन्दन्वृषायसेविवोमदेगर्भंदधासिजामिषुविवक्षसे ८ ॥ ५ ॥

कुद पञ्चदश विमद ऐन्द्रः मा मापत्यो वा वसुकृद्वा वासुक्र इन्द्रः पुरस्ताद्बृहती । पञ्चमी-
सप्तमीनवम्योनुष्टुभः । अन्त्या त्रिष्टुप् ।

२२ कुहेंश्रुतइन्द्रःकस्मिन्नद्यजनेमित्रोनश्रूयते । ऋषीणांवायःक्षयेगुहावाच-
कृपेगिरा १ इहश्रुतइन्द्रोअस्मेअद्यस्तवेवज्रयृचीषमः । मित्रोनयोजनेष्वायशं-
श्रुकेआसाम्या २ महोयस्पतिःशवसोअसाम्यामहोनृम्णस्यतूतुजिः । भर्ता
वज्रंस्वधृष्णोःपितापुत्रमिवप्रियम् ३ युजानोअश्वावातंस्यधुनीदेवोदेवस्यव-
ज्रिवः । स्यन्तापथाविरुक्मतासृजानःस्तोप्यध्वनः ४ त्वंत्याचिद्वातस्याश्वागा-
ऋजात्मनावहंध्यै । ययोर्देवोनमर्त्योयन्तानकिर्विदाय्यः ५ ॥ ६ ॥ अधुग्मन्तो-
शनापृच्छतेवांकदर्थानआगृहम् । आजग्मथुःपराकाद्दिवश्चग्मश्चमर्त्यम् ६ आनं
इन्द्रपृक्षसेऽस्माकंब्रह्मोद्यतम् । तत्त्वायाचामहेऽवःशुष्णंयहन्नमानुषम् ७ अकर्मा

दस्युरभिनोअमन्तुरन्यव्रतोअमानुषः । त्वंतस्यामित्रहन्वधर्दासस्यदम्भय ८ त्वंनइन्द्रशूरशूरैरुतत्वोतासोवर्हणा। पुरुत्रातेविपूर्तयोनवन्तक्षोणयोयथा ९ त्वंता न्वृत्रहत्येचोदयोनृन्कार्पाणेशूरवज्रिवः । गुहायदीकवीनांविशांनक्षत्रशव-साम् १० ॥ ७ ॥ मक्षूतातइन्द्रदानाम्नंसआक्षाणेशूरवज्रिवः । यद्धशुष्णस्य दम्भयोजातंविश्वंसयावभिः ११ माकुर्ध्यगिन्द्रशूरवस्वीरस्मेभूवन्नभिष्टयः । वयंवयंतआसांसुम्नेस्यामवज्रिवः १२ अस्मेतातइन्द्रसन्तुसत्याहिंसन्तीरुप-स्पृशः । विद्यामयासांभुजोधेनूनांनवज्रिवः १३ अहस्तायदपदीवर्धंतक्षाःशचीं-भिर्वेद्यानाम् । शुष्णंपरिप्रदक्षिणिद्विश्वायवेनिशिश्नथः १४ पिबापिवेदिन्द्रशूर सोमंमारिषण्योवसवानवसुःसन् । उतत्रायस्वगृणतोमघोनोमहश्चरायोरेवत-स्कृधीनः १५ ॥ ८ ॥

यजामहे सप्त विमद ऐन्द्रः प्रजापत्यो वा वसुकृद्वा वासुक्र इन्द्रो जगती ।
आद्यान्त्ये त्रिष्टुभौ । पञ्चम्यभिसारिणी ।

२३ यजामहइन्द्रंवज्रंदक्षिणंहरींणांरथ्यं१विव्रंतानाम् । प्रश्मश्रुदोधुवद्धूर्व-
थांभद्रिसेनांभिर्दयमानोविराधसा १ हरीन्वंस्युयावनेंविदेवस्विन्द्रोंमघैर्मघवां
वृत्रहाभुवत् । ऋभुर्वाजंऋभुक्षाःपत्यतेशवोऽवंक्ष्णौमिदासंस्यनामंचित् २ य-
दावज्रंहिरंण्यमिदथारथंहरीयमंस्यवहंतोविसूरिभिः । आतिंष्ठतिमघवासनंश्रुत
इन्द्रोवाजंस्यदीर्घश्रवसस्पतिः ३ सोचिन्नुवृष्टिर्यूथ्या३स्वासचाँइन्द्रःश्मश्रूणिह-
रिताभिप्रुष्णुते । अवंवेतिसुक्षयंसुतेमधूदिद्धूनोतिवातोयथावनम् ४ योवाचा
विवाचोमृध्रवाचःपुरूसहस्राशिवाजघान । तत्तदिदंस्यपौंस्यंगृणीमसिपितेव
यस्तविषीवावृधेशवंः ५ स्तोमंतइन्द्रविमदाअजीजनन्नपूंर्व्यंपुरुतमंसुदानवे ।

विश्माह्यस्युभोजंनमिनस्ययदापशुंनगोपाःकरामहे ६ माकिर्नएनासख्यावे-
यौपुस्तवेचेन्द्रविमदस्यचऋषेः । विश्माहितेप्रमतिंदेवजामिवदस्मेतेसन्तुसख्या
शिवानिं ७ ॥ १ ॥

इन्द्र सोमं पड्विमद ऐन्द्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः । प्रथमतृचस्येन्द्रः ।
द्वितीयस्याश्विनौ । आद्यास्तिस्र आस्तारपङ्क्तयः । शिष्टा अनुष्टुभः ।

२४ इन्द्रसोमंमिमंपिवमधुमन्तंचमूसुतम् । अस्मेरयिंनिधारयुविवोमदेस-
हस्त्रिणंपुरूवसोविवक्षसे १ त्वांयज्ञेभिरुक्थैरुपह्व्येभिरीमहे । शचीपतेशची-
नांविवोमदेश्रेष्ठंनोधेहिवार्यंविवक्षसे २ यस्पतिर्वार्याणामसिरध्रस्यचोदिता ।
इन्द्रस्तोतृणामविताविवोमदेद्विषोनःपाह्यंहसोविवक्षसे ३ युवंशंक्रामायाविना
समीचीनिरमन्थतम् । विमदेनयदीळितासत्यानिरमन्थतम् ४ विश्वेदेवा

अंकृपन्तसमीच्योर्निष्पतन्त्योः । नासत्यावब्रुवन्देवाःपुनरावहतादितिं ५ मधुं-
मन्मेपरायणंमधुमत्पुनरायनम् । तानोदेवादेवतयायुवंमधुमतस्कृतम् ६ ॥ १०॥

भद्रमेकादश विमद ऐन्द्रः प्राजापत्यो या वसुकृद्वा वासुक्रः सोम आस्तारपङ्क्तिः ।

२५ भद्रंनोअपिवातयमनोदक्षंमुतक्रतुम् । अधातेसख्येअन्धसोविवोमदेरण-
न्गावोनयवंसे विवक्षसे १ हृदिस्पृशंस्तआसतेविश्वेषुसोमधामसु । अधाकामांइ-
मेममांविवोमदेवितिंष्ठन्तेवसूयवोविवक्षसे २ उतव्रतानिसोमतेप्राहंमिनामिपा-
क्या । अधापितेवसूनवेविवोमदेमृळानोअभिचिद्वधाद्विवक्षसे ३ समुप्रयन्ति-
धीतयःसगाँसोऽवताँइव । क्रतुंनःसोमजीवसेविवोमदेधारयाचमसाँइवविवक्ष-
से ४ तवत्येसोमशक्तिभिर्निकामासोव्यृण्विरे । गृत्संस्यधीरास्तवसोविवोम-
देव्रजंगोमन्तमश्विनंविवक्षसे ५ ॥ ११ ॥ पशुंनःसोमरक्षसिपुरुत्राविष्टंतंजग-

त् । समाकर्णोपिजीवसेविवोमदेविश्वांसंपश्यन्भुवनाविवक्षसे ६ त्वंनःसोमविश्वतोगोपाअदाभ्योभव । सेधराजन्नपास्रिधोविवोमदेमानोदुःशंसईशताविवक्षसे ७ त्वंनःसोमसुक्रतुर्वयोधेयायजागृहि । क्षेत्रवित्तरोमनुषोविवोमदेद्रुहोनःपाह्यंहसोविवक्षसे ८ त्वंनोवृत्रहन्तुमेन्द्रस्येन्दोशिवःसखा । यत्सीहवन्तेसमिथेविवोमदेयुध्यमानास्तोकसातौविवक्षसे ९ अयंघसतुरोमदइन्द्रस्यवर्धतप्रियः । अयंकक्षीवंतोमहोविवोमदेमतिंविप्रस्यवर्धयद्विवक्षसे १० अयंविप्रायदाशुषेवाजाँइयर्तिगोमतः । अयंसप्तभ्यआवरंविवोमदेप्रान्धंश्रोणंचंतारिषद्विवक्षसे ११ ॥ १२ ॥

म हि नव विमद ऐन्द्रः माजापत्यो वा वसुकृद्वा वासुक्रः पूषानुष्टुप् ।
मथमाचतुर्थ्यावुष्णिहौ ।

२६ प्रद्युच्छांमनीषाःस्पार्हायन्तिनियुतःप्रदस्त्रानियुद्रथःपूषाअविष्टुमाहिनः

१ यस्त्यन्महित्वंवातार्प्यंमयंजनः। विप्रआवैसद्धोतिभिश्चिकेतसुष्टुतीनाम् २ स वेदसुष्टुतीनामिन्दुर्नपूषावृषा। अभिप्सुरःप्रुषायतिव्रजंनआप्रुषायति ३ मंसीमहित्वावयमस्माकंदेवपूषन्। मतीनांचसाधनंविप्राणांचाधवम् ४ प्रत्यर्धिर्यज्ञानामश्वह्योरथानाम्। ऋषिःसयोमनुर्हितोविप्रस्ययावयत्सखः ५ ॥ १३ ॥ आधीपंमाणायाःपतिःशुचायांश्चशुचस्यंच। वासोवायोऽवीनामावासौंसिमंमृजन्त ६ इनोवाजानांपतिरिनःपुष्टीनांसखा। प्रश्नश्चुहर्यतोदूधोहिबृथायोअदाभ्यः ७ आतेरथंस्यपूषन्नजाधुरंववृत्युः। विश्वंस्यार्थिनःसखासनोजाअनंपच्युतः ८ अस्माकंमूर्जारथंपूषाअविष्टुमाहिनः। भुवद्वाजानांवृधइमंनःशृणवद्धवंम् ९ ॥ १४ ॥

असत्सु चतुर्विंशतिर्वसुक्र ऐन्द्र इन्द्रस्त्रिष्टुप् ।

२७ असत्सुमे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षम् । अनाशीर्दा-
मुहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् १ यदीदहं युधये सं नयान्यदैवयून्त-
न्वा३ शूशुजानान् । अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् २ नाहं
तं वेद य इति ब्रवीत्यदैवयून्त्समरणे जघन्वान् । यदावाख्यत्समरणमृघावदादिद्ध
मे वृषभा प्रब्रुवन्ति ३ यदज्ञाते वृजने ष्वासं विश्वे स तोमघवानो म आसन् । जि-
नामि वेत्स इम आसन्तमाभुं प्रतिक्षिणां पर्वते पादगृह्य ४ नवाउ मां वृजने वारयन्ते न प-
र्वता सो यदहं मनस्ये । मम स्वनात्क्रुधुकर्णो भयात एवेदनु द्यून्किरणः सम जात् ५
॥ १५ ॥ दर्शन्वत्रं शतपाँ अनिन्द्रान्वाहुक्षदः शरवे पत्यमानान् । घृषुं वाये नि नि दुः
सखायमध्वन्वे पुपवयो ववृत्युः ६ अभूवौक्षीव्यो३ आयुरानड्दर्षन्नुपूर्वो अपरो नुदर्ष-

त् । द्वेषवस्तेपरितंनभूतोयोअस्यंपारेरजंसोविवेष ७ गावोयवंप्रयुंताअ-
र्योअंक्षन्ताअंपश्यंसहगोपाश्चरंन्तीः । हवाइदूर्योअभितःसमायन्किर्यदासु
स्वपंतिश्छन्दयाते ८ संयद्वयंयवसादोजनांनामहंयवादंउर्वज्रेअन्तः । अ-
त्रायुक्तोऽवसातारंमिच्छादथोअयुक्तंयुनजद्वव्वान्न ९ अत्रेदुमेमंससेसत्यमुक्तं
द्विपाच्चयच्चतुंष्पात्संसृजानि । स्त्रीभिर्योअत्रवृषंणंपृतन्यादयुद्धोअस्यविभंजानि
वेदः १०॥१६॥ यस्यानक्षादुंहिताजात्वासकस्ताँविद्वाँअभिमन्यातेअन्धाम् ।
कतरोमेनिंप्रतितंमुंचातेयईवहांतेयईवावरेयात् ११ कियंतीयोषांमर्युतोवधूयोः
परिप्रीतापन्यंसावार्येण । भद्रावधूर्भवतियत्सुपेशाःस्वयंसामित्रंवनुतेजनेचित्
१२पत्तोजगारप्रत्यञ्चमत्तिशीर्ष्णाशिरःप्रतिदधौवरूथम् । आसीनऊर्ध्वामुपसि-
क्षिणातिन्यङ्ङुत्तानामन्वेतिभूमिम् १३ बृहन्नच्छायोअपलाशोअर्वांत्स्थौमा-

विपितोअत्तिगर्भैः । अत्यस्यावत्संरिहतीमिमायुकयाभुवानिदधेधेनुरूधः १४ सप्तवीरासोअधरादुदायन्नष्टोत्तरात्तात्समंजग्मिरन्ते। नवपश्चातांत्स्थाविमन्तआयन्दशप्राक्सानुवितिरन्त्यभ्रैः १५॥ १७ ॥ दशानामेकंकपिलंसमानंतंहिन्वन्ति क्रतवेपायायं । गर्भेमातासुधितंवक्षणास्ववैनन्तंतुपर्यन्तीविभर्ति १६ पीवानंमेषमंपचन्तवीरान्युष्टाअक्षाअनुदीवआसन्। ह्राधनुंवृहतीमप्स्वन्तःपवित्रंवन्ता चरतःपुनन्ता १७ विक्रोशनासोविष्वंञ्चआयन्पचातिनेमोनहिपक्षदर्धः । अयंमेदेवःसवितातदाहद्वृत्रइहनवत्सापिरेन्नः १८ अपश्यंग्रामंवहमानमारादचक्रयास्वधयावर्तमानम् । सिषक्त्यर्यःप्रयुगाजनानांसद्यःशिभाप्रमिनानोनवीयान् १९ एतौमेगावौप्रमरस्ययुक्तौमोषुप्रसेधीर्मुहुरिन्ममन्धि । आपश्चिदस्यविनशन्त्यर्थंसुरंध्वमर्कउपरोवभूवान् २० ॥ १८ ॥ अयंयोवज्रःपुरुधाविवृ-

त्तोऽवःसूर्यस्यबृहतःपरीपात् । अवइदेनापरोअन्यदस्तितदंव्यधीजरिमाण-
स्तरन्ति २१ वृक्षेवृक्षेनियंतामीमयद्गौस्ततोवयःप्रपतान्पूरुषादः । अथेदंविश्वं
भुवनंभयातइन्द्रायसुन्वदृषयेचशिक्षत् २२, देवानांमानेप्रथमाअतिष्ठन्कृन्तत्रा-
देषामुपराउदायन् । त्रयस्तपन्तिपृथिवीमनूपाहाबृबूकंवहतःपुरीषम् २३ सातें
जीवातुरुततस्यविद्धिमास्मैतादृगपगूहःसमर्ये । आविःस्वःकृणुतेगूहतेबुसंसपा-
दुरस्यनिर्णिजोनमुच्यते २४ ॥ १९ ॥

विश्वो हि द्वादशेन्द्रवसुक्रयोः संवाद ऐन्द्रास्त्रिष्टुप् ।

२८ विश्वोह्यन्योअरिराजगाममममेदह्श्वशुरोनाजगाम । जक्षीयाद्धानाडु-
तसोमंपपीयात्स्वांशितपुनरस्तंजगायात् १ सरोरुवद्वृषभस्तिग्मशृङ्गोवप्मन्त-
स्थौवरिमन्नापृथिव्याः । विश्वेष्वेनंवृजनेषुपामियोमेकुक्षीसुतसोमःपृणाति २

अद्रिणातेमन्दिनइन्द्रतूयान्त्सुन्वन्तिसोमान्पिबसित्वमेषाम् । पचन्तितेवृषभाँ अत्सितेपाँपृक्षेणयन्मघवन्हूयमानः ३ इदंसुमेजरितराचिकिद्धिप्रतीपंशापँनुवो वहन्ति । लोपाशःसिंहंप्रत्यञ्चमत्साःक्रोष्टावराहंनिरतक्तकक्षात् ४ कथातएतदहमाचिकेतंगृत्संस्यपाकंस्तवसोमनीषाम् । त्वंनोविद्वाँऋतुथाविवोचोयमधंते मघवन्क्षेम्याधूः ५ एवाहिमांतवसंवर्धयन्तिदिवश्चिन्मेबृहतउत्तराधूः । पुरूसहस्रानिशिशामिसाकमंशत्रुंहिमाजनिताजजान ६ ॥ २० ॥ एवाहिमांतवसंजजुरुग्रंकर्मन्कर्मन्वृषणमिन्द्रदेवाः । वधींवृत्रंवज्रेणमन्दसानोऽपव्रजंमाहिनादाशुषेवम् ७ देवासआयन्परशूँरबिभ्रन्वनावृश्चन्तोअभिविड्भिरायन् । निसुद्वँदधंतोवक्षणासुयत्राकृपींटमनुतद्धन्ति ८ शशःक्षुरंप्रत्यञ्चंजगारार्द्रिलोगेनव्यभेदमारात् । बृहन्तंचिद्बृहतेरन्धयानिवयंहत्सोवृषभंशूशुवानः ९ सुपर्णइत्थानुख-

मासिंपायावंरुद्धःपरिपदंनसिंहः । निरुद्धश्चिन्महिषस्तृष्यावांन्गोधातस्माअयमासिंपायावंरुद्धःपरिपदंनसिंहः । निरुद्धश्चिन्महिषस्तृष्यावांन्गोधातस्माअयथंकर्पदेतत् १० तेभ्योंगोधाअयथंकर्पदेतयेब्रह्मणंःप्रतिपीयन्त्यन्नैः । सिमउक्षणोऽवसृष्टाँअदन्तिस्वयंवलांनितुन्वंःशृणानाः ११ एतेशमींभिःसुशमींअभूवन्येहिंन्विरेतन्वंः१ःसोमंउक्थैः । नृवद्वनुपंनोमाहिवाजांन्दिविश्रवोंदधिपेनामवीरः १२ ॥ २१ ॥

वनेनाष्टौ वसुक्र इन्द्रस्त्रिष्टुप् ।

२१ वनेनावायोन्यधाधिचाकञ्छुचिर्वास्तोमोंभुरणावजीगः । यस्येदिन्द्रंःपुरुदिनेपुहोतानृणानर्योनृतमःक्षपावान् १ प्रतेंअस्याउषसःप्रापंरस्यानृतौस्यामनृतंमस्यनृणाम् । अनुत्रिशोकंःशतमावहन्नृन्कुत्सेनरथोयोअसत्ससवान् २ कस्तेमदइन्द्रुरन्योभूदुरोगिरोंअभ्युग्रोविधावं । कदाहोअर्वागुपंमामनीषाआ

त्वांशक्यामुपमंराधोअन्नैः ३ ककर्दुद्युम्नमिन्द्रत्वावतोनॄन्कयाधियाकरसेकन्नआ
गन् । मित्रोनसत्यउरुगायभृत्याअन्नैसमस्ययदसन्मनीषाः ४ प्रेरयसूरोअर्थन
पारंयेअस्यकामंजनिधाईवग्मन् । गिरश्चयेतेतुविजातपूर्वीर्नरइन्द्रप्रतिशिक्षन्त्य-
न्नैः ५ ॥ २२ ॥ मात्रेनुतेसुमितेइन्द्रपूर्व्यौर्मज्मनापृथिवीकाव्येन । वरायते
घृतवन्तःसुतासःस्वाद्मन्भवन्तुपीतयेमधूनि ६ आमध्वोअस्माआसिञ्चन्नमत्रमि-
न्द्रायपूर्णंसहिसत्यराधाः । सर्वावृधेवरिमन्नापृथिव्याअभिक्रत्वानर्यःपौंस्यैश्च ७
व्यानळिन्द्रःपृतनाःस्वोजाआस्मैयतन्तेसख्यायपूर्वीः । आस्मारथंनपृतनासुतिष्ठ-
यंभद्रयासुमत्याचोदयासेद ॥ २३ ॥ इति शा० सं० दशमे मण्ड. द्वितीयोऽनुवाकः ॥ १० ॥ २

म देवत्रा पञ्चदश कवप ऐलूष आप अपांनपाद्वा त्रिष्टुप् ।

३० प्रदेवत्राब्रह्मणेगातुरेत्वपोअच्छामनसोनप्रयुक्ति । महीमित्रस्यवरुण-

स्यधासिंपृथुज्रयसेरिरिधासुवृक्तिम् १ अध्वर्यवोहविष्मन्तोहिभूताच्छापइंतोशतीरुशन्तः । अवयाश्चष्टेअरुणःसुपर्णस्तमास्यध्वमभिमद्यासुहस्ताः २ अध्वर्यवोऽपइंतासमुद्रमपांनपांतंहविषायजध्वम् । सवोददद्भिमद्यासुपूतंतस्मैसोमंमदुमन्तंसुनोत ३ योअंनिध्मोदीदयदप्स्वंऽन्तर्यविप्रासईळतेअध्वरेषु । अपांनपान्मधुमतीरपोदायाभिरिन्द्रोवावृधेवीर्यायं ४ याभिःसोमोमोदतेहर्षतेचकल्याणीभिर्युवतिभिर्नमर्यैः । ताअध्वर्योअपोअच्छापरेहियदासिञ्चाओषधीभिः पुनीतात् ५ ॥ २४ ॥ एवेद्यूनेयुवतयोनमन्तयदीमुशन्नुशतीरित्यच्छं । संजानतेमनसासंचिकित्रेऽध्वर्यवोधिषणापंश्वदेवीः ६ योवोवृताभ्योअकृणोदुलोकंयोवोमह्याअभिशस्तेरमुञ्चत् । तस्माइन्द्रायमधुमन्तमूर्मिंदेवमादनंप्रहिणोतनापः ७ प्रास्मैहिनोतमधुमन्तमूर्मिंगर्भोयोवःसिन्धवोमध्वुत्सः । घृतपृष्ठ-

मीड्यमध्वरेष्वापोरेवतीःशृणुताहवंमे ८ तांसिन्धवोमत्सुरामिन्द्रपानमूर्मिंप्रहे-
तवउभेइयंति । मदच्युतमौशानंनंभोजांपारित्रितन्तुंविचरंन्तमुत्सम् ९ आव-
वृततीरघनुद्विधारांगोयुयोनांनियवंचरंन्तीः । ऋषेजनित्रीर्भुवनस्यपत्नीरपोवन्द-
स्वसवृधःसयोनीः १० ॥ २५ ॥ हिनोतानोअध्वरंदेवयज्याहिनोतब्रह्मसनये
धनानाम् । ऋतस्ययोगेविष्यंध्वमूर्धःश्रुष्टीवरीर्भूतनास्मभ्यंमापः ११ आपो
रेवतीःक्षयथाहिवस्वःक्रतुंचभद्रंबिभृथामृतंच । रायश्चस्थस्वंपत्यस्यपत्नीःसरस्व-
तीतद्दृणतेवयोधात् १२ प्रतियदापोअदृश्रमायतीर्घृतंपयांसिबिभ्रतीर्मधूनि ।
अध्वर्युभिर्मनसासंविदानाइन्द्रायसोमंसुषुतंभरन्तीः १३ एमाअग्मन्रेवतीर्जी-
वधन्याअध्वर्यवःसादयतासखायः । निवर्हिर्धिधत्तनसोम्यासोऽपांनप्त्रासंविदा-

नासंएनाः १४ आग्मन्नापंउशतीर्बर्हिरेदंन्यंध्वरेअंसदन्देवयन्तीः । अध्वर्यवः सुनुतेन्द्रांयसोममभूंदुवःसुशकांदेवयुज्या १५ ॥ २६ ॥

आ न एकादश कवप ऐलूषो विश्वेदेवास्त्रिष्टुप् ।

३१ आनोंदेवानामुपंवेतुशंसोविश्वेंभिस्तुरैरवंसेयजंत्रः । तेभिर्वयंसुखा-योंभवेमतरंन्तोविश्वांदुरितास्यांम १ पारिंचिन्मर्तोद्रविंणंममन्याद्वृतस्यंपथान-मसाविंवासेत् । उतस्वेनक्रतुंनासंवंदेत्रश्रेयांसंदक्षंमनंसाजगृभ्यात् २ अधांयि धीतिरसंसृग्रमंशांस्तीर्थेनदस्ममुपंयन्त्यूमाः । अभ्यांनश्मसुवितस्यंशूषंनवेद-सोअमृतांनामभूम ३ नित्यंश्चाकन्यात्स्वपंतिर्दमूनायस्मांउदेवःसंविताजजा-नं । भगोंवागोभिंर्यमेमंनज्यात्सोअंस्मैचारुश्छदयदुतस्यांत् ४ इयंसाभूया उपसांमिवक्षायद्दंक्षुमन्तःशवंसासुमायंन् । अस्यस्तुतिंजरितुभिंक्षमाणाआ

नःशग्मासउपयन्तुवाजाः ५ ॥ २७ ॥ अस्येदेवासुमतिःपंप्रथानाभंवत्पूर्व्या भूमनागौः । अस्यसनींळाअसुरस्ययोनौसमानआभरंणेविभ्रंमाणाः ६ किं स्विद्वनंकउसवृक्षआंसयतोद्यावांपृथिवीनिंष्टतक्षुः । संतस्थानेअजरेइतऊंतीअहांनिपूर्वीरुषसौजरन्त ७ नैतावंदेनापरोअन्यदंस्त्युक्षासद्यावांपृथिवीविभर्ति । त्वचंपविंत्रेकृणुतस्वधावान्यदींसूर्यंनहरितोवहंन्ति ८ स्तेगोनक्षामत्यैतिपृथ्वीं मिहंनवातोविहंवातिभूमं । मित्रोयत्रवरुणोअज्यमांनोऽग्निर्वनेनव्यसंदृशोकंम् ९ स्तरीर्यत्सूतंसद्योअज्यमांनाव्यथिरव्यथीःकृणुतस्वगोपा । पुत्रोयत्पूर्वंःपित्रोर्जनिंष्टशम्यांगौर्जिगारयद्धंपृच्छान् १० उतकण्वंनृषदंःपुत्रमांहुरुतश्यावोधनमादंत्तवाजी । प्रकृण्वायरुशंदपिन्वतोधंक्रतमत्रनकिंरस्माअपीपेत् ११ ॥ २८ ॥

प्र सुग्मन्ता नव ऐलूपो विश्वेदेवा जगती । अन्त्याश्चतस्रस्त्रिष्टुभः ।

३२ प्रसुग्मन्तांधियसानस्यसक्षणिंवरेभिर्वराँअभिप्रसीदतः । अस्माक-
मिन्द्रंउभयंजुजोषतियत्सोम्यस्यान्धसोवुवोधति १ वीन्द्रयासिदिव्यानिरोचना
विपार्थिवानिरजंसापुरुष्टुत । येत्वावहंन्तिमुहुरध्वराँउपतेसुवन्वन्तुवग्वनाँअरा-
धसः २ तदिन्मेछन्त्सद्मपुपोवपुष्टरंपुत्रोयज्जानंपित्रोरधीयति । जायापतिंवहतिव-
ग्नुनासुमत्पुंसइद्रद्रोवंहतुःपरिष्कृतः ३ तहित्सधस्थंमभिचारुदीधयुगावोयच्छा-
संन्वहनुंनघेनवः । मातायन्मन्तुर्यूथस्यपूर्व्याभिवाणस्यसप्तधातुरिज्जनः ४ प्र
वोच्छांरिरिचेदेवयुष्पदमेकोरुद्रेभिर्यातितुर्वणिः । जरावायेष्वमृतेषुदावनेपरिव
ऊमेभ्यःसिञ्चतामधु ५ ॥ २९ ॥ निधीयमानमपगूळ्हमप्सुप्रमेदेवानांव्रतपाउ

वाच । इन्द्रोविद्वाँअनुहित्वाचचक्षतेनाहमग्नेअनुशिष्टआगाम् ६ अक्षेत्रवित्क्षेत्रविदंह्यप्राट्सप्रैतिक्षेत्रविदानुशिष्टः । एतद्वैभद्रमनुशासनस्योतस्तुतिंवन्दत्यत्रसीनाम् ७ अद्येदुप्राणीदमंमन्निमाहापीवृतोअधयन्मातुरूधः । एमैनमाप जरिमायुवानमहेळन्वसुःसुमनावभूव ८ एतानिभद्राकलशक्रियामकुरुश्रवणदर्दतोमघानि । दानइद्वोमघवानःसोअस्त्वयंचसोमोहृदियंविभर्मि ९ ॥ ३० ॥

इति शाकलर्क्संहितायां सप्तमाष्टके सप्तमोध्यायः ॥ ७ ॥ ७ ॥

प्रमाद्यावैश्वदेव्यैन्द्रःप्रगाथःपरागायद्व्योद्वेकुरुश्रवणस्यत्रासदस्यवस्यदानस्तुतिःपराभिर्मृतेमित्रातिथौराज्ञितत्स्नेहाद्दिरुपमश्रवसंपुत्रमस्यव्यशोकयत्मावेपाःपळूनामौजवान्वाक्षोक्षकृपिप्रशंसाचाक्षकितवनिन्दाचसप्तमीजगत्यघ्रंळुशोधानाकोवैश्वदेवंतुद्वित्रिष्टुवन्तंनूपासानक्तानमोद्वादशसौर्योभितपाःसौर्यंजागतंवैत्रिष्टुब्दशम्यस्मिन्नःपञ्चयुष्कवानिन्द्रोयोवांपळूनाकाक्षीवतीघोषाश्विनंहित्रिष्टुवन्तंर-

धंयान्तंसमानंवृचंसुहस्त्योघौपेयोस्तेवैकादशंकृष्णोच्छामेद्वित्रिष्टुवन्तंत्वायातुत्रित्रिष्टुवादिदिवस्परि-
द्वादशवत्सामिराग्नेयंतु ।

प्रमा नव कवप ऐलूषो गायत्री । आद्याया विश्वेदेवाः । उपाद्ययोरिन्द्रः । चतुर्थी-
पञ्चम्योः कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः । शिष्टानामुपमश्रवा मित्रा-
तिथिपुत्रः । आद्या त्रिष्टुप् । उपाद्या बृहती । तृतीया सतोबृहती ।

३३ ओम् प्रमांयुयुज्रेप्रयुजोजनांनांदहांमिस्मपूषणमन्तरेण । विश्वेदेवा-
सोअधमामरक्षन्दुःशासुरागादितिर्घोषंआसीत् १ संमातपन्त्युक्षितंःसुपत्नीरि-
युपशंवः । निबाधतेअमतिर्न्नग्नताजसुर्वेर्नवेवीयतेमतिः २ मूषोनशिश्नाव्यद-
न्तिमाध्यःस्तोतारंतेशतक्रतो । सकृत्सुनोमघवन्निन्द्रमृळयाधापितेवनोभव ३
कुरुश्रवणमावृणिराजानंत्रासदस्यवम् । मंहिष्ठंवाघतामृषिः ४ यस्यमाहरितो
रथेतिस्रोवहन्तिसाधुया । स्तवैसहस्रंदक्षिणे ५ ॥ १ ॥ अस्यप्रस्वांदसोगिरंउ-

प्रमश्वंवसःपितुः । क्षेत्रंनरण्वमूचुषे ६ अर्धपुत्रोपमश्रवोनपान्मित्रातिथेरिहि। पितुष्टेअस्मिवन्दिता ७ यदीशीयामृतानामुतवामर्त्यानाम् । जीवेदिन्मघवाम-म ८ नेदेवानामतिव्रतंशतात्मांचनजीवति । तथायुजाविवावृते १ ॥ २ ॥

प्रावेपाश्चतुर्दश कवप ऐलूषोक्षो वा मौजवांस्त्रिष्टुप् । प्रथमासप्तमीनवमीद्वादशीत्रयोदशी-नामक्षकृषिप्रशंसा । शिष्टानामक्षकितवनिन्दा । सप्तमी जगती ।

३४ प्रावेपामावृहतोमादयन्तिप्रवातेजाइरिणेववृतानाः । सोमस्येवमौज-वतस्यभक्षोविभीदकोजागृविर्मह्यमच्छान् १ नमामिमेथनजेहीळएवाशिवा सखिभ्यउतमह्यमासीत् । अक्षस्याहमेकपरस्यहेतोरनुव्रतामपजायामरोधम् २ द्वेष्टिश्वश्रूरपजायारुणद्धिननाथितोविन्दतेमर्डितारम् । अश्वस्येवजरतोवरन्यस्य नाहंविन्दामिकितवस्यभोगम् ३ अन्येजायांपरिमृशन्त्यस्ययस्यागृधद्वेदनेवा-

ज्यं१क्षः । पितामाताभ्रातरएनमाहुर्नजानीमोनयंतावृद्धमेतम् ४ यदादीध्ये
नदंविपाण्येभिःपगायद्योऽवहीयेसखिभ्यः । न्युप्ताश्चबभ्रवोवाचमक्रंतँएमीदेषां
निष्कृतंजारिणीव ५ ॥ ३ ॥ सभामेंतिकितवःपृच्छमानोजेष्यामीतितन्वा३
शूशुजानः । अक्षासोंअस्यवितिरन्तिकामंप्रतिदीव्नेदधंतआकृतानिं ६ अक्षा-
सइदंङ्कुशिनोंनितोदिनोंनिकृत्वांनस्तपनास्तापयिष्णवः । कुमारदेष्णाजयंतः
पुनर्हणोमध्वासंपृक्ताःकितवस्यंबर्हणा ७ त्रिपञ्चाशःक्रीळतिव्रातंएषांदेवइंवस-
वितासत्यधर्मा । उग्रस्यचिन्मन्यवेनांनमन्तेराजांचिदेभ्योनमइत्कृणोति ८
नीचावर्तन्तउपरिस्फुरन्त्यहस्तांसोहस्तवन्तंसहन्ते । दिव्याअङ्गाराइरिणेन्युप्ताः
शीताःसन्तोहृदयंनिर्दहन्ति ९ जायातप्यतेकितवस्यहीनामातापुत्रस्यचरतःक्व-
स्वित् । ऋणावाबिभ्यद्धनमिच्छमानोऽन्येषामस्तमुपनक्तमेति १० ॥ ४ ॥

स्त्रियंदृष्ट्वायकितवंततापान्येषांजायांसुकृतंचयोनिम् । पूर्वाह्णेअश्वान्युयुजेहिवभ्रून्त्सोअग्रेरन्तेवृषलःपपाद ११ योवःसेनानीर्महतोगणस्यराजाव्रातस्यप्रथमोबभूव । तस्मैकृणोमिनधनारुणध्मिदशाहंप्राचीस्तदृतंवदामि १२ अक्षैर्मादीव्यःकृषिमित्कृषस्ववित्तेरमस्वबहुमन्यमानः । तत्रगावःकितवतत्रजायातन्मेविचष्टेसवितायमर्यः १३ मित्रंकृणुध्वंखलुमृळतानोमानोघोरेणचरताभिधृष्णु । निवोनुमन्युविशतामरातिरन्योबभ्रूणांप्रसितौन्वस्तु १४ ॥ ५ ॥

अबुध्रं चतुर्दश लुशो धानाको विश्वेदेवा जगती । अन्त्ये त्रिष्टुभौ ।

३५ अबुध्रमुत्यइन्द्रवन्तोअग्नयोज्योतिर्भरन्तउषसोव्यष्टिषु । महीद्यावापृथिवीचेततामपोऽद्यादेवानामवआवृणीमहे १ दिवस्पृथिव्योरवआवृणीमहेमातॄन्त्सिन्धून्पर्वताञ्छर्यणावतः । अनागास्त्वंसूर्यमुषासंमीमहेभद्रंसोमःसुवानो

अद्याकृणोतुनः २ द्यावानोअद्यपृथिवीअनागसोमहीत्रायेतांसुवितायमातरा ।
उषाउच्छन्त्यपवाधतामघंस्वस्त्य१ग्निंसमिधानमीमहे ३ इयंनउस्राप्रथमासुदे-
व्यैरवत्सनिभ्योरेवतीव्युच्छतु । आरेमन्युंदुर्विदत्रस्यधीमहिंस्वस्त्य१ग्निंसमि-
धानमीमहे ४ प्रयाःसिस्रतेसूर्यस्यरश्मिभिर्ज्योतिर्भरन्तीरुपसोव्युष्टिषु । भद्रा
नोअद्यश्रवसेव्युच्छतस्वस्त्य१ग्निंसमिधानमीमहे ५ ॥ ६ ॥ अनमीवाउषस
आचरन्तुनउदन्नयोजिहतांज्योतिषावृहत् । आयुक्षातामश्विनातूतुजिरथंस्व-
स्त्य१ग्निंसमिधानमीमहे ६ श्रेष्ठंनोअद्यसवितर्वरेण्यंभागमासुवसहिरत्नधा
असि । रायोजनित्रींधिषणामुपब्रुवेस्वस्त्य१ग्निंसमिधानमीमहे ७ पिपर्तुमा
तद्दृतस्यप्रवाचनंदेवानांयन्मनुष्याऽअमन्महि । विश्वाइदुस्राःस्पळुदेतिसूर्यः
स्वस्त्य१ग्निंसमिधानमीमहे ८ अद्रेपोअद्यवहिपःस्तरीमणिग्राव्णांयोगेमन्मनः

साधंईमहे । आदित्यानांशमींणिस्थाभुरण्यसिस्वस्त्यं१ग्निंसंमिधानमींमहे १
आनोवहिंःसधमादेबृहद्दिविवेवाँईळेसादयासप्तहोतॄन् । इन्द्रंमित्रंवरुणंसातयेभगंस्वस्त्यं१ग्निंसंमिधानमींमहे १० ॥ ७ ॥ तआदित्याआगंतासर्वतातयेबृधेनोयज्ञमंवतासजोषसः । बृहस्पतिंपूषणंमश्विनाभगंस्वस्त्यं१ग्निंसंमिधानमींमहे ११ तन्नोदेवायच्छतसुप्रवाचनंछर्दिरादित्याःसुभरंनृपाय्यंम् । पश्वेतोकायतनंयायजीवसेस्वस्त्यं१ग्निंसंमिधानमींमहे १२ विश्वेअद्यमरुतोविश्वेऊतीविश्वेभवन्त्वग्नयःसमिद्धाः। विश्वेनोदेवाअवसागंमन्तुविश्वंमस्तुद्रविणंवाजोअस्मे १३ येदेवासोऽवथवाजसातौयंत्रायध्वेयंपिपृथात्यंहः । योवोगोपीथेनभयस्यवेदतेस्यामदेववीतयेतुरासः १४ ॥ ८ ॥

उपासानक्ता चतुर्दश लुशो धानाको विश्वेदेवा जगती । अन्त्ये त्रिष्टुभौ ।

२६ उपासानक्तावृहतीसुपेशसाद्यावाक्षामावरुणोमित्रोअर्यमा । इन्द्रंहुवे मरुतःपर्वतॉंअपआदित्यान्द्यावापृथिवीअपःस्वः १ द्यौश्चनःपृथिवीचप्रचेतसक्रुतावरीरक्षतामंहसोरिषः । मादुर्विदत्रानिर्ऋतिर्नईशततद्देवानामवोअद्यावृणीमहे २ विश्वस्मान्नोअदितिःपात्वंहसोमातामित्रस्युवरुणस्यरेवतः । स्वर्वज्ज्योतिरवृकंनशीमहितद्देवानामवोअद्यावृणीमहे ३ द्यावावद्यन्नपरक्षाँसिसेधतुदुःष्वप्न्यंनिर्ऋतिंविश्वमत्रिणम् । आदित्यंशर्मँमरुतांमशीमहितद्देवानामवोअद्यावृणीमहे ४ एन्द्रोवर्हिःसीदंतुपिन्वतामिळावृहस्पतिःसामभिर्ऋक्वोअर्चतु । सुप्रकेतंजीवसेमन्मधीमहितद्देवानामवोअद्यावृणीमहे ५ ॥ १ ॥ दिविस्पृशंयज्ञमस्माकंमश्विनाजीराध्वरंकृणुतंसुम्नमिष्टये । प्राचीनंरश्मिमाहुतंघृतेनुतद्देवानामवो

अधावृणीमहे ६ पर्पह्वयेसुहवंभारुतंवृणंपावकमृष्वंसखायंशंभुवम् । रायस्योपं सौश्रवसायधीमहितद्देवानामवोंअद्यावृणीमहे ७ अपांपेरुंजीवधन्यंभरामहेदेवा-व्यंसुहवंमध्वरश्रियम् । सुरश्मिसोमंमिन्द्रियंयमीमहितद्देवानामवोंअद्यावृणी-महे ८ सनेमतत्सुसनितासन्वंभिर्वयंजीवाजीवपुत्राअनागसः । ब्रह्मद्विषोवि-प्वगेनोभरेरतंतद्देवानामवोंअद्यावृणीमहे ९ येस्थामनोर्यज्ञियास्तेशृणोतनयद्वो देवाईमहेतद्वधातन । जैत्रंक्रतुंरयिमद्वीरवद्यशस्तद्देवानामवोंअद्यावृणीमहे १० ॥ १० ॥ महद्यमहतामावृणीमहेऽवोंदेवानांबृहतामनर्वणाम् । यथावसुवीर-जातंनशामहैतद्देवानामवोंअद्यावृणीमहे ११ महोअग्नेःसमिधानस्यशर्मण्य-नागामित्रेवरुणेस्वस्तये । श्रेष्ठेस्यामसवितुःसवीमनितद्देवानामवोंअद्यावृणी-महे १२ येसवितुःसत्यसवस्यविश्वेमित्रस्यव्रतेवरुणस्यदेवाः । तेसौभगंवीरव-

द्रोमदमोदधातनद्रविणंचित्रमस्मे १३ सवितापश्चातात्सवितापुरुस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः १४ ॥ ११ ॥

नमो द्वादशभितपाः सौर्यः सूर्यो जगती । दशमी त्रिष्टुप् ।

३७ नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत । दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत १ सामासत्योक्तिःपरिपातुविश्वतोद्यावाचयत्रं ततनन्नहानिच । विश्वमन्यन्निविशतेयदेजतिविश्वाहापोविश्वाहोदेतिसूर्यः २ न तेअदेवःप्रदिवोनिवासतेयदेतशोभिःपतरैरथर्यसि । प्राचीनमन्यदनुवर्ततेरजउदन्येनज्योतिषायासिसूर्य ३ येनसूर्यज्योतिषावाधसेतमोजगच्चविश्वमुदियर्षिभानुना । तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुष्वप्न्यंसुव ४ विश्वस्यहि

प्रेषितोरक्षसिव्रतमहेळयन्नुच्चरासिस्वधाअनु। यदद्यत्वासूर्योपव्रवामहैतंनोदेवाअ-
नुमंसीरतक्रतुम् ५ तंनोद्यावापृथिवीतन्नआपइन्द्रःशृण्वन्तुमरुतोहवंवचः। मा
शूनेभूमसूर्यस्यसंदृशिभद्रंजीवन्तोजरणामशीमहि ६ ॥ १२ ॥ विश्वाहात्वा
सुमनसःसुचक्षसःप्रजावन्तोअनमीवाअनागसः। उद्यन्तंत्वामित्रमहोदिवेदिवे
ज्योग्जीवाःप्रतिपश्येमसूर्य ७ महिज्योतिर्बिभ्रतंत्वाविचक्षणभास्वन्तंचक्षुषेच-
क्षुषेमयः। आरोहन्तंबृहतःपाजसस्परिवयंजीवाःप्रतिपश्येमसूर्य ८ यस्यतेवि-
श्वाभुवनानिकेतुनाप्रचेरतेनिचविशन्तेअक्तुभिः। अनागास्त्वेनहरिकेशसूर्याह्ना-
क्षानोवस्यसावस्यसोदिहि ९ शंनोभवचक्षसाशंनोअह्नाशंभानुनाशंहिमाशंघृ-
णेन। यथाशमध्वञ्छमसंदुरोणेतत्सूर्यद्रविणंधेहिचित्रम् १० अस्माकंदेवाउ-
भयायजन्मनेशमँयच्छतद्विपदेचतुष्पदे। अदितिर्वदूर्जयमानमाशिंतंतदस्मेशं

योरर्पोदधातन ११ यद्वोदेवाश्चकृमजिह्वयागुरुमनसोवाप्रयुतीदेवहेळनम् ।
अरावायोनोअभिदुच्छुनायतेतस्मिन्तदेनोवसवोनिधेतन १२ ॥ १३ ॥

अस्मिन्नः पञ्चेन्द्रो मुष्कवानिन्द्रो जगती ।

३८ अस्मिन्नइन्द्रपृत्सुतौयज्ञस्यतिशिमींवतिक्रन्दसिमावसातये । यत्रगोपा-
ताधृपितेपुखादिषुविष्वक्पतन्तिदिद्यवोनृषाह्ये १ सनःक्षुमन्तंसदनेव्यूर्णुहिगो-
अर्णसंरयिमिन्द्रश्रवाय्यम् । स्यामतेजयंतःशक्रमेदिनोयथावयमुश्मसितद्वसो
कृधि २ योनोदासमआर्योवापुरुष्टुतादेवइन्द्रयुधयेचिकेतति । अस्माभिष्टेसुयहाः
सन्तुशत्रवस्त्वयावयंतान्त्वनुयामसंगमे ३ योदभ्रेभिर्हव्योयश्चभूरिभिर्योअभी-
केवरिवोविनृषाह्ये । तंविखादेसस्निमप्यश्तंनरमर्वाञ्चमिन्द्रमवसेकरामहे ४

वसंसेकरामहेऽयंनासत्याश्रदरिर्यथादधत् ५ ॥ १५ ॥ इयंवामह्वेशृणुतंमेअश्वि-
नापुत्रायेवपितरामह्वेशिक्षतम् । अनांपिरज्ञांअसजात्यामतिःपुरातस्याअभि-
शस्तेरवस्पृतम् ६ युवंरथेनविमदायशुन्ध्युवंम्यूंहथुःपुरुमित्रस्ययोषणाम् । युवं-
हवैवध्रिमत्याअगच्छतंयुवंसुपीतिंचक्रथुःपुरन्धये ७ युवंविप्रस्यजरणामुपेयुषःपु-
नःकलेरकृणुतंयुवद्वयः । युवंवन्दनमृश्यदादुदूपथुर्युवंसद्योविश्पलामेतवेकथः ८
युवंहरेभंवृषणागुहाहितमुदैरयतंममृवांसमश्विना । युवमूवीसंमुततप्तमन्नयओ-
मन्वन्तंचक्रथुःसप्तवध्रये ९ युवंश्वेतंपेदवेऽश्विनाश्वेनवभिर्वाजैर्नवतीचंवाजिनं-
म् । चर्कृत्यंददथुर्द्रावयत्सखंभगंननृभ्योहव्यंमयोभुवम् १० ॥ १६ ॥ नतंरा-
जानावदितेकुतश्चननांहोअश्नोतिदुरितंनकिंभयम् । यमाश्विनासुहवारुद्रवर्तनी
पूरोरथंकृणुथःपद्यांसह ११ आतेनयातंमनसोजवीयसारथंयंवांमृभवश्चक्रुरं-

श्विना । यस्ययोगेदुहिताजायतेदिवउभेअहनीसुदिनेविवस्वतः १२ तावतियाँ-
तंजयुपाविपर्वतमपिन्वतंशयवेधेनुमश्विना । वृकस्यचिद्वर्तिकामन्तरास्यायुवं
शर्चीभिर्म्रसितामंमुञ्चतम् १३ एतंवांस्तोममश्विनावकर्मतिक्षामभृगवोनरथं-
म् । न्यमृक्षामयोपणानमयेनित्यंनसूनुतनयंदधानाः १४ ॥ १७ ॥

रथं यान्तं चतुर्दश घोषा काक्षीवत्यश्विनौ जगती ।

४० रथंयान्तंकुहकोहवानराप्रातिंद्युमन्तंसुवितायभूषति । प्रातर्यावाणंवि-
भ्यंविशेविशेवस्तोर्वस्तोर्वहमानंधियाशमि १ कुहस्विद्दोषाकुहवस्तोरश्विना
कुहाभिपित्वंकरतःकुहोषतुः । कोवांशयुत्राविधवेवदेवरंमर्यंनयोषांकृणुतेस-
धस्थआ २ प्रातर्जरेथेजरणेवकापयावस्तोर्वस्तोर्युजतागच्छथोगृहम् । क-
स्यध्वस्राभवथःकस्यवानराराजपुत्रेवसवनावगच्छथः ३ युवांमृगेववारणा

मृगण्यवोदोषावस्तोर्हविषानिह्वयामहे । युवंहोत्रामृतुथाजुह्वतेनरेयुंजनायवहथः
शुभस्पती ४ युवांहघोषापर्यश्विनायतीराजूऊचेदुहितापृच्छेवांनरा । भूतंमेअ-
ह्नउतभूतमक्तवेऽश्वावतेरथिनेशक्तमवते ५ ॥ १८ ॥ युवंकवीष्ठःपर्यश्विनारथं
विशोनकुत्सोजरितुर्नशायथः । युवोर्हमक्षापर्यश्विनामध्वासाभरतनिष्कृतंन
योर्वणा ६ युवंहभुज्युंयुवमश्विनावशंयुवंशिञ्जारंमुशनामुपारथुः । युवोररांवा
परिसख्यमासतेयुवोरहमवसासुम्नमाचके ७ युवंहकृशंयुवमश्विनाशयुंयुवंविध-
न्तंदिधवांमुरुष्यथः । युवंसनिभ्यःस्तनयन्तमश्विनापव्रजमूर्णुथःसप्तास्यम् ८
जनिष्टयोषापतयत्कनीनकोविचारुहन्वीरुधोदंसनाअनु । आस्मैरीयन्तेनिवने-
वसिन्धवोऽस्माअह्नेभवतितत्पतित्वनम् ९ जीवंरुदन्तिविमयन्तेअध्वरेदीर्घामनु-
प्रसितिंदीधियुर्नरः । वामंपितृभ्योयइदंसमेरिरेमयःपतिभ्योजनयःपरिष्व-

जें १० ॥ १९ ॥ नतस्यविघ्नतदुपप्रवोचतियुवाहयद्युवत्याःक्षेतियोनिषु । प्रियोस्त्रियस्यवृषभस्यरेतिनोगृहंगमेमाश्विनातदुश्मसि ११ आवांमगन्त्सुमतिवाँजिनीवसून्यश्विनाहृत्सुकामाअयंसत । अभूतंगोपामिथुनाशुभस्पतीप्रियाअर्यम्णोदुर्योंअशीमहि १२ तामंन्दसानामनुषेदुरोणआधत्तंरयिंसहवीरंवचस्यवें । कृतंतीर्थंसुप्रपाणंशुभस्पतीस्थाणुंपथेष्ठामपदुर्मतिंहंतम् १३ क्वस्विदद्यकंतमास्वश्विनाविक्षुदस्त्रामादयेतेशुभस्पती । कईंनियेमेकतमस्यंजग्मतुर्विप्रस्यवायजमानस्यवागृहम् १४ ॥ २० ॥

समानं तृचः सुहास्त्यो घौषेयाश्विनौ जगती ।

१ समानमुत्यंपुरुहूतमुक्थ्यंरथंत्रिचक्रंसवनागनिंगमतम् । परिज्मानंविदथ्यंसुवृक्तिभिर्वयंव्युष्टाउपसोहवामहे १ प्रातर्युजंनासत्याधितिष्ठथःप्रातर्या-

वांणमधुवाहंनंरथम् । विशोयेनगच्छंथोयज्वरीर्नराकीरेश्चिंयज्ञंहोतृमन्तमश्वि-
ना २ अध्वर्युवामधुपाणिंसुहस्त्यमग्निधंवाधृतदक्षंदमूनसम् । विप्रंस्यवायत्स-
वंनानिगच्छथोऽतआयांतंमधुपेयमश्विना ३ ॥ २१ ॥

अस्तेवैकादश कृष्ण इन्द्रस्त्रिष्टुप् ।

४२ अस्तेवसुप्रंतरंलायुयस्यन्भूर्णिवप्रंभरास्तोमंमस्मै । वाचाविप्रास्तर-
त्वाचंमयोंनिरांमयजरितःसोमइन्द्रम् १ दोहेनगामुपंशिक्षासखायंप्रबोधयज-
रितर्जरिमिन्द्रम् । कोऽङ्गनपूर्णवसुनान्यृष्टमाच्यावयमघदेयायशूरम् २ किमु-
ङ्गत्वांमघवन्भोजमाहुःशिशीहिमांशिश्रयंत्वांशृणोमि । अग्नस्वतीममधीरस्तु
शक्रवसुविदंभगंमिन्द्राभरानः ३ त्वांजनांममसत्येष्विन्द्रसन्तस्थानाविह्वयन्ते
समीके । अत्रायुजंकृणुतेयोहविष्मान्त्रासुन्वतासख्यंवष्टिशूरः ४ धनंनस्पुन्द्रंव- ॥८७४॥

हूलंयोअस्मेतीव्रान्त्सोमाँआसुनोतिप्रयस्वान् । तस्मैशत्रून्त्सुतुकान्मातरश्वोनि
स्वष्ट्रान्युवतिहन्तिवृत्रम् ५ ॥ २२ ॥ यस्मिन्वयंदधिमाशंसमिन्द्रेयःशि-
थायमघवाकामंमस्मे । आराच्चित्सन्भयतामस्यशत्रुर्यस्मैद्युम्नाजन्यानम-
न्ताम् ६ आराच्छत्रुमपबाधस्वदूरमुग्रोयःशम्बःपुरुहूततेन । अस्मेधेहियन्न-
मद्गोमदिन्द्रकृधीधियंजरित्रेवाजरत्नाम् ७ प्रयमन्तर्वृषसवासोअग्मन्तीव्राःसो-
मांवहुलान्तासइन्द्रम् । नाहंदामानंमघवानियंसन्त्रिसुन्वतेवहतिभूरिवामम् ८
उतप्रहामंतिदीव्याजयातिकृतंयच्छ्वघ्नीविचिनोतिकाले । योदेवकामोनधनारु-
णद्धिसमित्तंरायासृजतिस्वधावान् ९ गोभिंष्टरेमामंतिंदुरेवायवेनक्षुधंपुरुहूत
विश्वाम् । वयंराजभिःप्रथमाधनान्यस्माकेंनवृजनेनाजयेम १० बृहस्पतिर्नःप-

वांणमधुवाहंनंरथम् । विशोयेनगच्छंथोयज्वरीर्नराकोरेश्विंद्युज्ञंहोतृमन्तमश्वि-
ना २ अध्वर्युवामधुपाणिंसुहस्त्यंमग्निधंवाधृतदक्षंदमूंनसम् । विप्रंस्यवायत्स-
वंनानिगच्छथोऽतआयांतंमधुपेयंमश्विना ३ ॥ २१ ॥

अस्तेवैकादश कृष्ण इन्द्रास्त्रिष्टुप् ।

४२ अस्तेवसुप्रंतरंलायुयस्यन्भूर्णान्निवप्रभंरास्तोमंमस्मै । वाचाविंप्रास्तर-
त्वाचंमर्योनिरांमयजरितुःसोमइन्द्रम् १ दोहेनगामुपंशिक्षासखायंप्रबोधयज-
रितर्जारमिन्द्रम् । कोशंनपूर्णंवसुनान्यृष्टमाच्यावयमघदेयायशूरम् २ किंम-
ङ्गत्वांमघवन्भोजमाहुःशिशीहिमांशिश्नयंत्वांशृणोमि । अप्रंस्वतीममधीरंस्तु
शक्रवसुविदंभगंमिन्द्राभंरानः ३ त्वांजनांममसत्येष्विन्द्रसन्तस्थानाविह्वयन्ते
समीके । अत्रायुजंकृणुतेयोहविष्मान्नासुन्वतासख्यंवष्टिशूरः ४ धनंनस्पन्द्रंवं-

हूलंयोअस्मैतीव्रान्त्सोमाँआसुनोतिप्रयंस्वान् । तस्मैशत्रून्त्सुतुकान्प्रातरह्नोनि स्वष्ट्यान्युवतिर्हन्तिवृत्रम् ५ ॥ २२ ॥ यस्मिन्वयंदधिमाशंसमिन्द्रेयःशिश्राय्यमघवाकामंमस्मे । आराच्चित्सन्भयतामस्युशत्रुर्यस्मैयुन्नाजन्यानमन्ताम् ६ आराच्छत्रुमपबाधस्वदूरमुग्रोयःशम्बःपुरुहूततेन । अस्मेधेहियन्नमन्नोमदिन्द्रकृधीधियंजरित्रेवाजरत्नाम् ७ प्रयमन्तर्वृषसवासोअग्मन्तीव्राःसोमांवहुलान्तासइन्द्रम् । नाहंदामानंमघवानियंसन्निसुन्वतेवहतिभूरिवामम् ८ उतप्रहामतिदीव्याजयातिकृतंयच्छ्वघ्नीविचिनोतिकाले । योदेवकामोनधनारुणद्धिसमित्तंराया सृजतिस्वधावान् ९ गोभिष्टरेमामतिंदुरेवायवेनक्षुधेपुरुहूत विश्वाम् । वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम १० बृहस्पतिर्नःप-

रिपातुपश्चादुतोत्तरस्मादधरादघायोः । इन्द्रःपुरस्तादुतमध्यतोनःसखासखिभ्यो- अ.७अ.८
वरिवःकृणोतु १ ॥२ ३॥इति शाकलर्क्संहितायां दशमे मण्डले तृतीयोनुवाकः॥ १०॥ ३॥

अच्छाम एकादश कृष्ण इन्द्रो जगती । अन्त्ये त्रिष्टुभौ ।

४३ अच्छामइन्द्रंमतयःस्वर्विदःसध्रीचीर्विश्वाउशतीरनूषत । परिष्वजन्ते
जनयोयथापतिंमर्यंनशुन्ध्युंमघवानमूतये १ नघात्वद्रिगपवेतिमेमनस्त्वेइ-
त्कामंपुरुहूतशिश्रय । राजेवदस्मनिषदोऽधिबर्हिष्यस्मिन्त्सुसोमेऽवपानमस्तु-
ते २ विष्वृदिन्द्रोअमतेरुतक्षुधःसइद्रायोमघवावस्वईशते । तस्येदिमेप्रवणेस-
तसिन्धवोवयोवर्धन्तिवृषभस्यशुष्मिणः ३ वयोनवृक्षंसुपलाशमासदन्त्सोमा-
सइन्द्रंमन्दिनश्चमूषदः।प्रयामनीरंशवसादविंद्युतद्दित्स्वर्मनवेज्योतिरायँम् ४
कृतंनश्चक्रीविचिनोतिदेवनेसंवर्गंयन्मघवासूर्यंजयत् । नतत्तेअन्योअनुवीर्यंश- ॥५७५॥

कन्नपुराणोमघवन्नोतनूतनः ५ ॥ २४ ॥ विशंविशंमघवापर्यशायतजनानां घेनाअवचाकशद्गृणा। यस्याहशक्रःसवनेपुरण्यतिसतीव्रैःसोमैःसहतेपृतन्यतः ६ आपोनसिन्धुमभियत्समक्षरन्त्सोमासइन्द्रेकुल्याइवह्रदम् । वर्धन्तिविप्रामहोअस्यसादनेयवंनवृष्टिर्दिव्येनदानुना ७ वृषानकुद्धःपतयद्रजःस्वायोअर्यपत्नीरकृणोदिमाअपः । ससुन्वतेमघवाजीरदानवेऽविन्दज्ज्योतिर्मनवेहविष्मते ८ उज्जापतांपरशुर्न्योतिषासहभूयाऋतस्यसुदुघापुराणवत् । विरोचतामरुषोभानुनाशुचिःस्वर्णशुक्रंशुशुचीतसत्पतिः ९ गोभिष्टरेमामतिंदुरेवायवेनक्षध्यंपुरुहूतविश्वाम् । वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम १० बृहस्पतिंनःपरिपातुपश्चादुतोत्तरस्मादधरादघायो । इन्द्रःपुरस्तादुतमध्यतोनःसखास्खिभ्योवरिवःकृणोतु ११ ॥ २५ ॥

आ यात्वेकादश कृष्ण इन्द्रस्त्रिष्टुप् । चतुर्थ्यादिनवमन्ता जगत्यः ।

४४ आयात्विन्द्रःस्वपतिर्मदायुयोधमीणातूतुजानस्तुविष्मान् । प्रत्वक्षाणो अतिविश्वासहास्यपारेणमहतावृष्ण्येन १ सुष्ठामारथंःसुयमाहरीतेमिम्यक्षवज्रो नृपतेगभस्तौ । शीभंराजन्त्सुपथायाह्यर्वाङ्वर्धामतेपपुरोवृष्ण्यानि २ एन्द्रवाहौनृपतिंवज्रबाहुमुग्रमुग्रास्तविषासंएनम् । प्रत्वक्षसंवृषभंसत्यशुष्ममेमंस्मत्रासंधमादोवहन्तु ३ एवापतिंद्रोणसाचंसचेतसमूर्जःस्कम्भंधरुणआवृषायसे । ओजःकृष्वसंगृभायत्वेअप्यसोयथाकेनिपानामिनोवधे ४ गमन्नस्मेवसून्याहि शंसिषंस्वाशिषंभरमायाहिसोमिनः । त्वमीशिषेनास्मिन्नासत्सिबर्हिष्यनाधृष्यातवपात्राणिधर्मणा ५ ॥ २६ ॥ पृथक्प्रायन्प्रथमादेवहूतयोऽकृण्वतश्रवस्यानि दुष्टरा । नयेशेकुर्यज्ञियानावमारुहमीर्मैवतेन्यविशन्तकेपयः ६ एवैवापागपरेस-

न्तुदूढ्यो ऽश्वायेपांदुर्युजंआयुयुज्रे । इत्थायेप्रागुपरेसन्तिदावनेपुरूणियत्रेवयुनानि भोजना ७ गिरिरज्रात्रेजमानाँअधारयद्द्यौःक्रन्ददन्तरिक्षाणिकोपयत् । समीचीनेधिषणेविष्कभायतिवृष्णःपीत्वामदंउक्थानिशंसति ८ इमंविभमिसुकृंतंते अङ्कुशंयेनारुजासिमघवञ्छफारुजः । अस्मिन्त्सुतेसवनेअस्त्वोक्यंसुतइष्टौमघवन्बोध्याभगः ९ गोभिष्टरेमामतिंदुरेवायवेनक्षुधंपुरुहूतविश्वाम् । वयं राजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम १० बृहस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादधरादघायोः । इन्द्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु ११ ॥ २७ ॥

दिवस्परि द्वादश वत्सप्रिरग्निस्त्रिष्टुप् ।

४५ दिवस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः । तृतीयमप्सुनृम-

णाअजंस्रमिन्धानएनंजरतेस्वाधीः १ विद्मातेअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा । विद्मातेनामपरमंगुहायद्विद्मातमुत्संयतंआजगन्थ २ समुद्रेत्वानृमणाअप्स्वं१न्तर्नृचक्षाईधेदिवोअंग्नऊधन् । तृतीयेत्वारजंसितास्थिवांसमपामुपस्थेमहिषाअवर्धन् ३ अक्रंन्ददग्निःस्तनयंद्विद्यौःक्षामारेरिहद्वीरुधंःसमञ्जन् । सद्योजंज्ञानोविहीमिद्धोअख्यदारोदंसीभानुनाभात्यन्तः ४ श्रीणामुदारोधरुणोरयीणांमंनीषाणांप्रार्पणःसोमंगोपाः । वसुंःसूनुःसहंसोअप्सुराजाविभात्यग्रंउषसांमिधानः ५ विश्वंस्यकेतुर्भुवनस्यगर्भआरोदंसीअपृणाज्जायंमानः । वीळुंचिदद्रिमभिनत्परायजनायदग्निमयंजन्तपञ्चं ६ ॥ २८ ॥ उशिकपावकोअरतिःसुमेधामर्तेष्वग्निरमृतोनिधायि । इयंतिंधूममरुषंभारिंभ्रदुच्छुक्रेणशोचिषायामिनक्षन् ७ दृशानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुःश्रियेरुचानः । अग्नि-

रमृतोऽअभवद्वयोऽग्निर्यदेनंद्यौर्जनयत्सुरेताः ८ यस्तेऽअद्यकृणवद्भद्रशोचेऽपूपंदेवघृतवन्तमग्ने । प्रतंनयप्रतरंवस्योऽअच्छाभिसुम्नंदेवभक्तंयविष्ठ ९ आतंभजसौश्रवसेष्वग्नऽउक्थऽउक्थ्यऽआभजशस्यमाने । प्रियःसूर्येप्रियोऽअग्नाभवात्युज्जातेनभिनदद्युज्जनित्वैः १० त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्याणि । त्वयासहद्रविणमिच्छमानाव्रजंगोमन्तमुशिजोविवव्रुः ११ अस्तोव्यग्निर्नरांसुशेवोवैश्वानरऋषिभिःसोमगोपाः । अहेवेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरम् १२ ॥ २१ ॥ इति शाकलर्क्संहितायां सप्तमाष्टकेष्टमोध्यायः ॥ ७ ॥ ८ ॥

इति शाकलर्क्संहितायां सप्तमाष्टकं समाप्तम् ॥ ७ ॥

महोतादशजगृभ्माष्टौसप्तगुर्वकुण्ठमिन्द्रंतुष्टावविकुण्ठानामासुरीन्द्रतुन्यंपुत्रमिच्छन्तीमहत्तपस्तेपेत-
स्याःस्वयमेवेन्द्रःपुत्रोजज्ञेससप्तगुस्तुतिसंहृष्टआत्मानमुत्तरैस्त्रिभिस्तुष्टावाहंभुवमेकादशान्त्येत्रिष्टुभौससप्त-
मीचाहंदामन्त्योपाद्येचत्रिष्टुभौभवोमहेससप्तद्विजगत्याद्यन्तंकेतेभिसारिण्यौवपक्रारेणवृक्णेपुभ्रातृपुसौची-
कोमिरपःमाविश्यदेवेःसमवददुत्तरैस्त्रिभिर्महत्तंनवात्रयुजोग्निवाक्यंविश्वइत्युत्तरंचपङ्क्तयुज़ोदेवानांयमै-
च्छामेत्युत्तरंचैकादशकंतदयेतितुष्टुचोग्नेस्तन्तुमाद्याजगत्योऽष्टमीवर्जतांसुपङ्क्तहदुक्थोवामदेव्योदूरेष्टा-
विदंतेससप्तवैश्वदेवंतुचतुर्ध्याद्यास्तिस्रोजगत्यःपराणिचत्वारिसूक्तान्युक्ताऋषयोद्वैपदेत्वत्रिमण्डलेथहै-
क्ष्वाकोराजाससमातिर्गौपायनान्बन्ध्वादीन्पुरोहितांस्त्यक्त्वान्यौमायाविनौश्रेष्ठतमौमत्वापुरोदधेतमित-
रेक्रुद्धाअभिचेरुरथतौमायाविनौसुबन्धोःमाणानाचिक्षिपतुरथास्यभ्रातरस्त्रयोमाप्रगामेतिपङ्क्तगायत्रं-
स्वस्त्यपनंजस्त्रायत्तइतिद्वादशर्चमानुष्टुभंमनआवर्तनंजेपुःमतारीतिदशर्चेचतस्रोनिर्ऋत्यपनोदार्थंजेपुश्च-
तुर्ध्यासोमंचास्तुवन्मृत्योरपगमायोत्तराभ्यांदेवीमप्सुनीतिसप्तम्यालिङ्गोक्तदेवताःशिष्टाभिःपङ्क्तिमहा-
पङ्क्तिपङ्क्तयुत्तराभिर्यावापृथिव्योसमिन्द्रेतीन्द्रंचार्धर्चेनाजनमितिद्वादशर्चआनुष्टुभेचतसृभिरसमातिम-

स्तुवन्पश्चम्पेन्द्रंपष्ठ्यागस्त्स्यस्त्वसामातैपांराजानमस्तौत्पराभिःसुबन्धोर्जीवमाद्वयंस्तमन्त्सयालब्धसं-
ग्रमस्पृशन्पश्चाद्यागायद्व्योष्टम्याद्येपङ्क्तीइदमित्थासप्ताधिकानाभानेदिष्ठोमानवोवैश्वदेवंतत् ।

म होता दश वत्सप्रिरग्निस्त्रिष्टुप् ।

४६ ॐम् प्रहोतांजातोमहान्भोविन्नृपद्वांसीददपामुपस्थे । दधियोधायिस
नेययांसियन्तावसूंनिविधतेतनूपाः १ इमंविधन्तोअपांसधस्थेपशुंननष्टंपदैरनु
ग्मन् । गुहाचतन्तमुशिजोनमोभिरिच्छन्तोधीराभृगवोऽविन्दन् २ इमंत्रितो
भूयंविन्ददिच्छन्वैभूवसोमूर्धन्यद्व्यायाः । स्रशेवृधोजातआहुम्र्यैपुनाभिर्युवांभ-
वतिरोचनस्य ३ मन्द्रंहोतारमुशिजोनमोभिःप्राञ्चंयज्ञंनेतारमध्वराणाम् । वि-
शामकृण्वन्नरतिंपावुकंहव्यवाहंदधतोमानुषेषु ४ प्रभूर्जयन्तंमहांविपोधांमूरा
अमूरंपुरांदर्माणम् । नयन्तोगर्भंवनांधियंधुर्हिरिश्मश्रुंनावींणंधनंर्चम् ५॥ १ ॥

निपस्त्यासुत्रितःस्तभूयन्परिवीतोयोनौसीददन्तः । अतःसंगृभ्याविशादमूना विधर्मणायन्त्रैरीयतेनृन् ६ अस्याजरासोदमामरित्राअर्चद्धूमासोअग्नयःपावकाः । श्वितीचयःश्वात्रासोभुरण्यवोवनर्पदोवायवोनसोमाः ७ प्रजिह्वयाभरते वेपोअग्निःप्रयुनानिचेतसापृथिव्याः । तमायवःशुचयन्तंपावकंमन्द्रंहोतारंदधिरेयजिष्ठम् ८ यावायमग्निंपृथिवीजनिष्टामापस्त्वष्टाभगवोयंसहोभिः । ईळेन्यंप्रथमंमातरिश्वादेवास्तंतक्षुर्मनवेयजत्रम् ९ यंत्वादेवादधिरेहव्यवाहंपुरुस्पृहोमानुषासोयजत्रम् । सयामंनग्नेस्तुवतेवयोधाःप्रदैवयन्युशसःसंहिपूर्वीः १० ॥ २॥

चतुर्भ्याष्टौ सप्तगुरिन्द्रो वैकुण्ठस्त्रिष्टुप् ।

४७ जगृभ्मातेदक्षिणमिन्द्रहस्तंवसूयवोवसुपतेवसूनाम् । विद्माहित्वागोपतिं

शूरगोनामस्मभ्यंचित्रंवृषणंरयिंदाः १ स्वायुधंस्ववंसंसुनीथंचतुःसमुद्रंधरुणंरयीणाम् । चर्कृत्यंशंस्यंभूरिवारमस्मभ्यंचित्रंवृषणंरयिंदाः २ सुब्रह्माणंदेववन्तं वृहन्तंमरुंगंभीरंपृथुबुध्नमिन्द्र । श्रुतऋषिमुग्रमभिमातिषाहंमस्मभ्यंचित्रंवृषणं रयिंदाः ३ सनद्वाजंविप्रंवीरंतरुत्रंधनस्पृतंशूशुवांसंसुदक्षम् । दस्युहनंपूर्भिदं-मिन्द्रसत्यमस्मभ्यंचित्रंवृषणंरयिंदाः ४ अश्वावन्तंरथिनंवीरवन्तंसहस्रिणंशतिनंवाजमिन्द्र । भद्रव्रातंविप्रवीरंस्वर्यामस्मभ्यंचित्रंवृषणंरयिंदाः ५ ॥ ३ ॥ प्रसप्तगुंमृतधीतिंसुमेधांवृहस्पतिंमतिरच्छाजिगाति । यआङ्गिरसोनमसोपसद्यो ऽस्मभ्यंचित्रंवृषणंरयिंदाः ६ वनींवानोममंदूतासइन्द्रंस्तोमाश्चरन्तिसुमतीरियानाः । हृदिस्पृशोमनसाव्यमानाअस्मभ्यंचित्रंवृषणंरयिंदाः ७ यत्त्वायाः

मिंदद्धितन्नंइन्द्रवृहन्तंक्षयमसंमंजनांनाम् । अभितद्द्यावांपृथिवीगृणीतामस्म- अ.८अ.१
भ्यंचित्रंवृषणंरयिंदाः ८ ॥ ४ ॥

अहं भुवमेकादशेन्द्रो वैकुण्ठ इन्द्रो वैकुण्ठो जगती । सप्तम्यन्त्ये च त्रिष्टुभः ।

४८ अहंभुवंवसुनःपूर्व्यस्पतिरहंधनानिसंजयामिशश्वतः । मांहवन्तेपितरं
नजन्तवोऽहंदाशुषेविभंजामिभोजनम् १ अहमिन्द्रोरोधोवक्षोअथर्वणस्त्रिताय
गाअंचनयमहेरधि । अहंदस्युभ्यःपरिनृम्णमाददेगोत्राशिक्षन्दधीचेमातरि-
श्वने २ मह्यंत्वष्टावज्रंमतक्षदायसंमयिदेवासोऽवृजन्नपिक्रतुम् । ममानीकंसूर्य-
स्येवदुष्टरंमामार्यन्तिकृतेनकर्त्वेनच ३ अहमेतंगव्ययमश्व्यंपशुंपुरीषिणंसार्य-
केनाहिरण्ययम् । पुरूसहस्रानिशिशामिदाशुषेयन्मासोमासउक्थिनोअमंन्दि-
षुः ४ अहमिन्द्रोनपराजिग्यइद्धनंनमृत्यवेऽवतस्थेकदाचन । सोममिन्मांसुन्व- ॥२८०॥

न्तोयाचतावसुनमेपूरवःसख्येरिषाधन ५ ॥ ५ ॥ अहमेताञ्छाश्वसतोद्वाद्वेन्द्रंयेव-
ज्रंयुधयेऽकृण्वत । आह्वयमानाँअवहन्मनाहनंदृळ्हावदन्ननमस्युर्नमास्विनः ६
यापत्याजरदंष्टिर्यथासंः । भगोअर्यमासंवितापुरंन्धिर्मह्यंत्वादुर्गार्हपत्यायदेवाः
३६ तांपूषञ्छिवतंमामेरयस्वयस्यांबीजंमनुष्याऽवपन्ति । यानंउरूउशतीविं- ॥६१.३॥

श्रयातियस्यामुशन्तःप्रहरामशेपम् ३७ तुभ्यमग्रेपर्यवहन्त्सूर्यांवहतुनासह । पुनः
पतिभ्योजायांदाअग्नेप्रजयासह ३८ पुनःपत्नीमग्निरदादायुषासहवर्चसा । दी-
र्घायुरस्यायःपतिर्जीवातिशरदःशतम् ३९ सोमःप्रथमोविविदेगन्धर्वोविविद
उत्तरः । तृतीयोअग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः ४० ॥ २७ ॥ सोमोददद्गन्ध-
र्वायगन्धर्वोदददग्नये । रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमाम् ४१ इहैवस्तंमा
वियौष्टंविश्वमायुर्व्यश्नुतम् । क्रीळन्तौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे ४२ आनःप्र-
जांजनयतुप्रजापतिराजरसायसमंनक्त्वर्यमा । अदुर्मङ्गलीःपतिलोकमाविश
शंनोभवद्विपदेशंचतुष्पदे ४३ अघोरचक्षुरपतिघ्येधिशिवापशुभ्यःसुमनाःसुः
वर्चाः । वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे ४४ इमांत्वमिन्द्रमीढ्वः
सुपुत्रांसुभगांकृणु । दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि ४५ सम्राज्ञीश्वशुरे

भवसम्राज्ञीश्वश्रूंभव । ननान्दरिसम्राज्ञीभवसम्राज्ञ्यधिदेवृषु ४६ समंञन्तु विश्वेदेवाःसमापोहृदयानिनौ । संमातरिश्वासंधातासमुदेष्ट्रीदधातुनौ ४७ ॥ २८ ॥ इति शाकलर्क्संहितायां इत्यष्टमाष्टके तृतीयोध्यायः ॥ ८ ॥ ३ ॥

विहिंस्यधिकैन्द्रोवृषाकपिरिन्द्राणीन्द्रश्चसमूदिरेपाङ्क्तंरक्षोहणंपञ्चाधिकापायुराग्नेयंराक्षोघ्नंचतुरनुष्टुबन्तंहविरेकोनाङ्गिरसोमूर्धन्वान्वामदेव्योवासौर्यवैश्वानरीयमैन्द्रंस्तवद्यूनारेणुःपञ्चम्यैन्द्रासोमीसहस्रशीर्षापोळशनारायणःपौरुषमानुष्टुभंत्रित्रिष्टुबन्तंतुसंजाष्टवाद्रिःपञ्चोनारुणोवैतहव्यआग्नेयंयज्ञस्यशार्यंतोमानवोवैश्वदेवंतुजागतंमहितान्वःपार्ष्यःप्रस्तारपाङ्क्तंपुरस्ताद्बृहत्यन्तंत्रयोदश्युपाद्येचानुष्टुभौनवम्यक्षरैःपङ्क्तिरेकादशीन्यङ्कुसारिणीमैत्तेपलूनासर्पोर्बुदःकाद्रवेयोग्राव्णोस्तौत्पञ्चम्यन्तेत्रिष्टुभौसप्तमीच।

वि हि त्रयोविंशतिर्वृषाकपिरैन्द्र इन्द्राणीन्द्रश्च समूदिरे पङ्क्तिः ।

८६ ॐम् विहिंसोतोरसृक्षतनेन्द्रंदेवमंमंसत । यत्रामदद्वृषाकपिर्यःपुष्टेषुमत्सखाविश्वस्मादिन्द्रउत्तरः १ पराहीन्द्रधावसिवृषाकपेरतिव्यथिः । नोअहम्र ॥६१४

विन्दस्युन्मत्रसोमंपीतयेविश्वस्मादिन्द्रउत्तरः २ किमयंत्वावृषाकपिश्चकारहरिंतोमृगः । यस्माइरस्यसीदुन्व१योंवापुष्टिमद्वसुविश्वस्मादिन्द्रउत्तरः ३ यमिमंत्वंवृषाकपिंप्रियमिन्द्राभिरक्षसि।श्वान्वस्यजम्भिषदपिकर्णेवराह्युर्विश्वस्मादिन्द्रउत्तरः ४ प्रियातष्टानिमेकपिर्व्यक्ताव्यदूदुषत् । शिरोन्वस्यराविषंनसुगंदुष्कृतेभुवंविश्वस्मादिन्द्रउत्तरः ५ ॥ १ ॥ नमत्स्त्रीसुभसत्तरानसुयाशुतराभुवत् । नमत्प्रतिच्यवीयसीनसक्थ्युद्यमीयसीविश्वस्मादिन्द्रउत्तरः ६ उवेअम्बसुलाभिकेयथेवाङ्गभविष्यति । भसन्मेअम्बसक्थिमोशिरोमेवीवहष्यतिविश्वस्मादिन्द्रउत्तरः ७ किंसुबाहोस्वङ्गुरेपृथुष्टोपृथुजाघने । किंशूरपत्निनस्त्वमभ्यमीषिवृषाकपिंविश्वस्मादिन्द्रउत्तरः ८ अवीरामिवमामयंशरारुरभिमन्यते । उताहमस्मिवीरिणीन्द्रपत्नीमरुत्सखाविश्वस्मादिन्द्रउत्तरः ९ संहोत्रंस्मपुरानारीसमं-

नंवावंगच्छति । वेवाक्रतस्यंवीरिणीन्द्रंपत्नीमहीयतेविश्वस्मादिन्द्रउत्तरः १०
॥ २ ॥ इन्द्राणीमासुनारिषुसुभगामहमंश्रवम् । नह्यस्याअपरंचनजरसामरतेपतिर्विश्वस्मादिन्द्रउत्तरः ११ नाहमिन्द्राणिरारणसख्युर्वृषाकपेऋते । यस्येदनप्यंहविःप्रियंदेवेषुगच्छतिविश्वस्मादिन्द्रउत्तरः १२ वृषाकपायिरेवतिसुपुत्रआदुसुस्नुषे । घसत्तइन्द्रउक्षणःप्रियंकाचित्करंहविर्विश्वस्मादिन्द्रउत्तरः १३ उक्षणोहिमेपञ्चदशसाकंपचन्तिविंशतिम् । उताहमद्मिपीवइदुभाकुक्षीपृणन्तिमेविश्वस्मादिन्द्रउत्तरः १४ वृषभोनतिग्मशृङ्गोऽन्तर्यूथेषुरोरुवत् । मन्थस्तइन्द्रशंहदेयंतेसुनोतिभावयुर्विश्वस्मादिन्द्रउत्तरः १५
॥ ३ ॥ नसेशेयस्यरम्बतेऽन्तरासक्थ्याऽकपृत् । सेदीशेयस्यरोमशंनिषेदुषोविजृम्भतेविश्वस्मादिन्द्रउत्तरः १६ नसेशेयस्यरोमशंनिषेदुषोविजृम्भते । से- ॥६२५

दांशेयस्यरम्वंतेऽन्तरासक्थ्या३कपृद्विश्वंस्मादिन्द्रउत्तरः १७ अयमिंन्द्रवृषाक-
पिःपरंस्वन्तंहतंविंदत् । असिंसून्नांनवंचरुमादेधस्यान्नआचिंतंविश्वंस्मादिन्द्रउ-
त्तरः १८ अयमेंमिविचाकशद्विचिन्वन्दासमार्यम् । पिबांमिपाक्रसुत्वनोऽभि
धीरंमचाकशंविश्वंस्मादिन्द्रउत्तरः १९ धन्वंचयत्कृन्तत्रंचक्रतेंस्विन्नाविंयोजंना ।
नेदीयसोवृषाकपेऽस्तुमेहिंगृहाँउपविश्वंस्मादिन्द्रउत्तरः २० पुनरेहिंवृषाकपेसु-
विताकंल्पयावहै । यएषःस्वप्ननंशनोऽस्तुमेपिंपृथापुनर्विश्वंस्मादिन्द्रउत्तरः २१
यदुदंश्वोवृषाकपेगृहमिन्द्राजंगन्तन । कं१स्यपुल्वघोमृगःकमंगजनयोपनोवि-
श्वंस्मादिन्द्रउत्तरः २२ पशुँर्हनामंमानवीसाकंसंसूवत्रिंशतिम् । भद्रंभलत्य-
स्याअभूयस्याउदरमामंयद्विश्वंस्मादिन्द्रउत्तरः २३ ॥ ४ ॥

रक्षोहणं पञ्चविंशतिः पायुरग्नी रक्षोहा त्रिष्टुप् । अन्त्याश्चतस्रोऽनुष्टुभः ।

८७ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म । शिशानोअग्निः क्रतुभिःसमिद्धःसनोदिवासरिपःपातुनक्तम् १ अयोदंष्ट्रोअर्चिषायातुधानानुप स्पृशजातवेदःसमिद्धः । आजिह्वयामूरदेवान्नभस्वक्रव्यादोवृक्त्वयपिधत्स्वास-न् २ उभोभंयाविन्नुपधेहिदंष्ट्राहिंस्रःशिशानोऽवरंपरंच । उतान्तरिक्षेपरियाहि राजञ्जम्भैःसंधेह्यभियातुधानान् ३ यज्ञैरिषूःसंनमंमानोअग्नेवाचाशल्याँअशनि-भिर्दिहानः । ताभिर्विध्यहृदयेयातुधानान्प्रतीचोवाहून्प्रतिभङ्ध्येषाम् ४ अग्ने-त्वचंयातुधानस्याभिन्द्धिहिंस्राशनिर्हरसाहन्त्वेनम् । प्रपर्वाणिजातवेदःशृणीहि क्रव्यात्क्रविष्णुर्विचिनोतुवृक्णम् ५ ॥ ५ ॥ यत्रेदानींपश्यंसिजातवेदस्तिष्ठ-न्तमग्नउतवाचरन्तम् । यद्वान्तरिक्षेपथिभिःपतन्तंतमस्तांविध्यशर्वाशिशानः ६ ॥६१६

उतालंध्वंस्पृणुहिजातवेदआलेभानाद्दृष्टिभिर्यातुधानात् । अग्नेपूर्वोनिजंहिशो-
शुचानआमादःक्षिवङ्गस्तमंदन्त्वेनीः ७ इहप्रवूंहियतमःसोअंग्नेयोयातुधानोय
इदंकृणोतिं । तमारभस्वसमिधायविष्ठनृचक्षंसंश्चक्षुंषेरन्धयैनम् ८ तीक्ष्णेनाग्ने
चक्षुंषारक्षयज्ञंप्राञ्चंवसुंभ्यःप्रणयप्रचेतः । हिंस्रंरक्षांस्युभिशोशुचानंमात्वांदभ-
न्यातुधानानृचक्षः१नृचक्षारक्षःपरिपश्यविक्षुतस्यत्रीणिप्रतिशृणीह्यग्रा । तस्या-
ग्नेपृष्टीर्हरसाशृणीहित्रेधामूलंयातुधानंस्यवृश्च १० ॥ ६ ॥ त्रियातुधानःप्रसितिं
तएत्वृतंयोअंग्रेअनृतेनहन्ति । तमर्चिषास्फूर्जयंजातवेदःसमक्षमेनंगृणतेनिवृ-
ङ्हि ११ तदंग्रेचक्षुःप्रतिधेहिरेभेशफारुजंयेनपश्यंसियातुधानम् । अथर्ववज्ज्यो-
तिंषादैव्येनसत्यंधूवन्तमचितंन्योप १२ यदंग्रेअद्यमिथुनाशपातोयद्वाचस्तृष्टं
जनयंन्तेरेभाः । मन्योर्मनसःशरव्या३जायतेयातयाविध्यहृदयेयातुधानां-

न् १३ परांशृणीहितपंसायातुधान्पराग्नेरक्षोहरंसाशृणीहि । परार्चिषामूरंदे-
वाञ्छृणीहिपरांसुतृपोअभिशोशुचानः १४परायदेवावृजिनंशृणन्तुप्रत्यगेनंशप-
थायन्तुतृष्टाः । वाचास्तेनंशरंवक्रुच्छन्तुमर्मन्विश्वस्यैतुप्रसितियातुधानः १५
॥७॥ यःपौरुषेयेणक्रविषासमङ्क्तेयोअश्व्येनपशुनायातुधानः । योअघ्न्याया-
तिक्षीरमग्नेतेपांशीर्षाणिहरसापिवृश्च १६ संवत्सरीणंपयउस्त्रियायास्तस्यमा-
शीद्यातुधानोनृचक्षः । पीयूषमग्नेयतमस्तितृप्सात्तंप्रत्यञ्चमर्चिषाविध्यमम- न् १७
विपंगवोयातुधानाःपिवन्त्वावृश्यन्तामदितयेदुरेवाः । पैरनान्देवःसवि-
तादंदातुपराभागमोषधीनांजयन्ताम् १८ सनादग्नेमृणसियातुधान्नत्वारक्षा-
सिपृतनासुजिग्युः । अनुदसहमूरान्क्रव्यादोमातेहेत्यामुक्षतदैव्यायाः १९
त्वंनोअग्नेअधरादुदक्तात्त्वंपश्चादुतरक्षापुरस्तात् । प्रतितेतेअजरासस्तपिष्ठाअघ- ॥६१७॥

शँसंशोशुचतोदहन्तु २० ॥ ८ ॥ पश्चात्पुरस्तादधरादुदक्तात्कविःकाव्येनपरि पाहिराजन् । सखेसखायमजरोजरिम्णेऽग्नेमर्ताअमर्त्यस्त्वंनः २१ परित्वाग्ने पुरंवयंविप्रंसहस्यधीमहि । धृषद्वर्णंदिवेदिवेहन्तारंभङ्गुरावताम् २२ विषेणंभङ्गुरावतःप्रतिष्मरक्षसोदह । अग्नेतिग्मेनशोचिषातपुरोग्राभिर्ऋष्टिभिः २३ प्रत्यग्नेमिथुनादहयातुधानाकिमीदिनां । संत्वाशिशामिजागृह्यदब्धंविप्रमन्मभिः २४ प्रत्यग्नेहरसाहरःशृणीहिविश्वतःप्रतिं । यातुधानस्यरक्षसोबलंविरुजवीर्यम् २५ ॥ १ ॥

हविरेकोनविंशतिर्मूर्धन्वानाङ्गिरसो वामदेव्यो वा सूर्यवैश्वानरौ त्रिष्टुप् ।

८८ हविष्पान्तंमजरंस्वर्विदिदिविस्पृश्याहुतंजुष्टमग्नौ । तस्यभर्मणेभुवनायदेवाधर्मणेकंस्वधयादप्रथन्त १ गीर्णंभुवनंतमसापगूळ्हमाविःस्वरभवज्जाते

अग्नौ । तस्यदेवाःपृथिवीद्यौरुतापोऽरणयन्नोषधीःसख्येअस्य २ देवेभिर्न्विषि
तोयज्ञियेभिरग्निंस्तोषाण्यजरंबृहन्तम् । योभानुनापृथिवींद्यामुतेमामाततानरो-
दसीअन्तरिक्षम् ३ योहोतासीत्प्रथमोदेवजुष्टोयंसमाञ्जन्नाज्येनावृणानाः । स
पंतत्रीत्वरंस्थाजगुद्यच्छात्रमग्निरकृणोज्जातवेदाः ४ यज्जातवेदोभुवनस्यमूर्ध-
न्तिष्ठोअग्नेसहरोचनेन । तंत्वाहेममतिभिर्गीर्भिरुक्थैःसयज्ञियोंअभवोरोदास्ति-
प्राः ५ ॥ १० ॥ मूर्धाभुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन् । मायामू
तुयज्ञियानामेतामपोयत्तूर्णिश्चरतिप्रजानन् ६ हृशेन्योयोमहिनासमिद्धोऽरोचत
दिवियोनिर्विभावा।तस्मिन्नग्नौसूक्तवाकेनदेवाहविर्विश्वआजुहवुस्तनूपाः ७सूक्त-
वाकंप्रथमादिदग्निमादिद्धविरजनयन्तदेवाः । सएषांयज्ञोअभवत्तनूपास्तंद्यौर्वेद
तंपृथिवीतमापः ८ यंदेवासोऽजनयन्ताग्नियस्मिन्नाजुहवुर्भुवनानिविश्वा । सोअ-

चिषांपृथिवींद्यामुतेमामृजूयमानोअतपन्महित्वा १ स्तोमेनहिदिविदेवासोअग्नि-
मजीजनन्छक्तिभीरोदसिप्राम् । तमूअकृण्वन्त्रेधाभुवेकंसओषधीःपचतिविश्व-
रूपाः १० ॥ ११ ॥ यदेदेनमदधुर्यज्ञियासोदिविदेवाःसूर्यमादितेयम् । यदाचं-
रिष्णूमिथुनावभूतामादित्प्रापश्यन्भुवनानिविश्वा ११ विश्वस्माअग्निंभुवनायदे-
वावैश्वानरंकेतुमह्नामकृण्वन् । आयस्तुतानोपसोविभातीरपोऊर्णोतितमोअर्चि-
षायन् १२ वैश्वानरंकवयोयज्ञियासोऽग्निंदेवाअजनयन्नजुर्यम् । नक्षत्रंप्रत्नममि-
नच्चरिष्णुयक्षस्याध्यक्षंतविषंबृहन्तम् १३ वैश्वानरंविश्वहादीदिवांसंमन्त्रैरग्निंकृ-
विमच्छावदामः । योमहिम्नापरिबभूवोर्वीउतावस्तादुतदेवःपरस्तात् १४ द्वेस्रुती-
अशृणवंपितॄणामहंदेवानामुतमर्त्यानाम् । ताभ्यामिदंविश्वमेजत्समेतियदन्त-
रापितरंमातरंच १५ ॥ १२ ॥ द्वेसमीचीबिभृतश्चरन्तंशीर्षतोजातंमनसा

विमृष्टम् । सम्प्रत्यङ्गिश्वाभुवनानितस्थावग्रंयुच्छन्तरणिर्भ्राजमानः १६ यत्रावदेतेअवरःपरश्चयज्ञन्योःकतरोनौविवेद । आशेकुरित्संधमादंसखायोनक्षन्तयज्ञं कइदंविवोचत् १७ कत्यग्नयःकतिसूर्यासःकत्युषासःकत्युस्विदापः । नोपस्पिजंवःपितरोवदामिपृच्छामिवःकवयोविद्मनेकम् १८ यावन्मात्रमुषसोनप्रतीकंसुपर्ण्यो३वसंतेमातरिश्वः । तावद्दधात्युपयज्ञमायन्ब्राह्मणोहोतुरवरोनिषीदन् १९ ॥ १३ ॥

इन्द्रंस्तवाष्टादश रेणुरिन्द्रस्त्रिष्टुप् । पञ्चम्या इन्द्रासोमौ ।

८१ इन्द्रंस्तवानृतंमंयस्यंमह्नाविंववाधेरोचनाविज्मोअन्तान् । आयःपप्रौचर्षणीधृद्वरोभिःप्रसिन्धुभ्योरिरिचानोमहित्वा १ ससूर्यःपर्युरूवरांस्येन्द्रोवव्रत्याद्रथ्येवचक्रा । अतिष्ठन्तमपस्यं३नसंगंकृष्णातमोसित्विष्यांजघान २ समा-

नमंस्माअनंपावृदर्चक्ष्मयादिवोअसंमंब्रह्मनव्यंम्। वियःपृष्ठेवजानिंमान्युर्यइन्द्रं-श्रिकायनसखायमीपे ३ इन्द्रायगिरोअनिंशितसर्गाअपःप्रेरयंसगंरस्यबुध्नात्। योअक्षेणेवचक्रियाशचींभिर्विष्वंक्तस्तम्भंपृथिवीमुतद्याम् ४ आपांन्तमन्युस्तृ-पलंप्रभर्माधुनिःशिर्मीवाञ्छरुमाँऋजीषी। सोमोविश्वांन्यतसावनांनिनार्वागि-न्द्रंमतिमानांनिदेषुः ५ ॥ १४ ॥ नयस्यद्यावांपृथिवीनधन्वनान्तरिक्षंनाद्रयः सोमोअक्षाः। यदंस्यमन्युरधिनीयमांनःशृणातिवीळुरुजतिंस्थिराणि ६ जघानं वृत्रंस्वधितिर्वनेवरुरोजपुरोअरदन्नसिन्धून्। बिभेदंगिरिंनवमिन्नकुम्भमागाइन्द्रो अकृणुतस्वयुग्भिः७त्वंहत्यहंनयाइन्द्रधीरोऽसिर्नपवैवृजिनाशृणासि। प्रयेमि-त्रस्यवरुणस्यधामयुजंनजनांमिनन्तिमित्रम् ८ प्रियेमित्रंप्रार्यमणंदुरेवाःप्रसं-गिरःभवरुणंमिनन्ति। न्य१मित्रेपुवधमिन्द्रतुष्वंवृपन्वृषाणमरुषंशंशाहि ९ इ-

विमृष्टम् । समृत्यङ्विश्वाभुवनानितस्थावप्रयुच्छन्तरणिर्भ्राजमानः १६ यत्रावदेतेअवरःपरश्चयज्ञन्योःकतरोनौविवेद । आशेकुरित्संधमादंसखायोनक्षन्तयज्ञं कड्दंविवोचत् १७ कत्यग्नयःकतिसूर्यासःकत्युषासःकत्युस्विदापः । नोपस्पिजंवःपितरोवदामिपृच्छामिवःकवयोविद्मनेकम् १८ यावन्मात्रमुषसोनप्रतीकंसुपर्ण्योवसतेमातरिश्वः । तावद्दधात्युपयज्ञमायन्ब्राह्मणोहोतुरवरोनिषीदन् १९ ॥ १३ ॥

इन्द्रंस्तवाष्टादश रेणुरिन्द्रस्त्रिष्टुप् । पञ्चम्या इन्द्रासोमौ ।

८१ इन्द्रंस्तवानृतंमंयस्यंमह्नाविंववाधेरोचनाविज्मोअन्तान् । आयःपप्रौचर्षणीधृद्वरोभिःप्रासिन्धुभ्योरिरिचानोमहित्वा १ ससूर्यःपर्युरूवरांस्येन्द्रोवभृत्याद्रध्येवचक्रा । अतिष्ठन्तमपस्यं१नसगींकृष्णातमांसित्विष्यांजघान २ समा-

नमंस्माअनंपावृदर्चक्षमयादिवोअसंमंब्रह्मनव्यंम्। वियःपृष्ठेवजानिंमान्युर्यइन्द्रं-
श्विकायनसखायमीषे ३ इन्द्रायगिरोअनिंशितसर्गाअपःप्रेरयंसगंरस्यवुध्नात्।
योअक्षेणेवचक्रियाशचीभिर्विष्वंक्तस्तम्भंपृथिवीमुतद्याम् ४ आपान्तमन्युस्तृ-
पलंप्रभर्माधुनिःशिमींवाञ्छरुमाँऋजीषी। सोमोविश्वान्यतसावनानिनार्वागि-
न्द्रंप्रतिमानानिदेभुः ५ ॥ १४ ॥ नयस्यद्यावापृथिवीनधन्वनान्तरिक्षंनाद्रयः
सोमोअक्षाः। यदस्यमन्युरधिनीयमानःशृणातिवीळुरुजतिंस्थिराणि ६ जघानं
वृत्रंस्वधितिर्वनेवरुरोजपुरोअरदन्नसिन्धून्। बिभेदगिरिंनवमित्रकुम्भमागाइन्द्रो
अकृणुतस्वयुग्भिः ७त्वंहत्यहंणयाइन्द्रधीरोऽसिर्नपर्वावृजिनाशृणासि। प्रयेमि-
त्रस्यवरुणस्यधामयुजंनजनामिनन्तिमित्रम् ८ प्रियेमित्रंप्रार्यमणंदुरेवाःप्रसं-
गिरःप्रवरुणंमिनन्ति। न्यंमित्रेपुवधमिन्द्रतुभ्यंवृषन्वृषाणमरुषंशिशीहि ९ इ-

न्द्रोदिवइन्द्रईशेपृथिव्याइन्द्रोअपामिन्द्रइत्पर्वतानाम् । इन्द्रोवृधामिन्द्रइन्मेधिराणामिन्द्रःक्षेमेयोगेहव्यइन्द्रः १० ॥ १५ ॥ प्राक्तुभ्यइन्द्रःप्रवृधोअहंभ्यःप्रान्तरिक्षात्प्रसमुद्रस्यधासेः । प्रवातस्यप्रथसःप्रज्मोअन्तात्प्रसिन्धुभ्योरिरिचेप्रक्षितिभ्यः ११ प्रशोशुचत्याउषसोनकेतुरसिन्वातेवर्ततामिन्द्रहेतिः । अश्मेवविध्यदिवआसृजानस्तपिष्ठेनहेषसाद्रोघमित्रान् १२ अन्वहमासाअन्विहनान्यन्वोषधीरनुपर्वतासः । अन्विन्द्रंरोदसीवावशानेअन्वापोअजिहतजायमानम् १३ कहिंस्वित्सातइन्द्रचेत्यासदघस्ययद्विनदोरक्षएषत् । मित्रकृवोयच्छसनेनगावःपृथिव्याआपृगमुयाशयन्ते १४ शत्रूयन्तोअभियेनस्ततस्रेमहिव्राधन्तओगणासइन्द्र । अन्धेनामित्रास्तमसासचन्तांसुज्योतिषोअक्तवस्ताँअभिष्युः १५ पुरूणिहित्वासवनाजनानांत्रह्माणिमन्दन्गृणतामृषीणाम् । ॥६२०॥

इमामाघोषन्नवसासहूतिंतिरोविश्वाँअचँतोयाह्यर्वाङ् १६ एवातेवयमिन्द्रभुजतीनांविद्यामसुमतीनांनवानाम् । विद्यामवस्तोरवसागृणन्तोविश्वामित्राउतत इन्द्रनूनम् १७ शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् १८ ॥ १६ ॥

सहस्रशीर्षा पोडश नारायणः पुरुषोनुष्टुप् । अन्त्या त्रिष्टुप् ।

१० सहस्रंशीर्षापुरुषःसहस्राक्षःसहस्रंपात् । सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशाङ्गुलम् १ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति २ एतावानस्यमहिमातोज्यायाँश्चपुरुषः । पादोऽस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३ त्रिपादूर्ध्वउदैत्पुरुषःपादोऽस्येहाभवत्पुनः । ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ४ तस्माद्विराळजायतविराजोअधिपूरुषः ।

सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ५ ॥ १७ ॥ यत्पुरुषेणहविषादेवायज्ञ-
मतन्वत । वसन्तोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ६ तंयज्ञंबर्हिषिप्रौक्ष-
न्पुरुषंजातमग्रतः । तेनदेवाअयजन्तसाध्याऋषयश्चये ७ तस्माद्यज्ञात्सर्वहुतः
संभृतंपृषदाज्यम् । पशून्तांश्चक्रेवाय्यानारण्यान्ग्राम्याश्चये ८ तस्माद्यज्ञात्स-
र्वहुतऋचःसामानिजज्ञिरे । छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ९
तस्मादश्वाअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्तस्माज्जाताअजा-
वयः १० ॥ १८ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् । मुखंकिमस्यकौबा-
हूकाऊरूपादाउच्येते ११ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यःकृतः । ऊरूतदस्य
यद्वैश्यःपद्भ्यांशूद्रोअजायत १२ चन्द्रमामनसोजातश्चक्षोःसूर्योअजायत । मु-
खादिन्द्रश्चाग्निश्चप्राणाद्वायुरजायत १३ नाभ्याआसीदन्तरिक्षंशीर्ष्णोद्यौःसमव-

र्तत। पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् १४ सप्तास्यासन्परिधयस्त्रिः-
सप्तसमिधःकृताः। देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुम् १५ यज्ञेनयज्ञमयज-
न्तदेवास्तानिधर्माणिप्रथमान्यासन्। तेहनाकंमहिमानःसचन्तयत्रपूर्वेसाध्याः
सन्तिदेवाः १६॥१९॥ इति शाकलर्क्संहितायां दशमे मण्डले सप्तमोनुवाकः ॥१०॥७॥

सं जाष्टवद्रिः पञ्चदशारुणो वैतहव्योग्निर्जगती। अन्त्या त्रिष्टुप्।

११ संजागृवद्भिर्जरमाणइध्यतेदमेदमूनाइषयन्निळस्पदे। विश्वंस्यहोतारं-
विपोवरेण्योविभुर्विभावासुषखासखीयते १ सदर्शतश्रीरतिथिर्गृहेगृहेवनेवनेशि-
श्रियेतक्रवीरिव। जनेजनेजन्योनातिमन्यतेविशआक्षेतिविश्योऽविशंविशम् २
सुदक्षोदक्षैःक्रतुनासिसुक्रतुरग्नेकविःकाव्येनासिविश्ववित्। वसुर्वसूनांक्षयसित्व-
मेकइद्यावाचयानिपृथिवीचपुष्यतः ३ प्रजानन्नग्नेतवयोनिमृत्वियमिळायास्पदे

घृतवन्तमासदः । आतेचिकित्रउषसामिवेतयोऽरेपसःसूर्यस्येवरश्मयः ४ तव श्रियोवप्यस्येवविद्युतश्चित्राश्चिकित्रउषसानकेतवः । यदोषधीरभिसृष्टोवनानि चपरिस्वयंचिनुषेअन्नमास्ये ५ ॥ २० ॥ तमोषधीर्दधिरेगर्भमृत्वियंतमापोअग्निंजनयन्तमातरः । तमित्समानंवनिनश्चवीरुधोऽन्तर्वतीश्चसुवतेचविश्वहा ६ वातोपधूतइषितोवशाँअनुतृपुयदन्नावेविषाह्यतिष्ठसे । आतेयतन्तेरथ्योऽयथापृथक्शर्धास्यग्नेअजराणिधक्षतः ७ मेधाकारंविदथस्यप्रसाधनमग्निंहोतारंपरिभूतमंमतिम् । तमिदर्भेहविष्यासमानमित्तमिन्महेवृणतेनान्यंत्वत् ८ त्वामिदत्रं वृणतेत्वायवोहोतारमग्नेविदथेषुवेधसः । यद्देवयन्तोदधतिप्रयांसितेहविष्मन्तोमनवोवृक्तबर्हिषः ९ तवाग्नेहोत्रंतवपोत्रमृत्वियंतवनेष्ट्रंत्वमग्निदृतायतः । तवप्रशास्त्रंत्वमध्वरीयसिब्रह्माचासिगृहपतिश्चनोदमे १० ॥ २१ ॥ यस्तुभ्यमग्नेअमृ-

तायमर्त्यःसमिधादाशदुतवाहविष्कृति । तस्यहोतांभवासियासिदूत्यं१मुपब्रूषे यज्ञस्यध्वरीयसि ११ इमाअस्मैमतयोवाचोअस्मदाँऋचोगिरःसुष्टुतयःसमग्मत । वसूयवोवसवेजातवेदसेवृद्धासुचिद्धर्धनोयासुचाकनत् १२ इमांप्रत्नायसुष्टुतिंनवीयसींवोचेयमस्माउशतेशृणोतुनः । भूयाअन्तराहृद्यस्यनिस्पृशोजायेवपत्यंउशतीसुवासाः १३ यस्मिन्नश्वासऋषभासउक्षणोवशामेषाअवसृष्टासआहुताः । कीलालपेसोमपृष्ठायवेधसेहृदामतिंजनयेचारुमग्नये १४ अहांव्यग्नेहविरास्येतेस्रुचीवघृतंचम्वींवसोमः । वाजसनिंरयिमस्मेसुवीरंप्रशस्तंधेहियशसंबृहन्तम् १५ ॥ २२ ॥

यज्ञस्य पञ्चदश शार्यातो मानवो विश्वेदेवा जगती ।

१२ यज्ञस्यवोरथ्यंविशपतिंविशांहोतारमक्तोरतिथिंविभावसुम् । शोचिष्छु-

प्कांसुहरिणीपुजभुंरद्रूपांकेतुर्यैजतोद्यामंशायत १ इममंजस्पामुभयेंअकृण्वत
धर्माणंमग्निंविदथंस्यसाधनम् । अक्रुंनयद्वमुपसंःपुरोहितंतनूनपांतमरुपस्यंनिं-
सते २ वळंस्यनीथाविपणेश्वंमन्महेवयाअंस्युप्रहुंताआसुरत्वे । युद्राघोरासो
अमृतत्वमाशुतादिज्जनंस्यदैव्यंस्यचाकिरन् ३ ऋतस्यहिप्रसितिर्द्यौरुरुव्यचोन-
मोमह्यु१रमंतिःपनीयसी । इन्द्रोमित्रोवरुणःसंचिकित्रिरेऽथोभगंःसविंतापुत-
दंक्षसः ४ प्ररुद्रेणंयविनायन्तिसिन्धवस्तिरोमहीमरमंतिंदधन्विरे । येभिःपरिं-
ज्मापरियन्तुरुज्रयोविरोरुवज्जुठरेविश्वंमुक्षतैं ५ ॥ २३ ॥ क्राणारुद्रामरुतौ
विश्वकृंष्टयोदिवःश्येनासोअसुंरस्यनीळयंः । तेभिंश्वष्टेवरुणोमित्रोअर्यमेन्द्रोदेवे-
भिंरर्वशेभिरर्वशः ६ इन्द्रेभुजैंशशमानासंआशतसूरोदृशीकेवृषंणश्वपौंस्ये ।
प्रयेन्वंस्याहणांततक्षिरेयुजंवज्रंनृपदंनेपुकारवंः ७ सूरांश्चिदाहरितोंअस्यरीरम-

दिन्द्रादाकश्चिद्भयतेतवीयसः । भीमस्यवृष्णोजठरादभिश्वसोदिवेदिवेसहुरिस्तन्वाधितः ८ स्तोमंवोअद्यरुद्रायशिक्वसेक्षयद्वीरायनमसादिदिष्टम । येभिः शिवःस्वश्वाँएवयावभिर्दिवःसिषक्तिस्वयशानिकामभिः ९ तेहिप्रजायाअभरन्तविश्रवोवृहस्पतिर्वृषभःसोमजामयः । यज्ञैरथर्वाप्रथमोविधारयद्देवादक्षैर्भृगवःसंचिकित्रिरे १० ॥ २४ ॥ तेहियावापृथिवीभूरिरेतसानराशंसश्चतुरङ्गो यमोऽदितिः । देवस्त्वष्टाद्रविणोदाऋभुक्षणःप्ररोदसीमरुतोविष्णुरर्हिरे ११ उतस्यनउशिजोमुर्वियाकविरहिःशृणोतुबुध्न्योहवीमनि । सूर्यामासाविचरन्तादिविक्षितादियाशमीनहुषीअस्यवोधतम् १२ प्रनःपूषाचरथंविश्वदेव्योऽपांनपादवतुवायुरिष्टये । आत्मानंवस्योअभिवातमर्चतुतदश्विनासुहवायामनिश्रुतम् १३ विशामासामभयानामधिक्षितंगीर्भिरुस्वयशसंगृणीमसि । मा-

भिर्विश्वाभिरदितिमनर्वणंमुक्थैर्युवानंनृमणाअधापतिम् १४ रेभदत्रंजनुषापू-
र्वोअङ्गिराग्रावाणऊर्ध्वाअभिचक्षुरध्वरम् । येभिर्विहायाअभवद्विचक्षणःपार्थः
सुमेकंस्वधितिर्वनन्वति १५ ॥ २५ ॥

महि पञ्चदश तान्वः पाथ्यो विश्वेदेवाः प्रस्तारपङ्क्तिः । उपाये त्रयोदशी चानुष्टुभः ।
नवम्यक्षरैः पङ्क्तिः । एकादशी न्यङ्कुसारिणी । अन्त्या पुरस्ताद्बृहती ।

१३ महिद्यावापृथिवीभूतमुर्वीनारींयह्वीनरोदसीसदंनः । तेभिर्नःपातंसह्य-
सेभिर्नःपातंशूषणि १ यज्ञेयज्ञेसमत्यांदेवान्त्संपर्यति । यःसुम्नैर्दीर्घश्रुत्तम
आविवासात्येनान् २ विश्वेषामिरज्यवोदेवानांवार्महेः । विश्वेहिविश्वमंहसोवि-
श्वेयज्ञेषुयज्ञियाः ३ तेघाराजानोअमृतंस्यमन्द्रअर्यमामित्रोवरुणःपरिज्मा।कद्रु-
द्रोनृणांस्तुतोमरुतःपूषणोभगः ४ उतनोनक्तमपांवृषण्वसूसूर्यामासासदंनायस-

घन्या । सचायत्साद्यैयामहिर्बुध्येषुबुध्र्यः५॥ २६ ॥ उतनोदेवावश्विनाशुभस्पती धामभिर्मित्रावरुणाउरुष्यताम् । महःसरायएतेऽतिधन्वैवदुरिता६ उतनोरुद्रा चिन्मृळतामश्विनाविश्वेदेवासोरथस्पतिर्भगः । ऋभुर्वाजऋभुक्षणःपरिज्माविश्ववेदसः ७ ऋभुरृभुक्षाऋभुर्विधतोमदआतेहरीजूजुवानस्यवाजिना । दुष्टरं-यस्यसामचिद्दधर्म्यज्ञोनमानुषः ८ कृधीनोअद्यथोदेवसवितःसचस्तुयेमघोनाम् । सहोनइन्द्रोवाह्निभिर्न्यैपांचपणीनांचक्रंरश्मिनयौयुवे ९ ऐर्युद्यावापृथिवी घातंमहदस्मेवीरेषुविश्वचर्षणिश्रवः । पृक्षंवाजस्यसातयेपृक्षंरायोततुर्वणे १० ॥ २७ ॥ एतंशंसमिन्द्रास्मयुंकूचित्सन्तंसहसावन्नभिष्टयेसदापाह्यभिष्टये । मेदतंविदतंवसो ११ एतंमेस्तोमंतनानसूर्यंद्युतद्यामानंवावृधन्तनृणाम् । सनवनंनुनाश्यंतष्टेवानंपच्युतम् १२ वावर्तयेपांरायायुक्तेपांहिरण्ययी । नेमधिंता

नपौंस्यावृथैवविष्टान्ता १३ प्रतद्दुःशीमेपृथवानेवेनेप्रामेवोचमसुरेमघवत्सु ।
येयुक्त्वायुपञ्चशतास्मयुपथाविश्राव्येषाम् १४ अधीन्ववत्रंसप्तितंचसप्तचं । स-
द्योदिदिष्टतान्वःसद्योदिदिष्टपार्थ्यःसद्योदिदिष्टमायवः १५ ॥ २८ ॥

मैते चतुर्दशार्बुदः काद्रवेयः सर्पो ग्रावाणो जगती । पञ्चमीसप्तम्यन्त्यास्त्रिष्टुभः ।

१४ मैतेवदन्तुप्रवयंवदामग्रावभ्योवाचंवदतावदद्र्यः । यदद्रयःपर्वताःसाक-
माशवःश्लोकंघोषंभरथेन्द्रायसोमिनः १ एतेवदन्तिशतवत्सहस्रंवदभिक्रन्दन्ति
हरितेभिरासभिः। विष्टीग्रावाणःसुकृतःसुकृत्ययाहोतुश्चित्पूर्वेहविरद्यमाशत २ए-
तेवदन्त्यविदन्ननामधुन्यूह्यन्तेअधिपक्वआमिषि।वृक्षस्यशाखांमरुणस्यबप्सत-
स्तेसूभवंवृषभाःप्रेमरावियुः ३ बृहद्वदन्तिमंदिरेणमन्दिनेन्द्रंक्रोशन्तोऽविदन्ननाम
मधु । संरभ्याधीराःस्वसृभिरनर्तिपुराघोषयन्तःपृथिवीमुपब्दिभिः ४ सुपर्णा

वाचंमक्रतोपद्यव्याखरेकृष्णाइषिराअनर्तिषुः। न्यं१ङ्ङियन्त्युपरस्यनिष्कृतंपुरूरेतोदधिरेसूर्यश्वितः ५ ॥ २१ ॥ उग्राईवप्रवहन्तःसमार्यमुःसाकंयुक्तावृषणो विभ्रतोधुरः। यच्छ्वसन्तोजग्रसानाअरावीषुःशृण्वएषांप्रोथथोअवैतामिव ६ दशावनिभ्योदशंकक्ष्येभ्योदशंयोक्रेभ्योदशंयोजनेभ्यः। दशाभीशुभ्योअर्चता जरेभ्योदशधुरोदशंयुक्तावहंद्वयः ७ तेअद्रयोदशंयन्त्रासआशवस्तेषांमाधानंपयँतिहर्यतम्। तऊंसुतस्यसोम्यस्यान्धसोंशोःपीयूषंप्रथमस्यभेजिरे ८ तेसोमादोहरीइन्द्रस्यनिंसतेशुंदुहन्तोअध्यासतेगवि। तेभिर्दुग्धंपपिवान्त्सोम्यंमध्विन्द्रोवर्धतेप्रथंतेवृषायते ९ वृषावोअंशुर्नकिलारिमाथुनेळावन्तःसदमित्स्थुनाशिताः। रैवत्येवमहसाचारवःस्थनयस्यंग्रावाणोअजुषध्वमध्वरम् १० ॥ ३० ॥ तृदिलाअतृदिलासोअद्रयोऽश्रमणाअगृंथिताअमृत्यवः। अनातुराअजराःस्था

मांविष्णवःसुपीवसोअतृपिताअतृष्णजः ११ ध्रुवाएववंःपितरोयुगेयुगेक्षेमंकामास्तःसदंसोनयुजते । अजुर्यासोहरिषाचोहरिद्रवआयांरवेणपृथिवीमशुश्रुवुः १२ तदिद्वदन्त्यद्रयोविमोचनेयामन्नञ्जस्पाइवघेदुपाब्दिभिः । वपन्तोबीजमिवधान्याकृतंःपृञ्चन्तिसोमंनमिनन्तिवप्सतः १३ सुतेअध्वरेअधिवाचमक्रता क्रीळयोनमातरंतुदन्तः । विपूमुश्चासुवुवुपोमनीषांविवर्तन्तामद्रयश्चायमानाः१४ ॥ ३१ ॥ इति शाकलर्क्संहितायामष्टमाष्टके चतुर्थोध्यायः ॥ ८ ॥ ४ ॥

इयेद्यूनोर्वशीमैळःपुरूरवाःपूर्वोपितान्कामान्पुनरासाद्यावरोद्धमैच्छत्सातमनिच्छन्तीमत्याचष्टेहयइपुर्याकदासुदेवोन्तरिक्षमांसचेतितिस्रश्चैळवाक्यंशिष्टाउर्वश्याःमतेसप्तोनावरुःसर्वहरिर्वैन्द्रोहारिस्तुतिर्द्वित्रिष्टुवन्तंयाओषधीरुपधिकाथर्वणोभिषगोषधिस्तुतिरानुष्टुभंबृहस्पतेद्वादशार्षिष्टेषेणोवापिर्वृष्टिकामोदेवांस्तुष्टावकंनोवप्रोवैखानसान्द्रदुवस्युर्वान्दनोवैश्वदेवंतुत्रिष्टुवन्तमुद्धुध्यध्वंबुधःसोम्यक्रत्विक्स्तुतिर्वा

नवम्यन्त्येजगत्यौपञ्चमीबृहतीगायत्र्योर्मध्येमतेमुद्गलोभार्म्यश्वोद्वयणेनऋषभेणचार्जिजिगायेतिद्वौघणं वाघाबृहतीपान्त्यावृहस्पतआशुःसप्तोनैन्द्रोमतिरथश्चतुर्थीवार्हस्पत्योपान्त्याप्वादेव्यन्त्यानुष्टुम्मारुतीवा-साच्येकादशाष्टकौवैश्वामित्रःकदाकौत्सोदुर्मित्रोनाम्नासुमित्रोगुणतःसुमित्रोवानाम्नादुर्मित्रोगुणत-ओष्णिहंहरीवज्रंपिपीलिकमध्येत्रिष्टुवन्त्याद्यागायत्रीवा ।

इषेष्टादश त्रिष्टुप् । प्रथमाद्वितीयापञ्चषष्टमीनवमीदशमीद्वादशीचतुर्दश्युपान्त्यानामैलः पुरूरवा ऋषिः उर्वशी देवता । शिष्टानामुर्वश्यृषिः । ऐलः पुरूरवो देवता ।

१५ ॐम् हुवेजायेमनसातिष्ठघोरेवचांसिमिश्राकृणवावहैनु । ननौमन्त्रा अनुदितासएतेमयस्करन्परतरेचनाहन् १ किमेतावाचाकृणवातवाहंप्राक्रमिय-मुषसामग्रियेव । पुरूरवःपुनरस्तंपरेहिदुरापनावातइवाहमस्मि २ इषुर्नश्रिय इषुधेरसनागोपाःशतसानरंहिः । अवीरेक्रतौविदविद्युतन्नौरानमायुंचितय-न्तपुनयः ३ सावसुदधतीश्वशुरायवयउषोयदिवष्टयन्तिगृहात् । अस्तंननक्षेय-

स्मिंश्चाकन्दिवानक्षँश्चाथितावैतसेनं ४ त्रिःस्मुमाह्नंभयोवैतसेनोतस्मुमेऽव्यं-
त्यैपृणासि । पुरूरवोऽनुतेकेतमायुंराजांमेवीरतन्वं१स्तदासीः ५ ॥ १ ॥ या
सुंजूर्णिःश्रेणिःसुम्नआंपिर्हदेचक्षुर्नग्रन्थिनीचरण्युः । ताअञ्जयोऽरुणयोनसंस्रुः
श्रियेगावोनधेनवोऽनवन्त ६ समंस्मिञ्जायमानआसतग्नाउतेमंवर्धन्द्यं१ःस्व-
गूंर्ताः । महेयत्त्वापुरूरवोरणायावर्धयन्दस्युहत्यायदेवाः ७ सचायतासुजहंती-
प्वत्कममानुषीषुमानुषोनिषेवे । अपस्मन्मत्तरसन्तीनभुज्यस्ताअंत्रसन्नथस्पृ-
शोनाश्वाःऽयदासुमतोंअमृतासुनिस्पृक्संक्षोणीभिःक्रतुंभिर्नपृङ्क्ते । ताआतयोन
तन्वःशुम्भतस्वाअश्वासोनक्रीळयोदन्दशानाः१ विद्युन्नयापतन्तीदविंद्योद्धरन्तीमे
अप्याकाम्यानि । जनिष्ठोअपोनर्यःसुजातःप्रोर्वशीतिरतदीर्घमायुः १० ॥ २ ॥

जज्ञिषइत्थागोपीथ्यायहिदधाथतत्पुरूरवोमओजः । अशासंत्वाविदुषीसस्मिन्नहन्नमआगृणोःकिमभुग्वदासि ११ कदासूनुःपितरंजातइच्छाच्चक्रंनाश्वर्तयद्विजानन् । कोदम्पतीसमनसावियूयोदधयदग्निःश्वशुरेपुदीदयत् १२ प्रतित्यवाणिवर्तयंतेअश्रुंचक्रंनक्रन्ददाध्यैशेवायै । प्रतत्तेहिनवायत्तेअस्मेपरेह्यस्तंनहिमरमापः १३ सुदेवोअद्यप्रपतेदनावृत्परावतंपरमांगन्तवाउ । अधाशयीतनिर्ऋतेरुपस्थेऽधैनंवृकारभसासोअद्युः १४ पुरूरवोमामृधामाप्रपंस्मोमात्वावृकासोअशिवासउक्षन् । नवैस्त्रैणानिसख्यानिसन्तिसालावृकाणांहृदयान्येता १५ ॥ ३ ॥ यद्विरूपाचरंमर्त्येष्ववंसंरात्रीःशरदश्चतस्रः । घृतस्यस्तोकंसकृदह्नआश्नांतादेवेदंतातृपाणाचरामि १६ अन्तरिक्षप्रांरजसोविमानीमुपशिक्षाम्युर्वशीं वसिष्ठः । उपत्वारातिःसुकृतस्यतिष्ठान्निवर्तस्वहृदयंतप्यतेमे १७ इतित्वादेवा

इमआहुरैळयथेमेतद्ववसिमृत्युबंन्धुः । प्रजातेदेवान्हविषायजातिस्वर्गउत्वमपि मादयासे १८ ॥ ४ ॥

प्र ते त्रयोदश वरुः सर्वहरिर्वैन्द्रो हरिस्तुतिर्जगती । अन्त्ये त्रिष्टुभौ ।

१६ प्रतेमहेविदथेशंसिषंहरीप्रतेवन्वेवनुषोहर्यतंमदम् । घृतंनयोहरिभिश्चारु सेचतुआत्वाविशन्तुहरिवर्पसंगिरः१हरिंहियोनिमभियेसमस्वरन्हिन्वतोहरीदिव्यंयथासदः । आयंपृणन्तिहरिभिर्नधेनवइन्द्रायशूषंहरिवन्तमर्चत २ सोअंस्यवज्रोहरितोयआयसोहरिर्निकामोहरिरागभस्त्योः । द्युम्नीसुशिप्रोहरिमन्युसायकइन्द्रेनिरूपाहरितामिमिक्षिरे ३ दिविनकेतुरधिधायिहर्यतोविव्यचद्वज्रोहरितो नरंया । तुददहिंहरिशिप्रोयआयसःसहस्रशोकाअभवद्धरिभ्यरः ४ त्वंत्वंमहयथाउपस्तुतःपूर्वेभिरिन्द्रहरिकेशयज्वभिः । त्वंहर्यसितवविश्वमुक्थ्यं१मसामि

राधोहरिजातहर्यतम् ५ ॥ ५ ॥ तावज्रिणेमन्दिनस्तोम्यमदइन्द्रंरथेवहतोहर्य-
ताहरी । पुरूण्यस्मैसवनानिहर्यतइन्द्रायसोमाहरयोदधन्विरे ६ अरंकामायह-
रयोदधन्विरेस्थिरायंहिन्वन्हरयोहरीतुरा । अवँद्रियोहरिभिर्जोषमीयतेसोअस्य
कामंहरिवन्तमानशे ७ हरिश्मशारुर्हरिकेशआयुसस्तुरस्पेयेयोहरिपाअवर्धत ।
अवँद्रियोहरिभिर्वाजिनीवसुरतिविश्वादुरितापारिषद्धरी ८ स्रुवेवयस्यहरिणी
विपेततुःशिप्रेवाजायहरिणीदविध्वतः । प्रयत्कृतेचमसेममृंजद्धरीपीत्वामदस्य
हर्यतस्यान्धसः ९ उतस्मसद्मंहर्यतस्यपस्त्योरत्योनवाजंहरिवाँअचिक्रदत् ।
महीचिद्धिधिषणाहर्यदोजसाबृहद्धयोदधिषेहर्यतश्चिदा १० ॥ ६ ॥ आरोदसी
हर्यमाणोमहित्वानव्यंनव्यंहर्यसिमन्मनुप्रियम् । प्रप्रस्त्यंमसुरहर्यतंगोरावि्कृ-
धिहरयेसूर्याय ११ आत्वाहर्यन्तंप्रयुजोजनानांरथेवहन्तुहरिशिप्रमिन्द्र । पिबा

यथाप्रतिभृतस्यमध्वोहर्यन्यञ्जंसघमादेदशोणिम् १२ अपाःपूर्वेषांहरिवःसु-
तानामथेाइदंसवनंकेवलंते । ममाद्दिसोमंमधुमन्तमिन्द्रसत्रावृषजठरआवृ-
पस्व १३ ॥ ७ ॥

या ओषधीस्त्रयो विंशतिर्भिषगाथर्वण ओषधिस्तुतिरनुष्टुप् ।

१७ याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा । मनैनुवभ्रूणामहंशतंधामानि
सप्तच १ शतंवोअम्बधामानिसहस्रंमुतवोरुहः । अधाशतक्रत्वोयूयमिमंमे
अगदंकृत २ ओषधीःप्रतिमोदध्वंपुष्पवतीःप्रसूवरीः । अश्वाइवसजित्वरीर्वी-
रुधःपारयिष्णवः ३ ओषधीरितिमातरस्तद्वोदेवीरुपब्रुवे । सनेयमश्वंगांवास
आत्मानंतवंपूरुष ४ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता । गोभाजइत्किल-
लासथयत्सनवथपूरुषम् ५ ॥ ८ ॥ यत्रौषधीःसमग्मंतराजानःसमितावि व ।

विप्रःसउच्यतेभिषग्रक्षोहामीवचातनः ६ अश्वावतीसोमावतीमूर्जयन्तीमुदोजसम् । आविंत्सिसर्वाओषधीरस्माअरिष्टतातये ७ उच्छुष्माओषधीनांगावोगोष्ठादिवेरते । धनंसनिष्यन्तीनामात्मानंतवपूरुष ८ इष्कृतिर्नामवोमाताथोयूयंस्थनिष्कृतीः । सीराःपतत्रिणीःस्थनयदामयतिनिष्कथ ९ अतिविश्वाःपरिष्ठाःस्तेनइवव्रजमक्रमुः । ओषधीःप्राचुच्यवुर्यत्किंचतन्वोऽरपः १० ॥ ९ ॥ यदिमावाजयन्नहमोषधीर्हस्तआदधे । आत्मायक्ष्मंस्यनश्यतिपुराजीवगृभोयथा ११ यस्यौषधीःप्रसर्पथाङ्गमङ्गंपरुष्परुः । ततोयक्ष्मंविबाधध्वउग्रोमध्यमशीरिव १२ साकंयक्ष्मप्रपतचाषेणकिकिदीविना । साकंवातस्यध्राज्यासाकंनश्यनिहाकया १३ अन्यावोअन्यामवत्वन्यान्यस्याउपावत । ताःसर्वाःसंविदानाइदंमेप्रावताववः १४ याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ।

वृहस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसः १५ ॥ १० ॥ मुञ्चन्तुमाशपथ्या३दथोवरुण्यादुत । अथोयमस्यपर्वीशात्सर्वस्माद्देवकिल्विषात् १६ अवपतन्तीरवदान्दिवओषधयस्परि । यंजीवमश्नवामहैनसरिष्यातिपूरुषः १७ याओषधीःसोमराज्ञीर्विह्रीःशतविचक्षणाः । तासांत्वमस्युत्तमारंकामायशंहृदे १८ याओषधीः सोमराज्ञीर्विष्ठिताःपृथिवीमनु । वृहस्पतिप्रसूताअस्यैसंदत्तवीर्यम् ११ मावोरिषत्खनितायस्मैचाहंखनामिवः । द्विपच्चतुष्पदस्माकंसर्वमस्त्वनातुरम् २० याश्चेदमुपशृण्वन्तियाश्चदूरंपरागताः । सर्वाःसंगत्यवीरुधोऽस्यैसंदत्तवीर्यम् २१ ओषधयःसंवदन्तेसोमेनसहराज्ञा । यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि २२ त्वमुत्तमास्योषधेतववृक्षाउपस्तयः । उपस्तिरस्तुसो३ऽस्माकंयोअस्माँअभिदासति २३ ॥ ११ ॥

बृहस्पते द्वादश देवापिराष्टिषेणो देवास्त्रिष्टुप्।

१८ बृहस्पतेप्रतिमेदेवतांमिहिमित्रोवायद्वरुणोवासिषूया। आदित्यैर्वायद्व-
सुभिर्मरुत्वान्त्सपर्जन्यंशंतनवेवृषाय १ आदेवोदूतोअजिरश्विंकित्वान्त्वद्देवापे
अभिमामगच्छत्। प्रतीचीनःप्रतिमामावंवृत्स्वदधांमितेद्युमतींवाचंमासन् २
अस्मेधेहिद्युमतींवाचंमासन्बृहंस्पतेअनमीवामिषिराम्। ययावृष्टिंशंतनवेवना-
वदिवोद्रप्सोमधुमाँआविवेश ३ आनोद्रप्सामधुमन्तोविशन्त्विन्द्रंदेह्यधिरथंसह-
स्रम्। निपींदहोत्रमृतुथायंजस्वदेवान्दैवापेहविषासपर्य ४ आर्ष्टिषेणोहोत्रमृषि-
र्निपीदन्देवापिर्देवसुमतिंचिकित्वान्। सउत्तरस्मादधरंसमुद्रमपोदिव्याअसृजद्व-
र्ष्याअभि ५अस्मिन्त्समुद्रेअध्युत्तरस्मिन्नापोदेवेभिर्निवृताअतिष्ठन्। ताअंद्रवन्ना-

ष्टिप्रेणेनसृष्टादेवापिनाप्रेषितामृक्षिणीषु ६ ॥१२॥ यद्देवापिःशंतनवेपुरोहितोहो-
त्रायंवृतःकृपयन्नदीधेत् । देवश्रुतंवृष्टिवनिंररांणोबृहस्पतिर्वाचमस्माअयच्छत् ७
यंत्वादेवापिःशुशुचानोअग्नआष्टिषेणोमनुष्यःसमीधे विश्वेभिर्देवैरनुमद्यमा-
नःप्रपर्जन्यमीरयावृष्टिमन्तम् ८ त्वांपूर्वऋषयोगीर्भिरायन्त्वामध्वरेषुपुरुहूत
विश्वे । सहस्राण्यधिरथान्यस्मेआनोयज्ञंरोहिदश्वोपयाहि ९ एतान्यग्नेनवति-
र्नवत्वेआहुतान्यधिरथासहस्रा । तेभिर्वर्धस्वतन्वःशूरपूर्वीर्दिवोनोवृष्टिमिषितो
रिरीहि १० एतान्यग्नेनवतिंसहस्रासंप्रयच्छवृष्णइन्द्रायभागम् । विद्वान्पथऋ-
तुशोदेवयानानप्यौलानंदिविदेवेषुधेहि ११ अग्नेवार्धस्वविमृधोविदुर्गहापामीवा-
मपरक्षाँसिसेध । अस्मात्समुद्राद्बृहतोदिवोनोऽपांभूमानमुपनःसृजेह १२॥१३॥

अ.८ अ.९

॥६३१॥

११ कंनश्चित्रमिंपण्यसिचिकित्वान्पृथुरमानंवाश्वंवावृधध्यै । कत्तस्यदातु शवंसोन्युष्टौतक्षद्वज्रंवृत्रतुरमापिंन्वत् १ सहियुताविंयुतावेतिसामंपृथुंयोनिम-सुरत्वासंसाद । ससनींळेभिःप्रसहानोअंस्यभ्रातुर्नऋतेसप्तथंस्यमायाः २ स-वाजंयातापंदुष्पदायन्त्स्वंपातापरिंपदत्सनिष्यन्। अनर्वायच्छतदुंरस्यवेदोघ्नाञ्छु-भ्रदैवाँअभिवपँसाभूत् ३ सयद्धयोश्वनीर्गोष्ववर्जुंहोतिमधन्यासुसस्निंः । अ-पादोयत्रयुज्यासोऽरथाद्रोप्यंश्वासईरंतेघृतंवाः ४ सरुद्रेभिरशंस्तवारऋम्वांहि-त्वीयर्यमारेअंवद्यआगात् । वम्रस्यंमन्येमिथुनाविवेत्रीअन्नंभीत्यारोदयन्मुषा-यन् ५ सइद्दासंतुवीरवंपतिर्दन्बळंक्षंत्रिंशीर्षाणंदमन्यत् । अस्यत्रितोन्वोजंसा वृधानोविपावंराहमयोअग्रयाहन् ६ ॥ १४ ॥ सद्रुद्रेणेमनुषऊर्ध्वसानआसा-

विपदर्शसानायशारुम् । सनृतमोनहुषोऽस्मत्सुजातःपुरोऽभिनदद्दन्दस्युहत्ये ७ सोअभ्रियोनयवंसउदन्यन्क्षयायगातुंविदन्नोअस्मे । उपयत्सीददिन्दुंशरीरैःश्येनोऽयोऽपाष्टिर्हन्तिदस्यून् ८ सव्राधतःशवसानेभिरस्यकुत्सायशुष्णंकृपणेपरादात् । अयंकविर्मनयच्छस्यमानमत्कंयोअस्यसानितोतनृणाम् ९ अयंदशस्यन्नयंभिरस्यदस्मोदेवेभिर्वरुणोनमायी । अयंकनीनंऋतुपाअवद्यमिमीतारुयश्वतुष्पात् १० अस्यस्तोमेभिरौशिजस्रजिश्वांव्रजंदरयद्गूपभेणपिप्रोः । सुत्वायद्यंजतोदीदयद्वीःपुरंइयानोअभिवर्पसाभूत् ११ एवामहोअसुरक्षथायवघ्नकःपड्भिरुपसर्पदिन्द्रम् । सइयानःकरतिस्वस्तिमस्माइषमूर्जंसुक्षितिंविश्वमाभाः १२ ॥ १५ ॥ इति शाकलर्क्संहितायां दशमे मण्डलेऽष्टमोनुवाकः ॥ १० ॥ ८ ॥

इन्द्र द्वादश दुवस्युर्वान्दनो विश्वेदेवा जगती । अन्त्या त्रिष्टुप् ।

१०० इन्द्रद्दह्यमघवन्त्वावदिद्भुजइहस्तुतःसुतपावोधिनोवृधे । देवेभिर्नः सविताप्रावंतुश्रुतमासर्वतातिमदितिंवृणीमहे १ भरायसुभरतभागमृत्वियंप्रवायवेशुचिपेक्रन्ददिष्टये । गौरस्ययःपयसःपीतिमानशआसर्वतातिमदितिंवृणीमहे २ आनोदेवःसवितासाविषद्यंऋजूयतेयजमानायसुन्वते । यथादेवान्नमतिभूषेमपाकवदासर्वतातिमदितिंवृणीमहे ३ इन्द्रोअस्मेसुमनाअस्तुविश्वहा राजासोमःसुवितस्याध्येतुतः । यथायथामित्रधितानिसंदधुरासर्वतातिमदितिं वृणीमहे ४ इन्द्रउक्थेनशवसापरुर्दधेबृहस्पतेप्रतरीतास्यायुषः । यज्ञोमनुःप्रमतिर्नःपिताहिकमासर्वतातिमदितिंवृणीमहे ५ इन्द्रस्यनुसुकृतंदैव्यंसहोऽग्निर्गृहे जरितामेधिरःकविः । यज्ञश्चभूद्विदथेचारुरन्तमआसर्वतातिमदितिंवृणीमहे ६

॥ १६ ॥ नवोगुहाचकृमभूरिदुष्कृतंनाविष्टयंवसवोदेवहेळनम् । माकिंनोदेवा अनृतस्यवपँसआसर्वतातिमदितिंवृणीमहे ७ अपामीवांसवितासाविषन्य१रवरीयइदर्पसेधन्त्वद्रयः । ग्रावायत्रंमधुषुदुच्यतेबृहदासर्वतातिमदितिंवृणीमहे ८ ऊर्ध्वोग्रावावसवोऽस्तुसोतरिविश्वाद्वेषाँसिसनुतर्युयोत । सनोदेवःसवितापायुरीड्यआसर्वतातिमदितिंवृणीमहे ९ ऊर्जंगावोयवसेपीवोअत्तनक्रतस्यायाःसदनेकोशेअङ्गे । तनूरवतन्वोअस्तुभेषजमासर्वतातिमदितिंवृणीमहे १० क्रतुप्रावाजरिताशश्वतामवइन्द्रइद्रद्रामतिःसुतावताम् । पूर्णमूर्धदिव्यंयस्यासिक्तयआसर्वतातिमदितिंवृणीमहे ११ चित्रस्तेभानुःक्रतुप्राअभिष्टिःसन्तिस्पृधोजरणिप्राअवृष्टाः । रजिष्ठयारज्यापश्वआगोस्तूतूर्पतिपर्यग्रेदुवस्युः १२ ॥ १७ ॥

उद्बुध्यध्वं द्वादश बुधः सौम्यो विश्वेदेवा ऋत्विजो वा त्रिष्टुप् । चतुर्थीषष्ठ्यौ
गायत्र्यौ । पञ्चमी बृहती । नवम्यन्त्ये जगत्यौ ।

१०१ उद्बुध्यध्वंसमनसःसखायःसमग्निमिन्ध्वंबहवःसनीळाः । दधिक्रा-
मग्निमुषसंचदेवीमिन्द्रावतोऽवसेनिह्वयेवः १ मन्द्राकृणुध्वंधियआतनुध्वंनावम-
रित्रपर्णीकृणुध्वम् । इष्कृणुध्वमायुधारंकृणुध्वंप्राञ्चंयज्ञंप्रणयतासखावः २
युनक्तसीरावियुगातनुध्वंकृतेयोनौवपतेहबीजम् । गिराचश्रुष्टिःसभराअसन्नो
नेदीयइत्सृण्यःपक्वमेयात् ३ सीरायुञ्जन्तिकवयोयुगावितन्वतेपृथक् । धीरादे-
वेषुसुम्नया ४ निराहावान्कृणोतनसंवरत्रादधातन । सिञ्चामहाअवतमुद्रिणंव-
यंसुपेकमनुपक्षितम् ५ इष्कृताहावमवतंसुवरत्रंसुपेचनम् । उद्रिणंसिञ्चेअ-

॥ १६ ॥ नवोगुहाचक्रमभूरिदुष्कृतंनाविष्टयंवसवोदेवहेळनम् । माकिर्नोदेवा अनृतस्यवर्पसआसर्वतातिमदितिंवृणीमहे ७ अपामीवांसवितासाविषन्य१ग्व-रीयइदर्पसेधन्त्वद्रयः । ग्रावायत्रंमधुषुदुच्यतेबृहदासर्वतातिमदितिंवृणीमहे ८ ऊर्ध्वोग्रावाधसवोऽस्तुसोतरिविश्वाद्वेषांसिसनुतर्युयोत । सनोदेवःसवितापायु-रीड्यआसर्वतातिमदितिंवृणीमहे ९ ऊर्जंगावोयवसेपीवोअत्तनऋतस्ययाःसद-नेकोशेअङ्के । तनूरेवन्वोअस्तुभेषजमासर्वतातिमदितिंवृणीमहे १० ऋतु-प्रावाजरिताशश्वतामवइन्द्रइद्रप्रमतिःसुतावताम् । पूर्णमूधर्दिव्यंयस्यसिक्त-यआसर्वतातिमदितिंवृणीमहे ११ चित्रस्तेभानुःऋतुप्राअभिष्टिःसन्तिस्पृधोज-राणिप्राअधृष्टाः । रजिष्ठयारज्यापुश्वआगोस्तूर्तपतिपर्यग्नेदुवस्युः १२ ॥ १७ ॥

म ते रथं मार्म्यश्वो मुद्गलो द्युषण इन्द्रो वा त्रिष्टुप्। मथमातृतीयान्त्या बृहत्यः ।

१०२ प्रतेरथंमिथूकृतमिन्द्रोऽवतुधृष्णुया । अस्मिन्नाजौपुरुहूतश्रवाय्येधन-
भक्षेपुनोऽव १ उत्स्मवातोंवहतिवासोंअस्याअधिरथंयदजंयत्सहस्रम् । रथीरं-
भून्मुद्गलानीगविष्टौभरेकृतंव्यंचेदिन्द्रसेना २ अन्तर्यच्छजिघांसतोवज्रमिन्द्रा-
भिदासंतः । दासस्यवामघवन्नायंस्यवासनुतर्यंवयावधम् ३ उद्नोह्रदमांपिवज्ज-
ह्रेपाणःकूटंस्मतृंहदभिमातिमेति । प्रसुष्कभारःश्रवंड्च्छमानोऽजिरंबाहूअभर-
त्तिसांसन् ४ न्यक्रन्दयन्नुपयन्तंएनममेहयन्वृषभंमध्यंआजेः । तेनसूभंर्वंगतव-
त्सहस्रंगवांमुद्गलःप्रधनेजिगाय ५ ककर्दवेवृषभोयुक्तआसीदवावचीत्सारथिर-
स्यकेशी । दुर्धुर्युक्तस्यद्रवतःसहानसऋच्छन्तिष्मानिष्पदोमुद्गलानीम् ६

क्षितम् ६ ॥ १८ ॥ प्रीणिताश्वान्हितंजयाथस्वस्तिवाहंरथमित्कृणुध्वम् । द्रो-
णाहावमवृतमश्मचक्रमंसत्रकोशंसिञ्चतानृपाणम् ७ व्रजंकृणुध्वंसहिवोनृ-
पाणोवर्मसीव्यध्वंबहुलापृथूनि । पुरःकृणुध्वमायंसीरधृष्टामावःसुस्रोच्चमसोहं-
हंतातम् ८ आवोधियंयज्ञियांवर्तऊतयेदेवांदेवींयंजतांयज्ञियांमिह । सानोदु-
हीयद्यवंसेवगत्वीसहस्रधारापयंसामहीगौः ९ आतुपिंश्वहरिंमीन्द्रोरुपस्थेवाशी-
भिस्तक्षताश्मन्मयीभिः । परिष्वजध्वंदशंकक्ष्यांभिरुभेधुरौप्रतिवहिंयुनक्त १०
उभेधुरौवह्निरापिब्दमानोऽन्तर्योनेवचरतिद्विजानिः । वनस्पतिंवनआस्थापय-
ध्वंनिपूदधिध्वमखंनन्तउत्सम् ११ कपृन्नरःकपृथमुद्धातनचोदयंतखुदतवाज-
सातये । निष्टिग्र्यःपुत्रमाच्यावयोतयइन्द्रंसबाधंहसोमपीतये १२ ॥ १९ ॥

प्र ते रथं भार्म्यश्वो मुद्गलो द्विपद इन्द्रो वा त्रिष्टुप्। प्रथमातृतीयान्त्या बृहत्यः।

१०२ प्रेतेरथँमिथूकृतमिन्द्रोऽवतुधृष्णुया । अस्मिन्नाजौपुरुहूतश्रवाय्येधन-
भक्षेपुनोऽव १ उत्स्मवातोंवहतिवासोंअस्याअधिरथंयदजंयत्सहस्रम् । रथीरं-
भून्मुद्गलानीगविष्टौभरेकृतंव्यंचेदिन्द्रसेना २ अन्तर्यच्छजिघांसतोवज्रमिन्द्रा-
भिदासंतः । दासस्यवामघवन्नायँस्यवासनुतर्यंवयावधम् ३ उद्नोह्रदमांपिवज्ज-
हिँयाणःकूटँस्मतृंहदभिमातिमेति । प्रमृष्कभारःअवंइच्छमानोऽजिरंवाहूअभर-
त्सिषासन् ४ न्यक्रन्दयन्नुपयन्तंएनममेहयन्वृषभंमध्यंआजेः । तेनसूभंर्वंगतव-
त्सहस्रंगवांमुद्गलःप्रधनेजिगाय ५ ककर्दंवेवृषभोयुक्तआसीदवावचीत्सारथिर-
स्यकेशी । दुधेर्युक्तस्यद्रवतःसहानंसक्रुच्छन्तिष्मानिष्पदोमुद्गलानीम् ६

॥ २० ॥ उतप्रधिमुदहन्नस्यविद्वानुपायुनग्वंसगमत्रशिक्षन् । इन्द्रउदावृत्पतिमश्व्यानामरंहतपद्याभिःकुकुभान् ७ शुनमष्ट्राव्यंचरत्कपर्दीवरत्रायान्दार्वानह्यमानः । नृम्णानिकृण्वन्बृहवेजनायगाःपस्पशानस्तविषपरिधत्त ८ इमंतंपश्यवृषभस्ययुञ्जंकाष्ठायामध्येदुघणंशयानम् । येनंजिगायंशतवत्सहस्रंगवांमुद्गलः पृतनाज्येषु ९ आरेअघाकोन्वीत्थादंदर्शयंयुञ्जन्तितम्वास्थापयन्ति । नास्मैतृणंनोदकमाभरन्त्युत्तरोधुरोवहतिप्रदेदिशत् १० परिवृक्तेवपतिविद्यमानट्पीप्यानाकूचंक्रेणेवसिञ्चन् । एषैष्यांचिद्रथ्याजयेमसुमङ्गलंसिनवदस्तुसातम् ११ त्वंविश्वस्यजगतश्चक्षुरिन्द्रासिचक्षुषः । वृषायदाजिंवृषणासिपांससिचोदयन्वध्रिणायुजा १२ ॥ २१ ॥

आशुश्चयोदशामतिरथ ऐन्द्र इन्द्रस्त्रिष्टुप् । चतुर्थ्या बृहस्पतिः ।
द्वादश्या अप्त्या । अन्त्याया मरुतो वा । सैवानुष्टुप् ।

१०३ आशुःशिशानोवृषभोनभीमोधनाघनःक्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिषएकवीरःशतंसेनाअजयत्साकमिन्द्रः १ संक्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्चयवनेनधृष्णुना । तदिन्द्रेणजयतुतत्सहध्वंयुधोनरइषुहस्तेनवृष्णा २ सइषुहस्तैःसनिषङ्गिभिर्वशीसंस्रष्टासयुधइन्द्रोगणेन । संसृष्टजित्सोमपावाहुशध्युग्रधन्वाप्रतिहिताभिरस्ता ३ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ अपबाधमानः । प्रभञ्जन्सेनाःप्रमृणोयुधाजयंन्नस्माकमेध्यवितारथानाम् ४ बलविज्ञायःस्थविरःप्रवीरःसहस्वान्वाजीसहमानउग्रः । अभिवीरोअभिसत्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ५ गोत्रभिदंगोविदंवज्रबाहुंजयन्तमज्मप्र-

मृणन्तमोजसा । इमंसजाताअनुवीरयध्वमिन्द्रंसखायोअनुसंरभध्वम् ६
॥ २२ ॥ अभिगोत्राणिसहसागाहमानोऽदयोवीरःशतमन्यूरिन्द्रः । दुश्च्यवनःपृ-
तनाषाळयुध्योऽस्माकंसेनाअवतुप्रयुत्सु ७ इन्द्रंआसांनेतावृहस्पतिर्दक्षिणायु-
ज्ञःपुरएतुसोमः । देवसेनानामभिभञ्जतीनांजयन्तीनांमरुतोयन्त्वग्रम् ८ इन्द्र-
स्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रम् । महामनसांभुवनच्यवानां
घोषोदिवानांजयतामुदस्थात् ९ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांम-
नांसि । उद्धृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयन्तुघोषाः १० अस्माक-
मिन्द्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयन्तु । अस्माकंवीराउत्तरेभवन्त्व-
स्माँउदेवाअवताहवेषु ११ अमीषांचित्तंप्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ।

अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् १२ प्रेताजयतानरइन्द्रोवःशर्मयच्छतु । उग्रावःसन्तुवाहवोऽनाधृष्यायथासथ १३ ॥ २३ ॥

असाव्येकादशाष्टको वैश्वामित्र इन्द्रस्त्रिष्टुप् ।

१०४ असाविसोमःपुरुहूततुभ्यंहरिभ्यांयज्ञमुपयाहितूयम् । तुभ्यंगिरोविप्रवीराइयानादधन्विरइन्द्रपिबासुतस्य १ अप्सुधूतस्यहरिवःपिबेहनृभिःसुतस्य जठरंपृणस्व । मिमिक्षुर्यमदंयइन्द्रतुभ्यंतेभिर्वर्धस्वमदंमुक्थवाहः २ प्रोग्रांपीतिंवृष्णइयर्मिसत्यांप्रयैसुतस्यहर्यश्वतुभ्यम् । इन्द्रधेनांश्रिरिहमादयस्वधीभिर्विश्वाभिःशच्यागृणानः ३ ऊतीशचीवस्तवंवीर्येणवयोदधानाउशिजःक्रतज्ञाः । प्रजावदिन्द्रमनुपोदुरोणेतस्थुर्गृणन्तःसधमाद्यासः ४ प्रणीतिभिष्टेहर्यश्वसुष्टोःसुपुत्रस्यपुरुरुचोजनासः । मंहिष्ठामूतिंवितिरेदधानाःस्तोतारइन्द्रतवसूनृता-

भिः ५ ॥ २४ ॥ उपब्रह्माणिहरिवोहरिभ्यांसोमस्ययाहिपीतयेसुतस्य । इन्द्र त्वायज्ञःक्षमंमाणमानड्दाश्वाँअस्यध्वरस्यप्रकेतः ६ सहस्रंवाजमभिमातिषाहँ सुतेरणंमघवानंसुवृक्तिम् । उपंभूषन्तिगिरोअप्रतीतमिन्द्रंनमस्याजरितुःपनन्त ७ सप्तापोदेवीःसुरणाअमृक्तायाभिःसिन्धुमतरइन्द्रपूर्भित् । नवतिंस्रोत्या नवंचस्रवन्तीर्दिवेभ्योगातुंमनुषेचविन्दः ८ अपोमहीरभिशस्तेरमुञ्चोऽजांगरास्त्वधिदेवएकः । इन्द्रयास्त्वंवृत्रतूर्येचकर्थताभिर्विश्वायुस्तन्वंपुपुष्याः ९ वीरेण्यःक्रतुरिन्द्रःसुशस्तिरुतापिधेनापुरुहूतमीट्टे । आदंयहृत्रमकृणोदुलोकंससाहेशक्रःपृतनाअभिष्टिः १० शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वन्तमुग्रमूतयेसमत्सुग्रन्तंवृत्राणिसंजितंधनानाम् ११ ॥ २५ ॥

शिंशीह्यूचार्वनेमानृचः । नान्ह्यायज्ञऋघ्रजोर्पातित्वे ८ ऊर्ध्वायत्तेत्रेतिनाभू-
यज्ञस्यंघूर्षुसद्मन् । सजूर्नावंस्वर्यशासंसचायोः ९ श्रियेतेपृश्निरुपसेचनीभूच्छू-
येदविंररेपाः । ययास्वेपात्रैसिञ्चतउत् १० शतंवायदंसुर्यप्रतित्वासुमित्रइत्था-
स्तौद्युमित्रइत्थास्तौत् । आवोयदंस्युहत्यैकुत्सपुत्रंप्रावोयदंस्युहत्यैकुत्सव-
त्सम् ११ ॥ २७ ॥ इति शाकलर्क्संहितायामष्टमाष्टके पञ्चमोध्यायः ॥ ८ ॥ ५ ॥

उभौभूतांशःकाश्यपआश्विनमाविर्दिव्योदक्षिणावाप्राजापत्यादक्षिणांतद्दातून्वास्तौच्चतुर्थीजग-
तीकिमिच्छन्तीषणिभिरमुरैर्निगूह्यागाअन्वेषुंसरमांदेवशुनीमिन्द्रेणसंहितामयुग्भिःपणयोमित्रीयन्तः
मोचुःसातान्युग्मान्त्याभिरनिच्छन्तीमसाचयेतेवदन्तंसप्तजुह्वंब्रह्मजायाआह्योवोर्ध्वनाभावैश्वदेवंबृहतु-
बन्तंसमिद्धएकादशजमदग्निस्तत्तुतोवारामआग्नेयःपरेचत्वारोवैरूपामनीषिणोदशाष्टादंष्ट्रइन्द्रपिबन-
भःमभेदनस्तमस्यशतमभेदनोन्त्यात्रिष्टुब्धर्मासधिस्तापसोवाघमोवैश्वदेवंचतुर्थीजगतीचित्रश्रवावाग्नि-

हव्यउपस्तुतआग्नेयंजागतंत्रिष्टुप्शक्वर्यन्तंपिवस्थौरोग्नियुतोग्नियूपोवानवाऽभिक्षुर्धनान्नदानप्रशंसाचा-
येजगत्सावग्नेर्दस्युरुक्षयआग्नीध्रीयवआग्नेयंराक्षोघ्नंगायत्रंत्वितिवैसप्तोनैन्द्रोलवआत्मानंतुष्टाव ।

उभावेकादश भूतांशः काश्यपोश्विनौ त्रिष्टुप् ।

१०६ ॐम् उभाउनूनंतदिदर्थयेथेवितन्वाथेधियोवस्त्रापसेव । सध्रीचीनायातंवेप्रेमजीगःसुदिनेवृपक्षआतंसयेथे १ उष्टारेवफर्वरेपुश्रयेथेप्रायोगेवश्वात्र्याशासुरेथः । दूतेवहिष्ठोयशसाजनेषुमापंस्थातंमहिषेवावपानात् २ साकंयुजाशकुनस्येवपक्षापुश्चेवचित्रायजुरागमिष्टम् । अग्निरिवदेवयोर्दीदिवांसापरिज्मानेवयजथःपुरुत्रा ३ आपीवोअस्मेपितरेवपुत्रोग्रेवरुचानृपतीवतुर्यै । इयेवपुष्ट्यैकिरणेवभुज्यैश्रुष्टीवानेवहवमागमिष्टम् ४ वंसगेवपूपयाशिम्वातामित्रेवक्रुताशतराशातपन्ता । वाजेवोच्चावयंसाघम्र्येष्ठामेषवेवासपर्या३पुरीषा५॥१॥सृण्यै-

वज्रभरीतुर्फरीतूनेतोशेवतुर्फरीपर्फरीका । उदन्यजेवजेमनामदेरूतामेजराय्वु-
जरमरायु ६ पज्रेवचचैरंजारैमरायुक्षध्रेवार्धैपुतर्तरीथउग्रा । ऋभूनापत्खरम-
ज्राखरज्रुर्वायुर्नपर्फरत्क्षयद्रयीणाम् ७ घर्मेवमधुजठरेसनेरूभगेऽवितातुर्फरी-
फारिवारम् । पतेरेवचचराचन्द्रानिर्णिङ्नंऋङ्कामनन्याऽनजग्मी ८ बृहन्ते
वगम्भरेपुप्रतिष्ठांपादेवगाधंतरंतेविदाथः । कर्णेवशासुरनुहिस्मरार्थेशेवनोभ-
जतंचित्रमग्नः ९ आरङ्गरेवमध्वेरयेथेसारघेवगविनीचीनवारे । कीनारेवस्वेद-
मासिष्विदानाक्षामेवोर्जासूयवसात्सचेथे १० ऋध्यामस्तोमंसनुयामवाजमा
नोमन्त्रैसरथेहोपयातम् । यशोनपृक्षंमधुगोप्वन्तराभूतांशोअश्विनोःकाममप्राः ११ ॥ २ ॥

आविरेकादश दिव्यो दक्षिणा वा प्राजापत्या दक्षिणा
तद्दातारो वा त्रिष्टुप्। चतुर्थी जगती।

१०७ आविर्भून्महिमाघोनमेपांविश्वेजीवंतमसोनिर्मोचि । महिज्योतिः पितृभिर्दत्तमागांदुरुःपन्थादक्षिणायाअदर्शि १ उच्चादिविदक्षिणावन्तोअस्थुर्येअश्वदाःसहतेसूर्येण । हिरण्यदाअमृतत्वंभजन्तेवासोदाःसोमप्रातिरन्तआयुः २ दैवीपूर्तिर्दक्षिणादेवयज्यानकंवारिभ्योनहितेपृणन्ति । अथानरप्रयंतदक्षिणासोऽध्वभियावहवंःपृणन्ति ३ शतधारंवायुमकैस्विर्विदंनृचक्षसंस्तेअभिचक्षतेहविः। येपृणन्तिप्रचयच्छन्तिसंगमेतेदक्षिणांदुहतेसप्तमातरम् ४ दक्षिणावान्प्रथमोहूत एतिदक्षिणावान्ग्रामणीरग्रमेति । तमेवमन्येनृपतिंजनानांयःप्रथमोदक्षिणामाविवाय ५ ॥ ३ ॥ तमेवऋषिंतमुब्रह्माणंमाहुर्यज्ञन्यंसाम्गामुक्थशासम् । स

शुक्रस्यंतन्वोंवेदतिस्रोयःप्रंथमोदक्षिंणयाऽरार्धं ६ दक्षिणाश्वंदक्षिंणागांददातिदक्षिंणाचन्द्रमुतयद्धिरंण्यम् । दक्षिणान्नँवनुतेयोनंआत्मादक्षिंणांवर्मँकृणुतेविजानन् ७ नभोजामंघ्नुन्यर्थमींयुर्नारिंष्यन्तिनव्यंथन्तेहभोजाः । इदंयद्धिश्वंभुवंनंस्वंश्चैतत्सर्वंदक्षिंणैभ्योददाति ८ भोजाजिंग्युःसुरभिंयोनिमग्नेंभोजाजिंग्युर्वध्वं१यासुवासाः । भोजाजिंग्युरन्तःपेयंसुरायाभोजाजिंग्युर्यंअहूंताःप्रयान्तिं ९ भोजायाश्वंसंमृजन्त्याशुंभोजायांस्तेकन्या३शुम्भंमाना । भोजस्येदंपुष्करिणींवेश्मपरिंष्कृतंदेवमानेवंचित्रम् १० भोजमश्वांःसुष्ठुवाहौवहन्तिसुवृद्रथोवर्ततेदक्षिंणायाः । भोजंदेवासोऽवताभरेषुभोजःशत्रून्त्समनीकेषुजेता ११ ॥ ४ ॥

अ.८अ ६

॥६४०॥

किमिच्छन्त्येकादश त्रिष्टुप् । विनैकादशीमयुजां पणयोसुरा ऋषिस्थानीयाः सरमा च देवतास्थानापन्ना । शिष्टानां सरमर्षिस्थानापन्ना पणयोसुरा देवतास्थानीयाः ।

१०८ किमिच्छन्तीसरमाप्रेदमानड्दूरेह्यध्वाजगुंरिःपराचैः । कास्मेहितिः कापरितक्म्यासीत्क्रथंरसायाअतरःपयाँसि १ इन्द्रंस्यदूतीरिषिताचरामिमहद्वच्छन्तीपणयोनिधीन्वः । अतिष्कदोभियसातन्नआवत्तथारसायाअतरंपयाँसि २ कीदङ्क्रिन्द्रंःसरमेकाहंशीकायस्येदंदूतीरसरंःपराकात् । आचगच्छान्मित्रमेनादधामाथागवांगोपतिर्नोभवाति ३ नाहंतंवेददभ्यंदभत्सयस्येदंदूतीरसरंपराकात्।न तंगूंहन्तिस्रवतोगभीराहताइन्द्रेणपणयःशयध्वे ४ डुमागावंःसरमेयाऐच्छःपरिदिवोअन्तान्त्सुभगेपतन्ती । कस्तंएनाअवसृजादयुंध्युतास्माकमायुधासन्तिमा ५ ॥ ५ ॥ असेन्यावंःपणयोवचोस्यनिष्पत्व्यास्तन्वंःसन्तुपापीः । अधृ-

ष्टोवृएत्वाअस्तृपन्थावृहस्पतिर्वउभयानमृळात् ६ अयंनिधिःसरमेअद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः । रक्षन्तितंपणयोयेसुगोपारेकुपदमलंकुमाजगन्थ ७ एहगमन्नृषयःसोमशिताअयास्योअङ्गिरसोनवग्वाः । तएतमूर्वंविभजन्तगोना-मथैतद्वचःपणयोवमन्नित् ८ एवाचत्वंसरमआजगन्थप्रबाधितासहसादैव्येन । स्वसारंत्वाकृणवैमापुनर्गाअपतेगवांसुभगेभजाम ९ नाहंवेदभ्रातृत्वंनोस्वसृत्व-मिन्द्रोविदुरङ्गिरसश्चघोराः । गोकामामेअच्छदयन्यदायमपातेइतपणयोवरीं-यः १० दूरमितपणयोवरीयउद्गावोयन्तुमिनतीर्ऋतेन । बृहस्पतिर्याअविन्दन्निगूळ्हाःसोमोग्रावाणऋषयश्चविप्राः ११ ॥ ६ ॥

तेवदन्सप्त जुहूर्ब्रह्मजायोर्ध्वनाभा वा ब्राह्मो विश्वेदेवास्त्रिष्टुप् । अन्त्ये अनुष्टुभौ ।

१०९ तेऽवदन्प्रथमाब्रह्मकिल्बिषेऽकूपारःसलिलोमातरिश्वा । बीळुहरास्त- ॥६४१॥

पंउग्रोमंयोभूरापोंदेवीःप्रथमजाऋतेनं १ सोमोरानांप्रथमोब्रह्मजायांपुनःप्रा-
यच्छदहंणीयमानः । अन्वर्तितावरुणोमित्रआसीदग्निहोंताहस्तगृह्यानिनाय २
हस्तैनैवग्राह्यआधिरस्याब्रह्मजायेयमितिचेदवोचन् । नदूतायप्रह्येतस्थएषात-
थाराष्ट्रंगुपितंक्षत्रियस्य ३ देवाएतस्यामवदन्तपूर्वेवसप्तऋषयस्तपसेयेनिषेदुः-
भीमाजायाब्राह्मणस्योपनीतादुर्धांदधातिपरमेव्योमन् ४ ब्रह्मचारीचरतिवेविं-
षद्विषःसदेवानांभवत्येकमङ्गम् । तेनजायामन्वविन्दद्बृहस्पतिःसोमेननीतांजुह्व-
ंनदेवाः ५ पुनर्वैदेवाअददुःपुनर्मनुष्याउत । राजानःसत्यंकृण्वानाब्रह्मजायांपु-
नर्ददुः ६ पुनर्दायंब्रह्मजायांकृत्वीदेवैर्निकिल्विषम् । ऊर्जंपृथिव्याभक्त्वायोरु-
गायमुपासते ७ ॥ ७ ॥

समिद्ध एकादश जमदग्निस्तत्सुतो वा राम आर्षिस्त्रिष्टुप् ।

११० समिद्धोअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवेदः। आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविरसिप्रचेताः १ तनूनपात्पथऋतस्ययानान्मध्वासमञ्जन्त्स्वदयासुजिह्व । मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरंनः २ आजुह्वानईड्योवन्द्यश्चायाह्यग्नेवसुभिःसजोषाः । त्वंदेवानामसियह्वहोतासएनान्यक्षीषितोयजीयान् ३ प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेअग्रेअह्नाम्। व्युप्रथतेवितरंवरीयोदेवेभ्योअदितयेस्योनम् ४ व्यचस्वतीरुर्वियाविश्रयन्तांपतिभ्योनजनयःशुम्भमानाः । देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः५॥८॥आसुष्वयन्तीयजतेउपाकेउषासानक्तासदतांनियोनौ । दिव्येयोषणेबृहतीसुरुक्मेअधिश्रियंशुक्रपिशंदधाने ६ दैव्याहोताराप्रथमासुवाचामिमांना

यज्ञंमनुपोयजंध्ये । प्रचोदयंन्ताविदथेपुकारूप्राचीनंज्योतिंःप्रदिशांदिशन्तां ७ आनोयज्ञंभारंतीतूयंमेत्विळांमनुष्वदिहचेतयंन्ती । तिस्रोदेवीर्बर्हिरेदंस्योनंसरंस्वतीस्वपंसःसदन्तु ८ यइमेद्यावांपृथिवीजनित्रीरूपैरपिंशद्भुवंनानिविश्वा । तमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयक्षिविद्वान् ९ उपावसृजत्मन्यांसमञ्जन्देवानांपाथऋतुथाहवींषि । वनस्पतिंःशमिताद्देवोअग्निःस्वदंन्तुहव्यंमधुनाघृतेनं १० सयोजातोव्यंमिमीतयज्ञमग्निर्देवानांमभवत्पुरोगाः । अस्यहोतुंःप्रदिशृतस्यवाचिस्वाहाकृतंहविरंदन्तुदेवाः ११ ॥ ९ ॥

मनीषिणो दशाष्टादंष्ट्रो वैरूप इन्द्रस्त्रिष्टुप् ।

१११ मनींषिणःप्रभरध्वंमनीषांयथायथामतयःसन्तिनृणाम् । इन्द्रंसत्यैरेरयामाकृतेभिःसहिवीरोगिर्वणस्युर्विदानः १ ऋतस्यहिसदसोधीतिरद्यौत्संगा-

घ्नंपोवृंषभोगोभिंरानट् । उदंतिष्ठत्तविंषेणारवेंणमहान्तिंचित्संविंव्याचारजाँसि २ इन्द्रःकिलश्रुत्याअस्यवेंदसहिजिष्णुःपंथिकृत्सूर्यांय । आन्मेनांकृण्वन्नच्युतोभुवद्गोःपतिंर्दिवःसंनजाअप्रंतीतः ३ इन्द्रोंमह्नामंहतोअर्णवस्यंव्रताभिंनादर्द्भिरोभिर्गृणानः । पुरूणिंचिन्नितंतानारजाँसिदाधारयोधरुणंसत्यतांता ४ इन्द्रोंदिवःप्रतिमानंपृथिव्याविश्वावेदसवंनाहन्तिशुष्णम् । महींचिद्द्यामातनोत्सूर्येणचास्कम्भंचित्स्कम्भनेनस्कभींयान् ५ ॥ १० ॥ वज्रेंणहिवृत्रहावृत्रमस्तरदेवस्यशूशुवानस्यमायाः । विधृष्णोअत्रंधृषताजघन्थाथाभवोमघवन्बाह्वोजाः ६ सचंन्तयदुपसःसूर्येणचित्रामंस्यकेतवोरामंविन्दन् । आयन्नक्षत्रंदहशेदिवोनपुनर्यतोनकिरद्धानुवेंद ७ दूरंकिलप्रथमाजंग्मुरासामिन्द्रस्ययाःप्रसवेससस्रुरापः । कस्विदग्रंकवुधआंसामापोमध्यंकवोनूनमन्तः ८ सृजःसिन्धूँरहि- ॥६४३॥

नाजग्रसानाँआदिदेताःप्रविविज्रेजुवेनं।मुमुक्षमाणाउतयामुमुक्रेऽधेदेतानरंमन्ते नितिक्ताः १ सध्रीचीःसिन्धुमुतीरिवायन्त्सनाज्जारआरितःपूभिंदासाम्। अस्तमातेपार्थिवावसून्यस्मेजग्मुःसूनृताइन्द्रपूर्वीः १० ॥ ११ ॥

इन्द्र पिब दश नभःप्रभेदनो वैरूप इन्द्रास्त्रिष्टुप्।

११२ इन्द्रपिबंप्रतिकामंसुतस्यंप्रातःसावस्तवहिपूर्वपींतिः। हर्षस्वहन्तवेशूरशत्रूनुक्थेभिष्टवीर्याउ३प्रब्रवाम १ यस्तेरथोमनंसोजवीयानेन्द्रतेनंसोमपेयाय याहि। तूयमातेहरयःप्रद्रवन्तुयेभिर्यासिवृषभिर्मन्दमानः २ हरित्वतावर्चसासूयस्यश्रेष्ठरूपैस्तन्वंस्पर्शयस्व। अस्माभिरिन्द्रसखिभिर्हुवानःसध्रीचीनोमादयस्वानिपद्य ३ यस्यत्यन्तंमहिमानंमदेष्विमेमहीरोदसीनाविविक्ताम्। तदोकआहरिभिरिन्द्रयुक्तैःप्रियेभिर्याहिप्रियमन्नमच्छ ४ यस्यशश्वत्पपिवाँइन्द्रशत्रून-

नानुकृत्यारण्यांचकर्थ । सतेपुरांन्धितविषीमियर्तिसतेमदायसुतइन्द्रसोमः ५
॥ १२ ॥ इदंतेपात्रंसनवित्तमिन्द्रपिबासोममेनाशतक्रतो । पूर्णआहावोमदिर-
स्यमध्वोयंविश्वइदाभिहर्यन्तिदेवाः ६ विहित्वामिन्द्रपुरुधाजनासोहितप्रयसोवृष-
भह्वयन्ते । अस्माकंतेमधुमत्तमानीमाभुवन्त्सवनातेपुहर्य ७ प्रतइन्द्रपूर्व्याणिप्र
नूनंवीर्यावोचंप्रथमाकृतानि । सतीनमन्युरश्रथायोअद्रिंसुवेदनामकृणोर्ब्रह्मणे
गाम् ८ निपुरोदगणपतेगृणेपुत्वामाहुर्विप्रतमंकवीनाम् । नऋतेत्वत्क्रियतेकिं
चनारेमहामर्कंमघवञ्चित्रमर्च ९ अभिख्यानोमघवन्नाधमानान्त्सखेबोधिवसुप-
तेसखीनाम् । रणंकृधिरणकृत्सत्यशुष्माभक्तेचिदाभजारायेअस्मान् १०॥१३॥

इति शाकलर्क्संहितायां दशमे मण्डले नवमोनुवाकः ॥ १० ॥ ९ ॥

तमस्य दश शतभेदनो वैरूप इन्द्रो जगती । अन्त्या त्रिष्टुप् ।

११३ तमस्यद्यावापृथिवीसचेतसाविश्वेभिर्देवैरनुशुष्मंमावताम् । यदैत्कृण्वानोमंहिमानंमिन्द्रियंपीत्वीसोमस्यक्रतुमाँअवर्धत १ तमस्यविष्णुर्महिमानमोजसांशुंदधन्वान्मधुनोविरप्शते । देवेभिरिन्द्रोमघवांसयावाभिर्वृत्रंजघन्वाँ अभवद्वरेण्यः २ वृत्रेणयदहिनाविभ्रदायुधासमस्थिथायुधयेसंसमाविदे । विश्वे तेअत्रमरुतःसहत्मनावर्धन्नुग्रमहिमानंमिन्द्रियम् ३ जज्ञानएवव्यंवाधतस्पृधः प्रापश्यद्वीरोअग्निपौंस्यंरणम् । अवृश्चदद्रिमवसस्यदःसृजदस्तंभ्नान्नाकंस्वपस्यया पृथुम् ४ आदिन्द्रःसत्रातविंपीरपत्यतवरीयोद्यावापृथिवीअवाधत । अवाभरद्भृपितोवज्रमायसंशेवंमित्रायवरुणायदाशुषे ५ ॥ १४ ॥ इन्द्रस्यात्रतविंपीभ्योविरप्शिनेऋघायतोअरंहयन्तमन्यवे । वृत्रंयदुग्रोव्यवृश्चदोजसापोविभ्रंतंत-

मंसापरीवृतम् ६ यावीर्याणिप्रथमानिकर्त्वामहित्वेभिर्यतमानौसमीयतुः ।
ध्वान्तंतमोऽवंदध्वसेहतइन्द्रोमरुत्पूर्वहूतावपत्यत ७ विश्वेदेवासोअधवृष्ण्यानि
तेऽवर्धयन्त्सोमवत्यावचस्ययां । रङ्गंवृत्रमहिमिन्द्रस्यहन्मनाग्निर्नजम्भैस्तृष्वन्न-
मावयत् ८ भूरिदक्षैभिर्वचनेभिर्ऋक्वभिःसख्येभिःसख्यानिप्रवोचत । इन्द्रो-
धुनिंचचुमुरिंचदम्भयंञ्छ्रुष्णमनस्याशृणुतेदभीतये ९ त्वंपुरूण्याभरास्वश्व्या
येभिर्मंसैनिवचंनानिशंसन् । सुगेभिर्विश्वादुरितातरेमविदोषुणंउर्वियागाध-
मय १० ॥ १५ ॥

घर्मा दश सप्तिर्वैरूपो घर्मो वा तापसो विश्वेदेवास्त्रिष्टुप् । चतुर्थी जगती ।

११४ घर्मासमंन्तात्रिवृतंव्यापतुस्तयोर्जुष्टिंमातरिश्वांजगाम । दिवस्पयो
दिधिषाणाअवेषन्विदुर्देवाःसहसामानमर्कम् १ तिस्रोदेष्ट्रायनिर्ऋतीरुपासते- ॥६४५॥

दीर्घश्रुतोविहिजानन्तिवह्नयः । तासांनिचिक्युःकवयोनिदानंपरेयुषागुह्येषुव्रतेषु २ चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते । तस्यांसुपर्णावृषणानिपेदतुर्यत्रदेवादधिरेभागधेयम् ३ एकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे । तंपाकेनमनसापश्यमन्तितस्तंमातारेह्लिसउरेह्लिमातरम् ४ सुपर्णविप्राःकवयोवचोभिरेकंसन्तंबहुधाकल्पयन्ति । छन्दांसिचदधतोअध्वरेषुग्रहान्त्सोमंस्यमितेहादश ५ ॥ १६ ॥ षट्त्रिंशांश्चतुरःकल्पयन्तश्छन्दांसि चदधतआहादशम् । यज्ञंविमायेकवयोमनीषेकंसामाभ्यांप्ररथंवर्तयन्ति ६ चतुर्दशान्येमहिमानोअस्यतंधीरासोवाचाप्रणयन्तिसप्त । आप्नानंतीर्थेकइहप्रवोचद्येनंपथाप्रपिबन्तेसुतस्य ७ सहस्रधापञ्चदशान्युक्थायावद्द्यावापृथिवीतावदित्तत् । सहस्रधामहिमानःसहस्रंयावद्ब्रह्मविष्ठितंतावतीवाक् ८ कश्छन्दसांयो

गमावेदधीरःकोधिष्ण्यांप्रतिवाचंपपाद । कमृत्विजांमष्टमंशूरंमाहुर्हरीइन्द्रंस्यनि
चिंकायकःस्विंत् १ भूम्याअन्तंपर्येकेंचरन्तिरथंस्यधूर्षुयुक्तासोंअस्थुः । श्रम-
स्यदायंविभंजन्त्येभ्योपदायमोभवंतिहर्म्येहितः १० ॥ १७ ॥

चित्र इन्नवोपस्तुतो वाष्टिहव्योग्निर्जगती । उपान्त्या त्रिष्टुप् । अन्त्या शक्करी ।

११५ चित्रइच्छिशोस्तरुणस्यवक्षथोनयोमातरांवप्येतिधातवे । अनूधाय-
दिजीजंनदधांचनुववक्षसद्योमहिंदूत्यंं१ चरन्न् १ अग्निर्हनामंधायिदन्नपस्तमः सं-
योवनायुवतेभस्मनादता । अभिप्रमुरांजुह्वांस्वध्वरइनोनप्रोथंमानोयवंसेवृषा २
तंवोविंनद्वसदेवमन्धसइन्दुंप्रोथन्तंप्रवपन्तमर्णवम् । आसावह्निंनशोचिषांवि-
रप्शिनंमहिंव्रतंनसरजन्तमध्वनः ३ वियस्यतेत्रयसानस्यांजरघक्षोर्नवाताःपरि-
सन्त्यच्युताः । आरण्वासोयुयुधयोनसत्वनंत्रितंनंशंतप्रशिषन्तइष्टये ४ सइद्- ॥६४६॥

ग्निःकण्वंतमःकण्वंसखार्यःपरस्यान्तंरस्यतरुषः । अग्निःपातुगृणतोअग्निःसूरी-नग्निर्ददातुतेषामवोनः ५ ॥ १८ ॥ वाजिंतमायुसह्यंसेसुपित्र्यतुपुच्यवांनोअ-नुजातवेदस्ते । अनुद्रेत्तियोधृषतावरंसतेमहिंतमायधन्वनेदंविष्यते ६ एवाग्नि-मैतैःसहसूरिभिर्वसुष्टवेसहंसःसूनरोनृभिः । मित्रासोनयेसुधिताऋतायवोद्या-वोनयुग्भिरभिसन्तिमानुषान् ७ ऊर्जोनपात्सहसावन्नितिंत्वोपस्तुतस्यंवन्दतेवृ-षावाक् । त्वांस्तोषामत्वयासुवीराद्राघीयआयुःप्रतरंदधानाः ८ इतिंत्वाग्नेवृष्टि-हव्यंस्यपुत्राउपस्तुतासऋषयोऽवोचन् । तांश्चपाहिगृणतश्चसूरीन्वृधुधळित्यु-ध्वासोअनक्षन्नमोनमइत्यध्वासोअनक्षन् ९ ॥ १९ ॥

पिव नवाग्नियुतः स्थौरोग्निर्भूषो वा स्थौर इन्द्रस्त्रिष्टुप् ।

११६ पिवासोमंमहतइन्द्रियायपिवावृत्रायहन्तवेशविष्ठ । पिवराधेशवसे-

हूयमा॑नःपिब॒मध्वस्तृ॑पदिन्द्रावृषस्व । १ अ॒स्यपि॑बक्षुम॒तःप्रस्थि॑त॒स्येन्द्र॒सोम॑स्य॒-
वर॒मासु॑तस्य । स्व॒स्ति॒दामन॑सामादयस्वार्वा॒चीनो॑रेवते॒सौभ॑गाय । २ म॒मत्तु॑त्वा
दि॒व्यःसोम॑इन्द्रम॒मत्तु॑यःसु॒यते॒पार्थि॑वेषु । म॒मत्तु॒येन॒वरि॑वश्च॒कर्थ॑म॒मत्तु॒येननिरि॒-
णासि॒शत्रू॑न् । ३ आहि॒वहा॑अ॒मिनो॑या॒त्विन्द्रो॑वृषा॒हरि॑भ्यां॒परि॑षिक्तु॒मन्धः॑ । गव्या
सु॒तस्य॒प्रभृ॑तस्य॒मध्वः॑स॒त्राखे॑दा॒मरु॑ग॒हावृ॑षस्व । ४ नि॒ति॒ग्मानि॑ब्रा॒शय॒न्ब्राऽइ॒या-
न्यर्वस्थि॒रात॑नुहियातु॒जूना॑म् । उ॒ग्राय॒तेस॒होव॒लंद॑दामि॒प्रती॒त्याशत्रू॑न्वि॒गदे॑षुवृश्च
५॥२०॥व्यं१ यऽइ॒न्द्रत॑नुहि॒श्रवा॑स्योजः॒स्थिरे॑व॒धन्वा॑नो॒ऽभिमा॑तीः । अ॒स्म॒द्र्यग्वा-
वृधा॒नःसहो॑भि॒रनि॑भृष्टस्त॒न्वे॑वावृधस्व ६ इ॒दंह॒विर्म॑घवन्तुभ्यं॒रात॑म्प्रति॒सघ्रा॑ळ्ह॑-
णानोगृभाय । तुभ्यं॑सु॒तोम॑घवन्तुभ्यं॒पक्वो३॑ऽह्रीन्द्र॒पिब॑च॒प्रस्थि॑तस्य ७ अ॒ह्रीदि॑-
न्द्र॒प्रस्थि॑ते॒माह॒वींषि॒चनो॑दधिष्वपच॒तोत॒सोम॑म् । प्रय॑स्वन्तः॒प्रति॑हर्यामसित्वा-

सत्याः सन्तु यजमानस्य कामाः ८ प्रेन्द्राग्निभ्यां सुवचस्यामियर्मि सिन्धाविव प्रेरयं नावमर्कैः । अयाइव परिचरन्ति देवाये अस्मभ्यं धनदा उद्भिदश्च १ ॥ २१ ॥

नवा उ नव भिक्षुर्धनाशदानप्रशंसा त्रिष्टुप् । आद्ये जगती ।

११७ नवा उ देवाः क्षुभमिद्वधं ददुरुताशितमुपगच्छन्ति मृत्यवः । उतो रयिः पृणतो नोपदस्यत्युतापृणन्मर्डितारं नविन्दते १ य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्नक्षितायोपजग्मुषे । स्थिरं मनः कृणुते सेवते पुरोतो चित्सम्मर्डितारं नविन्दते २ सइद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय । अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ३ नस सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः । अपास्मात्प्रेया न तदोको अस्ति पृणन्तमन्य मरणं चिदिच्छेत् ४ पृणीयादिन्नाधमानाय तव्यान्द्राघीयांस मनुपश्येत पन्थाम् । ओहिवर्तन्ते रथ्येव चक्रान्यम-

न्युमुपतिष्ठन्तुरायः ५ ॥२२॥ मोघमन्नंविन्दतेअप्रचेताःसत्यंब्रवीमिवधइत्स-
तस्य। नार्यमणंपुष्यतिनोसखायंकेवलाघोभवतिकेवलादी ६ कृपन्निन्फालआ-
शितंकृणोतियन्नध्वानमपवृङ्क्तेचरित्रैः । वदन्ब्रह्मावदतोवनीयान्पृणन्नापिरपृण-
न्तमभिष्यात् ७ एकपाद्भूयोद्विपदोविचक्रमेद्विपात्त्रिपादमभ्येतिपश्चात् । चतु-
ष्पादेतिद्विपदामभिस्वरेसंपश्यन्पङ्क्तीरुपतिष्ठमानः ८समौचिद्वस्तौनसमंविविष्टः
संमातराचिन्नसमंदुहाते । यमयोश्चिन्नसमावीर्याणिज्ञातीचित्सन्तौनसमंपृ-
णीतः १ ॥ २३ ॥

अग्ने हंसि नवोरुक्षय आमहीयवोग्नी रक्षोहा गायत्री ।

११८ अग्नेहंसिन्य१त्रिणंदीद्यन्मर्त्येष्वा । स्वेक्षयेशुचिव्रत १ उत्तिष्ठसिस्वा-
हुतोघृतानिप्रतिमोदसे । यत्त्वाशुचःसमास्थिरन् २ सआहुतोविरोचते ऽग्निरीळे- ॥६४८॥

न्योगिरा । स्रुचाप्रतीकमज्यते ३ घृतेनाग्निःसमंज्यतेमधुप्रतीकआहुतः । रोचमानोविभावसुः ४ जरमाणःसमिध्यसेदेवेभ्योहव्यवाहन । तंत्वाहवन्तमर्त्याः ५ ॥ २४ ॥ तंमर्ताअमर्त्यंघृतेनाग्निंसपर्यत । अदाभ्यंगृहपतिम् ६ अदाभ्येनशोचिषाग्नेरक्षस्त्वंदह । गोपाऋतस्यदीदिहि ७ सत्वमग्नेप्रतीकेनप्रत्योषयातुधान्यः । उरुक्षयेषुदीद्यत् ८ तंत्वागीर्भिरुरुक्षयाहव्यवाहंसमीधिरे । यजिष्ठंमानुषेजने ९ ॥ २५ ॥

इति वै त्रयोदश लव ऐन्द्र आत्मस्तुतिर्गायत्री ।

१११ इतिवाइतिमेमनोगामश्वंसनुयामिति । कुवित्सोमस्यापामिति १ प्रवाताइवदोधतउन्मापीताअयंसत । कुवित्सोमस्यापामिति २ उन्मापीताअयंसतरथमश्वाइवाशवः । कुवित्सोमस्यापामिति ३ उपमामतिरस्थितवाश्रा

पुत्रमिवप्रियम् । कुवित्सोमस्यापामिति ४ अहंतष्टेववन्धुरंपर्यचामिहृदाम-
तिम् । कुवित्सोमस्यापामिति ५ नहिमेअक्षिपच्चनाच्छात्सुःपश्चंकृष्टयः । कु-
वित्सोमस्यापामिति ६ ॥ २६ ॥ नहिमेरोदसीउभेअन्यंपक्षंचनप्रति । कुवि-
त्सोमस्यापामिति ७ अभियांमहिनाभुवमभी३मांपृथिवींमहीम् । कुवित्सो-
मस्यापामिति ८ हन्ताहंपृथिवीमिमांनिदधानीहवेहवा । कुवित्सोमस्यापामि-
ति ९ ओषमित्पृथिवीमहंजङ्घनानीहवेहवा । कुवित्सोमस्यापामिति १० दि-
विमेअन्यःपक्षो३धोअन्यमचीकृषम् । कुवित्सोमस्यापामिति ११ अहमस्मि
महामहोभिनभ्यमुदीषतः । कुवित्सोमस्यापामिति १२ गृहोयाम्यरंकृतोदे-
वेभ्योहव्यवाहनः । कुवित्सोमस्यापामिति १३ ॥ २७ ॥ इति शाकलसंहिता-
यामष्टमाष्टके षष्ठोऽध्यायः ॥ ८ ॥ ६ ॥

तदिमावाथर्वणोबृहद्दिवोहिरण्यगर्भोदशहिरण्यगर्भःप्राजापत्यःकायंवस्तुनाष्टौचित्रमहावासिष्ठआग्नेयंजागतमाद्यापञ्चर्मीचतेयंवेनोवैन्यमिमंनोनवैन्यृत्तमानिहवोग्निवरुणसोमानामाद्याग्नेयीतिस्रश्चाग्नेरात्मस्तवःशिष्टायथानिपातंसप्तमीजगत्यहमष्टौवागांभृण्यात्मानंतुष्टावद्वितीयाजगतीनतंशौलूपिःकुल्मलवर्हिषोवामदेव्योवांहोमुग्वैश्वदेवमुपरिष्टाद्बार्हतमन्यात्रिष्टुभ्राभ्रीकुशिकःसौभरोरात्रिर्वाभारद्वाजीरात्रिस्तवंगायत्रंमग्नेनविहव्योवैश्वदेवंजगत्यन्तंनासत्सप्तमजापतिःपरमेष्ठीभाववृत्तंतुयोयज्ञोयज्ञःप्राजापत्योजगत्याद्यापमाचःसुकीर्तिःकाक्षीवतोमध्येनुष्टुप्सोत्तराचाश्विन्यावीजानंशकपूतोनामेधोमैत्रावरुणंन्यङ्कुसारिण्याद्यालिङ्गोक्तदेवतान्त्यामहासतोबृहत्युपाद्योपान्त्येप्रस्तारपङ्क्तीशेषाविराड्रूपाःप्रोपुस्रुदाःपैजवनःशाङ्करमहापाङ्क्तावाद्यौबृचौत्रिष्टुबन्तमुभेयन्मांधातायौवनाश्वोमहापाङ्क्तंपङ्क्तिरन्सातामध्यर्धीगोधापञ्चपद्यस्मिन्कुमारोयामायनोयाममानुष्टुभंहैकेशीमुनयोवातरशनाजूतिर्वातजूतिर्विप्रजूतिर्वृषाणकःकरिक्रतपशऋष्यशृङ्गश्चैकर्चाःकैशिनमुतदेवाःसप्तऋषयएकर्चावैश्वदेवंतवत्येपळङ्गआरवोजागतंसूर्यरश्मिर्देवगन्धर्वोविश्वावसुरात्मानमस्तौत्पूर्वार्धंसवितारमग्नेतवाग्निःपावकआग्नेयंविष्टारपङ्क्तीतिस्रःसतोबृहत्यउपरिष्टाज्ज्योतिरग्नेअच्छाग्निस्तापसोवैश्वदेवमानुष्टुभंत्रयमष्टौबृचाःशार्ङ्गाजरितादोणःसारिसृक्कस्तम्बमित्रश्चाग्नेयमाद्येजगत्यौचतस्रस्त्रिष्टुभः ।

प्रदिशोयस्यबाहूकस्मैदेवायहविषाविधेम ४ येनद्यौरुग्रापृथिवीचदृढायेनस्वः स्तभितंयेननाकः । योअन्तरिक्षेरजसोविमानःकस्मैदेवायहविषाविधेम५॥ ३॥ यंक्रन्दसीअवसातस्तभानेअभ्यैक्षेतांमनसारेजमाने । यत्राधिसूरुदितोविभाति कस्मैदेवायहविषाविधेम ६ आपोहयद्बृहतीर्विश्वमायन्गर्भंदधानाजनयन्तीरग्निम् । ततोदेवानांसमवर्ततासुरेकःकस्मैदेवायहविषाविधेम ७ यश्चिदापोमहिना पर्यपश्यद्दक्षंदधानाजनयन्तीर्यज्ञम् । योदेवेष्वधिदेवएकआसीत्कस्मैदेवायहविषाविधेम ८ मानोहिंसीज्जनिताःपृथिव्यायोवादिवंसत्यधर्माजजान । यश्चापश्चन्द्रावृहतीर्जजानकस्मैदेवायहविषाविधेम ९ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणाम् १० ॥ ४ ॥

वसुं नाष्टौ चित्रमहावासिष्ठोग्निर्जगती । प्रथमापञ्चम्यौ त्रिष्टुभौ ।

१२२ वसुंनचित्रमंहसंगृणीषेवामंशेवमितिथिमाद्विवेण्यम् । सरांसतेशु-
रुधोविश्वधायसोऽग्निर्होतांगृहपतिःसुवीर्यम् १ जुषाणोअग्नेप्रतिहर्यमेवचोवि-
श्वांनिविद्वान्त्सुयुनांनिसुक्रतो । घृतंनिर्णिग्ब्रह्मणेगातुमेरयुतवंदेवाअजनयन्न-
नुव्रतम् २ सप्तधामांनिपरियन्नमर्त्योदाशद्दाशुषेसुकृतेमामहस्व । सुवीरे-
णरयिणाग्नेस्वाभुवायस्तआनट्समिधातंजुषस्व ३ यज्ञस्यकेतुंप्रथमंपुरो-
हितंहविष्मन्तईळतेसप्तवाजिनम् । शृण्वन्तमग्निंघृतपृष्ठमुक्षणंपृणन्तंदेवःपृणते
सुवीर्यम् ४ त्वंदूतःप्रथमोवरेण्यःसह्यमानोअमृतायमत्स्व । त्वांमर्जयन्मरुतो
दाशुषोगृहेत्वास्तोमेभिर्भृगवोविरुरुचुः ५ ॥ ५ ॥ इषंदुहन्त्सुदुघांविश्वधायसं

यज्ञप्रियेयजमानायसुक्रतो । अग्नेघृतस्रुत्स्रिरुतानिदीयहवींर्यज्ञंपरियन्त्सुक्रतू-
यसे ६ त्वामिदस्याउषसोव्युष्टिषुदूतंकृण्वानाअयजन्तमानुषाः । त्वांदेवासहसा-
यास्यायवावृधुराज्यमग्नेनिमृजन्तोअध्वरे ७ नित्यावसिष्ठाअह्वन्तवाजिनंगृ-
णन्तोअग्नेविदथेषुवेधसः । गायस्पोषंयजमानेषुधारययूयंपातस्वस्तिभिःस-
दानः ८ ॥ ६ ॥

अयं वेनोष्टौ वेनो वेनस्त्रिष्टुप् ।

१२३ अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने । इममपांसंगमे-
सूर्यस्यशिशुंनविप्रामतिभीरिहन्ति १ समुद्रादूर्मिमुदियर्तिवेनोनभोजाःपृष्ठं
हर्यतस्यदर्शि । ऋतस्यसानावधिविष्टपित्र्याट्समानंयोनिमभ्यनूषत्रयाः २ स- ॥६५२

मानंपूर्वीरभिवावशानास्तिष्ठंन्वत्सस्यमातरःसनीळाः । ऋतस्यसानावधिचक्र-
माणारिहन्तिमध्वोअमृतंस्यवाणीः ३ जानन्तोरूपमकृपन्तविप्रामृगस्यघोषंम-
हिषस्यहिग्मन् । ऋतेनयन्तोअधिसिन्धुमस्थुर्विदद्गंन्धर्वोअमृतानिनामं ४ अ-
प्सराजारमुपसिष्मियाणायोषांविभर्तिपरमेव्योमन् । चरंत्प्रियस्ययोनिंषुप्रि-
यःसन्त्सीदंत्पक्षेहिरण्ययेसवेनः ५ ॥ ७ ॥ नाकैसुपर्णमुपयत्पतन्तंहृदावेनन्तो
अभ्यचक्षतत्वा । हिरंण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युम् ६ ऊर्ध्वो
गन्धर्वोअधिनाकेंअस्थात्प्रत्यङ्चित्राबिभ्रदस्यायुधानि । वसानोअत्कंसुरभिं
दृशेकंस्वर्णनामंजनताप्रियाणिं ७ द्रप्सःसमुद्रमभियज्जिगातिपश्यन्गृध्रस्यच-
क्षसाविधर्मन् । भानुःशुक्रेणशोचिषाचकानस्तृतीयेचक्रेरजसिप्रियाणिं ८॥८॥

इमं नो नव त्रिष्टुप् । द्वितीयादितिसृणामग्निर्ऋषिः । शिष्टानामग्निवरुणसोमानिर्ऋतवः । आद्यानां चतसृणामग्निर्देवता । अन्त्याया इन्द्रः । शिष्टानां यथानिपातम् । सप्तमी जगती ।

१२४ इमंनोअग्रउपयज्ञमेहिपञ्चयामंत्रिवृतंसप्ततन्तुम् । असोह्यवाळुतनःपुरोगाज्योगेवदीर्घतमुआशयिष्ठाः १ अदेवाद्देवःप्रचतागुहायन्प्रपश्यमानोअमृतत्वमेमि । शिवंवयत्सन्तमशेवोजहामिस्वात्सख्यादरणीनाभिमेमि २ पश्यन्नन्यस्याअतिथिंवयायाऋतस्यधामविमिमेपुरूणि । शंसामिपित्रेअसुरायशेवमयज्ञियायज्ञियैभागमेमि ३ वह्वीःसमाअकरमन्तरस्मिन्निन्द्रंवृणानःपितरंजहामि । अग्निःसोमोवरुणस्तेन्यवन्तेपर्यावर्द्राप्टृतदेवास्यायन् ४ निर्मीयाउत्येअसुराअभूवन्त्वंचमावरुणकामयासे । ऋतेनराजन्नृतंविविश्वन्ममराष्ट्रस्या- ॥६५१॥

धिपत्युमेहि ५॥१॥इदंस्वरिदमिदासवाममयंप्रकाशउर्वन्तरिक्षम् । हनाववृत्रं
निरहिंसोमहविष्टासन्तेहविषायजाम ६ कविःकवित्वादिविरूपमासंजदप्सभूती
वरुणोनिरपःसृजत् । क्षेमंकृण्वानाजनयोनासिन्धवस्ताअस्यवर्णंशुचयोभरिभ्र-
ति ७ ताअस्यज्येष्ठमिन्द्रियंसचन्तेताईमाक्षैतिस्वधयामदन्तीः । ताईविशो
नराजानंवृणानाबीभत्सुवोअपवृत्रादतिष्ठन् ८ बीभत्सूनांसयुजंहंसमाहुर-
पांदिव्यानांसख्येचरन्तम् । अनुष्टुभमनुचर्चूर्यमाणमिन्द्रंनिचिक्युःकवयोम-
नीषा ९ ॥१०॥

अहमृषी वागाम्भृणी वागाम्भृणी त्रिष्टुप् । उपाया जगती ।

१२५ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः । अहंमित्रावरुणोभा
बिभर्म्यहमिन्द्राग्नीअहमश्विनोभा १ अहंसोममाहनसंबिभर्म्यहंत्वष्टारमुतपू-

पर्णभगम् । अहंदधामिद्रविणंहविष्मतेसुप्राव्ये३यजमानायसुन्वते २। अहंरा-
ष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानाम् । तांमादेवाव्यदधुःपुरुत्राभूरि-
स्थात्रांभूर्यावेशयन्तीम् ३ मयासोअन्नमत्तियोविपश्यतियःप्राणितियईशृणोत्यु-
क्तम् । अमन्तवोमांतउपक्षियन्तिश्रुधिश्रुतश्रद्धिवंतेवदामि ४ अहमेवस्वयमि-
दंवदामिजुष्टंदेवेभिरुतमानुषेभिः । यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंत-
ंमेधाम् ५ ॥ ११ ॥ अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहन्तवाउ । अहंज-
नायसमदंकृणोम्यहंद्यावापृथिवीआविवेश ६ अहंसुवेपितरमस्यमूर्धन्ममयो-
निरप्स्वन्तःसमुद्रे । ततोवितिष्ठेभुवनानुविश्वोतामूंद्यांवृष्मणोपस्पृशामि ७
अहमेववातइवप्रवाम्यारभमाणाभुवनानिविश्वा । परोदिवापरएनापृथिव्यैता-
वतीमहिनासंबभूव ८ ॥ १२ ॥ ॥६५४॥

न तमंहो न दुरितं देवासो अष्टमत्यँम् । सजोषसोयमर्यमामित्रोनयन्ति वरुणोअतिद्विषः १ तद्धि वयंवृणीमहेवरुणमित्रार्यँमन् । येनानिरंहसोयूयंपाथ नेपाचमर्त्यमतिद्विषः २ तेनूनंनोऽयमूतयेवरुणोमित्रोअर्यमा । नार्यंषाउनोनेषणिपर्षिषाउनःपर्षण्यतिद्विषः ३ यूयंविश्वंपरिपाथवरुणोमित्रोअर्यमा । युष्माकंशर्मणिप्रियेस्यामसुप्रणीतयोऽतिद्विषः ४ आदित्यासोअतिस्रिधोवरुणोमित्रोअर्यमा । उग्रंमरुद्रींरुद्रंहुवेमेन्द्रमग्निंस्वस्तयेऽतिद्विषः ५ नेतारऊषुणस्तिरोवरुणोमित्रोअर्यमा । अतिविश्वानिदुरितारा जानभर्षणीनामतिद्विषः ६ शुनमस्मभ्यमूतयेवरुणोमित्रोअर्यमा । शर्मयच्छन्तुसप्रथआदित्यासोयदीमहे

अतिद्विषः ७ यथाहत्यद्वसवोगौर्यचित्पदिषितामरुध्रतायजत्राः । एवोष्व१स्मन्मुञ्चताव्यंहःप्रतार्यग्नेप्रतरंनआयुः ८ ॥ १३ ॥

राज्ञष्टौ कुशिकः सौभरो रात्रिर्वा भारद्वाजी रात्रिस्तवो गायत्री ।

१२७ रात्रीव्यख्यदायतीपुरुत्रादेव्य१क्षभिः । विश्वाअधिश्रियोऽधित १ ओर्वप्राअमर्त्यानिवतोदेव्यु१द्वतः । ज्योतिषाबाधतेतमः २ निरुस्वसारमस्कृतोषसंदेव्यायती । अपेदुहासतेतमः ३ सानोअध्ययस्यावयंनितेयामन्नविक्ष्महि । वृक्षेनवसतिंवयः ४ निग्रामासोअविक्षतनिपद्वन्तोनिपक्षिणः । निश्येनासश्चिदर्थिनः ५ यावयावृक्यं१वृकंयवयस्तेनमूर्म्ये । अथानःसुतरोभव ६ उषो मापेपिशत्तमःकृष्णंव्यक्तमस्थित । उषऋणेवयातय ७ उषतेगाडवाकरंवृणीष्व दुहितर्दिवः । रात्रिस्तोमंनजिग्युषे ८ ॥ १४ ॥

ममाग्ने नव विहव्यो विश्वेदेवास्त्रिष्टुप् । अन्त्या जगती ।

१२८ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेन्धानास्तन्वंपुषेम । महोनमन्तांप्र-
दिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजयेम १ ममदेवाविहवेसन्तुसर्वइन्द्रवन्तोम-
रुतोविष्णुरग्निः । ममान्तरिक्षमुरुलोकमस्तुमह्यंवातःपवतांकामेअस्मिन् २
मयिदेवाद्रविणमायजन्तांमय्याशीरस्तुमयिदेवहूतिः । दैव्याहोतारोवनुषन्तपू-
र्वेऽरिष्टाःस्यामतन्वासुवीराः ३ महोयजन्तुममयानिहव्याकूतिःसत्यामनसोमे
अस्तु । एनोमानिगांकतमच्चनाहंविश्वेदेवासोअधिवोचतानः ४ देवीःषळुर्वी-
रुरुनःकृणोतुविश्वेदेवासइहवीरयध्वम् । माहास्महिप्रजयामातनूभिर्मारधाम
द्विषतेसोमराजन् ५ ॥ १५ ॥ अग्नेमन्युंप्रतिनुदन्परेषामदब्धोगोपाःपरिपाहि
नस्त्वम् । प्रत्यञ्चोयन्तुनिगुतःपुनस्तेऽमैषांचित्तंप्रबुधांविनेशत् ६ धातार्धातॄणां-

शुत्रनस्ययस्पतिर्देवंत्रातारमश्विनाविषाहम् । इमंयज्ञमश्विनोभावृहस्पतिर्देवाः पान्तुयजमानंन्युर्थात् ७ उरुव्यचानोमहिषःशर्मयंसदस्मिन्हवेपुरुहूतःपुरुक्षुः । सनंःमृजायैहर्यश्वमृळयेन्द्रमानोरीरिषोमापरादाः ८ येनंःसपत्नाअपतेभवन्त्विन्द्राग्निभ्यामवंवाधामहैतान् । वसवोरुद्राआदित्याउपरिस्पृशंमोग्रंचेत्तारमधिराजमंकन् ९॥१६॥ इति शाकलर्क्संहितायां दशमे मण्डले दशमोनुवाकः॥१०॥१०॥

नासत्सन्न प्रजापतेः परमेष्ठी भाववृत्तं त्रिष्टुप् ।

१२९ नासंदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयत् । किमावंरीवःकुहकस्यशर्मन्नम्भःकिमासीद्गहनंगभीरम् १ नमृत्युरासीदमृतंनतर्हिनराव्याअह्नंआसीत्प्रकेतः । आनीदवातंस्वधयातदेकंतस्माद्धान्यन्नपरःकिंचनास २ तमंआसीत्तमसागूळ्हमग्रेऽप्रकेतंसलिलंसर्वमाइदम् । तुच्छ्येनाभ्वपिहितंयदा- ॥६५२॥

सीत्पसस्तन्महिनाजायतैकम् ३ कामस्तदग्रेसमवर्तताधिमनसोरेतःप्रथमंय-
दासीत् । सतोबन्धुमसतिनिरविन्दन्हृदिप्रतीष्याकवयोमनीषा ४ तिरश्चीनो
विततोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त् । रेतोधाआसन्महिमानआ-
सन्त्स्वधाअवस्तात्प्रयतिःपरस्तात् ५ कोअद्धावेदकइहप्रवोचत्कुतआजाताकु-
तइयंविसृष्टिः । अर्वाग्देवाअस्यविसर्जनेनाथाकोवेदयतआबभूव ६ इयंविसृष्टि-
र्यतआबभूवयदिवादधेयदिवान । योअस्याध्यक्षःपरमेव्योमन्त्सोअङ्गवेदयदिवा
नवेद ७ ॥ १७ ॥

यो यज्ञः सप्त यज्ञः प्राजापत्यो भाववृत्तं त्रिष्टुप् । आद्या जगती ।

१३० योयज्ञोविश्वतस्तन्तुभिस्ततएकशतंदेवकर्मेभिरायतः । इमेवयन्ति
पितरोयआययुःप्रवयापवयेत्यासतेततेन ९ पुमाँएनंतनुतउत्कृणत्तिपुमान्वितंते

अधिनाकेअस्मिन् । इमेमयूखाउपसेदुरुसदः सामानिचक्रुस्तसराण्योतवे २ कासीत्प्रमाप्रतिमाकिंनिदानमाज्यंकिमासीत्परिधिःकआसीत् । छन्दःकिमासीत्प्रउगंकिमुक्थंयद्देवादेवमयजन्तविश्वे ३ अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहयासवितासंबभूव । अनुष्टुभासोमउक्थैर्महस्वान्बृहस्पतेर्बृहतीवाचमावत् ४ विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्यत्रिष्टुविहभागोअह्नः । विश्वान्देवाञ्जगत्याविवेशतेनचाकॢप्रऋषयोमनुष्याः ५ चाक्लृप्रेतेनऋषयोमनुष्यायज्ञेजातेपितरोनःपुराणे । पश्यन्मन्येमनसाचक्षसातान्यइमंयज्ञमयजन्तपूर्वे ६ सहस्तोमाःसहछन्दसआवृतःसहप्रमाऋषयःसप्तदैव्याः । पूर्वेषांपन्थामनुदृश्यधीराअन्वालेभिरेरिरेनरश्मीन् ७ ॥ १८ ॥

अप प्राचं सप्त सुकीर्तिः कासीवत इन्द्रस्त्रिष्टुप् । चतुर्थीपञ्चम्योरश्विनौ देवता । चतुर्थ्यनुष्टुप् ।

१३१ अपप्राचंइन्द्रविश्वाँअमित्रानपापाचोअभिभूतेनुदस्व । अपोदीचोअपशूराधराचंउरौयथातवशर्मन्मदेम १ कुविदङ्गयवमन्तोयवंचिद्यथादान्त्यनुपूर्वं वियूय । इहेहैषांकृणुहिभोजनानियेबर्हिषोनमोवृक्तिंनजग्मुः २ नहिस्थूर्यृतुथा यातमस्तिनोतश्रवोविविदेसंगमेषु । गव्यन्तइन्द्रंसख्यायविप्राअश्वायन्तोवृषणं वाजयन्तः ३ युवंसुरामंमश्विनानमुंचावासुरेसचा । विपिपानाशुभस्पतीइन्द्रं कर्मस्वावतम् ४ पुत्रमिवपितरावश्विनोभेन्द्रावथुःकाव्यैर्दंसनाभिः । यत्सुरामं व्यपिबःशचीभिःसरस्वतीत्वामघवन्नभिष्णक् ५ इन्द्रःसुत्रामास्ववाँअवोभिः सुमृळीकोभवतुविश्ववेदाः । बाधतांद्वेषोअभयंकृणोतुसुवीर्यस्यपतयःस्याम ६

तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम । ससुत्रामात्ववाँइन्द्रोअस्मेआ- अ.८अ७
राच्छिद्वर्पःसनुतर्युयोतु ७ ॥ १९ ॥

ईजानं सप्त शकपूतो नामेंधो मित्रावरुणौ । आद्यापा लिङ्गोक्तदेवताः । सैव न्यङ्कुसारिणी ।
द्वितीयापष्ठ्यौ मस्तारपङ्क्ती । अन्त्या महासतोबृहती । शिष्टा विराडूपाः ।

१३२ ईजानमिद्द्यौर्गूर्तावसुरीजानंभूमिरभिप्रभूषणि । ईजानंदेवावश्विना-
वभिसुम्नैरवर्धताम् १ तावाँमित्रावरुणाधारयत्क्षितीसुदंसेपितृत्वतायजामसि ।
युवोःक्राणायंसख्यैरभिष्यामरक्षसः २ अधाँचिन्नुयद्दिधिषामहेवामभिप्रियंरे-
कणःपत्यमानाः । दद्वाँवायत्पुष्यंतिरेकणःसम्वारंघ्नकिरस्यमुघानि ३ असाव-
न्योअंसुरसूयतद्यौस्त्वंविश्वेषांवरुणासिराजा । मूर्धारथस्यचाकशैतावतैनंसा-
न्तकंघुक् ४ अस्मिन्स्वेंऽतच्छकपूतएनोंहितेमित्रेनिमंतान्हन्तिवीरान् । अ- ॥६५८

वोवायद्वात्तनूष्ववःप्रियासुयज्ञियास्ववौ ५ युवोर्हिमातादितिर्विचेतसाद्यौर्नभू-
मिःपयसापुपूतनि । अवप्रियादिदिष्टनसूरोनिनिक्तरश्मिभिः ६ युवंह्यप्रराजा-
वसीदतंतिष्ठद्रथंनधूर्षदंवनर्षदम् । तानःकणूकयन्तीर्नुमेधस्तत्रेअंहसःसुमेध-
स्तत्रेअंहसः ७ ॥ २० ॥

मो षु सप्त सुदाः । पैजवन इन्द्रः । आद्यास्तिस्रः शाक्वर्यः । अन्त्या त्रिष्टुप् । शिष्टा महापङ्क्तयः ।

१३३ प्रोष्वस्मैपुरोरथमिन्द्रायशूषमर्चत । अभीकेचिदुलोककुत्सस्रःसमत्सु
वृत्रहास्माकंबोधिचोदिताभन्तामन्यकेषांज्याकाअधिधन्वसु १ त्वंसिन्धूरवा-
सृजोऽधराचोअहन्नहिम् । अशत्रुरिन्द्रजज्ञिषेविश्वंपुष्यसिवार्यंतंत्वापरिष्वजाम-
हेनभन्तामन्यकेषांज्याकाअधिधन्वसु २ विषुविश्वाअरातयोऽर्योनंशन्तनोधि-
यः । अस्तासिशत्रवेवधंयोनइन्द्राभिघांसतियातैरातिर्दिदिवसुनभन्तान्यकेषां

ज्याकाअधिधन्वसु ३ योनइन्द्राभितोजनोवृकायुरादिदेशति । अधस्पदंतमीं कृधिविबाधोअंसिसासहिनंभन्तामन्यकेषांज्याकाअधिधन्वसु ४ योनइन्द्राभिदासतिसनाभिर्यश्चनिष्टयः । अवतस्यबलंतिरमहीवयौरधत्मनानभन्तामन्यकेषांज्याकाअधिधन्वसु ५ वयमिन्द्रत्वायवःसख्यित्वमारंभामहे । क्रतुस्यनःपथानयातिविश्वानिदुरितानभन्तामन्यकेषांज्याकाअधिधन्वसु ६ अस्मभ्यंसुत्वमिन्द्रतांशिक्षयादोहंतप्रतिवरंजरित्रे । अच्छिद्रोभीपीपयद्यथानःसहस्रधारापयसा महीगौः ७ ॥ २१ ॥

उभे यत्सप्त मांधाता यौवनाश्व इन्द्रो महापङ्क्तिः । अन्त्याध्यर्धर्चस्य गोधा । सप्तमी पङ्क्तिः ।

१३४ उभेयदिन्द्ररोदसीआपप्राथोषाइव । महान्तंत्वामहीनांसम्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् १ अवस्मदुहणायतोमंस्यतनुहि ॥६५२॥

स्थिरम् । अधस्पदंतमींकधियोअस्माँआदिदेशतिदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् २ अवत्यावृहतीरियोविश्वश्चन्द्राअमित्रहन् । शचीभिःशक्रधूनुहीन्द्रविश्वाभिरूतिभिर्देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ३ अवयत्वंशतक्रतविन्द्रविश्वानिधूनुषे । रयिंनसुन्वतेसचासहस्रिणींभिरूतिभिर्देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ४ अवस्वेदाइवाभितोविष्वक्पतन्तुदिद्यवः । दूवीयाइवतन्तवोन्यस्मदेतुदुर्मतिर्देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ५ दीर्घह्यङ्कुशंयथाशक्तिंबिभर्षिमन्तुमः । पूर्वेणमघवन्पदाजोवयांयथायसोदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ६ नकिर्देवामिनीमसिनकिरायोपयामसि मन्त्रश्रुत्यंचरामसि । पक्षेभिरपिकक्षेभिरत्राभिसंरभामहे ७ ॥ २२ ॥

यस्मिन्सप्त कुमारो यामायनो यमोनुष्टुप् ।

१३५ यस्मिन्वृक्षेसुपलाशेदेवैःसंपिबतेयमः।अत्रानोविश्पतिःपितापुराणाँअनुवेनति १ पुराणाँअनुवेनन्तंचरन्तंपापयामुया । असूयन्नभ्यंचाकशंतस्माँअस्पृहयंपुनः २ यंकुमारनवंरथंमचक्रंमनसाकृणोः । एकैपंविश्वतःप्राञ्चमपश्यन्नधितिष्ठसि ३ यंकुमारप्रावर्तयोरथंविप्रेभ्यस्परि । तंसामानुप्रावर्तत्सम्मितोनाव्याहितम् ४ कःकुमारमजनयद्रथंकोनिरवर्तयत् । कःस्वित्तदद्यनोब्रूयादनुदेयीयथाभवत् ५ यथाभवदनुदेयीततोअग्रमजायत । पुरस्ताद्बुध्नआततःपश्चान्निरयणंकृतम् ६ इदंयमस्यसादनंदेवमानंयदुच्यते । इयमस्यधम्यतेनाळीरयंगीभिःपरिष्कृतः ७ ॥ २३ ॥

१३६ केश्यग्निंकेशीविषंकेशीविभर्तिरोदसी । केशीविश्वंस्वर्दृशेकेशीदं ज्योतिरुच्यते १ मुनयोवातरशनाःपिशङ्गावसतेमला । वातस्यानुध्राजिंयन्ति यद्देवासोअविक्षत २ उन्मादितामौनेयेनवाताँआतस्थिमावयम् । शरीरेदस्माकं यूयंमतासोअभिपश्यथ ३ अन्तरिक्षेणपततिविश्वारूपावचाकशत् । मुनिर्देवस्यदेवस्यसौकृत्यायसखाहितः ४ वातस्याश्वोवायोःसखाथोदेवेषितोमुनिः । उभौसमुद्रावाक्षेतियश्चपूर्वउतापरः ५ अप्सरसांगन्धर्वाणांमृगाणांचरणेचरन् । केशीकेतस्यविद्वान्त्सखास्वादुर्मदिंतमः ६ वायुरस्माउपामन्थत्पिनष्टिस्माकुननमा । केशीविषस्यपात्रेणयद्रुद्रेणापिवत्सह ७ ॥ २४ ॥

उत देवाः सप्त विश्वेदेवा अनुष्टुप्। भरद्वाजकश्यपगौतमात्रिविश्वामित्र-
जमदग्निवसिष्ठा इति ऋमेण मन्त्रचमृषयः।

१३७ उतदेवाअवहितंदेवाउन्नयथापुनः। उतागश्चक्रुषंदेवादेवाजीवयथापुनः १ हाविमौवातौवातआसिन्धोरापरावतः। दक्षंतेअन्यआवातुपरान्योवातु यद्रपः २ आवातवाहिभेषजंविवातवाहियद्रपः। त्वंहिविश्वभेषजोदेवानांदूतईयसे ३ आत्वागमंशन्तातिभिरथोअरिष्टतातिभिः। दक्षंतेभद्रमाभारपितरायक्ष्मंसुवामिते ४ त्रायन्तामिहदेवास्त्रायतांमरुतांगणः। त्रायन्तांविश्वाभूतानियथायमरपाअसत् ५ आपइद्वाउभेषजीरापोअमीवचातनीः। आपःसर्वस्यभेषजीस्तास्तेकृण्वन्तुभेषजम् ६ हस्तास्यांदशशाखाभ्यांजिह्वावाचःपुरोगवी। अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि ७ ॥ २५ ॥

न्वानोधियइनोअव्याः ५ सस्निमविन्दच्चरणेनदीनामपावृणोदुरोअश्मव्रजानाम् । पासांगन्धर्वोअमृतानिवोचदिन्द्रोदक्षंपरिजानादहीनाम् ६ ॥ २७ ॥

अग्ने तव पडग्निः पावकोग्निः । आद्या विष्टारपङ्क्तिः । उपान्त्योपरिष्टाज्ज्योतिः । अन्त्यात्रिष्टुप् । शिष्टाः सतोबृहत्यः ।

१४० अग्नेतवश्रवोवयोमहिभ्राजन्तेअर्चयोविभावसो । बृहद्भानोशवसावाजमुक्थ्यं१दधासिदाशुषेकवे १ पावकवर्चाःशुक्रवर्चाअनूनवर्चाउदियर्षिभानुना । पुत्रोमातरांविचरन्नुपावसिपृणक्षिरोदसीउभे २ ऊर्जोनपाज्जातवेदःसुशस्तिभिर्मन्दस्वधीतिभिर्हितः । त्वेइषःसंदधुर्भूरिवर्पसश्चित्रोतयोवामजाताः ३ द्रुरन्यन्नेप्रथयस्वजन्तुभिरस्मेरायोअमर्त्य । सदर्शतस्यवपुषोविरांजसिपृणक्षिसानसिंक्रतुम् ४ इष्कर्तारंमध्वरस्यप्रचेतसंक्षयन्तंराधसोमहः । रातिंवामस्यसुभ-

सूर्यरश्मिः पद् देवगन्धर्वो विश्वावसुस्त्रिष्टुप्। आद्यतृचस्य सविता देवता।
अन्त्यस्य विश्वावसुः।

१३१ सूर्यरश्मिर्हरिकेशःपुरस्तात्सविताज्योतिरुदयाँअजस्रम्। तस्यपूषाप्रस्वेयातिविद्वान्त्संपश्यन्विश्वाभुवनानिगोपाः १ नृचक्षाएषदिवोमध्यआस्ते-आपप्रिवान्रोदसीअन्तरिक्षम्। सविश्वाचीरभिचष्टेघृताचीरन्तरापूर्वमपरंचकेतुम् २ रायोबुध्नःसंगमनोवसूनांविश्वारूपाभिचष्टेशचीभिः। देवइवसवितासत्यधर्मेन्द्रोनतस्थौसमरेधनानाम् ३ विश्वावसुंसोमगन्धर्वमापोदक्षुषीस्तदृतेनाव्यायन्। तदन्ववैदिन्द्रोरारहाणआसांपरिसूर्यस्यपरिधीरपश्यत् ४ विश्वावसुरभितन्नोगृणातुदिव्योगन्धर्वोरजसोविमानः। यदाघात्यमृतयन्नविध्यधियोहि- ॥६६२॥

अयमष्टौ शार्ङ्गाः ।प्रथमर्द्चस्य जरितर्पिः । उपांशुस्य द्रोणः । उपान्त्यस्य सारिसृक्वः । अन्तस्य स्तम्बमित्रः । सर्वासामग्निर्देवता । आद्ये जगत्यौ । अन्त्ये अनुष्टभौ । शिष्टास्त्रिष्टुभः ।

१४२ 'अयमंग्नेजरितात्वेअंभूदपिसहंसःसूनोनह्यं१न्यदस्त्याप्यंम् । भद्रंहि शर्मौंत्रिवरूथमस्तितआरेहिंसांनामपंदियुमाकंधे १ प्रवत्तेअग्नेजानिंमापितूय-तःसाचिवविश्वाभुवंनान्यृंञ्जसे । प्रसप्तंयःप्रसंनिपन्तनोधियंःपुरश्चंरन्तिपशुपाइ-वत्मनां २ उतवाउपरिवृणाक्षिबप्सदृहोरंग्रउलंपस्यस्वधावः । उतखिल्याउर्व-रांणांभवन्तिमातेहेतिंतविंषींचुक्रुधाम ३ यदुद्वतोंनिवतोयासिबप्नत्पृथंगेषिप्र-गर्धिनींवसेना । यदात्तेवातोंअनुवातिंशोचिर्वप्तेवृश्मश्रुंवपसिप्रभूमं ४ प्रत्यंस्य-श्रेणंयोदृशेएकंनियानंबृहवोरथांसः । बाहूयदग्नेअनुममृंजानोन्यंङ्क्तानाम-न्वेषिभूमिंम् ५ उत्तेशुष्मांजिहतामुत्तेअर्चिरुत्तेअग्नेशशमानस्यवाजाः। उच्छ्वं-

गांमहीमिपंदधांसिसान॒सिंर॒यिम् ५ ऋतावा॑नंमहिषंविश्वदर्शतमा॒ग्निंसु॒म्नायदा॑धि-
रेपु॒रोज॑नाः । श्रुत्कर्णं॑स॒प्रथ॑स्तमंत्वागिरादैव्यं॒मानु॑षायुगा ६ ॥ २८ ॥

अग्ने अच्छ पदाग्निस्तापसो विश्वेदेवा अनुष्टुप् ।

१४१ अग्नेअच्छावदेहनःप्रत्यङ्ङुःसुमनाभव । प्रनोयच्छविशस्पतेधनदाअं-
सिनस्त्वम् १ प्रनोयच्छत्वर्यमाप्रभगःप्रबृहस्पतिः । प्रदेवाःप्रोतसूनृतारायोदेवी
ददातुनः २ सोमंराजानमवसेऽग्निंगी॒भिर्हवामहे । आदित्यान्विष्णुंसूर्यंब्रह्माणं
चबृहस्पतिम् ३ इन्द्रवायूबृहस्पतिंसुहवेहहवामहे । यथान॒ःसर्वइज्जन॒ःसंगत्यां
सुमनाअसत् ४ अर्यमणंबृहस्पतिमिन्द्रंदानायचोदय । वातंविष्णुंसरस्वतींस-
वितारंचवाजिनम् ५ त्वंनोअग्नेअग्निभिर्ब्रह्मयज्ञंचवर्धय । त्वंनोदेवतातयेरायो
दानायचोदय ६ ॥ २९ ॥

च्यात्मानंतुष्टावानुष्टुभंतीव्रस्यपञ्चपूरणोवैश्वामित्रोमुञ्चामित्वाप्राजापत्योयक्ष्मनाशनोराजयक्ष्मघ्नम-
न्त्यानुष्टुब्ब्रह्मणापङ्क्त्याक्षोरसोहागर्भसंस्रावेमायश्चित्तमानुष्टुभंक्षत्रीभ्यांविवृहाकाश्यपोयक्ष्मघ्नमपोहि
पक्षप्रचेतादुःस्वप्नघ्नंपङ्क्त्यन्तंत्रिष्टुम्मध्यंदेवानैर्ऋतःकपोतःकपोतौपहतौमायश्चित्तंवैश्वदेवमृषभमृषभोवै-
राजःशाकरोवासपत्नघ्नमानुष्टुभंमहापङ्क्त्यन्तंतुभ्येदंचतुष्कोवैश्वामित्रजमदग्नीजागतंतृतीयालिङ्गोक्तदे-
वनावातस्यानिलोवातायनोवायव्यंमयोभूःशबरःकासीवतोगव्यंविभ्राड्बृहद्भ्राट्सौर्यःसौर्यजागतमा-
स्तारपङ्क्त्यन्तंत्वंत्यमिटतोभार्गवोगायत्रमायाहिसंवर्तउपस्यंद्वैपदमात्वापङ्क्त्रुवोराज्ञःस्तुतिस्त्वानुष्टुभंत्व-
भीवर्तेनपञ्चाभीवर्तःप्रवश्चतुष्पदमूर्ध्वंग्रावासपोबुंदिग्राव्णोस्तौद्रायत्रंप्रसूनवःसूनरार्भवआग्नेयमानुष्टुभं
द्वितीयागायत्र्याबार्भवीपतङ्गंतूचंपतङ्गःप्राजापत्योमायाभेदंजगत्यादित्यमूष्वरिष्टनेमिस्तार्क्ष्यस्तार्क्ष्यमु-
त्तिष्ठतैकर्चाःशेशिरोशीनरःकाशिराजःमतर्दनोरोहिदश्वोवसुमनाआद्यानुष्टुप्प्रसमाहिपेजयऐन्द्रःप्रथ-
मश्चैकर्चाःप्रथोवासिष्ठःसप्रथोभारद्वाजोघर्मःसौर्योवैश्वदेवंबृहस्पतिस्तपुर्मूर्धाबार्हस्पत्योबार्हस्पत्यमपश्यं
प्रजावान्याजापत्योन्वृचंयजमानपत्नीहोत्राशिषोविष्णुस्त्वष्टागर्भकर्ताविष्णुर्वाप्राजापत्योगर्भार्थाशी-

श्वस्वनिनंमुवर्धमानुआत्वाद्यविश्वेवसंवःसदन्तु ६ अपामिदंन्ययंनंसमुद्रस्यंनि-
वेशंनम् । अन्यंकृणुष्वेतःपन्थांतेनंयाहिवशाँअनु ७ आयंनेतेपरायंणेदूवाँरोह-
न्तुपुष्पिणीः । ह्रदाश्चंपुण्डरींकाणिसमुद्रस्यंगृहाइमे ८ ॥ ३० ॥ इति शाकलकृ-
संहितायामष्टमाष्टके सप्तमोध्यायः ॥ ८ ॥ ७ ॥

संपङ्क्तांरुयोत्रिराश्विनमयंहितार्ष्यपुत्रःसुपर्णोयामायनोवोर्ध्वकृशनोगायत्रीबृहतीगायङ्यौसतौबृ-
हतीविष्टारपङ्क्तिरमामिन्द्राण्युपनिषत्सपत्नीबाधनमानुष्टुभंतुपङ्क्त्यन्तमरण्यान्यैरंमदोदेवमुनिररण्यानी
तुष्टवश्रत्तेपञ्चसुवेदाःशैरीषिस्त्रिष्टुवन्तंसुप्वानासःपृथुर्वैन्यःसवितार्चन्हैरण्यस्तूपःसावित्रंसमिद्धोवासि-
ष्ठोमृळीकआग्नेयंबार्हतमन्त्येउपरिष्टाज्ज्योतिषीजगत्युषान्त्सावाश्रद्धयाश्रद्धाकामायिनीश्राद्धमानुष्टुभं
तुशासःशासोभारद्वाजईङ्खयन्तीर्देवजामयइन्द्रमातरोगायत्रंसोमोयमीभाववृत्तमानुष्टुभंत्वरायैशिरि-
म्बिठोभारद्वाजोलक्ष्मीर्गृद्वितीयातृतीयाब्राह्मणस्पत्येअन्त्यावैश्वदेव्यग्निकेतुराग्नेयआग्नेयंगायत्रमिमानु
कंमुवनआत्मःसाधनोवाभौवनोवैश्वदेवंवैष्टपदंत्रैष्टुभंसूर्योनश्चक्षुःसौर्यःसौर्यंगायत्रमुदसौषट्पोलोमीश-

त्रभिर्नासत्यासातयेकृतम् ५ आवांसुभ्नैःशंयूइवमंहिष्ठाविश्ववेदसा । सम-
स्मेभूपतंनरोत्संनापिप्युषीरिषः ६ ॥ १ ॥

अयं हि पद्पर्णस्तार्क्ष्यपुत्र ऊर्ध्वकृशनो वा यामायन इन्द्रो गायत्री । उपाया
बृहती । उपान्सा सतोबृहती । अन्सा विष्टारपङ्क्तिः ।

१२४ अयंहितेअमर्त्यइन्दुरत्योनपत्यते । दक्षोविश्वायुर्वेधसे १ अयमस्मा-
सुकाव्यऋभुर्वज्रोदास्यते । अयंबिभर्त्यूर्ध्वकृशनंमदंसुभुर्नकृत्व्यंमदम् २ धृषुः
श्येनायुक्त्वनआसुस्वासुवंसगः । अवदीधेदहीशुवः ३ यंसुपर्णःपरावतःश्येन-
स्यपुत्रआभरत् । शतचक्रंयोऽह्योवर्तनिः ४ यंतेश्येनश्चारुमवृकंपपाभरदरुणं
मानमन्धसः । एनावयोवितार्यायुर्जीवसएनाजागारबन्धुता ५ एवातदिन्द्रइ-

लिङ्गोक्तदैवतमानुष्टुभंमहिसत्यधृतिर्वारुणिरादित्यंस्वस्त्ययनंगायत्रंवैवातोवातायनउलोवायव्यंमाग्नये पश्चाग्नेयोवत्सआग्नेयंतुमनूयंतृचमाग्नेयःश्येनोजातवेदस्यमायंगौःसार्पराज्ञ्यात्मदैवतंसौर्यंवक्रुतंचमाधुच्छन्दसोयमर्षणोभाववृत्तमानुष्टुभंतुसंसंचतुष्कंसंवननःसंज्ञानमाद्याग्नेयीतृतीयात्रिष्टुप्कृतीयात्रिष्टुप् । तदेतत्सूक्तसहस्रंससप्तदशकंसपादाधिकमृग्वेदेपारायणपाठेशाकल्येशैशिरीयकेनमःशौनकायनमःशौनकाय ।

त्यं पडत्रिः सांख्योश्विनावनुष्टुप् ।

१४३ ॐम् त्यंचिदत्रिंमृनजुरमर्थमश्वंनयातवे । कक्षीवन्तंयदीपुनारथंनकृणुथोनवम् १ त्यंचिदश्वंनवाजिनंमरेणवोयमत्नत । दृळ्हंग्रन्थिनाविष्यंतमत्रिंयविष्ठवारजंः २ नरादंसिष्ठावत्रयेशुभ्रासिपांसतंधियंः । अथाहिवांदिवोनरापुनःस्तोमोनविशसे ३ चितेतद्वांसुराधसारातिःसुमतिरश्विना । आयंन्नःसदंनेपृथौसमनेपथोनरा ४ युवंभुज्युंसमुद्रआरजंसःपारईङ्खितम् । यातमच्छापप- ॥६६८॥

आरण्यानि पञ्चैवमुनिरैरम्मदोरण्यान्यनुष्टुप् ।

१४६ अरण्यान्यरण्यान्यसौयाप्रेवनश्यसि । कथाग्रामंनपृच्छसिनत्वाभीरिवविन्दतीइँ १ वृषारवायुवदंतेयदुपावंतिचिच्चिकः ।आघाटिभिरिवधावयंन्नरण्यानिमँहीयते २ उतगावइवादन्त्युतवेश्मेवदृश्यते । उतोअरण्यानिःस्सायंशंकुटीरिवसर्जति ३ गामङ्गैषआह्वयतिदार्वङ्गैषोअपावधीत् । वसंन्नरण्यान्यांसायमक्रुक्षदितिमन्यते ४ नवाअरण्यानिहँन्त्यन्यश्चेन्नाभिगच्छंति । स्वादोःफलस्यजग्ध्वायेयथाकामंनिपद्यते ५ आञ्जनगन्धिसुरभिंबहून्नामकंपीवलाम् । प्राहंमृगाणामातरमरण्यानिमंशंसिषम् ६ ॥ ४ ॥

श्रत्ते पञ्च सुवेदाः शैरीषिरिन्द्रो जगती । अन्त्या त्रिष्टुप् ।

१४७ श्रत्तेदधामिप्रथमायमन्यवेऽहन्यहन्त्रेनर्याविवेरपः । उभेयत्त्वाभवतोरोद-

न्दुनादेवेयुंचिछ्रारयातेमाहित्यजः । कृत्वावयोवितार्यायुःसुकृतोकृत्वायमस्मदासुतः ६ ॥ २ ॥

इमां षडिन्द्राण्युपनिपत्सपत्नीबाधनमनुष्टुप् । अन्त्या पङ्क्तिः ।

१ इमांखनाम्योषधिंवीरुधंबलंवत्तमाम् । ययासपत्नीबाधतेययासंविन्दतेपतिम् १ उत्तानपर्णेसुभगेदेवजूतेसहस्वति । सपत्नींमेपराधमपतिंमेकेवलंकुरु २ उत्तराहमुत्तरउत्तरेदुत्तराभ्यः । अथासपत्नीयाममाधरासाधराभ्यः ३ नह्यस्या नामगृभ्णामिनोअस्मिन्रमतेजने । परामेवपरावतंसपत्नींगमयामसि ४ अहमस्मिसहमानाथत्वमसिसासहिः । उभेसहस्वतीभूत्वीसपत्नींमेसहावहै ५ उपतेऽधांसहमानामभित्वाधांसहीयसा । मामनुव्रतेमनोवत्संगौरिवधावतुपथावारिवधावतु ६ ॥ ३ ॥

ग्राःसूर्येणसह्याः । गुहाहितंगुह्यंगूळ्हमप्सुविभूमसिंप्रस्रवणेनसोमम् २ अर्योवा गिरोअभ्यर्चविद्वानृषीणांविप्रःसुमतिंचकानः । तेस्यामयेरणयंन्तसोमैरेनोततुभ्यैरधोळ्हभक्षैः ३ इमाब्रह्मेन्द्रतुभ्यंशंसिदानृभ्योनृणाशूरशवः । तेभिर्भवसक्रतूयेपुचाकन्नुतत्रायस्वगृणतउतस्तीन् ४ श्रुधीहवमिन्द्रशूरपृथ्याउतस्तवसेवन्यस्यार्कैः । आयस्तेयोनिंघृतवन्तमस्वाऋमिर्ननिम्नैरुद्वयन्तवक्वाः ५ ॥ ६ ॥

सविता पञ्चार्चन्हैरण्यस्तूपः सविता त्रिष्टुप् ।

१४१ सवितायन्त्रैःपृथिवीमरम्णादस्कम्भनेसविताद्यामदृंहत् । अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्तंबद्बंसवितासमुद्रम् १ यत्रासमुद्रःस्कभितोव्यौनदपांनपात्सवितातस्यवेद । अतोभूरतआउत्थितंरजोऽतोद्यावापृथिवीअप्रथेताम् २ पश्येदमन्यदभवद्यजत्रममर्त्यस्यभुवनस्यभूना । सुपर्णोअङ्गसवितुर्गरुत्मान्पूर्वो

सीअनुरेजंतेशुष्मात्पृथिवीचिंदद्रिवः १ त्वंमायाभिरनवद्यमायिनंश्रवस्यताम-
नंसावृत्रमर्दयः । त्वामिन्नरोवृणतेगविष्टिषुत्वांविश्वासुहव्यास्विष्टिषु २ एवंचा-
कन्धिपुरुहूतसूरिषुंवधासोयेमघवन्नानशुर्मघम् । अचैंन्तितोकेतनंयेपरिष्टिषुमे-
धसातावाजिनंमहंयेधनें ३ सइन्नुरायःसुभृतस्यचाकनन्मदंयोअस्यरंह्यंचिकेत-
ति । त्वावृधोमघवन्दाश्वंध्वरोमक्षूसवाजंभरतेधनानृभिः ४ त्वंशर्धायमहिना
गृणानउरुकृधिमघवञ्छरिधरायः । त्वंनोमित्रोवरुणोनमायीपित्वोनदस्मदयसे-
विभक्ता ५ ॥ ५ ॥

सुप्वाणासः पञ्च पृथुर्वैन्य इन्द्रस्त्रिष्टुप् ।

१४८ सुप्वाणासइन्द्रस्तुमसित्वाससवांसश्चतुविनृम्णवाजम् । आनोभर
सुवितंयस्यंचाकन्मनातनासनुयामत्वोताः १ ऋष्वस्त्वमिन्द्रशूरजातोदासीवि

तोऽग्निमंनुष्या३ऋषयःसमीधिरे ॥ अग्निमहोधनंसातावहंहुवेमृळीकंधनंसात-
ये ४ अग्निरत्रिंभरद्वाजंगविष्ठिरंप्रावन्नःकण्वंत्रसदस्युमाहवे । अग्निंवसिष्ठोहवते
पुरोहितोमृळीकायपुरोहितः ५ ॥ ८ ॥

श्रद्धया पञ्च श्रद्धा कामायनी श्रद्धानुष्टुप् ।

१५१ श्रद्धयाग्निःसमिध्यतेश्रद्धयाहूयतेहविः । श्रद्धांभगस्यमूर्धनिवचसावे-
दयामसि १ प्रियंश्रद्धेददतःप्रियंश्रद्धेदिदासतः । प्रियंभोजेषुयज्वस्विदंमउदितं
कृधि २ यथादेवाअसुरेषुश्रद्धामुग्रेषुंचक्रिरे । एवंभोजेषुयज्वस्वस्माकमुदितंकृ-
धि ३ श्रद्धांदेवायजमानावायुगोपाउपासते । श्रद्धांहृदय्या३याकूत्याश्रद्धयाविं-
न्दतेवसु ४ श्रद्धांप्रातर्हवामहेश्रद्धांमध्यंदिनंपरि । श्रद्धांसूर्यस्यनिम्रुचिश्रद्धेश्र-
द्धापयेहनः ५॥९॥ इति शाकलसंहितायां दशमे मण्डले एकादशोनुवाकः॥१०॥११॥

जातःसउअस्यानुधर्मं ३ गावइवग्रामंयूयुधिरिवाश्वान्वाश्रेववत्संसुमनादुहाना । पतिरिवजायामभिनोन्यैतुधर्तादिवःसविताविश्ववारः ४ हिरण्यस्तूपःसवितर्यथात्वाङ्गिरसोजुह्वेवाजेअस्मिन् । एवात्वार्चन्नवसेवन्दमानःसोमस्येवांशुं प्रतिजागराहम् ५ ॥ ७ ॥

समिद्धः पञ्च मृळीको वासिष्ठोग्निर्बृहती । उपान्त्योपरिष्टाज्ज्योतिर्जगती वा ।
अन्त्योपरिष्टाज्ज्योतिः ।

१५० समिद्धश्चित्समिध्यसेदुवेम्योहव्यवाहन । आदित्यैरुद्रैर्वसुभिर्नआगहिमृळीकायनआगहि १ इमंयज्ञमिदंवचोजुजुषाणउपागहि । मतींसस्त्वासमिधानहवामहेमृळीकायहवामहे २ त्वामुजातवेदसंविश्ववारंगृणेधिया । अग्नेदेवाँआवहनःप्रियव्रतान्मृळीकायप्रियव्रतान् ३ अग्निर्देवोदेवानामभवत्पुरोहि-

क्षमतिरः। उद्वयमंस्तभ्नाओजसा ३ त्वमिन्द्रसजोषसमकांवंभर्पिवाह्वोः। व-ज्रंशिशानओजसा ४ त्वमिन्द्राभिभूरसिविश्वांजाताान्योजसा । सविश्वाभुव आभवः ५ ॥ ११ ॥

सोमः पञ्च यमी भाववृत्तमनुष्टुप्।

१५४ सोमएकेभ्यःपवतेघृतमेकउपांसते । येभ्योमधुप्रधावंतितांश्चिंदेवापिंगच्छतात् १ तपंसायेअंनाधृष्यास्तपंसायेस्वंर्ययुः। तपोयेचंक्रिरेमहस्तांश्चिंदेवापिंगच्छतात् २ येयुर्ध्यन्तेप्रधनेंषुशूरांसोयेतंनूत्यजंः। येवांसहस्रंदक्षिणास्तांश्चिंदेवापिंगच्छतात् ३ येचित्पूर्वंऋतसापंऋतावांनऋतावृधंः। पितृन्तपंस्वतोयमुतांश्चिंदेवापिंगच्छतात् ४ सहस्रंणीथाःकवयोयेगोपायन्तिसूर्यंम् । ऋषीन्तपंस्वतोयमतपोजाँअपिंगच्छतात् ५ ॥ १२ ॥

अरायि पञ्च शिरिम्बिठो भारद्वाजोऽनुष्टुप्। आद्योपान्त्ययोरलक्ष्मीनाशकोर्थो देवता। अन्त्याया विश्वेदेवाः। शिष्टयोर्ब्रह्मणस्पतिः।

१५५ अरायिकाणेविकटेगिरिंगच्छसदान्वे। शिरिम्बिठस्यसत्वभिस्तेभिर्-
गाचातयामसि १ चत्तोइतश्चत्तामुतःसर्वाभ्रूणान्यारुषी। अराय्यब्रह्मणस्पतेतीर्-
गंगृङ्क्ष्वेहपन्निहि २ अदोयद्दारुप्लवतेसिन्धोःपारेअपूरुषम्। तदारभस्वदुर्हणोतेर्-
नगच्छपरस्तरम् ३ यद्वप्राचीरजगन्तोरौमण्डूरधाणिकीः। हताइन्द्रस्यशत्रवः
सर्वेबुद्बुदयाशवः ४ परीमेगामनेषतपर्यग्निमहृषत। देवेष्वक्रतश्रवःकडुमाँआ
विवर्धति ५ ॥ १३ ॥

अग्नि पञ्च केतुराग्नेयोग्निर्गायत्री।

१५६ अग्निंहिन्वन्तुनोधियःसप्तिमाशुमिवाजिषु। तेनंजेष्मधनंधनम् १

यया॒गाआ॒कर॑ाम॒हेसे॒नयाग्ने॒तवो॒त्या । तां नो॑हिन्व॒मघ॑त्तये २ अग्ने॒स्थूर॑र॒यिंभ॑रपृ-थुं॒गोमं॑न्तम॒श्विन॑म् । अङ्गि॑खं॒वर्त॑या॒पणि॑म् ३ अग्ने॒नक्ष॑त्र॒मज॑र॒मासू॑र्यरोहयो दि॒वि । दध॒ज्ज्योति॒र्जने॑भ्यः ४ अग्ने॑के॒तुर्वि॒शाम॑सि॒प्रेष्ठ॒:श्रेष्ठ॑उपस्थ॒सत् । बोधा॑ स्तो॒त्रेवयो॒दध॑त् ५ ॥ १४ ॥

इमा नु कं पञ्च भुवन आप्यः साधनो वा भौवनो विश्वेदेवा द्विपदा त्रिष्टुप् ।

१५७ इ॒मानु कं॒भुव॑नासीषधा॒मेन्द्र॑श्च॒विश्वे॑चदे॒वाः १ य॒ज्ञंच॑नस्त॒न्वं॑चप्र॒जां चा॑दि॒त्यैरिन्द्रः॑स॒हचीकॢपाति २ आ॒दि॒त्यैरिन्द्र॒:सग॑णोम॒रुद्भि॑र॒स्माकं॑भूत्वावि॒तात॒-नूना॑म् ३ ह॒त्वाय॑देवाअसु॒रान्यदाय॑न्दे॒वादे॑व॒त्वमा॒भिर॑क्षमाणाः ४ प्र॒त्यञ्चं॑म॒र्कम॑-नय॒ञ्छची॑भि॒रादित्स्व॒धामि॑पि॒रांप॑र्यपश्यन् ५ ॥ १५ ॥

सूर्यो नः पञ्च सौर्यचक्षुः सूर्योगायत्री ।

१५८ सूर्यो॑नोदि॒वस्पा॑तुवातो॑अ॒न्तरि॑क्षात् । अ॒ग्निर्न॑:पार्थि॒वेभ्यः १ जोषा॑ सवितर्यस्यते॒हर॑:शतं॒सवा॑ँअहँति । पा॒हिनो॑दि॒युत॒:पत॑न्त्याः २ चक्षु॑नो॑दे॒वःसं॑वि॒-ताचक्षु॑र्न॒उतपर्व॑तः । चक्षु॑र्धा॒तादधा॑तुनः ३ चक्षु॑नो॑धेहि॒चक्षु॑षे॒चक्षु॑र्वि॒ख्यैत॒नू-भ्यः । संचेदं॑विचपश्येम ४ सु॒सं॒दृशं॑त्वावयंप्रति॑पश्येमसूर्य । विप॑श्येमनृ॒च-क्षसः ५ ॥ १६ ॥

उदसौ पट् शची पौलोमी शची पौलोम्यनुष्टुप् ।

१५९ उद॒सौसूर्यो॑अगा॒दुद॒यंमा॑म॒कोभगः । अ॒हंत॑द्वि॒द्वलापति॑म॒भ्यसाक्षि विषास॒हिः १ अ॒हंके॒तुर॒हंमू॒र्धाहम॒ग्रावि॒वाच॑नी । ममेदनु॒क्रतुं॑पतिः॑सेहा॒नाया॑उपा-चरेत् २ मम॑पु॒त्राःश॑त्रु॒हणो॑ऽथो॑मेदु॒हि॒ता॒वि॒राट् । उ॒ताहमा॑स्मिसंज॒यादत्यो॑मे ॥६७१॥

श्लोकउत्तमः ३ येनेन्द्रोहविषाकृत्व्यभवद्द्युम्युत्तमः । इदंतदक्रिदेवाअसपत्नाकिलाभुवम् १ असपत्नासपत्नघ्नीजयन्त्यभिभूवरी । आवृक्षमन्यासांवचोराधोअस्थेयसामिव ५ सर्मजैषमिमाअहंसपत्नीरभिभूवरी । यथाहमस्यवीरस्यविराजनिजनस्यच ॥ ६ ॥ १७ ॥

तीव्रस्य पञ्च पूरणो वैश्वामित्र इन्द्रस्तिष्टुप् ।

१६० तीव्रस्याभिवयसोअस्यपाहिसवरथाविहरीइहमुञ्च । इन्द्रमात्वायजमानासोअन्येनिरीरमन्तुभ्यमिमेसुतासः १ तुभ्यैसुतास्तुभ्यमुसोत्वासस्त्वांगिरःश्वाञ्याआह्वयन्ति । इन्द्रेदमद्यसवनंजुषाणोविश्वस्यविद्वाँइहपाहिसोमम् २ यउशतामनसासोममस्मैसर्वहृदादेवकामःसुनोति । नगाइन्द्रस्तस्यपरादद्राति प्रशस्तमिच्चारुमस्मैकृणोति ३ अनुस्पष्टोभवत्येषोअस्ययोअस्मैरेवान्नसुनोति

सोमम्। निरर्तौमघवातंदंधातिब्रह्मद्विषोहन्त्यनानुदिष्टः ४ अश्वायन्तोगव्यन्तोवाजयन्तोहवामहेत्वोपगन्तवाउ । आभूषन्तस्तेसुमतौनवायांवयमिन्द्रत्वा शुनंहुवेम ५ ॥ १८ ॥

मुञ्चामि त्वा पञ्च यक्ष्मनाशनः प्राजापत्यो राजयक्ष्मघ्नं त्रिष्टुप्। अत्यानुष्टुप्।

१६१ मुञ्चामित्वाहविषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात् । अथाहिंर्जग्राहयदिवैतदेनंतस्याइन्द्राग्नीप्रमुमुक्तमेनम् १ यदीक्षितायुर्यदिवापरेतोयदिं मृत्योरन्तिकंनीतएव । तमाहंराभिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय २ सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनम् । शतंयथेमंशरदोनयातीन्द्रो विश्वस्यदुरितस्यपारम् ३ शतंजीवशरदोवर्धमानःशतंहेमन्ताञ्छतमुवसन्ता- ॥६७॥

न्। शतमिन्द्राग्नीसंविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ४ आहार्षंत्वाविदं त्वापुनरागाःपुनर्नव। सर्वाङ्गःसर्वंतेचक्षुःसर्वमायुश्चतेऽविदम् ५ ॥ १९ ॥

ब्रह्मणा पदूक्षोह ग्राह्मो गर्भसंस्रावे मायश्चित्तमष्टानुष्।

१६२ ब्रह्मणाग्निःसंविदानोरक्षोहावांधतामितः। अमींवायस्तेगर्भंदुर्णामायो-निंमाशयें १ यस्तेगर्भममींवादुर्णामायोनिंमाशयें। अग्निष्टंब्रह्मणासहनिष्क्रव्या-दंमनीनशत् २ यस्तेहन्तिपतयन्तंनिषत्स्नुयःसरीसृपम्। जातंयस्तेजिघांसति-मितोनाशयामसि ३ यस्तंऊरूविहरत्यन्तरादम्पतीशयें। योनिंयोअन्तरारेक्षि तमितोनाशयामसि ४ यस्त्वाभ्रातापतिर्भूत्वाजारोभूत्वानिपद्यते। प्रजांय स्तेजिघांसतितमितोनाशयामसि ५ यस्त्वास्वप्नेनतमसामोहयित्वानिपद्यते। प्रजांयस्तेजिघांसतितमितोनाशयामसि ६ ॥ २० ॥

१६३अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि।यक्ष्मंशीर्ष्ण्यंमास्तिष्काज्जिह्वायाविवृहामिते १ ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात् । यक्ष्मंदोष्ण्यं१मंसाभ्यांबाहुभ्यांविवृहामिते २ आन्त्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि । यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविवृहामिते ३ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्याम् । यक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ४ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः । यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ५ अङ्गादङ्गाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि । यक्ष्मंसर्वस्मादात्मनस्तमिदं विवृहामिते ६ ॥ २१ ॥

॥६७१॥

अपेहि पञ्च दुःस्वप्नघ्यनुष्टुप् । तृतीया त्रिष्टुप् । अन्त्या पाङ्क्तः ।

१६४ अपेहिमनसस्पतेऽपक्रामपरश्चर । परोनिर्ऋत्याआचक्ष्वबहुधाजीवतोमनः १ भद्रंवैवरंवृणतेभद्रंयुञ्जन्तिदक्षिणम् । भद्रंवैवस्वतेचक्षुर्बहुत्राजीवतोमनः २ यदाशसानिःशसाभिशसोपारिमजाग्रतोयत्स्वपन्तः । अग्निर्विश्वान्यपदुष्कृतान्यजुष्टान्यारेअस्मद्दधातु ३ यदिन्द्रब्रह्मणस्पतेऽभिद्रोहंचरामसि । प्रचेतानआङ्गिरसोहिंषतांपात्वंहसः ४ अजैष्माद्यासनामचाभूमानागसोवयम् । जाग्रत्स्वप्नःसंकल्पःपापोयंहिष्मस्तंसनिर्ऋच्छतुयोनोद्वेष्टितमृच्छतु ५ ॥ २२ ॥

देवाः पञ्च कपोतो नैर्ऋतः कपोतोपहतौ प्रायश्चित्तं विश्वेदेवास्त्रिष्टुप् ।

१६५ देवाःकपोतइषितोयदिच्छन्दूतोनिर्ऋत्याइदमाजगाम । तस्माअर्चामकृणवामनिष्कृतिंशंनोअस्तुद्विपदेशंचतुष्पदे १ शिवःकपोतइषितोनोअस्त्वना-

गादेवाःशकुनोगृहेषु । अग्निर्हविर्विप्रोजुषतांहविर्नःपरिहेतिःपक्षिणीनोवृणक्तु २ हेतिःपक्षिणीनदभात्यस्मानाट्र्यांपदंकृणुतेअग्निधाने । शंनोगोभ्यश्चपुरुषेभ्यश्चास्तुमानोहिंसीदिहदेवाःकपोतः ३ यदुलूकोवदतिमोघमेतद्यत्कपोतःपदमग्नौ कृणोति । यस्यदूतःप्रहितएषएतत्तस्मैयमायनमोअस्तुमृत्यवे ४ ऋचाकपोतं नुदतप्रणोदमिषंमदन्तःपरिगानंयध्वम् । संयोपयन्तोदुरितानिविश्वाहित्वानऊर्जंप्रपतात्पतिष्ठः ५ ॥ २३ ॥

ऋषभं पश्य ऋषभो वैराजः शाक्वरो वा सपत्नक्षयनुष्टुप् । अन्त्या महापङ्क्तिः ।

१६६ ऋषभंमांसमानानांसपत्नानांविषासहिम् । हन्तारंशत्रूणांकृधिविराजंगोपतिंगवाम् १ अहमस्मिसपत्नहेन्द्रइवारिष्टोअक्षतः । अधःसपत्नामेपदोरिमेसर्वेअभिष्ठिताः २ अत्रैववोऽपिनह्याम्युभेआर्त्नीइवज्यया । वाचस्पतेनि

पेथेमान्यथामदर्धरंवदान् ३ अभिभूरहमागमंविश्वकर्मेणधात्रा । आवश्चित्तमा
वोव्रतमावोऽहंसमितिंददे ४ योगक्षेमंवआदायाहंभूयासमुत्तमआवोमूर्धानंमक्र-
मीम् । अधस्पदान्मउद्वदतमण्डूकाइवोदकान्मण्डूकाउदकादिव ५ ॥ २४ ॥

तुभ्येदं चतुष्कं विश्वामित्रजमदग्नी इन्द्रो जगती । उपान्त्याया लिङ्गोक्तदेवता ।

१६७ तुभ्येदमिन्द्रपरिषिच्यतेमधुत्वंसुतस्यकलशस्यराजसि । त्वंरयिंपुरु-
वीरामुनस्कृधित्वंतपःपरितप्याजयःस्वः १ स्वजितंमहिमन्दानमन्धसोहवामः
हेपरिशक्रंसुताँउप । इमंनोयज्ञमिहवोध्यागंहिस्पृधोजयन्तंमघवानमीमहे २
सोमस्यराज्ञोवरुणस्यधर्मणिबृहस्पतेरनुयत्याउशर्मणि । तवाहमद्यमघवन्नुपस्तु-
तौधातर्विधातःकलशाँअभक्षयम् ३ प्रसूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथ-
मःसूरिरुन्मृजे । सुतेसातेनयद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमे ४ ॥ २५ ॥

वातस्य चतुष्कमनिलो वातायनो वायुस्त्रिष्टुप् ।

१६८ वातस्यानुमंहिमानंरथस्यरुजन्नेतिस्तनयन्नस्यघोषः । दिविस्पृग्यात्यरुणानिकृण्वन्नुतोएतिपृथिव्यारेणुमस्यन् १ संप्रेरतेअनुवातस्यविष्ठाएनंगच्छन्तिसमनंनयोषाः । ताभिःसयुक्सरथंदेवईयतेऽस्यविश्वस्यभुवनस्यराजा २ अन्तरिक्षेपथिभिरीयमानोननिविशतेकतमच्चनाहः । अपांसखाप्रथमजाऋतावाक्कस्विज्जातःकुतआबभूव ३ आत्मादेवानांभुवनस्यगर्भोयथावशंचरतिदेवएषः । घोषाइदस्यशृण्विरेनरूपंतस्मैवातायहविषाविधेम ४ ॥ २६ ॥

मयोभूश्चतुष्कं शबरः काक्षीवतो गावस्त्रिष्टुप् ।

१६९ मयोभूर्वातोअभिवातुस्राऊर्जस्वतीरोषधीरारिशन्ताम् । पीवस्वतीर्जीवधन्याःपिबन्त्ववसायपद्वतेरुद्रमूळ १ याःसरूपाविरूपाएकरूपायासांमग्नि- ॥६७८॥

रिष्ट्यानामानिवेदं । याअङ्गिरस्तपसेहचक्रुस्ताभ्यःपर्जन्यमहिशर्मयच्छ २ यादेवेषुतन्वं१मैरयन्तयासांसोमोविश्वारूपाणिवेदं । ताअस्मभ्यंपयसापिन्वमानाःप्रजावतीरिन्द्रगोष्ठेरिरीहि ३प्रजापतिर्मह्यमेतारराणोविश्वैर्देवैःपितृभिःसंविदानः । शिवाःसतीरुपनोगोष्ठमाकस्तासांवयंप्रजयासंसदेम ४ ॥ २७ ॥

विभ्राड्बृहतुष्कं विभ्राट्सौर्यः सूर्यो जगती । अन्त्याऽऽस्तारपङ्क्तिः

१७० विभ्राड्बृहत्पिबतुसोम्यंमध्वायुर्दधद्यज्ञपतावविंहुतम् । वातंजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति १ विभ्राड्बृहत्सुभृतंवाजसातमं घर्मन्दिवोधरुणेसत्यमर्पितम् । अमित्रहावृत्रहादस्युहन्तमंज्योतिर्जज्ञेअसुरहा सपत्नहा २ इदंश्रेष्ठंज्योतिषांज्योतिरुत्तमंविश्वाजिद्धनाजिदुच्यतेबृहत् । विश्वभ्राड्भ्राजोमहिसूर्योदृशउरुपंप्रथेसहओजोअच्युतम् ३ विभ्राजञ्ज्योतिषास्वं-

१रगंच्छोरोचनंदिवः । येनेमाविश्वाभुवनान्याभृताविश्वकर्मणाविश्वदेव्यावता ४ ॥ २८ ॥

त्वं त्यं चतुष्कामिटो भार्गव इन्द्रो गायत्री ।

१७१ त्वंत्यमिटतोरथमिन्द्रप्रावंःसुतावंतः । अशृणोःसोमिनोहवम् १ त्वंमखस्यदोधतुःशिरोऽवंत्वचोभरः । अगंच्छःसोमिनोगृहम् २ त्वंत्यमिंन्द्रमर्त्यमास्त्रबुध्नार्यवेन्यम् । मुहुंःश्रथ्नामनस्यवै ३ त्वंत्यमिंन्द्रसूर्यंपश्वासन्तंपुरस्कृधि । देवानांचित्तिरोवशम् ४ ॥ २९ ॥

आ याहि चतुष्कं संवर्त उषा द्विपदा विराट् ।

१७२ आयांहिवनंसासहगावंःसचन्तवर्तनिंयदूधंभिः १ आयांहिवस्व्यां- ॥६७६॥

धियामंहिष्ठोजारयन्मंखःसुदानुभिः २ पितुभृतोनतन्तुमित्सुदानवःप्रतिदध्मोय-
जांमसि ३ उपाअपस्वसुस्तमःसंवर्तयतिवर्तनिंसुजातता ४ ॥ ३० ॥

आ त्वा पड्ध्रुवो राज्ञः स्तुतिरनुष्टुप्।

१७३ आत्वांहार्षमन्तरेधिध्रुवस्तिष्ठाविंचाचलिः । विशस्त्वासर्वावाञ्छन्तु
मात्वद्राष्ट्रमधिभ्रशत् १ इहैवैधिमापच्योष्ठाःपर्वतइवाविंचाचलिः । इन्द्रइवेह-
ध्रुवस्तिष्ठेहराष्ट्रमुधारय २ इममिन्द्रोअदीधरद्ध्रुवंध्रुवेणहविषा । तस्मैसोमो
अधिब्रवत्तस्मांउब्रह्मणस्पतिः ३ ध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासःपर्वताइमे । ध्रुवंवि-
श्वंमिदंजगद्ध्रुवोराजाविशामयम् ४ ध्रुवंतेराजावरुणोध्रुवंदेवोबृहस्पतिः । ध्रुवं
तइन्द्रश्चाग्निश्चराष्ट्रंधारयतांध्रुवम् ५ ध्रुवंध्रुवेणहविषाभिसोमंमृशामसि । अथो
तइन्द्रःकेवलीर्विशोबलिहृतंस्करत् ६ ॥ ३१ ॥

अभीवर्तेन पञ्चाभीवर्तो राज्ञः स्तुतिरनुष्टुप्।

१७४ अभीवर्तेनहविषायेनेन्द्रोअभिवावृते । तेनास्मान्ब्रह्मणस्पतेऽभिराष्ट्रायवर्तय १ अभिवृत्यसपत्नान्भियानोअरातयः । अभिपृतन्यन्तंतिष्ठाभियोनइरस्यतिं २ अभित्वादेवःसविताभिसोमोअवीवृतत् । अभित्वाविश्वाभूतान्यभीवर्तोयथासंसि ३ येनेन्द्रोहविषाकृत्व्यभवद्द्युम्न्युत्तमः । इदंतदक्रिदेवाअसपत्नःकिलाभुवम् ४ असपत्नःसपत्नहाभिराष्ट्रोविषासहिः । यथाहमेषांभूतानांविराजानिजनस्यच ५ ॥ ३२ ॥

प्र वश्चतुष्कमूर्ध्वग्रावार्बुदिर्ग्रावाणो गायत्री ।

१७५ प्रवोग्रावाणःसवितादेवःसुवतुधर्मणा । ध्रुवंयुज्यध्वंसुनुत १ ग्रावाणोअपदुच्छुनामपसेधतदुर्मतिम् । उग्राःकंतनभेषजम् २ ग्रावाणउपरेष्वामं- ॥६७७॥

हीयन्तेसुजोषसः । वृष्णेदधतोवृष्ण्यम् ३ ग्रावाणःसवितानुवोदेवःसुवतुधर्मणा । यजमानायसुन्वते ४ ॥ ३३ ॥

म सूनवश्चतुष्कं सूनुरार्भवोग्निरनुष्टुप् । आद्याया ऋभवः । उपाद्या गायत्री ।

१७६ प्रसूनवंऋभूणांवृहन्नवन्तवृजना । क्षामायेविश्वधायसोऽभन्वेनुंनमातरम् १ प्रदेवंदेव्याधियाभरताजातवेदसम् । हव्यानोवक्षदानुषक् २ अयमुष्यप्रदेवयुर्होतायज्ञायनीयते । रथोनयोरभीवृतोघृणीवाश्चेततित्मना ३ अयमग्निरुरुष्यत्यमृतादिवजन्मनः । सहंसश्चित्सहीयान्देवोजीवातवेकृतः ४ ॥ ३४ ॥

पतङ्गं तृचं पतङ्गः माजापत्यो मायाभेदास्त्रिष्टुप् । आद्या जगती ।

१७७ पतङ्गमक्तमसुरस्यमायया हृदापश्यन्तिमनसाविपश्चितः । समुद्रेअन्तः कवयोविचक्षतेमरीचीनांपदमिच्छन्तिवेधसः १ पतङ्गोवाचंमनसाबिभर्तितांगं-

न्वर्वाँऽवद्द्रभेँअन्तः । तांद्योतमानांस्वर्यँमनीषामृतस्यंपदेकवयोनिपांन्ति २ अपश्यंगोपामनिपद्यमानुमाचपराचपथिभिश्चरन्तम् । सस्प्रीचीःसविषूचीर्वसानआवरीवर्तिभुवनेष्वन्तः ३ ॥ ३५ ॥

त्यमू षु वृचमरिष्टनेमिन्तार्क्ष्यस्त्रिष्टुप् ।

१७८ त्यमूषुवाजिनंदेवजूतंसहावानंतरुतारंरथानाम् । अरिष्टनेमिंपृतनाजंसाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम १ इन्द्रस्येवरातिमाजोहुवानाःस्वस्तयेनावमिवारुहेम । उर्वीनपृथ्वीबहुलेगभीरेमावामेतौमापरेतौरिषाम २ सद्यश्चिद्यःशवसापञ्चकृष्टीःसूर्यइवज्योतिषापस्ततान । सहस्रसाःशतसाअस्यरंहिर्नस्मावरन्तेयुवतिंनशर्याम् ३ ॥ ३६ ॥

उत्तिष्ठत ऋचमिन्द्रस्त्रिष्टुप् आद्यायाः शिबिरौशीनरः । मध्यायाः प्रतर्दनः काशिराजः ।
अन्त्यायाः वसुमना रौहिदश्वः । आद्यानुष्टुप् ।

१७१ उत्तिष्ठतावपश्यतेन्द्रस्यभागमृत्वियम् । यदिश्रातोजुहोतनयद्यश्रांतो
ममत्तन १ श्रातंहविरोष्विन्द्रप्रयांहिजगाम्मूरोअध्वनोविमध्यम् । परित्वासते
निधिभिःसखायःकुलपानव्राजपतिंचरन्तम् २ श्रातंमन्यऊधनिश्रातमग्नौसु-
श्रातंमन्येतदृतंनवीयः । माध्यंदिनस्यसवनस्यदध्नःपिवेन्द्रवज्रिन्पुरुकृज्जु-
षाणः ३ ॥ ३७ ॥

म ससाहिषे ऋचं जय ऐन्द्र इन्द्रस्त्रिष्टुप् ।

१८० प्रससाहिषेपुरुहूतशत्रूञ्जयेष्ठस्तेशुष्मइहरातिरस्तु । इन्द्राभरदक्षिणेनावसूनिपतिःसिन्धूनामसिरेवतीनाम् १ मृगोनभीमःकुचरोगिरिष्ठाःपरावतआज-

गन्थापरंस्याः । सृकंसंशायंपविमिन्द्रतिग्मंविशत्रून्ताछिविमृधोनुदस्व २ इन्द्रं क्षत्रमभिवाममोजोऽजायथावृषभचर्षणीनाम् । अपानुदोजनंमामित्रयन्तमुरुं देवेभ्योअकृणोरुलोकम् ३ ॥ ३८ ॥

मथश्च तृचं विश्वेदेवास्त्रिष्टुप् आद्यायाः मथो वासिष्ठः ।
मध्यायाः समथो भारद्वाजः । अन्त्याया घर्मः सौर्यः ।

१८१ मथंश्चयस्यंसमथंश्चनामानुष्टुभस्यहविषोहविर्यत् । धातुर्द्युतांनात्सवितुश्चविष्णोरथंतरमाजभारावसिष्ठः१अविन्दन्तेअतिहितंयदासीद्यज्ञस्यधामपरमंगुहायत् । धातुर्द्युतांनात्सवितुश्चविष्णोर्भरद्वाजोबृहदाचक्रेअग्नेः २ तेऽविन्दन्मनसादीध्यानायज्ञैःष्कन्नंप्रथमंदेवयानम् । धातुर्द्युतांनात्सवितुश्चविष्णोरासृयांदभरन्घर्ममेते ३ ॥ ३९ ॥

बृहस्पतिस्तूचं त्रपुर्मूर्धा बार्हस्पत्यो बृहस्पतिस्त्रिष्टुप् ।

१८२ बृहस्पतिर्नयतुदुर्गहार्तिरःपुनर्नेषद्घशꣳसायमन्म । क्षिपदशस्तिमपदुर्मतिंहन्नथाकरद्यजमानायशंयोः १ नराशꣳसोनोऽवतुप्रयाजेशंनोअस्त्वनुयाजोहवेषु । क्षिपदशस्तिमपदुर्मतिंहन्नथाकरद्यजमानायशंयोः २ तपुर्मूर्धातपतुरक्षसोयेब्रह्मद्विषःशरवेहन्तवाउ । क्षिपदशस्तिमपदुर्मतिंहन्नथाकरद्यजमानायशंयोः ३ ॥ ४० ॥

अपश्यं प्रजावान्माजापत्यो बृहच्छ यजमानपत्नीहोत्राशिषास्त्रिष्टुप् ।

१८३ अपश्यंत्वामनसाचेकितानंतपसोजातंतपसोविभूतम् । इहप्रजामिहरयिंरराणःप्रजायस्वप्रजयापुत्रकाम १ अपश्यंत्वामनसादीध्यानांस्वायांतनूऋत्व्येनाधमानाम् । उपमामुच्चायुवतिंबभूयाःप्रजायस्वप्रजयापुत्रकामे २ अहंग-

भँमदधामोयंधीष्वहंविश्वेषुभुवनेष्वन्तः। अहंप्रजाअंजनयंपृथिव्यामहंजनिभ्यो अपरीषुपुत्रान् ३ ॥ ४१ ॥

विष्णुस्तृचं त्वष्टा गर्भकर्ता विष्णुर्वा प्राजापत्यो गर्भाधाशीर्लिङ्गोक्तदेवता अनुष्टुप्।

